**શિષ્ય ધર્મરત્નવિજય ગણી.**

# ओघनिर्युक्तिसारः

इरिआवहियाईया जे चेव हवंति कम्मबंधाय ।
अजयाणं ते चेव उ जयाण निव्वाणगमणाय ॥५५॥ नि०

जोगे जोगे जिणसासणंमि दुक्खक्खया पउंजंते ।
एक्केक्कंमि अणंता वट्टंता केवली जाया ॥२७८॥ नि०

वेयावच्चं निययं करेह उत्तमगुणे धरिन्ताणं ।
सव्वं किल पडिवाई वेयावच्चं अपडिवाई ॥५३४॥ नि०

निच्छ्यमवलंबंता निच्छ्यओ निच्छ्यं अयाणंता ।
नासंति चरणकरणं बाहिरकरणालसा केइ ॥७६२॥ नि०

चतुर्दशपूर्वधरश्रुतकेवलियुगप्रधानश्रीमद्भद्रबाहुस्वामिभिरुद्धृता
अनेकग्रन्थसंशोधकःसमर्थशास्त्रकारश्रीद्रोणाचार्यकृतविवृतियुता

# ।। श्री ओघनिर्युक्तिः ।।

**नमो [१]अरहंताणं । नमो सिद्धाणं । नमो आयरियाणं ।**
**नमो उवज्झायाणं । नमो लोए सव्वसाहूणं ।**
**एसो पंच नमुक्कारो सव्वपावप्पणासणो ।**
**मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ।।१।।**

**अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः सिद्धेभ्यः सितघनकर्मबन्धनेभ्यः ।**
**आचार्यश्रुतधरसर्वसंयतेभ्यः सिद्ध्यर्थी सततमहं नमस्करोमि ।।१।।**

प्रकान्तोऽयम**आवश्यका**नुयोगः, [२]तत्र च **सामायिकाध्ययन**मनुवर्त्तते, तस्य च चत्वार्यनुयोगद्वाराणि भवन्ति महापुरस्येव, तद्यथा- [३]उपक्रमो [४]निक्षेपो[५]ऽनुगमो [६]नय इति, एतेषां चाध्ययनादा उपन्यास इत्थं च क्रमोपन्यासे प्रयोजनमभिहितम्, तत्रोपक्रम-

---

१. अरहः-न विद्यते रहो विजनं यस्य सर्वज्ञत्वादसावरहः । (स्था.९)
अरहन्त-अर्हन्ति देवादिकृतां पूजामित्यर्हन्तः । (स्था.३)

२. तत्राध्ययनार्थकथनविधिरनुयोगः, द्वाराणीव द्वाराणि, महापुरस्येव सामायिकस्यानुयोगार्थं व्याख्यानार्थं द्वाराण्यनुयोगद्वाराणि, अत्र नगरदृष्टान्तं वर्णयन्त्याचार्याः, यथा हि अकृतद्वारं नगरमनगरमेव भवति, निर्गमप्रवेशोपायाभावतोऽनधिगमनीयत्वात्, कृतैकद्विकादिद्वारमपि दुरधिगमं कार्यातिपत्तये च भवति, चतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तये च संपद्यते, एवं सामायिकपुरमप्यर्थाधिगमोपायद्वारशून्यमशक्याधिगमं स्याद्, एकादिद्वारानुगतमपि दुरधिगमं भवेत्, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगमं भवति, अतः फलवाँस्तदधिगमार्थो द्वारोपन्यासः । (अनु.)

३. उपक्रमः-दूरस्थस्य वस्तुनस्तैस्तैः प्रतिपादनप्रकारैः समीपमानीय निक्षेपयोग्यताकरणमुपक्रमः । उपक्रम्यते वा निक्षेपयोग्यं क्रियतेऽनेन गुरुवाग्योगेनेत्युपक्रमः । उपक्रम्यतेऽस्मिन् शिष्यश्रवणभावे सतीत्युपक्रमः । (अनु.)

४. निक्षेपः-निक्षेपणं शास्त्रादेर्नामस्थापनादिभेदैर्न्यसनं व्यवस्थापनं निक्षेपः । निक्षिप्यते-नामादिभेदैर्व्यवस्थाप्यते अनेनास्मिन्नस्मादिति वा निक्षेपः । (अनु.)

५. अनुगमः-अनुगमनं सूत्रस्यानुकूलमर्थकथनमनुगमः । अथवा अनुगम्यते व्याख्यायते सूत्रमनेनास्मिन्नस्मादिति वाऽनुगमः। (अनु.)

६. नयः-नयनं नयो नीयते-परिच्छिद्यते अनेनास्मिन्नस्मादिति वा नयः । सर्वत्रानन्तधर्माध्यासिते वस्तुन्येकांशग्राहको बोध इत्यर्थः । (अनु.)

निक्षेपावुक्तौ, अधुनाऽनुगमावसरः, स च द्वेधा-निर्युक्त्यनुगमः[७] सूत्रानुगमश्च[८], तत्र निर्युक्त्यनुगमस्त्रिधा[९]-निक्षेपो[१०]पोद्घात[११]सूत्रस्पर्शि[१२]निर्युक्त्यनुगमभेदात्, तत्र निक्षेपनिर्युक्त्य-नुगमोऽनुगतो वक्ष्यमाणश्च, उपोद्घातनिर्युक्त्यनुगमस्त्वाभ्यां द्वाभ्यां द्वारगाथाभ्यामनुगन्तव्यः "★**उद्देसे निद्देसे य**" इत्यादि । अस्य च द्वारगाथाद्वयस्य समुदायार्थोऽभिहितः, अधुनाऽवयवार्थोऽनुवर्त्तते, तत्रापि कालद्वारावयवार्थः, तत्प्रतिपादनार्थं चेदं प्रतिद्वार-गाथासूत्रमुपन्यस्तम्- "★**दव्वे अद्ध अहाउय उवक्कमे**" इत्यादि, अस्यापि समुदायार्थो व्याख्यातः, साम्प्रतमवयवार्थः, तत्राप्युपक्रमकालाभिधानार्थमिदं गाथासूत्रमाह –

१ **"दुविहोवक्कमकालो सामायारी अहाउयं चेव ।**
**सामायारी तिविहा ओहे दसहा पयविभागे ॥१॥ प्र०**

[साम्प्रतमुपक्रमकालद्वारमाह –

**दुविहोवक्कमकालो सामायारी अहाउयं चेव ।**
**सामायारी तिविहा ओहे दसहा पयविभागे ॥६६५॥ दारं ॥**

द्विविधश्चासावुपक्रमकालश्चेति समासः, तदेव द्वैविध्यमुपदर्शयन्नाह-सामायारी अहाउअं चेव समाचरणं समाचारः-शिष्टाचरितः क्रियाकलापस्तस्य भावः गुणवचनब्राह्मणादिभ्यः कर्मणि च (पा० ५-१-१२४) ष्यञ् समाचार्य्यम्, पुनः स्त्रीविवक्षायां षिद्गौरादिभ्यश्चेति (पा० ४-१-४१) ङीष्,

---

७. 'निर्युक्त्यनुगमश्च' नितरां युक्ताः सूत्रेण सह लोलीभावेन सम्बद्धा निर्युक्ता अर्थास्तेषां युक्तिः-स्फुटरूपतापादनम्, एकस्य युक्तशब्दस्य लोपान्निर्युक्तिर्नामस्थापनादिप्रकारैः सूत्रविभजनेत्यर्थः, तद्रूपोऽनुगमस्तस्या वा अनुगमो व्याख्यानं निर्युक्त्यनुगमः । (अनु.)

८. सूत्रानुगमः सूत्रव्याख्यानमित्यर्थः । (अनु.)

९. निर्युक्त्यनुगमस्त्रिप्रकारः
(१) निक्षेपनिर्युक्त्यनुगमः (२) उपोद्घातनिर्युक्त्यनुगमः (३) सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च । (अनु.)

१०. निक्षेपनिर्युक्त्यनुगमः-निक्षेपस्तस्यनिर्युक्ति निक्षेपनिर्युक्तिः, तद्रूपस्तस्या वाऽनुगमो निक्षेपनिर्युक्त्यनुगमः । (अनु.)

११. उपोद्घातनिर्युक्त्यनुगमः-उपोद्घननं-व्याख्येयस्य सूत्रस्य व्याख्याविधिसमीपीकरणमुपोद्घातस्तस्य तद्विषया वा निर्युक्तिस्तस्या वा अनुगमः उपोद्घातनिर्युक्त्यनुगमः । (अनु.)

१२. सूत्रस्पर्शिकनिर्युक्त्यनुगमः-सूत्रं स्पृशतीति सूत्रस्पर्शिका, सा चासौ निर्युक्तिश्च सूत्रस्पर्शिकनिर्युक्तिः । तस्या अनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमः । (अनु.)

★ उद्देसे निद्देसे निग्गमे खेत्त काल पुरिसे य। कारण पच्चय लक्खण नए समोआरणाऽणुमए ॥१॥ किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं । कइ संतरमविरहियं भवागरिस फासण निरुत्ती ॥२॥ (आव०नि० १४०-४१) ★ दव्वे अद्ध अहाउय उवक्कमे देसकालकाले य । तह य पमाणे वण्णे भावे पगयं तु भावेणं ॥१॥ (आव० नि० ६६०)

यस्ये (पा० यस्येति च ६०४-१४८) त्यकारलोपः, यस्य हल (पा० ६-४-४९) इत्यनेन तद्धितयकारलोपः, परगमनं सामाचारी, तस्या उपक्रमणं-उपरिमश्रुतादिहानयनमुपक्रमः, सामाचार्युपक्रमश्चासौ कालश्चेति समासः, यथाऽऽयुष्कस्योपक्रमणं दीर्घकालभोग्यस्य लघुतरकालेन क्षपणमुपक्रमः, यथायुष्कोपक्रमश्चासौ कालश्चेति समासः, तत्र हि कालकालवतोरभेदात् कालस्यैव आयुष्काद्युपाधिविशिष्टस्योपक्रमो वेदितव्य इत्यभिप्रायः । तत्र सामाचारी त्रिविधा-ओहे दसहा पदविभागे त्ति ओघः सामान्यम्, ओघः सामाचारी सामान्यतः सङ्क्षेपाभिधानरूपा, सा चौघनिर्युक्तिरिति । दशविधसामाचारी इच्छाकारादिलक्षणा, पदविभागसामाचारी छेदसूत्राणीति । तत्रौघसमाचारी नवमात्पूर्वात् तृतीयाद्वस्तुन आचाराभिधानात् तत्रापि विंशतितमात्प्राभृतात्, तत्राप्योघप्राभृतप्राभृतात् निर्व्यूढेति, एतदुक्तं भवति-साम्प्रतकालप्रव्रजितानां तावच्छ्रुतपरिज्ञानशक्तिविकलानामायुष्कादिह्रासमपेक्ष्य प्रत्यासन्नीकृतेति । दशविधसामाचारी पुनः षड्विंशतितमादुत्तराध्ययनात्स्वल्पतरकालप्रव्रजितपरिज्ञानार्थं निर्व्यूढेति । पदविभागसामाचार्य्यपि छेदसूत्रलक्षणान्नवमपूर्वादेव निर्व्यूढेति गाथार्थः ॥ आव.नि.६६५ ॥]

२ **नवम य पच्चक्खाणाभिहाणपुव्वस्स तइयवत्थूओ ।**
**वीसइमपाहुडाओ तओ इहानीणिया जइया ॥२॥ प्र०**

३ **सो उ उवक्कमकालो तयत्थनिव्विग्घसिक्खणत्थं च ।**
**आईय कयं चिय पुणो मंगलमारंभये तं च ॥३॥'' प्र०**

तत्रोपक्रम इति कः शब्दार्थः ? उपक्रमणमुपक्रमः, उपशब्दः सामीप्ये **'क्रमु पादविक्षेपे' [पा० धा० ५०४]** उपेति सामीप्येन क्रमणमुपक्रमः, दूरस्थस्य समीपापादनमित्यर्थः, [1]तत्रोपक्रमकालो द्विधा- [13]सामाचार्युपक्रमकालो [14]यथायुष्कोपक्रमकालश्च, तत्र सामाचार्युपक्रमकालस्त्रि[2]विधः-ओघसामाचार्युपक्रमकालः, दशधासामाचार्युपक्रमकालः, पदविभागसामाचार्युपक्रमकालश्च, तत्रौघसामाचारी-**ओघनिर्युक्तिः**, [15]दशधासामाचारी **'इच्छा मिच्छे**'त्यादि गाथाद्वयरूपा,

---

१३. सामाचार्युपक्रमकालः-उपरितनश्रुतादिह तस्याः सामाचार्या आनयनमुपक्रमः, सामाचार्या उपक्रमः सामाचार्युपक्रमः, स चासौ कालश्च सामाचार्युपक्रमकालः । (आव.नि.६६५)

१४. यथायुष्कोपक्रमकालः-यथायुष्कस्योपक्रमणम्-दीर्घकालभोग्यस्य स्वल्पतरकालेन क्षपणं यथाऽऽयुष्कोपक्रमः, स चासौ कालश्च यथायुष्कोपक्रमकालः । (आव.नि.६६५)

१५. दशधासामाचारी-इच्छाकारादिलक्षणा । (आव.नि.६६५)

१. तत्र-पाठो नास्ति क.ख. २. त्रिरूपः ल.

★ इच्छा मिच्छा तहक्कारो आवस्सिआ य निसीहिआ । आपुच्छणा य पडिपुच्छा छंदणा य निमंतणा ॥
उवसंपया य काले सामायारी भवे दसहा । एएसिं तु पयाणं पत्तेय परूवणं वोच्छं ॥
(आव.नि.६६६-६६७)

[१६]पदविभागसामाचारी [१७]**कल्पव्यवहारौ** । तत्रौघसामाचारी पदविभागसामाचारी च नवम[१८]पूर्वान्तर्वर्ति यत् तृतीयमाचार[१९]वस्त्वस्ति तत्रापि विंशतितमात्[२०]प्राभृतात् साध्वनुग्रहार्थं **भद्रबाहुस्वामिना** निर्यूढा, दशधासामाचारी पुन**रुत्तराध्ययनेभ्यो** निर्यूढा '**इच्छा मिच्छे**'त्यादिका, तत्रैतदुपक्रमणं विंशतिवर्षपर्यायस्य [२१]**दृष्टिवादो** दीयते नारतः, इयं तु प्रथमदिवस एव दीयते, प्रभूतदिवसलभ्या सती स्वल्पदिवसलभ्या कृतेत्यर्थः, एवं पदविभागसामाचारी दशधासामाचार्यपीति । तत्रौघसा[२२]माचारी तावदभिधीयते, अस्याश्च महार्थत्वात् कथञ्चिच्छास्त्रान्तरत्वाच्चादावेवाचार्यो मङ्गलार्थं सम्बन्धादित्रयप्रतिपादनार्थं च गाथाद्वयमाह –

४ **अरहंते वंदित्ता चोद्दसपुव्वी तहेव दसपुव्वी ।**
**एक्कारसंगसुत्तत्थधारए सव्वसाहू य ॥१॥ नि०**

५ **ओहेण उ निज्जुत्तिं वुच्छं चरणकरणाणुओगाओ ।**
**अप्पक्खरं महत्थं अणुग्गहत्थं सुविहियाणं ॥२॥ नि० । जुयलं ।**

**अरहंते**त्यादि । अत्राह-किमर्थं शास्त्रारम्भे मङ्गलं क्रियते ? इति, उच्यते-विघ्नविनायकोपशमनार्थम्, तथा चोक्तम्- "★**श्रेयांसि बहुविघ्नानि, भवन्ति**" इत्यादि। श्रेयोभूता चेयमतो मङ्गलं कर्तव्यम्, तच्च नामादिभेदेन चतुर्धा, तत्र

---

१६. पदविभागसामाचारी-पदयोरुत्सर्गापवादयोर्विभागो यथास्थानं निवेशस्तेन युक्ता सामाचारी छेदसूत्ररूपा पदविभागसामाचारीति। (धर्म.३ अधि.)

१७. छेदसुत्त-छेदसूत्र-कल्पऽऽदौ, उत्सारकशास्त्रे, ते च षट्-निशीथं महानिशीथं दशाश्रुतस्कंधो बृहत्कल्पो व्यवहार पञ्चकल्पश्चेति। (ही.प्र.)

१८. पूर्वःसर्वश्रुतात् पूर्वं क्रियत इति पूर्वाणि, उत्पादपूर्वादी चतुर्दशः। (नन्दी)

१९. वस्तु-नियतार्थाधिकारप्रतिबद्धो ग्रन्थविशेषोऽध्ययनवदिति। (सम. १३१)

२०. प्राभृतम्-अधिकारविशेषः। (सम. ८२)

२१. दृष्टिवादः-दर्शनानि वदनं वादो दृष्टीनां वादो दृष्टिवादः, दृष्टीनां वा पातो यत्रासौ दृष्टिपात-सर्वनयदृष्टय एवेहाख्यातवन्तः। (सम. १२९)

२२. सामाचारी-समाचरणं समाचारः, तद्भावः सामाचार्यम्, तदेव सामाचारी। संव्यवहारे (स्था. १० ठा.३ उ.) आगमोक्ताहोरात्रक्रियाकलापे। (ग.१ अधि.)

★ श्रेयांसि बहुविघ्नानि भवन्ति महतामपि। अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥१॥

नामस्थापने [१]सुज्ञाने, द्रव्यमङ्गलं दध्यादि, तच्चा[२३]नैकान्तिकम[२४]नात्यन्तिकं च, भावमङ्गलमर्हदादिनमस्कारः, तच्चै[२५]कान्तिकमात्यन्तिकं च ।

तदनेन सम्बन्धेनायातस्यास्य व्याख्या क्रियते-सा च लक्षणान्विता नालक्षणेति। लक्षणं च [२६]संहितादि, "★**संहिता च पदं चैव**" इत्यादि । तत्रास्खलितपदोच्चारणं संहिता, सा चेयम्-"**अरहंते वंदित्ता**" इत्यादिका ।

अधुना [२७]पदानि प्रतन्यन्ते-**अर्हतः वन्दित्वा चतुर्दशपूर्विणः तथा एव दशपूर्विणः एकादशाङ्गसूत्रार्थधारकान् सर्वसाधून् च** । एतावन्ति पदान्याद्यगाथासूत्रे, द्वितीयगाथासूत्रपदान्युच्यन्ते-**ओघेन तु निर्युक्तिं वक्ष्ये चरणकरणानुयोगात् अल्पाक्षरां महार्थां अनुग्रहार्थं सुविहितानाम्**, एतावन्ति पदानि ।

अधुना [२८]पदार्थः - **अरहंते** त्ति, अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तस्तान् **अर्हतः** । **वंदित्ता** इति **वन्दित्वा 'वदि अभिवादनस्तुत्योः' (पा. धा. ११)** स्तुत्वेत्यर्थः, समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययो भवतीति वन्दित्वा, किम् ? ओघनिर्युक्तिं वक्ष्य इति द्वितीयगाथाक्रियया सह योगः । किमर्हत एव वन्दित्वा ? नेत्याह-**चतुर्दशपूर्विणश्च** चतुर्दश पूर्वाणि विद्यन्ते येषां ते चतुर्दशपूर्विणस्तांश्च, वन्दित्वेति सर्वत्र क्रिया मीलनीया । किं एतानेव ? नेत्याह-**तथैव दशपूर्विणश्च** तथेत्यागमोक्तेन प्रकारेण एवेति क्रमनियमप्रतिपादनार्थम्, अनेनैव क्रमेण दशपूर्विण इति, दश पूर्वाणि विद्यन्ते येषां ते दशपूर्विणः । न केवलं तानेव, **एकादशाङ्गसूत्रार्थधारकाने**कादश च तान्यङ्गानि चैकादशाङ्गानि, एकादशाङ्गानां सूत्रार्थौ

---

२३. अनैकान्तिकत्वम्-द्रव्यमङ्गलसत्त्वेऽपि विघ्नविनायकोपशमाभावाद्, न तत् सत्त्वे कार्योत्पत्तिर्विधीयते तस्मादनैकान्तिकत्वम् । (संटी.)

२४. अनात्यन्तिकत्वम्-कदाचिद् द्रव्यमङ्गलात् कुत्रचित् कार्योत्पत्तिर्दृश्यते तथापि न सर्वदा विघ्नविनायकोपशान्तिस्तस्मादनात्यन्तिकत्वम् । (संटी.)

२५. एकान्तिकम् आत्यन्तिकं च-भावमङ्गलस्य सत्त्वेऽवश्यं कार्योत्पत्तिः, कदाचिदपि तत्सत्त्वे विघ्नविनायकस्य सत्त्वाभावादवश्यं सर्वदा च कार्यसिद्धेरैकान्तिकत्वम् आत्यन्तिकत्वं च । (संटी.)

२६. संहितादि-संहिया य पदं चेव, पयत्थो पयविग्गहो ।
चालणा य पसिद्धी अ, छव्विहं विद्धि लक्खणं ॥१॥ (अनु.)

२७. पदं तु करोमीत्येकं पदम्, भयान्त इति द्वितीयम् इत्यादि । (अनु.)

२८. पदार्थस्तु करोमीत्यभ्युपगमः, भयान्त इति गुर्वामन्त्रणमित्यादिकः । (अनु.)

१. क्षुण्णे प.

★ संहिता च पदं चैव पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥१॥

एकादशाङ्गसूत्रार्थौ, तौ धारयन्ति ये तानेकादशाङ्गसूत्रार्थधारकान् । **सर्वसाधूंश्चे**ति सर्वं साधयन्तीति सर्वसाधवोऽथवा सर्वे च ते साधवश्च सर्वसाधवस्तान् सर्वसाधूंश्च वन्दित्वा । चशब्दः समुच्चये, अथवाऽनुक्तसमुच्चये, यच्च समुच्चितं तत्प्रतिपादयिष्यामः ।

[२९]पदविग्रहस्तु यानि समासभाञ्जि पदानि तेषां समासः प्रतिपादितः ।

अधुना चा[३०]लनाया अवसरः, सा प्रतिपाद्यते, एवं व्याख्याते सत्याह परः- सर्वमेवेदं गाथासूत्रं न घटते, कथम् ? इह '**ओघनिर्युक्तिं** वक्ष्ये' इति प्रतिज्ञा, सा च प्रथममेव **नमस्कारसूत्रेण**[१] प्रतिपादिता, यदुत नमस्कारोऽपि संक्षेपेणैवाभिधातव्यः, न चासौ संक्षेपेण प्रतिपादितः, अपि तु विस्तरेण, अत्रार्हन्नमस्कार एव केवलः[२] संक्षेपनमस्कारो भवति, स एव कर्तव्यः, न चतुर्दशपूर्वधरादिनमस्कारः । अथ क्रियते, एवं तर्हि एकैकस्या व्यक्तेर्नमस्कारः कर्तव्यः, किं दशपूर्व्यादिनमस्कारेणेति, चतुर्दशपूर्विनमस्कारेणैव शेषाणां नमस्कारो भविष्यतीति । अथ भेदेन क्रियते, एवं तर्हि त्रयोदशपूर्वधरादीनामेकैकपूर्वहान्या तावत्कर्त्तव्यो यावत्पूर्वैकदेशधराणामिति ।

[३१][३२]अत्रोच्यते-यदित्थं चोद्यं क्रियते तदविज्ञायैव परमार्थम्, कथम् ? यदुक्तं तावत् संक्षेपग्रन्थोऽयं तदत्र नमस्कारोऽपि संक्षेपेण कर्तव्य इति । अत्र तावत्प्रतिविधीयते- येनैव संक्षेपग्रन्थोऽयं तेनैव लक्षणेनेत्थं नमस्कारः कृतः, तथाहि-सामान्येनार्हतां नमस्कारोऽभिहितः न विशेषेण एकैकस्य तीर्थकरस्य, तथाहि-भगवतामुपकारकत्वान्नमस्कारः क्रियते, येऽप्यमी चतुर्दशपूर्वधरास्तेऽप्युपकारका एव, कथमिति चेत्, अर्थद्वारेण तीर्थकरा उपकारकाः, सूत्रतस्तु [३३]चतुर्दश[३]पूर्वधरा [३४]गणधराः, यत उक्तम्-

---

२९. पदविग्रहः समासः, स चानेकपदानामेकत्वापादानविषयो यथा भयस्य अन्तो भयान्त इत्यादि । (अनु.)

३०. चालना-सूत्रस्यार्थस्य वा अनुपपत्त्युद्भावनं चालना । (अनु.)

३१. प्रसिद्धि :- चालनाया एवानेकोपपत्तिभिस्तथैव स्थापनं प्रसिद्धिः । (अनु.)

३२. प्रत्यवस्थानम् :- शब्दार्थन्यायतः परोपन्यस्तदोषपरिहाररूपम् । (उत्त. अ.१ गा.१)

३३. चोद्दसपुव्वी :- चतुर्दशपूर्विणः । चतुर्दश पूर्वस्येदं नामानि भवन्ति ।

(१) उत्पादपूर्वम् (२) अग्रायणीयपूर्वम् (३) वीर्यप्रवादपूर्वम् (४) अस्ति-नास्तिप्रवादपूर्वम् (५) ज्ञानप्रवादपूर्वम् (६) सत्यप्रवादपूर्वम् (७) आत्मप्रवादपूर्वम् (८) कर्मप्रवादपूर्वम् (९) प्रत्याख्यानप्रवादपूर्वम् (१०) विद्यानुप्रवादपूर्वम् (११) अवन्ध्यपूर्वम् (१२) प्राणायुपूर्वम् (१३) क्रियाविशालपूर्वम् (१४) लोकबिन्दुसारपूर्वम् । (नन्दी.)

३४. गणधराः- भगवतः सातिशयानन्तरशिष्याः (स्थानाङ्गः) सूत्रकर्ता । (आव.) (नि.१)

१. सूत्रे न संपादिता ल. २. केवलं क. ख. ३. चतुर्दशपूर्वधर-गणधराः क. ख.

"****अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं**" । इत्यादि, अत उपकारकास्त इति । अथवा द्वेधोपकारः-व्यवहितोपकारोऽनन्तरोपकारश्च । तत्र भगवन्तोऽर्हन्तो व्यवहितोपकारकत्वेन व्यवस्थिताः, चतुर्दशपूर्वधरास्त्वस्याचार्यस्यानन्तरोपकारकत्वेन, तेन चतुर्दशपूर्वधरनमस्कारः कृतः, सर्वाश्च चतुर्दशपूर्वधरव्यक्तय आगृहीता अनेन नमस्कारेणेति ।

यच्चोक्तम्-चतुर्दशपूर्विनमस्कारेणैव शेषाणां दशपूर्व्यादीनां नमस्कारो भविष्यति किं दशपूर्व्यादिनमस्कारेणेति ? अथ भेदेन क्रियते, एवं तर्हि त्रयोदशपूर्वधरादीनामेकैक-पूर्वहान्या तावत्कर्त्तव्यो यावत्पूर्वैकदेशधराणामिति, एतदप्यसाधु, कथम् ? यतो दशपूर्वधरा अपि शासनस्योपकारका **उपाङ्गादीनां** [३५]**संग्रहण्यु**परचनेन हेतुना, अथवा-ऽस्यामवसर्पिण्यां चतुर्दशपूर्व्यनन्तरं दशपूर्वधरा एव सञ्जाताः, न त्रयोदशपूर्वधरा द्वादशपूर्वधरा एकादशपूर्वधरा वेत्यस्यार्थस्य प्रतिपादनार्थं चतुर्दशपूर्वधरानन्तरं दशपूर्वि-नमस्कारोऽभिहितः, अथवाऽन्यत् प्रयोजनम्-अर्थतस्तीर्थकरप्रणीतम्, सूत्रतो गणधरो-पनिबद्धं चतुर्दशपूर्वधरोपनिबद्धं च दशपूर्वधरोपनिबद्धं च प्रत्येकबुद्धोपनिबद्धं च प्रमाणभूतं सूत्रं भवतीत्यस्यार्थस्य प्रतिपादनार्थं दशपूर्विनमस्कारः कृतः, तथा चोक्तम्-

"**अर्हत्प्रोक्तं गणधरदृब्धं** [३६]**प्रत्येकबुद्धदृब्धं च ।**
[३७]**स्थविरग्रथितं च तथा प्रमाणभूतं त्रिधा सूत्रम् ॥१॥**" [ ] इति

अथवाऽन्यत्प्रयोजनम्-चतुर्दशपूर्विणो दशपूर्विणश्च नियमेनैव सम्यग्दृष्टय इति प्रदर्शनार्थं तन्नमस्कारः । अथवा यदुक्तम्-त्रयोदशपूर्वधरादीनामेकैकहान्या तावन्नमस्कारो वाच्यो यावत्तदेकदेशधराणामिति, सैव हानिरित्थमुक्ता, यदुत प्रभूतहान्या हानिर्वाच्या, सा च त्र्यन्तरे प्रतिपादिता भवति, अतः पूर्वत्रयमुल्लङ्घ्य दशपूर्विणां ग्रहणम्, एवं नवादिष्वपि योज्यम्, एवं व्याख्याते सत्याह परः-गुणाधिकस्य वन्दनं कर्तव्यम्, न त्ववमस्य, यत उक्तम्- "****गुणाहिए वंदणयं,**" **भद्रबाहुस्वामिनश्च**तुर्दशपूर्वधरत्वात्,

---

३५. संग्रहणिः संक्षिप्तरूपेण पदार्थप्रतिपादकग्रन्थः । सारसङ्ग्रहगन्थः । (धर्म.)

३६. प्रत्येकबुद्धः-प्रत्येकबुद्धस्तु बाह्यप्रत्ययमपेक्ष्य, प्रत्येकं=बाह्यं ततो वृषभादिकं कारणमभिसमीक्ष्य, बुद्धः-प्रत्येकबुद्धः । (प्रज्ञा. १९)

३७. स्थविरः श्रुतादिभिर्वृद्धत्वात् स्थविरः । (ज्ञाता. ७) श्रुतवृद्धः । (भ.१३६)

★ अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं । सासणस्स हियट्ठाए तओ सुत्तं पवत्तइ ॥ (आव. नि. ९२)

★ गुणाहिए वंदणयं छउमत्थो गुणागुणे अयाणंतो । वंदिज्जा गुणहीणं गुणाहियं वावि वंदावे । (आव.नि.११४७)

दशपूर्वधरादीनां च न्यूनत्वात्किं तेषां नमस्कारमसौ करोति ? इति, अत्रोच्यते-गुणाधिका एव ते, अव्यवच्छित्तिगुणाधिक्यात्, अतो न दोष इति । एवं व्याख्याते [१]सत्याह परः-[२]एकादशाङ्गसूत्रार्थधारकाणां किमर्थं क्रियते ? इति, उच्यते-इह चरणकरणात्मिकौघ-निर्युक्तिः, एकादशाङ्गसूत्रार्थधारिणश्च चरणकरणवन्त एव, [३]एकादशाङ्गानां चरणकरणानु-योगत्वात्, उपयोगित्वेनांशेन तेषां नमस्कार इति । साधूनां किमर्थमिति चेत्, ते तु चरणकरणनिष्पादकाः, तदर्थं चायं सर्व एव प्रयास इति ।

अथवाऽन्यथा व्याख्यायत इदं गाथासूत्रम्-अनेन गाथासूत्रेण पञ्चनमस्कारः प्रतिपाद्यते, न च पञ्चनमस्काराल्लघुतरोऽन्यो नमस्कार इत्यतो **भद्रबाहुस्वामिना** स एव कृत इति, कथम् ? 'अरहंते वंदित्ता' इत्यनेनार्हन्नमस्कारः, 'चोद्दसपुव्वी तहेव दसपुव्वी एक्कारसंगसुत्तत्थधारए' इत्यनेनाचार्योपाध्यायनमस्कारः, यतः सूत्रप्रदा उपाध्याया [४]अर्थप्रदाश्चाचार्या इति । एवं व्याख्याते सत्याह-एवं तर्हि 'अर्थसूत्रधारकान्' [५]इत्येवं वक्तव्यम्, आचार्योपाध्यायपदयोरे[६]वमेव क्रमेण व्यवस्थितत्वात्, तत्कथमेतत् ? इति, अत्रोच्यते-नावश्यमाचार्योपाध्यायैर्भिन्नैर्भवितव्यम्, अपि तु क्वचिदसावेव सूत्रं शिष्येभ्यः प्रयच्छत्यसावेव चार्थम्, अतः 'सूत्रार्थधारकान्' इत्येवमुपन्यस्तम् । 'सर्वसाधूंश्च' इत्यनेन तु साधुनमस्कारः प्रतिपादितः । सर्वशब्दः प्रत्येकमभिसंबध्यते, ततोऽयमर्थो भवति-सर्वानर्हतः, एवं चतुर्दशपूर्वधरादीनामपि मीलनीयम्, चशब्दात्सिद्ध-नमस्कारः । एवं व्याख्याते सत्याह-किमर्थं सिद्धनमस्कारः पश्चादभिधीयते ? अपित्वर्हन्नमस्कारानन्तरं वाच्य इति, अत्रोच्यते-यानि ह्यर्हदादीनि पदानि तेषां सर्वेषामेव सिद्धाः फलभूताः, अतः फलप्रतिपादनार्थं पश्चादुपन्यास इति । अथवाऽर्हन्नमस्कारेणैव सिद्धनमस्कारोऽप्यभिहितः, कारणे कार्योपचारमङ्गीकृत्य, सिद्धत्वस्य कारणभूतत्वादर्हतामित्यलं प्रसङ्गेनेति ॥१॥

अधुना कृतमङ्गलः सन् सम्बन्धाभिधेयप्रयोजनत्रयप्रदर्शनार्थं द्वितीयं गाथासूत्रमाह-**ओहेण** इत्यादि । '**ओहेण उ**[७]' त्ति ओघः संक्षेपः समासः सामान्यमित्येकोऽर्थः, तेन **ओघेन** निर्युक्तिं वक्ष्य इति योगः । तदनेन गाथाख[८]ण्डकेन सम्बन्धः प्रतिपादितः क्रियाऽऽनन्तर्यलक्षणः, तथा च व्यासक्रियायाः समासक्रिया क्रियानन्तरभूता [९]प्रवर्तते,

---

१. सत्यपरो(र) आह क. २. एकादशाङ्गानां सूत्रार्थ. क. ख. ३. एकादशानां अङ्गानां ल. ४. अर्थप्रदा आचार्या दा. ५. इत्येव दा. ६. एवं क्रमेण क, एवमेव क्रमेण प्रकारेण व्य० ख. ७. उ इति-दा. ८. ०खण्डलकेन क. ९. वर्तते क.

अतः क्रियाऽऽनन्तर्यलक्षणः सम्बन्धः । एवं कार्यकारणलक्षणोऽपि द्रष्टव्यः- कार्यमोघनिर्युक्त्यर्थपरिज्ञानमनुष्ठानं च, कारणं तु वचनरूपापन्नौघनिर्युक्तिरेव, एवं साध्यसाधनादयोऽपि द्रष्टव्या इति । **तु**शब्दो विशेषणे, किं विशिनष्टि ? ओघेन वक्ष्ये, **तु**शब्दात्किञ्चिद्विस्तरतोऽपि, "**छप्पुरिमा**" (नि. २६६) इत्यादि ।

**निर्युक्तिं** वक्ष्य इति । निराधिक्ये योजनं युक्तिः, सूत्रार्थयोर्योगो नित्यव्यवस्थित एवास्ते वाच्यवाचकतयेत्यर्थः । अधिका योजना निर्युक्तिरुच्यते, नियता निश्चिता वा योजनेति, ततश्च निर्युक्तियुक्तिरित्येवं वक्तव्ये, एकस्य युक्तिशब्दस्य लोपं कृत्वैवमुपन्यासः, यथोष्ट्रमुखी कन्येति । **वुच्छं** इति **वक्ष्ये**ऽभिधास्य इति, यदुक्तं भवति, कुतो वक्ष्ये ? इत्यत आह-**चरणकरणानुयोगात्**, चर्यत इति चरणं वक्ष्यमाणलक्षणं व्रतादि, क्रियत इति करणं पिण्डविशुद्ध्यादि, चरणं च करणं च चरणकरणे तयोरनुयोगश्चरणकरणानुयोगः, अनुयोजनमनुयोगः, अनुरूपो वा योगोऽनुयोगः, अनुकूलो वा योगोऽनुयोगः, अथवाऽणु सूत्रम्, महानर्थः, ततो महतोऽर्थस्याणुना सूत्रेण योगोऽनुयोगः, तस्माच्चरणकरणानुयोगान्निर्युक्तिं वक्ष्ये, चरणकरणात्मिकामेवेति गम्यते, यथा मृदो घटं करोति मृदात्मकमेव, [१]तथाऽत्रापीति । अथवा चरणं च तत्करणं च चरणकरणं तस्यानुयोगः, तस्माच्चरणकरणानुयोगान्निर्युक्तिं वक्ष्य इति, तदनेनावयवेनाभिधेयमुक्तम्, चरणकरणनिर्युक्तिरभिधेयेति ।

[२]किंस्वरूपां निर्युक्तिं वक्ष्ये ? [३]इत्यत आह-**अल्पाक्षराम्** अल्पान्यक्षराणि यस्यां साऽल्पाक्षरा तामल्पाक्षराम्, अथवा क्रियाविशेषणमेतत्, कथं वक्ष्ये? इत्यत आह- '**अल्पाक्षरं**' स्तोकाक्षरं वक्ष्ये, न प्रभूताक्षरमित्यर्थः । किमल्पाक्षरमेव ? नेत्याह- **महत्थं महार्थं** वक्ष्ये, अथवा महानर्थो यस्याः सा महार्था, तां महार्थां वक्ष्ये, तदनेनाभिधेयविशेषणं प्रतिपादितं भवति । अल्पाक्षरां महार्थामित्यनेन [३८]चतुर्भङ्गिका प्रतिपादिता भवति, एकमल्पाक्षरं प्रभूतार्थं भवति १, तथान्यत् प्रभूताक्षरमल्पार्थम् २, तथा प्रभूताक्षरं प्रभूतार्थम् ३, अल्पाक्षरमल्पार्थम् ४, चेति । किंनिमित्तं वक्ष्ये? इत्यत आह-**अनुग्रहार्थम**नुग्रह उपकारोऽभिधीयते, अर्थशब्दः प्रयोजनवचनः, तत उपकारः प्रयोजनं वक्ष्ये, तदनेन प्रयोजनं प्रतिपादितं द्रष्टव्यम् ।

केषां वक्ष्ये ? इत्यत आह-**सुविहितानां** शोभनं विहितमनुष्ठानं येषामिति ते

---

३८. चतुर्भङ्गिकानामुदाहरणानि निभा.१२ गाथायां वक्ष्यति । (संटी.)

१. तदवदत्रापीति । ख. ल. तथाऽत्रापि क. २. किम्भूतां क. ३. इत्येतदेव ल.

[३९] सुविहिताः साधवस्तेषां सुविहितानामनुग्रहार्थमोघनिर्युक्तिं वक्ष्य इति योगः । तदनेन गाथासूत्रेण परोपन्यस्ता हेतवो निराकृता भवन्ति । के च ते हेतवः ? [४०] निःसम्बन्धत्वादय इति । यश्चायं क्त्वाप्रत्यय उपन्यस्तस्तेन नित्यानित्यैकान्तवादयोरसारता प्रतिपादिता भवति, कथम् ? न नित्यवादे क्त्वाप्रत्ययो युज्यते न वाऽनित्यवादे, किन्तु नित्यानित्यवाद एवायं घटत इति, [४१] नित्यवादे तावन्न घटते, एकं कृत्वा ह्यपरकरणं क्रमः, क्त्वाप्रत्ययश्च विशिष्ट [१] एवार्थेऽभिधीयते, '**समानकर्तृकयोः पूर्वकाले [२] क्त्वा**' (**पा०३-४-२१**) इति वचनात्, नित्यवादे चाप्रच्युतानुत्पन्नस्थिरैकस्वभावं वस्तु, तच्च किं तावत् पूर्वस्वभावत्यागेन द्वितीयां क्रियां करोति आहोस्वित्पूर्वस्वभावात्यागेनेति [३] वाच्यम् ? किञ्चातो यदि पूर्वस्वभावत्यागेन ततोऽनित्यत्वप्रसङ्गः,अतादवस्थ्यमनित्यत्वं

---

३९. सुविहितः शोभनं विहितः । सुव्यवस्थितः । (पं.चू. २ कल्प) सदनुष्ठानोद्यतः । (ग. २ अधि.)

४०. इह हि शिष्टाः क्वचिदभीष्टे शास्त्रप्रकरणादिवस्तुनि प्रवर्तमानाः श्रेयस्काम्यया विशिष्टाभीष्टदेवतानमस्कारपुरस्कारेणैव प्रवर्तन्ते, स च यद्यपि कायमनोभ्यामपि क्रियमाणो निखिलविलसद्विघ्नविनाशकत्वेन प्रारिप्सितशास्त्रप्रकरणादि-परिसमाप्तये सम्पनीपद्यते तथापि शास्त्रादौ श्रोतारः सर्वेऽपि शास्त्रादिश्रवणरसिकान्तःकरणाः सकलविघ्नसङ्घातविघात-निमित्तमवश्यमभिमतदेवतास्तवाभिधानपूर्वमेव प्रवर्तन्तामिति श्रोतृणामभीष्टदेवतास्तवविषयमनीषोन्मेषपरिग्रहार्थ-मादाविष्टदेवतास्तवोऽभिधेयः, तथा यत्किमपि शास्त्रं प्रकरणादि वा कर्तुमिष्यते तत्रावश्यमादौ प्रेक्षावतां प्रवृत्त्यर्थमभिधेयमभिधातव्यम् इतरथा किमत्र शास्त्रे प्रकरणादौ वाऽभिधेयमिति संशयानां न तत्र ते प्रवर्तेरन्, वदेयुश्च यथा-नाऽऽरब्धव्यमिदं शास्त्रं प्रकरणादि वा, अभिधेयशून्यत्वात्, काकदन्तपरीक्षावदिति, यदाहुः- "श्रुत्वाऽभिधेयं शास्त्रादौ, पुरुषार्थोपकारकम् । श्रवणादौ प्रवर्तन्ते, तज्जिज्ञासादिनोदिताः ॥१॥ नाऽश्रुत्वा विपरीतं वा, श्रुत्वाऽऽलोचितकारिणः । काकदन्तपरीक्षादौ, प्रवर्तन्ते कदाचन ॥२॥" इत्यादि, तथा अभिहितेऽप्यभिधेये न प्रयोजनश्रवणमन्तरेण सहृदयास्तदाद्रियन्ते, प्रेक्षावत्ताक्षतिप्रसङ्गात्, यदाहुः-"प्रयोजनमनुद्दिश्य, न मन्दोऽपि प्रवर्तते। एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ? ॥१॥" अभिदध्युश्च ते यथा-नाऽऽरम्भणीयमिदं शास्त्रं, प्रयोजनशून्यत्वात् कण्टकशाखामर्दनवदिति, ततः शास्त्रप्रकरणादिप्रारम्भप्रयासनिष्फलताशङ्काशङ्कुसमुद्धरणाय शास्त्रप्रकरणादौ प्रयोजनमपि वक्तव्यम्, तथा प्रयोजने दर्शितेऽपि न परम्परया सर्वज्ञमूलताऽवगतिमन्तरेण विविधातीन्द्रियार्थसार्थप्रतिपादके शास्त्रादौ सुधियः प्रवृत्तिमातन्वीरन्, प्रतिपादयेयुश्च ते यथा-नारम्भणीयमिदं शास्त्रादि, सम्बन्धवन्ध्यत्वात् स्वेच्छाविरचितशास्त्रवदिति, ततस्तेषां शास्त्रप्रकरणादिप्रवृत्तौ विशिष्टादरनिमित्तं परम्परयाऽर्हन्मूलताख्यापनार्थमादौ गुरुपर्वक्रमलक्षणः सम्बन्धोऽपि वक्तव्यः । [प्रव.सारो.वृत्ति पत्र-१]

४१. नित्यवादीनामयमाशयः-यदुतः कोऽपि वस्तु न कदापि विनश्यते, न कदापि उत्पद्यते, तथा स्थिरैकरूपेण एक एव स्वभावेनैव सर्वदा वर्तते। तथा च क्त्वाप्रत्ययस्य सङ्गतिस्तेषां मते न सम्भवति, क्त्वाप्रत्ययः पूर्वस्वभावपरित्यागेन द्वितीयस्वभावाङ्गीकारः कारयति, यथा भुङ्क्त्वा गच्छति, अत्र भोजनक्रियापरिसमाप्त्यनन्तरं गमनक्रिया प्रारभ्यते, यदि वस्तु स्थिरैकस्वभावं स्यात्तदा भोजनक्रियास्वभावपरित्यागो न स्याद्, कृतो चेद् नित्यत्वहानिः । तथैवात्रापि वन्दित्वेत्यत्रापि योजनीयम्। (संटी.)

१. एवाभि० क., पूर्वार्थो आ. २. क्त्व क. ख. ३. वाच्यं यदि दा.

ब्रूमः,अथ पूर्वस्वभावात्यागेन, एवं तर्हि न कदाचिदपि तेन द्वितीया क्रिया कर्त्तव्येति। एवं प्रतिपादिते[42]ऽनित्य[1]वाद्याह-अत एवा[2]स्माकं दर्शने क्त्वाप्रत्ययो घटत इति, एतदप्यचारु, यस्य क्षणिकं वस्तु तस्य कथं क्त्वाप्रत्ययो युज्यते ? उत्पत्त्यनन्तरं ध्वंसात्, कथमेक एव कर्त्ता क्रियाद्वयं करोति ? येन हि प्राक्तनी क्रिया निष्पादिता सोऽन्य एव, योऽपि चोत्तरां क्रियां करोति सोऽपि चान्य एव, तत एकान्तानित्यवादेऽपि न घटते क्त्वाप्रत्यय इति ॥२॥

अयं तावत्समुदायार्थः, अधुना भाष्यकृदेकैकमवयवं व्याख्यानयति-तत्र **तत्त्वभेदपर्यायैर्व्याख्ये**ति पर्यायतो व्याख्यां कुर्वन्निदं गाथासूत्रमाह –

६ **ओहे पिंड समासे संखेवे चेव होंति एगट्ठा ।**
**निज्जुत्त त्ति य अत्था जं बद्धा तेण निज्जुत्ती ॥१॥ निभा.**

**ओहे** इत्यादि । **ओघः पिण्डो भवती**ति योगः । पिण्डनं पिण्डः सङ्घातरूप इत्यर्थः । **समासे** त्ति समसनं **समासः** । **'असु क्षेपणे'** **( पा. धा. २८० )** सम्-एकीभावेनासनं क्षेपणमित्यर्थः, तथा च समासेन सर्व एव विशेषा गृह्यन्ते, ओघः समासो भवतीति योगः, एवं भवतीति क्रिया सर्वत्र मीलनीया । **संखेवे** त्ति संक्षेपणं **संक्षेपः** सम् एकीभावेन प्रेरणमित्यर्थः, **च**शब्द उक्तसमुच्चये, कदाचिद-नुक्तसमुच्चये, **एव**शब्दः प्रकारवाचकः, एवमेतेषामपि पिण्डादीनां ये पर्यायास्ते मीलनीया इति ।

निर्युक्तिपदव्याख्यानार्थमाह-**'निज्जुत्त त्ति य'** इत्यादि, निराधिक्ये योजनं युक्तिः, आधिक्येन युक्ता निर्युक्ताः, अर्यन्त इत्यर्थाः, गम्यन्त इत्यर्थः, ततो **निर्युक्ता इति चार्था यद्** यस्माद् **बद्धास्तेन निर्युक्ति**रभिधीयते, अथवाऽन्यथा निश्चयेन युक्ता निर्युक्ता निर्युक्तिरिति चार्था यद्बद्धास्तेन निर्युक्तिरभिधीयते, इत्ययं गाथार्थः ।

एकार्थिकप्रतिपादनेन चैकान्तभेदाभेदवादौ व्युदस्येते, नैकान्तभेदपक्ष एकार्थिकानि युज्यन्ते, कथम् ? यस्य ह्येकान्तेनैव [3]सर्वे भावाः सर्वथा भिन्ना वर्तन्ते तस्य हि यथा घटशब्दात्पटशब्दो भिन्नः, एवं कुटशब्दोऽपि भिन्न एव, तत्कथं घटशब्दस्य

---

४२. अनित्यवादि कदापि वस्तु द्विक्षणावस्थायी न मन्यते, तस्मात्तन्मते यो भुङ्क्ते न स गच्छति, गमनक्रियायाःकर्ता भिन्न एव। अत्र क्त्वाप्रत्ययविधानेनोपदर्शितं यद् यो वन्दते स एव ओघनिर्युक्तिं वक्ष्ये, तस्मादेकान्तानित्यवादेऽस्वरसः सूचितः । (संटी.)

१. ऽनित्यतावाद्याह - दा. २. अस्मद्दर्शने क. ३. सर्वभावा क. ख.

[1]कुटशब्द एकार्थिको युज्यते ? [2]एकार्थिकत्वं हि कथञ्चिद्भेदे भवतीति, एवमेकान्ताभेदवादिनोऽपि न युज्यन्त एकार्थिकानि, कथम् ? यस्य ह्यभेदेन सर्व एव भावा व्यवस्थितास्तस्य यथा घटशब्दस्य घटशब्दोऽभिन्नः, एकार्थिको न भवति, एवं कुटादयोऽपि न युज्यन्ते, अभिन्नत्वात्, इत्यलं चसूर्येति ॥१॥

अधुना चरणपद(नि.२)व्याख्यानार्थमिदं गाथासूत्रमाह –

७ **वय समणधम्म संजम वेयावच्चं च बंभगुत्तीओ ।**
**नाणाइतियं तव कोहनिग्गहाई चरणमेयं ॥२॥ निभा०**

**वय समणधम्म** इत्यादि । भवतीति क्रियाऽनुवर्तते, व्रतादि चरणं भवतीति योगः । **व्रतानि** प्राणातिपातादिनिवृत्तिरूपाणि, **समणधम्म** त्ति **श्रमणाः** साधवः, धारयतीति **धर्मः** श्रमणानां धर्मः क्षान्त्यादिकश्चरणं भवतीति सर्वत्र मीलनीयम् । **संजमे** त्ति समेकीभावेन यमः **संयमः**, उपरम इत्यर्थः, स च प्रेक्षोत्प्रेक्षादिरूपः सप्तदशप्रकारः । **वेयावच्चं** ति व्यावृत्तस्य भावो **वैयावृत्त्यम्,** आचार्यादिभेदाद्दशप्रकारम्, **चशब्दः** समुच्चये, किं समुच्चिनोति ? विनयश्च[43] । **'बंभगुत्तीओ'** त्ति ब्रह्म इति ब्रह्मचर्यं तस्य गुप्तयो **ब्रह्मचर्यगुप्तयः,** चर्यशब्दलोपादेवमुपन्यासः कृतः, ताश्च वसत्यादिका नव ब्रह्मचर्यगुप्तयः । **'नाणाइतियं'** ति ज्ञायतेऽनेनेति ज्ञानमाभिनिबोधिकादि[44] तदादिर्यस्य ज्ञानादित्रयस्य तद् ज्ञानादि, आदिशब्दात् सम्यग्दर्शनचारित्रपरिग्रहः, ज्ञानादि च तत् त्रिकं च **ज्ञानादित्रिकम्** । **तव** इति तापयतीति **तपो** द्वादशप्रकारमनशनादि । **'कोहनिग्गहाई' क्रुध कोपे** त्ति **( क्रुध क्रोधे-पा. धा. १२६० )** क्रोधनं क्रोधः, निग्रहणं निग्रहः, क्रोधस्य निग्रहः क्रोधनिग्रहः स आदिर्यस्य मानादिनिग्रहकदम्बकस्य (समूहस्य) तत्**क्रोधनिग्रहादि, चरणमेतत्** ।

एवं व्याख्याते सत्याह परः-ननु व्रतान्तर्गतत्वाद् गुप्तयो न पृथक् कर्त्तव्या ।

---

४३. तीर्थकर-सिद्ध-कुल-गण-सङ्घ-क्रिया-धर्म-ज्ञान-ज्ञानि-आचार्य-स्थविर-उपाध्याय-गणयः, एतानि च त्रयोदश पदानि, तेषां तीर्थकरादीनां विनयः सदैवाऽनाशातना-भक्ति-बहुमान-वर्णप्रकाशनं चतुष्प्रकारं भवति । अतो द्विपञ्चाशद्विनयभेदा भवन्तीति विज्ञेयम् । संटी.

४४. आभिनिबोधिकज्ञानम्-अर्थाभिमुखोऽविपर्ययरूपत्वान्नियतोऽसंशयरूपत्वाद् बोधः संवेदनमभिनिबोधः । स एव स्वार्थिके कप्रत्ययोपादानादाभिनिबोधिकम्, ज्ञातिर्ज्ञायतेऽनेनेति वा ज्ञानम् आभिनिबोधिकं च तज्ज्ञानं चेत्याभिनिबोधिकज्ञानम्, इन्द्रियानिन्द्रियनिमित्तो बोध इति । (भ.८.श.२.उ.३ सूत्र १८ टी.)

१. शब्द एव, क. २. एकार्थं क. एकार्थत्वम्-ख.

अथ परिकरभूताश्चतुर्थव्रतस्य ब्रह्मचर्यगुप्तयोऽभिधीयन्ते, एवं तर्ह्येकैकस्य परिकरभूता भावना अपि वाच्याः, न[45] च ज्ञानादित्रयस्य ग्रहणं कर्त्तव्यम्, अपि तु सम्यग्दर्शनज्ञानयोरेवोपन्यासः[1] कर्त्तव्य इति, चारित्रस्य व्रतग्रहणेनैव ग्रहणात् । तथा श्रमणधर्मग्रहणेन संयमग्रहणं तपोग्रहणं चातिरिच्यते, संयमतपसी वोद्धृत्य श्रमणधर्मस्योपन्यासः कर्त्तव्यः । तथा तपोग्रहणे सति वैयावृत्त्यस्योपन्यासो वृथा, चशब्दसमुच्चितस्य च विनयस्य, वैयावृत्त्यविनययोस्तपोऽन्तर्गतत्वात् । तथा क्षान्त्यादिधर्मग्रहणे च सति क्रोधादिनिग्रहग्रहणमनर्थकम् । तदियं सर्वैव गाथा आलूनविशीर्णेति तत्कथमेतत् ? इति । [2]उच्यते, अविज्ञायैव परमार्थमेवं चोद्यते, यदुक्तम्-व्रतग्रहणे [3]ब्रह्मचर्यगुप्तिज्ञानादित्रयोपन्यासो न कर्त्तव्यः तत्तावत्परिह्रियते- यदेतद्व्रतचारित्रं स एकांशो वर्तते चारित्रस्य, सामायिकादि[46] च चारित्रं चतुर्विधमगृहीतमास्ते तद्ग्रहणार्थं ज्ञानादित्रयमुपन्यस्तम्, व्रतग्रहणे ब्रह्मचर्यगुप्तयो यदभिधीयन्ते तद् ब्रह्मचर्यस्य निरपवादत्वं दर्शयति, तथा चोक्तम् -

**"नवि किंचि वि पडिसिद्धं नाणुन्नायं च जिणवरिंदेहिं ।**
**मुत्तुं मेहुणभावं न विणा तं रागदोसेहिं ॥१॥"**

अथवा पूर्वपश्चिमतीर्थकरतीर्थयो[4]र्भेदेनैव महाव्रतं भवति, अस्यार्थस्य प्रतिपादनार्थं भेदेनोपन्यासः कृत इति । यच्चोक्तम्-श्रमणधर्मग्रहणे संयमतपसोर्न ग्रहणं कर्त्तव्यम्, श्रमणधर्मग्रहणेनैव गृहीतत्वात्तयोः, तदप्यसाधु, संयमतपसोः प्रधानमोक्षाङ्गत्वात्, कथं प्रधानत्वम् ? इति चेत्, अपूर्वकर्माश्रवसंवरहेतुः संयमो वर्तते, पूर्वगृहीतकर्मक्षयहेतुश्च तपः, ततः प्रधानत्वमनयोः, अतो गृहीतयोरप्यनयोर्भेदेनोपन्यासः कृतः, दृष्टश्चायं **न्यायो** यथा-**ब्राह्मणा आयाता वशिष्ठोऽप्यायातः,** अत्र हि ब्राह्मणग्रहणेन **वशिष्ठ**स्यापि ग्रहणं कृतमेव, तथापि प्राधान्यात्तस्य भेदेनोपन्यासः क्रियत इति । तथा यच्चोक्तम्- तपोग्रहणे वैयावृत्त्यविनययोर्न ग्रहणं कर्त्तव्यम्, तदप्यचारु, वैयावृत्त्यविनययोर्यथा

---

४५. अत्र एवं शङ्का- व्रतपदग्रहणेन चारित्ररूपव्रतस्यग्रहणसम्भवायमि ज्ञानादित्रय इत्यत्र तृतीयं चारित्रग्रहणं न कर्तव्यम्, अपि तु ज्ञानादिद्वयेत्येवं वक्तव्यमिति शङ्का- समाधानं तु व्रतपदगृहीतचारित्रं न सर्वप्रकारकमपि तु छेदोपस्थापनीयरूपविशेषप्रकारकमेव, अतः सामायिकादिचारित्रस्य व्रतपदेनाग्रहणात्, तद् ग्रहीतुं ज्ञानादित्रयमित्युपन्यस्तम्, तृतीयश्चात्र चारित्रमिति सामायिकादीनामवशिष्टचारित्राणां तत्रान्तर्भावः । (संटी.)

४६. सामायिक-परिहारविशुद्धि-सूक्ष्मसंपराय-यथाख्यातं चारित्रं चतुर्विधमिति । संटी.

१. ज्ञानसम्यग्दर्शनयो ख. २. अत्रोच्यते दा. ल. ३. ब्रह्मगुप्तिज्ञानादिविनयस्य तपोपन्यासः क. ४. भेदेनैतद्- दा.

स्वपरोपकारकत्वात्प्राधान्यं नैवमनशनादीनां तपोभेदानामिति । यच्चोक्तम्-श्रमणधर्मग्रहणे क्रोधादिनिग्रहस्य नोपन्यासः कर्त्तव्यः, तदप्यचारु, इह द्विरूपः क्रोधः-उदयगत उदीरणावलिकागतश्च, तत्रो[४७]दयगतनिग्रहः क्रोधनिग्रहः, एवं मानादिष्वपि वाच्यम्, यस्तु [१]उदीरणावलिकायां प्रा[४८]सस्तस्योदय एव न कर्त्तव्यः, [२]क्षान्त्यादिभिर्हेतुभिरिति । अथवा त्रिविधं वस्तु-ग्राह्यं हेयमुपेक्षणीयं च, तत्र क्षान्त्यादयो ग्राह्याः, क्रोधादयो हेयाः, अतो निग्रहीतव्यास्त इत्येवमर्थमित्थ[३]मुपन्यस्तमिति तस्मात् साधु सर्वमेवैतद् गाथासूत्रमिति ॥२॥

अधुना क[४९]रणावयव(नि.२)प्रतिपादनार्थमिदं गाथासूत्रमाह –

८ **पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो ।**
**पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु ॥३॥ निभा०**

**पिंडविसोही**त्यादि । **पिंड** त्ति पिण्डनं पिण्डस्तस्य विविधमनेकैः प्रकारैः शुद्धिरा[५०]धाकर्मादिपरिहारप्रकारैः **पिण्डविशुद्धिः**, सा किम् ? करणं भवतीति योगः। **समिति** त्ति सम्यगितिः **समितिः** सम्यग्गमनं प्राणातिपातवर्जनेनेत्यर्थः, जातावेक-वचनम्, ताश्चेर्यासमित्यादयः **समितयः** । **भावण** त्ति भाव्यन्त इति **भावना** अनित्यत्वादिकाः । **पडिम** त्ति **प्रतिमा** अभिग्रहप्रकारा मासाद्या द्वादश भिक्षुप्रतिमाः, **चशब्दाद्भ[५१]द्रा**दयश्च प्रतिमा गृह्यन्ते । **इंदियनिरोहो** त्ति इन्द्रियाणि स्पर्शनादीनि तेषां निरोध **इन्द्रियनिरोधः**, आत्मीयात्मीयेष्टानिष्टविषयरागद्वेषाभाव इत्यर्थः । **पडिलेहण** त्ति प्रतिलेखनं [५२]**प्रतिलेखना 'लिख अक्षरविन्यासे' [ पा. धा. १४३६ ]** अस्य

---

४७. उदयगतनिग्रहः - उदयगतस्य क्रोधस्य निग्रह इत्यर्थः । संटी.

४८. प्रासस्तस्य - प्रासः क्रोधः, तस्य क्रोधस्य इत्यर्थः । संटी.

४९. चरणकरणाणुओगाओ (नि.२) चरणकरणानुयोगात्, इदं पदस्य करणमवयवमिति ज्ञेयम् । संटी.

५०. आधाकर्म-साधुं चेतसि आधाय प्रणिधाय साधुनिमित्तमित्यर्थः, कर्म सचित्तस्याऽचित्तीकरणमचित्तस्य वा पाको निरुक्तादाधाकर्म । (धर्म.३.अधि.२२.श्लो.टी.)

५१. भद्रप्रतिमा-यस्यां पूर्वदक्षिणापरोत्तराभिमुखा प्रत्येकं प्रहरचतुष्टयं कायोत्सर्गं करोति । एषा चाऽहोरात्रद्वयमानेत्युक्तलक्षणे प्रतिमाभेदे । (औ.कल्प)

५२. प्रतिलेखना-आगमानुसारेण प्रति प्रति कल्पादेरूपकरणस्य निरीक्षणमनुष्ठानं वा । 'उपसर्गेण धात्वर्थः' इति न्यायादागमानुसारेण क्षेत्रादेर्निरूपणेत्यर्थः । धर्म.

१. उदीरणावलिकाप्रा० दा. २. क्षान्तादि० ख. ३. उपन्यास क. उपन्यस्ता ख.

प्रतिपूर्वस्य ल्युडन्तस्यानादेशे [१]टापि च विहिते प्रतिलेखनेति भवति, एतदुक्तं भवति-अक्षरानुसारेण [२]प्रति निरीक्षणमनुष्ठानं च यत्सा प्रतिलेखना, सा च चोलपट्टादेरुपकरणस्येति । **गुत्तीओ** त्ति [३]गोपनानि **गुप्तयो** मनोवाक्कायरूपास्तिस्रः । **अभिग्गह** त्ति **अभिग्रहा** द्रव्यादिभिरनेकप्रकाराः, **च**शब्दो वसत्यादिसमुच्चयार्थः, **एव**कारः क्रमप्रतिपादनार्थः । **करणं तु** त्ति क्रियत इति **करणम्**, मोक्षार्थिभिः साधुभिर्निष्पाद्यत इत्यर्थः । **तु**शब्दो विशेषणे, मूलगुणसद्भावे करणत्वमस्य, नान्यथेति । आह-ननु समितिग्रहणेनैव पिण्डविशुद्धेर्गृहीतत्वान्न पिण्डविशुद्धिग्रहणं कर्त्तव्यम्, यत एषणासमितौ सर्वैषणा गृहीताः, पिण्डविशुद्धिरप्येषणैव, तत्किं भेदेनोपन्यासः? इति, अत्रोच्यते-पिण्डव्यतिरेकेणान्याप्येषणा विद्यते वसत्यादिरूपा तस्या ग्रहणं भविष्यति, तत्र पिण्डविशुद्धेस्तु भेदेनोपन्यासः कारणे ग्रहणं कर्त्तव्यम्, नाकारणे इत्यस्यार्थस्य प्रतिपादनार्थः । अथवाऽऽहारमन्तरेण न शक्यते पिण्डविशुद्ध्यादि [५३]करणं सर्वमेव कर्तुमतो भेदेनोपन्यास इति । अत्राह—चरणकरणयोः कः प्रतिविशेषः ? इति, अत्रोच्यते-नित्यानुष्ठानं चरणम्, यत्तु प्रयोजन आपन्ने क्रियते तत्करणमिति, तथा च व्रतादि सर्वकालमेव चर्यते न पुनर्व्रतादिशून्यः कश्चित्काल इति । पिण्डविशुद्ध्यादि तु प्रयोजने [४]समापन्ने क्रियत इति ॥३॥

एवं व्याख्याते सत्याह परः-"ओहेण उ निज्जुत्तिं [५]वुच्छं चरणकरणाणुओगस्स"(नि.२) इत्येवं वक्तव्यम्, तत्किमर्थं षष्ठ्युल्लङ्घनं कृत्वा पञ्चम्यभिधीयते, इत्यस्यार्थस्य प्रतिपादनार्थमिदं गाथासूत्रमाह —

१ **चोदगवयणं छट्ठी संबंधे कीस न भवति विभत्ती ? ।**
**तो पंचमी उ भणिया किमत्थि अन्ने वि अणुओगा ॥४॥ निभा०**

**चोदगवयणमित्यादि** । '**चोदग**' त्ति चोदकोक्तिश्चो**दकवचनम्**, किम्भूतम् ? तदाह-**षष्ठी सम्बन्धे किमिति न भवति विभक्तिः ?** सम्बन्धनं सम्बन्धस्तस्मिन् सम्बन्धे षष्ठी किमिति न भवति ? एतदुक्तं भवति-चरणकरणानुयोगसम्बन्धिनीमोघनिर्युक्तिं वक्ष्य इति वाच्यम्, [६]तदुल्लङ्घनं कृत्वा पञ्चम्युच्यते तत्र प्रयोजनं वाच्यम्,

---

५३. करणं - करणसप्तति इत्यर्थः । संटी.

१. डापि- दा. २. प्रति प्रति क. ख. ३. गुप्तानि दा. ४. आपन्ने क. ख. ५. वोच्छं क. ख. ६. यदु० क. ख.

अथ न किञ्चित्प्रयोजनं **ततः पञ्चमी भणिता** किं केन कारणेन ? निष्प्रयोजनैवेत्यर्थः। एवं चोदिते सत्याहाचार्यः-अस्त्यत्र प्रयोजनं षष्ठ्युल्लङ्घनं कृत्वा यत् पञ्चम्युपन्यस्ता, **किम्** ? इत्यत आह-**अत्थि अण्णे वि अणुओगा । सन्ति** विद्यन्ते **ऽन्येऽप्यनुयोगाः**, अस्यार्थस्य प्रतिपादनार्थमेवमुपन्यासः कृत इति । पुनरप्याह-यद्यन्येऽप्यनुयोगाः सन्ति पञ्चम्याः किमायातम् ? इति, अत्रोच्यते-अस्याचार्यस्येयं शैली [१]यदुत यत्र क्वचित् सम्बन्धस्तत्र षष्ठ्याः सप्तम्या वा निर्देशं करोति, तथा च-★**आवस्सगस्स दसकालियस्स तह उत्तरज्झमायारे** । इत्येवमादि । अत्र तु शैलीं त्यक्त्वा पञ्चम्या निर्देशं कुर्वन्नाचार्य एतद् ज्ञापयति-सन्त्यन्येऽप्यनुयोगा इति, तदत्राहं चरणकरणानुयोगाद्वक्ष्ये नान्यानुयोगेभ्य इति । तथा षष्ठी द्विविधा दृष्टा-भेदषष्ठी अभेदषष्ठी च, तत्र भेदषष्ठी यथा-**देवदत्तस्य** गृहम्, अभेदषष्ठी यथा-**तैलस्य** धारा, **शिलापुत्रकस्य** शरीरकमिति । तद्यदि षष्ठ्या उपन्यासः क्रियते ततो न ज्ञायते-किं चरणकरणानुयोगस्य भिन्नामोघनिर्युक्तिं वक्ष्ये यथा **देवदत्तस्य** गृहमिति, आहोस्विदभिन्नां वक्ष्ये यथा **तैलस्य** धारेत्यस्य सम्मोहस्य निवृत्त्यर्थं पञ्चम्या उपन्यासः कृत इति । एवं व्याख्याते सत्यपरस्त्वाह-अस्तीत्येकवचनमनुयोगाश्च बहवस्तत्कथं बहुत्वं प्रतिपादयति ? उच्यते-अस्तीति तिङन्तप्रतिरूपकमव्ययम्, अव्ययं च –

**"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥१॥"**

ततो बहुत्वं प्रतिपादयत्येवेत्यदोषः । अथवा व्यवहितः सम्बन्धोऽस्ति-शब्दस्य, कथम् ? [२]इदं चोदकवचनम्- षष्ठी सम्बन्धे किमिति न भवति विभक्तिः ? आचार्य आह-अस्ति षष्ठी विभक्तिः, पुनरप्याह-यद्यस्ति ततः पञ्चमी भणिता किम् ? आचार्य आह-[५४]अन्येऽप्यनुयोगाश्चत्वारः, अतः षष्ठी विद्यमानाऽपि नोक्तेति, भावना पूर्ववत् ॥४॥

अन्येऽप्यनुयोगाः सन्तीत्युक्तम्, न च ज्ञायन्ते कियन्तोऽपि ते ? इत्यतः प्रतिपादयन्नाह –

---

१. यदुत यद् यत् किञ्चित् तत्र - क. यदुत यत्र क्वचित् तत्र ख. २. "इदम्"-नास्ति० क. ख.

★ आवस्सगस्स दसकालियस्स तह उत्तरज्झमायारे । सूयगडे निज्जुत्तिं वोच्छामि तहा दसाणं च ॥१॥
कप्पस्स य निज्जुत्तिं ववहारस्सेव परमनिउणस्स । सूरपण्णत्तीए वोच्छं इसिभासियाणं च ॥२॥
(आव० नि० ८४-८५)

५४. ओघप्राभृतादङ्गानां चरणानुयोगतया अन्ये चत्वारः, अन्येऽप्यनुयोगाः चत्वार इति वाक्यभेदो वा । (ली.)

**१० चत्तारि उ अणुओगा चरणे धम्मगणियाणुओगे य ।**
**दवियणुओगे य तहा अहक्कमं ते महिड्ढीया ॥५॥ निभा०**

**चत्तारि उ अणुओगा** इत्यादि । **चत्वार** इति सङ्ख्यावाचकः शब्दः, अनुकूला अनुरूपा वा योगा **अनुयोगाः, तु**शब्द एवकारार्थः, चत्वार एवैते । [१]अन्ये तुशब्दं विशेषणार्थं व्याख्यानयन्ति, किं विशेषयन्ति ? चत्वारोऽनुयोगाः, तुशब्दाद् द्वौ च-पृथक्त्वापृथक्त्वभेदात् । कथं चत्वारोऽनुयोगाः ? इत्याह-**चरणे धम्मगणियाणुओगे य** चर्यत इति चरणम्, तद्विषयोऽनुयोगश्चरणानुयोगस्तस्मिन् **चरणानुयोगे,** अत्र चोत्तरपदलोपादित्थमुपन्यासः, अन्यथा चरणकरणानुयोगे इत्येवं वक्तव्यम्, स **चैकादशाङ्ग**रूपः । [२]**धम्मे** त्ति धारयतीति धर्मः, दुर्गतौ प्रपतन्तं सत्त्वमिति, तस्मिन् **धर्मे** [३]धर्मविषये द्वितीयोऽनुयोगो भवति, स **चोत्तराध्ययनप्रकीर्णक**रूपः । '**गणियाणुओगे य**' त्ति गण्यत इति गणितं तस्यानुयोगो गणितानुयोगः, तस्मिन् **गणितानुयोगे** गणितानुयोगविषये तृतीयो भवति, स च **सूर्यप्रज्ञप्त्यादि**रूपः। **च**शब्दः प्रत्येकमनुयोगपदसमुच्चायकः । **दवियणुयोगे** त्ति द्रवतीति द्रव्यं तस्यानुयोगो **द्रव्यानुयोगः** सदसत्पर्यालोचनारूपः, स च **दृष्टिवादः, च**शब्दादनार्षः **सम्मत्यादि**रूपश्च, **तथे**ति क्रमप्रतिपादकः, आगमोक्तेन प्रकारेण **यथाक्रमं** यथापरिपाटीति, चरणकरणा-नुयोगाद्या [ **ते** ] **महर्द्धिकाः** प्रधाना इति यदुक्तं भवति ।

एवं व्याख्याते सत्याह-[४]चरणे धम्मगणियाणुओगे य [५]दवियणुओगे य त्ति, यद्येतेषां भेदेनोपन्यासः क्रियते तत्किमर्थं चत्वारः ? इत्युच्यते, विशिष्टपदोपन्यासा-देवायमर्थोऽवगम्यत इति, तथा चरणपदं भिन्नया विभक्त्या किमर्थमुपन्यस्तम् ? धर्मगणितानुयोगौ तु एकयैव विभक्त्या, पुनर्द्रव्यानुयोगो भिन्नया विभक्त्येति, तथाऽनुयोगशब्दश्चैक एवोपन्यसनीयः, किमर्थं द्रव्यानुयोग इति भेदेनोपन्यस्त इति ? अत्रोच्यते-यत्तावदुक्तं-चतुर्ग्रहणं न कर्त्तव्यं विशिष्टपदोपन्यासात्, तदसत्, यतो न विशिष्टसङ्ख्यावगमो भवति विशिष्टपदोपन्यासेऽपि, कुतः? चरणधर्मगणितद्रव्यपदानि सन्ति, अन्यान्यपि सन्तीति [६]संशयो माभूत्कस्यचिदित्यतश्चतुर्ग्रहणं क्रियत इति । तथा यच्चोक्तम्-भिन्नया विभक्त्या चरणपदं केन कारणेनोपन्यस्तम् ? तत्रैतत्प्रयोजनम्,

---

१. अन्ये तु तुशब्दं-दा. २. धम्मे इति आ. ३. धर्मविषयो क. ख. ४. परः च. दा. ५. दविअणुओगे य त्ति । क. ख. ६. संशयोऽत्र मा दा. ।

चरणकरणानुयोग एवात्राधिकृतः, प्राधान्यख्यापनार्थं भिन्नया विभक्त्या उपन्यास इति। तथा धर्मगणितानुयोगौ एकविभक्त्योपन्यस्तौ, अत्र प्रक्रमेऽप्रधानावेताविति । तथा द्रव्यानुयोगे च भिन्नविभक्त्युपन्यासे प्रयोजनम्, अयं हि एकैकानुयोगे मीलनीयः, न पुनर्लौकिकशास्त्रवद्युक्तिभिर्न विचारणीय इति । तथाऽनुयोगशब्दद्वयोपन्यासे प्रयोजनमुच्यते, यत् त्रयाणां पदानामन्तेऽनुयोगपदमुपन्यस्तं तदपृथक्त्वानुयोग प्रतिपादनार्थम्, यच्च द्रव्यानुयोग इति तत् पृथक्त्वानुयोगप्रतिपादनार्थमिति । एवं व्याख्याते सत्याह परः-इह गाथासूत्रपर्यन्त इदमुक्तम्-'यथाक्रमं ते महर्द्धिका' इति, एवं तर्हि चरणकरणानुयोगस्य लघुत्वम्, तत्किमर्थं तस्य निर्युक्तिः क्रियते ? अपि तु द्रव्यानुयोगस्य युज्यते कर्त्तुम्, सर्वेषामेव प्रधानत्वात् ॥५॥

एवं चोदकेनाक्षेपे कृते सत्युच्यते –

**११ सविसयबलवत्तं पुण जुज्जइ तहवि य महिड्डियं चरणं ।**
**चारित्तरक्खणट्ठा जेणियरे तिन्नि अणुओगा ॥६॥ निभा०**

**सविसयबलवत्त**मित्यादि । स्वश्चासौ विषयश्च स्वविषयस्तस्मिन् **स्वविषये बलवत्त्वं पुनर्युज्यते** घटते, एतदुक्तं भवति-[१]आत्मीयात्मीयविषये सर्व एव बलवन्तो वर्तन्त इति । एवं व्याख्याते सत्यपरस्त्वाह-यद्येवं सर्वेषामेव निर्युक्तिकरणं प्राप्तम्, आत्मीयात्मीयविषये सर्वेषामेव बलवत्त्वात्, तथापि चरणकरणानुयोगस्य न कर्त्तव्येति, एवं चोदकेनाशङ्किते सत्याह गुरुः-'**तहवि य महिड्डियं चरणं' तथापि** एवमपि स्वविषयबलवत्त्वेऽपि सति **महर्द्धिकं चरण**मेव, शेषानुयोगानां चरण-करणानुयोगार्थमेवोपादानात्, पूर्वोत्पन्नसंरक्षणार्थमपूर्वप्रतिपत्त्यर्थं च शेषानुयोगा अस्यैव वृतिभूताः, यथा हि कर्पूरवनखण्डरक्षार्थं वृतिरुपादीयते, तत्र हि कर्पूरवन[२]खण्ड एव प्रधानं न पुनर्वृतिः । एवमत्रापि चारित्र[३]रक्षणार्थं शेषानुयोगानामुपन्यासात्, तथा चाह-**चारित्तरक्खणट्ठा जेणियरे तिन्नि अणुओगा** । [४]चयस्य रिक्तीकरणाच्चारित्रम्, तस्य रक्षणं तदर्थं **चारित्र[५]रक्षणार्थं येन** कारणेन **इतर** इति धर्मानुयोगादय**स्त्रयोऽनुयोगा** इति ॥६॥

---

१. आत्मात्मीयविषये-पु. २. ०खण्डमेव-दा० ०खण्डं प्र. ख. ३. ०रक्षार्थं-क. ४. चयरि०-दा. ५. ०रक्षणमिति क. ख.

एवं व्याख्याते सत्याह-कथं चारित्ररक्षणार्थमिति चेत्तदाह –

**१२ चरणपडिवत्तिहेउं धम्मकहा कालदिक्खमाईआ ।**
**दविए दंसणसुद्धी दंसणसुद्धस्स चरणं तु ॥७॥ निभा०**

**चरणपडिवत्तिहेतु**मित्यादि । चर्यत इति चरणं व्रतादि तस्य प्रतिपत्ति**श्चरण-प्रतिपत्ति**श्चरणप्रतिपत्तेर्**हेतुः** कारणं निमित्तमिति पर्यायाः, किम् ? तदाह-**धर्मकथा** दुर्गतौ प्रपतन्तं[1] सत्त्वसङ्घातं धारयतीति धर्मस्तस्य कथा कथनं धर्मकथा चरणप्रतिपत्ते-र्हेतुर्धर्मकथा, तथाहि-आक्षेपण्यादिधर्मकथाऽऽक्षिप्ताः सन्तो भव्यप्राणिनश्चारित्रं[2] प्राप्नुवन्ति। **कालदिक्खामाईय** त्ति कलनं **कालः** कलासमूहो वा कालस्तस्मिन् काले, **दीक्षादय** दीक्षणं दीक्षा प्रव्रज्याप्रदानम्, आदिशब्दादुपस्थापनादिपरिग्रहः, तथा च शोभनतिथि-नक्षत्रमुहूर्त्तयोगादौ प्रव्रज्याप्रदानं कर्त्तव्यम्, अतः कालानुयोगोऽप्यस्यैव परिकरभूत इति । **दविए** त्ति **द्रव्ये** द्रव्यानुयोगे, किं भवति ? इत्यत आह-**दर्शनशुद्धिः**, दर्शनं सम्यग्दर्शनमभिधीयते तस्य शुद्धिर्निर्मलता दर्शनशुद्धिः, एतदुक्तं भवति-द्रव्यानुयोगे सति दर्शनशुद्धिर्भवति, युक्तिभिर्यथाऽवस्थितार्थपरिच्छेदात्, तदत्र चरणमपि युक्त्य-नुगतमेव ग्रहीतव्यम्, न पुनरागमादेव केवलादिति । आह-दर्शनशुद्ध्यैव किम् ? तदाह-**दर्शनशुद्धस्य** दर्शनं शुद्धं यस्यासौ दर्शनशुद्धस्तस्य **चरणं चारित्रं** भवतीत्यर्थः। **तु**शब्दो विशेषणे, चारित्रशुद्धस्य दर्शनमिति॥७॥

अथवा प्रकारान्तरेण चरणकरणानुयोगस्यैव प्राधान्यं प्रतिपाद्यत आदिभूतस्यापीति, तच्च दृष्टान्तबलेनाचलं भवति नान्यथेत्यतो दृष्टान्तद्वारेणाह –

**१३ जह रण्णो विसएसुं वइरे[3] कणग रयए[4] य लोहे य ।**
**चत्तारि आगरा खलु चउण्ह पुत्ताण ते दिन्ना ॥८॥ निभा०**

**जह रण्णो** इत्यादि । **यथे**त्युदाहरणोपन्यासे **राज्ञो विषयेषु** जनपदेषु वज्र इति वज्राकरो भवति, **वज्राणि** रत्नानि तेषामाकरः खनिर्वज्राकरः[5] । चिंता लोहागरिए त्ति (निभा-९) इत्यतः **सिंहावलोकन**[6]न्यायेनाकरग्रहणं सम्बध्यते, एतेन कारणेण होति उ त्ति (निभा-१०) इत्यस्माद्भवति क्रिया सर्वत्र मीलनीयेति । **कनकं** सुवर्णं तस्याकरो भवति द्वितीयः । **रजतं** रूप्यं तद्विषयश्च तृतीय आकरो भवति, **च**शब्दः

---

१. प्रपतत्सत्त्व. क. २. ०त्रमवा. क. ख. ३. वयरे, आ०दा. ४. रयय आ. दा. ५. खानिः दा. ६. सिंहावलोकित० क. ख.

समुच्चये, अनेकभेदभिन्नं रूप्याकरं समुच्चिनोति । **लोहे चे**ति लोहमयस्तस्मिन् **लोहे** लोहविषयश्चतुर्थ आकरो भवति, **च**शब्दो मृदुकठिनमध्यलोहभेदसमुच्चायकः । **चत्वार** इति सङ्ख्या । आक्रियन्त एतेष्वित्**याकराः**, तथा च मर्यादयाऽभिविधिना वा क्रियन्ते वज्रादीनि तेष्विति । **खलु**शब्दो विशेषणे, किं विशिनष्टि ? सविषयाः सहस्त्यादयश्च ते पुत्रेभ्यो दत्ताः, **चतुर्णां पुत्राणां** सुतानां **ते** इत्याकरा **दत्ता** विभक्ता इत्यर्थः ॥८॥

अधुना प्रदानोत्तरकालं यत्तेषां सञ्जातं तदुच्यते –

**१४ चिंता लोहागरिए पडिसेहं कुणइ[१] सो उ लोहस्स ।**
**वयराईहि य गहणं [२]करेंति लोहस्स तिन्नियरे ॥९॥ निभा०**

**चिंता लोहागरिए** त्ति । लोहाकरोऽस्यास्तीति लोहाकरिकस्तस्मिन् **लोहाकरिके चिन्ता** भवति, राज्ञा परिभूतोऽहं येन ममाप्रधान आकरो दत्तः, एवं चिन्तायां सत्यां **सुबुद्ध्य**भिधानेन मन्त्रिणाऽभिहितः-देव ! मा चिन्ता कुरु, भवदीय एव प्रधान आकरः न शेषा आकरा इति, कुत एतदवसीयते ? यदि भवत्सम्बन्धी लोहाकरो [३]भवति तदानीं शेषाकरप्रवृत्तिः, इतरथा लोहोपकरणाभावान्न प्रवृत्तिरिति, [५५]ततोऽनिर्वाहं भवान् कारयतु कतिचिद्दिनानि यावदुपक्षयं प्रतिपद्यते तेषूपकरणजातम्, [४]ततः सुमहार्घमपि ते लोहं ग्रहीष्यन्तीत्यत आह- **पडिसेहं** इत्यादि, **प्रतिषेधो** वारणा तं प्रतिषेधं **करोत्य**सौ लोहं प्रतीतमेव तस्य **लोहस्य, तु**शब्दो विशेषणे, न केवलमनिर्वाहं करोत्यपूर्वोत्पादनिरोधं च, ततश्चैवं कृते शेषाकरेषूपस्कराः क्षयं प्रतिपन्नाः, ततस्ते **वज्रादिभिर्ग्रहणं कुर्वन्ति,** कस्य ? इत्यत आह- **लोहस्य,** के कुर्वन्ति ? **इतरे** वज्राकरिकादयः । चशब्दान्न केवलं वज्रादिभिर्हस्त्यादिभिश्च। अत्र कथानकं स्पष्टत्वान्न लिखितम्, अयं दृष्टान्तः, साम्प्रतं दार्ष्टान्तिकयोजना क्रियते-यथाऽसौ लोहाकर आधारभूतः शेषाकराणाम्, तत्प्रवृत्तौ शेषाणामपि प्रवृत्तिः, एवमत्रापि चरणकरणानुयोगे सति शेषानुयोगसद्भावः, तथाहि-चरणे व्यवस्थितः शेषानुयोगग्रहणे समर्थो भवति नान्यथेति ॥९॥

---

५५. ततो निर्वाहं भवान् मा कारयतु इत्यर्थः । संटी.

१. सो उ कुणइ दा० जणइ सो उ, सं० २. करिंति, दा. ३. न भवति तदानीं शेषाकराऽप्रवृत्तिः लोहोपकरणाभावात्- आ. दा. ४. पुनर्सु० क. ख.

अस्यार्थस्य प्रतिपादनार्थं गाथासूत्रमाह –

**१५ एवं चरणंमि ठिओ करेइ गहणं विहीइ[१] इयरेसिं ।**
**एएण कारणेणं [२]हवइ उ चरणं [३]महिड्ढीअं ॥१०॥ निभा०**

**एवं चरणंमि** गाहा । **एव**मित्युपनयग्रन्थः, '**चरणम्मि**' त्ति चर्यत इति चरणं तस्मिन् **व्यवस्थितः करोति विधिना ग्रहणमितरेषामि**ति द्रव्यानुयोगादीनाम्, **तदनेन कारणेन भवति चरणं महर्द्धिकम्।** **तु**शब्दादन्येषां च गुणानां समर्थो भवतीति ॥१०॥

अधुना अल्पाक्षरं महार्थमिति (नि.२) यदुक्तं तद्व्याख्यानायाह –

**१६ अप्पक्खरं महत्थं १ महक्खरऽप्पत्थ २ दोसु वि महत्थं ३ ।**
**दोसु वि अप्पं च ४ तहा भणियं सत्थं चउविगप्पं ॥११॥ निभा०**

**अप्पक्खर**मित्यादि । अत्र [४]चतुर्भङ्गिका-अल्पान्यक्षराणि यस्मिन् **तदल्पाक्षरं** स्तोकाक्षरमित्यर्थः । **महत्थं** ति **महानर्थो** यस्मिन् तन्महार्थं प्रभूतार्थमित्यर्थः । तत्रैकं शास्त्रमल्पाक्षरं भवति महार्थं च प्रथमो भङ्गः १ । तथान्यत् किम्भूतं भवति ? **महक्खरऽप्पत्थं महाक्षरं** प्रभूताक्षरमिति हृदयम्, **अल्पार्थं** स्वल्पार्थमिति हृदयम्, द्वितीयो भङ्गः २ । तथाऽन्यत् किम्भूतं भवति? '**दोसु वि महत्थं, द्वयोरपी**त्यक्षरार्थयोः, [५]श्रुतत्वादक्षरार्थोभयं परिगृह्यते, एतदुक्तं भवति- प्रभूताक्षरं प्रभूतार्थं च तृतीयो भङ्गः ३ । तथाऽन्यत् किम्भूतं भवति ? इत्याह-**दोसु वि अप्पं च तहा द्वयोरप्यल्पम**क्षरार्थयोः, एतदुक्तं भवति-अल्पाक्षरम् अल्पार्थं **चे**ति ४ । **तथे**ति तेनागमोक्तप्रकारेण **भणितमुक्तं शास्त्रं चतुर्विकल्पं** चतुर्विधमित्यर्थः ॥११॥

अधुना चतुर्णामपि भङ्गकानामुदाहरणदर्शनार्थमिदं गाथासूत्रमाह –

**१७ सामायारी ओहे [६]नायज्झयणाइँ दिट्ठिवाओ य ।**
**लोइअकप्पासाई अणुक्कमा कारगा चउरो ॥१२॥ निभा०**

**सामायारी ओहे** इत्यादि । **ओघसामाचारी** प्रथमभङ्गक उदाहरणं भवति, पूर्वापरनिपातादेवमुपन्यासः कृतः १, **ज्ञाताध्ययनानि** षष्ठाङ्गे प्रथमश्रुतस्कन्धे तेषु

---

१. विहीए हे. ह. संपा० २. होइ हु. सं० ३. महिड्ढिअं हे०सं० ४. च चतु० क.ख. ५. अन्यस्याश्रु. दा. ६. नायज्झयणा य दा.

कथानकान्युच्यन्ते, ततः प्रभूताक्षरत्वमल्पार्थता **चे**ति द्वितीय भङ्गके ज्ञाताध्ययनान्युदाहरणम्, चशब्दादन्यच्च यदस्यां कोटौ व्यवस्थितम् २, **दृष्टिवादश्च** तृतीयभङ्गक उदाहरणम्, यतोऽसौ प्रभूताक्षरः प्रभूतार्थश्च, चशब्दात्तदेकदेशोऽपि ३, चतुर्थभङ्गोदाहरणप्रतिपादनार्थमाह-'**लोईयकप्पासादी**' त्ति **लौकिकं** चतुर्थभ[१]ङ्गोदाहरणम्, किम्भूतम् ? **का[२]र्पासादि,** आदिशब्दा**च्छि[३]वभद्रादि**परिग्रहः । **अणुक्कम** त्ति **अनुक्रमादि**ति अनुक्रमेणैव परिपाट्यैव, तृतीयार्थे पञ्चमी । **कारकाणि** कुर्वन्तीति कारकाणि उदाहरणान्युच्यन्ते **चत्वारी**ति यथासङ्ख्येनैवेति ॥१२॥

'अनुग्रहार्थं सुविहितानाम्' (नि.२.) इति यदुक्तं तद्व्याख्यानायोदाहरणगाथा —

**१८ बालाईणणुकंपा संखडिकरणंमि हो[४]अगारीणं ।**
**ओमे य बीयभत्तं रण्णा दिन्नं जणवयस्स ॥१३॥ निभा०**

**बालाईण** इत्यादि । एवमित्युपन्यासाद्यथेति गम्यते, ततोऽयमर्थो भवति-यथा **ह्यगारिणामनुकम्पा भवति बालादीना**मुपरि **संखडिकरणे,** एवं स्थविरैः साधूनामनुकम्पार्थमुपदिष्टौघनिर्युक्तिरिति सम्बन्धः । अधुनाऽक्षरगमनिका—बालाः शिशवोऽभिधीयन्ते, त [५]आदिर्येषां ते बालादयः, आदिशब्दात्कर्मकरादिपरिग्रहः, तेषां बालादीनामुपर्यनुकम्पा कृपेत्यर्थः । संखडिकरणे सङ्खड्यन्ते प्राणिनो यस्यां सा सङ्खडिः, अनेकसत्त्वव्यापत्तिहेतुरित्यर्थः । कृतिः करणम्, सङ्खड्याः करणं सङ्खडिकरणं तस्मिन् सङ्खडिकरणे यथाऽनुकम्पा भवति, केषाम् ? इत्याह-अगारिणामगारं विद्यते येषां ते अगारिणस्तेषामगारिणाम्, तथाहि-यद्भोजनं प्रहरत्रयोद्देशे भवति, तस्मिन् यदि बालादीनां प्रथमालिका न दीयते ततोऽतिबुभुक्षाक्रान्तादीनां केषाञ्चिन्मूर्छागमनं भवति, केचित्पुनः कर्मादि कर्तुं न शक्नुवन्ति, ततोऽनुकम्पार्थं प्रथमालिका[६]मसौ गृहपतिः प्रयच्छति, अस्यैव दर्शनार्थं दृष्टान्तान्तरमाह-**ओमे** इत्यादि, **अवमं** दुर्भिक्षं तस्मिन्नवमे बीजानि शाल्यादीनि भक्तमन्नं बीजानि च भक्तं च **बीजभक्त**मेकवद्भावः, **राज्ञा** नरपतिना **दत्तं** कस्य ? तदाह-**जनपदस्य** ।

कस्यचिद्राज्ञो विषये दुर्भिक्षं प्रभूतवार्षिकं सञ्जातम्, ततस्तेन दुर्भिक्षेण सर्वमेव धान्यं क्षयं नीतम्, लोकश्च विषण्णः, तस्मिन्नवसरे राज्ञा चिन्तितम्, सर्वमेव राज्यं

---

१. भङ्गो-उदा. क. ख. २. कर्पासादि क.ख. ३. च्छिवचन्द्रादिग्रहः ली. ४. होयगारीणं सं. ५. येषाम् आदि. क. ख. ६. ०काद्यसौ ख.

मम जनपदायत्तम्, यदि जनपदो भवति ततः कोष्ठागारादीनां प्रभवः, जनपदाभावे तु सर्वाभावः, ततस्तत्संरक्षणार्थं बीजनिमित्तं भक्तनिमित्तं च कोष्ठागारादिधान्यं ददामीति, एवमनुचिन्त्य दापितं [1]जनपदस्य, लोकश्च [2]स्वस्थः सञ्जातः, पुनर्द्विगुणं त्रिगुणं च प्रेषितं राज्ञ इति ॥१३॥

अयं दृष्टान्तः, अधुना [3]दार्ष्टान्तिकप्रतिपादनार्थमाह –

**१९ एवं थेरेहिं इमा अपावमाणाण पयविभागं तु ।**
**साहूणऽणुकंपट्ठा उवइट्ठा ओहनिज्जुत्ती ॥१४॥ निभा०**

**एवं** गाहा । **एव**मित्युपनयग्रन्थः, यथा गृहपतिना बालादीनामनुकम्पार्थं भक्तं दत्तम्, राज्ञा च बीजभक्तमनुग्रहार्थमेव दत्तम्, एवं **स्थविरै**रोघनिर्युक्तिः साधूनामनुग्रहार्थं निर्यूढेति, स्थविराः-**भद्रबाहुस्वामिनस्तैः, आत्मनि गुरुषु च बहुवचनमि**ति बहुवचनेन निर्देशः कृतः । [4]**इम** त्ति **इयं** वक्ष्यमाणलक्षणा प्रतिलेखनादिरूपा । किमर्थं निर्यूढा ? तदाह-**अपावमाणाण** इत्यादि, **अप्राप्नुवताम**नासादयताम्, किमप्राप्नुवतामित्याह-पदविभागं वर्तमानकालापेक्षया **कल्प**रूपं चिरन्तनकालापेक्षया तु **दृष्टिवाद**व्यवस्थितां **पदविभाग**सामाचारीमित्यर्थः । **तु**शब्दाद्दशधासामाचारीं चाप्राप्नुवताम्, केषाम[5]नु-कम्पार्थं निर्यूढा ? तदाह-**साधूनां** ज्ञानादिरूपाभिः पौरुषेयीभिः क्रियाभिर्मोक्षं साधयन्तीति साधवस्तेषां साधूनाम्, किम् ? **अनुकम्पार्थम**नुकम्पा कृपा दयेत्येकोऽर्थः, तया, अर्थः प्रयोजनम् । **उपदिष्टा** कथिता **ओघनिर्युक्तिः** सामान्यार्थप्रतिपादिकेत्यर्थः ॥१४॥

आह–अथ केयमोघनिर्युक्तिर्या स्थविरैः प्रतिपादिता ? तत्प्रतिपादनायाह –

**२० पडिलेहणं१ च पिंडं२ उवहिपमाणं३ अणाययणवज्जं४ ।**
**पडिसेवण५ मालोयण६ जह य विसोही७ सुविहियाणं ॥ नि० ३॥ दारगाहा ।**

**पडिलेहणं चे**त्यादि । एवं सम्बन्धे कृते सत्याह परः-ननु पूर्वमभिहितम्, अर्हतो वन्दित्वौघनिर्युक्तिं वक्ष्ये, तत्किमर्थं वन्दनादिक्रियामकृत्वैवौघनिर्युक्तिं प्रतिपादयतीति, अत्रोच्यते-अविज्ञायैव परमार्थं भवतैतन्नो[6]द्यते चोद्यते । इह हि वन्दनादिक्रिया प्रतिपादितैवासाधारणनामोद्धट्टनादेव, तथाहि-अशोकाद्यष्टमहाप्रातिहार्यादि-

---

१. तस्य ज० दा. २. सुस्थः क. ख. ३. दार्ष्टान्तिकं प्र० क ४. इमे त्ति दा, इमं ति क. ५. ०मनुग्रहार्थम् दा. ६. नुद्-चुद् प्रेरणायाम् । क. ख.

रूपां पूजामर्हन्तीत्यर्हन्तः, तदनेनैव स्तवोऽभिहितः । एवं चतुर्दशपूर्वधरादिष्वपि योजनीयम्,[1] अलं प्रसङ्गेन, प्रकृतं प्रस्तुमः- **पडिलेहणं** ति, **'लिख-अक्षरविन्यासे'** प्रतिलेखनं [2]**प्रतिलेखना** तां वक्ष्य इति, एतदुक्तं भवति-आगमानुसारेण या निरूपणा क्षेत्रादेः सा प्रतिलेखनेति । चशब्दात्प्रतिलेखकं प्रतिलेखनीयं च वक्ष्ये । अथवाऽनेकाकारां प्रतिलेखनां वक्ष्ये [3]उपधिभेदात् । **पिंडं** ति पिण्डनं पिण्डः सङ्घातरूपस्तं **पिण्डम्,** वक्ष्य इति प्रत्येकं मीलनीयम्, भिक्षाशोधिमित्यर्थः । **उवहिपमाणं** ति **उपधिप्रमाणमि**ति उपदधातीत्युपधिः, उप सामीप्येन संयमं धारयति पोषयति चेत्यर्थः । स च पात्रादिरूपस्य प्रमाणं द्विधा तच्च गणनाप्रमाणं प्रमाणप्रमाणं च । **अणाययणवज्जं** ति नायतन**मनायतनं तद्वर्ज्यं** त्याज्यमित्येतच्च वक्ष्ये । अथवा अनायतनवर्ज्यमायतनम्, तदायतनं वक्ष्ये । तच्चानायतनं स्त्रीपशुपण्डकसंसक्तं यद्वर्त्तते, तद्विपरीतमायतनम् । [4]**पडिसेवणं** ति प्रतीपा सेवना **प्रतिसेवना,** एतदुक्तं भवति-संयमानुष्ठानात्[56]प्रतीपमसंयमानुष्ठानं तदासेवना ताम् । **आलोयण** त्ति आलोचन**मालोचना** अपराधमर्यादया लोचनं । दर्शनमाचार्यादेरालोचनेत्यभिधीयते, ताम्, किमालोचनामेव? नेत्याह-**जह य** इत्यादि, **यथा** येन प्रकारेण **विशोधिर्वि**शेषेण शोधिर्विशोधिः, एतदुक्तं भवति-शिष्येणालोचितेऽपराधे सति तद्योग्यं यत्प्रायश्चित्तप्रदानं सा विशोधिरभिधीयते, तां विशोधिम् । केषां सम्बन्धिनीं विशोधिम्- तदाह- सुविहितानां शोभनं विहितमनुष्ठानं येषां ते सुविहितास्तेषां [5]**सुविहितानां** यथा विशोधिस्तथा वक्ष्ये । **च**शब्दः समुच्चये, किं समुच्चिनोति ? कारणप्रतिसेवन अकारणप्रतिसेवने च यथा विशोधिस्तथा वक्ष्य इति ।

अत्राह-अथैषां द्वाराणामित्थं क्रमोपन्यासे किं प्रयोजनमिति, अत्रोच्यते- यत्प्रतिलेखनाद्वारस्य पूर्वमुपन्यासः कृतस्तत्रैतत्प्रयोजनम्-सर्वैव क्रिया प्रतिलेखनापूर्विका कर्त्तव्या इत्यस्यार्थस्य प्रतिपादनार्थं पूर्वं प्रतिलेखनाद्वारमुपन्यस्तम् । प्रतिलेखनोत्तरकालं पिण्डग्रहणं भवति, अतः पिण्डस्योपन्यासः, अशेषदोषविशुद्धः पिण्डो ग्राह्य इति। तदनन्तरमुपधिद्वारस्योपन्यासः क्रियते, किमर्थमिति चेत्, स हि पिण्डो न पात्र[6]पात्रबन्धादिकमन्तरेण ग्रहीतुं शक्यते, अत उपधिप्रमाणं तदनन्तरमभिधीयते । स

---

५६. प्रतीपम्-विपरीतमित्यर्थः । संटी.

१. योज्यम् - क. २. प्रति प्रति ले० क. ३. उपाधि० दा. ४. पडिसेवण त्ति ५. सम्बन्धिनी यथा - दा. ६. पात्रबन्धादिम० क.ख.

च गृहीतः पिण्ड उपधिश्च न वसतिमन्तरेणोपभोक्तुं शक्यते, अतोऽनायतनवर्ज्य-मित्यस्य द्वारस्योपन्यासः क्रियते । प्रतिलेखनां कुर्वतः पिण्डग्रहणमुपधिप्रमाणम् अनायतनवर्जनं चेच्छतः कदाचित्क्वचित्कश्चिदतिचारो भवति, इत्यतोऽतिचारद्वारं क्रियते । स चातिचारोऽवश्यमालोचनीयो भावशुद्ध्यर्थम्, अत आलोचनाद्वारमभिधीयते। आलोचनोत्तरकालं प्रायश्चित्तं तद्योग्यं यतो दीयते, अतो विशोधिद्वारस्योपन्यासः [१]क्रियते। इत्यलमतिविस्तरेण ॥३॥

अधुनैकैकं द्वारं व्याचष्टे, तत्र पर्यायतः प्रतिलेखनाद्वारव्याख्यानायाह –

**२१ आभोग मग्गण गवेसणा य ईहा अपोह पडिलेहा ।**
**[२]पेक्खण [३]निरिक्खणा वि य [४]आलोय पलोयणेगट्ठा ॥ नि.४ ॥**

**आभोग** इत्यादि । आभोगन**माभोगः**, '**भुज-पालनाभ्यवहारयोः**' (**पा.धा. १५२५**) मर्यादयाऽभिविधिना वा भोगनं पालनमाभोगः प्रतिलेखना भवति । मार्गणं **मार्गणा** '**मृग अन्वेषणे**' (**पा.धा. १९७१**) अशेषसत्त्वाऽपीडया यदन्वेषणं सा मार्गणेत्युच्यते । गवेषणं **गवेषणा** '**गवेष मार्गणे**' (**पा.धा. १९५४**) अशेषदोषरहितवस्तुमार्गणं गवेषणेत्युच्यते । ईहन**मीहा** '**ईह चेष्टायां**' (**पा.धा. ६७२**) शुद्धवस्त्वन्वेषणरूपा चेष्टेहेत्युच्यते, सा च प्रतिलेखना भवति । अपोहन**मपोहः**, अपोह पृथग्भाव उच्यते, तथा च चक्षुषा निरूप्य यदि तत्र सत्त्वसम्भवो भवति तत उद्धारं करोति, सत्त्वानामन्यालाभे सति स चापोहः प्रतिलेखना भवति । प्रतिलेखनं **प्रतिलेखना** प्रति प्रत्यागमानुसारेण निरूपणमित्यर्थः । सा च प्रतिलेखना । प्रेक्षणं **प्रेक्षणा** प्रकर्षेणेक्षणं दर्शनं प्रेक्षणेत्युच्यते, सा च प्रतिलेखना । निरीक्षणं **निरीक्षणा,** 'निः आधिक्ये **ईक्ष दर्शने** (**पा.धा. ६४९**) अधिकं दर्शनं निरीक्षणेत्युच्यते, **अपि**शब्दादन्योपसर्गयोगे चैकार्थिकसम्भवो यथा–उपेक्षणेति, चशब्दादाभोगादीनां च शब्दानां ये पर्यायशब्दास्तेऽपि प्रतिलेखनाद्वारस्य पर्यायशब्दाः । **आलोकनमा**लोकः, मर्यादयाऽभिविधिना [५]वा लोकनमित्यर्थः । **प्रलोकनं** प्रलोकना [६]प्रकर्षेण लोकनमित्यर्थः। [७]**एगट्ठ** त्ति **एकार्थिकान्य**मून्यनन्तरोद्दिष्टानि भवन्ति ।

पुल्लिङ्गता च प्राकृतलक्षणवशाद्भवत्येव, यथा-जसो, तवो, सल्लो, नपुंसकलिङ्गा

---

१. कृत, क. ख. २. पिक्खण सं. ३. निरक्खणा हे. ४. आलोगपलोग ह. ५. वा आलो. क. ६. ०णालोक. क. दा. ७. एगट्ठा इति दा. ख.

अपि शब्दाः पुल्लिङ्गाः प्रयुज्यन्ते, एवमत्रापीति । एवं व्याख्याते सत्याह परः-प्रतिलेखनं नपुंसकम्, अत्र तु कानिचिन्नपुंसकानि कानिचित्स्त्रीलिङ्गानि कानिचित्पुँल्लिङ्गानि । [1]तत्र नपुंसकस्य नपुंसकान्येव वाच्यानि तत्कथमिति, अत्रोच्यते-एकं तावत्प्राकृतशैलीमङ्गीकृत्य नपुंसकस्यापि स्त्रीलिङ्गपुँल्लिङ्गैः पर्यायाभिधानमदुष्टम्, तथाऽन्यत्प्रयोजनम्, संस्कृतेऽप्येकस्यैव शब्दस्य त्रयमपि भवति, यथा तटस्तटी तटमिति, तदत्र भिन्नलिङ्गाः शब्दाः केन कारणेन पर्यायशब्दा न भवन्तीति ॥४॥

आह-प्रतिलेखनाग्रहणेन किं सैव केवला गृह्यते ? किमन्यदपि ? अन्यदपि किं तत् ? 'पडिलेहओ य' इत्यादि । अथवा का पुनरत्र प्ररूपणा ? इति तदर्थं ब्रवीति –

**२२ पडिलेहओ य पडिलेहणा य पडिलेहियव्वयं चेव ।**
**कुंभाईसु जह तियं परूवणा एवमिहयं पि ॥ नि० ५ ॥**

**पडिलेहओ** इत्यादि । प्रतिलिखतीति **प्रतिलेखकः** प्रवचनानुसारेण स्थानादिनिरीक्षकः साधुरित्यर्थः । **च**शब्दः सकारणादिस्वगतभेदानां समुच्चायकः । प्रतिलेखनं **प्रतिलेखना** "दुविहा खलु पडिलेहा" (नि. २५७) इत्यादिना ग्रन्थेन वक्ष्यमाणलक्षणा, **च**शब्दो भेदसूचकः । [2]प्रतिलेख्यत इति **प्रतिलेखितव्यं** "ठाणे उवकरणे" (नि. २६४) इत्यादिना वक्ष्यमाणम्, **च**शब्दः पूर्ववत्, **एव**कारोऽवधारणे, नातस्त्रिकादतिरिक्तमस्ति। आह-कथं पुनः प्रतिलेखकप्रतिलेखितव्ययोरनुक्तयोर्ग्रहणमिति? **दण्डमध्यग्रहण**न्यायात्, अथवा ग्रन्थेनैवोच्यते-**कुम्भादिसु** कुम्भो घटः, आदिशब्दात्कटपटशकटग्रहः । **यथा** येन प्रकारेण **त्रिकं** त्रितयं त्रीणीत्यर्थः, **प्ररूपणा** निरूपणाः, **एवं** ति तथा तेन प्रकारेण, **इहे**ति प्रतिलेखनायाम्, **अपि**शब्दः साधर्म्यदृष्टान्तप्रतिपादनार्थः, यथा कर्त्ता कुलालः, करणं मृत्पिण्डदण्डादि, कार्यं कुटः, [3]परस्परापेक्षितया नैकमेकेनापि विनेति, तथा प्रतिलेखना क्रिया सा च कर्त्तारं प्रतिलेखकमपेक्षते प्रतिलेखितव्याभावे चोभयोरभावः, तस्मात्त्रीण्येतानि प्रतिलेखकः प्रतिलेखना प्रतिलेखितव्यं चेति ॥५॥

इह च '**यथोद्देशं निर्देश**' इति न्यायमङ्गीकृत्य प्रतिलेखक आद्यः कर्तृत्वात्प्रधानश्चेत्यतस्तद्व्याख्यानार्थमाह –

---

१. तत् नपुं० ख. २. प्रतिलेख्यते दा. ३. परस्परापेक्षतया दा. परस्परापेक्षया ल.

२३ **एगो व अणेगा वा दुविहा पडिलेहगा समासेणं ।**
**ते दुविहा नायव्वा निक्कारणिया य कारणिया ॥ नि. ६ ॥**

**एगो व** गाहा । सुगमा, नवरं **निक्कारणिआ य** त्ति **च**शब्दाद्गच्छत्तिष्ठद्विशेषणे चात्र द्रष्टव्ये ॥६॥

सकारणाकारणनिर्णयार्थमाह –

२४ **असिवाई कारणिया निक्कारणिया य चक्कथूभाई ।**
[1]**तत्थेगं कारणियं वोच्छं ठप्पा उ तिन्नियरे** ।।नि. ७।।

**असिवाई** गाहा । सुगमा, नवरं **तत्थेगं** ति **तत्र तेष्वेका**नेकसकारणनिष्कारण-गच्छत्तिष्ठत्प्रतिलेखकेषु य एकः [2]**सकारणो** गच्छन् तं **वक्ष्ये** । ताव**त्तिष्ठन्तु त्रयः** सकारणानेकनिष्कारणैकानेकभेदाः, **तु**शब्दात्स्थानस्थितश्च, **इतरे**ऽन्य इत्यर्थः ॥७॥

कियन्ति पुनस्तान्यशिवादीनि ? येष्वसावेकाकी भवतीत्याह –

२५ **असिवे ओमोयरिए रायभए [3]खुहिअ उत्तमट्ठे य ।**
**फिडिअ गिलाणे [4]अइसेस देवया चेव आयरिए ॥ नि. ८॥ दारगाहा ।**

**असिवे** गाहा । न शिवम**शिवं** [5]देवताजनितो ज्वराद्युपद्रवः, **अवमोदरिकं** दुर्भिक्षम्, राज्ञो भयं **राजभयम्, क्षुभितं** क्षोभः सन्त्रास इत्यर्थः, **उत्तमार्थो**ऽनशनम्, **फिडित** इति भ्रष्टो मार्गात्, **ग्लानो** मन्दः, [6]**अतिशेषो**ऽतिशययुक्तः, **देवताचार्यौ** प्रतीतौ, अयं तावदक्षरार्थः । [7]भावार्थं तु भाष्यकार एकैकं द्वारमङ्गीकृत्य प्रतिपादयन्नाह- **'यथोद्देशं निर्देश'** इति न्यायादत्राद्यद्वारमा[8]श्रित्य यो विधिरसावभिधीयते इहाशिवमेका-कित्वस्य हे[9]तुत्वे वर्त्तते, तस्मात्तथा कर्त्तव्यं यथा तन्न भवत्येव ॥८॥

केन पुनः प्रकारेण तन्न भवतीति चेत्तदुच्यते –

२६ **संवच्छरबारसएण होही [10]असिवं ति ते तओ णिंति ।**
**सुत्तत्थं कुव्वंता अइसयमाईहिं नाऊणं ॥१५॥ निभा०**

**संवच्छर** गाहा । संवत्सराणां द्वादशकं **संवत्सरद्वादशकम्,** द्वौ च दश च द्वादश, **तेन भविष्यत्यशिवमिति ज्ञात्वा तं**[11] इति तदैव किं **तत** इति तस्मात्

१. तत्थेक्कं सं.ह. २. सकारणे क. ३. खुभिय स.हे.ह. ४. अइसेसि पा.ह. संपा० ५. देवतादिज० दा. ६. अतिशयः दा. ७. भावार्थस्य क. ख. ८. आसृत्य क. ९. कारणे क. १०. असिवं तु ते तओ स.हे. ११. अतो क.

क्षेत्रात् **णिंति निर्गच्छन्ति । सूत्र**पौरुषी**मर्थ**पौरुषीं **च कुर्वन्तो** निष्पादयन्तोऽन्यदेशम-भविष्यदशिवं विश्वस्ताः सङ्क्रामन्ति । कथं पुनर्ज्ञायते? **अतिशय आदिर्येषां** तेऽतिशयादयो ज्ञानहेतवस्**तैः** ॥१५॥

अतिशयादिप्रतिपादनायाह –

**२७ अइसेस देवया वा निमित्तगहणं सयं व सीसो वा ।**
**परिहाणि जाव पत्तं निं[१]ग्गमण गिलाणपडिबंधो ॥१६॥ निभा०**

**अतिसेस देवया** गाहा । अतिशयोऽवध्यादिस्तदभावे क्षपकादिगुणाकृष्टा देवता कथयति, "[A]अहवा आयरिएणं सुत्तत्थेसु निम्माएण सयमेव निमित्तं घेत्तव्वं, अहवा सीसो गहणधारणासंपन्नो निव्विकारी जो सो गेण्हाविज्जति । जया आयरिओ वुड्ढो भवति तया [२]अविगारिस्स सीसस्स देति, जाहे सो ण [३]होज्जा ताहे अण्णो कोई पुच्छिज्जइ ताहे बारसहिं निग्गंतव्वं । अह बारसहिं ण णायं ताहे एक्कारसहिं जाव जाहे एक्केण वि ण णायं होज्जा [४]ताहे छहिं मासेहिं सु[५]यं ताहे निग्गच्छन्तु, अहवा न चेव णायं, असिवं जायं ताहे निग्गच्छंतु ।" अक्षरव्याख्या-अतिशयन**मतिशयः** प्रत्यक्षं ज्ञानमवधिमनःपर्यायकेवलाख्यम्, तेन ज्ञात्वा, **देवता वा** कथयति, भविष्यत्यशिवमिति, **निमित्तम्** अनागतार्थपरिज्ञानहेतुर्ग्रन्थस्तस्य **ग्रहणं स्वयमेव** करोत्याचार्यः, **शिष्यो वा** योग्यो ग्राह्यते निमित्तम्, **परिहाणि जाव पत्तं** ति द्वादशकेन यदा न ज्ञातं तदा एकादशकेनेत्येकैकहान्या परिहाणि[६]रिति **यावत्प्राप्तमि**ति तावत्स्थिताः कथञ्चिद्यावत्प्राप्तमागतमशिवम्, तत्र किमिति ? **निर्गमनं** निर्गमः कार्यः सर्वैरेवेति । कथं तर्ह्यशिवमाश्रित्यैकाकित्वमिति चेत्तदाह-**गिलाणपडिबंधो ग्लानो** मन्दस्तयैवाशिवकारिण्या देवतया कृतः पूर्वभूतो वा, तेन **प्रतिबन्धो** न निर्गमः सर्वेषाम् ॥१६॥

तस्याश्चाशिवकारिण्याः स्वरूपप्रतिपादनायाह –

---

A. अथवा आचार्येण सूत्रार्थयोर्निर्मातिन (कुशलेन) स्वयमेव निमित्तं ग्रहीतव्यम्, अथवा शिष्यो ग्रहणधारणासंपन्नो निर्विकारी यः स ग्राह्यते, यदा आचार्यो वृद्धो भवति तदाऽविकारिणे शिष्याय ददाति, यदा स न भवेत् तदान्यः कश्चित्पृच्छ्यते, तदा द्वादशेभ्यो निर्गन्तव्यम्, अथ द्वादशेभ्यो न ज्ञातं तदैकादशेभ्यो यावदेकस्मादपि न ज्ञातं भवेत्तदा षड्भ्यो मासेभ्यः श्रुतं तदा निर्गच्छन्तु, अथवा नैव ज्ञातमशिवं जातं तदैव निर्गच्छन्तु ।

१. निग्गमणि दा. २. अहिगारिस्स ख, ३. भोज्जा क. ४. ताहिं. आ. ५. सुतं क. ६. ०णिरिति ताव.दा.

२८ **संजयगिहितदुभयभद्दिया य तह तदुभयस्स वि य पंता ।**
**चउवज्जण वीसु उवस्सए य तिपरंपराभत्तं ॥१७॥ निभा०**

२९ **असिवे सदसं वत्थं लोहं [1]लोणं च तहय विगईओ ।**
**एयाइं वज्जिज्जा चउवज्जणयं ति जं भणियं ॥१८॥ निभा०**

**संजय** गाहा । **असिवे** गाहा । **संयता:** साधवस्तेषां भद्रिका, न गृहिणामिति प्रथमो भङ्गः, **गृहिणां** भद्रिका, न संयतानामिति द्वितीयः, **तथोभयभद्रिके**ति तृतीयः, **उभयप्रान्ता** अभद्रिका अशोभनेति चतुर्थः। "[A]सा पुण चउप्पयारा संजयभद्दिगा गिहत्थपंता १ गिहत्थभद्दिगा संजयपंता २ उभयपंता ३ उभयभद्दिआ ४ । कहं पुण संजयभद्दिगा होज्जा ? गिहत्थे उद्दवेति, संजए भणति-[2]निरुविग्गा अच्छह, ताहे वि गंतव्वं, को जाणति पमत्ता पलोएज्जा वा गिण्हिज्जा वा । गिहिभद्दिगा संजयपंता संजए चेव पढमं गेण्हति, जहा एते महातवस्सी, एते चेव पढमं पेल्लेयव्वा, एतेसु णिज्जितेसु अवसेसा णिज्जिता चेव भवंति, एत्थं जा होउ सा होउ निग्गंतव्वं । जाहे न निग्गया केण वि वाघाएण, को वाघाओ ? पुव्वं गिलाणो वा होज्जा, ताए वा उद्दाइआए कोइ संजओ गहितो होज्जा, पंथा वा न वहंति, ताहे तत्थ जयणाए अच्छियव्वं, का जयणा? इमाणि चत्तारि परिहरितव्वाणि-विगती दसविहा वि **लोणं लोहं च सदसं वत्थं च,** जाणि य कुलाणि असिवेण गहियाणि तेसु आहारादीणि न गेण्हंति, जाहे सव्वाणि वि गहियाणि होज्जा ताहे दिट्ठिं दिट्ठीए ण पाडिंति, ओमत्थिया गेण्हंति, दिट्ठिए संकमइ ।" **चउवज्जण त्ति चतुर्णां वर्जना** परिहारश्चतुर्वर्जना विकृत्यादीनाम्, **चतुर्षु** वा **वर्जना** क्षेत्रस्य-संयतभद्रिका गृहिप्रान्ता

---

A. सा पुनश्चतुष्प्रकारा-संयतभद्रिका गृहस्थप्रान्ता १, गृहस्थभद्रिका संयतप्रान्ता २, उभयप्रान्ता ३, उभयभद्रिका ४ । कथं पुनः संयतभद्रिका भवेत् ? गृहस्थानुपद्रवति, संयतान् भणति निरुपसर्गास्तिष्ठत, तदापि गन्तव्यम्, को जानाति प्रमत्तान् प्रलोकयेद् वा गृह्णीयाद्वा । गृहिभद्रिका संयतप्रान्ता संयतानेव प्रथमं गृह्णाति, यथैते महातपस्विनः, एत एव प्रथमं प्रेरणीयाः, एतेषु निर्जितेष्ववशेषा निर्जिता एव भवन्ति, अत्र या भवतु सा भवतु निर्गन्तव्यम्, यदा न निर्गताः केनापि व्याघातेन, को व्याघातः ? पूर्वं ग्लानो वा भवेत्, तया वोपद्रोत्र्या कश्चित्संयतो गृहीतो भवेत्, पन्थानो वा न वहन्ति, तदा तत्र यतनया स्थातव्यम्, का यतना? इमानि चत्वारि परिहर्त्तव्यानि-विकृतिर्दशविधाऽपि लवणं लोहं च सदशं वस्त्रं च, यानि च कुलानि अशिवेन गृहीतानि तेष्वाहारादीनि न गृह्णन्ति, यदा सर्वाण्यपि गृहीतानि भवन्ति तदा दृष्टिं दृष्टौ न पातयन्ति, अधोमुखा गृह्णन्ति दृष्ट्या सङ्क्रामति ।

१. लवणं संपा. २. निरुवसग्गा - दा.

इत्यादिषु भङ्गकेषु **वीसु उवस्सए य** त्ति ग्लानविधिः, **विष्वग्** भेदेनो**पाश्रय** आश्रयः कर्त्तव्य इत्यर्थः । "[A]जो संजतो असिवेण गहिओ होज्जा, तस्स दूरट्ठितस्स भत्तं तिपरंपरेण दिज्जति ।" **तिपरंपराभत्तं** ति, त्रयाणां परम्परा **त्रिपरम्परा भक्तमा**हारः, तदेको गृह्णाति द्वितीयश्चानयति तृतीयोऽवज्ञया ददातीत्यर्थः । अवधूतमवज्ञातम्, "[B]जहा अवधूता नासति" ॥१७-१८॥

ग्लानोद्वर्त्तनादिविधिप्रदर्शनायाह –

**३० उव्वत्तण निल्लेवण बीहंते अणभिओगऽभीरू य ।**
**अगहियकुलेसु भत्तं गहिए दिट्ठिं परिहरिज्जा ॥१९॥ निभा०**

**उव्वत्तण** गाहा । ऊर्ध्वं वर्त्तनमु**द्वर्त्तनं** यदसावुद्वर्त्यते, **निर्लेपनं** यदसौ निर्लेपः क्रियते, उपलक्षणं चैतत्, तस्य सकाशे स्थातव्यं दिवा रात्रौ वा । अथ कीदृशेन साधुना कर्त्तव्यमित्याह-**बीहंते अणभियोग** त्ति **बिभ्यत्यनभियोगः**, बिभ्यतीति भयं गच्छति, भीरावित्यर्थः, नाभियोगोऽनभियोगः, यो भीरुः स तत्र न नियोक्तव्यः। कस्तर्हि करोति ? इत्याह-**अभीरू य अभीरुश्च** न भीरुरभीरुः, स तत्र स्वयं करोति नियुज्यते वा, चशब्दो वस्त्रान्तरितादिप्रयत्नप्रदर्शनार्थः । **अगृहीतेषु कुलेष्व**शिवेन **भक्तं** ग्राह्यम्, तदभावे **दृष्टिं** दृष्टिसंपात**परिहारः** । [५७]आह-चतुर्वर्जनेत्युक्तं तत्र भङ्गका अपि गृह्यन्त इति । "[C]जोऽवि तं उवत्तेई वा परियत्तेई वा सो हत्थस्स अंतरे वत्थं दाऊण ताहे उवत्तेत्ति वा परियत्तेइ वा । उवत्तेऊण हत्थे मट्टियाए धोवई । [१]जो वि बिभेज्ज सो य तत्थ आयरिएण ण भणिअव्वो । जहा अज्जो तुमं वसाहि त्ति । जो धम्मसड्ढिओ साहू सो अप्पणा चेव भणति-अहं वसामि" ॥१९॥

प्रतिबन्धस्थाने सति कर्त्तव्यान्तरप्रदर्शनायाह –

---

५७. गाथयोर्युग्मं हृदि निर्धार्य शङ्केयम् । ली.

A. यः संयतोऽशिवेन गृहीतो भवेत् तस्मै दूरस्थिताय त्रिपरम्परेण भक्तं दीयते ।

B. यथाऽवज्ञाता नश्यति ।

C. योऽपि तमुद्वर्त्तयति वा परिवर्त्तयति वा स हस्तस्यान्तरे वस्त्रं दत्त्वा तमुद्वर्त्तयति वा परिवर्त्तयति वा । उद्वर्त्य हस्तौ मृत्तिकया धावति । यो बिभ्यति स तत्राचार्येण न भणितव्यः, यथाऽऽर्य ! त्वं वसेति । यो धर्मश्रद्धिकः साधुः स आत्मनैव भणति- अहं वसामि ।

१. जो न बीहिज्जा सो तत्थायरिएण भाणियव्वो । दा. जो य बिहेज्ज ख०

**३१ पुव्वाभिग्गहवुड्ढी विवेग संभोइएसु निक्खिवणं ।**
**ते वि य पडिबंधठिया इयरेसु बला सगारदुगं ॥२०॥ निभा०**

**पुव्वाभिग्गह** गाहा । **पूर्वमिति** शिवकाले **येऽभिग्रहास्तप:**[१]प्रभृतयस्तेषां **वृद्धि:** कार्या । चतुर्थाभिग्रह: षष्ठं करोति, मृते तस्मिन् को विधिरित्याह-**विवेग** विवेचनं **विवेक:, 'विचिर् पृथग्भावे' (पा.धा. १५१३)** परित्याग इति यावत्, कस्यासाविति तदुपकरणस्य, अमृते तस्मिन् गमनावसरे च प्राप्ते किं कर्त्तव्यमित्याह-**संभोइएसु निक्खिवणं** अशेषसमानसामाचारीकेषु विमुच्य गम्यते । ते तत्राशिवे कथं स्थिता इत्याह-**ते वि य पडिबंधठिया** न तेषां गमनावसर: कुतश्चित्प्रतिबन्धात्, तदभावे किं कर्त्तव्यमित्याह-**इतरेसु** त्ति असाम्भोगिकेष्वित्यर्थ: । तदभावे देवकुलिकेषु, अनिच्छत्सु बलात्कारेण । तदभावे कुत्र ? इत्याह-**सगारदुगं** सह अगारेण वर्तते इति **सागारौ** गृहस्थौ इत्यर्थ:, तयोर्द्वयम्, तावेव द्वावित्यर्थ: । कौ पुनस्ताविति? व्रत्यव्रती वा सम्यग्दृष्टी, तदभावे शय्यातर:, यथाभद्रकमिथ्यादृष्टी । "[A]सो य गिलाणो जति अत्थि अण्णा वसही तहिं ठविज्जइ, असईए य ताए चेव वसहीए एगपासे चिलिमिली किज्जति, बारं दुहा किज्जइ, जेण गिलाणो निक्खमति वा पविसति वा । तेण अण्णे साहुणो ण निग्गच्छंति पतियारगवज्जं, ताव अ तहिं अच्छंति जाव सत्थो न लब्भति ताव जोगवुड्ढिं करेंति, जो नमोक्कारं करेंतओ सो पोरिसिं करेति एवं वड्ढंति, जइ पउणो सो साहू जो गहिओ ताहे वच्चंति, अह कालं करेति ताहे जं तस्स उवगरणं तं सव्वं छड्डिज्जइ, ते छड्डित्ता ताहे वच्चंति, अह सो न चेव मुक्को[२] ताहे अन्नेसिं संभोइआणं सकज्जपडिबंधट्ठियाणं मूले निक्खिप्पइ । जाहे संभोइआ न होज्जा ताहे अण्णसंभोइयाणं । जाहे ते वि न होज्जा ताहे पासत्थोसन्नकुसीलादीणं, तेसिं बला वि उवणिज्जति, तेसिं देवकुलाणि

---

A. स च ग्लानो यदि अस्त्यन्या वसतिस्तत्र स्थाप्यते, असत्यां च तस्यामेव वसतावेकपार्श्वे चिलिमिलि: क्रियते, द्वारं द्विधा क्रियते येन ग्लानो निष्क्रामति वा प्रविशति वा । तेनान्ये साधवो न निर्गच्छन्ति प्रतीचारकवर्जम्, तावच्च तत्र तिष्ठन्ति यावत्सार्थो न लभ्यते तावद्योगवृद्धिं कुर्वन्ति, यो नमस्कारस्य कारक: स पौरुषीं करोति, एवं वर्धयन्ति, यदि प्रगुण: स साधुर्यो गृहीतस्तदा व्रजन्ति, अथ कालं करोति तदा यत्तस्योपकरणं तत्सर्वं त्यज्यते, ते त्यक्त्वा तदा व्रजन्ति, अथ स नैव मुक्त: तदाऽन्येषां साम्भोगिकानां स्वकार्यप्रतिबन्धस्थितानां मूले निक्षिप्यते, यदा साम्भोगिका न भवेयुस्तदाऽन्यसाम्भोगिकानाम्, यदा तेऽपि न भवेयुस्तदा पार्श्वस्थावसन्नकुशीलादीनाम्,

१. तप:प्रति तेषां ख. २. मुत्तो दा.

भुज्जंति, [५८]सारूविय[५९]सिद्धपुत्ताणं[६०], तेसिं असति सावगाणं उवणिक्खिप्पति, पच्छा सेज्जायरेसु अहाभद्दगेसु वा एवं ठविज्जइ, ताहे वच्चंति" ॥२०॥

यदि पुनरसौ मुच्यमान आक्रोशति ततः किं कर्त्तव्यमित्याह –

**३२ कूयंते अब्भत्थण समत्थभिक्खुस्स णिच्छ तद्दिवसं ।**
**जइ विंदघाइ भेओ तिदुएगो जाव लाउवमा ॥२१॥ निभा०**

**कूयंते** गाहा । **'कूज अव्यक्ते शब्दे'( पा.धा. २३० ) कूजत्यव्यक्त**शब्दं **कुर्वाणे** किं कार्यमित्याह- **अब्भत्थण समत्थभिक्खुस्स समर्थः** शक्तोऽ**भ्यर्थ्यते,** त्वं तिष्ठ यावद्वयं निर्गच्छाम इति । निर्गतेषु वक्तव्यम्-इच्छतु भवान्, अहमपि गच्छामि, यदीच्छति क्षिप्रं निर्गमः । अथासौ धर्मनिरपेक्षतया नेच्छति ततः किमित्याह- **'अणिच्छ तद्दिवसं' अनिच्छति** तस्मिंस्तस्य साधोर्गमनं **तद्दिवसं** स्थित्वा छिद्रं लब्ध्वा नंष्टव्यम्, तैश्च किं संहतैर्गन्तव्यमाहोस्विदन्यथेत्याह-**जइ[१] विंदघाइ भेओ तिदुएगो जाव** त्ति **यद्यसौ वृन्दघातिनी** ततो द्विधा **भेदः,** तथापि न तिष्ठति त्रिधा, **त्रयस्त्रयो द्वौ द्वौ एकैको यावत्तथा** न घातयति । कः पुनरत्र दृष्टान्तः? इत्याह- **'अलाउवमा'**[२] अलातमुल्मुकं तेनोपमानम्[३] उपमा दृष्टान्तो**ऽलातोपमा,** यथाहि- तानि संहतानि ज्वलन्ति नान्यथा, एवं तेऽपि संहता हन्यन्ते नान्यथेति, तदर्थं भेदः, एवमशिवादेकाकी भवति । "[A]यदि सो कूवति ताहे एको भण्णति-जो समत्थो अच्छ तुमं ताहे छिद्दं नाऊण बितियदिवसे एज्जासि । तस्स पुण मज्जाया-ते विसज्जेयव्वा, मा मम कज्जे मरंतु । जाहे सोऽवि मिलिओ[४] ताहे सव्वे एगतो

---

५८. सारूविय-सारूपिकः शुक्लाम्बरो मुण्डोऽबद्धकच्छो रजोहरणरहितोऽब्रह्मचर्योऽभार्योभिक्षाग्राही । (धर्म.)

५९. सिद्धपुत्त-सिद्धपुत्रः सशिखः सभार्यश्च पश्चात्कृतस्तु त्यक्तचारित्रवेषो गृहस्थः । (धर्म.)

६०. सिद्धपुत्ताणं-त्यक्तव्रतपर्यायानाम्-ल.

तेषां बलादपि उपनीयते, ते देवकुलानि भुज्यन्ते, सारूपिकसिद्धपुत्राणाम्, तेषामसति श्रावकाणामुपनिक्षिप्यते, पश्चात् शय्यातरेषु यथाभद्रकेषु वैवं स्थाप्यते, तदा व्रजन्ति ।

A. यदि स कूजति तदा एको भण्यते-यः समर्थस्तिष्ठत्वं तदा छिद्रं ज्ञात्वा द्वितीयदिवसे आयायाः । तस्य पुनर्मर्यादा-ते विसर्जयितव्याः, मा मम कार्याय मार्षुः । यदा सोऽपि मिलितस्तदा सर्वे एकतो व्रजन्ति, यदा तेषामेकतो व्रजतां कश्चिद्व्याघातो भवेत्, एष वृन्दघाती यत्र बहवस्तत्र पतति, दृष्टान्तः काष्ठसङ्घातः प्रदीप्तः, स द्विधाकृतः पश्चादेकैकं दारुकं कृतं न ज्वलति । एवं तेऽपि यदि गृहीतास्तदा द्विधा क्रियन्ते । एवं त्रिधा, यावत्त्रयस्त्रयो जनाः, एकः प्रतिश्रयपालः सङ्घाटको हिण्डते, अथ तथाऽपि न मुञ्चति तदा द्वौ द्वावपि भवतः । अथ द्वावपि जनौ न मुञ्चति तदैकाकिनो भवन्ति, तेषामुपकरणं नोपहन्यते, एवं तावदेकाकी दृष्टोऽशिवेन ।

१. यदि वंदघाति भेदो क. २. जह अलाउवमा आ०दा० ३. तेनोपमा ख. ४. मिलीणो क.

वच्चंति, जाहे तेसिं एगतो वच्चताणं कोइ विंघाओ[1] होज्जा । एसा वंदघाती जत्थ बहुगा तत्थ पडति, दिट्ठंतो कट्ठसंघातो पलित्तो, सो दुहा कओ पच्छा एक्केक्कं दारुगं कयं न जलति । एवं तेऽपि जइ गहिता ताहे दुहा कज्जंति, एवं तिहा जाव तिण्णि तिण्णि जणा, एगो पडिस्सयवालो संघाडओ हिंडइ । अह तह वि न मुयति ताहे दो दो होंति । अह दो वि जणा न मुयइ ताहे एकाकी भवंति । तेसिं उवगरणं न उवहम्मति । एवं ताव एक्कल्लओ दिट्ठो असिवेण'' ॥२१॥

केन पुनरुपायेन त एकत्वविशेषणजुष्टा नष्टाः सन्त एकत्र प्रदेशे संह्रियन्ते ? इत्याह –

**३३ संगारो राइणिए आलोयण पुव्वपत्त पच्छा वा ।**
**[2]सोम्ममुहिकालरत्तच्छऽणंतरे एक्क दो विसए ॥२२॥ निभा०**

**संगारो** गाहा । **सङ्गारः** सङ्केतः पृथग्भावकाले कर्त्तव्यः, यथाऽ[3]मुकप्रदेशे सर्वैः संहर्त्तव्यमित्युपायः। तं च प्रदेशं प्राप्तानां को विधिरित्याह–'**रायणिए आलोयण पुव्वपत्त पच्छा वा**' **रत्नाधिकस्य** गीतार्थस्य **पूर्वप्राप्तस्य पश्चात्प्राप्तस्य वा आलोचना** देया, तदभावे लघोरपि गीतार्थस्य दातव्या । कियत्पुनः क्षेत्रमतिक्रमणीय-मित्याह–[4]**सोम्ममुही**त्यादि, अशिवकारिण्या विशेषणानि, सौम्यं मुखं यस्याः सा तथा, कथमुपद्रवकारिण्याः सौम्यमुखीत्वम् ? अनन्तरविषयं प्रत्युपद्रवाकरणात् । **कृष्णमुखी** द्वितीयविषयेऽपि न मुञ्चति । **रक्ताक्षी** [5]तृतीयविषयेऽपि न मुञ्चति, यथासङ्ख्य**मनन्तर** एव स्थीयते सौम्यमुख्याम् । **एक** इति **एकम**न्तरे कृत्वा तृतीये स्थीयते कृष्णमुख्याम् । **दो** इति द्वावन्तरे कृत्वा चतुर्थे स्थीयते रक्ताक्ष्याम् । ''[A]तेसिं संगारो दिण्णेल्लतो भवति जहा अमुगत्थ मेलाइयव्वं[6] ति । जाहे मिलिणो भवति ताहे तत्थ जो राइणिओ पुव्वपत्तो वा पच्छापत्तो वा तस्स आलोयणा दायव्वा । अह गीयत्थो ओमो ताहे तस्स आलोइज्जई[7] त्ति । सा पुण तिविहा उद्दाइया [8]सोम्ममुखी कालमुखी रत्तच्छी य, जा सा सोम्ममुखी तीसे एक्कं विसयं गम्मइ । कालमुहीए

---

A. तेभ्यः सङ्केतो दत्तो भवति यथा अमुकत्र मीलयितव्य इति, यदा मीलितो भवति तदा तत्र यो रात्निकः पूर्वप्राप्तो वा पश्चात्प्राप्तो वा तस्मै आलोचना दातव्या । अथ गीतार्थोऽवमस्तदा तस्मै आलोचयेदिति । सा पुनस्त्रिविधा उपद्राविका सौम्यमुखी कृष्णमुखी रक्ताक्षी च, या सा सौम्यमुखी तस्यामेको विषयो गम्यते, कृष्णमुख्यामेको

१. विवादो क. २. सोम दा. ३. अमुकत्र दा. ४. सोममुही दा. ५. तृतीयेऽपि दा. ६. ०यव्वं दा. ७. ०ज्जइ दा. ८. सोममुही दा.

एगो विसओ अंतरिज्जइ । रत्तच्छीए दो विसए अंतरेऊणं चउत्थे विसए [१]ठाति। असिवे त्ति दारं समत्तं" ॥२२॥

अशिवेन यथैकाकी भवति तथा [२]व्याख्यातम्, साम्प्रतं 'ओमोयरिए' त्ति (नि.२) यदुक्तं तद्व्याख्यानायाह[३] –

**३४ एमेव य ओमम्मि वि भेदो उ अलंभि गोणिदिट्ठंतो ।**

[४]**एमेव य** गाहद्धं । **एवमेवे**त्यनेनैव प्रकारेणावमद्वारमपि व्याख्येयं यथाऽशिवद्वारं व्याख्यातम्, यो विधिरशिवद्वारे सोऽत्रापीत्यर्थः। **च**शब्दो बहुसादृश्यप्रतिपादनार्थः । **अवमे** दुर्भिक्षे, **अपिशब्दः** सादृश्यसम्भावने, तदुच्यते– "संवच्छरबारसएण होहिति ओमं ति [५]ते तओ णिंति" (निभा. १५) इत्यादि । भेदनं **भेद** एकैकता, **तुशब्द** एवकारार्थः, कस्मिन्पुनरसौ भवतीत्याह–**अलाभे** भवति, अप्राप्तावाहारस्येत्यर्थः । यदेको लभते तद् द्वावपि, द्वौ वा दृष्ट्वा न किञ्चिद्ददाति, एकैक एव लभते इत्यवमादेरेकाकिता । अत्र दृष्टान्तमाह-'**गोणिदिट्ठंतो**' **गोदृष्टान्तः**, यथा [६]संहतानां गवां स्वल्पे तृणोदके न तृप्तिः, पृथग्भूतानां स्यात्, तथेहापीति । "[A]ओमोदरियाए वि एसेव कमो, बारसहिं संवच्छरेहिं आरद्धं जाहे पारं न पाविंति ताहे गणभेदं करेंति, नाणत्तं-गिलाणो न तहा परिहरिज्जति । एत्थ गोणिदिट्ठंतो कायव्वो, अल्पं गोब्राह्मणं नंदति, एवं ओमेण वि एगागिओ दिट्ठो" ॥ दारं ॥

साम्प्रतं राजभयद्वारप्रतिपादनायाह –

**रायभयं च चउद्धा चरिमदुगे होइ गणभेओ ॥२३॥ निभा०**

**राजभयं च** गाहद्धं । राज्ञो भयं **राजभयम्, च**शब्द एवमेव चेत्यस्यानुकर्षणार्थः, "संवच्छरबारस०" (निभा. १५) इत्यादि । कियन्तः पुनस्तस्य भेदः ? इत्याह-**चतुर्धा, सङ्ख्यायाः प्रकारवचने थाल् (पा. ५/३/२३)** चतुष्प्रकारमित्यर्थः । के पुनस्ते इति ? मा त्वरिष्ठा अनन्तरमेवोच्यन्ते । किं चतुर्ष्वपि भेदेषु [७]भेदः ? नेत्याह–

---

विषयोऽतरय्यते, रक्ताक्ष्यां द्वौ विषयौ अन्तरयित्वा चतुर्थे विषये तिष्ठति । अशिवमितिद्वारं समाप्तम् ।

A. अवमौदर्यतायामपि एष एव क्रमः, द्वादशेभ्यो वर्षेभ्य आरभ्य यदा पारं न प्राप्नुवन्ति तदा गणभेदं कुर्वन्ति, नानात्वं ग्लानो न तथा परिहियते, अत्र गोदृष्टान्तः कर्त्तव्यः। गोब्राह्मणौ अल्पौ नन्दतः, एवमवमेनाप्येकाकी दृष्टः। द्वारम् ।

१. होति क० २. तथा ख्यातं क. ख. ३. दारगाहद्धं दा. ४. एवमेव य गाहद्धं व्याख्या क. ५. तो तओ क. ख. ६. संहूतानाम् ल. ७. भेदो नेत्याह ख. भेद इत्याह ल.

**चरिमदुए** इत्यादि, **चरिमे** पश्चिमे **द्वये** द्वितये **भवति** जायते **गणभेदो** गच्छ-पृथग्भावः, ए[१]कैकतेत्यर्थः । [A]'रायदुट्ठमवि तहेव बारसहिं संवच्छरेहिं होहिति' **॥२३॥**

भेदचतुष्टयस्वरूपप्रदर्शनायाह –

**३५ निव्विसउ त्ति य पढमो बिइओ मा देह भत्तपाणं से ।**
**तइओ उवगरणहरो जीव चरित्तस्स वा भेओ ॥२४॥ निभा०**

**निव्विसउ त्ति** गाहा । सुगमा, नवरं-**जीव** त्ति **जीवितभेदकारी** चतुर्थो भेदश्**चारित्रभेदकारी वा** चतुर्थो राजा, उपकरणहारिजीवितचारित्रहारिणो[२]र्गणभेदः कार्य इति । [B]'तं चउव्विहं, निव्विसउ त्ति य पढमो बिइओ मा देह भत्तपाणं से । तइओ उवकरणहरो जीव चरित्तस्स वा भेदो' ॥२४॥

आह-कथं पुनः साधूनां त्यक्तापराधानां राजभयं भवति ? –

**"यस्य हस्तौ च पादौ च जिह्वाग्रं च सुयन्त्रितम् ।**
**इन्द्रियाणि च गुप्तानि तस्य राजा करोति किम् ? ॥१॥" [ ]**

सत्यमेतत्, किं तर्हि ? –

**३६ अहिमर अणिट्ठ[३]दरिसण वुग्गाहणया तहा अणायारे ।**
**अवहरणदिक्खणाए आणालोवे व कुप्पिज्जा ॥२५॥ निभा०**

**३७ अंतेउरप्प[४]वेसो वायनिमित्तं च सो पओसिज्जा ।**

**अहिमर** गाहा । **अंतेउर** गाहद्धं । **अभिमरा** अभिमुखमाकार्य मारयन्ति म्रियन्ते वेत्यभिमराः, कुतश्चित्कोपाद्राजकुलं प्रविश्यापरं व्यापादयन्तीति । साधूनां किमायातमिति चेत्, उच्यते-अन्यथा प्रवेशमलभमानैः कैश्चित्साधुवेषेण प्रविश्य [६१]तत् कृतम्, ततश्च नि[५]र्विवेकित्वात्स राजा साधुभ्यः कुप्येत्, कुप्येदिति चैतत्क्रियापदं प्रतिपदं योजनीयम् । [६२]अभव्यत्वात्, **अनिष्टान**प्रशस्तान् मन्यमानो **दर्शनं** नेच्छति, प्रस्थानादौ

---

६१. तत् = व्यापादनमिति । संटी. ६२. अभव्यत्वात्-अभव्यपदं मिथ्यादृष्ट्यादि साधारणं ज्ञेयम् । आसन्नभव्यानां साधुदर्शनस्य प्रशस्तत्वाद्, अप्रशस्तत्वं तु तयोरेवेति । संटी.

A. राजदुष्टमपि तथैव द्वादशैः संवत्सरैर्भविष्यति ।

B. तच्चतुर्विधम्, निर्विषय इति च प्रथमो द्वितीयो मा देहि भक्तपानं तस्मै । तृतीय उपकरणहरो जीवितस्य चारित्रस्य वा भेदः ॥

१. एकैक इत्यर्थः दा. २. गुण ल. ३. दंसण का. ४. ०प्पवेसे वाइ हे० ५. निर्विवेकत्वात् - ल.

च दृष्ट्वेति कुप्येत् । **व्युद्ग्राहणता** विशब्दः कुत्सायाम्, उत् प्राबल्ये, केनचित्प्रत्यनीकेन व्युद्ग्राहितः, यथैते तवानिष्टं ध्यायन्तीति कुप्येत् । लोकं **प्रत्यनाचारं** समुद्देशादौ दृष्ट्वा कुप्येत्, **अपहरणं** कृत्वा तत्प्रतिबद्धो **दीक्षित** इति कुप्येत्, **आज्ञालोपे वा** आज्ञा काचिल्लोपिता न कृता ततश्च **कुप्येत्** ॥२५॥

**अन्तःपुरे प्रवेशं** कृत्वा केनचिल्लिङ्गधारिणा वि[1]कर्मे[63] कृतं ततः प्रद्वेषं यायात्, वादिना वा केनचिद्भिक्षुणा परिभूत इति, ततो निमित्तात् **स** इति राजा **प्रद्विष्यात्** प्रदुष्येद्वा । दारं । "[A]तं पुण रायदुट्टं कहं होज्जा ? केणति लिंगत्थेणमंतेउरे अवरद्धं होज्जा । अहवा ज[2]हा वा वादिणा वादे –

***"तस्स पंडियमाणिस्स बुद्धिलस्स दुरप्पणो ।***
***मुद्धं पाएण अक्कम्म वादी वायुरिवागतो ॥१॥"***

"एवं रायदुट्टं हविज्जा, निव्विसए भत्तपाणपडिसेहे उवगरणहरे य एत्थ गच्छेण चेव वच्चंति, जत्थ [3]जीवियचरित्तभेओ तत्थ एगाणिओ होज्जा" । दारं ।

क्षुभितद्वारं व्याचिख्यासुराह –

**खुभिए मालुज्जेणी पलायणं जो जओ तुरियं ॥२६॥ निभा०**

[4]**खुभिए** गाहद्धं । **क्षोभे** एकाकी भवति । क्षोभ आकस्मिकः सन्त्रासः । तत्र **मालुज्जेणि** त्ति **माला** अरहट्टस्य [5]पतिता, **उज्जयनी** नगरी, उज्जयिन्यां बहुशो मालवा चौरा आगत्यागत्य मानुषादीन् हरन्ति । अन्यदा तत्र कूपेऽ[6]रघट्टमाला पतिता । तत्र केनचिदुक्तम्-माला पतिता, अन्येन सहसा प्रतिपन्नं मालवाः पतिताः, ततश्च संक्षोभः, तत्र किं भवतीत्याह-'**पलायणं जो जओ तुरियं**', **पलायनं** नाशनं **यः** कश्चिद्यत्र व्यवस्थितस्तच्छ्रुतवान् स तत एव नष्ट इति । **मालुज्जेणि** त्ति दृष्टान्तसूचकं वचनम् । "[B]खुभिए वा एगागी होज्जा, जहा उज्जेणीए अरहट्टमाला

---

६३. विकर्म-विरुद्धः कर्म पापकर्म । संटी.

A. तत्पुना राजद्विष्टं कथं भवेत् ? केनचित् लिङ्गस्थेनान्तः पुरमपराद्धं भवेत्, अथवा यथा वा वादिना वादे-'तस्य पण्डितंमन्यस्य बुद्धिलस्य दुरात्मनः । मूर्धानं पादेनाक्रम्य वादी वायुरिवागतः ॥१॥' एवं राजद्विष्टो भवेत्, निर्विषये भक्तपानप्रतिषेधे उपकरणहरे चात्र गच्छेनैव व्रजन्ति, यत्र जीवितचारित्रभेदस्तत्रैकाकी भवेत् । द्वारम् ।

B. क्षोभे वा एकाकी भवेत्, यथा उज्जयिन्यामरहट्टघटीमाला पतिता, लोकः सर्वः पलायितः-मालवा पतिता इति, ईदृशे क्षोभे एकाकी भवेत्, यो यत्र स ततो नश्यति । द्वारम् ।

१. धिक्कर्म ख. २. जहा पुणो वादे ख. ३. जीवचरित्त० ख. ल. ४. द्वारगाथार्धम्-दा. ५. प्रतीता ख. ल. ६. अरहट्ट ल.

पडिआ, लोगो सव्वो पलाओ मालवा पडिय त्ति, एरिसे [1]खुभिए एगागी होज्जा, जो जओ सो तओ णासति" । दारं । ॥२६॥

अधुना यदुक्तं राजभयद्वारे '[2]वायनिमित्तं च सो [3]पओसिज्ज' त्ति (निभा.२५) तद्व्याचिख्यासुराह –

३८ **तस्स पंडियमाणिस्स बुद्धिल्लस्स दुरप्पणो ।**
**मुद्धं पाएण अक्कम्म वाई वाउरिवागओ ॥२७॥ निभा०**

[4]**तस्स पंडियमाणिस्स** सिलोगो । आह चोदकः-शोभनं स्थानमे[5]तद् व्याख्यायाः, ननु क्षुभितद्वारेणान्तरितत्वात्कोऽयं प्रकारः ? इति, अत्रोच्यते-नि[64]र्युक्तिग्रन्थवशाददोषः। यतोऽत्रैकगाथया 'अंतेउर' इत्यादिकया राजभयक्षुभितद्वार उक्ते ततस्तत्रानवसरत्वादिहैव युक्ता व्याख्या, [6]तस्स त्ति **तस्य** राज्ञो भयहेतोः, कथम्भूतस्य ? 'पण्डितमानिनः' **पण्डितंमन्यस्य** पण्डितमात्मानं मन्यते स [7]एवंमन्यो ज्ञानलवदुर्विदग्धत्वात् । बुद्धिं लातीति बुद्धिलो **बुद्धिलस्य, दुरात्मनो** मिथ्यादृष्टित्वादभद्रकत्वाच्छासन-प्रत्यनीकत्वाद्दुष्ट आत्मा यस्य स तथा तस्य । किमित्याह – **मूर्द्धानमु**त्तमाङ्गं **पादेनाक्रम्य वादी** वादलब्धिसंपन्नः साधु**र्वायुरिवागतो**ऽभीष्टं स्थानं प्राप्त इत्यक्षरार्थः।

समुदायार्थस्तु-स राजा पण्डितंमन्यतया दर्शनं निन्दति, तद्वादी वा कश्चित्, तत्र चेत् साधुर्वादी, तेन सभां प्रविश्य न्यायेन पराजितः, तथापि न साधुकारं ददाति प्रभुत्वात्तथापि निन्दति पुनश्चासौ साधुर्वादी विद्यादिबलेन सभामध्ये तस्य शिरसि पादं कृत्वाऽदर्शनीभूतः । ततश्चासौ परं परिभवं मन्यमानः प्रकर्षेण द्वेषं यायात्, इति श्लोकार्थः ॥२७॥

उत्तमार्थद्वारप्रतिपादनायाह –

३९ **निज्जवगस्स सगासं असई एगाणिओ वि गच्छिज्जा ।**
**सुत्तत्थपुच्छगो वा गच्छे अहवा वि पडियरिउं ॥२८॥ निभा०**

[8]**निज्जवगस्स** गाहा । [9]निर्यापयत्याराधयति **निर्यापक** आराधक**स्तस्य सकाशं** मूल**मसति** द्वितीयाभाव **एकाक्यपि** कालं कर्तुकामो **गच्छेत्, सूत्रार्थप्रच्छको वा**

---

६४. निर्युक्तेरुपरिग्रन्थो निर्युक्तिग्रन्थः, भाष्यमित्यर्थः । (ली.)

१. खुहिते ल. २. वाई – ल. ३. पदुसेज्ज – ल. ४. तस्स पंडियमाणस्स-दा. ५. तद् व्या० ल. ६. तस्सेति ल. ७. एव नान्यो ल. ८. निजावगस्स क. ९. निर्यामयति निर्यामकः, ल. ख.

**गच्छेत्** । उत्तमार्थस्थितस्यैकाक्यपि मा भूद् व्यवच्छेदः । '**अहवा वि पडियरिउं**' **अथवाऽपि प्रतिचरितुं** प्रतिचरणकरणार्थम् । "[A]उत्तिमट्ठे वा' सो साहू उत्तिमट्ठं पडिवज्जिउकामो, आयरियसगासे य नत्थि निज्जावओ[1], ताहे अन्नत्थ वच्चिज्जा, तो [2]संघाडओ वच्चउ, असति ताहे एगो एगाणिओ वच्चिज्जा, अहवा उत्तिमट्ठ-पडिवण्णओ साहू सुतो, तस्स सुत्तत्थतदुभयाणि अपुव्वाणि, इमस्स य संकियाणि, अण्णस्स य नत्थि, ताहे तत्थ [3]पडिपुच्छणनिमित्तं वच्चिज्जा । अहवा उत्तिमट्ठ-पडिअरएहिं गम्मति" ॥२८॥

उक्तमुत्तमट्ठद्वारम्, इदानीं फिडिअद्वारं व्याचिख्यासुराह –

**४० फिडिओ व[4] परिरएणं मंदगई वा वि जाव न मिलिज्जा ।**

फिडिओ व गाहद्धं । [B]फिडिउ त्ति "ते पंथेण वच्चंति, तत्थ कोइ पंथाओ उत्तिण्णो, अण्णेण वच्चिज्जा, अहवा थेरो, तस्स य अंतरा गड्डा वा डोंगरा वा, जे समत्था ते उज्जुएण वच्चंति, जो असमत्थो सो परिरएणं भमाडेण वच्चइ, ततो जाव ताणं न मिलइ ताव एगागी होज्जा" । इदानीं गाथार्थः-फिडितः प्रभ्रष्टः, किमुक्तं भवति ? [5]प्रभ्रष्टः गच्छतामेव सर्वेषां पथद्वयदर्शनात्सञ्जातमोहोऽन्येनैव पथा प्रयातस्तत एकाकी भवति । **परिरएणं** वा **परिरयो** गिर्यादेः परिहरणं तेन वा एकाकी कश्चिदसहिष्णु**र्मन्दगतिर्वा** कश्चित्साधुर्यावन्न **मिलति** तावदेकाकी भवतीति ।

उक्तं फिडितद्वारम्, इदानीं ग्लानद्वारमुच्यते –

**सोऊणं व गिलाणं ओसहकज्जे असइ एगो ॥२९॥ निभा०**

**सोऊणं व** इत्यादि । "[C]गिलाणनिमित्तेण वा एगागी हुज्जा, तस्स ओसहं [6]वा

---

A. उत्तमार्थे वा-स साधुरुत्तमार्थं प्रतिपत्तुकामः, आचार्यसकाशे च नास्ति निर्यापकः, तदाऽन्यत्र व्रजेत्, ततः ससङ्घाटको व्रजतु, असति तदैक एकाकी व्रजेत्, अथवोत्तमार्थप्रतिपन्नकः साधुः श्रुतः, तस्य सूत्रार्थतदुभयान्यपूर्वाणि, अस्य च शङ्कितानि, अन्यस्य च न सन्ति, तदा तत्र प्रतिपृच्छानिमित्तं व्रजेत् । अथवा उत्तमार्थप्रतिचरकैर्गम्यते।

B. 'स्फिटित' इति, ते पथा व्रजन्ति, तत्र कश्चित् पथ उत्तीर्णः, अन्येन व्रजेत्, अथवा स्थविरः, तस्य चान्तराले गर्त्ता वा पर्वता वा, ये समथास्ते ऋजुकेन व्रजन्ति, योऽसमर्थः स परिरयेण भ्रमणेन व्रजति, ततो यावत्तेषां न मीलति तावदेकाकी भवेत् ।

C. ग्लाननिमित्तेन वा एकाकी भवेत्, तस्यौषधं वा भेषजं वा आनेतव्यम्, असति संघाटकस्य तदैकाकी व्रजेत्। अथवा ग्लानः श्रुतस्तदा सर्वैर्गन्तव्यम् । अथात्मन आचार्याः स्थविरास्तदा तेषामपि पार्श्वे स्थातव्यम्, तदा सङ्घाटकस्यासति एकाकी व्रजेत् ।

१. णिज्जवओ दा. २. ससंघाडओ आ. ३. पडिपुच्छग ख. ४. य परि० हे.स० ५. सो ग.दा. ६. भेसहं ख.ल.

भेसयं वा आणियव्वं । असइ संघाडगस्स ताहे एगागी वच्चिज्जा, अहवा गिलाणो सुतो ताहे सव्वेहिं गंतव्वं । अह अप्पणो आयरिआ थेरा ताहे तेसिं पि पासे अच्छियव्वं, ताहे संघाडयस्स असइ एगागी वच्चिज्जा ।" इदानीमक्षर-गमनिका-**श्रुत्वाऽ**न्यत्र **ग्लानं** सङ्घाटकाभाव **एकाकी** व्रजति, यदिवा स्वगच्छ एव ग्लानः कश्चिदस्ति, [१]तदर्थमौषधाद्यानयनार्थं व्रजत्येकाकी द्वितीयाभावे सति ॥२९॥

उक्तं ग्लानद्वारम् । इदानीमतिशयिद्वारम् –

**४१ अइसेसिओ व सेहं [२]असई एगाणियं पठावेज्जा ।**

**अइसेसी**त्यादि । "[A]कोइ अतिसयसंपण्णो सो जाणइ, जहा एयस्स सेहस्स सयणिज्जगा आगया, ताहे सो भणति-एयं सेहं अवणेह, जइ न अवणेह ताहे एस न [३]करेति पव्वज्जं, ततो सो असइ संघाडयस्स एगाणिओ वि पठ्ठविज्जइ"। इदानीमक्षरार्थः-**अतिशयी वा** कश्चिदभिनवप्रव्रजितं द्वितीये**ऽसत्येकाकिनमपि** [४]**प्रवर्त्तयेत्** ।

उक्तमतिशयिद्वारम् । इदानीं देवताद्वारम् –

**देवय कलिंग रुयणा पारणए खीररुहिरं च ॥३०॥ निभा०**

**देवय** इत्यादि । "[B]इह **कलिंगेसु** जणवएसु **कंचणपुरं** नगरं, तत्थायरिया बहुस्सुता [४]बहवागमा बहुसिस्सपरिवारा, ते अण्णया य सिस्साणं सुत्तत्थे दाऊण सन्नाभूमिं वच्चंति, तस्स य गच्छंतस्स पंथे महति महालयो रुक्खो । तस्स हिट्ठा **देवता** महिलारूवं विउवित्ता कलुणकलुणाणि **रोवति** । सा तेण दिट्ठा । एवं बितिअदिवसे वि तइयदिवसे वि । तओ आयरियस्स संका जाया-अहो ! कीस इमा एवं रोवइ ? त्ति, ताहे [५]ओव्वंतिऊण पुच्छिआ- किं[६] तुमं धम्मशीले !

---

A. कश्चिद् अतिशयसंपन्नः स जानाति-यथैतस्य शैक्षकस्य स्वजना आगताः, तदा स भणति-एनं शैक्षकमपनयत, यदि नापनयत तदैष न करोति प्रव्रज्याम्, ततः सोऽसति सङ्घाटकस्य एकाक्यपि प्रस्थाप्यते ।

B. इह कलिङ्गेषु जनपदेषु काञ्चनपुरं नगरम्, तत्राचार्यां बहुश्रुता बह्वागमा बहुशिष्यपरिवाराः, ते चान्यदा शिष्येभ्यः सूत्रार्थौ दत्त्वा संज्ञाभूमिं व्रजन्ति, तस्य च गच्छतः पथि महातिमहान् वृक्षः, तस्याधो देवता महिलारूपं विकुर्व्य करुणकरुणानि रोदिति, सा तेन दृष्टा, एवं द्वितीयदिवसेऽपि तृतीयदिवसेऽपि, तत आचार्यस्य शङ्का जाता-अहो ! कुत इयमेवं रोदिति ? इति, तदा अपवर्त्य पृष्टा-किं त्वं धर्मशीले ! रोदिषि ? सा भणति-भगवन्!

१. औषधादीनाम् आन. ख.ल. २. एगाणिओ वि गच्छेज्जा सं. हे० ३. करेज्ज ल. ४. प्रवर्तयति ल. ४. पहाणागमा आ. ५. उव्वत्तिऊण ख. ल. ६. पुण ख.

रुवसि ? सा भणइ-भगवं ! किं मम थेवं रोइयव्वं ? आयरिओ भणइ- किं कहं वा ? सा भणइ-अहमेयस्स **कंचणपुरस्स** देवता । एतं च अइरा सव्वं महाजलप्पवाहेण पलाविज्जिहिति तेण रुवामि त्ति, एते य साहुणो एत्थ सज्झायंति गुणेंति य, ते अ अन्नत्थ गमिस्संति त्ति अओ रुआमि । आयरिएण भणिअं-कहं पुण एतं जाणिज्जइ ? सा भणति-जओ तुज्झं खमओ **पारणए दुद्धं** लभिस्सइ, तं से **रुहिरं** भविस्सइ त्ति, जइ एवं होज्जा तो पत्तिएज्जाह, तं च घेत्तूण सव्वसाहूणं पातेसु थेवं थेवं देज्जाह, जत्थ देसे तं [1]साभावियं जाहिति तत्थ ण जलप्पवाहो पभविस्सइ त्ति मुणिज्जह, ततो एवं ति आयरिएण पडिवन्नं । ताहे बितिअदिवसे तहेव लद्धं तं तहा य संजायं । ततो आयरिएहिं सव्वेसिं मत्तए पत्तेयं पत्तेयं तं दिन्नं । ततो जहासत्तीए पलायंति । जत्थ तं [2]पंडुरं जायं तत्थ मिलिया । एवं एगागी होज्जा" ॥३०॥

उक्तं देवताद्वारम्, अथाचार्यद्वारम् –

**४२ चरिमाए संदिट्ठो उग्गाहेऊण मत्तए गंठिं ।**
**इहरा कयउस्सग्गो [3]परिच्छ आमंतए सगणं ॥३१॥ निभा०**

**चरिमा** गाहा । **चरिमा** चतुर्थपौरुषी तस्यां **संदिष्ट** उक्तः, यदुत-त्वयाऽमुकत्र गन्तव्यम्, स चाभिग्रहिकः साधुः, ततश्चासावेवमाचार्येणोक्तः किं करोति ? सकलमुपकरणं पात्रकपटलादि वोद्ग्राहयति, **मात्रकं** च तेन गच्छता ग्राह्यम्, अतस्तस्मिन् **ग्रन्थिं** ददाति, मा भूद् भूयः प्रत्युपेक्षणीयं स्यात्, एवमसावाभिग्रहिकः संयन्त्र्य तिष्ठतीति । **इहर** त्ति आभिग्रहिकाभावे विकालवेलायां वा गमनप्रयोजनमापतितम्, ततः **कृतोत्सर्गः** कृतावश्यकः किं करोतीत्याह-**परीक्षार्थमि**ति, पश्यामः, कोऽत्र मद् वागनन्तरं प्रवर्त्तते को वा न प्रवर्त्तत इति **स्वगणमामन्त्रयते** । ते च

---

किं मम स्तोकं रोदितव्यम् ? आचार्यो भणति-किं कथं वा ? सा भणति-अहमेतस्य काञ्चनपुरस्य देवता, एतच्चाचिरात् सर्वं महाजलप्रवाहेन प्लाविष्यते तेन रोदिमीति । एते च साधवोऽत्र स्वाध्यायन्ति गुणयन्ति च, ते चान्यत्र गमिष्यन्तीति अतो रोदिमि, आचार्येण भणितम्-कथं पुनरेतद् ज्ञायते ?, सा भणति-यतो युष्माकं क्षपकः पारणके दुग्धं लप्स्यते, तत्तस्य रुधिरं भविष्यतीति, यद्येवं भवेत् तदा प्रतीयाः, तच्च गृहीत्वा सर्वसाधूनां पात्रेषु स्तोकं स्तोकं दद्याः । यत्र देशे तत् स्वाभाविकं यास्यति तत्र न जलप्रवाहः प्रभविष्यतीति जानीयाः, तत एवमिति आचार्येण प्रतिपन्नम् । तदा द्वितीयदिवसे तथैव लब्धं तत्तथैव सञ्जातम्, तत आचार्यैः सर्वेषां मात्रके प्रत्येकं प्रत्येकं तद्दत्तम्, ततो यथाशक्ति पलायन्ते, यत्र तत्पाण्डुरं जातं तत्र मीलिताः, एवमेकाकी भवेत् ।

१. सभावं ल., सहावं ख. २. पंडरं ख.ल. ३. परिच्छियामंतिया हे.ह.

प्रतिक्रमणानन्तरं तत्रैवान्तर्मुहूर्तमात्रं कालमासते, कदाचिदाचार्याः खल्वपूर्वां सामाचारीं प्ररूपयेयुः, अपूर्वं वाऽर्थपदम्, तत्रस्थांश्च तानामन्त्रयतेऽसौ-भो भिक्षवः ! अमुकं मे गमनकार्यमुपस्थितम् ॥३१॥

तत्र –

**४३ गच्छिज्ज को णु सव्वेवऽणुग्गहो कारणाणि [१]दीवित्ता ।**
**अमुगो एत्थ समत्थो अणुग्गहो उभयकि[२]इकम्मं ॥३२॥ निभा०**

**गच्छेज्जा** गाहा । कतमः साधुस्तत्र गमनक्षमः ? तत्राचार्यवाक्श्रवणानन्तरं **सर्वेऽपि** साधव एवं ब्रुवन्ति-अहं गच्छाम्यहं गच्छामी**त्यनुग्रहो**ऽयमस्माकम् । तत आचार्यो वैयावृत्त्यकरयोगवाहिदुर्बलादीनि **कारणानि दीपयित्वा** स्वयं प्रदर्श्येदं भणति-**अमुकोऽत्र** कार्ये **समर्थः** क्षमः । ततश्च योऽसावाचार्येणोक्तोऽयं क्षम इति स भणति-**अनुग्रहो** मेऽयम्, ततः को विधिः ? ततः स जिगमिषुः साधुराचार्यस्य चैत्यसाधुवन्दनां करोति, यदि पर्यायेण लघुस्ततः शेषाणामपि साधूनां चैत्यसाधु[३]वन्दनां करोति । अथाऽसौ गन्ता साधू रत्नाधिकस्ततस्ते साधवस्तस्य चैत्यसाधुवन्दनां विदधति, एतदु**भयकृतिकर्म**वन्दनम् ॥३२॥

ततः स गन्ता साधुः किं करोति जिगमिषुः सन् ? –

**४४ पोरिसिकरणं अहवा वि अकरणं दोच्चऽपुच्छणे दोसा ।**
**सरण सुय साहु सन्नी अंतो बहि अन्नभावेणं ॥९॥ नि०**

**पोरिसि** गाहा । यद्यसौ सूर्योद्गमे यास्यति ततः [४]प्रादोषिकीं सूत्रपौरुषीं करोति। **अथवा** रात्रिशेषे यास्यति प्रयोजनवशात्ततः सूत्रपौरुषीमकृत्वैव स्वपिति, एतत्**पौरुषी-करणमकरणं** चेति । पुनरपि च तेन गच्छताऽऽचार्यः प्रच्छनीयः प्रत्यूषसि यास्याम्यहमिति । अथ न पृच्छत्यतः **दोच्चऽपुच्छणे दोस** त्ति **द्वितीय**वारा**मपृच्छतो दोषा** [५]वक्ष्यमाणलक्षणाः, के च ते ? इत्याह - **सरण**गाहद्धं-**स्मरणमा**चार्यस्यैव सञ्जातम्, एवंविधमन्यथा व्यवस्थितं कार्यम्, अन्यथा कदाचित्सन्दिष्टम्, **सुय** त्ति **श्रुत**माचार्यैर्यथा ते तत्राचार्या न विद्यन्ते यन्निमित्तं चासौ प्रेष्यते, तद्वा कार्यं तत्र नास्ति । **साहु** त्ति अथवा विकाले **साधुः** कश्चित्तस्मात्स्थानादागतस्तेन कथितं यथा स आचार्यस्तत्र नास्तीति । **सण्णि** त्ति अथवा **सञ्ज्ञी** श्रावक आयातस्तेनाख्यातम्।

---

१. दीविंत्ता हे. स.ह. २. कितिकम्मं स० ३. ०वन्दनं क. ४. प्रादोषिकां दा. ५. वक्ष्यमाणाः दा.

**अंतो** त्ति अभ्यन्तरतः, कस्य ? प्रतिश्रयस्य, केनचिदुल्लपितं यथा-अस्माकमप्येवंविधाः साधव आसन्, ते च ततो गता मृता वा । **बहि** त्ति **बाह्यतः** प्रतिश्रयस्य श्रुतमन्यस्मै कथ्यमानं केनचित् । **अन्नभावेणं** ति योऽसौ गन्ता सो**ऽन्यभाव** उन्निष्क्रमितुकामः, एतच्चाचार्याय तत्सङ्घाटकेनाख्यातम्[1], ततश्चासौ ध्रियते केनचिद्व्याजेन ॥९॥

यदि पुनरसौ गन्ता न प्रबोधं यायात्ततः –

**४५ बोहण अप्पडिबुद्धे गुरुवंदण घट्टणा अपडिबुद्धे ।**
**निच्चल णिसण्ण झाई दट्ठुं चिट्ठे चलं पुच्छे ॥१०॥ नि०**

**बोहण** गाहा । अचेतयति सति तस्मिन् गन्तरि **बोधनं** जाग्रापनं गीतार्थः करोति। ततोऽसौ साधुरुत्थायाचार्याभ्यासमेति, गत्वा च यद्याचार्यो विबुद्धस्ततोऽसौ **गुरवे वन्दनं** करोति । अथाद्यापि स्वपिति ततो घट्टना चाचार्यपादयोः शिरसा **घट्टना** चलनं क्रियते । अथासौ प्रतिबुद्ध एव किन्तु **निश्चलो निषण्ण** उपविष्टो **ध्यायी** चास्ते, ततस्तमेवम्भूतं निश्चलनिषण्णध्यायिनं **दृष्ट्वा** किं कर्त्तव्यमित्याह-**चिट्ठे स्थातव्यम्,** तेन गुरुध्यानव्याघातेन[2] महाहानिसम्भवात् । **चलं पुच्छे** त्ति अथ **चलो**ऽसौ ततः **प्रष्टव्यो** भगवन् ! स एषोऽहं गच्छामीति ॥१०॥

ततश्चासावाचार्येण सन्दिष्टः-इदमेवं त्वया कर्त्तव्यमिति व्रज[3] । स चेदानीं गन्तुं प्रवृत्त इत्येतदेवाह –

**४६ अप्पाहि अणुन्नाओ ससहाओ नीइ जा पभायं ति ।**
**उवओगं आसण्णे करेइ गामस्स सो उभए ॥११॥ नि०**

**अप्पाहित** गाथा । सन्दिष्टः प्राक् पश्चाद**नुज्ञातो** 'गच्छ' इति ततो गच्छति, कथम् ? **ससहायः,** कियन्तं कालं तावत्ससहायो व्रजति ? **यावत्प्रभातं** सञ्जातसूर्योदय इत्यर्थः । ससहायश्च प्रभातं [4]यावद् व्रजति श्वापदादिभयात् । एवमसौ साधुर्व्रजन् ग्रामसमीपं प्राप्तः सन् किं करोतीत्याह–**उपयोगं करोति**, किंविषयम्? **उभए** त्ति **उभय**विषयम्, मूत्रपुरीषपरित्याग इत्यर्थः, कस्मादेवं चेद् ग्रामसन्निधान एव स्थण्डिलसद्भावाद् गवादिसंस्थानात् ॥११॥

अथ रात्रौ गच्छतः कश्चिदपायः [5]सम्भाव्येत ततः प्रभातं यावत्स्थातव्यम्, तथा चाह –

---

१. सङ्घाटिकेन क.ख.ल. २. व्याघाते क. ल. ३. व्रजति दा. ४. यावत् दा. ५. सम्भाव्यते दा.

४७ **हिमतेणसावयभया दारा पिहिया पहं अयाणंतो ।**
**अच्छइ जाव पभायं वासियभत्तं च से वसभा ॥१२॥ नि०**

**हिम** गाथा । **हिमं** शीतम् **स्तेनाश्चौराः**, **श्वापदानि** सिंहादीनि, **एतद्भयात्**प्रभातं यावदास्ते। यदि वा पुरस्य **द्वाराणि पिहितानि** ग्रामस्य वा फलिहकं **पन्थानं** वाऽ**जानंस्तिष्ठति यावत्प्रभातमिति** । एवं च प्रभातं यावत् स्थिते गन्तरि **वासिकभक्तं** दोषान्नं **से** तस्य **वसभा** गीतार्था आनयन्ति ॥१२॥

अथ केभ्यस्तदानीयते ? –

४८ **ठवणकुल संखडीए अणहिंडंते सिणेहपयवज्जं ।**
**भत्तट्ठिअस्स गमणं अपरिणए गाउयं वहइ ॥१३॥ नि०**

**ठवण** गाथा । **स्थापनाकुलेभ्यः**, तथा **संखडीए** त्ति सामयिकीप[१]रिभाषा भोजने प्रकरणार्थे तस्या वा, के पुनस्तदानयन्त्यत आह – **अणहिंडंते** ये भिक्षां न पर्यटितवन्तः । कस्मात्पुनस्ते भक्तमानयन्ति ? उच्यते-तेषामहिण्डकानां गृहस्था गौरवेण प्रयच्छन्ति । कीदृशं पुनस्तैर्भक्तमानयनीयम् ? **सिणेहपयवज्जं** ति **स्नेहेन** घृतादिना **पयसा** क्षीरेण **वर्जितं** भक्तं गृह्णन्ति, न तैलं ग्राह्यममङ्गलत्वात्, न घृतं परितापहेतुत्वात्, न दुग्धं भेदकत्वात् काञ्जिकविरोधित्वाच्च, काञ्जिकप्रायपायित्वाच्च संयतानाम् । किं पुनस्ते गृह्णन्ति ? दधिसक्तुकादि, तदसौ भुक्त्वा व्रजति । तथा चाह– '**भत्तट्ठिअस्स गमणं**' **भुक्तवतः** सतस्ततो **गमनं** भवति । अथ न तस्य भक्त-परिणतिर्जातेत्यतोऽ**परिणते** भक्ते सति **गव्यूतमात्रं** यावन्मार्गं **वहति** । क्रोशद्वयं वा [२]गव्यूतम् ॥१३॥

इदानीं तस्य गच्छतो विधिरुच्यते –

४९ **अत्थंडिलसंकमणे चल वक्खित्तऽणुवउत्त सागरिए ।**
**पडिपक्खेसु उ भयणा इयरेणं विलंबणालोगं ॥१४॥ नि.**

**अत्थंडिल** गाथा । स्थण्डिला**दस्थण्डिलं सङ्क्रामता** सता साधुना पादौ रजोहरणेन प्रमार्जनी[३]याविति विधिः, मा भूत् सचित्तपृथिव्या अचित्तपृथिव्या व्यापत्तिः, स्यात्तदा च पादयोरसौ रजोहरणेन प्रमार्जनं करोति । यदा **कश्चित्सागारिकः** पथि

---

१. भाषा दा. २. गव्यूतिः दा. ३. ०यौ इति विधेः क.ख.

व्रजतश्चलो भवति व्याक्षिप्तोऽनुपयुक्तश्चेति । तत्र चलो गन्तुं पथि प्रवृत्तः, व्याक्षिप्तो हलकुलिशवृक्षच्छेदादिव्यग्रः, अनुपयुक्तः साधुं प्रत्यदत्तावधानः । यदैवंविधः [६५]सागारिको भवति तदा रजोहरणेन प्रमृज्य पादौ याति । **पडिपक्खेसु उ** त्ति विसदृशाः पक्षाः प्रतिपक्षाः, असदृशा इत्यर्थः, तेषु **प्रतिपक्षेषु भजना** विकल्पना कर्त्तव्या । एतदुक्तं भवति—केषुचित्प्रतिपक्षेषु प्रमार्जनं क्रियते केषुचित्तु नैव । **तु**शब्दो विशेषणार्थः, किं विशेषयति ? प्रतिपक्षेष्वेव समुदायरूपेषु भजना कर्त्तव्या, न त्वेकैकस्मिन् भङ्गक इति । यदा तु सागारिकः स्थिरोऽव्याक्षिप्त उपयुक्तश्च साधुं प्रति भवति तदा **इतरेणं** ति **इतर**शब्देन रजोहरणनिषद्योच्यते तया पादौ [१]प्रमार्जनीयौ, न रजोहरणेन । **विलंबण** त्ति तां च निषद्यां हस्तेन **विलम्बमानां** नयति, न तु शरीरे संस्पर्शनं करोति । कियतीं भुवं यावदित्याह—**आलोयं** ति आलोकन**मालोको** यावत्तद्दृष्टिप्रसर इत्यर्थः । अथवा **इतरेणं** ति केनचिदौपग्रहिकेण कार्पासिकेन और्णिकेन वा चीरेण, शेषं प्राग्वत्, पश्चात्तं [२]सङ्गोपायति । अथवा **इतरेण विलंबणालोयं** ति प्राक् तावदेकाकिनो विधिरुक्तः, यदा तु **इतरेण** इतरशब्देन सार्थो [३]गृह्यते, तेने**तरेण** सार्थेन सह [४]व्रजता स्थाण्डिल्याच्चास्थाण्डिल्यं सङ्क्रामता किं कर्त्तव्यं सार्थपुरतः ? इत्याह—**विलम्बणे**ति **विलम्बना** कार्या, मन्दगतिना सता स्थण्डिलस्थेन तावत्प्रतिपालनीयम् । कियन्तं कालं प्रतिपालनीयम् ? यावदालो[५]कनं दर्शनं तस्य सार्थस्य, अदर्शनीभूते तु झाटान्तरिते सार्थे पादयोः प्रमार्जनं कृत्वा व्रजतीत्ययं विधिः ।

उक्तो गाथाऽक्षरार्थः, इदानीमष्टभङ्गिका प्ररूप्यते, सा चेयम् – "[A]चलो वक्खित्तो अणुवउत्तो य सागारिओ, एत्थ पमज्जणं, तस्यानुपयुक्त्वादप्रमार्जनेऽसामाचारीप्रसङ्गात् १, [६]चल वक्खित्तु उवउत्तु एत्थ नत्थि पमज्जणं सागारियत्तणओ २, चल अवक्खित्तु अणुवउत्तु एत्थ वि पमज्जणं ३, चल अवक्खित्तु उवउत्तु एत्थ वि णत्थि पमज्जणं ४, अचल वक्खित्तु अणुवउत्तु एत्थ पमज्जणं ५, अचल वक्खित्तु उवउत्तु णत्थि

---

६५. सागारिकः-अगारं गृहं सह तेन वर्तते स सागारिकः । गृहस्थ इत्यर्थः । संटी.

A. चलो व्याक्षिप्तोऽनुपयुक्तश्च सागारिकः, अत्र प्रमार्जनम्, तस्यानुपयुक्तत्वादप्रमार्जनेऽसामाचारीप्रसङ्गात् १, चलो व्याक्षिप्त उपयुक्तः, अत्र नास्ति प्रमार्जनं सागारिकत्वात् २, चलोऽव्याक्षिप्तोऽनुपयुक्तः, अत्रापि प्रमार्जनम् ३, चलोऽव्याक्षिप्त उपयुक्तः, अत्रापि नास्ति प्रमार्जनम् ४, अचलो व्याक्षिप्तोऽनुपयुक्तः, अत्र प्रमार्जनम् ५, अचलो व्याक्षिप्त उपयुक्तः, नास्ति प्रमार्जनम् ६, अचलोऽव्याक्षिप्तोऽनुपयुक्तः, अस्ति प्रमार्जनम् ७, अचलोऽव्याक्षिप्त उपयुक्तः, अत्र नास्ति प्रमार्जनम् ८ । तत्र प्रथमभङ्गे नियमेन प्रमार्जना सप्तसु तु भजना ।

१. प्रमार्ष्टि दा. २. गोपायति दा. ३. अभिगृह्यते क ४. प्रव्रजता दा. ५. ०लोको दा. ६. चलु ल, ख

पमज्जणं ६, अचल अवक्खित्तु अणुवउत्तु अत्थि पमज्जणं ७, अचल अवक्खित्तु उवउत्तु एत्थ नत्थि पमज्जणं ८ । तत्थ पढमभंगे नियमेण पमज्जणा सत्तसु उ भयणा" । एतदुक्तं भवति–केषुचित्प्रमार्जनं केषुचित्तु न प्रमार्जनम् । स्थापना त्वियम् ॥१४॥

| | | |
|---|---|---|
| ऽ | ऽ | ऽ |
| । | ऽ | ऽ |
| ऽ | । | ऽ |
| । | । | ऽ |
| ऽ | ऽ | । |
| । | ऽ | । |
| ऽ | । | । |
| । | । | । |

स इदानीं साधुर्मार्गमजानानः पृच्छति, तत्र को विधिरित्याह –

५० **पुच्छाए तिण्णि तिया छक्के पढमजयणा तिपंचविहा ।**
**आउम्मि दुविहतिविहा तिविहा सेसेसु काएसु ॥१५॥ नि० दारगाहा।**

**पुच्छाए** गाहा । **पृच्छायां** सत्यां **तिण्णि तिय** त्ति **त्रयस्त्रिका** भवन्ति । तत्र पुरुषः स्त्री नपुंसकं च । तत्रैतेषामेकैकस्त्रिप्रकारः-बालस्तरुणो वृद्धश्चेति । एवमेते त्रयस्त्रिकाः, नवेत्यर्थः । तथा तेनैव साधुना गच्छता **छक्के पढमजयण** त्ति **षट्के** पृथिव्यादिलक्षणे यतना कर्त्तव्या । तत्र **पढमजयणा तिपंचविह** त्ति **प्रथमो** यः पृथ्वीकायः तस्य **यतना त्रिपञ्चविधा** । तत्र त्रिविधा सचित्तस्य अचित्तस्य मिश्रस्य च पञ्चविधा पृथिवीकायस्य यतना [१]कृष्णनीलरक्तपीतशुक्लस्येति । अथवा **त्रिपञ्चविधेति त्रयः पञ्चकाः** पञ्चदशप्रकारेत्यर्थः। तथाहि – सचित्तः पृथिवीकायः शुक्लादि पञ्चधा, एवमचित्तो मिश्रश्च । तथाऽप्**काये दुविहतिविहा** तत्र[२] **द्विविधा** [३]आन्तरिक्षाप्काययतना भौमाप्काययतना च, **त्रिविधा** तु सचित्ताप्काययतना, अचित्ताप्काययतना मिश्राप्काययतना च । **त्रिविधा** तु **शेषेषु कायेषु** तेजोवायु-वनस्पतित्रसाख्येषु यतना, कथम् ? सच्चित्तादि, महाद्वारगाथायाः समुदायार्थः ॥१५॥

अथाद्यद्वारावयवार्थप्र[४]तन्वन्नाह –

५१ **पुरिसो इत्थि नपुंसग एक्केक्को थेर मज्झिमो तरुणो ।**
**साहम्मि अन्नधम्मिय गिहत्थदुग अप्पणा[५] तइओ ॥१६॥ नि०**

**पुरिसो** गाहा । यदुक्तमनन्तरगाथायां पुच्छाए त्ति पृच्छायां त्रितयं सम्भवति, तदाह – **पुरुषः स्त्री नपुंसकं** चेति । यदुक्तं त्रयस्त्रिकाः, तद्दर्शयन्नाह – **एकैकः स्थविरो मध्यमस्तरुण** इत्ययं नवभेदः । स चैकैको नवविधोऽपि कदाचित्साधर्मिकः स्यात्कदाचित्तु नवविधोऽप्यन्यधार्मिकः स्यादिति । समाने धर्मे वर्त्तत इति **साधर्मिकः** श्रावकः श्राविका [६]नपुंसकश्रावकं च । **अन्यधार्मिको**

१. कायय. दा. २. दुविहा जयणा ल, ख ३. अन्त दा. ४. प्रतिपादनार्थमाह दा. ५. अप्पणो दा. ६. नपुंसकं श्रा० ख.दा.

मिथ्यादृष्टिः । कियन्तः पुनस्तेन गच्छता पन्थानं प्रष्टव्या इत्यत आह-**गिहत्थदुग** त्ति, साधर्मिक**गृहस्थद्वयं** प्रच्छनीयम्, अन्यधार्मिकगृहस्थद्वयं वा । [1]**अप्पणा ततिओ** त्ति **आत्मना तृतीयो** युक्त्याऽन्वेषणं विदधाति । एष तावत्सामान्योपन्यासः । अथ प्रथमं यः प्रष्टव्यः स उच्यते—तत्र यदि साधर्मिकद्वयमस्ति ततस्तदेवोत्सर्गेण पृच्छ्यते, तस्य प्रत्ययिकत्वात् ॥१६॥

अथ नास्ति ततः –

**५२ साहम्मियपुरिसासइ मज्झिमपुरिसं अणुण्णविय पुच्छे ।**
**सेसेसु होंति दोसा सविसेसा संजईवग्गे ॥१७॥ नि०**

**साहम्मिय** गाहा । **साधर्मिकपुरुष**द्वयाभावेऽन्यधार्मिक**मध्यमपुरुष**द्वयं **प्रच्छनीयम्**, कथम् ? '**अणुण्णविअ**' **अनुज्ञां कृत्वा** धर्मलाभपुरस्सरम्, ततः प्रियपूर्वकं **पृच्छति**, अन्यधार्मिकमध्यमग्रहणं त्विह साधर्मिकविपक्षत्वादवसीयत एव । **सेसेसु** त्ति अन्यधार्मिकमध्यमपुरुषद्वयव्यतिरिक्तेष्वष्टसु भेदेषु **दोषा भवन्ति** पृच्छतस्त एव दोषाः **सविशेषाः** समधिकाः **संयतीवर्गे** संयतीवर्गविषये पृच्छतः सतः ॥१७॥

के च ते दोषा इत्याह –

**५३ थेरो पहं न याणइ बालो पवंचे न याणई वावि ।**
**पंडित्थि[2]मज्झि संका इयरे न याणंति संका य ॥१८॥ नि०**

**थेरो** गाहा । **स्थविरो** वृद्धः । स मार्गं **न जानाति** प्रभ्रष्टस्मृतित्वात् । **बाल**स्तु **प्रपञ्चयति** केलिकिलत्वात् **न वा जानाति** क्षुल्लकत्वात्, बालस्त्वत्राष्टवर्षादारभ्य [3]यावत्पञ्चविंशतिक इति, असावपि बाल इव बालः, अपरिणतत्वेन रागान्धत्वात् । **मध्यम**वयः**पण्डकमध्यम**वयः **स्त्री**पृच्छायां **शङ्को**पजायते नूनमस्य आभ्यां कश्चिदर्थोऽस्ति । **इयरे न याणंति** । **इतरशब्देन** स्थविरनपुंसकं बालनपुंसकं स्थविरस्त्री बालस्त्री वाऽभिगृह्यते, एते मार्गानभिज्ञाः **शङ्का च** स्यात् ॥१८॥

क्व तर्हि व्यवस्थितेन प्रच्छनीयमित्याह –

**५४ पासड्डिओ [4]पुच्छिज्जा वंदमाणं अवंदमाणं वा ।**
**अणुवईऊण व पुच्छे तुण्हिक्कं मा य पुच्छिज्जा ॥१९॥ नि०**

---

१. अप्पणो ततिउ दा. २. मज्झे सं. ह० ३. उत्पन्न ल, ख ४. य पुच्छेज्ज हे. उ पुच्छेज्ज ह०

**पासड्डिओ** गाहा । [१]**पार्श्वे स्थितः** [२]समीपे व्यवस्थितः **पृच्छेत्** । किंविशिष्टं तं पृच्छेत् ? **वन्दनं कुर्वाणमकुर्वाणं वा** । अथासौ समीपमतिक्रम्य यात्येव ततः **'अणुवईऊण व'-अनुव्रजनं वा** कृत्वा कतिचित्पदानि गत्वा **प्रष्टव्यः** । अथासौ पृच्छ्यमानोऽपि न किञ्चिद्वक्ति **तूष्णीं** [३]व्रजति, ततो **नैव प्रच्छनीय** इति॥१९॥

५५ **पंथब्भासे य ठिओ गोवाई मा य [४]दूर पुच्छिज्जा ।**
**संकाईया दोसा विराहणा होइ दुविहाओ ॥२०॥ नि०**

**पंथ** गाहा । तथा **पन्थाभ्यासे** समीपे **स्थितः** कश्चिद्गोपालादिः, आदिशब्दात्कर्षक-परिग्रहः, स च प्रच्छनीयः, [५]माऽथ दूरव्यवहितं **गोपालादिं पृच्छेत्, शङ्कादिदोष**-सद्भावात्, नूनमस्य द्रविणमस्ति बलीवर्दादिशृङ्गिणं वा हरणं करोतीत्येवमादयः । [६]दूरे च गच्छतो **द्विविधा विराधना**-आत्मसंयमविषया, आद्या कण्टकादिभिरितरा-ऽनाक्रान्तपृथिव्याद्याक्रमणेन ॥२०॥

यदा तु पुनरन्यधार्मिको मध्यमवयाः पुरुषो नास्ति यः पन्थानं पृच्छ्यते तदा कः प्रष्टव्य इत्याह –

५६ **असई मज्झिम थेरो दढस्सई भद्दओ य जो तरुणो ।**
**एमेव इत्थिवग्गे नपुंसवग्गे य संजोगा ॥२१॥ नि०**

**असई** गाहा । **असति मध्यमपुरुषे स्थविरः** पन्थानं प्रच्छनीयः, किंविशिष्टः? **दृढस्मृतिः** । अथ स्थविरो न भवति ततस्**तरुणः** प्रष्टव्यः, कीदृशः ? **यः** स्वभावेनैव **भद्रकः, स्त्रीवर्गेऽप्येवमेव** पृच्छा कर्तव्या, एतदुक्तं भवति- प्रथमं मध्यमवयाः स्त्री मार्गं प्रष्टव्या तदभावे स्थविरा दृढस्मृतिः, तदभावे भद्रिका तरुणी, एवं मध्यमवयो नपुंसकम्, तस्याभावे स्थविरनपुंसकं दृढस्मृति तदभावे बालनपुंसकं भद्रकम् । आह च-**'नपुंसवग्गे य संजोगा' नपुंसकवर्गे** नपुंसकसमुदाये एवमेव **संयोगा** ज्ञातव्याः ॥२१॥

यथैतेऽनन्तरमुक्ता न केवलमेतावन्त एव संयोगाः किन्त्वन्येऽपि बहवः सन्ति, आह च –

५७ **एत्थं पुण संजोगा होंति अणेगा विहाणसंगुणिया ।**
**पुरिसित्थिनपुंसेसुं मज्झिम तह थेरतरुणेसुं ॥२२॥ नि०**

---

१. पार्श्वस्थितः क.दा. २. सामीप्ये क. । ३. वदति दा. ४. दूरि दा. ५. मा च दूरे व्यवस्थितं गोपालादि दा. ६. दूरं ल

**एत्थं पुण** गाहा । **अत्र पुनः** पृच्छाप्रक्रमे **संयोगा भवन्त्यनेके,** कथम् ? **विहाणसंगुणिय** त्ति **विधानेन** भेदप्रकारेण **सङ्गुणिताः,** चारणिकया अनेकशो भिन्ना इत्यर्थः । क्व च ते भवन्ति ? **पुरिसित्थिनपुंसेसु पुरुषस्त्रीनपुंसकेषु,** किंविशिष्टेषु ? **मध्यमस्थविरतरुण**भेदभिन्नेषु, उक्तो गाथाऽक्षरार्थः ।

इदानीं भङ्गकाः प्रदर्श्यन्ते, "तत्थ साहम्मिअचारणिआए ताव-दो मज्झिमवय-साहम्मिअपुरिसे पुच्छिज्ज एस इक्को भेओ उ १, तदभावे दो थेरे साहम्मिए चेव पुच्छिज्जा २, तदभावे दो तरुणे साहम्मिए चेव एस तईओ ३, तदभावे दो साहम्मिणीओ मज्झिमवयमहिलातो ४, तत्तो दो थेरीओ साहम्मिणीओ चेव पंचमो एसो ५, तत्तो साहम्मिणीओ च्चिअ दो तरुणीओ छट्ठो एसो ६, तदभावे दो साहम्मिआ उ मज्झिमनपुंसया पुच्छे ७, तत्तो दो साहम्मिअथेरणपुंसाओ अट्ठमओ ८, दो साहम्मिअतरुणे नपुंसया चेव ते उ पुच्छिज्जा ९, अहवा मज्झिमपुरिसो थेरो च [1]दू चेव साहम्मी १०, मज्झिमपुरिसो साहम्मिओ तरुणसाहम्मिओ य पुच्छिज्जइ ११, मज्झिमपुरिसो साहम्मिओ मज्झिममहिला साहम्मिआ १२, मज्झिमपुरिसो साहम्मिओ थेरी य साहम्मिणी १३, मज्झिमपुरिसो साहम्मिओ तरुणी य साहम्मिणी १४, मज्झिमपुरिसो साहम्मिओ य मज्झिमसाहम्मियनपुंसो अ १५, मज्झिमपुरिसो साहम्मिओ थेरसाहम्मिओ नपुंसो अ १६, मज्झिमपुरिसो साहम्मिओ तरुणनपुंसय-साहम्मिओ य १७, अहवा थेरपुरिसो साहम्मिओ तरुणसाहम्मिओ य १८, थेरपुरिससाहम्मिओ मज्झिममहिला साहम्मिणी य १९, थेरपुरिसो साहम्मिओ थेरी साहम्मिणी अ २०, थेरपुरिसो साहम्मिओ तरुणी साहम्मिणी य २१, थेरपुरिसो साहम्मिओ मज्झिमनपुंसओ साहम्मिओ य २२, थेरपुरिसो साहम्मिओ थेरनपुंसो साहम्मिओ अ २३, थेरपुरिसो साहम्मिओ तरुणनपुंसओ साहम्मिओ य २४, तरुणपुरिसो साहम्मिओ मज्झिममहिला साहम्मिणी अ, २५ तरुणपुरिसो साहम्मिओ थेरमहिला साहम्मिणी अ २६, तरुणपुरिसो साहम्मिओ तरुणी साहम्मिणी अ २७, तरुणपुरिसो साहम्मिओ मज्झिमनपुंसयसाहम्मिओ अ २८, तरुणपुरिसो साहम्मिओ थेरनपुंसयसाहम्मिओ अ २९, तरुणपुरिससाहम्मिओ तरुणनपुंसयसाहम्मिओ अ ३०, मज्झिममहिला साहम्मिणी थेरीसाहम्मिणी अ ३१, मज्झिममहिला साहम्मिणी अ [2]तरुणीसाहम्मिणी अ ३२, मज्झिममहिला साहम्मिणी मज्झिमनपुंसयसाहम्मिओ

---

१. दुवे वि ल, ख २. तरुणमहिलासाहम्मिणी या ल, ख

अ ३३, मज्झिममहिला साहम्मिणी थेरनपुंसओ साहम्मिओ य ३४ मज्झिममहिला साहम्मिणी तरुणनपुंसयसाहम्मिओ अ ३५, थेरी साहम्मिणी तरुणी साहम्मिणी य ३६, थेरी साहम्मिणी मज्झिमनपुंसयसाहम्मिओ य ३७, थेरी साहम्मिणी थेरनपुंसयसाहम्मिओ अ ३८, थेरी साहम्मिणी तरुणनपुंसयसाहम्मिओ य ३९, तरुणी साहम्मिणी मज्झिमनपुंसयसाहम्मिओ य ४०, तरुणी साहम्मिणी थेरनपुंसयसाहम्मिओ य ४१, तरुणी साहम्मिणी तरुणनपुंसयसाहम्मिओ य ४२, मज्झिमनपुंसयसाहम्मिओ थेरनपुंसयसाहम्मिओ अ ४३, मज्झिमनपुंसयसाहम्मिओ तरुणनपुंसयसाहम्मिओ य ४४, थेरनपुंसयसाहम्मिओ तरुणनपुंसयसाहम्मिओ य ४५, एते ताव साहम्मिअचारणिआए लद्धा ॥

इदानीं अन्नधम्मियचारणिआए [१]दंसिज्जंति- अन्नधम्मिआ दो मज्झिमपुरिसा पुच्छिज्जंति एसेक्को १, अन्नधम्मिआ दो थेरपुरिसा २, अन्नधम्मिआ दो तरुणपुरिसा ३, अन्नधम्मिआउ दो मज्झिममहिलाउ ४, अण्णधम्मिअथेरीओ दो ५, अण्णधम्मिअतरुणीओ दो ६, अण्णधम्मिअमज्झिमनपुंसया दो ७, अण्णधम्मिआ थेरनपुंसया दो ८, अण्णधम्मिअतरुणनपुंसया दो ९, अण्णधम्मिअमज्झिमपुरिसो अण्णधम्मिअथेरपुरिसो य १०, अण्णधम्मियमज्झिमपुरिसो अण्णधम्मिअतरुणपुरिसो य ११, अण्णधम्मिअमज्झिमपुरिसो अ अण्णधम्मिअमज्झिममहिला अ १२, अण्णधम्मिअमज्झिमपुरिसो अ अण्णधम्मिअथेरी य १३, अण्णधम्मिअमज्झिमपुरिसो अण्णधम्मिअतरुणी अ १४, अण्णधम्मिअमज्झिमपुरिसो अण्णधम्मिअमज्झिमनपुंसओ अ १५, अण्णधम्मिअमज्झिमपुरिसो अण्णधम्मिअथेरनपुंसगो य १६, अण्णधम्मिअमज्झिमपुरिसो अण्णधम्मिअतरुणनपुंसगो अ १७, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअतरुणपुरिसो अ १८, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअमज्झिममहिला य १९, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअथेरी अ २०, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअतरुणी अ २१, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअमज्झिमनपुंसओ अ २२, अण्णधम्मियथेरपुरिसो अण्णधम्मिअथेरनपुंसगो य २३, अण्णधम्मिअथेरपुरिसो अण्णधम्मिअतरुणनपुंसगो य २४, अण्णधम्मिअतरुणपुरिसो अण्णधम्मिअमज्झिममहिला य २५, अण्णधम्मिअतरुणपुरिसो अण्णधम्मिअथेरी य २६, अण्णधम्मिअतरुणपुरिसो अण्णधम्मिअतरुणी अ २७, अण्णधम्मिअतरुणपुरिसो अण्ण-

---

१. एयं सिज्झइ. आ.

धम्मिअमज्झिमनपुंसगो अ २८, अण्णधम्मिअतरुणपुरिसो अण्णधम्मिअथेरनपुंसगो अ २९, अण्णधम्मियतरुणपुरिसो अण्णधम्मिअतरुणनपुंसगो अ ३०, अण्णधम्मि-अमज्झिममहिला अण्णधम्मिअथेरी अ ३१, अण्णधम्मिअमज्झिममहिला अण्णधम्मि-अतरुणी अ ३२, अण्णधम्मिअमज्झिममहिला अण्णधम्मिअमज्झिमनपुंसगो अ ३३, अण्णधम्मिअमज्झिममहिला अण्णधम्मिअथेरनपुंसगो य ३४, अण्णधम्मिअ-मज्झिममहिला अण्णधम्मिअतरुणनपुंसगो अ ३५, अण्णधम्मिअथेरी अण्णधम्मि-अतरुणी य ३६, अण्णधम्मिअथेरी अण्णधम्मिअमज्झिमनपुंसगो य ३७, अण्णधम्मि-अथेरी अण्णधम्मिअथेरनपुंसगो य ३८, अण्णधम्मियथेरी अण्णधम्मियतरुणनपुंसगो अ ३९, अण्णधम्मिअतरुणी अण्णधम्मियमज्झिमनपुंसगो अ ४०, अण्णधम्मिअतरुणी अण्णधम्मिअथेरनपुंसगो य ४१, अण्णधम्मिअतरुणी अण्णधम्मिअतरुणनपुंसगो य ४२, अण्णधम्मिअमज्झिमनपुंसओ अण्णधम्मिअथेरनपुंसगो अ ४३, अण्णधम्मि-अमज्झिमनपुंसगो अण्णधम्मिअतरुणनपुंसओ अ ४४, अण्णधम्मिअथेरनपुंसओ अण्णधम्मिअतरुणनपुंसगो अ ४५ । एते अन्नधम्मिअचारणियाए लद्धा । एते सव्वे य नवती ॥

इदाणिं साहम्मिअअन्नधम्मिओभयचारणिआ किज्जइ-साहम्मिअमज्झिमपुरिसो अण्णधम्मियमज्झिमपुरिसो य पुच्छिज्जइ[१] १, साहम्मिअमज्झिमपुरिसो य अण्णधम्मियथेरपुरिसो य २, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअतरुणो अ ३, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअमज्झिममहिला अ ४, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअथेरी अ ५, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअतरुणी अ ६, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअमज्झिमनपुंसगो य ७, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअथेरनपुंसगो अ ८, साहम्मिअमज्झिमपुरिसो अण्णधम्मिअतरुणनपुंसगो य ९, एते नव साहम्मियमज्झिमपुरिसममुंचमाणेहिं लद्धा ॥

साहम्मिअथेरपुरिसो अण्णधम्मिअमज्झिमपुरिसो अ १, साहम्मिअथेरपुरिसो अण्णधम्मिअथेरपुरिसो य २, साहम्मिअथेरपुरिसो अण्णधम्मिअतरुणो अ ३, साहम्मिअथेरपुरिसो अण्णधम्मिअमज्झिममहिला अ ४, साहम्मिअथेरपुरिसो अन्नधम्मिअमहिला थेरी अ ५, साहम्मिअथेरपुरिसो अण्णधम्मिअतरुणी अ ६, साहम्मिअथेरपुरिसो अण्णधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअथेरपुरिसो

१. पुच्छिज्जन्ति. ल

अण्णधम्मियनपुंसगथेरो अ ८, साहम्मिअथेरपुरिसो अण्णधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअथेरपुरिसममुंचमाणेहिं लद्धा ॥

साहम्मिअतरुणपुरिसो अण्णधम्मिअमज्झिमपुरिसो य १, साहम्मिअतरुणपुरिसो अण्णधम्मियथेरपुरिसो अ २, साहम्मियतरुणपुरिसो अण्णधम्मिअतरुणपुरिसो अ ३, साहम्मियतरुणपुरिसो अण्णधम्मियमज्झिममहिला अ ४, साहम्मिअतरुणपुरिसो अण्णधम्मिअथेरमहिला य ५, साहम्मिअतरुणपुरिसो अण्णधम्मियतरुणी य ६, साहम्मियतरुणपुरिसो अण्णधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअतरुणपुरिसो अण्णधम्मिअथेरनपुंसगो अ ८, साहम्मियतरुणपुरिसो अन्नधम्मिअतरुणनपुंसगो अ ९, एते वि नव साहम्मिअतरुणपुरिसममुंचमाणेहिं लद्धा ॥

साहम्मिअमज्झिममहिला अण्णधम्मिअमज्झिमपुरिसो अ १, साहम्मि-अमज्झिममहिला अण्णधम्मिअथेरपुरिसो अ २, साहम्मियमज्झिममहिला अण्णधम्मि-अतरुणपुरिसो अ ३, साहम्मिअमज्झिममहिला अण्णधम्मिअमज्झिममहिला अ ४, साहम्मिअमज्झिममहिला अण्णधम्मिअथेरमहिला अ ५, साहम्मिअमज्झिममहिला अण्णधम्मिअतरुणमहिला अ ६, साहम्मिअमज्झिममहिला अण्णधम्मिअमज्झिम-नपुंसगो अ ७, साहम्मिअमज्झिममहिला अण्णधम्मिअथेरनपुंसगो अ ८, साहम्मि-अमज्झिममहिला अण्णधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअमज्झिममहिलाए [अमुच्चमाणीए] लद्धा ।

साहम्मिअथेरी अण्णधम्मिअमज्झिमपुरिसो अ १, साहम्मिअथेरी अण्णधम्मि-अथेरपुरिसो अ २, साहम्मिअथेरी अण्णधम्मिअतरुणपुरिसो य ३, साहम्मियथेरी अण्णधम्मिअमज्झिममहिला अ ४, साहम्मिअथेरी अण्णधम्मिअथेरी अ ५, साहम्मिअथेरी अण्णधम्मिअतरुणी अ ६, साहम्मिअथेरी अण्णधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअथेरी अन्नधम्मिअथेरनपुंसगो अ ८, साहम्मिअथेरी अण्णधम्मि-अतरुणनपुंसगो अ ९, एते नव साहम्मिअथेरीए अमुच्चमाणीए लद्धा ॥

साहम्मिअतरुणी अण्णधम्मिअमज्झिमपुरिसो य १, साहम्मिअतरुणी अण्ण-धम्मिअथेरपुरिसो अ २, साहम्मिअतरुणी अण्णधम्मियतरुणपुरिसो य ३, साहम्मियतरुणी अण्णधम्मिअमज्झिममहिला य ४, साहम्मिअतरुणी अण्णधम्मियथेरी अ ५, साहम्मिअतरुणी अण्णधम्मिअतरुणी अ ६, साहम्मिअतरुणी अण्णधम्मि-

अमज्झिमनपुंसगो अ ७, साहम्मिअतरुणी अन्नधम्मिअथेरनपुंसगो अ ८, साहम्मि-अतरुणी अन्नधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअतरुणीए अमुच्चमाणीए लद्धा ॥

साहम्मिअमज्झिमनपुंसगो अन्नधम्मिअमज्झिमपुरिसो अ १, साहम्मिअमज्झिम-नपुंसगो अण्णधम्मिअथेरपुरिसो अ २, साहम्मिअमज्झिमनपुंसगो अन्नधम्मि-अतरुणपुरिसो अ ३, साहम्मिअमज्झिमनपुंसओ अन्नधम्मिअमज्झिममहिला य ४, साहम्मिअमज्झिमनपुंसओ अन्नधम्मिअथेरी अ ५, साहम्मिअमज्झिमनपुंसओ अण्णधम्मियतरुणी य ६, साहम्मियमज्झिमनपुंसओ अन्नधम्मियमज्झिमनपुंसओ अ ७, साहम्मिअमज्झिमनपुंसओ अन्नधम्मियथेरनपुंसओ अ ८, साहम्मिअमज्झिमनपुंसओ अन्नधम्मिअतरुणनपुंसओ अ ९, एते नव साहम्मिअमज्झिमनपुंसगेण अमुच्चमाणेण लद्धा ॥

साहम्मिअथेरनपुंसओ अण्णधम्मिअमज्झिमपुरिसो अ १, साहम्मिअथेरनपुंसगो अन्नधम्मिअथेरपुरिसो अ २, साहम्मिअथेरनपुंसगो अन्नधम्मिअतरुणपुरिसो अ ३, साहम्मिअथेरनपुंसगो अन्नधम्मिअमज्झिममहिला अ ४, साहम्मिअथेरनपुंसगो अन्नधम्मिअथेरी य ५, साहम्मिअथेरनपुंसओ अण्णधम्मिअतरुणी अ ६, साहम्मिअथेरनपुंसगो अण्णधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअथेरनपुंसगो अण्णधम्मिअथेरनपुंसगो अ ८, साहम्मिअथेरनपुंसगो अण्णधम्मिअतरुणनपुंसगो अ ९, एते नव साहम्मिअथेरनपुंसगेण अमुच्चमाणेण लद्धा ॥

साहम्मिअतरुणनपुंसगो अण्णधम्मिअमज्झिमपुरिसो अ १, साहम्मिअतरुणनपुंसगो अण्णधम्मिअथेरपुरिसो अ २, साहम्मिअतरुणनपुंसगो अण्णधम्मिअतरुणपुरिसो अ ३, साहम्मिअतरुणनपुंसगो अण्णधम्मिअमज्झिममहिला अ ४, साहम्मि-अतरुणनपुंसगो अण्णधम्मिअथेरी अ ५, साहम्मिअतरुणनपुंसगो अण्णधम्मिअतरुणी अ ६, साहम्मिअतरुणनपुंसगो अण्णधम्मिअमज्झिमनपुंसगो अ ७, साहम्मिअतरुण-नपुंसगो अण्णधम्मिअथेरनपुंसगो अ ८, साहम्मिअतरुणनपुंसगो अण्णधम्मि-अतरुणनपुंसगो अ ९, एते नव साहम्मिअतरुणनपुंसगममुच्चमाणेण लद्धा ॥ एते य नव नवगा साहम्मिअअण्णधम्मिअचारणिआए होंति । एगत्थ मिलिआ एक्कासीति" ॥२२॥

उक्तं पृच्छाद्वारम्, [१]छक्के पढमजयणां (नि.१५) विवृण्वन्नाह —

५८ **तिविहो पुढविक्काओ सच्चित्तो मीसओ अ अच्चित्तो ।**
**एक्केक्को पंचविहो अच्चित्तेणं तु गंतव्वं ॥२३॥ नि०**

**तिविहो** गाहा । **त्रिविधः पृथिवीकायः-सच्चित्तो[६६] मिश्रो[६७]ऽचित्त[६८]श्चेति** । इदानीं स त्रिविधोऽप्येकैकः **पञ्चप्रकारः**। तत्र योऽसौ सचित्तः स कृष्णनीलरक्तपीतशुक्ल-भेदेन पञ्चधा, एवं मिश्राचित्तावपि । तत्र कतरेण गन्तव्यमित्याह-**अचित्तेणं तु गंतव्वं** ति, तत्र योऽसावचेतनस्तेन गन्तव्यमित्युत्सर्गविधिः ॥२३॥

तत्र स एव पृथिवीकायः शुष्क आर्द्रश्च स्यात्, आह च–

५९ **सुक्खोल्ल उल्लगमणे विराहणा दुविह सिग्ग खुप्पंते ।**
**सुक्खेण वि धूलीए ते दोसा भट्ठिए गमणं ॥२४॥ नि०**

**सुक्खोल्ल** गाहा । **शुष्कः**-चिक्खल्ल **आर्द्रश्चेति** । [२]तत्र तयोः शुष्कार्द्रयोः शुष्केण गन्तव्यम्, किं कारणम्? यत **आर्द्रगमने विराधना द्विविधा** भवति, आत्मसंयमयोः, तत्रात्मविराधना कण्टकादिवेधात्, इतरा तु त्रसादिपीडनात् । इदानीं विराधना-ऽधिकदोषदर्शनायाह- **सिग्ग खुप्पंते सिग्गउ** त्ति श्रमो भवति, **खुप्पंते** त्ति कर्दम एव निमज्जति[३] सति । तत्र **शुष्केण** पथा गमनमभ्यनुज्ञातमासीत्, तेनापि न गन्तव्यं यद्यसौ धूली[४]बहुलो भवति मार्गः । किं कारणम् ? यतो **धूली**[५]बहुलेनापि पथा गच्छत**स्त** एव **दोषाः** । के च ते ? संयमविराधना आत्मविराधना च । तत्रात्मविराधना अक्ष्णोर्धूलिः प्रविशति, निमज्जन् श्रान्तश्च भवति, उपकरणं च मलिनीभवति, तत्र यद्युपकरणप्रक्षालनं करोत्यसामाचारी, अथ न क्षालयति प्रवचनहीलना स्यात् । अत उच्यते-**भट्ठिए गमणं** ति, **भ्राष्ट्या गन्तव्यं** रजोरहितया भुवा तु गन्तव्यमिति ॥२४॥

इदानीं भाष्यकार आर्द्रस्य पृथिवीकायस्य भेदान् प्रदर्शयन्नाह —

---

६६. सचित्तम्-चित्तं चेतना संज्ञानमुपयोगोऽवधानमिति पर्यायाः । सह चित्तेन वर्तत इति सचित्तम् । सचेतनं (आव.४ अ.) सजीवमित्यर्थः ।

६७. मिश्रम्-सचेतनाचेतनसङ्कीर्णो मिश्रः (प्रव.)

६८. अचित्तम्-न विद्यते चित्तमस्मिन्नित्यचित्तमचेतनम् । जीवरहितम् । (आचा. १ श्रु.१ अ.८३)

१. "छक्के पढमजयणा" (यदुक्तं) तां विवृण्वन्नाह दा. । २. तत्रानयोः दा. ३. तत्र दा. ४. व(ब)हलो क, ख, ल. ५. व(ब)हले क, ख, ल

**६० तिविहो य होइ उल्लो महुसित्थो पिंडओ य चिक्खल्लो ।**
**लत्त पहलित्त उंडअ खुप्पिज्जइ जत्थ चिक्खल्लो ॥३३॥ निभा०**

**तिविहो** गाहा । यस्तावदार्द्रः स **च त्रिविधः-मधुसित्थो पिंडओ य चिक्खल्लो** एतेषां यथासङ्ख्येन स्वरूपमाह - **लत्त पहलित्त उंडअ खुप्पिज्जति जत्थ चिक्खल्लो । लत्त** त्ति **अलत्तको**ऽलत्तकपथो येन प्रदेशेनालत्तकः कामिन्याः पात्यते तावन्मात्रं पादौ यो लिम्पति कर्दमः स **मधुसिक्थो**ऽभिधीयते । उंडकाः [१]पिण्डीलकास्तद्रूपो यो भवति, पादयोर्यः पिण्डस्वरूपतया लगति स **पिण्डक** इत्यर्थः। **यत्र** तु निमज्जनं स्यात्स **चिक्खल्ल** इति । शुष्कमार्गश्च भाष्यकृता न व्याख्यातः प्रसिद्धत्वाद्भेदरहितत्वाच्चेति ॥३३॥

अथ स मार्गः शुष्कचिक्खल्लरूपोऽपि सप्रत्यपायो निष्प्रत्यपायश्चेति, ते चामी प्रत्यपायाः –

**६१ पच्चावाया वालाइसावया तेणकंटगा मेच्छा ।**
**अक्कंतमणक्कंते सपच्चवाएयरे चेव ॥२५॥ नि०**

**पच्चवाया** गाहा । इह हि **प्रत्यपाया** नाम दोषाः, के ते ? [२]**व्यालादिश्वापदाः स्तेनकण्टका म्लेच्छा** इति । "[A]तत्थ पढमं सुक्केणं भट्ठीए गम्मइ, सो दुविहो–**अक्कंतो अणक्कंतो** य, अक्कंतेण गम्मइ, जो वि अक्कंतो सो दुविहो-**सपच्चवाओ निप्पच्चवाओ** य । पच्चवाया य तेणादयो भणिआ, णिप्पच्चवाएणं गम्मइ । अह अणक्कंता भट्ठी सपच्चवाया य होज्जा ताहे धूलीपंथेणं अक्कंतेणं गम्मइ, तस्स असति अणक्कंतेण वि गम्मति । अहव न होज्जा धूलीपंथो सपच्चवाओ वा होज्जा ताहे उल्लेणं गम्मइ । सो अ तिविहो–मधुसित्थो पिंडओ चिक्खल्लो य, तत्थिक्किक्को दुविहो- अक्कंतो अणक्कंतो य, अक्कंतेणं गम्मइ [६९]प्रासुकत्वात्, सो य दुविहो

---

६९. प्रासुकत्वात् = प्रासुकम् अचित्तम् अचेतनम् प्रासुकत्वाद् अचित्तत्वाद् जीवरहितत्वाद् निर्दोष इत्यर्थः । संटी.

A. तत्र प्रथमं शुष्केण भ्राष्ट्या गम्यते, स द्विविधः- आक्रान्तोऽनाक्रान्तश्च, आक्रान्तेन गम्यते, योऽप्याक्रान्तः स द्विविधः- सप्रत्यपायो निष्प्रत्यपायश्च । प्रत्यपायाश्च स्तेनादयो भणिताः, निष्प्रत्यपायेन गम्यते । अथ अनाक्रान्ता भ्राष्टी सप्रत्यपायाश्च भवेत्तदा धूलीपथेनाक्रान्तेन गम्यते, तस्यासत्यनाक्रान्तेनापि गम्यते । अथवा न भवेद् धूलीपथः सप्रत्यपायो वा भवेत्तदाऽऽर्द्रेण गम्यते । स च त्रिविधः- मधुसिक्थः पिण्डकश्चिक्खल्लश्च, तत्रैकैको द्विविधः- आक्रान्तोऽनाक्रान्तश्च, आक्रान्तेन गम्यते प्रासुकत्वात् । स च द्विविधः-सप्रत्यपायो निष्प्रत्यपायश्च, निष्प्रत्यपायेन गम्यते ।

१. पिण्डका ल, पिण्डुका ख २. व्यालाश्वापदानि क, ख, ल.

सपच्चवाओ निपच्चवाओ य, निपच्चवाएणं गम्मइ," [1]आत्मादिरक्षाहेतुत्वात्। एवं सर्वत्र निष्प्रत्यपायेन गन्तव्यम् । स्थापना- '[A]अक्कंतो अपच्चवाओ' 'अक्कंतमणक्कंतो सपच्चवाएतरे चेव' त्ति कहियं ॥२५॥

| | |
|---|---|
| । | । |
| । | ऽ |
| ऽ | । |
| ऽ | ऽ |

अत्र भ्राष्ट्याः खल्वभावे धूलीपथेन यायात्, आह च –

**६२ तस्सासइ धूलीए अक्कंत [2]निरच्चएण गंतव्वं ।**
**मीसगसच्चित्तेसु वि एस गमो सुक्कउल्लादी ॥२६॥ नि०**

**तस्सासइ** गाहा । **तस्या** भ्राष्ट्या **असत्य**भावे सति **धूली**[3]पथेन **गन्तव्यम्,** कीदृशेन ? **आक्रान्तेन नि[4]रत्ययेन** चेति । एष तावदचित्तपृथिवीकायमार्गगमने विधिरुक्तः । तदभावे मिश्रेण पृथिवीकायेन गन्तव्यम्, तत्राप्येष एवाधस्त्यो विधिर्दृश्यः। तदभावे सचित्तेन गन्तव्यम् । तथा चाह- **मीसगसच्चित्तेसु वि एस गमो । मिश्रसचेतनेष्वपि** पृथिवीकायेषु **एष गमः शुष्कार्द्रादि** । एतदुक्तं भवति–प्रथमं मिश्रशु[5]ष्केण गम्यते, तदभावे मिश्रार्द्रेण, तदभावे सचित्तशुष्केण, तदभावे सच्चित्तार्द्रेण। अथवा [B]**एस गमो** त्ति 'अक्कंताणक्कंतसपच्चवायनिपच्चवायभेयभिन्नो जोएयव्वो, सव्वत्थ सपच्चवाओ परिहरणीओ त्ति'। एष विधिः ॥२६॥

इदानीं स साधुः स्थण्डिलादस्थण्डिलं सङ्क्रामन् कस्मिन् काले केन प्रमार्जनं करोतीत्यत आह –

**६३ उडुबद्धे रयहरणं वासावासासु पायलेहणिया ।**
**वडउंबरे पिलंखू तस्स अलंभंमि चिंचिणिया ॥२७॥ नि०**

**उडुबद्धे** गाहा । **ऋतुबद्धे** शीतोष्णकाले **रयहरणं** ति **रजोहरणेन** प्रमार्जनं कृत्वा प्रयाति । तथा **'वासावासासु पायलेहणिआ' वर्षासु** वर्षाकाले वर्षति सति **पादलेखनिकया** प्रमार्जनं कर्त्तव्यम्, सा च किंमयी भवत्यत उच्यते-**वडे**त्यादि, **वटमयी उदुम्बरमयी प्लक्षमयी, तस्यालाभे** प्लक्षस्याप्राप्तौ **चिञ्चिणिकामयी** [6]अम्लिकामयीति ॥२७॥

---

A. आक्रान्तोऽप्रत्यपायः, आक्रान्तोऽनाक्रान्तः सप्रत्यपायेतर एवेति कथितम् ।

B. एस गम इति – आक्रान्तानाक्रान्तसप्रत्यपायनिष्प्रत्यपायभेदभिन्नो योजयितव्यः,सर्वत्र सप्रत्यपायः परिहरणीय इति ।

१. तस्स असइ अणक्कंतेण, आ. दा. २. निपच्चएण गंतव्व आ० ३. पथा क, ४. नि(ष्)प्रत्य(वा)येन ख । ५. ०शुष्केन दा. ६. अम्बिलिका क, ल

सा च कियत्प्रमाणा भवतीत्याह –

६४ **बारसअंगुलदीहा अंगुलमेगं तु होइ वित्थिण्णा ।**
**घणमसिणनिव्वणा वि य पुरिसे पुरिसे य पत्तेयं ॥२८॥ नि०**

**बारस** गाहा । **द्वादशाङ्गुलानि दीर्घा भवति,** येन मध्ये हस्तग्रहो भवति, **विस्तारस्त्वेकमङ्गुलं** स्यात् । सा च **घना** निबिडा कार्या, **मसृणा निर्व्रणा** च निर्ग्रन्थिर्भवति । सा च किमेकैव भवति ? नेत्याह–**पुरुषे पुरुषे च प्रत्येकमे**कैकस्य पृथगसौ भवति ॥२८॥

६५ **उभओ नहसंठाणा सचित्ताचित्तकारणा मसिणा ।**
**आउक्काओ दुविहो [१]भोमो तह अंतरिक्खो य ॥२९॥ नि०**

**उभयो** गाहा । **उभयोः** पार्श्वयो**र्नखसंस्थाना** नखवत्तीक्ष्णा । किमर्थमसौ उभयपार्श्वयोस्तीक्ष्णा क्रियते ? **सचित्ताचित्तकारणात्,** तस्या एकेन पार्श्वेन सचित्तपृथिवीकायः संलिख्यते, अन्येन पार्श्वेनाचित्तपृथिवीकाय इति । किंविशिष्टा सा? **मसिण** त्ति [२]**मसृणा** क्रियते, नातितीक्ष्णा, यतो लिखत आत्मविराधना न भवति । पृथिवीकाययतनाद्वारं गतम्, अप्कायद्वारमाह–**आउक्काओ** गाहद्धं-**अप्कायो द्विविधः-भौमोऽन्तरिक्षश्च** ॥२९॥

इदानीं [३]**प्रत्यासत्ति**न्यायादन्तरिक्षजस्तावदुच्यते –

६६ **महिआ वासं [४]तह अंतरिक्खिअं [५]दट्ठुं तं न निग्गच्छे ।**
**आसन्नाओ नियत्तइ दूरगओ घरं व रुक्खं वा ॥३०॥ नि०**

**महिया** गाहा । [६]सोऽन्तरिक्षजो द्विविधः, **महिका** धूमिकारूपोऽप्कायः, **वासं** ति **वर्षा**रूपश्चाप्कायः। **तमेवंप्रकारमुभयमपि दृष्ट्वाऽन्तरिक्षजं न निर्गच्छेत्** । अथ कथञ्चिन्निर्गतस्य सतो जातं महिकावर्षं तत **आसन्नाद्** भूभागा**न्निवर्त्तते** । अथ **दूर**मध्वानं **गत**स्ततः किं करोति ? **गृहं** शून्यगृहं **वृक्षं वा** बहलमाश्रित्य तिष्ठति ॥३०॥

अथ सभयः स प्रदेशः, ततः किं कर्त्तव्यमित्यत आह –

---

१. भूमो ह० २. मार्ष्टीक्रियते ल. क. ३. प्रत्यासत्तेः क,ल,ख. ४. पुण द. ५. पासिऊण ह० पासिऊण न हे. सं० ६. सान्तरिक्ष क, ल

६७ **सभए वासत्ताणं अच्चुदए [1]सुक्करुक्ख तरणं वा ।**
**नइकोप्पर वरणेण व भोमे पडिपुच्छिआगमणं ॥३१॥ नि०**

**सभए** गाहा । **सभए** गृहादौ स्तेनकादिभयोपेते **वर्षात्राणं** वर्षाकल्पं प्रावृत्त्य व्रजति । अथात्यु**दकं** महान् वर्षः ततः किं करोतु ? **शुष्कवृक्षा**रोहणं कर्त्तव्यम् । अथासौ सापायो नास्ति वा ततस्तरण्डं गृहीत्वा तरितुं तज्जलं व्रजतीत्युक्तोऽन्तरिक्षजः । इतरमाह–**नदी**त्यादि, यदा तु तस्य साधोर्गच्छतोऽपान्तराले नदी स्याद्वक्ररूपा ततस्तस्या **नद्याः कूर्परेण** व्रजति, नदीं परिहृत्येत्यर्थः । अथवा **वरणेन** सेतुबन्धेन व्रजति । एवं **भौमे प्रतिपृच्छ्य** पूर्वमेव कञ्चित्पुरुषं **गमनं** कर्त्तव्यम् ॥३१॥

इदानीं यदुक्तं 'वरणेन गन्तव्य'मिति, स सङ्क्रमो निरूप्यते, किंविशिष्टेन तेन गन्तव्यम् ? कीदृशेन वा न गन्तव्यमित्यत आह–

६८ **णेगंगि परंपर पारिसाडि सालंबवज्जिए सभए ।**
**पडिवक्खेण उ गमणं तज्जाइयरे व संडेवा ॥३२॥ नि०**

**णेगंगि** गाहा । **नेगंगिपरंपरपारिसाडिसालंबवज्जिए सभए पडिवक्खेण उ गमणं** ति, **नैकाङ्ग्य**नेकाङ्ग्यनेकेष्टकादिनिर्मितः सङ्क्रमः । **परंपर** इति **परम्परप्रतिष्ठो** न[2] निर्व्यवधाने प्रतिष्ठः । **पारिसाडी**ति गच्छतो यत्र धूल्यादी निपतति । **सालंबवज्जिए** त्ति **सालम्बवर्जितः** सावष्टम्भलग्नरहित इत्यर्थः । **सभयो** यत्र व्यालादयः [3]शुषिरेषु सन्ति । यद्येभिर्गुणैर्युक्तः सङ्क्रमो भवति तदा न यातव्यम्, कथं तर्हि यातव्यम् ? **प्रतिपक्षेणो**क्तस्य विपर्ययेण । तत्रानेकाङ्गिनः प्रतिपक्ष एकाङ्गी, परम्परस्या–परम्परकः, परिशाटिनोऽपरिशाटी, सालम्ब–वर्जितस्याऽसालम्बवर्जितः, सभयस्य निर्भयः प्रतिपक्षः, एतेषु प्रतिपक्षेषु **गमनम्** । भङ्गकाश्चात्र पदपञ्चकनिष्पन्नत्वाद् द्वात्रिंशत्, तद्यथा–"अणेगंगिओ परंपरो पारिसाडी सालंबवज्जितो सभयो त्ति पढमो"। एवं स्वबुद्ध्या [4]रचनीया । स्थापना –

| | | | |
|---|---|---|---|
| ऽऽऽऽऽ | ऽऽऽ।ऽ | ऽऽऽऽ। | ऽऽऽ।। |
| ।ऽऽऽऽ | ।ऽऽ।ऽ | ।ऽऽऽ। | ।ऽऽ।। |
| ऽ।ऽऽऽ | ऽ।ऽ।ऽ | ऽ।ऽऽ। | ऽ।ऽ।। |
| ।।ऽऽऽ | ।।ऽ।ऽ | ।।ऽऽ। | ।।ऽ।। |
| ऽऽ।ऽऽ | ऽऽ।।ऽ | ऽऽ।ऽ। | ऽऽ।।। |
| ।ऽ।ऽऽ | ।ऽ।।ऽ | ।ऽ।ऽ। | ।ऽ।।। |
| ऽ।।ऽऽ | ऽ।।।ऽ | ऽ।।ऽ। | ऽ।।।। |
| ।।।ऽऽ | ।।।।ऽ | ।।।ऽ। | ।।।।। |

---

१. सुक्खरुखचडणं वा आ.दा. २. न निर्व्यवधानप्रतिष्ठः दा. ३. शुषिरे वसन्ति । दा. ४. रचनीयम् । दा.

पाठान्तरं वा **णेगंगिचलऽथिर** त्ति, शेषं प्राग्वत्, तत्रानेकाङ्गी पूर्ववत् 'चलथिर' त्ति एतत्पदद्वयम्, तथाहि-एकश्चलः सङ्क्रमो भवति, अपरस्त्वस्थिरः । तत्र चल आरूढे सति गन्तरि [१]वंशवद् अन्दोलते । अस्थिरस्तु भूमावप्रतिष्ठितः, शेषं प्राग्वत् । [२]प्रतिपक्षोऽपि प्राग्वदेव, केवलं चलस्याऽचलः प्रतिपक्षः, अनन्दोलन-शीलत्वात् । अस्थिरस्य तु स्थिरः, भुवि प्रतिष्ठितत्वात्, एतेषु गमनम्, एतानि षट् पदानि, तद्यथा-"णेगंगि चलो अथिरे पारिसाडि सालंबवज्जिए सभए" एष प्रथमः, एवं चउसट्ठी भेया कायव्वा । अन्ये त्वेवं पठन्ति-"**एगंगिचलथिरपारिसाडि-सालंबवज्जिए सभए**" एकाङ्गेन निर्वृत्त **एकाङ्गी, चलः** प्रेङ्खनशीलः, **अस्थिरो**-ऽधस्तादप्रतिष्ठितः, **परिशाटी, सालम्बवर्जितः, सभयः** । एभिः षड्भिः पदैश्चतुः-षष्टिभङ्गी, [३]अस्यां यो मध्ये त्रयस्त्रिंशत्तमो भङ्गः स एव परिगृह्यते, तद्ग्रहणाच्च **तुलामध्यग्रहण**वदुभयान्तर्वर्तिनः सङ्गृहीताः । 'पडिपक्खेण उ गमणं' ति अस्य मध्यमस्य भङ्गस्योपन्यस्तस्य यः प्रतिपक्ष एकान्तेन शुद्धश्चतुःषष्ट्यन्तिमस्तेन गन्तव्यम् । अयमुत्सर्गविधिः, तदभावे ये निर्भयाः सङ्कीर्णभङ्गकास्तैरपि गन्तव्यमेवेत्यपवादः । अथ सङ्क्रमो नास्ति ततः को विधिः ? अत आह-**तज्जाइयरे व संडेव** त्ति, **सण्डेवकः** पाषाणादेर्योऽन्यस्मिन् पाषाणादौ [४]पादनिक्षेपः स सण्डेवकः, स च द्विविधः-तज्जात इतरश्च, **तज्जात**स्तस्यामेव भुवि यो जातः, **इतर**स्त्वन्यत आनीय तत्र निहितः ॥३२॥

स एकैकस्त्रिविधः । तदेव त्रैविध्यं दर्शयन्नाह –

**६९ चलमाणमणक्कंते सभए परिहरिअ गच्छ इयरेणं ।**
**दगसंघट्टण लेवो पमज्ज पाए अदूरंमि ॥३३॥ नि०**

**चलमाण** गाहा। तत्र योऽसौ तज्जातः स त्रिविधः-**चलमानः, अनाक्रान्तः सभयश्च** । योऽप्यसावतज्जातः, असावप्येवमेव [५]त्रेधा । ततश्चैवंविधे सण्डेवके किं कर्त्तव्यमित्याह-**गच्छ** व्रज **इतरेणं** ति योऽचलः, आक्रान्तः, अभयश्चेति । अनेन च पदत्रयेणाष्टौ [६]भङ्गाः सूचिताः, तेषां चैषा स्थापना-चल-अण-सभ-। अथ सङ्क्रमो नास्ति तत उदकमध्येनैव गन्तव्यम् । [७]तत्र को विधिरित्याह-'दग' इत्यादि, **दगसंघट्टण**मिति,

ऽऽऽ
ऽऽ।
ऽ।ऽ
ऽ।।
।ऽऽ
।ऽ।
।।ऽ
।।।

१. वंशवद्य अन्दोलते स चलः । दा. । २. प्रतिपक्षा अपि । दा. ३. तस्या यो । क, ४. पादधिक्षेपः । क, ल. ५. त्रिधा ल, ६. भङ्गकाः क ७. को दा.

[1]**उदकं** जङ्घार्द्धप्रमाणं **लेवे**ति उदकमेव नाभिप्रमाणम्। तत्र कथमवतरणीयमित्यत आह– **'पमज्ज पाए अदूरंमि' पादौ प्रमृज्य,** कियति भूमिभागे व्यवस्थित उदकस्येत्यत आह – **अदूर** आसन्ने तीर इत्यर्थः ॥३३॥

तच्चतुर्द्धा जलम् –

**७० पाहाणे महुसित्थे वालुय तह कद्दमे य संजोगा।**
**अक्कंतमणक्कंते सपच्चवाएयरे चेव ॥३४॥ नि०**

**पासाण** गाहा। पाषाणजलं मधुसिक्थजलं वालुकाजलं कर्दमजलं चेति। तत्र **पाषाण**जलं यत्पाषाणानामुपरि वहति। **मधुसिक्थ**जलं यदलक्तकमार्गावगाहि-कर्दमस्योपरि वहति। **वालुका**जलं तु यद् वालुकाया उपरि वहति। **कर्दम**जलं तु यद् घनकर्दमस्योपरि वहति। **तत्र च** पाषाणजलादेराक्रान्तानाक्रान्तसप्रत्यपाय-निष्प्रत्यपायैः सह **संयोगा** भवन्ति-भङ्गका इत्यर्थः। "[A]तत्थ पाहाणजलं **अक्कंतं अणक्कंतं** च। तत्थ अक्कंतेण गम्मति। जं अक्कंतं तं **सपच्चवायं अपच्चवायं च**। अपच्चवाएणं गम्मति। सपच्चवायं पाहाणजलं होज्जा न वा होज्जा ताहे महुसित्थजलेण गम्मइ। [2]तत्थऽवि एसेव भेदो। तस्सासइ वालुआजलेण गम्मइ, तस्स वि एए चेव भेआ। कद्दमजले वि एमेव अक्कंतमणक्कंतसपच्चवाएयरा, सव्वत्थ निप्पच्चवाएण गम्मइ"। तथाहि–एकैकस्मिंश्चतुर्विधे जले चतुर्भङ्गी, सा चेवम्–"[B]तत्थ ताव पाहाणजलं अक्कंतं अपच्चवायं पढमो भंगो, एवमादि ४, एवं महुसित्थं पि ४, वालुयाजलं पि ४ कद्दमजलं पि ४" ॥३४॥

अथ सङ्घट्टादिजललक्षणप्रणिनिनीषया भाष्यकृदाह –

**७१ जंघद्धा संघट्टो नाभी लेवो परेण लेवुवरिं।**
**एगो जले थलेगो निप्पगलण तीरमुस्सग्गो ॥३४॥ निभा०**

---

A. तत्र पाषाणजलम्–आक्रान्तमनाक्रान्तञ्च। तत्राक्रान्तेन गम्यते, यदाक्रान्तं तत् सप्रत्यपायं निष्प्रत्यपायं च, निष्प्रत्यपायेन गम्यते। सप्रत्यपायं पाषाणजलं भवेन्न वा भवेत्तदा मधुसिक्थजलेन गम्यते, तत्राप्येष एव भेदः। तस्यासति वालुकाजलेन गम्यते, तस्याप्येत एव भेदाः। कर्दमजलेऽपि एवमेव आक्रान्तोऽनाक्रान्त-सप्रत्यपायेतराः, सर्वत्र निष्प्रत्यपायेन गम्यते।

B. तत्र तावत् पाषाणजलमाक्रान्तं निष्प्रत्यपायञ्च प्रथमो भङ्गः, पाषाणजलमनाक्रान्तं निष्प्रत्यपायञ्च द्वितीयोभङ्गः, पाषाणजलमाक्रान्तं सप्रत्यपायञ्च तृतीयो भङ्गः, पाषाणजलमनाक्रान्तं सप्रत्यपायञ्च चतुर्थो भङ्गः, एवं मधुसिक्थजलेऽपि चतुर्भङ्गाः, वालुकाजलेऽपि चतुर्भङ्गाः, तथा कर्दमजलेऽपि चतुर्भङ्गाः।

१. उदकसङ्घट्टनं दा. २. तस्स क, ख, ल.

**जंघद्धा** गाहा । **जङ्घार्द्धमात्रप्रमाणं** जलं **सङ्घट्ट** उच्यते । **नाभिप्रमाणं** जलं **लेप** उच्यते । **परेण** नाभेर्जलं यत्त**ल्लेपोपरि** उच्यते । इदानीं जङ्घार्द्धप्रमाणं जलमुत्तरतो यो विधिः स उच्यते-**एकः** पादो **जले** कर्त्तव्योऽन्यः **स्थल** आकाशे । अथ तीरप्राप्तस्य विधिमाह-**निप्पगलण** त्ति एकः पादो जले द्वितीयश्च आकाशे **निष्प्रगलन्नास्ते** तंतः[१] शुष्कः स्थले क्रियते, पुनर्द्वितीयमपि पादं निष्प्रगलं कृत्वा तत**स्तीरे कायोत्सर्गं** करोति" ॥३४॥

अथ तज्जलं नाभिप्रमाणादि भवति निर्भयं च ततः का सामाचारीत्याह –

**७२ निब्भएऽ[२]गारित्थीणं तु मग्गओ चोलपट्टमुस्सारे ।**
**सभए अत्थग्घे वा ओइण्णेसुं घणं पट्टं ॥३५॥ नि०**

**निब्भय** गाहा । **निर्भये** जले सत्यहरणशीलत्वाद् व्यालादिरहितत्वाच्च **अगारिणां स्त्रीणां** च **मार्गतः** पृष्ठतो गच्छति, गच्छता च किं कर्त्तव्यम् ? **चोलपट्टक** उप**र्युत्सारणीयः** । **सभये** तु तस्मिन् '**अत्थग्घे वा उत्तिण्णेसु**' **अवतीर्णेसु** कियत्स्वपि गृहिषु मध्ये स्थितः प्रयाति, **घणं पट्टं** ति चोल**पट्टकं** च **घनं** निबिडं करोति यथा तोयेन नापह्रियत इति ॥३५॥

**७३ दगतीरे ता चिट्ठे [३]निप्पगलो जाव चोलपट्टो उ ।**
**सभए पलंबमाणं गच्छइ काएण अफुसंतो ॥३६॥ नि०**

**दगतीरे** गाहा । उत्तीर्ण**श्चोदकतीरे तावत्तिष्ठति यावन्निष्प्रगलो** जात**श्चोलपट्टकः**। अथासौ प्रदेशः **सभयस्ततः** सभये **प्रलम्बमानं** चोलपट्टकं गृहीत्वा व्रजति । कथम् ? **कायेन** शरीरेणा**स्पृशन्**, शरीरकृताप्कायविराधनाभयात् ॥३६॥

यदा तु नद्यामवतरतो गृही सहायो नास्ति ततः किं कर्त्तव्यमित्याह –

**७४ असइ गिहि नालियाए आणक्खेउं पुणो वि पडियरणं ।**
**एगाभोग पडिग्गह केई सव्वाणि न य पुरओ ॥३७॥ नि०**

**असति** गाहा । गृहस्थाभावे **नालिकया** तन्नदीजलं **आणक्खेउं** ति परीक्ष्य गन्तव्यम् । नालिका ह्यात्मप्रमाणाच्चतुरङ्गुलाधिका यष्टिका तया परीक्ष्य **पुणो वि पडियरणं** ति **पुनः** प्रतिनिवृत्य [४]**प्रतिचरण**मागमनं करोति, आगत्य च **एगाभोग**

---

१. तत्र अशुष्कः ल, ततोऽशुष्कः क २. गारत्थीणं पा.सं. ३. निप्पगले, आ० ४. प्रतिचरणां क, ख, ल.

त्ति एकत्राभोगः, **आभोग** उपकरणं **एग** त्ति **एकत्र** करोति, एकत्र बध्नातीत्यर्थः । **पडिग्गह** त्ति **पतद्ग्रहं** च पृथगधोमुखं घनपात्रकबन्धेन बध्नाति, तं च हस्तेन गृह्णाति तरणार्थम् । **केचित्त्वेवमाहुः**-पतद्ग्रह उपलक्षणं पात्रकाणाम्, ततश्च **सर्वाण्येव** पात्रकाण्यधोमुखानि घनेन चीरेण बध्यन्ते तरणार्थमिति । "[A]एसो ताव सामण्णेण नदीए अत्थग्घाए गच्छंतस्स विही भणिओ, यदुत-एगाभोगपडिग्गह केई सव्वाणि त्ति, नावाए वि आरुहंतस्स एसेव विही, किंतु नावाए चडंतो **न य पुरओ** त्ति नावाए पढमं नारुहइ अग्गिमो ण चडइ, प्रवर्त्तनाधिकरणदोषात्, भद्दगपंतदोसातो य, जइ भद्दओ तओ सउणं ति मण्णमाणो आरुहइ, अह पंतो तओ अवसउणं ति मण्णमाणो कोवं गिण्हति । तथा चसद्दओ मग्गओ वि णारोहइ निप्पच्छिमो नारुहइ, मा सा अद्धारुहंतस्सेव सिग्घं वच्चिहिति णावा, अतो थेवेसु आरूढेसु गिहिसु आरुहइ" ॥३७॥

७५ **सागारं संवरणं ठाणतिअं परिहरित्तुऽणाबाहे ।**
**ठाइ नमोक्कारपरो तीरे जयणा इमा होइ ॥३८॥ नि०**

**सागारं** गाहा । "[B]आरुहन्तो अ सो साहू **सागारं संवरणं** पच्चक्खाणं करेति। आरूढो य संतो **ठाणतिअं परिहरित्तु अणाबाहे ठाइ** । तत्थ पुरओ न ठाइअव्वं, तत्थ किल णावादेवयाहिवासो । ण य मग्गओ, [७०]अवल्लगवाहणभयओ। न मज्झओ, मा कुवातो उदकं उल्लिंचाविज्जहि त्ति । कत्थ पुण ठाइअव्वं ? पासे, तत्थ य उवउत्तो **चिट्ठइ नमोक्कारपरो** । एवं कुसलेण तीरपत्तस्स को विही ? भण्णइ-**तीरे जयणा इमा होति** वक्खमाणा" ॥३८॥

---

७०. अवल्लयः पश्चाद्वर्तीति । संटी.

A एष तावत् सामान्येन अस्ताघे नद्यां गच्छतो विधिर्भणितः, यदुत- एकत्राभोगप्रतिग्रहः केचित् सर्वाणीति । नाव्यपि आरुह्यमानस्य एष एव विधिः, किन्तु नावि चटन् न च पुरत इति, नावि प्रथमं नारोहति, अग्रिमो न चटति प्रवर्तनाधिकरणदोषाद् भद्रकप्रान्तदोषाच्च । यदि भद्रकस्ततः शकुनमिति मन्यमान आरोहति, अथ प्रान्तस्ततोऽपशकुनमिति मन्यमानः कोपं गृह्णाति । तथा चशब्दाद् मार्गतोऽपि नारोहति-निपश्चिमो नारोहति, मा सा अर्धारुहन्त एव शीघ्रं व्रजिष्यति नौः, अतः स्तोकेष्वारूढेषु गृहीष्वारोहति ।

B. आरुहन् च स साधुः साकारं संवरणं प्रत्याख्यानं करोति । आरूढश्च सन् स्थानत्रिकं परिहृत्यानाबाधे तिष्ठति। तत्र पुरतो न स्थातव्यम्, तत्र किल नौदेवताधिवासः, न च मार्गतः,अवल्लकवाहनभयात्। न मध्यतः, मा नाव्युदकं रिक्तं कारयिष्यति । कुत्र पुनः स्थातव्यम् ? पार्श्वे, तत्र चोपयुक्तस्तिष्ठति नमस्कारपरः । एवं कुशलेन तीरप्राप्तस्य को विधिः ? भण्यते-तीरे जयणेयं भवति वक्ष्यमाणा ।

**७६ नवि पुरओ नवि मग्गओ [१]मज्झे उस्सग्गो [२]पण्णवीसा उ ।**
**दइउडुयतुंबेसु य एस विही होइ संतरणे ॥३९॥ नि०**

**नवि पुरतो** गाहा । "[A]इदाणीं तीरपत्ताए नावाए उत्तरंतो न लोअस्स अग्गिमो उत्तरति, पवत्तणाधिकरणादेव, **नवि मग्गओ** लोयस्स उत्तरति, झडित्ति नावा पिट्ठओ गच्छेज्ज त्ति, स्वभावत्वात्, अहवा सो पच्छा एक्को उत्तरंतो कयाइ धरिज्जिज्जा नाविएणं [३]तरप[७१]ण्णट्ठा, तम्हा थोवेसु उत्तिण्णेसु गिहिसु उत्तरति । तीरत्थेण किं कायव्वं ति ? भण्णइ" **उस्सग्गो** कायोत्सर्गः कर्त्तव्यः, तत्र च कियन्त उच्छ्वासाः ? इत्यत आह-**पण्णवीसा उ** त्ति **पञ्चविंशति**रुच्छ्वासाश्चिन्तनीयाः । "[B]**दइउ** त्ति **दत्तिउ** चम्मखल्ला, **उडुओ** जेण तरिज्जइ, **तुंबं** [४]अलाउअं, एएहिं नावाए अभावे संतरिज्जइ, जइ तरणजोग्गं पाणियं ति"। **एस विहि** त्ति दृतिकादिभिरुत्तीर्णस्य **एष** एव **विधिः संतरणे** प्लवने [**भवति** ।] [५]यदुत तीरं प्राप्तेनोत्सर्गः कार्य इति, अत्र चाप्काये मिश्राचित्तयतना न साक्षादुक्ता, छद्मस्थेन तयोस्तत्त्वतो ज्ञातुमशक्यत्वात्, यश्च ज्ञास्यति स करिष्यत्येवेति, सचित्तस्य तूक्तैव **॥३९॥**

उक्तमप्कायद्वारम्, अथ तेजस्कायसूत्रमाह –

**७७ वोलीणे अणुलोमे पडिलोमऽद्देसु ठाइ तणरहिए ।**
**असई य कत्तिणंतगउल्लण तलिगाइ डेवणया ॥४०॥ नि०**

**वोलीणे** गाहा । यदा हि तस्य साधोर्गच्छतो वनदवोऽनुकूलो भवति, यदभिमुखं साधुर्व्रजति तदभिमुखमग्निरप्येतीत्यर्थः, ततस्तस्मिन् वनदवे व्यतिक्रान्ते सति गन्तव्यम् । अथासौ **प्रतिलोमो**ऽभिमुखमायाति ततः **अद्देसु** त्ति **आर्द्रेषु** प्रदेशेषु **तिष्ठति** येनासौ नाभिभवति, **तृणरहिते** वा । **असत्य**भावे तस्य '**कत्तिणंतगउल्लणं**' ति **कृत्ति**श्चर्म तेनात्मानमावृत्य तिष्ठति, तदभावे 'णंतगउल्लणं' **णंतगं** कम्बलादिवस्त्रं

---

७१. पण्णट्ठा-मूल्यार्थम्-ल.

A. इदानीं तीरप्राप्ते नावोऽवतरन्न लोकस्याग्रिमोऽवतरति, प्रवर्तनाधिकरणादेव, नापि मार्गतो (पृष्ठतो) लोकस्यावतरति, झटिति नौः पृष्ठतो गच्छेदिति, स्वभावत्वात्, अथवा सो पश्चादेकाकी अवतरतः कदाचिद् धार्येद् नाविकेन तारणपण्यार्थम्, तस्मात् स्तोकेषूत्तीर्णेषु गृहीष्ववतरति । तीरस्थेन किं कर्तव्यम् ? इति, भण्यते ।

B. दइउ त्ति दृतिका चर्मखला, उडुपो येन तीर्यते, तुम्बम् अलाबूम्, एतैर्नावाभावे संतीर्यते, यदि तरणयोग्यं पानकमिति ।

१. मज्झिम दा. २. पण्णवीसं तु हे । ३. तारणपण्णट्ठा । दा. ४. लाउयं क, ल, ख. ५. यदुक्तम् दा.

तदार्द्रीकृत्य पानकेन तेनात्मानमावृणोति, ततस्तिष्ठति । अथ गच्छतो बहुगुणं ततः **तलिगादिडेवणय** त्ति उपानहौ परिधाय **डेवनं** लङ्घनमग्नेः कृत्वा व्रजति । तत्र यदा विध्याते तेजस्काये याति तदाऽचित्ततेजस्काययतना । यदा तूपानहौ परिधाय व्रजति तदा सचित्तो मिश्रो वा तेजस्कायः, एषा त्रिप्रकारा यतना ॥४०॥

उक्तं तेजस्कायद्वारम्, अथ वायुद्वारम् –

**७८ जह अंतरिक्खमुदए नवरि निअंबे य वणनिगुंजे य ।**
**ठाणं सभए पाउण घणकप्पमलंबमाणं तु ॥४१॥ नि०**

**जह** गाहा । **यथाऽन्तरिक्षोदके** यतनोक्ता 'आसण्णाओ नियत्तति' (नि.३०) इत्यादिलक्षणा सैवेहापि दृश्या । **नवरि** त्ति केवलमयं विशेषः, **नितम्बे** पर्वतैकदेशे **वननिकुञ्जे** वा स्थातव्यम् । अथासौ प्रदेशः **सभय**स्ततः **'पाउण घणकप्पं' घनं** निश्छिद्रं **कल्पं** कम्बल्यादिरूपं **प्रावृत्त्य** गच्छति, **अलंबमाणं तु** त्ति यथा कोणा न प्रलम्बन्ते, प्रलम्बमानैर्वायुविराधनात् । तत्र महावायौ गच्छतः कल्पप्रावृतशरीरस्य सचित्तयतना भवति, अप्रलम्बं कल्पं कुर्वतोऽचेतनयतना, मिश्रयतनाऽपि कल्प-प्रावृतस्यैव भवति, यतः किंचि ढक्किअं किंचिच्च न, इयं त्रिविधा यतना ॥४१॥

उक्तं वायुद्वारम्, अथ वनस्पतिद्वारमुच्यते –

**७९ तिविहो वणस्सई खलु परित्तऽणंतो थिराथिरिक्किक्को ।**
**संजोगा जह हिट्ठा अक्कंताई तहेव इहं ॥४२॥ नि०**

**तिविह** गाहा । **त्रिविधो वनस्पतिः**-अचित्तो मिश्रः सचित्तश्च । योऽसावचित्तः "[A]स **परित्तो अणंतो** य, परित्तो थिरो अथिरो अ, अणंतो वि थिरो अथिरो अ। इदाणिं मीसो सो दुविहो-परित्तो अणंतो अ, परित्तो दुहा-थिरो अथिरो अ । अणंतो वि दुविहो-थिरो अथिरो अ । इदाणिं सचित्तो, सो दुहा-परित्तो अणंतो अ, परित्तो दुहा-थिरो अथिरो अ । अणंतो दुविहो-थिरो अथिरो अ, एक्किक्को अ भेओ चउहा-अक्कंतो अपच्चवाओ अ १, अक्कंतो सपच्चवाओ अ २, अणक्कंतो अपच्चवाओ य ३, अणक्कंतो सपच्चवाओ अ ४ । तत्थ का जयणा ? अचित्तेणं गम्मइ, तत्थ

---

A. स परित्तोऽनन्तश्च, परित्तः स्थिरोऽस्थिरश्च, अनन्तोऽपि स्थिरोऽस्थिरश्च । इदानीं मिश्रः स द्विविधः-परित्तोऽनन्तश्च, परित्तो द्विधा-स्थिरोऽस्थिरश्च । अनन्तोऽपि द्विविधः-स्थिरोऽस्थिरश्च । इदानीं सचित्तः, स द्वेधा-परित्तोऽनन्तश्च, परित्तो द्वेधा-स्थिरोऽस्थिरश्च । अनन्तो द्विविधः-स्थिरोऽस्थिरश्च, एकैकश्च भेदश्चतुर्धा-आक्रान्तोऽप्रत्यपायश्च १, आक्रान्तः सप्रत्यपायश्च २, अनाक्रान्तोऽप्रत्यपायश्च ३, अनाक्रान्तः सप्रत्यपायश्च ४ । तत्र का यतना ? अचित्तेन

वि परित्तेण, तेण वि थिरेण, तत्थ वि अक्कंतनिपच्चवाएणं, तदभावे अणक्कंतेणं निपच्चवाएणं, तदभावे अचित्तपरित्तेणं अथिरेणं गम्मइ, सो वि जइ अक्कंतो निपच्चवाओ अ, तदभावे अणक्कंतनिपच्चवाएण य । तदभावे अचित्ताणंतेण थिरेण गम्मति, तेंण[1] वि अक्कंतेण निपच्चवाएण य । तदभावे अणक्कंतनिपच्चवाएणं, तदभावे अचित्ताणंतेणं अथिरेण, सो अ अक्कंतनिपच्चवाओ य यदि होति । तदभावे अणक्कंतनिप्पच्चवाएणं । तदभावे मीसेणं, तत्थ वि एवमेव भंगा जाणियव्वा जहा अचित्ते । तदभावे सचित्तेणं गम्मइ, तत्थ वि एसेव गमो" ।

अथ गाथाऽक्षरघटना-**त्रिविधो वनस्पतिः**सचित्तः, अचित्तो मिश्रश्चेति । तत्रैकैको द्वेधा-परीतोऽनन्तश्च, तत्र **परीतः** पृथक् शरीराणामेकद्वित्रिसङ्ख्येयासङ्ख्येयानां जीवानामाश्रयः, **अनन्त**स्त्वनन्तानामेकैकं शरीरम्, स **एकैकः स्थिरोऽस्थिर**श्च, स्थिरो दृढसंहननः, इतरस्त्वस्थिरः । अत्र च **संयोगाः** कर्त्तव्याः, ते चाधस्ताद्(नि.२५)**यथोक्तास्तथैव** दृश्याः, ते चाक्रान्त-निष्प्रत्यपाय-आक्रान्त-सप्रत्यपाय-अनाक्रान्त-निष्प्रत्यपाय-अनाक्रान्त-सप्रत्यपायरूपाः । स्थापना –

| |
|---|
| ।। |
| ।ऽ |
| ऽ। |
| ऽऽ |

ननु च कस्मादचित्तवनस्पतियतनोच्यते ? तथाहि-सचेतनविषया यतनेति न्यायः, उच्यते-तत्राप्यस्ति कारणम्, यद्यपि अचित्तस्तथापि कदाचित्केषाञ्चिद्वनस्पतीनामविनष्टा योनिः स्याद् गुडूचीमुद्गादीनाम्, तथाहि-गुडूची शुष्काऽपि सती जलसेकात्तादात्म्यं भजन्ती दृश्यते, एवं काङ्कटुकमुद्गादिरपि, अतो योनिरक्षणार्थमचेतनयतनाऽपि न्यायवत्येवेति । अथवाऽचित्तवनस्पतियतनया दयालुतामाह, अचेतनस्यैते भेदा न भवन्ति, किन्तु सचित्तमिश्रयोरेव योजनीयाः ॥४२॥

उक्तं वनस्पतिद्वारम्, अधुना त्रसद्वारमाह –

**८० तिविहा बेइंदिया खलु थिरसंघयणेयरा पुणो दुविहा ।**
**अक्कंताई य गमो जाव उ पंचिंदिया नेया ॥४३॥ नि०**

---

गम्यते, तत्रापि परित्तेन, तेनापि स्थिरेण, तत्राप्याक्रान्तनिष्प्रत्यपायेन, तदभावेऽनाक्रान्तेन निष्प्रत्यपायेन, तदभावेऽचित्तपरित्तेनास्थिरेण गम्यते, सोऽपि यद्याक्रान्तो निष्प्रत्यपायश्च, तदभावेऽनाक्रान्तनिष्प्रत्यपायेन च । तदभावेऽचित्तानन्तेन स्थिरेण गम्यते, तेनाप्याक्रान्तेन निष्प्रत्यपायेन च । तदभावेऽनाक्रान्तनिष्प्रत्यपायेन, तदभावेऽचित्तानन्तेनास्थिरेण, स चाक्रान्तनिष्प्रत्यपायश्च यदि भवति, तदभावेऽनाक्रान्तनिष्प्रत्यपायेन, तदभावे मिश्रेण, तत्राप्येवमेव भङ्गा ज्ञातव्या यथा अचित्ते, तदभावे सचित्तेन गम्यते, तत्राप्येषैव गमः ।

१. तत्थ वि तेण वि० क, ल.

**तिविधा** गाहा । **त्रिविधास्त्रिप्रकाराः**, के ? **द्वीन्द्रियाः** सचित्तादिभेदात्, सचित्ताः सकलजीवप्रदेशवन्तः, अचित्तास्तद्विपर्ययात् । मिश्रास्त्वेत एव करम्बीभूताः । **पुनरेकैको द्विविधः**, तथाहि-"[A]सचित्तो **थिरसंघयणो अथिरसंघयणो** अ, एवं अचित्तो वि मीसो वि । जो सो थिरसंघयणो तत्थ चउभंगी-अक्कंतोऽणक्कंतो सपच्चवाओ इयरो य । एवं अण्णो वि ।" '**अक्कंतादी य**' त्ति **आक्रान्तादिर्गमो** भङ्गक इति, अनेन चतुर्भङ्गिका सूचिता । एवमयं क्रमस्त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाणां सच्चित्ताचित्त-मिश्रादिर्योजनीय इति ॥४३॥

एवं तावत्सजातीययतनोक्ता, इदानीं विजातीयेन सहाह –

८१ **पुढविदए य पुढवीए उदये पुढवितस वालकंटा य ।**
**पुढविवणस्सइकाए ते चेव उ पुढविए [१]गमणं ॥४४॥ नि०**

८२ **पुढवितसे तसरहिए निरंतरतसेसु पुढविए गमणं ।**
**आउवणस्सइकाए वणेण नियमा वणं उदए ॥४५॥ नि०**

८३ **तेऊवाउविहूणा एवं सेसा वि सव्वसंजोगा ।**
**नच्चा विराहणदुगं वज्जंतो जयसु उवउत्तो ॥४६॥ नि०**

**पुढवि** गाहा । **पृथिव्युदकयो**र्युगपद्गमनतया प्राप्तयोः सतोः कतरेण यातव्य-मित्याह-**पृथिव्याम्, उदके** त्रसादिसद्भावात्, **च**शब्दाद्वनस्पतिश्च **पृथिवी** त्वस्त्येव। अथ **पृथिवीवनस्पतिकाययोः** सतोः किं कर्त्तव्यमित्याह-**पृथिव्यैव गन्तव्यम्**, वनस्पतौ तद्दोषसंभवात् ॥४४॥

**पुढवितसे** इत्यादि । अथ **पृथिवीत्रसयोः** केन गन्तव्यम् ? **त्रसरहित**मार्गेण, एतदुक्तं भवति–विरलत्रसेषु तन्मध्येन, **निरन्तरेषु** तु **पृथिव्याम्** । अथ **अप्काय-वनस्पतिकाययोः** सतोः केन यातव्यमित्याह-**वनेन** वनस्पतिकायेन, **उदके नियमा-द्वनस्पति**सद्भावात् ॥४५॥

**तेऊ** गाहा । **तेजस्कायवायुकायाभ्यां रहिता एवं शेषा अपि सर्वे संयोगाः**, अन्येऽपि ये नोक्तास्तेऽनुगन्तव्या भङ्गकाः, सर्वथा **विराधनाद्वयं ज्ञात्वा**ऽऽत्मविराधना

---

A. सचित्तः स्थिरसंहननोऽस्थिरसंहननश्च, एवमचित्तोऽपि मिश्रोऽपि । यः स स्थिरसंहननस्तत्र चतुर्भङ्गीआक्रान्तो-ऽनाक्रान्तः । सप्रत्यपाय इतरश्च । एवमन्योऽपि ।

१. कमणं आ०

संयमविराधना च । एतद्द्वयमपि [1]**वर्जयन्नुपयुक्तो यतस्व** यतनां [2]कुर्विति । इदानीं यदुक्तं 'एवं सेसा वि सव्वसंजोगा' इति ते भङ्गका दर्श्यन्ते, ते चामी-"[A]तत्थ पुढविकाओ आउकाओ वणस्सइकाओ तसकाओ चेति चत्तारि पयाइं काउं, ततो दुगचारणियाए तिगचारणिआए चउक्कचारणियाए चारेयव्वा, सा य इमा चारणिआ-पुढविक्काओ आउक्कायो य पढमो १, पुढवी वणस्सती बीओ य २, पुढवी तसा य तइओ ३, एवं पुढवीए तिन्नि लद्धा, आऊ दो लहइ, वणस्सई एक्कं ति ६, पुढवी आऊ वणस्सई १, पुढवी आऊ तसा २, पुढवी वणस्सइ तसा ३, आऊ वणस्सइ तसा ४, एए तिगचारणियाए लद्धा, चउक्कचारणियाए उ एक्को चेव। सव्वे वि एक्कारस अचित्तेहिं पएहिं लद्धा । एवं मीसेसु वि ११, सचित्तेसु वि इक्कारस ११, सव्वेसु वि तेत्तीसं ३३"॥४६॥

उक्ता षट्कcraयतना, आह-यदा **पुनर्व्याघ्रदुस्तटीन्यायेना**न्यतरविराधनामन्तरेण प्रवृत्तिरेव न घटां प्राञ्चति तदा किं कर्त्तव्यमित्याह –

**८४ सव्वत्थ संजमं संजमाउ अप्पाणमेव [3]रक्खिवज्जा ।**
**मुच्चइ अइवायाओ पुणो विसोही न याविरई ॥४७॥ नि०**

**सव्वत्थ** गाहा । **सर्वत्र** सर्वेषु वस्तुषु, किम् ? **संयम**रक्षा कार्या, तदभावेऽभिप्रेतार्थसिद्ध्यसिद्धेः, किमेष एव [72]न्यायः ? नेत्याह-**संयमादपि आत्मानमेव रक्षेत्**, आत्माभावे च तत्प्रवृत्त्यसिद्धेः, आत्मानमेव रक्षन्, जीवन्नित्यर्थः, **मुच्यते** भ्रश्यति कस्मा**दतिपाताद्** हिंसादिदोषात्, किं कारणम् ? उच्यते-अतिपाततो यतः **पुनर्विशुद्धि**स्तपश्चरणादिना भविष्यति । अथ मन्यसे पृथिव्याद्यतिपातोत्तरकालं विशुद्धिर्भवतु नाम, किन्तु हिंसायां वर्तमानोऽसौ अविरतो लभ्यत इति । **एकव्रतभङ्गे सर्वव्रतभङ्ग** इति वचनात्, तदेतन्नास्ति, यत आह-**न याविरई**, किं कारणम् ? तस्याशयशुद्धतया विशुद्धपरिणामत्वात्, विशुद्धपरिणामस्य च मोक्षहेतुत्वात् । यद्वा

७२. न्यायः-नियम इति । संटी.

A. तत्र पृथिवीकायोऽप्कायो वनस्पतिकायस्त्रसकायश्चेति चत्वारि पदानि कृत्वा, ततो द्विकचारणिकया त्रिकचारणिकया चतुष्कचारणिकया चारयितव्या । सा चेयं चारणिका पृथिवीकायोऽप्कायश्च प्रथमः १, पृथिवी वनस्पतिर्द्वितीयश्च २, पृथिवी त्रसाश्च तृतीयः ३, एवं पृथिव्यास्त्रयो (भङ्गका) लब्धा, अप्कायस्य द्वे भङ्गके लभेते, वनस्पतिरेकमिति। ६, पृथिवी अप् वनस्पतिः १, पृथिवी अप् त्रसाः २, पृथिवी वनस्पतिस्त्रसाः ३, अप् वनस्पतिस्त्रसाः ४, एते त्रिकचारणिकया लब्धा, चतुष्कचारणिकया तु एक एव । सर्वेऽप्येकादशाचित्तैः पदैर्लब्धा । एवं मिश्रेष्वप्येकादश, सचित्तेष्वप्येकादश, सर्वेष्वपि त्रयस्त्रिंशत् ।

१. वर्जयेत् क. ल. २. कुर्वीत क. ३. रक्खंतो ह. हे० रक्खंतु सं.

सर्वत्र संयमं रक्षन्नतिपातान्मुच्यतेऽतिपातो न भवति । किमयमेव न्यायः ? नेत्याह– संयमादात्मानमेव [१]रक्षेत्, येन पुनरपि विशुद्धिर्भवति, **न** चातिपाते**ऽप्यविरति**रिति पूर्ववत् ॥४७॥

किं कारणं संयमादप्यात्मा रक्षितव्यः ? उच्यते यतः –

८५ **संजमहेउं देहो धारिज्जइ सो कओ अ तदभावे ? ।**
**संजमफाइनिमित्तं तु देहपरिपालणा इट्ठा ॥४८॥ नि०**

**संयम** गाहा । इह हि **संयमहेतुः** संयमनिमित्तं **देहो धार्यते, स च** संयमः **कुतस्तदभावे** देहाभावे ? यस्मादेतदेवं तस्मात् **संयमस्फातिनिमित्तं** संयमवृद्ध्यर्थं **देहपरिपालनमिष्टं** धर्मकायसंरक्षणमभ्युपगम्यते॥४८॥

आह– [२]लोकेनाविशिष्टमेतत्, तथाहि –

८६ **चिक्खल्लवालसावयसरेणुकंटयतणे बहुजले अ ।**
**लोगो वि नेच्छइ [३]पंहे को णु विसेसो भयंतस्स ॥४९॥ नि०**

**चिक्खल्ल** गाहा । **चिक्खल्लव्यालश्वापदसरेणुकण्टकतृणान् बहुजलांश्च** सोपद्रवान् मार्गान् **पथो लोकोऽपि नेच्छत्येव**, अतः **को नु विशेषो** ? लोकात् सकाशा**द्भदन्तस्य** येनैवमुच्यत इति ? ॥४९॥

उच्यते –

८७ [४]**जयणमजयणं च गिही सचित्तमीसे परित्तऽणंते अ ।**
**नवि जाणंति न [५]यासिं [६]अवहपइण्णा [७]अह विसेसो ॥५०॥ नि०**

**जयणा** गाहा । **यतनामयतनां च गृहिणो न जानन्ति, क्व ? सचित्तादौ,** न **चैतेषां** गृहिणा**मवधप्रतिज्ञा** वधनिवृत्तिः, [८]**अथ** एष **विशेषः** ॥५०॥

८८ **अवि अ जणो मरणभया परिस्समभया व ते विवज्जंति ।**
**ते पुण दयापरिणया मोक्खत्थमिसी परिहरंति ॥५१॥ नि०**

**अवि य** गाहा । कण्ठ्या । **अपि च** इत्यनेनाभ्युच्चयमाह, नवरं **ते** त्ति सापायान् पथः ॥५१॥

---

१. रक्षन् क. ल. २. लोकानामपीष्टम् दा. ३. पहं हे० संपा० पा. ४. जयणाजयणं ह.हे.ल.संपा० ५ वा सिं द.य. ६. परिण्णा हे० ७. अओ सं. ८. अत एव वि० दा.

इतश्च साधोः प्राणातिपातापत्तावपि गृहिणा सह वैधुर्यमित्याह –

**८९ अविसिट्ठंमि वि जोगंमि बाहिरे होइ विहुरया इहरा ।**
**सुद्धस्स उ संपत्ती अफला जं देसिया समए ॥५२॥ नि०**

**अविसिट्ठ** गाहा । इहाऽ**विशिष्टेऽपि** तुल्येऽपि **योगे** प्राणातिपातादिव्यापारे **बाह्ये** बहिर्वर्त्तिनि **भवति विधुरता** वैधुर्यं विसदृशता, इत्थं चैतदभ्युपगन्तव्यम्, **इतरथा शुद्धस्य** साधोः **संप्राप्तिः** प्राणातिपातापत्ति**रफला** निष्फला [१]**यत् प्रदर्शिता समये** सिद्धान्ते तद्विरुध्यते, तस्मादेतदेवमेवाभ्युपगन्तव्यम्, बाह्यप्राणातिपातव्यापारः शुद्धस्य साधोर्न बन्धाय भवतीति ॥५२॥

तथा च[२] –

**९० एक्कंमि वि [३]पाणिवहंमि देसिअं सुमहदंतरं समए ।**
**एमेव [४]निज्जराफला परिणामवसा बहुविहीया ॥५३॥ नि०**

**एगम्मि वि** गाहा । **एकस्मिन्नपि** तुल्येऽपि [५]**प्राणिवधे दर्शितं** प्रतिपादितं **सुमहदन्तरम्,** क्व ? **समये** सिद्धान्ते, तथाहि–यथा द्वौ पुरुषौ प्राणिवधप्रवृत्तौ, तयोश्च न तुल्यो बन्धः, यस्तत्रातीवसंक्लिष्टपरिणतिः स सप्तम्यां पृथिव्यामुत्पद्यते, अपरस्तु नातिसंक्लिष्टपरिणतिः स द्वितीयनरकादावपीति । इयं तावद्विसदृशता बन्धमङ्गीकृत्य, इदानीं निर्जरामङ्गीकृत्य विसदृशतां दर्शयन्नाह–**एवमेव निर्जरा फल**विशेषा अपि **परिणामवशाद् बहुविधा** बहुप्रकारा विशिष्टविशिष्टतरविशिष्टतमाः ॥५३॥

एकां प्राणिजातिमङ्गीकृत्यान्तरमुक्तम्, अधुना सकलव्यक्त्याश्रयमन्तरं प्रतिपिपादयिषुराह –

**९१ जे जत्तिआ य हेऊ भवस्स ते चेव तत्तिआ मोक्खे ।**
**गणणाईया लोगा दुण्ह वि पुण्णा भवे तुल्ला ॥५४॥ नि०**

**जे जत्ति** गाहा । [६]**ये हेतवो यावन्तो** यावन्मात्रा **भवस्य** संसारस्य निमित्तं **त एव** नान्ये **तावन्**मात्रा एव **मोक्षस्य** हेतवो निमित्तानि । कियन्मात्रकास्ते ? अत

---

१. यतः दा. २. चाह दा.ल. ३. पाणवहंमि ल०ह०हे० संपा० ४. निज्जरफला.पा.स. ५. प्राणवधे क.ल.
६. ये यावन्तो हेतवो भवस्य नि० क० ये यावन्तो हेतवो भवस्य संसारस्य ल०

आह-[1]**गणनाया अतीता:** [2]सङ्ख्याया अतिक्रान्ता:, के ? **लोका द्वयोरपि** भवमोक्षयो: सम्बन्धिनां हेतूनामसङ्ख्येया लोका: **पूर्णा** भृता:, तत्र पूर्णा एकहेतुन्यूना अपि भवन्त्यत आह-तुल्या:, कथंभृता: ? क्रियाविशेषणं **तुल्या:** सदृशा इत्यर्थ: ।

ननु तुल्यग्रहणमेव [3]कस्मान्न कृतम् ? येन पुन: पूर्णग्रहणं क्रियते । "[A]भण्णति पडिवयणं-तुल्लगहणेण केवलेणं संवलिआणं संसारमोक्खहेऊणं लोका [4]तुल्ल त्ति कस्स वि बुद्धी होज्जा [5]तो पुण्णग्गहणं पि कीरइ, दोण्ह वि पुण्ण त्ति जया जया भरिअ त्ति नेयव्वा" । इयमत्र भावना-सर्व एव ये त्रैलोक्योदरविवरवर्त्तिनो भावा रागद्वेषमोहात्मनां पुंसां संसारहेतवो भवन्ति त एव रागादिरहितानां [6]श्रद्धानज्ञान-परिहारद्वारेण मोक्षहेतवो भवन्तीति एवं तावत्प्रमाणमिदमुक्तम् ॥ ५४॥

इदानीं येषाममी त्रैलोक्यापन्ना: पदार्था बन्धहेतवो भवन्ति न भवन्ति च येषां तदाह –

**९२ [7]इरिआवहियाईया जे चेव हवंति कम्मबंधाय ।**
**अजयाणं ते चेव उ जयाण निव्वाणगमणाय ॥५५॥ नि०**

**ईरिया** गाहा । '**ईर गतिप्रेरणयो:**'( **ईर गतौ कम्पने च पा. धा. १०९०** ) ईरणमीर्या पथि ईर्या ईर्यापथं गमनागमनमित्यर्थ:, ईर्यापथमादौ येषां ते ईर्यापथाद्या:, आदिशब्दाद्दुष्टवागादिव्यापारा गृह्यन्ते, **ईर्यापथाद्या** व्यापारा **य एव भवन्ति कर्मबंधाय** कर्मबन्धनिमित्तं कर्मबन्धहेतव:, केषाम् ? **अयतानाम**यत्नपराणां पुरुषाणाम्, **त एव** ईर्यापथाद्या व्यापारा **यतानां** यत्नवतां **निर्वाणगमनाय** मोक्षगमनाय भवन्ति ॥५५॥

एवं तावत्साधोर्गृहस्थेन सह तुल्येऽपि व्यापारे विसदृशतोक्ता, इदानीं सजातीयमेव साधुमाश्रित्य विसदृशतामुपदर्शयन्नाह –

**९३ एगंतेण निसेहो जोगेसु न [8]देसिओ विही वा वि ।**
**दलिअं पप्प निसेहो होज्ज विही वा जहा रोगे ॥५६॥ नि०**

**एगंतेण** गाहा । **एकान्तेन निषेधो योगेषु** गमनादिव्यापारेषु **न देशितो** नोपदिष्ट:,

---

A. भण्यते प्रतिवचनम्-तुल्यग्रहणेन केवलेन संवलितानां संसारमोक्षहेतूनां लोका तुल्येति कस्यापि बुद्धिर्भवेत्तत: पूर्णग्रहणमपि क्रियते, द्वयोरपि पूर्णेति यदा यदा भृतेति ज्ञातव्या ।

१. गणनया क.ल. २. सङ्ख्यया क.ल. ३. केवलं न दा. ४. पुण्ण त्ति क. ५. तेण क. ल. ६. श्रद्धामतामज्ञानपरिहारद्वारेण दा. ७. इरिआवहियाईया दा. इरिआवहमाईया आ० ८. दंसिओ ह. हे.

**विधिर्वा**ऽनुज्ञा वा क्वचित्स्वाध्यायादौ न [१]दर्शितः, किन्तु **दलिअं द्रव्यं** वस्तु वा **प्राप्य** विज्ञाय **निषेधो भवेत्,** तस्यैव **वा विधिर्भवेत्,** अनुष्ठानं भवेदिति। अयमत्र भावः-कस्यचित्साधोराचार्यादिप्रयोजनादिना सचित्तेऽपि पथि व्रजतो गमनमनुज्ञायते कारणिकत्वात्, नाकारणिकस्य, दृष्टान्तमाह-**जहा रोगे** त्ति **यथा रोगे** ज्वरादौ औषधेः परिपाचनभोजनादेः प्रतिषेधः क्रियते, जीर्णज्वरे तु तस्यैव विधिरित्यतः साधूच्यते-वस्त्वन्तरमवाप्य विधिः प्रतिषेधो वा विधीयते ।

अथवाऽन्यथा व्याख्यायते-इहोक्तम्-'अखिलाः पदार्था आत्मनः संसारहेतवो मोक्षहेतवश्च' ततश्च न केवलं त एव यान्यपि सम्यग्दर्शनज्ञानचारित्राणि तान्यपि संसारमोक्षयोः कारणानीति तथा चाह-**एगंतेण निसेहो० एकान्तेन निषेधः** प्रतिषेधः सम्यग्दर्शनादिदानेषु तत्प्रख्यापकशास्त्रोपदेशेषु **न दर्शितो विधिर्वा न दर्शित** इति संटङ्कः, किन्तु **दलिकं प्राप्य** पात्रविशेषं प्राप्य कदाचिद्दीयते कदाचिन्न, एतदुक्तं भवति-प्रशमादिगुणसमन्विताय दीयमानानि मोक्षाय, विपर्ययेण भवाय, तदाशातनात्, यथा ज्वरादौ तरुणे सत्यपथ्यं पश्चात्तु पथ्यमिति तदेव ॥५६॥

अथैकमेव वस्त्वासेव्यमानं बन्धाय मोक्षाय च कथं भवति ? [२]इत्यत आह –

**९४ जंमि निसेविज्जंते अइयारो होज्ज कस्सइ कयाइ ।**
**तेणेव य तस्स पुणो कयाइ सोही हवेज्जाहि ॥५७॥ नि०**

**जंमि** गाहा । **यस्मिन्** वस्तुनि क्रोधादौ **निषेव्यमाणेऽतिचारः** स्खलना **भवति कस्यचित्** साधोः **कदाचित्** कस्याञ्चिदवस्थायां **तेनैव** क्रोधादिना **तस्यैव पुनः कदाचिच्छुद्धिरपि भवेत्, चण्डरुद्रसाधो**रिव, तेन हि रुषा स्वशिष्यो दण्डकेन ताडितः, तं च रुधिरार्द्रं दृष्ट्वा पश्चात्तापवान् संवृत्तः? चिन्तयति[३] च-धिग्मां यस्यैवंविधः क्रोध इति विशुद्धपरिणामस्यापूर्वकरणं क्षपकश्रेणिः केवलोदयः संवृत्तः इति ॥५७॥

बाह्यं व्यापारमङ्गीकृत्य विसदृशतोक्ता, अथ बाह्योऽपि व्यापारो यथा बन्धहेतुर्न स्यात्तथाह –

**९५ अणुमित्तो वि न कस्सई बंधो परवत्थुपच्चया भणिओ ।**
**तहवि य जयंति जइणो परिणामवि[४]सोहिमिच्छंता ॥५८॥ नि०**

---

१. दर्शिता दा. २. तदाह दा. ३. धिग् क. ४. ०विसुद्धिमि.पा.सं

**अणु** गाहा । **अणुमात्रोऽपि** स्वल्पोऽपि **बन्धो न कस्यचित् परवस्तुप्रत्ययाद्** बाह्यवस्तुनिमित्तात्सकाशाद् **भणित** उक्तः किन्त्वात्मपरिणामादेवेत्यभिप्रायः । आह- यद्येवं न तर्हि पृथिव्यादियतना कार्या ? उच्यते, यद्यपि बाह्यवस्तुनिमित्तो बन्धो न भवति **तथापि यतनां** विदधति पृथिव्यादौ मुनयः **परिणामविशुद्धिमिच्छन्तो-** ऽभिलषन्तः, एतदुक्तं भवति-यदि पृथिव्यादिकाययतना न विधीयते ततो नैवेयं स्यात् ॥ ५८॥

यस्तु हिंसायां प्रवर्त्तते तस्य परिणाम एव न शुद्धः, इत्याह च –

**९६ जो पुण हिंसाययणेसु वड्ढई तस्स नणु परीणामो ।**
**दुट्ठो न य तं लिंगं होइ विसुद्धस्स जोगस्स ॥५९॥ नि०**

**जो पुण** गाहा । **यस्तु पुनर्हिंसायतनेषु** व्यापत्तिधामसु **वर्त्तते तस्य ननु परिणामो दुष्ट** एव भवति, **न च** **तद्धिंसा**स्थानवर्त्तित्वं **लिङ्गं** चिह्नं **भवति विशुद्धस्य योगस्य** मनोवाक्कायरूपस्य ॥५९॥

**९७ तम्हा सया विसुद्धं परिणामं इच्छया सुविहिएणं ।**
**हिंसाययणा सव्वे [1]वज्जेयव्वा पयत्तेणं ॥६०॥ नि०**

**तम्हा** गाहा । **तस्मात्** सदाऽजस्रं **विशुद्धं परिणाममिच्छता सुविहितेन**, किं कर्त्तव्यम् ? **हिंसायतनानि सर्वाणि वर्जनीयानि प्रयत्नतः** ॥६०॥

तथा च –

**९८ वज्जेमि त्ति परिणओ संपत्तीए विमुच्चई वेरा ।**
**अवहंतो वि न मुच्चइ किलिट्ठभावो[2]ऽतिवातस्स ॥६१॥ नि०**

**वज्जेमि त्ति** गाहा । **वर्जयाम्यहं** प्राणिवधादीन्येवं**परिणतः** सन् **संप्राप्तावपि**, कस्य ? **अतिपातस्य** प्राणिप्राणविनाशस्येत्युपरिष्टात्सम्बन्धः, तथापि **विमुच्यते वैरात्** कर्मसम्बन्धात् । यस्तु पुनः **क्लिष्टभावः** क्लिष्टपरिणामः सो**ऽव्यापादयन्नपि न मुच्यते** वैरात् ॥६१॥

**९९ उच्चालियंमि पाए ईरियासमियस्स संकमट्ठाए ।**
**वावज्जेज्ज कुलिंगी मरिज्ज तं जोगमासज्ज ॥४॥ प्र.**

---

१. परिहरियव्वा त.द. संपा० अ० २. त्ति वा तस्स आ० इऽतिवातस्स ह० इवातस्स हे ० इइवायस्स त.

**१०० न च तस्स तन्निमित्तो बंधो सुहुमो वि देसिओ समए ।**
**अणवज्जो उ पओगेण सव्वभावेण सो जम्हा ॥५॥ प्र.**

तदेवं गच्छतस्तस्य षट्काययतनादिको विधिरुक्तः, स इदानीं गच्छन् ग्रामादौ प्रविशति, तत्र का सामाचारी ? तद्दर्शनार्थमुपक्रम्यते –

**१०१ पढमबिइये गिलाणे तइए सण्णी चउत्थि साहम्मी ।**
**पंचमगम्मि य वसही छट्ठे ठाणट्ठिओ होइ ॥६२॥ नि० दारगाहा ।**

**पढम** गाहा । **प्रथम**द्वारे **द्वितीय**द्वारे च **गिलाणे** त्ति **ग्लान**विषया यतना वक्तव्या, **तृतीये** द्वारे **संज्ञी** श्रावको वक्तव्यः, **चतुर्थे** द्वारे **साधर्मिकः** साधुर्वक्तव्यः, **पञ्चमे** द्वारे **वसति**र्वक्तव्या, **षष्ठे** द्वारे वर्षाकालप्रतिघातात्**स्थानस्थितो भवति** । आह-तृतीयद्वारे षडर्थाधिकारा भविष्यन्ति, तद्यथा-"वइअग्गामे संखडि सण्णी दाणे अ भद्दे अ" त्ति (नि. ८५) ततश्च किमिति संज्ञिन एव केवलस्य ग्रहणमकारि ? उच्यते-संज्ञिनोऽतिरिक्तो विधिर्वक्ष्यमाणो भविष्यति, अस्यार्थस्य ज्ञापनार्थं संज्ञिग्रहण-मेवाकरोत्, अथवा **तुलादण्डमध्यग्रहण**न्यायेन मध्यग्रहणे शेषाण्यपि गृहीतान्येव द्रष्टव्यानि । आह-मध्यमेवैतन्न भवति, यतः षडमूनि द्वाराणि, उच्यन्ते नैतदेवम्, यतः सप्तमं चशब्दाक्षिप्तं महानिनादेति द्वारं भविष्यति, संज्ञिग्रहणेन मध्यमेव गृहीतमितीयं द्वारगाथा ॥६२॥

नन्वस्यातित्वरिताचार्यकार्यप्रसाधनप्रवृत्तत्वात्कोऽवसरो[1] ग्रामादिप्रवेशे[2] ? उच्यते-तत्प्रवेशेऽधिकतरगुणदर्शनात्, तथा चाह –

**१०२ एहिअपारत्तगुणा दुन्नि य पुच्छा दुवे य साहम्मी ।**
**तत्थिक्किक्का दुविहा चउहा जयणा दुहिक्किक्का ॥६३॥ नि० दारगाहा।**

**एहिय** गाहा । तस्य तत्र ग्रामे प्रविशत **ऐहिका** इहलोकगुणा भक्तपानादयो भवन्ति, **परत्रगुणाश्च** ग्लानादिप्रतिजागरणादिकाः । प्रविशतश्च तस्य **द्विविधा पृच्छा** भवति, सा **च** विध्यविधिलक्षणा वक्ष्यमाणा । **साधर्मिकाश्च द्वेधा**-साम्भोगिका अन्यसाम्भोगिकाश्च । **तत्रैकैको द्विधा,** योऽसौ साम्भोगिकः स द्विविधः-कदाचिदेकः कदाचिदनेकः । एवमन्यसाम्भोगिकेऽपि वाच्यम् । **चउहा जयण** त्ति **चतुर्विधा यतना,** साम्भोगिकसंयतयतना साम्भोगिकसंयतीयतना च, तथा अण्णसंभोइयसंजय-

१. ०प्रसृतत्वात् आ. २. ०प्रवेशनेन ल. ०प्रवेशद्वारस्य क.

जयणा अण्णसंभोइयसंयतीजयणा चेति । **'तत्थिक्किक्का दुविह'**त्ति **तत्रैकैको** भेदो द्वेधा साम्भोगिकसंयताः कारणिका निष्कारणिकाश्च, एवं संभोइयसंजइओ वि । एवं असंभोइअसंजया वि संजईओ वि । अथवाऽन्यथा-"[A]दुवे य साहम्मी त्ति संभोइआ असंभोइआ चेति । **तत्थिक्किक्का दुविह** त्ति जे ते संभोइआ ते संजया संजईओ अ, एवमसंभोइया वि । **चउहा जयण** त्ति चउव्विहा जयणा कायव्वा दव्वादि ४ । **दुहिक्कि** त्ति सा **एकैका** द्रव्यादियतना **द्वेधा**-तत्थ दव्वओ पढमं फासुएण कीरइ, तदभावे अफासुएण वि । खित्ततो अकयाकारितासंकप्पिए गेहे ठायव्वं," तदभाव उद्घाटगृहस्य कपाटादेरपि क्रियते । कालतः प्रथमपौरुष्यां प्रासुकं दीयते, अथ तस्यां न लभ्यते ततः कृत्वाऽपि दीयते । भावतः प्रासुकद्रव्यैः शरीरस्य समाधानमाधीयते तदभावे त्वप्रासुकैरपि । इयं द्वारगाथा महती ॥६३॥

तत्रैहिकगुणद्वारप्रतिपादनायाह –

**१०३ इहलोइया पवित्ती पासणया तेसि संखडी सड्ढो ।**
**परलोइया गिलाणे चेइय वाई य पडिणीए ॥६४॥ नि०**

**इहलोइया** गाहा । **इहलोइअ** त्ति द्वारपरामर्शः, प्रविष्टस्य तस्यायं गुणो भवति-यानभिसन्धाय प्रवृत्तस्तदीयां कदाचित्तत्र वार्तां लभते-यथा ततो निर्गत्य तेऽधुनाऽमुकत्र तिष्ठन्तीति, एतदुक्तं भवति-मासकल्पपरिसमाप्तौ ते कदाचित्तत्रैवायाताः स्युः, ततश्चैतेषां साधूनां **पश्यत्ता** दर्शनं भवतीति तत्रैव कार्यपरिसमाप्तिः स्यात्, तथा कदाचित्तत्र **संखडी** भवति, ततश्च भक्तं गृहीत्वा व्रजतः कालक्षेपो न भवति, शीघ्रं चाभीष्टं [१]धाम प्राप्नोति । तत्र वा प्रविष्टस्य **श्राद्धः** श्रावकः कश्चिद्भवति, तद्गृहात्पर्युषितभक्तमादाय व्रजति । एते प्रविष्टस्यैहिकगुणाः । अथेतरे **परलोइआ** इति द्वारपरामर्शः । **गिलाण** त्ति कदाचित्तत्र प्रविष्ट इदं शृणुयात् यदुतात्र **ग्लान** आस्ते, ततश्च तत्परिपालनं कार्यम्, परिपालने च कथं न **पारलौकिका** गुणा इति, **'जो गिलाणं पडियरइ से मं पडिअरति, जो मं पडिअरइ सो गिलाणं पडियरति'**त्ति[ ]वचनप्रामाण्यात् । कदाचिद्वा तत्र **चैत्यायतनं**

---

A. साधर्मिकाश्च द्वेधेति साम्भोगिका असाम्भोगिकाश्चेति । तत्रैकैको द्विविध इति, ये ते साम्भोगिकास्ते संयताः संयत्यश्च, एवमन्यसाम्भोगिका अपि । चतुर्धा जयणेति चतुर्विधा जयणा कर्तव्या द्रव्यादि ४ । सा एकैका द्वेधा-तत्र द्रव्यतः प्रथमं प्रासुकेन क्रियते, तदभावेऽप्रासुकेनापि । क्षेत्रतोऽकृताकारितासङ्कल्पिते गृहे स्थातव्यम्,

१. ग्रामं दा.

भवेत् तद्वन्दने पुण्यावाप्तिः स्यात्, **वादी** वा [१]तत्पराजयश्च, **प्रत्यनीको** वा साध्वादेस्तत्र स्यात् तद्दर्शनाच्चासावुपशमं यायात्, एवं लब्धिसंपन्नत्वात् ॥६४॥

उक्तमैहिकपारलौकिकगुणद्वारम् । अथ पृच्छाद्वारम्, तत्र द्विविधा पृच्छा- विधिपृच्छा अविधिपृच्छा च, अविधिपृच्छामाह —

**१०४ अविहीपुच्छा अत्थिऽत्थ संजया नत्थि तत्थ समणीओ ।**
**समणीसु य ता [२]नत्थिह संका य किसोरवडवाओ ॥६५॥ नि०**

**अविही** गाहा । **अविधिपृच्छेयम्**, यदुत **सन्त्यत्र संयताः** ? ततोऽसौ पृष्ट एतां विशेषविषयां पृच्छां श्रुत्वाऽऽह-**नास्त्यत्र** संयताः, **तत्र** च **श्रमण्यो** विद्यन्ते तेन च ता न तस्य कथिताः, विशेषप्रश्नाकरणात् । **समणीसु य** त्ति अथ **श्रमणीः** पृच्छति ततोऽसावाह-**न सन्त्यत्र ताः**, तत्र च श्रमणाः सन्तीति प्राग्वत्। **शङ्का च** श्रमणी पृच्छायां स्यात् **किशोरवडवान्यायात्** ॥६५॥

**१०५ सड्ढेसु चरिउकामो संका चारी य होइ सड्ढीसु ।**
**चेइयघरं च नत्थी तम्हा उ विहीए पुच्छिज्जा ॥६६॥ नि०**

**सड्ढेसु** गाहा । अथ **श्रावकान्** पृच्छति ततः परो विकल्पयति-**चरितुकामो**ऽयं भक्षयितुकामः, अथ **सड्ढीसु** त्ति **श्राविका**[३]विषयायां पृच्छायां **शङ्का** स्यात्, नूनमयं तदर्थी चरितुकामश्च । अथ **चैत्य**गृहमेव केवलं पृच्छति ततस्तदभावे वर्गचतुष्टयभावे च तत्प्रभवगुणहानिः स्यात्, **तस्माद्विधिना पृच्छेत्** ॥६६॥

तत्प्रतिपादनायाह —

**१०६ गामदुवारब्भासे अगडसमीवे महाणमज्झे वा ।**
**पुच्छिज्ज सयं पक्खं वियालणे तस्स परिकहणा ॥६७॥ नि०**

**गाम** गाहा । **ग्रामद्वारे** ग्रामस्य [४]निष्काशप्रवेशे स्थित्वा **पृच्छेत्**, अथवा **अब्भासे** त्ति ग्रामाभ्यर्णे कूप**समीपे** वा **महाजन**[५]समुदाये **वा**, कम् ? **स्वकं पक्षं** किमत्रास्मत्पक्षोऽस्ति नेति ? यदि परोऽजानन् पृच्छति-को भवतां स्वपक्षः ? इत्येवं **विचारणे** ततस्[६]**तस्य** साधोः **परिकथना** स्यात्, पञ्चविधोऽस्मत्पक्षः- चैत्यगृहादि ॥६७॥

---

१.पराजयात् क. २. नत्थी दा.० नत्थि य ह० ३. ०विषया दा. ४. निष्क्रम क. ५. समीपे वा दा. ६. तस्याग्रे दा.

उक्तं पृच्छाद्वारम् । ततः पृच्छासमनन्तरं यदि चैत्यगृहमस्ति ततस्तस्मिन्नेव गन्तव्यम्, तत्र च कथं गन्तव्यम् ? उच्यते –

**१०७ निस्संकिय थूभाइसु काउं गच्छिज्ज चेइयघरं तु ।**
**पच्छा साहु[१]समीवं ते वि य संभोइआ तस्स ॥६८॥ नि०**

**निस्संकिय** गाहा । पुव्वद्धं कंठं । अथ साहम्मिअद्दारमाह-**पच्छा साहुसमीवं** ति चैत्यगृहान्निर्गत्य **पश्चात्साधुसमीपं** याति, **तेऽपि** साधवः **साम्भोगिकास्तस्य** साधोश्चशब्दादन्यसाम्भोगिका वा ॥६८॥

तत्र यदि साम्भोगिकास्ततः का सामाचारी ? इत्याह –

**१०८ निक्खिविउं किइकम्मं दीवणऽणाबाह पुच्छण सहाओ ।**
**गेलण्ण विसज्जणया अविसज्जुवएस दावणया ॥६९॥ नि०**

**निक्खिविउं** गाहा । **निक्षिप्य** विमुच्य साधुहस्ते, किम् ? उपकरणं पात्रकादि, ततः **कृतिकर्म** वन्दनं करोति, ततश्च **दीवणं** ति आगमनकार्याविर्भावनं करोति । **अणाबाह** त्ति **अणाबाधा** यूयम् ? एवं पृष्टे सति तेऽप्याहुः-अनाबाधा वयमिति। **पुच्छण** त्ति ततः साधुरेवमाह-भवद्दर्शनार्थमहं प्रविष्ट आसमिदानीं व्रजामीत्येवं **पृच्छति**, ततस्तेऽपि साधवो यद्यस्ति **सहायस्तं** दत्त्वा प्रेषयन्ति । [२]अथ कश्चिद् **ग्लानस्तत** एवं ब्रवीति-अहमेनं ग्लानं प्रतिचरामीति, ततस्तेऽप्याहुः-विद्यन्त एव प्रतिचारकाः, एवमभिधाय **विसज्जणय** त्ति तं साधुं **विसर्जयन्ति** प्रेषयन्ति वयमेव भलिष्याम इति । अथ **न विसर्जयन्ति,** एतच्च ब्रुवते-सर्वमत्र ग्लानप्रायोग्यमौषधादि लभ्यते, किन्तु तत्संयोजनां न जानीमः, ततः स **उपदेशं** ददाति-इदमौषधमनेन संयोज्य देयमिति । अथ त एवं ब्रुवते-औषधान्येवात्र वयं न लभामहे ततः स साधु**र्दापयत्यौष**धानि, याचयति वा पाठान्तरम्, एवमसावौषधानि दापयित्वा व्रजति। अथ त एवमाहुः-नौषधसंयोजनां जानीमो न च लभामहे, तत स एव साधुरौषधानि याचित्वा संयोज्य ग्लानाय दत्त्वा मनाक् प्रशान्ते व्याधौ सति व्रजति ॥६९॥

अथ त एवमाहुर्गच्छन्तं साधुम् –

---

१. समीवे ह० हे० सं २. अथ तत्र दा.

**१०९ पुणरवि अयं खुभिज्ज अयाणगा मो स वा भणिज्ज संचिक्खे ।**
**उभओ वि अयाणंता वेज्जं पुच्छंति जयणाए ॥७०॥ नि०**

**पुणरवि** गाहा । **पुनरप्ययं** व्याधिः क्षोभं यायात् प्रकुप्येत्, वयं च न जानीम उपशमयितुम्, **स वा** ग्लान एवं ब्रूयात्-त्वया तिष्ठता अहमचिरात्प्रगुणीभवामि, ततः **संचिक्खे** त्ति **संतिष्ठेत्** । अथोभावपि तावागन्तुकवास्तव्यौ न जानीतः क्रियां कर्तुं तत **उभावप्यजानन्तौ वैद्यं पृच्छतः**, कथम् ? **यतनया** अनन्तरगाथावक्ष्यमाणयेति ॥७०॥

सा चेयम् –

**११० गमणे पमाण उवगरण सउण वावार ठाण उवएस ।**
**आणण गंधुदगाई उद्धमणुद्दे य जे दोसा ॥७१॥ नि०**

**गमण** गाहा । यदि ग्लानो गन्तुं पारयति तत उत्सर्गेण स एव नीयते । अथ न पारयति ततोऽन्ये साधवो वैद्यसकाशे **गमनं** कुर्वन्ति । **पमाणे** त्ति कियत्**प्रमाणै**र्गन्तव्यम् ? तत्रैकेन न गन्तव्यं यमदण्डपरिकल्पनात्, न द्वौ यमपुरुष-परिकल्पनात्, न चत्वारो वाहिकपरिकल्पनात्, अतस्त्रिपञ्चसप्तभिर्गन्तव्यम्, उक्तं प्रमाणम् । **उवगरण** त्ति शुक्लवासोभिर्यातव्यम्, न कृष्णमलिनादिभिर्यातव्यम्, उक्तमुपकरणम् । **सउण** त्ति **शकुनेषु** सत्सु गन्तव्यम्, ते चामी नन्दीतूरमित्यादयः (निभा.८५), अपशकुनेषु तु न गन्तव्यम् । ते चैते मइलकुचेलादयः (निभा.८२), उक्तं शकुनद्वारम् । **वावार** त्ति यद्यसौ वैद्यो भुङ्क्ते, एकल्लशाटको वा छिन्दन् किञ्चिदास्ते भिन्दन्वा ततो न प्रष्टव्यः । अथ ग्लानस्यापि गण्डकादि छेत्तव्यं ततोऽस्मिन्नेव प्रस्तावे प्रष्टव्यः, उक्तो व्यापारः । **ठाण** त्ति [७३] यद्युत्कुरुटिकातुषबुशराश्यादौ स्थितस्ततो न प्रष्टव्यः, किं तर्हि ? शुचिप्रदेशस्थ इति, उक्तं स्थानम् । **उवएस** त्ति एवमसौ यतनया पृष्टो **यमुपदेशं** ददाति-द्रव्यतः क्षेत्रतः कालतो भावतश्च सोऽवधारणीयः, तत्र द्रव्यतः शाल्योदनं पारिहट्टं च क्षीरम्, क्षेत्रतो निर्वाता वसतिः, कालतः पौरुष्यां देयम्, भावतो नास्य प्रतिकूलव्यवहारिभिर्भाव्यम्, उक्त उपदेशः । अथ स वैद्य एवं ब्रूयात्-पश्यामि तावत्तमिति, ततः स वैद्यस्तत्समीपमानीयते, न च ग्लानस्तत्र नेयः, किं कारणम् ? वैद्यसमीपं नीयमान उत्क्षिप्ते लोकः कदाचिदेवं

---

७३. उत्कुरुटः-कचवरपुञ्जमिति । उक्करडे । (बृ.क. १ उ.)

ब्रूयात्-यथा नूनमयं मृत इत्यपशकुनः, मूर्च्छा वा भवेद्विपत्तिर्वा वैद्यगृहे स्यादिति, आगच्छति च वैद्ये किं कर्त्तव्यम् ? **गन्धुदकादि** त्ति **गन्ध**वासाः सन्निहिताः क्रियन्ते तद्दानार्थ**मुदक**मृत्तिकया विलेपनादि क्रियते। वैद्ये चागच्छति सूरिणा किं कर्त्तव्यमित्याह- **उड्डमणुट्ठे य जे दोस** त्ति यद्यसावाचार्यो वैद्यस्यागतस्यो**त्तिष्ठति** ततो लाघव**दोषः**। अथ [1]**नाभ्युत्तिष्ठति** ततः स्तब्ध इति कृत्वा कोपं गृहीत्वा प्रतिकूलः स्यात्, तस्मादेतद्दोषपरिजिहीर्षयाऽनागतमेवोत्थाय प्राङ्गणे परिष्वष्कमाणस्तिष्ठतीति ॥७१॥

उक्तमुत्थितानुत्थितद्वारम्, कियन्तं पुनः कालं तेन साधुना ग्लानस्य परिचरणं कर्त्तव्यमित्याह –

**१११ पढमावियारजोग्गं नाउं गच्छे बिइज्जए दिण्णे ।**
**एमेव अण्णसंभोईयाण अण्णाए वसहीए ॥७२॥ नि०**

**पढमा** इत्यादि । **पढम** त्ति यावत्**प्रथमालिकां** करोति [2]तां चात्मनः स्वयमेवानयितुं समर्थः संवृत्तः, **वियारजोग्गं** ति बहिर्भूमिगमनयोग्यो जात इति, एवं **ज्ञात्वा गच्छेत्**, कथम् ? **द्वितीये** सहाये **दत्ते** सति। अथ नास्ति सहायस्तत एक एव व्रजति । एष तावत्साम्भोगिकान् प्राप्य विधिरुक्तः । इदानीमन्यसाम्भोगिकविधिमतिदिशन्नाह-**एवमेवान्यसाम्भोगिक**[3]**ग्लानस्या**पि विधिः, किन्तु **अण्णाए वसहीए** त्ति **अन्यस्यां वसतौ** व्यवस्थितेन ग्लानपरिचरणाविधिः कार्यः ।

अयमपरो विशेषः-असाम्भोगिकसकाशं प्रविशता तदनाक्रान्ते भूप्रदेशे निक्षिप्योपकरणं ततः कृतिकर्मादि साम्भोगिकेष्विव सर्वं कर्त्तव्यमिति, तदनाक्रान्तभूभागे चोपकरणं स्थापयति, मा भूच्छिक्षकाणां तत्समाचारीदर्शनेऽन्यथाभावः स्यादिति । एवं तावत्साम्भोगिकबहुमध्यगतस्य ग्लानस्य यो विधिः, अन्यसाम्भोगिकबहुमध्यगतस्याप्येष एव विधिर्द्रष्टव्यः ॥७२॥

इदानीमेकैकस्य साम्भोगिकस्येतरस्य च विधिमाह –

**११२ एगागि गिलाणंमि उ**[4] **सिट्ठे किं कीरई ? न कीरइ वा ।**
**छगमुत्तकहण पाणग धुवणत्थुरण तस्स नियगं वा ॥७३॥ नि०**

**एगागि** गाहा । एवमसौ गच्छन् ग्रामाभ्यासे कस्माच्चित्पुरुषादिदं शृणुयात्-**किं**

१. नाभ्युद्गच्छति आगते क, नाभ्युद्गतिमादत्ते ल. २. यावदात्मन क. ल. ३. ग्लानस्य विधिः क. ल. ४. वि सिट्ठे. संपा०

भवता ग्लानप्रतिजागरणं **क्रियते** उत न ? [१]तस्यैव**मैकाकिनि ग्लाने शिष्टे** कथिते सति **क्रियते न क्रियते** ? इति चोक्ते परेण सति साधुरप्याह-सुष्ठु क्रियते, पर आह-यद्येवं **छगमुत्तकहण** त्ति **छगं** पुरीषं **मूत्रं** [२]प्रतीतम्, ताभ्यां विलिप्त आस्ते, एवं **कथिते** सति स साधुर्बहिर्भूमेरेव **पाणग** त्ति **पानकं** गृहीत्वा प्रविशति, प्रविष्टश्च **धुवण** त्ति तस्य **ग्लानस्य धावनं** करोति प्रक्षालनं विदधाति, उपधेश्च **अत्थुरण** त्ति **आस्तरणं** करोति, **तस्स** त्ति तदीयैरेव चीवरैः, अथ तस्यान्यानि न सन्ति ततः **नियगं व** त्ति **निजैरेव** चीवरैरास्तरणं करोतीति ॥७३॥

तथा चाह –

**११३ [३]सारवण साहल्लय पागडधुवणे सुईसमायारा ।**
**[४]अइबिंभले समाही सहुस्स आसास पडियरणा ॥७४॥ नि०**

**सारवण** गाहा । **सारवणं** निष्क्रियकरणं तस्मिन्निष्क्रिये ग्लाने कृते सति, अथवा **सारवणे** त्ति संमार्जिते प्रतिश्रये ग्लानसम्बन्धिनि सति परः पृच्छति-तवायं केन सम्बन्धेन सम्बद्ध इति, साधु-★**कत्थइ कहिं चि जाता,** एवमादि, ततः पर आह-[५]**साहल्लय** त्ति अहो ! **सफलता** धर्मस्य, यददृष्टेऽपि परमबन्धाविव क्रिया क्रियते, **पायडधुवणे** त्ति **प्रकटं** ग्लानस्योपधेर्वा क्षालनं कर्त्तव्यम्, प्रकटप्रक्षालने च लोक एवमाह- **शुचिसमाचारा** एते श्रमणा इति । अथासौ ग्लानो**ऽतिविह्वलः** स्याद्-अतीव दुःखेन करालितः स्यात्ततः **समाहि** त्ति यथाप्रार्थितं भोजनादि दातव्यं येन स्वस्थचित्तो भवति, स्वस्थीभूतश्चाभिधीयते-यथाकालं कुरुष्वेति । अथासौ **सहः** समर्थस्ततश्चा**श्वास्यते** न भेतव्यमहं अहं त्वां प्रतिजागरामीति ॥७४॥

ततश्च –

**११४ सयमेव दिट्ठपाढी करेइ पुच्छइ अयाणओ विज्जं ।**
**दीवण दव्वाइंमि य [६]उवएसे ड्डाइ लंभो जा ॥७५॥ नि०**

**सयमेव** गाहा । यद्यसौ साधु**र्दृष्टपाठी** दृष्ट उपलब्धः पाठ**श्चरकसुश्रुता**दिर्येन स

---

१. ततश्चैवमे० क.ल. २. कायिकी दा. ३. सारवणे पा.सं.त. । ४. अइबिम्हले पा.य. ५. साहल्लय त्ति सफलता दा. ६. उवएसो जाव लंभो उ-दा. उवएसे जाव लंभो उ, संपा०

★ कत्थ वि कहिं पि जातया णज्ञमाणा अणज्जमाणया ।
जिणसासणं पवण्णया होंति बंधु एक्कमेक्कस्स ॥३०७॥ ओ.बृ.भा.

दृष्टपाठी, अथवा **दिट्ठ**[1] त्ति वैद्यवद्दृष्टक्रियः क्रियाकुशलः, **पाठी**ति सकलं **बाहडा**दि पठति स एवंविधः स्वयमेव क्रियां **करोति** । अथासौ दृष्टपाठी न भवति ततः **पृच्छत्यज्ञः** सन् **वैद्यम्, दीवण** त्ति वैद्यशालां गतः प्रकाशयति, यदुताहं कारणेनैककः सञ्जातः, अतो निमित्तं न ग्राह्यम् । **दव्वादिमि य** त्ति **द्रव्यादिचतुष्टयोपदेशे** सति तत्र द्रव्यतः प्रासुकमप्रासुकं वा, क्षेत्रतः क्रीतकडा अक्रीतकडा वा वसही, कालतः प्रथमपौरुष्यामुपदिष्टं तस्यां च यदा प्रासुकं न लभ्यते तदाऽप्रासुकमपि क्रियते, भावतः [७४]समाधिः कर्त्तव्यः प्रासुकाप्रासुकैरिति ॥७५॥

**११५ कारणिय हट्ठ पेसे गमणऽणुलोमेण तेण सह गच्छे ।**
**निक्कारणिय खरंटण बिइज्ज संघाडए गमणं ॥७६॥ नि०**

**कारणिय** गाहा । एवमसौ ग्लानो यदि **कारणिको** भवति, ततः **हट्ठ** त्ति दृढीभूतः **पेसे** त्ति प्रेषणीयः । अथ ग्लानस्याप्यनुकूलमेव गन्तव्यं भवति, ततः **गमणऽणुलोमेण** हेतुना **तेन** ग्लानेन **सह गच्छेत्**, उक्तः साम्भोगिको ग्लान एकः कारणिकः, असाम्भोगिकग्लानकारणिकैककोऽप्येवमेव दृष्टव्य इति । अथ निष्कारणिक एको ग्लान इति ततः **निक्कारणिय खरंटण** त्ति **निष्कारणिकस्य** ग्लानस्य **खरण्टणा** प्रवचनोपदेशपूर्वकं परुषभणनमिति । खरण्टितश्च **द्वितीय** आत्मनः क्रियत इति । ततश्चैवं **सङ्घाटके** सति **गमणं** ति **गमनं** कर्त्तव्यमिति । साम्भोगिका-साम्भोगिकसंयत एकानेककारणिकनिष्कारणिकयतनोक्ता ॥७६॥

इदानीं साम्भोगिकासाम्भोगिकसंयतीनामेकानेककारणिकीनिष्कारणिक्यादीनां यतना प्रतिपाद्यते । अथ विधिपृच्छया पृष्टे सति तत्र संयत्यः स्युः, ततः को विधिः ? इत्याह –

**११६ समणिपवेसि निसीहिय दुवारवज्जण अदिट्ठपरिकहणं ।**
**थेरीतरुणिविभासा निमंतणाबाहपुच्छा य ॥७७॥ नि०**

**समणि** गाहा । **श्रमणी**प्रतिश्रय**प्रवेशे** सति बहिःस्थितेनैव **नैषेधिकी** कर्त्तव्या वारत्रयं-द्वारे मध्ये प्रवेशे च । प्रविष्टश्च तथा **दुवारवज्जण** त्ति **द्वारं** प्रतिहृत्यैकस्मिन्

---

७४. समाधिः – दः कः-दासंज्ञकाद्धातोर्यः किः प्रत्ययो विहितस्तदन्तं नाम पुल्लिङ्ग भवेत् । इति लिङ्गानुशासनवचनात् समाधिशब्दः पुल्लिङ्गे वर्तते । संटी.

१. वैद्यदृष्टक्रियः क्रियायां कुशलः क.

प्रदेशे तिष्ठति । अथ नैषेधिकायां कृतायामपि स्वाध्यायव्यापृताभिर्न **दृष्टस्ततः परिकथनं** कर्त्तव्यम्-साधुरागत इति । ततः परिकथिते सति साध्वीभिर्निर्गन्तव्यम् । तत्र को विधिः ? **थेरीतरुणिविभास** त्ति याऽसौ प्रवर्त्तिनी सा कदाचि**त्स्थविरा** भवति कदाचिच्च **तरुणी**ति अतो **विभाषा** विकल्पना, तत्र यदि स्थविरा निर्गच्छति तत आत्मद्वितीयाऽऽत्मतृतीया वा । अथ तरुणी ततः स्थविराभिस्तिसृभिश्चतसृभिर्वा सह निर्गच्छति, ततस्तास्तमासनेन **निमन्त्रयन्ति**, उपविशेति, सोऽप्युपविश्य **पृच्छति**-न काचिद् भवतीना**माबाधे**ति ॥७७॥

**११७ सिट्ठंमि सहू पडिणीयनिग्गहं अहव अण्णहिं पेसे ।**
**उवएसो दावणया गेलन्ने विज्जपुच्छा य ॥७८॥ नि०**

**सिट्ठंमि** गाहा । ततस्ताः कथयन्ति अस्त्याबाधा इति, एवं **शिष्टे** कथिते सति यद्यसौ **सहूः** समर्थस्ततः **प्रत्यनीकनिग्रहं** करोति । अथ निग्रहसमर्थो न भवति ततो**ऽन्यत्र प्रेषयति,** अथ तत्र काचिद् ग्लाना तत **उपदेशं** ददाति, एवमेतदौषधादि दातव्यमस्याः । अथ तास्तत्र न लभन्ते ततः **दावण** त्ति असावेव **दापयति, ग्लानत्वे** सत्ययं विधिः । अथासौ स्वयं न जानाति औषधादि दातुं ततो **वैद्यं पृच्छति** ॥७८॥

**११८ तह चेव दीवण चउक्कएण अन्नत्थवसहि जा पढमा ।**
**तह चेवेगाणीए आगाढे चिलिमिणी नवरं ॥७९॥ नि०**

**तह चेव** गाहा। कथं वैद्यं पृच्छति ? **तथैव** प्राग्वत् (नि.७१) **दीवण** त्ति प्रकाशनं कारणिकोऽहमेकाकी नापशकुनधिया ग्राह्यः । **चउक्कएण** त्ति वैद्येन द्रव्यादि**चतुष्के** उपदिष्टे सति यतना पूर्ववत्कर्त्तव्या । [१]**अण्णत्थवसहि** त्ति **अन्यवसति**व्यवस्थितेन प्रतिजागरणं कर्त्तव्यम् । कियन्तं कालं यावदत आह- **जा पढमा यावत्प्रथमालिका**ऽऽनयनक्षमा संवृत्तेति ततो गच्छति । एवं तावद् बहूनां मध्य एकस्या ग्लानविधिरुक्तः । इदानीमेकाकिन्या ग्लानविधिमतिदिशन्नाह- **तह चेवेगाणीए तथैव** प्राग्व**देकाकिन्या** ग्लानायाः प्रतिचरणविधिः, एतावांस्तु विशेषः- यदुता**गाढे**ऽतीवापटुतायामेकस्मिन्नुपाश्रये **चिलिमिणी** त्ति यवनिकाव्यवधानं कृत्वा **नवरं** केवलं प्रतिचरणमसौ करोति ॥७९॥

---

१. अण्णवसहि त्ति- क. ल.

**११९ निक्कारणियं चमढण कारणियं नेइ अहव अप्पाहे ।**
**गमणित्थिमीससंबंधिवज्जिए असइ एगागी ॥८०॥ नि०**

**निक्कारणिय** गाहा । यदि **निष्कारणिका**ऽसौ भवति ततः **चमढण** त्ति प्रवचनोक्तैर्वचोभिः खिसति। अथासौ **कारणिका** ततस्तां स्वयमेव **नयति** । **अहव अप्पाहे** त्ति **अथवा** तद्गुरोस्तत्प्रवर्त्तिन्या वा एवं संदिशति–यथैतामात्मसकाशे कुरुत। स्वयं च नयतः को विधिरत आह- **गमणित्थिमीससंबंधिवज्जिए असइ एगागी** "[A]गमणं कायव्वं इत्थीहिं सह, ताओ वि जह संबंधिणीओ होंति, तदभावे मीसेहिं इत्थीपुरिसेहिं संबंधीहिं सह गन्तव्वं, तदभावे असंबंधिणीहिं इत्थीहिं, तदभावे पुरिसित्थिमीसेणं असंबंधिएणं, तदभावे संबंधिपुरिसेहिं, तदभावे असंबंधि-पुरिसेहिं, तदभावे इत्थिमीससंबंधिवज्जिते असति अन्नस्स उवायस्स एगागिणिं णेति" ॥८०॥

इदानीं चतुर्विधामप्युक्तयतनामुपसञ्जिहीर्षुराह –

**१२० एगबहूसमणुण्णाण वसहीए जो य एग अमणुन्नो ।**
**अमणुन्न संजईण य अण्णहि एक्कं चिलिमिणीए ॥८१॥ नि०**

**एगबहू** गाहा । एतदुक्तं भवति-"[B]**एगो समणुन्नो जे अ बहू समणुन्ना जो अ एगो अमणुन्नो** एयाणं एगाए चेव **वसहीए** पडियरणं कायव्वं । **अमणुण्ण** त्ति जे अ बहू अमणुन्ना संजया तेसिं ण एकाए वसहीए ठितेहिं पडियरणं कायव्वं । संजईण य त्ति **संजईण य** संभोइयाणं अण्णसंभोइयाण य बहूणं **अन्नहिं** ति **अण्णाए** वसहीए ठिओ पडियरइ" । **एक्कं** ति **एकां** पुनर्ग्लानामाश्रित्य **चिलिमिणीए** यवनिकाव्यवधानं कृत्वैकस्यामेव वसतौ प्रतिजागरणं करोति । द्रव्यादियतना च सर्वत्रानुगता द्रष्टव्या। "एहिअपारत्तगुणा दोण्णि अ पुच्छा दुवे अ साहम्मीत्यादि (नि.६३) प्रतिद्वारगाथा व्याख्याता, तद्व्याख्यानाच्च व्याख्यातं पढमगिलाणदुवारं ॥८१॥

A. स्त्रीभिः सह गमनं कर्तव्यम्, ता अपि यथा सम्बन्धिन्यो भवन्ति, तदभावे मिश्रैः स्त्रीपुरुषैः सम्बन्धिभिः सह गन्तव्यम्, तदभावेऽसम्बन्धिभिः स्त्रीभिः, तदभावे पुरुषस्त्रीमिश्रेणासम्बन्धिकेन, तदभावे सम्बन्धिपुरुषैः, तदभावेऽसम्बन्धिपुरुषैः, तदभावे स्त्रीमिश्रसम्बन्धिवर्जितेऽसत्यन्यस्योपायस्य एकाकिनीं नयति ।

B. एकः समनोज्ञो ये च बहवः समनोज्ञाः, यश्चैकोऽमनोज्ञः, एतेषामेकस्यामेव वसत्यां प्रतिचरणं कर्तव्यम् । अमनोज्ञ इति ये च बहवोऽमनोज्ञाः संयतास्तेषांनैकस्यां वसत्यां स्थितैः प्रतिचरणं कर्तव्यम् । संयतीनां चेति-संयतीनां च साम्भोगिकानामन्यसाम्भोगिकानां च बहूनां अन्याभिरिति अन्यस्यां वसत्यां स्थितः प्रतिचरति ।

अथ द्वितीयग्लानद्वारप्रतिपादनायाह —

**१२१ विहिपुच्छाए पवेसो सण्णिकुले[1] चेइय पुच्छ साहम्मी ।**
**अन्नत्थ अत्थि इह ते गिलाणकज्जे अहिवडंति ॥८२॥ नि०**

**विहि** गाहा । एवं तस्य व्रजतः पूर्ववद्**विधिपृच्छायां** (नि.२१) सत्यां परेणाख्यातम्,-यदुतास्ति श्रावकस्ततः **पवेसो** त्ति **प्रवेशं** करोति, क्व ? **सण्णिकुले चेइय** त्ति यदि तस्मिन् **सञ्ज्ञिकुले चैत्यानि** सन्ति ततस्तद्वन्दनां करोति । ततः **पुच्छ** त्ति **पृच्छति** तान् श्रावकान्-शोभना यूयं शीलव्रतैः ? अहवा **पुच्छा साहम्मिअ** त्ति स साधुस्तत्र प्रविष्टः **पृच्छति**-किमिह **साधर्मिकाः** सन्ति उत न ? तत्राह श्रावकः-'**अन्नत्थ अत्थि**' **अन्यत्र** आसन्नग्रामे विद्यन्ते, **ते चेह ग्लानकार्ये** ग्लाननिमित्तं **अहिवडंति** आगच्छन्ति प्रायोग्यभक्तादिग्रहणार्थमिति। ततश्च स साधुस्तस्माद् व्रजति, व्रजन्तं च तं साधुं भोजनादिना निमन्त्रयति[2] श्रावकः-भगवन् ! प्रथमालिकामादाय व्रज ॥८२॥

एवञ्चाभिहितः सन् किं करोतीत्याह —

**१२२ सव्वं पि न घित्तव्वं निमंतणे जं तहिं गिलाणस्स ।**
**कारणि तस्स य तुज्झ य विउलं दव्वं तु पाउग्गं ॥८३॥ नि०**

**सव्वं पि** गाहा । **सर्वमशेषं** प्रायोग्यमप्रायोग्यं वा **न ग्राह्यं** श्रावक**निमन्त्रणे** सति, **जं तहिं गिलाणस्स** त्ति **यस्मात्तत्र ग्लानस्य** गृह्यतेऽतो न ग्राह्यम्, ततः श्रावकः पुनरप्याह-**कारणि तस्स य तुज्झ य विउलं दव्वं तु पाउग्गं** ति, **तस्य** ग्लानस्य **कारणे** ग्लाननिमित्तं **तव च कारणे** तव निमित्तं **विपुलं** प्रभूतं **द्रव्यं** शाल्योदनादि **प्रायोग्यम**स्त्यतो गृह्यतामिति ॥८३॥

ततश्चासौ श्रावकानुरोधेन गृहीत्वा व्रजति, क्व ? —

**१२३ जाएँ दिसाएँ गिलाणो ताएँ दिसाए उ होइ पडियरणा ।**
**पुव्वभणियं गिलाणे पंचण्ह वि होइ जयणाए ॥८४॥ नि०**

**जाए दिसाए** गाहा । **यया दिशा ग्लान**स्तिष्ठति **तया दिशा पडिअरण** त्ति प्रतिपालनां करोति साधूनाम्, अथवा **पडिअरण** त्ति निरूवणं आलोचनं तस्य

---

१. चेइयसन्नीकुलपुच्छसाहम्मी हे. पा. सं. त. द. य. २. आमन्त्रयति दा.

श्रावकदानस्य करोति । तच्च परीक्षणं ग्लानपरिचारकसाधुदर्शने सति भवति, उक्तम्-यया दिशा ग्लानस्तया दिशा पडिअरण त्ति **पुव्वभणिअं गिलाणे** त्ति **पूर्वभणितो ग्लान**विषयो विधिर्द्रष्टव्यः साम्भोगिकाऽसाम्भोगिकस्य ग्लानस्य । किमस्यैव प्रतिचरणं कर्त्तव्यम्? नेत्याह—**पंचण्ह वि होति जयणाए पञ्चानाम**पि पासत्थोसण्णकुसील-संसत्तणितिआणं **यतनया** प्रासुकेनान्नपानेन कर्त्तव्यं प्रतिजागरणमिति, **अपि**शब्दान्निह्नवका देवकुलप्रतिपालकाश्च गृह्यन्ते ॥८४॥

इयं निर्युक्तिगाथा, एतां च भाष्यकृद्व्याख्यानयन्नाह —

**१२४ तेसि पडिच्छण पुच्छण सुट्ठु कयं अत्थि नत्थि वा लंभो ।**
**खग्गूडे विलओलण दाणमणिच्छे तहिं नयणं ॥३५॥ निभा०**

**तेसि** गाहा । **तेसि पडिच्छण** त्ति **तेषां** ग्लानप्रतिजागरकसाधूनां प्रतिपालनां करोति, यया दिशा ते साधव आगच्छन्ति । **पुच्छण** त्ति ततस्तान् साधून् दृष्ट्वा **पृच्छति**-एतन्ममामुकेन श्रावकेण दत्तं यदि ग्लानप्रायोग्यं ततो गृह्यतामिति । एवमुक्ते तेऽप्याहुः **सुट्ठु कयं अत्थि** त्ति **सुष्ठु कृतं** श्रावकेण, **अस्ति** ग्लानप्रायोग्यं तत्रान्यदपि त्वमेवेदं गृहाण । **नत्थि व** त्ति अथवा एवं भणन्ति-**नास्ति** तत्रेदं द्रव्यं किन्त्वन्यत्र **लाभो** भविष्यति, त्वमेव गृहाणेदम् । अथ ते **खग्गूड** त्ति निर्धर्मप्रायाः[1] सन्त एवमाहुः-**विलओलण** त्ति धाडिरेव निपतिता, ततः स साधुस्तद्द्रव्यं सकलं ददाति समर्पयति, तेऽपि च रुषा **नेच्छन्ति** ग्रहीतुम्, ततश्चासौ **नयणं** ति ग्लानसमीपे तस्य द्रव्यस्य **नयनं** करोति ॥३५॥

इदानीं यद्यसौ समर्थस्ततश्च गच्छत्येव अथासमर्थस्ततः —

**१२५ पंतं असहू करित्ता निवेयणं गहण अहव समणुन्नो ।**
**खग्गूड देहि तं चिअ कमढग तस्सऽप्पणो पाए ॥३६॥ निभा०**

**पंतं** गाहा । **प्रान्तं** नीरसप्रायं **असहू** असमर्थः क्षुत्पीडितः **करित्ता** अभ्यवहृत्य व्रजति । ततश्च तत्र प्राप्तः सन् **निवेदनं** करोत्याचार्याय, सोऽप्याचार्यो ग्लानार्थं **ग्रहणं** करोति तस्य द्रव्यस्य । **अथवा समणुन्न** त्ति तस्यैव साधोरनुज्ञां करोति, यदुत—भक्षयेदम्, ग्लानस्यान्यद्भविष्यति । अथासावाचार्यः **खग्गूडो** शठप्रायो भवेत्तत

---

१. ०प्रायास्तत ए० क

इदं वक्ति-**देहि तं चिअ** त्वमेव ग्लानाय प्रयच्छ, किं ममानेन ? एवं चोक्तस्तेनाचार्येण गत्वा ग्लानसमीपं **कमढग तस्स** त्ति तदीयके **कमढके** ददाति, अथ **तस्य** तन्नास्ति ततः **अप्पणो पाए** त्ति आत्मीय एव **पात्रे** ददाति ॥३६॥

ततश्च पुनरप्याचार्यसमीपं व्रजति, गत्वेदं ब्रवीति –

**१२६ किं कीरउ ? जं जाणसि अतरंतो सढे त्ति वच्च तं भंते ! ।**
**निद्धम्मा न करेंती करणमणालोइय सहाओ ॥३७॥ निभा०**

**किं कीरउ** इत्यादि । हे आचार्य ! ग्लानस्य **किमन्यत्क्रियते** ? आचार्योऽप्याह-**जं जाणसि** त्ति **यज्जानासि** तदेव कुरु, पुनश्चासौ ग्लानसमीपं गच्छति । **अतरंतो** त्ति ग्लानोऽपि वक्ति-भगवन् ! **शठा** एते त्वां खलीकुर्वन्ति, **व्रज भदन्त** ! अस्ति मे परिचारकाः, एवं चोक्ते व्रजति । **निद्धम्मा न करेंती** अथासौ ग्लान एवमाह-यदुतैते **निर्द्धर्मा** मम **न** [1]परिचेष्टां **कुर्वन्ति,** ततश्चासौ साधुः **करणं** ति वैयावृत्यं करोति, पुनश्चासौ साधुस्तं ग्लानमेवं ब्रवीति-**अणालोइय** त्ति अमीषां निर्द्धर्माणां मध्ये**ऽनालोचिताप्रतिक्रान्तः** कथञ्चिदेव त्वं [2]नष्टो मृत इति । अत एवमभिधाय तमात्म**सहायं** कृत्वा प्रयाति ॥३७॥

यदा तु पुनः –

**१२७ उभओ निद्धम्मेसुं फासुपडोआर इयरपडिसेहो ।**
**परिमियदाण विसज्जण सच्छंदोद्धंसणा गमणं ॥३८॥ निभा०**

**उभयो** गाहा । **उभओ निद्धम्मेसुं** ति यदा ग्लानः शेषसाधवश्च **निर्द्धर्म्मा**स्तदा कथं परिचरणां करोतीत्याह-**फासुपडोआर प्रासुकेना**न्नपानेन परिपालनं करोति, **इतर** इति अप्रासुकं तस्य **निषेधः**, तेन क्रियां न करोतीत्यर्थः । **परिमिअदाण** त्ति **परिमितं** स्वल्पं भक्तं **ददाति** येनासौ निर्विण्णः प्रेषयति, ततः **विसज्जण** त्ति निर्विण्णः सन् **विसर्जयति,** गच्छंश्च स साधुः **सच्छंदोद्धंसण** त्ति **सच्छन्द**स्त्वमित्येवं **उद्धंसणां** उद्धूलनामाक्रोशं करोति, ततो **गमणं** ति **गच्छति** । परियरणा वक्खाणिआ पुव्वभणिअं गिलाणे त्ति (नि.८४) एतदपि व्याख्यातम् ॥३८॥

अथ 'पंचण्ह वि होति जयणाए'त्ति (नि.८४) एतत्पदं व्याचिख्यासुराह –

---

१. पर्याप्तं क. २. न मृत क.ल.

**१२८ एस [1]गमो पंचण्ह वि नितिआदीणं गिलाणपडियरणे ।**
**फासुअकरण निकायण कहण पडिक्कमणागमणं ॥३९॥ निभा०**

**एष** गाहा । **एष गम** एष परिचरणविधिः **'पंचण्ह वि' पञ्चानामपि**, केषामत आह-**नितिआईणं आदिशब्दात्** पासत्थोसण्णकुसीलसंसत्ताणं[2] **गिलाणपडियरणे** त्ति **ग्लानप्रतिचरणे** एष विधिः । **फासुअकरण** त्ति यदुत-प्रासुकेन [3]भक्तपानादिना परिचरणं कार्यम्, **निकायण** त्ति **निकाचनं** करोति, यदुत दृढीभूतेन त्वया यदहं ब्रवीमि तत्कर्त्तव्यम् । **कहण** त्ति धर्म**कथायाः**, यद्वा **कहण** त्ति लोकस्य **कथयति**-किमस्य प्रव्रजितस्य शक्यतेऽशुद्धेन कर्त्तुम् ? **पडिक्कमण** त्ति यद्यसौ ग्लानः **प्रतिक्रामति** तस्मात्स्थानात् निवर्त्तत इति यावत्तत् स्थानात् । **गमणं** ति तं ग्लानं गृहीत्वा **गमनं** करोति ॥३९॥

अथ यदुक्तं 'पंचण्ह वि होति जयणाए' त्ति (नि.८४)अत्रापिशब्द आस्ते तदर्थमादर्शयन्नाह –

**१२९ संभावणेऽविसद्दो देउलिय खरंट जयण उवएसो ।**
**अविसेस निण्हगाण वि न एस अम्हं तओ गमणं ॥४०॥ निभा०**

**संभावणे** गाहा । **संभावनेऽपिशब्दः**, किं संभावयति ? **देउलिअ** त्ति **देवकुलपरिपालका** वेषमात्रधारिणस्तेऽपि ग्लानाः सन्तः परिचरणीयाः । **खरंटण** त्ति तेषां देवकुलिकानां खिंसनां करोति, यदुत धर्म उद्यमं कुरुत। **जयण** त्ति **यतनया** कर्तव्यं यथा संयमलाञ्छना[4] न स्यात् । **उवएसो** त्ति **उपदेशं** वा क्रियाविषयं ददाति । [5]**अविसेस** त्ति, **न** यस्मिन् विषये साधुनिह्नवक**विशेषो** ज्ञायते तस्मिन् **'निण्हगाण पि' निह्नवकानामपि यतनया** परिचरणं करोति । अथ निह्नवकग्लान एवं ब्रूयात्-**न एस अम्हं** ति योऽयं प्राघूर्णक आयातो **नैषोऽस्मत्**सजातीय इति। **ततो गमनं** करोति स साधुरिति ॥४०॥

अथासौ निह्नवकादिरेवमभिदध्यात् –

**१३० तारेहि जयणकरणं अमुगं आणेहऽकप्प जणपुरओ ।**
**नवि एरिसगा समणा [6]जणणाए तओ अवक्कमणं ॥४१॥ निभा०**

---

१. कमो ह० हे० २. संसत्ताण ल. संसत्ता गि० क. ३. भक्तादिना दा० ४. लञ्छना क० ५. अविसेसि त्ति ल० ६. जयणाए आ०

**तारेहि** गाहा । भगवंस्**तारय** मामस्मान्मान्द्यात् ततः **जयणकरणं** ति **यतनया** प्रतिचरणं करोति । अथासौ ग्लान एवं ब्रूयात्**–अमुकं आणेह** त्ति **अमुकं** बीजपूरकादि **आनय,** तत एवं वक्तव्यं**–अकप्प जणपुरओ** त्ति **अकल्पनीयमे**तदित्येवं [1]**जनस्य पुरतः** प्रख्यापयति । एतच्च स साधुर्वक्ति-**नवि एरिसगा समणा । न चेदृशाः श्रमणाः । जणणाए** त्ति एवं **जनेन** लोकेन तयोर्भेदे **ज्ञाते** सति **ततोऽसावपक्रामति** गच्छति तस्मात्स्थानात् ॥४१॥

एवं प्रतिपादिते विधौ चोदक आह –

**१३१ चोअगवयणं आणा आयरिआणं तु फेडिआ तेणं ।**
**साहम्मिअकज्ज[2]पभूअयाए य सुचिरेण वि न गच्छे ॥४२॥ निभा०**

**चोदकवयणं** गाहा । चोदकस्य वचनं **चोदकवचनम्,** किं तदित्याह-**आज्ञा आचार्याणां** सम्बन्धिनी **फेडिता**ऽपनीता विनाशिता **तेन** यतः **साधर्मिककार्य-प्रभूततया सुचिरेणापि न गच्छेत्**-न यायाद्विवक्षितं स्थानमिति ॥४२॥

अत आचार्य आह –

**१३२ तित्थगराणा चोयग ! दिट्ठंतो भोइएण [3]नरवइणा ।**
**जत्तुग्गय भोइअदंडिए य घरदारु पुव्वकए ॥४३॥ निभा०**

**तित्थगर** गाहा । **तीर्थकराणामियमाज्ञा** हे **चोदक** ! – यदुत ग्लानप्रतिजागरणं कर्तव्यम्, "**जो गिलाणं**" इत्यादिवचनात् । अत्र दृष्टान्तो ग्रामभोगिकनरपतिसम्बन्धी । "[A]जहा कोइ राया सो जत्ताए उज्जुत्तो, तेण य आणत्तं, अमुकगामे पयाणयं दिस्सामि [4]तत्थावासं करेह त्ति । ताहे गतो गोहो, जस्स वि भोइअस्स सो गामो तेण वि भणिअं-मम वि करेह घरं ति । ताहे गामिल्लिया चिंतेंति-राया एगदिवसं संवसहि

---

A. यथा कश्चिद् राजा स यात्रयोद्युक्तः, तेन चाऽऽज्ञापितम्, अमुकग्रामे प्रयाणकं करिष्यामि । तत्राऽऽवासं कुर्विति। तदा गतो गोधः, यस्यापि भोगिकस्य स ग्रामस्तेनापि भणितम्- ममापि कुरु गृहमिति। तदा ग्रामीणाश्चिन्तयन्ति- राजा एकदिवसं वसिष्यतीति, ततः किं राज्ञः सचित्रकर्मोज्वलसुंदरगृहेण ? एवं तैराज्ञः कायमाणं कृतम्, भोगिकस्य तु रम्यं चतुर्शालं निर्मापितम् । राजा आगतः, पश्यति कृतवन्दनमालादिशोभितं भोगिकगृहं चतुर्शालम्, तत आहूय प्रधावितः । ततस्तैर्भणितम्-भगवान् ! न एष तवाऽऽवासः, अयं तवेति, ततः कस्यैषः ? भोगिकस्य, ततो राज्ञा रुष्टेन भोगिकस्य ग्रामो हृतः, ग्रामोऽपि दण्डितः । अत्रापि यथा भोगिकस्तथाऽऽचार्याः, यथा नरपतिस्तथा तीर्थकराः, यथा कुटुम्बी तथा साधुः ।

१. जनपुरतः क. २. बहुत्तया आ० ३. नरवइणो पा.सं. ४. वासे क० ल०

त्ति, ता किं रण्णो [1]सचित्तकम्मोज्जलसुन्दरगृहेण ? एवं तेहि रण्णो कायमाणं कयं, भोइअस्स उ रम्मं चाउस्सालं निम्मविअं । राया आगतो, पिच्छति कयवंदणमालादि-सोभिअं भोइयगिहं चाउस्सालं, ततो आहुत्तो पहावितो। ततो तेहिं [2]भणियं-भगवं! न एस तुम्हावासो, इमो तुज्झं ति, तो कस्स एसो ? भोइयस्स। ततो रण्णा रुट्ठेण भोइयस्स गामो हडो, गामो वि दंडिओ। एत्थ वि जहा भोइओ तहा [3]आयरिया, जहा नरवई तहा [4]तित्थयरा, जहा कुडुंबी तहा साहू"। अमुमेवार्थमाह-**दृष्टान्तो ग्रामभोगिकनरपतिना यात्रोद्गतभोगिकदण्डिनोर्गृहदारुणा पूर्वकृतेन** पूर्वसञ्चितेन यत्कृतं गृहमिति ॥४३॥

**१३३ रण्णो तणघरकरणं सचित्तकम्मं च गामसामिस्स ।**
**दोण्हं पि दंडकरणं विवरीयऽण्णेणुवणओ उ ॥४४॥ निभा०**

**रण्णो** गाहा । **राज्ञस्तृणगृहं कृतं सचित्रकर्म च ग्रामस्वामिनः । द्वयोरपि** ग्रामेयकग्रामस्वामिनो**र्दण्डकरणं-दण्डः कृतः** । एवं तीर्थकराज्ञाऽतिक्रमे[5] द्वयोरप्याचार्यसाध्वोः संसारदण्ड इति । **विवरीयऽण्णेणुवणओ उ** त्ति उक्ताद्योऽन्यः स विपरीतस्तेन **विपरीतेनान्येना**ख्यानके**नोपनयः** कर्त्तव्यः । "[A]अण्णेहिं गामिल्लएहिं चिंतिअं-एतंभोइयस्स सुन्दरतरं कतिल्लयं घरं, एवं चेव नरवइस्स होउ । गए णरवइंमि भोइयस्स चेव होहिति त्ति, भोइयस्स वि तणकुडी कया । राया पत्तो, दट्ठुं भणति-कहं भो एगदिवसेणमिमं भवणं कयं? ते भणंति-अम्हेहिं एयं कयं, एयं दलियं भोइयस्स कए आणीयं, तेण तुम्ह घरं कयं, भोइयस्स वि तणकुडी कया । ताहे रण्णा तुट्ठेण सो[6] गामो अकरदाओ कओ, भोइओ वि संपूइओ, अन्नो अ से गामो दिण्णो । एवं तित्थयराणमाणं करिंतेणं आयरिआणं कया चेव आणा" ॥४४॥

---

A. अन्यैर्ग्रामीणकैश्चिन्तितम्-एतद् भोगिकस्य सुन्दरतरं क्रियमाणं गृहम्, एतदेव नरपतेर्भवतु । गते नरपतौ भोगिकस्यैव भविष्यतीति, भोगिकस्यापि तृणकुटी कृता । राजा प्राप्तो दृष्ट्वा भणति- कथं भो ! एकदिवसेनेदं भवनं कृतम् ? ते भणन्ति- अस्माभिरेतत् कृतम्, एतद् द्रव्यं भोगिकस्य कृते आनीतम्, तेन तव गृहं कृतम्, भोगिकस्यापि तृणकुटी कृता । तदा राज्ञा तुष्टेन स ग्रामोऽकरदः कृतः, भोगिकोऽपि संपूजितः, अन्यश्च तस्य ग्रामो दत्तः । एतं तीर्थकराणामाज्ञां कुर्वताऽऽचार्याणामाज्ञा कृतैव ।

१. सचित्रकर्मोज्वलसु० आ० २. भणितो क. ३. आयरिओ दा. ४. तित्थयरो आ.द. ५. ०क्रमेण क० ६. स गामे क०

अथ प्रथमोपनयोपदर्शनायाह –

**१३४ जह नरवइणो आणं अइक्कमंता पमायदोसेणं ।**
**पावंति बंधवहरोहछिज्जमरणावसाणाइं ॥४५॥ निभा०**

**१३५ तह जिणवराण आणं अइक्कमंता पमायदोसेणं ।**
**पावंति दुग्गइपहे विणिवायसहस्सकोडीओ ॥४६॥ निभा०**

**जह** गाहा । **यथा नरपतेराज्ञामतिक्रामन्तः प्रमाददोषेणा**ज्ञानदोषेण **प्राप्नुवन्ति बन्धो** निगडादिभिः, **वधः** कशादिताडनम्, **रोधो** गमनस्य व्याघातः, **छेदो** हस्तादेः, **मरणावसानानि** दुःखानि प्राप्नुवन्ति ॥४५॥

**तह** इत्यादि । **तथा जिनवराणामाज्ञामतिक्रामन्तः प्रमादो**ऽज्ञानं स एव **दोषस्तेन प्राप्नुवन्ति दुर्गतिपथे विनिपातानां** दुःखानां **सहस्रकोटिः** ॥४६॥

इदानीं द्वितीयोपनयोपदर्शनायाह –

**१३६ तित्थगरवयणकरणे आयरिआणं कयं पए होइ ।**
**कुज्जा गिलाणगस्स उ पढमालिअ जाव बहिगमणं ॥४७॥ निभा०**

**तित्थगर** गाहा । **तीर्थकर**सम्बन्धि**वचनकरणे** वचनानुष्ठाने **आचार्याणां कृतं पए** त्ति **प्रागेव** पूर्वमेव कृतं **भवति** । यस्मादेतदेवं तस्मात्**कुर्याद् ग्लानस्य** प्रतिजागरणं साधुः । कियन्तं कालम्[१] ? आह-**पढमालिअ जाव बहिगमणं** ति यावत्**प्रथमालिकामा**नेतुं समर्थो जातः, **यावच्च बहिर्गमन**क्षमो जात इति ॥४७॥

तथा च –

**१३७ जइ ता पासत्थोसण्णकुसीलनिण्हवगाणं[२] पि देसियं करणं ।**
**चरणकरणालसाणं सब्भावपरंमुहाणं च ॥४८॥ निभा०**

**जइ** गाहा । **यदि तावत्पार्श्वस्थावसन्नकुशीला**स्तेषाम्, तथा सद्भावस्तत्त्वं सम्यग्दर्शनं ततः पराङ्मुखाः, के ते ? **निह्नवकास्तेषाम्**[३], **चरणकरणालसानामत** एव **सद्भावपराङ्मुखानां** केषाम् ? सर्वेषामेव **पार्श्वस्थावसन्नकुशीलनिह्नवकानां** यदि तावत्**कर्त्तव्यं** प्रतिपादितं तत इतरेषां नितरामेव ॥४८॥

---

१. कालमत आह दा० २. निण्हगाणं पा.सं ३. अथवा दा.

एतदेवाह –

**१३८ किं पुण जयणाकरणुज्जयाण दंतिंदिआणं गुत्ताणं ।**
**संविग्गविहारीणं सव्वपयत्तेण कायव्वं ॥४९॥ निभा०**

**किं पुण** गाहा । **किं पुनः** किमुत **यतनाकरणे उद्यता** उद्युक्तास्**तेषां दान्तेन्द्रियाणां गुप्तानां** मनोवाक्कायगुप्तिभिः **संविग्नविहारिण** उद्यतविहारिणो मोक्षाभिलाषिण इत्यर्थः, एतेषां **सर्वप्रयत्नेन कार्यम्।** किं पुनः कारणमेतावन्ति विशेषणानि क्रियन्ते ? एकस्यैव युज्यमानत्वात्तत्र, तथाहि-यद्येतावदुच्यते-यतना-[१]करणोद्यतानामिति, ततः कदाचिन्निह्नवका अपि यतनाकरणोद्यताः स्युः, अत आह-दान्तेन्द्रियाणां गुप्तानां चेति । तेऽपि दान्तेन्द्रिया गुप्ताः कदाचिल्लाभादिनिमित्तं भवेयुरत उक्तम्-संविग्नविहारिणो ये तेषामवश्यं कर्त्तव्यमिति ॥४९॥

उक्तं ग्लानद्वारम्, अथ सञ्ज्ञिद्वारं सम्बन्धयन्नाह –

**१३९ एवं गेलन्नट्ठा वाघाओ अह इयाणि भिक्खट्ठा ।**
**वइयग्गामे संखडि सन्नी दाणे य भद्दे य ॥८५॥ नि० दारगाहा ।**

**एवं** गाहा । **एवं ग्लानार्थं व्याघातो** गमनप्रतिबन्धस्तस्य स्यात् । **अथे**त्यानन्तर्ये, **इदानीं भिक्षार्थं** गमनविघातो न कार्य इत्यध्याहारः । अथवाऽन्यथैवं तावद् ग्लानार्थं गमन**व्याघात** उक्तः, **इदानीं भिक्षार्थं** यथाऽसौ स्यात्तथोपदर्श्यते-**वइयग्गामे संखडि सन्नी दाणे य भद्दे य** त्ति, **व्रज** इति गोकुलम्, तस्मिन् भिक्षार्थं प्रविष्टस्य गमनविघातः स्यात्, **ग्रामः** प्रसिद्धः, **सङ्खडी** प्रकरणम्, **सञ्ज्ञी** श्रावकः, **दाणे** त्ति **दान**[२]**श्राद्धकः भद्दे य** त्ति **भद्रकः** साधूनाम्, **च**शब्दान्महानिनादकुलानि ॥८५॥

एतेषु प्रतिबध्यमानस्य यथा गमनविघातस्तथाह –

**१४० उव्वत्तणमप्पत्तं च पडिच्छे खीरगहण पहगमणे ।**
**वोसिरणे छक्काया धरणे मरणं दवविरोहो ॥८६॥ नि०**

**उव्वत्तण** गाहा । स हि अनुकूलं पन्थानमुत्सृज्य **उद्वर्त्तते** यतो व्रजस्ततो याति, व्रजे **च** प्राप्तः सन् **अप्राप्त**वेलां **प्रतीक्षते** प्रतिपालयति, ततश्च **खीरगहण** त्ति तत्र

---

१. कारणो० ल० २. श्रावकः क.ल.

**क्षीरग्रहणं** करोति, क्षीराभ्यवहारमित्यर्थः। **पहगमणे** त्ति पीते क्षीरे **पथि गमनं** करोति । पुनश्च तेनास्य भेदः कृतः । ततश्च **वोसिरणे** त्ति मुहुर्मुहुः पुरीषोत्सर्गं विदधाति, तत्र च **षट्कायविराधना**, तद्वेग**धरणे** च **मरणम्** । **दवविरोहो** त्ति **द्रवेण** काञ्जिकेन सह **विरोधो** भवति, साधोः प्रायस्तत्संव्यवहारात् । यद्वा **दवविरोह** त्ति **द्रवमु**दकं तेन निर्लेपनं करोति सागारिकपुरतः, अथ न करोत्युड्डाहः प्रवचनहीलना भवति, अथवा **द्रवविरोधो** विनाशः, यतस्तृषितः संस्तदेव पिबति । एवं व्रजे गच्छत आत्मविराधना संयमविराधना प्रवचनोपघातश्च स्यात्, गमनविघातश्च नितरां स्यात् ॥८६॥

उक्तं व्रजद्वारम्, अथ ग्रामद्वारम् –

**१४१ खद्धादाणिअगामे संखडि आइण्ण खद्ध गेलन्ने ।**
**सण्णी दाणे भद्दे अप्पत्तमहानिनादेसु ॥८७॥ नि०**

**खद्धा** गाहा । **खद्धादानिकग्रामः** समृद्धग्रामस्तस्मिन्नुद्वर्त्तनं करोति, अप्राप्तां वेलां च प्रतिपालयति, क्षीरग्रहणं करोति । तत्र च त एव दोषाः "वोसिरणे छक्काया धरणे मरणं दवविरोहो" । उक्तं ग्रामद्वारम् । अथ संखडिद्वारम् - तत्राह- **संखडि आइण्ण खद्ध गेलण्णे** त्ति **संखडी** प्रकरणं तदर्थमुद्वर्त्तते, अप्राप्तां च वेलां प्रतिपालयति । तत्र च **आइण्ण** त्ति **आकीर्णं** सम्बाधस्तत्र च **स्त्रीस्पर्शा**दिदोषाः, तथा **खद्ध गेलण्णे** त्ति **खद्धं** प्रभूतमुच्यते, ततश्च भूरिभक्षणे मान्द्यं स्यात्, त एव च दोषाः,वोसिरणे छक्काया धरणे मरणं दवविरोहो। उक्तं संखडिद्वारम्, अथ सञ्ज्ञिद्वारम्-**सन्नि** त्ति **संज्ञिनं** श्रुत्वोद्वर्त्तनं करोति, अप्राप्तां च वेलां प्रतिपालयति क्षीरादिग्रहणं करोति तत्र च त एव दोषा वोसिरणादयः । उक्तं सञ्ज्ञिद्वारम्, इदानीं दानश्राद्धकद्वारम्-तत्रापि उव्वत्तणमप्पत्तं च पडिच्छे त्ति पूर्ववत्, ततश्चासौ **दान**श्राद्धः प्रभृतं घृतादि ददाति, तत्रापि त एव दोषा वोसिरणादयः । उक्तं [1]दानश्राद्धकद्वारम्, अथ भद्रकद्वारम्-**भद्दग** त्ति कश्चित् [2]स्वभावत एव साधु**भद्रकः** स्यात् तत्समीपगमनार्थमुद्वर्त्तनं करोति, अप्राप्तां च वेलां प्रतिपालयति, ततश्चासौ लड्डुकादि-प्रदानं करोति, [3]त एव दोषाः । अथ महानिनादद्वारमाह-**अप्पत्तमहानिनाएसु** त्ति **महानिनादेषु** शब्दितेषु कुलेषु प्रख्यातेषु कुलेषूद्वर्त्तनं कृत्वा **अप्पत्त** त्ति **अप्राप्तां**

---

१. दानद्वारम् क. २. स्वरसतः क. ३. एवं त एव दा.

वेलां प्रतिपालयति, तेषु च स्निग्धमन्नं लभ्यते, त एव च तत्रापि दोषाः वोसिरणे छक्काया इत्यादयः ॥८७॥

उक्तं चशब्दाक्षिप्तं महानिनादकुलद्वारम्, तथाऽनुकूलात्स्वमार्गा[1]दननुकूलेषु व्यवस्थितेषु व्रजादिष्वप्राप्तां वेलां भक्तार्थं प्रतिपालयतो गमनविघातदोष उक्तः, इदानीमनुकूलमार्ग-व्यवस्थितेषु व्रजादिषु भक्तार्थं प्रविष्टस्य यथा गमनविघातो भवति तथा प्रतिपाद-यन्नाह –

**१४२ पडुच्छिखीर सतरं घयाइ तक्कस्स [2]गिण्हणे दीहं ।**
**गेहि विगिंचणियभया निसद्व सुवणे य परिहाणी ॥८८॥ नि०**

**पडुच्छि** गाहा । **पडुच्छिक्षीरं** पारिहट्टी क्षीरं तदन्विषन् शेषक्षीरं चागृण्हन् दीर्घां भिक्षाचर्यां करोति । तथा **सतरं** ति **सतरं** दध्यन्विषमाणस्तररहितं चागृण्हन् दीर्घां भिक्षाचर्यां करोति । **घृतादि** चान्विषन्, आदिशब्दान्नवनीतमोदकादि परिगृह्यते, तदन्विषन् दीर्घां तां करोति, **तक्रस्य** वा **ग्रहणे दीर्घां** तां करोति । इदानीं तत्क्षीरादि प्रचुरं लब्धं सत् **गेहि** त्ति **गृद्धः** सन् प्रचुरं भक्षयति, यद्वा **विगिंचणियभया निसद्व** त्ति **विगिञ्चनं** परित्यागस्त**द्भयान्निसद्वं** प्रचुरं भक्षयति, ततश्च प्रचुरभक्षणे **सुवणे य परिहाणी** प्रदोष एव स्वाध्यायमकृत्वैव स्वपिति, **सुप्तस्य च परिहाणि** सूत्रार्थविस्मरणमित्यर्थः, **च**शब्दात् 'अह जग्गति गेलन्नं । इत्येतद्वक्ष्यति तृतीयगाथायाम् (नि.९०) ॥८८॥

एवं तावदनुकूलमार्गव्यवस्थिते व्रजे भक्तार्थं प्रविशतो गमनप्रतिघात उक्तः, इदानीमनुकूलमार्गव्यवस्थिते ग्रामे भक्तार्थं प्रविष्टस्य यथा गमनविघातो भवति तथाह –

**१४३ गामे परितलिगाइमग्गणे संखडी छणे विरूवा ।**
**सण्णी दाणे भद्दे जेमणविगईगहण दीहं ॥८९॥ नि०**

**गामे** इत्यादि । **ग्राम** इति द्वारपरामर्शः, ग्रामे प्रविष्टः सन् **परितलिगादिमार्गणं** करोति, [3]परितलितं सुकुमालिकादि उच्यते, तदन्विषन् दीर्घां भिक्षाचर्यां करोति । उक्तमनुकूलग्रामद्वारम्, इदानीमनुकूलसंखडीद्वारमुच्यते-**संखडी छणे विरूव** त्ति **संखडी** प्रकरणम्, सा च **क्षण** उत्सवे **विविधरूपा** भवति, एतदुक्तं भवति-गृहे गृहे

---

१. मार्गादनुकूलेषु ली. २. ऽगिण्हणे ल० । ३. परितलितादि सु. ल. क.

घृतपूरादि लभ्यते, [1]तदर्थं च दीर्घां भिक्षाचर्यां करोति । उक्तमनुकूलसंखडीद्वारम्, इदानीमनुकूलपथव्यवस्थितसञ्ज्ञिद्वारमुच्यते-**सण्णि** त्ति **संज्ञिनः** श्रावका उच्यन्ते, तेषु मृष्टान्नार्थी दीर्घां भिक्षाचर्यां करोति । उक्तमनुकूलसञ्ज्ञिद्वारम्, इदानीमनुकूलदान-श्राद्धकद्वारमुच्यते-**दाणे** त्ति **दान**श्राद्धका उच्यन्ते, तेष्वनुकूलपथव्यवस्थितेषु प्रविष्टो मृष्टभोजनार्थी दीर्घां भिक्षाचर्यां करोति । उक्तं दानश्राद्धकद्वारम्, इदानीं भद्रकद्वारमुच्यते-**भद्दे** त्ति अनुकूलपथव्यवस्थितेषु **भद्रकेषु, जेमणविगईगहण दीहं** ति [2]**मृष्ट**-भोजन**विकृतिग्रहणार्थं दीर्घां** भिक्षाचर्यां करोतीति सर्वत्र योज्यमिति ॥८९॥

तत्र प्रागिदमुक्तम्-प्रचुरभक्षणात्स्वपतः सूत्रार्थपरिहानिर्भवति, अथ न स्वपिति ततः को दोष ? इत्यत आह –

**१४४ अह जग्गइ गेलन्नं [3]असंजयकरणे जीववाघाओ ।**

**इच्छमणिच्छे मरणं गुरुआणा छड्डुणे काया ॥९०॥ नि०**

**अह जग्गइ** इत्यादि । **अथ** स्निग्धे आहारे भक्षिते सति जागरणं करोति, सूत्रार्थपौरुषीं करोतीत्यर्थः । ततश्च को दोष? इत्यत आह-**'गेलन्नं' ग्लानत्वं** भवति, ग्लानत्वे सति तस्य साधोर्यद्यसंयतः प्रतिजागरणं करोति, इच्छति च ततः को दोष [4]इत्यत आह-**असंयतकरणे जीवव्याघातो** भवती**च्छतः**, अथ नेच्छति असंयतेन क्रियां क्रियमाणाम्,। ततः **अणिच्छे मरणं । अनिच्छतो मरणं** भवति, न केवलमयमेव दोषः, **गुरुआणा छड्डुणे काया-गुरोराज्ञा**लोपः कृतो भवति, मृतस्य च **छड्डुणे** परित्यागे गृहस्थाः **षट्काय**व्यापादनं कुर्वन्ति ॥९०॥

यदा [5]पुनस्तेषु व्रजादिषु तक्रौदनादिग्रहणं करोति तदा पूर्वोक्ता दोषाः परिहृता भवन्ति । एतदेव प्रतिपादयन्नाह –

**१४५ तक्कोयणाण गहणे गिलाण आणाइया जढा होंति ।**

**अप्पत्तं च पडिच्छे सोच्चा अहवा सयं नाउं ॥९१॥ नि०**

**तक्कोदण** इत्यादि । **तक्रौदनानां ग्रहणे** सति **ग्लानत्व**दोष **आज्ञाभङ्ग**दोषश्च, **आदि**शब्दात्पथि [७५]पलिमन्थ[6]दोषश्च, एते **जढा** इति **परित्यक्ता भवन्ति** । इदानीं

---

७५. पलिमन्थः-परिमन्थो गमनविघात इत्यर्थः । संटी.

१. तदर्थी च दा. २. मृष्टभोजने विगतिग्रहणार्थं भ. मृष्टभोजनार्थी दीर्घां ल. । ३. असंजयकरण दा. ४. तदा इत्यत० दा. ५. तु पुन० क.ल. ६. ०दोषाश्च क०

प्रतिषिद्धस्यापि कारणान्तरेणानुज्ञां दर्शयन्नाह-'**अप्पत्तं च पडिच्छे**' **अप्राप्तामपि** वेलां प्रतिपालयति, किमर्थम् ? वक्ष्यमाणान् दोषान् **श्रुत्वा** पथिकादेः सकाशात्, '**अहवा सयं नाउं**' **अथवा स्वयमेव ज्ञात्वा**, कान् ? दूरव्यवस्थितग्रामादिदोषान्, अप्राप्तामपि वेलां प्रतीक्षत इति ॥९१॥

इदानीं तानेव दोषान् प्रतिपादयन्नाह –

**१४६ दूरुट्ठिअ खुड्डलए नव भड अगणी अ पंत पडिणीए ।**
**अप्पत्तपडिच्छण पुच्छ बाहिं अंतो पविसियव्वं ॥९२॥ नि०**

**दुरुट्ठिय** इत्यादि । कदाचिदसौ ग्रामो [1]**दूरो** भवति ततोऽप्राप्तामपि वेलां प्रतिपालयति, **उट्ठिअ** त्ति कदाचिदसौ ग्राम **उत्थित** उद्वसितो भवति, कदाचिच्च **खुड्डलय** त्ति स्वल्पकुटीरकः, कदाचित् **नव** इति अभिनववासितो भवति, तत्र च पृथिवीकायः सचित्तो भवति, कदाचिच्च **भड** त्ति **भटाक्रान्तो**ऽसौ भवति, कदाचित् **अगणी** य त्ति **अग्निना** दग्धो भवति, कदाचिच्च **प्रान्तो** दरिद्रप्रायो भवति, कदाचिच्च **प्रत्यनीकाक्रान्तो** भवति, अत एभिः कारणैः **अप्पत्तपडिच्छण** त्ति **अप्राप्तामपि** वेलां प्रतिपालयति, तेन च साधुना सञ्ज्ञिकुलं प्रविशता विधिपृच्छा पूर्ववत्कर्त्तव्या । एतदेवाह-**पुच्छ** त्ति विधि**पृच्छा** पूर्ववत् । (नि.२१) **बाहि** त्ति चोदक एवमाह-**बहि**रेव स साधुस्तिष्ठतु यावत्सञ्ज्ञिकुले वेला भवतीति, आचार्यस्त्वाह-**अंतो पविसियव्वं** । इमं च गाथाऽवयवं भाष्यकारो व्याख्यानयिष्यतीति ॥९२॥

इदानीं तत्र संज्ञिकुलेषु प्रविष्टः साधुः कारणमाश्रित्य दीर्घामपि भिक्षाचर्यां यथा करोति तथा प्रतिपादयन्नाह–

**१४७ कक्खडखेत्तचुओ वा दुब्बल अद्धाण पविसमाणो वा ।**
**खीराइगहण दीहं बहुं च उवमा अयकडिल्ले ॥९३॥ नि०**

**कक्खड** इत्यादि । **कक्खड** रूक्षादिगुणसमन्वितं यत्**क्षेत्रं** तस्मा**च्च्युत** आयातः सन्, तथा **दुर्बलो** यदि भवति-वाय्वादिरोगाक्रान्तः, तथा पुरस्ताद्दीर्घ**मध्वानं प्रवेक्ष्यति** यदि, तत एभिः कारणैः **क्षीरादिग्रहण**निमित्तं **दीर्घां** भिक्षाचर्यां करोति, **बहुं च** क्षीरादि गृह्णाति येनासौ कार्यस्य समर्थो भवति । आह- [2]बहुभक्षणात्कथं विसूचिकादिदोषो

---

१. दूरे दा. २. प्रचुर क०

न भवति ? उच्यते-**उवमा अयकडिल्ले उपमो**पमानम् अयो [1] लोहं तन्मयं **यत्कडिल्लं**[76] तेन उपमा, एतदुक्तं भवति-यथा तप्तलोहकडिल्ले तोयादि क्षयमुपयाति, एवमस्मिन् साधौ रूक्षस्वभावे बह्वपि घृतादि क्षयं यातीति ॥९३॥

इदानीं य एव प्राग्व्यावर्णिता दोषास्तानेव कारणान्तरमुद्दिश्य गुणवत्तया स्थापयन्नाह –

**१४८ जे चेव पडिच्छणदीहखद्धसुवणेसु वण्णिआ दोसा ।**
**ते चेव सपडिवक्खा होंति इहं कारणज्जाए ॥९४॥ नि०**

**जे चेव** इत्यादि । **य एव दोषा पडिच्छणे** त्ति प्रतिपालने **दीह** त्ति **दीर्घायां** भिक्षाचर्यायां **खद्ध** त्ति प्रचुरभक्षणे **सुवण** त्ति **स्वापे,** एतेषु स्थानान्तरेषु **वर्णिताः** कथिता ये दोषा**स्त एव सप्रतिपक्षाः** सविपर्यया गुणा इत्यर्थः, **भवन्ति, इहा**स्मिन् **कारणजाते** कारणमाश्रित्य ॥९४॥

इदानीं यदुक्तं निर्युक्तिकृता-"पुच्छ बाहिं अंतो पविसिअव्वं"ति, (नि.९२) एतद् व्याख्यानयन् भाष्यकार आह –

**१४९ विहिपुच्छाए सण्णी सोउं पविसे न बाहिं संचिक्खे ।**
**उग्गमदोसभएणं चोयगवयणं बहिं ठाउ ॥५०॥ निभा०**

**विधि** इत्यादि । **विधिपृच्छया**[2] पूर्वाभिहितया **सञ्ज्ञिनं** श्रावकं **श्रुत्वा** ततः **प्रविशेत्,** क्व ? श्रावकगृहे, **न बहिः संतिष्ठेत्,** किं कारणम् ? **उद्गमदोषभयात्,** मा भूत्तं साधुमुद्दिश्य कश्चिदाहारं कुर्यादसौ सञ्ज्ञी । एवमुक्ते सत्याचार्येण **चोदगवयणं चोदक**पक्षः, किं तद् ? इत्याह-[3] **बहिं ठाउ । बहि**रेवासौ साधुर्भिक्षावेलां प्रतिपालयतु, मा भूत् प्राघूर्णक इति कृत्वा श्रावक आहारपाकं करिष्यतीति ॥५०॥

एवमुक्ते सत्याचार्य आह –

**१५० [4] तं सोच्चा दट्टुं वा बाहिट्ठियं उग्गमेगयरं कुज्जा ।**
**अप्पत्त पविट्ठो पुण चोयग ! दट्टुं निवारिज्जा ॥५१॥ निभा०**

**तं सोच्चा** इत्यादि । **श्रुत्वा तं** साधुं **बहिर्वर्त्तिन**मन्यस्मात्पुरुषादेः स्वयं **वा दृष्ट्वोद्गमादीनां** दोषाणा**मेकतरमन्यतरं**[5] **कुर्यात्** । **अप्पत्त** त्ति **अप्राप्तायां**

---

७६. कडिल्लः कटाहम्, लोहमयं घृततैलादिपाकपात्रमित्यर्थः । संटी.

१. लोहो क. लोह ल. २. ०पृच्छायां पूर्वाभिहितायां क. ३. बाहिरे क. ४. सोच्चा दट्ठूणं दा. पा.सं. । ५. ०तमं दा.

वेलायामेतच्छ्रावकः कुर्यात्, एष बहिस्तिष्ठतो दोषः, **पविट्ठो पुण चोयग ! दट्ठुं निवारिज्जा । प्रविष्टः पुनरसौ** साधुः सञ्ज्ञिकुलं हे **चोदक** ! 'दट्ठुं' ति **दृष्ट्वो**द्गमादिदोषं **निवारयेत्** ॥५१॥

किञ्च –

**१५१ उग्गमदोसाईणं कहणं उप्पायणेसणाणं च ।**
**तत्थ उ नत्थी सुन्नं बाहिं सागार कालदुवे ॥९५॥ नि०**

**उग्गम** इत्यादि । **उद्गमदोषादीनां कथनं** करोति **उत्पादनादोषाणामेषणादोषाणां च कथनं** करोति, ततश्च यदि शुद्धं भक्तं ततस्तत्रैव सञ्ज्ञिगृहे भोक्तव्यम्, अथ तत्र नास्ति, ततोऽन्यत्र गन्तव्यम् । एतदेवाह-**तत्थ उ** त्ति **तत्रैव** श्रावकगृहे भुङ्क्ते, **नत्थि** त्ति अथ तत्र **नास्ति** भोजनस्थानं ततः **सुण्णं** ति **शून्य**गृहे याति, **बाहिं** ति अथ शून्यगृहे सागारिकैर्भोक्तुं न शक्यते ततो **बाह्यतो** व्रजति । अथ तत्रापि **सागार** त्ति **सागारिकाः**, ततः **कालदुवे** त्ति **कालद्वितयं** ज्ञातव्यम्, किं स्वल्पो दिवस आस्ते आहोस्वित् महान्? यदि महांस्ततो दूरमपि स्थण्डिले गत्वा समुद्दिशति, अथ स्वल्पो दिवसस्ततोऽस्थण्डिल एव यतनया समुद्दिशतीति ॥९५॥

इयं तावन्निर्युक्तिगाथा, एतामेव भाष्यकारः प्रतिपदं व्याख्यानयति, तत्र चोदकाक्षेप-परिहारद्वारेण प्रवेशविधिरुक्तः, इदानीं बहिस्तिष्ठतोऽधिकतरदोषप्रतिपादनायाह –

**१५२ फेडिज्ज व सइ कालं संखडि घित्तूण वा पए गच्छे ।**
**सुण्णघराइपलोयण चेइय आलोयणाऽबाहं ॥५२॥ निभा०**

**फेडिज्ज व** इत्यादि । स हि तत्र बहिर्व्यवस्थितः किं कुर्यादत आह-**फेडिज्ज व सइ कालं** अपनयेत्, **सति** त्ति विद्यमानं भिक्षा**कालम्**, एतदुक्तं भवति-ग्रामे प्रहरमात्र एव भिक्षावेला भवति । तत्र च व्यवस्थितः साधुस्तां भिक्षावेलामपनयति। **संखडि** त्ति कदाचित्तत्रान्यस्मिन् दिवसे **सङ्खडि**रासीत्, तदुद्वरितं च पर्युषितभक्तं प्रत्यूषस्येव भक्षितं गृहस्थैरतोऽसौ साधुर्बहिर्व्यवस्थितस्तस्य भ्रष्ट इति । **घित्तूण वा पए गच्छे** त्ति **गृहीत्वा वा** यत्तत्र राद्धं पक्वं वा [1]तत्**प्रगे** एव श्रावको गृहीत्वा ग्रामान्तरं **गतः**, ततश्चासौ साधुस्तस्य भ्रष्ट इति, अत एतद्दोषभयात्प्रवेष्टव्यम् । प्रविशतश्च को विधिरित्यत आह-**सुण्णघरादिपलोयण** प्रविशंश्चासौ साधुः **शून्य-**

---

१. प्रागेव श्रा० क.

**गृहादिप्रलोकनं** करोति, कदाचित्तत्र भुजिक्रियां करोति, प्रविष्टश्च श्रावकगृहे **चेइय** त्ति **चैत्यवंदनं** करोति, **आलोयण** त्ति **आलोचनां** श्रावकाय ददाति, यदुत-अहमाचार्येण कारणवशादेकाकी प्रहित इति, **अबाहं** ति **न** **काचिद्बाधा** शीलव्रतेषु भवतामित्येवं पृच्छति ॥५२॥

तत्र च प्रविष्टो भिक्षादोषान् कथयन्नाह –

**१५३ उग्गमएसणकहणं न किंचि करणिज्ज अम्ह विहिदाणं ।**
**कस्सट्ठा आरंभो ? तुज्झेसो पाहुणा डिंभा ॥५३॥ निभा०**

**उग्गम** इत्यादि । **उद्गमदोषाणामा**धाकर्मादिदोषाणां कथनम् । **एषणादोषाणां** च **कथनम्,** ततश्च आरम्भं दृष्ट्वा एतच्च ब्रवीति-नास्मदर्थे **किञ्चित्कर्त्तव्य** आहारविधिः, किन्त्व**स्माकं विधिदानं** क्रियते, तथा चोक्तम् -"**विहिगहिअं विहिदिण्णं दोण्हं पि बहुप्फलं जहा होति**" । [ ] अथ कदाचिच्छ्रावको न कथयति तदा **डिम्भरूपाणि** पृच्छति, ते [1]ह्यनभिज्ञत्वाद्यथावस्थितं कथयन्ति । किं पृच्छति ? **कस्सट्ठा आरंभो** **कस्य** निमित्तमय**मारम्भः** ? इत्येवं साधुना पृष्टे सति डिम्भरूपाण्यपि कथयन्ति-**तुज्झेसो** त्ति **त्वदर्थमय**मारम्भः, यतः **पाहुण** त्ति **प्राघूर्णका** यूयमिति । अथवा **पाहुण** त्ति प्राघूर्णकानामर्थेऽयमारम्भो न तव, एवं **डिंभ** त्ति **अर्भकरू**पाणि कथयन्ति ॥५३॥

अथ तत्रार्भकरूपाणि न सन्ति यानि पृच्छ्यन्ते ततः स्वयमेव केनचिद्व्याजेन रसवतीं यतो याति, एतदेवाह –

**१५४ रसवइपविसण पासण [2]मिअममिअमुवक्खडे तहा गहणं ।**
**पज्जत्ते तत्थेव उ उभएगयरे य ओयविए ॥५४॥ निभा०**

**रसवति** इत्यादि । **रसवती** सूपकारशाला तस्यां **प्रवेशनं** करोति, प्रविष्टश्च **पश्यत्तां** दर्शनं करोति, तत्र च **मितममितमुवक्खडे** त्ति कदाचि**न्मितमुपस्क्रियते** स्वल्पम्, कदाचिद**मितमुपस्क्रियते** बहु, **तहा गहणं** ति तत्र यदि मितं राद्धं ततः स्वल्पं गृह्णाति, अथ प्रचुरं राद्धं ततस्तदनुरूपमेव गृह्णाति । तत्र निर्युक्तिगाथायाः सम्बन्धि पूर्वार्द्धं व्याख्यातम्, कतमत् ? "उग्गमदोसाईणं कहणं उप्पायणेसणाणं च" (नि.९५) इति, इदानीं मूलनिर्युक्तिकारगाथायां तस्यामेव यदुपन्यस्तम्-तत्थ उ

१. ह्यज्ञत्वाद्. दा. २. मिय अमिय उवक्खडे हे०

त्ति (नि.९५) तद्व्याख्यानयन्नाह-**पज्जत्ते तत्थेव उ** यदि **पर्याप्तं** भक्तं लब्धं ततस्**तस्मिन्नेव** गृहे भुङ्क्ते इति । **उभएगयरे य ओयविए** त्ति **उभयं** श्रावकः श्राविका च [७७]**ओयविअं खेदज्ञ**मुभयं यदि भवति, **एगतरं च ओयविअं अल्पसागारिकः** श्रावक इत्यर्थः, श्राविका वा ओयविआ अल्पसागारिकेत्यर्थः, ततो भुङ्क्ते इति ॥ ५४॥

'तत्थ उ' त्ति अयमवयवो व्याख्यातः, इदानीं 'नत्थि'त्ति (नि.९५) अवयवो व्याख्यायते –

**१५५ [१]असइ अपज्जत्ते वा [२]सुण्णघराईसु बाहि संसद्दं ।**
**लट्ठीइ दारघट्टण पविसण उस्सग्ग आसत्थो ॥५५॥ निभा०**

**असइ** इत्यादि । **असति** तस्मिन्नुभये, यदा श्रावकोऽल्पसागारिको नास्ति, नापि श्राविकाऽल्पसागारिका, श्रावकश्राविकयोरन्यतरो वा यदाऽल्पसागरिको नास्ति तदाऽभावे सति **अपज्जत्ते व** त्ति यदा **पर्याप्तं** तस्मिन् श्रावकगृहे भक्तं **न** भवति लब्धं तदाऽन्यत्रापि भिक्षाटनं कृत्वा **सुण्णघरा[३]दीसु** त्ति [७८]**शून्यगृहादिषु** गम्यते भोजनार्थम्, **आदि**शब्दाद्देवकुलादिषु वा, तेषां च शून्यगृहादीनां **बहिरे**व व्यवस्थितः **संशब्दं** काशितादिरूपं करोति । कदाचित्तत्र कश्चित्सागारिको दुश्चारित्री भवेत् स च तेन शब्देन निर्गच्छति । अथैवमपि शब्दे कृते न निर्गच्छति ततो **यष्ट्या द्वारे घट्टनमा**हननं क्रियते, ततः **प्रविशति,** प्रविष्टश्च यदि कश्चिन्न पश्यति ततः [४]**उस्सग्गं** ति ईर्यापथनिमित्तं पञ्चविंशत्युच्छ्वासप्रमाणं **कायोत्सर्गं** करोति, तथा च **आसत्थो** त्ति मनागाश्वासितः सन् ॥५५॥

ततश्च –

**१५६ आलोअणमालावो अदिट्ठंमि वि तहेव आलावो ।**
**किं उल्लावं न देसी ? [५]अदिट्ठे निस्संकियं भुंजे ॥५६॥ निभा०**

**आलोयण** इत्यादि । **आलोकनं** निरूपणं करोति, अथ निरूपिते कश्चिद् दृष्टः। **आलावो** त्ति यदि कश्चिद् दृष्टस्तत **आलपनं** करोति किमिह भवानागतः?

---

७७. ओयवियं खेदज्ञम्, साधुसामाचारीज्ञाता इत्यर्थः । संटी.

७८. शून्यगृहम्-शून्यम् उद्वसम् तच्च तद् अगारं च - शून्यागारम् - शून्यगृहमित्यर्थः । (उत्त.अ.२, २० गा.)

१. असई छ.थ. २. सुण्णरोहाइसु ह.हे. सुण्णघराइण संपा. ३. ०दीणं ति-क.ल. ४. उस्सग्ग त्ति क ५. अदिट्ठि, दा०

इति । **अदिट्ठंमि वि तहेव आलावो** त्ति **अदृष्टेऽपि** सागारिके **तथैवालपनं** करोति, किमिह भवा[1]नायात इति । अथैवमप्युक्ते न कश्चित्तत्रोत्तरं ददाति तत इदमुच्यते- **किमुल्लावं न देसी**ति ? **कस्मादुल्लापं** प्रतिवचनं **न** प्रयच्छसि ? अथैवमपि न कश्चित्तत्रोपलब्धस्ततः **अदिट्ठे** त्ति सर्वथा सागारिकेऽनुपलब्धे सति **निःशङ्कितं भुङ्क्त** इति ॥५६॥

अथ एभिरप्युपायैर्न प्रकटीभूतः सागारिकः पश्चात्तु प्रकटीभूतो भुञ्जानस्य सतः ततः –

**१५७ दि[2]ट्ठि असंभम पिंडो तुज्झ वि य इमो त्ति साह वेउव्वी ।**
**सो वि अगारो दोच्चाइ नीइ मुणिउ त्ति काऊणं ॥५७॥ निभा०**

**दिट्ठि** इत्यादि । **दृष्टे** सागारिके सति **असंभम** त्ति **असम्भ्रमो** न भयं कर्त्तव्यम्, असम्भ्रान्तेन च तेन साधुना **पिण्डो** 'तुज्झ वि य इमो त्ति स्वाहा' । भिक्षापिण्डं गृहीत्वैवं करोति-अयं **यमाय** पिण्डः, अयं **वरुणाय** पिण्डः, अयं **धनदाय** पिण्डः, अय**मिन्द्राय** पिण्डः, **तुज्झ वि य इमो त्ति स्वाहा । तवाप्ययं पिण्डः स्वाहा । वेउव्वि** त्ति **विकृतं** शरीरं करोति पिशाचगृहीत इव, एवंविधं च तं साधुं दृष्ट्वा **सोऽप्यगारी दोच्चाइ** इति भयेन **णीति** निर्गच्छति, **मुणिउ त्ति काऊणं** पिशाचोऽय**मितिकृत्वा** ॥५७॥

एवं तावदभ्यन्तरस्थसागारिकदर्शने भुञ्जानस्य विधिरुक्तः । यदा तु पुनर्बहिर्व्यवस्थित एव एभिः स्थानान्तरैः पश्यति तदा को विधिः ? इत्यत आह –

**१५८ निव्वेण व मालेण व वाउपवेसेण अहव सढयाए ।**
**गमणं च कहण आगम दूरब्भासे विही इणमो ॥५८॥ निभा०**

**निव्वेण वे**त्यादि । यदा तु सागारिको बहिर्व्यवस्थित एव तं साधुं **नीव्रेण** छिद्रेण कुटिकाफड्डुकेन पश्यति, **मालेण व** त्ति **मालेन** उपरितलव्यवस्थितो यदा कदाचिच्छठतया पश्यति, **वाउपवेसेण** त्ति अथवा **वायुप्रवेशेन** गवाक्षेण शठतया पश्यति, **अथवे**ति विकल्पार्थः, एतेनान्येन वा [3]प्रदेशेन **शठतया** धूर्त्ततया पश्यति, दृष्ट्वा च **गमणं च गमनं** करोति स सागारिकः, **कहण** त्ति गत्वा चान्येभ्यः **कथयति**-यदुताऽऽगच्छत, पश्यत पात्रके भुञ्जानः साधुर्दृ[4]ष्ट इति, तत **आगम** त्ति

---

१. ०नागत इति क. २. दिट्ठेऽसं० ह० हे० संपा. ३. प्रवेशेन क.ल. दा. ४. दृष्टव्य इति क.

तेऽप्यागच्छन्ति, पश्यामः, किमेतत्सत्यं न वेति, **दुरब्भासे विही इणमो** दूरादागच्छताम् **अब्भासाद्वा**ऽऽगच्छतां विही इणमो **विधिरयं** च वक्ष्यमाणलक्षणो भवति ॥५८॥

कश्चासौ विधिरित्यत आह –

**१५९ थोवं भुंजइ बहुं विगिंचई पउमपत्त परिगुणणं ।**
**पत्तेसु [1]कहिं भिक्खं दिट्ठमदिट्ठे विभासा उ ॥५९॥ निभा०**

**थोवं** इत्यादि । यदि तावद्दूरे सागारिकास्ततः स साधुः **थोवं भुंजति, स्तोकं भुङ्क्ते, बहु**भक्तं **विगिंचति** त्यजति गर्त्तादा अल्पसागारिकं करोति धूल्या वाऽऽच्छादयति। अथाभ्यास एव सागारिकास्ततः **थोवं भुंजति** त्ति अन्यथा व्याख्यायते–**स्तोकं भुङ्क्ते** यावन्मात्रं मुखस्यान्तस्तिष्ठति तावन्मात्रमेव भुङ्क्ते, शेषं परित्यजतीति प्राग्वत्, **पउमपत्त** त्ति **पद्मपत्र**सदृशं निर्लेपं पात्रकं करोति **परिगुणणं** ति स्वाध्यायं कुर्वंस्तिष्ठतीति । एवं च व्यवस्थितस्य साधोस्ते सागारिकाः प्राप्ताः, ते च प्राप्ताः सन्त इदं पृच्छन्ति–**कहिं भिक्खं** ति **क्व** त्वया **भिक्षा** कृतेति । ततश्च **दिट्ठमदिट्ठे विभासा उ । दृष्टेऽदृष्टे च विभाषा** विकल्पना कार्या, यदि दृष्टो भिक्षामटन् तत इदं वक्ति–तत्रैव श्रावकादिगृहे भक्षयित्वेहागत इति ॥५९॥

अथ न दृष्टो भिक्षामटंस्ततः –

**१६० अदिट्ठे किं वेला तेसिं निबंधंमि दायणे खिंसा ।**
**ओहामिओ उ बडुओ वण्णो य पहाविओ तहियं ॥६०॥ निभा०**

**अदिट्ठे** त्ति । **अदृष्टे** सतीदं वक्तव्यम्-**किं वेला** वर्त्तते भिक्षाटनस्य ? अथैवमप्युक्तानां [2]पात्रकदर्शने **निर्बन्धः,** ततो **दायणे** त्ति दर्शयति पात्रकम्, दृष्टे च पात्रके सति **खिंस** त्ति ते सागारिकास्तं बटुकं [3]जुगुप्सन्ते-धिक् त्वामसमीक्षित-भाषिणमिति । ततः किं जातम् ? **'ओहामिओ उ बडुओ' [4]अपभ्राजितो बटुक**-स्तिरस्कृत इत्यर्थः । **वर्णश्च** यशः [5]प्रख्यापितं **तत्रे**ति तस्मिन् भोजनविधौ ॥६०॥

'सुण्ण'इत्ययमवयवो व्याख्यातः, इदानीं 'बाहिं सा[6]गार'त्ति (नि. ९५) अमुमवयवं व्याख्यानयन्नाह –

---

१. कहं, हे० २. पत्रक क० ३. जुगुप्सन्ति. क० ल० ४. पराजितो ब.क. ५. प्राख्यापितं दा. ६. संसद्द त्ति क.

**१६१ सुण्णघरासइ बाहिं [1]देवकुलाईसु होइ जयणा उ।**
**तेगिच्छि धाउखोभो मरणं अणुकंपपडियरणं ॥६१॥ निभा०**

**सुण्ण** इत्यादि । **शून्यगृहस्यासत्य**भावे **बाहिं देवकुलाईसु होति जयणा उ** । ततो **बहिर्देवकुलादौ** व्रजति, तत्रापि देवकुलादौ वनगह्वरादौ वेयमेव **यतना** कर्त्तव्या 'बाहिं संसद्दं लट्ठीए दारघट्टण' (निभा.५५) इत्येवमादि सर्वं कर्त्तव्यम् । अथ कथं बहिः सागारिकसम्भवः ? अत आह-**तेगिच्छि** त्ति **चिकित्सको** वैद्यः स कदाचित्तस्य साधोर्भिक्षामटतः **धातुखोभो** त्ति **धातु**वैषम्यं दृष्ट्वेदं चिन्तयति-यद्यस्यामवस्थायामयं साधुर्भक्षणं करोति ततः **मरणं** ति अवश्यमेव **म्रियते,** स वैद्यः **अणुकंप** त्ति **अनुकम्पया, पडियरणं** ति साधोरनुमार्गेण गत्वा निरूपणं करोति, यद्ययमिदानीमेव भक्षयिष्यति ततो निवारयिष्यामि । वैद्यकशास्त्रपरीक्षणं वा कृतं भवति ॥६१॥

एवमसौ वैद्यस्तस्य साधोरनुमार्गेण गत्वा लीनस्तिष्ठति, साधुरपि –

**१६२ इरियाइ पडिक्कंतो परिगुणणं संधिआ भे का गुणिआ ? ।**
**अम्हं एसुवएसो धम्मकहा दुविहपडिवत्ती ॥६२॥ निभा०**

**इरिया** इत्यादि । **ईर्यापथिकीप्रतिक्रान्तः** सन् **परिगुणणं** ति कियन्मात्रकमपि स्वाध्यायं करोति, अस्मिंश्च प्रस्तावे साधुः समधातुरेव सञ्जातः ततश्च वैद्योऽपि तं साधुं समधातुं दृष्ट्वेदं वक्ति-**संहिता भे का गुणिया? संहिता चरकसुश्रुत**रूपा **का गुणिता ?** अधीता, येन [2]भवताऽऽगतमात्रेणैव न भुक्तम् । साधुरप्याह-'**अम्हं एसुवएसो' अस्माकमयं** सर्व**ज्ञोपदेशः**, यदुत-स्वाध्यायं कृत्वा भुज्यत इति । **धम्मकहा दुविहपडिवत्ती** ततश्चासौ साधु**र्धर्मकथां** करोति, पश्चात्तस्य वैद्यस्य दुविहपडिवत्ति त्ति कदाचित्संयतो भवेत् कदाचिच्छ्रावक इति ॥६२॥

इदानीं बहिर्देवकुलादौ भुञ्जतो विधिरुक्तः, यदा तु पुनर्देवकुलाद्यपि सागारिकैर्व्याप्तं भवति तदाऽनुकूलमार्गव्यवस्थितं स्थण्डिलं प्रति प्रयाति –

**१६३ थंडिल्लासइ चीरं निवायसंरक्खणा तिपंचेव ।**
**सेसं जा थंडिल्लं असईए अण्णगामंमि ॥६३॥ निभा०**

---

१. देउलमाईसु. हे० २. भगवता क. ल.

**थंडिल** गाधा । **थंडिल्ल** त्ति **स्थंडिले** गत्वा भुङ्क्ते, **असति** त्ति अथ स्थण्डिलं नास्ति क्षुधा च पीड्यते ततोऽस्थण्डिल एव **चीरन्ति चीर**मास्तीर्य पादयोरधस्ततश्च भुङ्क्ते, किमर्थं पुनस्तच्चीरमास्तीर्यते? अत आह-**निपातसंरक्षणाय** परिशाटिनिपात-संरक्षणार्थम्, तया हि परिशाट्या निपतन्त्या पृथिवीकायादिर्विध्वस्यते । **तिपंचेव** त्ति तत्र चीरोपर्यस्थण्डिलस्थः कियद्भक्षयति ? **त्रीन् पञ्च वा** कवलान् । **'सेसं जा थंडिल्लं' शेषम**परं भक्तं तावन्नयति **यावत्स्थण्डिलं** प्राप्तम् । **असईए** त्ति अपान्तराले स्थण्डिल**स्यासति, अण्णगामंमि** त्ति **अन्यं ग्रामं** प्रयाति, तत्र च स्थण्डिले भुङ्क्त इति ॥६३॥

इदानीं यदुक्तं 'कालदुवे'त्ति (नि.९५) निर्युक्तिकृता तद्भाष्यकृद् व्याख्यानयन्नाह –

**१६४ अपहुप्पंते काले तं चेव दुगाउयं नइक्कामे ।**

**गोमुत्तिगदड्ढाइसु भुंजे अहवा पएसेसुं ॥६४॥ निभा०**

**अपहुप्पंते** इत्यादि । अथ तस्य भिक्षोर्गच्छतो योऽसावभिप्रेतो ग्रामः स क्रोशत्रये सञ्जातः, तत्र च यदि कालः पर्याप्यते ततस्तद्भक्तं पूर्वगृहीतं परित्यज्यान्यद् गृह्णाति, अथास्तमनकाल आसन्नस्ततः **तं चेव** त्ति **तदेव** पूर्वगृहीतं भक्तं क्षेत्रातिक्रान्तमपि भुङ्क्ते, **दुगाउअं नइक्कामे** त्ति यदा तु कालः पर्याप्यते तदा त[1]त्पूर्वगृहीतं भक्तं **द्विगव्यूता**त्परतो **नातिक्रामयति** न नयति, गव्यूतद्वय एव तत्परित्यज्य याति, तत्र च गतः, काले पर्याप्यमाणेऽन्यद् ग्रहीष्यतीति, यदा पुनस्तस्य साधोर्व्रजतः क्रोशद्वयव्यवस्थितग्रामस्यारत आदित्योऽस्तमुपयाति न चान्तराले स्थण्डिलमस्ति तदा **गोमुत्तिगदड्ढादिसु भुंजे । गोमूत्रदग्धेषु** देशेषु **भुञ्जीत, आदि**शब्दात्सूकरोत्कीर्णभूप्रदेशादौ भुङ्क्त इति । **अहवा पएसेसु** त्ति यदि गोमूत्रदग्धादिस्थानं न भवति ततो धर्माधर्मास्तिकायकल्पनां तस्मिन् स्थाने कृत्वा भुङ्क्ते, एतदुक्तं भवति-[2]धर्माधर्माऽऽकाशास्तिकायैस्तिरोहितायां भुव्यहं व्यवस्थितश्चानया यतनया सशूकता दर्शिता भवति ॥६४॥

उक्तं सञ्ज्ञिद्वारम्, इदानीं साधर्मिकद्वारप्रतिपादनायाह –

**१६५ दिट्ठमदिट्ठा दुविहा नायगुणा चेव तहय अन्नाया ।**

**अदिट्ठा वि य दुविहा सुअअसुअ पसत्थअपसत्था ॥९६॥ नि० दारगाहा ।**

**दिट्ठा** इत्यादि । साधर्मिका **द्विविधाः-दृष्टा अदृष्टाश्च, नायगुणा चेव तहय**

---

१. ततः पू० क. २. धर्माधर्मास्तिकायै० दा.

**अण्णाया** ये ते दृष्टाः साधर्मिकास्ते द्विविधाः-कदाचिज्**ज्ञातगुणा** भवन्ति कदाचि**दज्ञातगुणाः** । **अदिट्ठा वि य दुविहा** ये**ऽप्यदृष्टाः** साधर्मिकास्ते**ऽपि द्विविधाः- सुयअसुय** त्ति **श्रुतगुणा अश्रुतगुणाश्च** । **पसत्थापसत्थ** त्ति ये ते ज्ञातगुणास्ते द्विविधाः-प्रशस्तज्ञातगुणा अप्रशस्तज्ञातगुणाश्च, येऽपि तेऽज्ञातगुणास्तेऽपि द्विविधाः- प्रशस्ताज्ञातगुणा अप्रशस्ताज्ञातगुणाश्चेति । येऽपि ते श्रुतगुणास्तेऽपि द्विविधाः- प्रशस्तश्रुतगुणा अप्रशस्तश्रुतगुणाश्च । येऽपि तेऽश्रुतगुणास्तेऽपि द्विविधाः-प्रशस्ताश्रुतगुणा अप्रशस्ताश्रुतगुणाश्च ॥९६॥

आह-ये दृष्टास्ते कथमज्ञातगुणा भवन्तीत्यत आह –

**१६६ दिट्ठा व समोसरणे न य नायगुणा हविज्ज ते समणा ।**
**सुअगुण पसत्थ इयरे समणुन्नियरे य सव्वे वि ॥९७॥ नि०**

**दिट्ठा व** इत्यादि । **दृष्टा** उपलब्धाः सामान्यतो झटिति क्व ? **समवसरणे** स्नात्रादौ[१], **न च ज्ञातगुणास्ते भवेयुः श्रमणाः** । **सुयगुणपसत्थ इयरे** त्ति **इतरे** इत्यदृष्टानां परामर्शः, तेऽदृष्टा **सुअगुणे** त्ति **श्रुतगुणा** अपि सन्तः **पसत्थ** त्ति **प्रशस्तश्रुतगुणा** गृह्यन्ते, तदनेन सुअगुणपसत्थ त्ति भावितम्, **इतरे** त्ति **इतर** इत्यदृष्टानां परामर्शः, तेऽदृष्टश्रुतगुणास्तेऽपि प्रशस्तश्रुतगुणा इत्ययमनन्तरगाथो- पन्यस्तभङ्गक एकः सूचित इति । **'समणुन्नियरे य सव्वेवि सर्वेऽपि'** चैते श्रुतादिगुणभेदभिन्नाः साधवः **समनोज्ञा इतरे** **चा**समनोज्ञा इति, साम्भोगिका असाम्भोगिकाश्चेत्यर्थः ॥९७॥

इदानीमेषां श्रमणानां सर्वेषां मध्ये ये शुद्धास्तेष्वेव संवसनं करोति नेतरेष्विति, अमुमेवार्थं प्रतिपादयन्नाह –

**१६७ जइ सुद्धा संवासो होइ असुद्धाण दुविह पडिलेहा ।**
**अब्भितरबाहिरिया दुविहा दव्वे य भावे य ॥९८॥ नि०**

**यदि सुद्धा** इत्यादि । **यदि शुद्धाः** संवासशुद्धाः केऽभिधीयन्ते ? प्रशस्त- श्रुतगुणास्तथा प्रशस्तज्ञातगुणाश्च, तेष्वेवंविधेषु **संवासः** संवसनं करोति । **होइ असुद्धाण दुविह पडिलेहा** । **भवत्यशुद्धानां द्विविधा प्रत्युपेक्षणा,** तत्राशुद्धा अप्रशस्तश्रुतगुणास्तथाऽप्रशस्तज्ञातगुणा अशुद्धा अभिधीयन्ते, तद्विषयं द्विविधं

१. यात्रादौ दा.

प्रत्युपेक्षणं भवति, कथम् ? **अब्भिंतरबाहिरिआ** एका **अभ्यन्तर**प्रत्युपेक्षणा[१], आन्तरेत्यर्थः, अपरा **बाह्य**प्रत्युपेक्षणा । **दुविहा दव्वे य भावे य** एकैका च प्रत्युपेक्षणा **द्विविधा**, याऽसा अभ्यन्तरा प्रत्युपेक्षणा सा **द्रव्यतो भावतश्च** भवति, याऽपि बाह्या प्रत्युपेक्षणा साऽपि **द्रव्यतो भावतश्चे**ति **द्विविधै**व ॥९८॥

इदानीं बाह्यां प्रत्युपेक्षणां द्रव्यतः प्रतिपादयन्नाह –

**१६८ घट्ठाइ तलिय दंडग पाउय संलग्गिरी अणुवओगो[२] ।**
**दिसि पवण गाम सूरिय वितहं उच्छोलणा दव्वे ॥९९॥ नि०**

**घट्ठा** इत्यादि । **घट्ठादि** त्ति **घृष्टा** जङ्घासु दत्तफेनका, **आदिशब्दात्** मट्ठा [७९]तुप्पोट्ठादयो गृह्यन्ते । **तलिग** त्ति सोपानत्का उपानद्रूढपादाः । **दंडग** त्ति वेत्रलतादण्डकैर्गृहीतैः, **पाउय**मिति **प्रावृतं** यथा संयत्यः प्रावृण्वन्ति कल्पं तथा तैः प्रावृतम् । **संलग्गिरि** त्ति परस्परं हस्तावलग्निकया व्रजन्ति, अथवा **संलग्गिरि** त्ति युगलिता व्रजन्ति, **अणुवओगो** त्ति **अनुपयुक्ता** व्रजन्ति, ईर्यायामनुपयुक्ताः । एवं बहिर्भुवं गच्छन्तः प्रत्युपेक्षिताः, इदानीं सञ्ज्ञाभूमिं प्राप्तान् तान् संयतान् प्रत्युपेक्षते-**दिसि** त्ति आगमोक्तदिग्विपर्यासेनोपविशन्ति । **पवण** त्ति **पवनस्य** प्रतिकूलमुपवेष्टव्यं ते त्वानुकूल्येन पवनस्योपविशन्ति । **गाम** त्ति **ग्रामस्या**भिमुखेनोपवेष्टव्यम्, ते तु पृष्ठं दत्त्वोपविशन्ति । **सूरिय** त्ति **सूर्यस्या**भिमुखेनोपवेष्टव्यम्, ते तु पृष्ठं दत्त्वोपविशन्ति। एवमुक्तेन प्रकारेण **वितथं** कुर्वन्ति । [३]**उच्छोलण** त्ति पुरीषमुत्सृज्य प्रभूतेन पयसा क्षालनं कुर्वन्ति । **दव्वे** त्ति द्वारपरामर्शः । इयं तावद्बाह्या **द्रव्यतः** प्रत्युपेक्षणा ।

आह-अनन्तरगाथायामभ्यन्तरायाः प्रत्युपेक्षणायाः प्रथममुपन्यासः कृतः, ततस्तामेव व्याख्यातुं युक्तं न तु बाह्यामिति, उच्यते–प्रथमं तावद्बाह्यैव प्रत्युपेक्षणा भवति पश्चादभ्यन्तरा, अतो बाह्यैव व्याख्यायते-आह-किमितीत्थमेव नोपन्यासः कृतः? उच्यते-अभ्यन्तरप्रत्युपेक्षणायाः प्राधान्यख्यापनार्थमादावुपन्यासः कृतः ॥९९॥

एवं तावद्बाह्या प्रत्युपेक्षणा द्रव्यतोऽभिहिता, इदानीं बाह्यां प्रत्युपेक्षणां भावतः प्रतिपादयन्नाह –

---

७९. तुप्पोट्ठ-तुप्रोष्ठः-तुप्रा म्रक्षिता शीतरक्षादिनिमित्तमोष्ठा येषां ते तुप्रोष्ठाः । (ग. २ अधि. अनु.)

१. ०णा अप० दा. २. अणुवउत्ता, संपा० ३. उच्छोलणम्मि क. उच्छोलणं ति ल०

**१६९ विकहा हसिउग्गाइय भिन्नकहा चक्कवाल छलिअकहा ।**
**माणुसतिरियावाए दायणआयरणया भावे ॥१००॥ नि०**

**विकहा** इत्यादि । **विकथा** विरूपा कथा, अथवा **विकथा** स्त्रीभक्तचौरजनपदकथा तां कुर्वन्तो व्रजन्ति, तथा **हसन्त उद्गायन्तश्च** व्रजन्ति । **भिन्नकह** त्ति मैथुनसम्बद्धा [१]राभसिका कथा तां कुर्वन्तो व्रजन्ति । **चक्कवाल** त्ति मण्डलबन्धेन स्थिता व्रजन्ति। **छलिअकह** त्ति षट्प्रज्ञकगाथाः पठन्तो गच्छन्ति। तथा **माणुसतिरिआवाए** त्ति **मानुषापाते तिर्यगापाते** च सञ्ज्ञां व्युत्सृजन्ति । **दायण** त्ति परस्परस्याङ्गुल्या किमपि दर्शयन्तीयमेवाचरणता दर्शनताऽऽ**चरणता, भावे** त्ति द्वारपरामर्शः ॥१००॥

इयं बाह्यभावमङ्गीकृत्य प्रत्युपेक्षणा, एवं बाह्यप्रत्युपेक्षणयाऽशुद्धानपि साधून् दृष्ट्वा प्रविशति, कदाचित्ते गुरोरनादेशेनैव एवं कुर्वन्ति । एतदेव प्रतिपादयन्नाह –

**१७० बाहिं जइवि असुद्धा [२]तहावि गंतूण गुरुपरिक्खा उ ।**
**अहव विसुद्धा तहवि उ अंतो दुविहा उ पडिलेहा ॥१०१॥ नि०**

**बाहि**मित्यादि । **बाह्य**प्रत्युपेक्षणामङ्गीकृत्य **यद्यप्यशुद्धास्तथापि** प्रविश्य **गुरोः परीक्षा** कर्त्तव्या, **अथवा** बाह्यप्रत्युपेक्षणया यद्यपि **विशुद्धा** एव भवन्ति **तथापि तु अन्तो**ऽभ्यन्तरतोऽभ्यन्तरां प्रत्युपेक्षणामाश्रित्य **द्विविधैव प्रत्युपेक्षणा** भवति कर्त्तव्या द्रव्यतो भावतश्च ॥१०१॥

इदानीमसौ अभ्यन्तरप्रत्युपेक्षणामङ्गीकृत्य द्रव्यतः परीक्षां करोति साधर्मिकासन्नेषु कुलेषु [३]भिक्षाचर्यया प्रविष्टः सन् –

**१७१ पविसंतनिमित्तमणेसणं च साहइ न एरिसा समणा ।**
**अम्हं च ते कहिंती कुक्कुड खरियाइठाणं च ॥१०२॥ नि०**

**पविसंतो** इत्यादि । **प्रविशन्** भिक्षार्थं **निमित्तं** पृच्छ्यते गृहस्थैस्ततश्च न कथयति, '**अणेसणं**' **अनेषणां** गृहस्थेन क्रियमाणां निवारयति, ततः स गृहस्थः **कथयति, न एरिसा समणा** नास्मदीया एवंविधाः **श्रमणाः, अस्माकं** हि **ते** निमित्तं **कथयन्ति,** अनेषणीयमपि गृह्णन्ति, एवमभिधीयते गृहस्थेन, **कुक्कुड** त्ति **कुक्कुटप्रायो**ऽयमिति । एवं तावद्भिक्षामटता प्रत्युपेक्षणा कृता, इदानीं दूरस्थ

---

१. राहसिकी भ. २. तहवि अइगं० ह. ३. भिक्षाचर्यायां क. ल.

एवोपाश्रयप्रत्युपेक्षणां करोति-**खरियाइठाणं ति खरिया** द्व्यक्षरिका तत्समीपे **स्थानमु**पाश्रयः, **आदि**शब्दाच्चरिकादिसमीपे वा ॥१०२॥

इयं तावद्वसतिबाह्या प्रत्युपेक्षणा, इदानीमुपाश्रयाभ्यन्तरे द्रव्यप्रत्युपेक्षणां कुर्वन्नाह –

**१७२ दव्वंमि ठाणफलए सेज्जासंथारकायउच्चारे ।**
**कंदप्पगीयविकहा वुंग्गहकिड्डा[1] य भावंमि ॥१०३॥ नि०**

**दव्वम्मी**त्यादि । **द्रव्य**मिति द्वारपरामर्शः, **ठाणफलए** त्ति **स्थानम**वस्थितिः, **फलका**नामवस्थितिं पश्यति, तानि हि वर्षाकाल एव गृह्यन्ते न शेषकाले, स तु **प्रविष्टः** शेषकालेऽपि फलकानि संगृहीतानि पश्यति । **सेज्जा** इति शेरतेऽस्यामिति **शय्या**ऽऽस्तरणं तदास्तृतमेवास्ते, **संस्तारकस्तृ**णमयः, प्रकीर्यन्तेऽधस्तृणानि स्वपद्भिस्तं संस्तारकं पश्यति, **काय** त्ति **कायिका**भूमिं गृहस्थसंबद्धां पश्यति, **उच्चार** त्ति गृहस्थैः सह पुरीषव्युत्सर्गं कुर्वन्ति, अथवा **उच्चार** त्ति श्लेष्मणः परिष्ठापनमङ्गणे कुर्वन्ति, एवं स साधुः पश्यति । इयमभ्यन्तरा द्रव्यप्रत्युपेक्षणा, इदानीमभ्यन्तरां भावप्रत्युपेक्षणां प्रतिपादयन्नाह-**कंदप्प** त्ति **कन्दर्पगीतविकथाः** कुर्वन्ति, तथा **वुग्गह** त्ति **विग्रहः** कलहस्तं कुर्वन्ति, **किड्ड** त्ति पाशककपर्दकैः क्रीडन्ति, **भावंमि भावविषया** प्रत्युपेक्षणा ॥१०३॥

उक्ता अभ्यन्तरा भावप्रत्युपेक्षणा, इदानीमेतद्दोषवर्जितेषु संयतेषु प्रविशति, एतदेवाह –

**१७३ संविग्गेसु पवेसो संविग्गऽमणुन्न बाहि किइकम्मं ।**
**ठवणकुलापुच्छणाया एत्तो च्चिय गच्छ गविसणाया ॥१०४॥ नि०**

**संविग्गेसु** इत्यादि । **संविग्ना** मोक्षाभिलाषिण**स्तेषु प्रवेशः** कर्त्तव्यः समनोज्ञेषु। अथ समनोज्ञा न सन्ति ततः **संविग्गऽमणुण्ण** त्ति **संविज्ञेष्वमनोज्ञेषु** प्रवेशः । तत्र च **बाहि** त्ति **बहिरेव** प्रविशत्युपकरणमेकस्मिन् प्रदेशे मुञ्चति । ततः **कितिकम्मं** ति तदुत्तरकालं वन्दनं करोति । ततः '**ठवणकुलापुच्छणाया**' **स्थापनाकुलानि पृच्छति** भिक्षार्थम्, ततस्ते कथयन्ति-अमुकत्रामुकानि । **एत्तो च्चिअ गच्छ** त्ति **अस्या एव** भिक्षाटनभूमे**र्गमिष्यामि**, इत्येवं ब्रवीति । **गवेसणाय** त्ति तं तस्माद्

---
१. विग्गह संपा.

ग्रामादेर्निर्गतं न निर्गतमिति वैवं [१] **गवेषणं** कुर्वन्ति ॥१०४॥

उक्तं साधर्मिकद्वारम्, इदानीं वसतिद्वारमभिधीयते, स च साधुर्गच्छनस्तमनसमये वसतिं निरूपयति, सा चैतेषु स्थानेषु निरूपणीया –

**१७४ संविग्ग सण्णि भद्दग सुन्ने निइयाइ मोत्तुऽहाच्छंदे ।**
**वच्चंतस्सेतेसुं वसहीए मग्गणा होइ ॥१०५॥ नि० दारगाहा ।**

**संविग्ग** इत्यादि । **संविग्नेषु** वसतिमार्गणा कर्त्तव्या, **सञ्ज्ञी** श्राद्धः संविग्नभावितस्तस्मिन् वा वसतिमार्गणा कर्त्तव्या, **भद्रकः** साधूनां तस्मिन्वा वसतिमार्गणा कर्त्तव्या, तदभावे **शून्य**गृहादौ वसतिमार्गणा कर्त्तव्या, **नितियादि** त्ति **नित्यवासादिः, आदि**शब्दात्पार्श्वस्थादयस्त्रयो गृह्यन्ते, तेषु वसतिमार्गणं कर्त्तव्यम्, **मोत्तुऽहाच्छंदे** त्ति **मुक्त्वा यथाच्छन्दान्** स्वच्छन्दानित्यर्थः, तत्र वसतिर्न मृग्यते, **व्रजतः** साधोरे**तेष्व**नन्तरोदितेषु **वसतेर्मार्गणा**[२]ऽन्वेषणा कर्त्तव्या ॥१०५॥

इयं द्वारगाथा वर्त्तते । इदानीमेनामेव गाथां प्रतिपदं व्याख्यानयन्नाह–

**१७५ वसही समणुण्णेसुं निइयादमणुण्ण अण्णहि निवेए ।**
**सण्णि गिहि इत्थिरहिए सहिए वीसुं घरकुडीए ॥१०६॥ नि०**

**वसधी**त्यादि । **वसति**रन्वेषणीया क्व ? अत आह–**समणुण्णेसुं** संविग्नसमनो**ज्ञेष्वा**दौ वसतिरन्वेषणीया, **नितियादमणुन्न** अथ तु तत्र **नित्यवास्यादयोऽमनोज्ञा** वाऽन्यसामाचारीप्रतिबद्धा वा भवन्ति, **आदि**शब्दात्पार्श्वस्थादयो गृह्यन्ते, ततश्चैतेषु विद्यमानेषु नैतेषां मध्ये निवसितव्यम्, किन्तु **अण्णहि अन्यत्र** वसतिं कृत्वा **'निवेदे' निवेदयित्वा** एषामेव-यथाऽमुष्मिन् अहं वसिष्यामि प्रतिजागरणीयो भवद्भिरिति । क्वासौ निवसति ? किंविशिष्टे वा गृहे निवसति ? **सन्नि** त्ति **सञ्ज्ञी** श्रावकः, स च यदि [३]महिलया रहितस्ततस्तद्गृहे वसति, अथासौ नास्ति ततः **गिहि** त्ति **गृही** भद्रकोऽत्र सूचितः, स च **स्त्रिया रहित**स्ततस्तत्समीपे वसति । अथ भद्रकोऽपि स्त्रीरहितो नास्ति किन्तु **सहितः स्त्रिया**, ततः सहिते स्त्रीयुक्ते सति **वीसुं** ति पृथग् निवसति, क्व ? **घरकुडीए** तस्यैव गृहस्य बहिरवस्थितं रन्धनकादि, अथवा त[४]त्फलिहकान्तर्गतकुट्यां वा निवसति ॥१०६॥

---

१. गवेषणां क. २. अन्वेषणं कर्त्तव्यम् दा. ३. महेलिकार. क. ४. फलहिकान्त० दा.

अथ भद्रकादिगृहं नास्ति ततः शून्यगृहे निवसति । किंविशिष्टे ? अत आह –

**१७६ अहुणुव्वासिअ सकवाड निब्बिले निच्चले वसइ सुण्णे ।**
**अनिवेइएयरेसिं गेलन्ने न एस अम्हं ति ॥१०७॥ नि०**

**अहुणुव्वासिय** इत्यादि । **अहुणुव्वासिय** त्ति **अधुना यदुद्वसितं** तदपि **सकपाटं** यदि [१]भवति तदपि **निर्बिलं** भवति तदपि यदि **निश्चलं** भवति, न पतनभयं यत्र तत्र वसितव्यम् । तत्र चैषां गाथोपन्यस्तानां चतुर्णां पदानां षोडशभङ्गिका निष्पद्यन्ते, स चैवंविधे गृहे निवसति कथयित्वा नित्यवास्यादीनां यथाऽहमत्रोषितो भवद्भिर्भलनीयः, यदा पुनः **अणिवेदितेतरेसिं** ति यदा तु नित्यवास्यादीनाम**निवेद्य** [२]वसति, तत्र च उषितः सन् दैवयोगाद् ग्लानः सञ्जातस्ततो **ग्लानत्वे** सति नित्यवास्यादीनां स गृहस्थ आगत्य कथयति–यदुत प्रव्रजितोऽपटुः सञ्जातः, ते नित्यवास्यादयोऽस्माकं न कथितमितिकृत्वैवं ब्रुवते– **न एस अम्हं ति । न एषोऽस्माकं** नायमस्मद्गोचरः, यदा तु पुनः पूर्वोक्तानां सर्वेषामेवाभावः सञ्जातः, किन्तु तस्मिन् क्षेत्रे नित्यवास्यादयः सन्ति ततस्तेष्वेव वसितव्यम् ॥१०७॥

एतदेवाह –

**१७७ नितियाइअपरिभुत्ते सहिएयर पक्खिए व सज्झाए ।**
**कालो सेसमकालो वासो पुण कालचारीसु ॥१०८॥ नि०**

**नितियादि** इत्यादि । **नित्यवास्यादौ** वसति, **आदि**शब्दादमनोज्ञेषु वसति, कथमित्यत आह–**अपरिभुत्ते** त्ति तैर्नित्यवास्यादिभिर्यः प्रदेशस्तस्या वसतेर्न परिभुक्तोऽनाक्रान्तस्तस्मिन् प्रदेशे**ऽपरिभुक्ते** वसति, **सहितेतर** त्ति ते च नित्यवास्यादयः सहितेतरे **सहिताः** संयतीभिर्युक्ताः केचन नित्यवास्यादयो भवन्ति, **इतरे** इत्यपरे संयतीभी रहिता भवन्ति, तेषु निवसति । ये ते संयतीभिर्युक्तास्ते द्विविधा– एके कालचारिणीभिः संयतीभिर्युक्ताः, तत्र निवसत्येव, अपरेऽकालचारिणीभिः संयतीभिर्युक्ताः, कश्च कालः ? **पक्खिए व सज्झाए** त्ति ताः संयत्यः **पाक्षिक**क्षामणार्थमागच्छन्ति **स्वाध्यायार्थं वा**, अयं **कालः शेषस्तु अकालः**, तत्र '**वासो**

---

१. भवति निर्बिलमपि यदि क. ल. २. वसतेः स दैव० क वसतिः स दैव० ल.

**पुण कालचारीसु' वासस्तु** तस्य साधोः **कालचारि**[1]श्रमणीयुक्तेषु [2]भवतीति ॥१०८॥

अथ कालचारिसंयतीयुक्ताः साधवो न सन्ति, ततः –

**१७८ तेण परं पासत्थाइएसु न य वसइ अकालचारीसु ।**
**गहिआवासगकरणं ठाणं गहिएणऽगहिएणं ॥१०९॥ नि०**

**तेण परं पासत्थादिएसु** इत्यादि । **ततः पार्श्वस्थादिषु वसति, न च वसत्यकालचारि**[3]संयतीकेषु, तेषु च पार्श्वस्थादिषु वसतः को विधिरित्येतदाह– **गहिआवासगकरणं** ति **गृहीतेन,** केन ? उपधिना, अनिक्षिप्तेनेत्यर्थः, **आवश्यकं** प्रतिक्रमणं करोति, ततश्च प्रतिक्रान्ते सति तत्रैव **ठाणं** ति कायोत्सर्गं करोति। **गहिएणऽगहिएणं** ति यदि शक्नोति ततो **गृहीतेनो**पकरणेन कायोत्सर्गं करोति, अथ न शक्नोति ततः **अगहिएणं** ति **अगृहीतेनो**पकरणेन कायोत्सर्गं करोतीति ॥१०९॥

अथ कायोत्सर्गं कर्त्तुं न शक्नोति श्रान्तः सन् ततः –

**१७९ निसिअ तुयट्टण जग्गण विराहणभएण पासि निक्खिवइ ।**
**पासत्थाईणेवं निइए नवरिं अपरिभुत्ते ॥११०॥ नि०**

**निसीय** इत्यादि । ततो **निषण्ण** उपविष्टो गृहीतेनोपकरणेनास्ते । **तुयट्टण** त्ति **त्वग्वर्त्तनं** निमज्जनं गृहीतेनोपकरणेन करोति यदि शक्नोति । **जग्गण** त्ति यदिवा गृहीतेनैवोपकरणेन जाग्रदास्ते न स्वपिति, अथ जागरणमपि कर्त्तुं न शक्नोति ततः **विराहणभएणं** ति **विराधनाभयेन** पात्रकभङ्गभयेनोपकरणं **पार्श्वे निक्षिपति,** ततः स्वपिति निक्षिप्तोपकरणः सन् **पासत्थादीणेवं** ति **पार्श्वस्थादीनां** सम्बन्धिन्यां वसता एवंविधो विधिरुक्तलक्षणो द्रष्टव्यः । **निइए नवरिं अपरिभुत्ते** त्ति **नियतवासिनां** वसतावयं विधिर्ज्ञेयः, यदुत–'गहिआवासयकरणं'इत्यादि,(नि.१०९) यदि पर**मपरिभुक्ते** प्रदेशे पात्राद्युपकरणं स्थापयित्वा स्वपितीति ॥११०॥

यथा पार्श्वस्थादिषु वसतो विधिरुक्तः, एवमहाच्छन्देऽपि विधिरिति, अत आह–

**१८० [4]एमेव अहाच्छंदे पडिहणणा झाणमज्झयण कण्णा ।**
**ठाणट्ठिओ निसामे सुवणाहरणा य गहिएणं ॥१११॥ नि०**

**एमेव** इत्यादि । यः पार्श्वस्थादौ वसतो विधिः प्रतिपादितः, **एवमेव**

---

१. ०संयतीयुक्ता साधवो क. २. वसतीति ल. ३. ०संयतीसहितेषु दा. ४. एवं दा.

**अहाच्छन्दे**ऽपि विधिर्द्रष्टव्यः, केवलमयं विशेषः-**पडिहणण** त्ति तस्याहाच्छन्दस्य धर्मकथां कुर्वतोऽसन्मार्गप्ररूपिकां तेन साधुना **प्रतिहननं** व्याघातः कर्त्तव्यः, यथैतदेवं न भवति । **झाणं** ति अथ तद्धर्मकथायाः प्रतिघातं कर्तुं न शक्नोति ततो **ध्यानं** करोति, ध्यायन्नास्ते धर्मध्यानम्, अथ तथापि धर्मकथां करोति ततः **अज्झयण** त्ति धर्मकथाव्याघातार्थ**मध्ययनं** करोति, अथ तथापि न तिष्ठति ततः **कर्णौ** स्थगयति धर्मकथाव्याघातार्थमिति । अथवा **सुवणाहरणा य** त्ति **सुप्तः** सन् **आहरणा** घोरयति घोरणं करोति महता शब्देन, सोऽपि निर्विण्णः सन्नुपसंहरति धर्मकथा-मिति ॥१११॥

उक्तं वसतिद्वारम्, षष्ठे द्वारे स्थानस्थितो भवतीदमुक्तम्, स च एभिः कारणैः –

**१८१ असिवे ओमोयरिए रायदुट्ठे भए नदुट्ठाणे ।**
**फिडिए गिलाणे कालगए वासे ठाणट्ठिओ होइ ॥११२॥ नि० दारगाहा ।**

**असिवे** इत्यादि । **असिवे** देवताजनितोपद्रवे सति तस्मिन् यत्राभिप्रेतं गमनं कदाचिदपान्तराले वा भवति ततश्चानेन कारणेन **स्थानस्थितो भवति** । **ओमोयरिए** त्ति दुर्भिक्षं विवक्षिते देशे जातमपान्तराले वा ततश्च तेन कारणेन स्थानस्थितो भवति । **रायदुट्ठे** त्ति [1]**राजदुष्टं** कदाचित्तत्र भवत्यभिप्रेतदेशेऽन्तराले वा तेनैव कारणेन स्थानस्थितो भवति । **भए** त्ति म्लेच्छादि**भयं** विवक्षिते देशेऽपान्तराले वा ततस्तेन कारणेन स्थानस्थितो भवति । **नइ** त्ति कदाचि**न्नदी** विवक्षिते देशेऽपान्तराले वा भवति तेन च कारणेन स्थानस्थितो भवति । **उट्ठाणे** त्ति उत्थित उद्वसितः स विवक्षितो देशोऽपान्तराले वा ततश्च तेन कारणेन स्थानस्थितो भवति। **फिडिए** त्ति कदाचिदसावाचार्यस्तस्मात् क्षेत्रात् च्युतोऽपगतो भवति ततश्च तावदास्ते यावद्वार्त्ता भवति, अनेन कारणेन स्थानस्थितो भवति । **गिलाणे** त्ति **ग्लानः** कदाचिन्मनाग् भवति स्वयं कदाचिदन्यः कश्चिद् ग्लानो भवति तेन प्रतिबन्धेन स्थानस्थितो भवति। **कालगय** त्ति कदाचिदसावाचार्यः **कालगतो** [2]मृतो भवति, यावत्तन्निश्रयो भवति तावत्स्थानस्थितो भवति । **वासे** त्ति **वर्षा**कालः सञ्जातस्ततस्तत्प्रतिबन्धात्**स्थानस्थितो भवति** तत्रैव ग्रामादावास्ते । इयं द्वारगाथा ॥११२॥

---

१. राजद्विष्टं दा. २. मृतो वा दा.

इदानीं निर्युक्तिकार एव कानिचिद् द्वाराणि व्याख्यानयन्नाह –

**१८२ तत्थेव अंतरा वा असिवादी सोउ परिरयस्सऽसई ।**
**संचिक्खे जाव सिवं अहवा वी ते तओ फिडिआ ॥११३॥ नि०**

**तत्थेव** गाहा । **तत्रे**ति योऽसौ विवक्षितो देशः, **अन्तराऽ**[1]**न्तराले वाऽशिवादयो** जाता इति **श्रुत्वा** आकर्ण्य, **आदि**ग्रहणादवमोदरिकाराजद्विष्टभयानि परिगृह्यन्ते, **परिरयस्सऽसई** त्ति भमाडयस्स **असत्य**भावे तिष्ठति, एतदुक्तं भवति-यदि गन्तुं शक्नोति भ्रमिणा ततोऽपान्तरालं परिहृत्याभिलषितं स्थानं गच्छति । अथ न शक्यते गन्तुं ततः **संचिक्खे** त्ति [2]**संतिष्ठेत्,** कियन्तं कालं यावत्तदाह-**जाव सिवं यावच्छिवं** निरुपद्रवं जातमिति । **अहवा वी ते ततो फिडिआ । अथवा त** आचार्यादयस्त**स्मात्** क्षेत्रादपगता भ्रष्टा इति, ततश्च वार्त्तोपलम्भं यावत्तिष्ठति ॥११३॥

इदानीं भाष्यकृच्छेषद्वाराणि व्याख्यानयन्नाह –

**१८३ पुण्णा व नई चउमासवाहिणी नवि य कोइ उत्तारे ।**
**तत्थंतरा व देसो उ उट्ठिओ न य लब्भइ प**[3]**वित्ति ॥६५॥ निभा०**

**पुण्णा व** गाहा । **पूर्णा** भृता, का ? **नदी,** किंविशिष्टा ? **चतुर्मासवाहिनी, न च कश्चिदुत्तारयति,** ततोऽपान्तराल एव तिष्ठति । **तत्रान्तराले वा देश उत्थित** उद्वसितः, **न च प्रवृत्तिर्वार्त्ता लभ्यते,** अतस्तिष्ठति तावत् ॥६५॥

**१८४ फिडिएसु जा पवित्ती सयं गिलाणो परं व पडियरइ ।**
**कालगया व पवित्ती ससंकिए जाव निस्संकं ॥६६॥ निभा०**

**फिडिएसु** गाहा । **फिडितेसु** तस्मात्क्षेत्रादपगतेषु सत्सु **जा पवित्ती** यावद्वार्त्ता भवति तावत्तिष्ठति, तथा **सयं गिलाणो स्वयमेव ग्लानो** जातस्ततस्तिष्ठति, **परं व पडियरइ** अन्यं **वा** ग्लानं सन्तं [4]**प्रतिचरति** । द्वारम् । **कालगया व पवित्ती अथवा कालगता**स्त आचार्या इत्येवम्भूता **प्रवृत्तिः** श्रुता, ततः '**ससंकिते जाव निस्संकं सशङ्कायां** वार्त्तायामनिश्चितायां तावदास्ते **यावन्निःशङ्कं** सञ्जातमिति ॥६६॥

**१८५ वासासुं उब्भिण्णा बीयाई तेण अंतरा चिट्ठे ।**
**तेगिच्छि भोइ सा**[5]**रक्खणहट्ठे ठाणमिच्छंति ॥११४॥ नि०**

---

१. अपान्तराले क. २. संतिष्ठति क. ३. पवत्ती हे० ४. परिचरति दारं क. पडिचरति द्वारं ल. ५. सारक्खणट्ठया, ह० हे०

**वासासु** इत्यादि । **वर्षासूद्भिन्ना बीजादयः**, **आदि**शब्दादनन्तकायादयः, **तेन** कारणेना**पान्तराल** एव **तिष्ठति**, तत्र च वर्षाकालप्रतिबन्धाद् ग्रामादौ तिष्ठन् किं करोति ? **तेगिच्छि चिकित्सको** वैद्यस्तमापृच्छति, यथा त्वया ममेह तिष्ठतो मन्दस्य भलनीयम् । **भोइ** त्ति **भोगिकं** ग्रामस्वामिनं पृच्छति, किमर्थं पुनर्वैद्यभोगिकयोः प्रच्छनं करोत्यत आह-**सारक्खणहट्ठे** वैद्यं पृच्छति मन्दतायां सत्याम्, हट्ठे त्ति दृढीकरणार्थम्, भोगिकं पृच्छति संरक्षणार्थं परिभवादेः, ततः **स्थानं** वसन**मिच्छति** ॥११४॥

केषु स्थानेषु इत्यत आह –

**१८६ संविग्ग सण्णि भद्दग अहप्पहाणेसु भोइयघरे वा ।**
**ठवणा आयरियस्सा[१] सामायारी पउंजणया ॥११५॥ नि०**

**संविग्ग** इत्यादि । वैद्यभोगिकयोः कथयित्वा **संविग्नेषु** मोक्षाभिलाषिषु तिष्ठति। **सण्णि** त्ति **सञ्ज्ञी** श्रावकस्तद्गृहे तिष्ठति, **भद्रकः** साधूनां तद्गृहे वा निवासं करोति । **अहप्पहाणेसु** त्ति **यथाप्रधानेष्विति** यो यत्र ग्रामादौ प्रधानः, तेषु यथाप्रधानेष्वेव तिष्ठति । एतेषामभावे **भोइयघरे व** त्ति **भोगिकगृहे वा** ग्रामस्वामिगृहे वा तिष्ठति, तत्र च तिष्ठन् किं करोतीत्यत आह-**ठवणा आयरियस्सा** दण्डकादिकमाचार्यं कल्पयति निराबाधे प्रदेशे, अयं ममाचार्य इति । तस्य चाग्रतः सकलां चक्रवाल**सामाचारीं प्रयुङ्क्ते**, निवेद्य करोतीत्यर्थः ॥११५॥

एष एकः कारणिकः, एतच्च कारणिकद्वारम् –

**१८७ एवं ता कारणिओ दूइज्जइ जुत्तो अप्पमाएण ।**
**निक्कारणिओ एत्तो चइओ आहिंडिओ चेव ॥११६॥ नि०**

**एवमि**त्यादि । **एवं तावत् कारणिको दूइज्जइ** विहरति, कथं विहरति ? **जुत्तो अप्पमाएणं अप्रमादेन युक्तः** प्रयत्नपर इत्यर्थः, **निष्कारणिको**ऽत इत ऊर्ध्वमुच्यते, स द्विविधः-**चइओ** त्याजितः सारणवारणाभि[२]**स्त्याजितः**, **आहिण्डको**ऽगीतार्थश्चक्रस्तूपादिदर्शनप्रवृत्तः ॥११६॥

तत्र तावत्त्याजित उच्यते –

**१८८ जह सागरंमि मीणा संखोहं सागरस्स असहंता ।**
**निंति तओ सुहकामी निग्गयमित्ता विणस्संति ॥११७॥ नि०**

---

१. आयरियस्स, हे० २. सारणावारणा० दा.

जहेत्यादि । **यथा सागरे** समुद्रे **मीना** मत्स्याः **संक्षोभं सागरस्यासहमाना** निर्गच्छन्ति **ततः** समुद्रात् **सुखकामिनः** सुखाभिलाषिणो **निर्गतमात्राश्च विनश्यन्ति** ॥११७॥

**१८९ एवं गच्छसमुद्दे सारणवीईहिं चोइया संता ।**
**निंति तओ सुहकामी मीणा व जहा विणस्संति ॥११८॥ नि०**

**एवमित्यादि । एवं गच्छसमुद्रे सारण**वारणा एव **वीचयस्ताभिस्त्याजिताः सन्तो** निर्गच्छन्ति **ततो** गच्छसमुद्रात्सुखाभिलाषिणो **मीना इव** मीना **यथा** तथा **विनश्यन्ति** ॥११८॥

उक्तं त्याजितद्वारम्, इदानीमाहिण्डक उच्यते –

**१९० उवएस अणुवएसा दुविहा आहिंडआ समासेणं ।**
**उवएस[1] देसदंसण अणुवएसा इमे होंति ॥११९॥ नि०**

**उवएस** गाहा । **उपदेशाहिण्डका**[2] **अणुवदेस** त्ति **अनुपदेशाहिण्डकाश्च**, एवं **द्विविधा आहिण्डकाः**[3] **समासेन**[4] सङ्क्षेपेण । **उवएस** त्ति **उपदेशाहिण्डको** यो **देशदर्शनार्थं** सूत्रार्थोभयनिष्पन्नो हिण्डते विहरति । **अणुवदेस** त्ति **अनुपदेशाहिण्डका इमे भवन्ति** वक्ष्यमाणकाः ॥११९॥

**१९१ चक्के थूभे पडिमा जम्मण निक्खमण नाण निव्वाणे ।**
**संखडि विहार आहार उवहि तह दंसणट्ठाए ॥१२०॥ नि०**

**चक्के** इत्यादि । **चक्रं धर्मचक्रम्, स्तूपो मथुरायाम्, प्रतिमा जीवत्स्वामि**-सम्बन्धिनी **पुरिकायां** पश्यति । **जम्मण** त्ति **जन्म** यत्रार्हतां **सौरिकपुरादौ** व्रजति, **निष्क्रमण**भुवम् **उज्जयन्तादिं** द्रष्टुं प्रयाति, **ज्ञानं** तत्रैवोत्पन्नं तत्प्रदेशदर्शनार्थं प्रयाति, **निर्वाण**भूमिदर्शनार्थं प्रयाति । [80]**संखडि** प्रकरणं तदर्थं व्रजति । **विहारेति** [5]**विहरणार्थं** व्रजति, स्थानाजीर्णं ममात्रेति, **आहार** त्ति यस्मिन् विषये स्वभावेनैव **आहारः** शोभनस्तत्र प्रयाति । **उवहि** त्ति अमुकत्र विषय **उपधिः** शोभनो लभ्यत इत्यतः प्रयाति । **तह दंसणट्ठाए तथा** रम्यदेश**दर्शनार्थं** व्रजति ॥१२०॥

---

८०. संखडीः यत्र स्वभावेनैव शोभनाहारो भवति । संटी.

१. थूभा इहोऽत्र अणुवएसा, हे० २. ०क एक क.ल. ३. आहिण्डकाः क. ४. समासतः आ. ५. विहारार्थं दा.

**१९२ एते अकारणा संजयस्स असमत्ततदुभयस्स भवे ।**
**ते चेव कारणा पुण गीयत्थविहारिणो भणिया ॥१२१॥ नि०**

**एते** इत्यादि । **एतान्यकारणानि संयतस्य,** किंविशिष्टस्य ? **असमत्ततदुभयस्स असमाप्तसूत्रार्थोभयस्य** संयतस्य **भवन्त्यकारणानीति** । **ते चेव** त्ति **तान्येव** च **धर्मचक्रादीनि कारणानि** भवन्ति, कस्य ? **गीयत्थविहारिणो गीतार्थविहारिणः** सूत्रार्थोभयनिष्पन्नस्य दर्शनादिस्थिरीकरणार्थं विहरत इति **॥१२१॥**

तथा चाह –

**१९३ गीयत्थो य विहारो बिइओ गीयत्थमीसओ भणिओ ।**
**एत्तो तइय विहारो नाणुन्नाओ जिणवरेहिं ॥१२२॥ नि०**

**गीयत्थो य** इत्यादि । **गीयत्थो गीतार्थानां विहारो** विहरणमुक्तम् । **बितिओ गीयत्थमीसओ द्वितीयो विहारो** द्वितीयं विहरणं **गीतार्थमिश्रं** गीतार्थेन सह, **इतस्तृतीयो विहारो नानुज्ञातो** नोक्तो **जिनवरैः ॥१२२॥**

किमर्थमित्यत आह –

**१९४ संजमआयविराहण नाणे तह दंसणे चरित्ते य ।**
**आणालोव[१] जिणाणं कुव्वइ दीहं च संसारं ॥१२३॥ नि०**

**संयम** इत्यादि । **संयमविराधनाऽऽत्मविराधना तथा ज्ञानदर्शनचारित्राणां विराधना आज्ञालोपश्च[२] जिनानां** कृतो भवति, तथाऽगीतार्थ एकाकी हिण्डन् **करोति दीर्घं च संसारमिति ॥१२३॥**

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**१९५ संजमओ छक्काया आयाकंटऽट्ठिऽजीरगेलन्ने ।**
**नाणे नाणायारं दंसण चरगाइवुग्गाहे ॥६७॥ निभा०**

**संजमओ** इत्यादि । **संजमतो छक्काया** संयमविराधनामङ्गीकृत्य **षट्कायविराधना** सम्भवति । **आय** त्ति **आत्मविराधना** संभवति, कथम् ? **कंटऽट्ठिऽजीरगेलण्णे कण्टकेभ्यः, अस्थिशकलेभ्यः,** आहारस्या**जरणेन** तथा **ग्लानत्वेन** । **नाणे** ज्ञानविराधना कथं भवति ? स हिण्डन् **ज्ञानाचारं** न करोति, **दंसण चरगाइवुग्गाहे**

---

१. आणाकोवो हे० सं आणाकोवु संपा० ह० २. ०कोपश्च क.ल.

दर्शनविराधना कथं संभवति ? स ह्यगीतार्थ**श्चरकादिभिर्व्युद्ग्राह्यते,** ततश्चापैति **दर्शनम्,** किं पुनः कारणं चारित्रं न व्याख्यातम् ? उच्यते-ज्ञानदर्शनाभावे चारित्रस्याप्यभाव एव द्रष्टव्यः । द्वारम् ॥६७॥

एवं तावदेक कारणिको 'निक्कारणिओ य सो वि ठाणट्ठिओ दूतिज्जंतओ य भणिओ' । इदानीमनेकान् प्रत्युपेक्षकान् प्रतिपादयन्नाह –

**१९६ णेगा वि होंति दुविहा का[१]रणनिक्कारणे दुविह भेओ ।**
**जं एत्थं नाणत्तं तमहं वोच्छं समासेणं ॥१२४॥ नि०**

**णेगा वि** गाहा । **अनेकेऽपि द्विविधा भवन्ति,** कतमेन द्वैविध्येन ? अत आह-**कारणनिक्कारण** त्ति **कारण**मङ्गीकृत्या**कारणं** चाङ्गीकृत्य द्विधा, **दुविह भेदो** त्ति **पुनर्द्विविधो भेदः,** ये ते कारणिकास्ते स्थानस्थिता दूइज्जमानाश्च, येऽपि ते निष्कारणिकास्तेऽपि स्थानस्थिता दूइज्जमानाश्च । "[A]तत्थ जे कारणिआ दूतिज्जंतगा ठाणट्ठिआ अ ते तहेव असिवादीकारणेहिं जहा पुव्वं एगस्स गमणविहिं वक्खाणंतेण भणिअं, जे वि निक्कारणिआ दूइज्जंता ठाणट्ठिआ य ते वि तह च्चेव थूभाईहिं" **'जं एत्थं नाणत्तं' यदत्र नानात्वं** यो विशेष**स्तमहं वक्ष्ये समासतः** ॥१२४॥

इदानीमनन्तरगाथोक्ताः सर्व एव साधवः सामान्येन चतुर्विधा भवन्ति ।

**१९७ जयमाणा विहरंता ओहाणाहिंडगा चउद्धा उ ।**
**जयमाणा तत्थ तिहा नाणड्ढा दंसणचरित्ते ॥१२५॥ नि०**

**जयमाणा** गाहा । **'यती प्रयत्ने' (पा० धा० ३०) यतमानाः** प्रयत्नपराः, **विहरंता विहरमाणा** मासकल्पेन पर्यटन्तः, **ओहाण** त्ति **अवधावमानाः** प्रव्रज्यातोऽपसर्पन्त इत्यर्थः। तथा **आहिण्डका** भ्रमणशीलाः, एवमेते **चतुर्विधाः** । इदानीं **"यथोद्देशं निर्देशः"** इति न्यायाद्यतमाना उच्यन्ते-**जयमाणा तत्थ तिहा** । **यतमानास्त्रिप्रकाराः,** कथम् ? **नाणड्ढा दंसणचरित्ते** ग्रहीतुं धारयितुं वा शक्तिरस्ति, तदाऽऽत्मानं विसर्ज्यान्यत्र व्रजन्ति । एवमेव **तत्त्वार्था**दिदर्शनप्रभावकशास्त्रार्थं च

---

A. तत्र ये कारणिका विहरमाणा स्थानस्थिताश्च ते तथैवाऽशिवादीकारणैर्यथा पूर्वमेकस्य गमनविधिं व्याख्यायता भणितम्, येऽपि निष्कारणिका विहरमाणा स्थानस्थिताश्च तेऽपि तथैव स्तूपादिभिः ।

१. कारणनिक्कारणा दा.

व्रजन्ति । तथा "[A]तत्थ **नाणट्ठा** कहं जतंति ? जदि आयरिआणं जं सुत्तं अत्थो वा तं गहितं, अण्णा य से सत्ती अत्थि घित्तुं धारेउं वा, ताहे विसज्जावेत्ता अत्ताणं अण्णत्थ वच्चंति । एवं चेव **दंसण**पभावगाणं सत्थाणं अट्ठाए वच्चंति," **तत्त्वार्थादीनाम्** । तथा "[B]चरित्तट्ठाए देसंतरं गयाणं केणइ कारणेणं, तत्थ जदि [१]पुढविकाइयादीयं पउरं ततो चरित्तं न सुज्झइ ताहे ते निग्गच्छन्ति, एसा चरित्तजयणा जयमाणा खलु, एवं तिविहाओ समासतो समक्खाया । दारं" ॥१२५॥

**१९८ जयमाणा खलु एवं तिविहा उ समासओ समक्खाया ।**
**विहरंता वि य दुविहा गच्छगया निग्गया चेव ॥६॥ प्र०**

इदानीं विहरमाणका उच्यन्ते-अत आह-'विहरंता वि अ दुविहा' विहरमाणका द्विप्रकारकाः, "गच्छगया निग्गया चेव ।" एतदेव व्याख्यानयन्नाह –

**१९९ पत्तेयबुद्ध जिणकप्पिया य पडिमासु चेव विहरंता ।**
**आयरियथेरवसभा भिक्खू खुड्डा य गच्छम्मि ॥१२६॥ नि०**

**पत्तेयबुद्ध** गाहा । **प्रत्येकबुद्धा** [८१]**जिनकल्पिकाश्च** [८२]प्रतिमाप्रतिपन्नकाश्च– ★**मासाई सत्तंता** इत्येवमादि, एते गच्छनिर्गता **विहरमाणकाः** । इदानीं गच्छप्रविष्टा उच्यन्ते-**आयरिअ आचार्यः** प्रसिद्धः, **स्थविरो** यः सीदन्तं ज्ञानादौ स्थिरीकरोति, **वृषभो** वैयावृत्यकरणसमर्थः, **भिक्षव** एतद्व्यतिरिक्ताः, **क्षुल्लकाः** प्रसिद्धाः, एते **गच्छगताः** ।

आह-गच्छगता गच्छनिर्गताश्चेत्थमुपन्यासः प्राक् कृतः, तत्कस्मात् जिनकल्पिकादयो गच्छनिर्गता आदौ व्याख्याताः ? उच्यते-जिनकल्पिकादीनां प्राधान्यख्यापनार्थम् ।

---

८१. जिनकल्पिकाः-जिनानां कल्प आचारो जिनकल्पः स विद्यते येषां ते । (प्रव. ६० द्वार) जिनानामिव कल्पो जिनकल्प उग्रविहारविशेषः, तेन चरन्तीति जिनकल्पिकाः । (धर्म. २ अधि.)

८२. प्रतिमाप्रतिपन्नः-प्रतिमा भिक्षुप्रतिमा द्वादशसमयप्रसिद्धास्ताः प्रतिपन्नोऽभ्युपगतवान् । (स्था. ४ ठा. १ उ.)

A. तत्र ज्ञानार्थं कथं यतन्ते ? यदि आचार्याणां यत् सूत्रमर्थो वा तं गृहीतम्, अन्या च तस्य शक्तिरस्ति ग्रहीतुं धारयितुं वा, तदा विसर्ज्य आत्मानमन्यत्र व्रजन्ति ।

B. चारित्रार्थं देशान्तरगतानां केनापि कारणेन, तत्र यदि पृथ्वीकायादिकं प्रचुरं ततश्चारित्रं न शुध्यति तदा ते निर्गच्छन्ति। एषा चारित्रयतना, यतमाना खल्वेवं त्रिविधा समासतः समाख्याता । द्वारम् ।

१. ०कायादीयं प.दा.

★ मासाई सत्तंता पढमाबिइतइयसत्तराइदिणा। अहराइ एगराई भिक्खूपडिमाण बारसगं ॥ (पञ्चा. १८-३)

आह-प्रथममेव कथमित्थं[1] नोपन्यासः कृतः ? उच्यते-तेऽपि जिनकल्पिकादयो गच्छपूर्वा[2] एवास्यार्थस्य ज्ञापनार्थम्, आह-प्रत्येकबुद्धा न गच्छनिर्गताः, न, तेषामपि जन्मान्तरे तन्निर्गतत्वसद्भावात्, यतस्तेषां नव पूर्वाणि पूर्वाधीतानि विद्यन्ते । द्वारम् ॥१२६॥

इदानीमवधावतः प्रतिपादयन्नाह —

**२०० ओहावंता दुविहा लिंगविहारे[3] य होंति नायव्वा ।**
**लिंगेणऽगारवासं नितिया[4] ओहावण विहारे ॥१२७॥ नि०**

**ओहावंता** गाहा । **अवधावन्तः** प्रव्रज्यादेरपसर्पन्तो **द्विविधा** द्विप्रकाराः, **लिंगविहारे य** त्ति **लिङ्गादवधावन्ति**[5] अपसर्पन्ति गृहस्थतां प्रतिपद्यन्त इत्यर्थः । **विहारे य** त्ति **उद्यतविहाराद्** येऽवधावन्ति, अपसर्पन्ति पार्श्वस्थादयो **भवन्ति**, एवमेते **विज्ञेया** भवन्त्यवधावन्तः[6] । एतदेव व्याख्यानयन्नाह-'**लिंगेणऽगारवासं**' **लिङ्गेनावधावन्** गृहवासं प्रतिपद्यते, **नितिया ओहावण विहारे** । **विहारादवधावन्नित्यादिषु** वासं करोति । दारं ॥१२७॥

इदानीमाहिण्डकान् प्रतिपादयन्नाह —

**२०१ उवएस अणुवएसा दुविहा आहिंडआ मुणेयव्वा ।**
**उवएस देसदंसण थूभाई होंतिऽणुवएसा ॥१२८॥ नि०**

**उवएस** गाहा । तत्रैके **उपदेशा**हिण्डकाः, अपरे**ऽनुपदेशा**हिण्डकाः, एवमेते **द्विविधा आहिण्डका मुणितव्याः** । तत्र **उवएस** त्ति द्वारपरामर्शः, **देसदंसण** त्ति **देशदर्शनार्थं** द्वादश वर्षाणि ये पर्यटन्ति सूत्रार्थौ गृहीत्वा, एते उपदेशाहिण्डकाः । अनुपदेशे त्वमी **भवन्ति**-'**थुभादी होंतिऽणुवएसा**' **स्तूपादि**गमनशीला **अनुपदेशा**-हिण्डकाः । उक्ता आहिण्डकाः । द्वारम् ॥१२८॥

अधुना ये ते गच्छगता विहरमाणकास्तेषामेव विधिं प्रतिपादयन्नाह —

**२०२ पुण्णंमि मासकप्पे वासावासासु जयणसंकमणा[7] ।**
**आमंतणा य[8] भावे सुत्तत्थो न हायई जत्थ ॥१२९॥ नि०**

---

१. कस्मादित्थं नो० क.ल. २. गच्छगतपूर्वा दा. ३. लिंगविहारेण ह० संपा० ४. नीयादोहावण हे० ५. ०वन्ते क. ६. अवधावमाना दा. ७. संकमण हे. संपा० ८. उ हे०

**पुण्णंमि** गाहा । **मासकल्पे** मासावस्थाने **पूर्णे** सति, तथा **वासावासासु** त्ति वर्षायां वासो **वर्षावासः,** तस्मिंश्च यो वासकल्पस्तस्मिन् पूर्णे सति । पुनश्च **यतनया सङ्क्रमणा**[1] क्षेत्रसङ्क्रान्तिः कर्त्तव्या । किं कृत्वा ? **आमंतणा य** त्ति **आमन्त्रणमा**चार्यः शिष्यानामन्त्रयते, पृच्छति क्षेत्रप्रत्युपेक्षकप्रेषणकाले, **च**शब्दादागतेषु [2]क्षेत्रप्रत्युपेक्षकेषु क्षेत्रगमने वा, **भावे** त्ति आगतेषु क्षेत्रप्रत्युपेक्षकेषु **भावं** परीक्षते । कस्य किं क्षेत्रं रोचते? तत्र सर्वेषां मतं गृहीत्वा **यत्र सूत्रार्थ**हानि**र्न** भवति तत्र गमनं करिष्यत्याचार्यः ॥१२९॥

इदानीमेनामेव गाथां व्याख्यानयति-अत्र यदुपन्यस्तं 'जयणसंकमण'त्ति तद्व्याख्यानयन्नाह –

**२०३ अप्पडिलेहियदोसा वसही भिक्खं[3] व दुल्लहं होज्जा ।**
**बालाइगिलाणाण व पाओग्गं अहव सज्झाओ ॥१३०॥ नि०**

**अप्पडिलेहिअ** गाहा । **अप्रत्युपेक्षणे दोषा** भवन्ति, ते चामी-**वसहि** त्ति कदाचिद्**वसतिर्दुर्लभा भवेत्,** तथा **भिक्षा वा** दुर्लभा भवेत्, तथा **बालादिग्लानानां प्रायोग्यं दुर्लभं भवेत् । अथवा स्वाध्यायो** दुर्लभः, मांसाद्याकीर्णत्वात् ॥१३०॥

तस्मात् किम् ? –

**२०४ तम्हा पुव्वं पडिलेहिऊण पच्छा विहीए संकमणं ।**
**पेसेइ जइ अणापुच्छिउं गणं तत्थिमे दोसा ॥१३१॥ नि०**

**तम्हा पुव्वं** गाहा । **तस्मात् पूर्वमेव प्रत्युपेक्ष्य** निरूप्य **पश्चाद् विधिना** यतनया **सङ्क्रमणं** कर्त्तव्यम्। इदानीं यदुपन्यस्तं 'आमंतणा य' त्ति (नि.१२९)अवयवं तं व्याख्यानयन्नाह-**पेसेति जइ अणापुच्छिउं गणं । प्रेषयति** क्षेत्रप्रत्युपेक्षकान् **यदि गणमनापृच्छ्य तत्रेमे दोषा** वक्ष्यमाणलक्षणाः ॥१३१॥

**२०५ अइरेगोवहिपडिलेहणाए कत्थ व गय त्ति पुच्छंति ।**
**खेत्तं पडिलेहेउं अमुगत्थ गय त्ति तं दुट्ठं ॥१३२॥ नि.**

**अइरेगोवहि** गाहा । यदा क्षेत्रप्रत्युपेक्षकाः शेषप्रव्रजितानानापृच्छ्य गतास्तदा कथं ज्ञायन्ते ? अत आह-**अतिरिक्तोपधिप्रत्युपेक्षणायां** सत्यां ते [4]पृच्छन्ति-**कुत्र**

---

१. सङ्क्रामणा दा. २. क्षेत्रगमनेषु. भावे क. ३. भिक्ख व, ह. संपा० ४. प्रपृच्छति क.

**गतास्त इत्येवं पृच्छन्ति** । आचार्योऽप्याह-**क्षेत्रं प्रत्युपेक्षितुममुकत्र** क्षेत्रे **गता इति**, तेऽप्याहुः- **तं दुट्ठं, तत्** क्षेत्रं न शोभनम् ॥१३२॥

यतस्तत्र गच्छताम् –

**२०६ तेणा सावय मसगा ओमऽसिवे सेह इत्थि पडिणीए ।**
**थंडिल्ल अगणि उड्डाण एवमाई भवे दोसा ॥१३३॥ नि.**

**तेणा** गाहा । **स्तेना** अर्द्धपथे, **श्वापदानि** व्याघ्रादीनि, **मशका** वाऽतिदुष्टाः, **ओमं** दुर्भिक्षम्, **असिवं** देवताकृत उपद्रवः, यदिवा **सेह** त्ति अभिनवप्रव्रजितस्य स्वजना विद्यन्ते ते चोत्प्रव्राजयन्ति, **इत्थि** त्ति **स्त्रियो** वा मोहप्रचुराः, **पडिणीए** त्ति **प्रत्यनीको**पद्रवश्च, **थंडिल्ल** त्ति **स्थण्डिलानि** वा तत्र न विद्यन्ते, **अगणि** त्ति **अग्निना** वा दग्धः स देशः, **उड्डाण** त्ति **उत्थित** उद्वसित स देशो वाऽपान्तराल इत्येवमादयो **दोषा भवन्ति** ॥१३३॥

तत्रापि प्राप्तस्यैते दोषाः –

**२०७ पच्चंत तावसीओ सावय दुब्भिक्ख तेणपउराइं ।**
**नियग पदुट्ठुड्डाणे फेडणा[१] हरियपण्णी य ॥१३४॥ नि०**

**पच्चंत** गाहा । स हि **प्रत्यन्त**देशो म्लेच्छाद्युपद्रवोपेतः, तापस्यःतापसप्रव्रजिताः ताश्च प्रचुरमोहाः संयमाद् भ्रंशयन्ति, **श्वापद**भयम्, **दुर्भिक्ष**भयम्, **स्तेनप्रचुराणि** वा क्षेत्राणि, **नियग** त्ति अभिनवप्रव्रजितस्य **निजः** स्वजनादिः स चोत्प्रव्राजयति, **पदुट्ठ** त्ति **प्रद्विष्टो** वा तत्र कश्चित्, **उड्डाणे** त्ति **उत्थित** उद्वसितः स कदाचिद्देशो भवेत्, **फेडण** त्ति प्राक् तत्र वसतिरासीत्, इदानीं तु कदाचिदपनीता भवेत् । **हरितपण्णी य** त्ति **हरितं** तत्र शाकादि बाहुल्येन भक्ष्यते, तच्च साधूनां न कल्पते दुर्भिक्षप्रायं वा, अथवा **हरियपण्णी य** त्ति तत्र देशे केषुचिद् गृहेषु राज्ञो दण्डं दत्त्वा देवतायै बल्यर्थं पुरुषो मार्यते, स च प्रव्रजितादिर्भिक्षार्थं प्रविष्टः सन्, तत्र गृहस्योपर्यार्द्रा वृक्षशाखा चिह्नं क्रियते, तच्च गृहीतसङ्केतो दूरत एव परिहरति, अगृहीतसङ्केतश्च विनश्यति, तस्माद् गणं पृष्ट्वा गन्तव्यमिति । अथवाऽन्यकर्तृकीयं[२] गाथा, ततश्च न पुनरुक्तदोषः ॥१३४॥

---

१. फेडणया, हे० २. ०केयं गा. क.

इदानीं स आचार्यः क्षेत्रप्रत्युपेक्षकान् प्रेषयन् सर्वं गणमालोचयति । अथ तत्र विशिष्य कञ्चिदेकमालोचयति शिष्यादिकं ततश्चैते दोषा भवन्ति –

**२०८ सीसे जइ आमंते पडिच्छगा तेण बाहिरं भावं ।**
**अह[1] इयरे तो सीसा ते वि समत्तंमि गच्छंति ॥१३५॥ नि०**

**सीसे** गाहा । **शिष्यान्** विशिष्य केवलान् **यद्यामन्त्रयति** ततश्च को दोषः ? **पडिच्छग** त्ति सूत्रार्थग्रहणार्थमायाता ये साधवस्ते **प्रतीच्छकाः, तेण** त्ति **तेना**लोचनेन **बाहिरं भावं** ति **बहिर्भावं** चिन्तयन्ति, बाह्या वयमत्र । **अथेतरान्** प्रतीच्छकाना-लोचयति **ततः शिष्या** बहिर्भावं मन्यन्ते, प्रतीच्छकाश्च सूत्रार्थग्रहण**समाप्तौ गच्छन्ति,** ततश्चाचार्य एकाकी [2]सञ्जायत इत्ययं दोषस्तावत् ॥१३५॥

अथ वृद्धान् पृच्छति ततः –

**२०९ तरुणा बाहिरभावं न य पडिलेहोवहिं न किइकम्मं ।**
**मूलगपत्तसरिसगा परिभूया वच्चिमो थेरा ॥१३६॥ नि०**

**तरुणा** गाहा । वृद्धानालोचयत**स्तरुणा बहिर्भावं** मन्यन्ते, ततश्च ते तरुणाः किं कुर्वन्त्यत आह–**न य पडिलेहोवधिं । उपधेः प्रत्युपेक्षणां न** कुर्वन्ति, **न च कृतिकर्म** पादप्रक्षालनादि कुर्वन्ति । अथ तरुणानेव पृच्छति ततः को दोषः ? वृद्धा एवं चिन्तयन्ति–'**मूलगपत्तसरिसया' मौलमाद्यं** यत्**पर्णं** निस्सारं परिपक्वप्रायं तत्तुल्या वयमत एव च **परिभूतास्ततश्च व्रजाम** इत्येवं **स्थविराश्चि**न्तयन्ति, यदिवा '**मूलयपत्तसरिसया' मूलकपत्र**तुल्याः शाकपत्रप्राया वयम् ॥१३६॥

अथ मतं स्थविरा न प्रष्टव्या एव, तत्तु न, यत आह –

**२१० जुण्णमएहिं विहूणं जं जूहं होइ सुट्ठु वि महल्लं ।**
**तं तरुणरहसपोइय मयगुम्मइअं सुहं हंतुं ॥१३७॥ नि०**

**जुण्णमएहिं** गाहा । **जीर्णमृगैर्विहीनं यद्यूथं भवति सुष्ठ्वपि महत्तद्यूथं तरुणरभसे** रागे **पोतितं** निमग्नं **मदेन गुल्मयितं** मूढं **सुखं हन्तुं** विनाशयितुं सुखेन तद्व्यापाद्यते ॥१३७॥

यस्मादेवं तस्मात्सर्व एव मिलिताः सन्तः प्रष्टव्याः, कथम् ?

---

१. जइ ह० हे० २. सञ्जात इ० क०

**२११ थुइमंगलमामंतण नागच्छइ जो व पुच्छिओ न कहे ।**
**तस्सुवरिं ते दोसा तम्हा मिलिएसु पुच्छिज्जा ॥१३८॥ नि०**

**थुइमंगल** गाहा । **स्तुतिमङ्गलं** कृत्वा प्रतिक्रमणस्यान्ते स्तुतित्रयं पठित्वा ततश्चा**मन्त्रयति,** आकारिते च दूरस्थो यदि **नागच्छति** कश्चि**द्यो वा पृष्टः** स**न्न कथयति** तत**स्तस्योपरि ते दोषाः, तस्मान्मिलितेषु प्रच्छनीयमे**कत्रीभूतेषु ॥१३८॥

**२१२ केई भणन्ति पुव्वं पडिलेहिए एवमेव गंतव्वं ।**
**[१]तं च न जुज्जइ वसही फेडण आगंतु पडिणीए ॥१३९॥ नि०**

**केई** गाहा । **केचना**चार्या एवं ब्रुवते-**प्राक् प्रत्युपेक्षिते** यस्मिन् क्षेत्रे प्रागपि स्थिता आसन् तस्मिन् पुनरप्रत्युपेक्ष्य **गम्यते, तच्च न युज्यते,** यस्मात्तत्र कदाचित् **वसही फेडण** त्ति सा प्राक्तनी **वसति**रपनीता, **आगन्तुको** वा **प्रत्यनीकः** सञ्जातः, अत एतद्दोषभयात् पूर्वदृष्टाऽपि वसतिः प्रत्युपेक्षणीया ॥१३९॥

इदं च ते प्रष्टव्याः –

**२१३ कयरी दिसा पसत्था ? अमुई सव्वेसि अणुमए गमणं ।**
**चउदिसि ति दु एगं वा सत्तग पणगं तिग जहण्णं ॥१४०॥ नि०**

**कयरी** गाहा । **कतरा दिक् प्रशस्ता** शोभना ? सुक्षेमपथेत्यर्थः । तेऽप्याहुः- **अमुई अमुका** दिक् सुक्षेमेति । एवं **सर्वेषां** यदा**नुमता**भिरुचिता भवति पन्था इत्यर्थः, तदा **गमनं** कर्त्तव्यम् । तत्र **चतसृष्वपि दिक्षु** पूर्वदक्षिणपश्चिमोत्तरासु प्रत्युपेक्षकाः प्रयान्ति, अथवा चतसृणां दिशामुपद्रवादिसम्भवे **तिसृषु** यान्ति, तदभावे **द्वयो**र्दिशोर्यान्ति, तदभावेऽ**प्येकस्यां** दिशि । तासु च दिक्षु व्रजन्तः कियन्तो व्रजन्त्यत आह-**सत्तग पणगं तिग जहण्णं** एकैकस्यां दिश्युत्कृष्टतः **सप्त सप्त** प्रयान्ति, सप्तानामभावे **पञ्च पञ्च** व्रजन्ति, पञ्चानामभावे **जघन्येन त्रयस्त्रयः** प्रयान्तीति ॥१४०॥

अत्र च ये आभिग्रहिकास्ते प्रहेतव्याः, तेषां त्वभावे –

**२१४ अणभिग्गहिए वावारणा उ तत्थ उ इमे न वावारे ।**
**बालं वुड्ढमगीअं जोगिं वसहं तहा खमगं ॥१४१॥ नि०**

---

१. तं पुण न. ह० तं तु हे० संपा०

**अणभिग्गहिए** गाहा । **अणभिग्गहिए** त्ति यैरभिग्रहो न गृहीतस्तान् **व्यापारयेद्** गमनाय चोदयेदित्यर्थः। **तत्र तु बालं वृद्धमगीतार्थं योगिनं वृषभं** वैयावृत्त्यकरं **तथा क्षपकं** मासक्षपकादिकम् । **एतान्न व्यापारयेद्** गमनाय ॥१४१॥

इदानीमेतामेव गाथां भाष्यकृद् व्याख्यानयन्नाह –

**२१५ हीरेज्ज व [१]कीलेज्ज व कज्जाकज्जं न याणई बालो ।**
**सो य [२] अणुकंपणिज्जो न दिंति वा किंचि बालस्स ॥६८॥ निभा०**

**हीरेज्ज व** गाहा । बाले प्रेष्यमाणेऽयं दोषो **ह्रियेद्** म्लेच्छादिना **क्रीडेद्वा** बालस्वभावत्वात् । **कार्याकार्यं** च कर्त्तव्याकर्त्तव्यं वा **न जानाति बालः । स च** बालः क्षेत्रप्रत्युपेक्षणार्थं प्रहितः सन् **अनुकम्पया** सर्वं लभते, आगत्य चाचार्याय कथयति-यदुत तत्र सर्वं लभ्यते, गतश्च तत्र गच्छो यावन्न किञ्चिल्लभते, [८३]चेल्लकस्यैवानुकम्पया स लाभ आसीद्, **[३]अथवा न ददाति किञ्चिद्बालाय** परिभवेनातस्तं न व्यापारयेत् ॥६८॥

वृद्धोऽपि न प्रेषणीयः, यतस्तत्रैते दोषाः –

**२१६ वुड्ढोऽणुकंपणिज्जो चिरेण न य मग्गथंडिले पेहे ।**
**अहवा वि बालवुड्ढा असमत्था गोयरतिगस्स ॥६९॥ निभा०**

**वुड्ढो** गाहा । **वृद्धोऽनुकम्पनीय**स्ततश्चासावेव लभते नान्यः, तथा **चिरेण** त्ति **चिरेण** प्रभूतेन कालेन गमनमागमनं च करोति, **न च मार्गं** पन्थानं प्रत्युपेक्षितुं समर्थः, **नापि स्थण्डिलानि** प्रत्युपेक्षितुं समर्थः । इदानीं तु द्वयोरपि बालवृद्धयो-स्तुल्यदोषोद्भावनार्थमाह-**अथवा बाला वृद्धाश्चासमर्था** अशक्ताः **गोचरत्रिकस्य** त्रिकालभिक्षाटनस्येत्यर्थः । दारं ॥६९॥

अगीतार्थेऽपि प्रेष्यमाण एते दोषाः

**२१७ पंथं च मासवासं उवस्सयं [४]एच्चिरेण कालेणं ।**
**एहामो त्ति न याणइ चउव्विहमणुण्ण ठाणं च ॥७०॥ निभा०**

**पंथं च** गाहा । **पन्थानं** मार्गं **न जानाति** परीक्षितुं **मासं** ति **मासकल्पं** न

---

८३. चेल्लअ-चेलकः-शिष्यः, बालसाधुरित्यर्थः । संटी.

१. खेलेज्ज, दा० २. वा दा० सं. । ३. अथ न ददति किञ्चिद् बा० क. ४. केच्चिरेण, हे०

जानाति, **वासं** ति **वर्षाकल्पं न जानाति,** तथा **उपाश्रयं** वसतिं परीक्षितुं **न जानाति** । तथा शय्यातरेण पृष्टः कदा आगमिष्यथ? ततश्च ब्रवीति- **एच्चिरेण कालेणं एहामो त्ति । इयता कालेनार्द्ध**मासादिना **एष्याम इत्ये**वं वदतो यो दोषोऽवधिभाषणजनितस्तं **न जानाति,** यतः कदाचिदन्या दिक् [1]शोभनतरा शुद्धा भवति तत्र गम्यते, अतो नैवं वक्तव्यम्-एतावता कालेनैष्यामः । तथा **चउव्विहमणुण्ण** त्ति तत्रोपाश्रये शय्यातर**श्चतुर्विधमनुज्ञाप्यते** द्रव्यतः क्षेत्रतः कालतो भावतश्चेति । तत्र द्रव्यतस्तृणडगलाद्यनुज्ञाप्यते, क्षेत्रतः [2]पात्रप्रक्षालनभूमिरनुज्ञाप्यते, कालतो दिवा रात्रौ वा निस्सरणमनुज्ञाप्यते, भावतो ग्लानस्य कस्यचिद्भावप्रणिधानार्थं कायिकासञ्ज्ञादि निरूप्यते, एतां चतुर्विधामनुज्ञामनुज्ञापयितुं **न जानाति** । **ठाणं च** ति वसतिः कीदृशे प्रशस्ते **स्थाने** भवतीत्येतन्न **जानाति** । द्वारम् ॥७०॥

योगिनमपि न प्रेषयेत्, कस्मात् ? –

**२१८ तूरंतो व ण पेहे पंथं पाढट्ठिओ न चिरं हिंडे ।**
**विगइं पडिसेहेइ य तम्हा जोगिं न पेसिज्जा ॥७१॥ निभा०**

**तूरंतो** गाहा । **त्वरमाणः सन्न प्रत्युपेक्षते पन्थानम्,** तथा **पाठार्थी सन्न चिरं** भिक्षां **हिण्डते,** तथा लभ्यमाना **विकृतीर्द**ध्यादिकाः **प्रतिषेधयति, तस्माद्योगिनं न प्रेषयेत्** । दारं ॥७१॥

वृषभोऽपि न प्रेषणीयः, यत एते दोषा भवन्ति –

**२१९ ठवणकुलानि न [3]साहे सिड्ढा वि न दिंति जा विराहणाया ।**
**परितावण अणुकंपण तिण्हऽसमत्थो भवे खमगो ॥७२॥ निभा०**

**ठवणकुल** गाहा । वृषभो हि प्रेष्यमाणः कदाचिद्रुषा **स्थापनाकुलानि न साहि** त्ति **न** कथयति, अथवा **सिड्ढा वि न दिंति** त्ति कथितान्यपि तानि स्थापनाकुलानि **न ददति** अन्यस्य, तस्यैव तानि परिचितानि, **जा विराहणय** त्ति ततश्च स्थापनाकुलेष्वलभ्यमानेषु **या विराधना** ग्लानादीनां सा सर्वा आचार्यस्य दोषेण कृता भवति । दारं । अथ क्षपकोऽपि न प्रेष्यते, यतः **परितापनं** दुःखासिका-ऽऽतपादिना भवति क्षपकस्य, **अणुकम्पण** त्ति **अनुकम्पया** वा लोकः क्षपकस्यैव ददाति नान्यस्य, तथा **तिण्हऽसमत्थो भवे खमओ** । **तिस्रो** वारा यद्भिक्षाटनं

---

१. शोभना शु० क० २. पत्रकप्र० क.ल. ३. साहइ हे०

तस्य वारत्रयाटनस्या**समर्थः क्षपकः** । द्वारम् ॥७२॥

यदा तु पुनः प्रेषणार्हा न भवन्ति —

**२२० एए चेव हविज्जा पडिलोमेणं तु पेसए विहिणा ।**
**अविही पेसिज्जंते ते चेव तहिं तु पडिलोमं ॥१४२॥ नि०**

**एए चेव** गाहा । **एत एव** बालादयो **भवेयु**स्तदा किं कर्त्तव्यमित्याह-**पडिलोमेणं तु पेसए विहिणा** अनुलोम उत्सर्गस्तद्विपरीतः प्रतिलोमोऽपवाद[1]स्तं **प्रतिलोम**मपवाद-मङ्गीकृत्यैतानेव बालादीन् **प्रेषयेत्**, कथम् ? **विधिना** यतनया वक्ष्यमाणया । यदा पुनस्त एव बालादयोऽविधिना प्रेष्यन्ते तदाऽ**विधिना प्रेष्यमाणेषु एतेषु 'ते चेव' त एव** दोषाः, क्व ? **तहिं तु** तस्मिन् क्षेत्रे प्रेष्यमाणानाम्, कथम् ? **पडिलोमं** ति **प्रतिलोम**मपवादमङ्गीकृत्य । अथवाऽ**विधिना प्रेष्यमाणेषु त एव** दोषाः, **तत्र पडिलोमं** ति अविधिः**प्रतिलोमो** विधिस्तेन प्रतिलोमविधिना प्रेषयेत् ॥१४२॥

इदानीं बालादीनां [2]प्रेषणार्हत्वे प्राप्ते यतना प्रतिपाद्यते-तत्र च [84]**गणावच्छेदकः** प्रेष्यते तदभावेऽन्यो गीतार्थः, तदभावेऽगीतार्थोऽपि प्रेष्यते, तस्य को विधिः ? —

**२२१ सामायारिमगीए जोगिमणागाढ खवग पारावे ।**
**वेयावच्चे दा[3]यण जुयल समत्थं व सहिअं वा ॥१४३॥ नि०**

**सामायारिअगीते** गाहा । **अगीतार्थस्य सामाचारी** कथ्यते, ततः प्रेष्यते, तदभावे **योगी** प्रेष्यते किं विशिष्टः ? **अणागाढे** त्ति [85]**अनागाढयोगी** बाह्ययोगी योगं निक्षिप्य पारयित्वा भोजयित्वा प्रेष्यते, ततस्तदभावे **क्षपकः** प्रेष्यते, कथम्? **पारावे** त्ति **पारयित्वा** भोजयित्वा, तदभावे वैयावृत्त्यकरः, एतदेवाह-**वेयावच्चे** त्ति **वैयावृत्त्यकरः** प्रेष्यते, **दायण** त्ति स च वैयावृत्त्यकरः कुलानि दर्शयति, तदभावे **जुयल** त्ति **युगलं** प्रेष्यते-वृद्धस्तरुणसहितः बालस्तरुणसहितो वा, **समत्थं व**

---

८४. गणावच्छेदकः-गणकार्यचिन्तकः, गच्छस्थितसाधुप्रायोग्यमौघिक-औपग्रहिकोपकरणं गच्छपरिपालनार्थं गृहीत्वा यो विचरणं करोति स गणावच्छेदकः कथ्यते । संटी.

८५. अनागाढयोगी-यस्मिन् योगे कारणविशेषमाश्रित्य निक्षेपो निष्क्रमो भवति स अनागाढयोगः । सोऽस्यास्ति इति अनागाढयोगी । संटी.

१. ०दः प्रति. क० २. अप्रेष० ल० ३. दावण हे०

**सहिअं व** त्ति **समर्थो** [८६]वृषभः प्रेष्यते तरुणेन **सह** वृद्धेन **वा सह**, द्वितीयो **व**कारः पादपूरणः । आह-प्रथमं बालादय उपन्यस्ताः, तत्कस्मात्तेषामेव प्रथमं प्रेषणविधिर्न प्रतिपादितः ? उच्यते-अयमेव प्रेषणक्रमः, यदुत-प्रथममगीतार्थः प्रेष्यते पश्चाद्योगिप्रभृतय इति । आह-इत्थमेवोपन्यासः कस्मान्न कृतः ? उच्यते-अप्रेषणार्हत्वं सर्वेषां तुल्यं वर्त्तते ततश्च योऽस्तु सोऽस्तु प्रथममिति न कश्चिद्दोषः **॥१४३॥**

इदानीं तेषां गमनविधिं प्रतिपादयन्नाह –

**२२२ पंथुच्चारे उदए ठाणे भिक्खंतरा य वसहीओ ।**
**तेणा सावय वाला पच्चावाया य जाणविही ॥१४४॥ नि०**

**पंथुच्चारे** गाहा । **पंथ** त्ति **पन्थानं** मार्गं चतुर्विधया प्रत्युपेक्षणया निरूपयन्तो गच्छन्ति । **उच्चारे** त्ति **उच्चार**प्रश्रवणभूमिं निरूपयन्तो व्रजन्ति । **उदए** त्ति पानकस्थानानि निरूपयन्ति, येन बालवृद्धादीनां पानीयमानीय दीयते । **ठाणे** त्ति विश्राम**स्थानं** गच्छस्य निरूपयन्तो व्रजन्ति । **भिक्ख** त्ति **भिक्षां** निरूपयन्ति, येषु प्रदेशेषु लभ्यते येषु वा न लभ्यत इति । **अंतरा य वसहीओ** त्ति **अन्तराले वसतीश्च** निरूपयन्तो गच्छन्ति [१]यासु गच्छः सुखेन वस्तुं याति । **स्तेनाश्च** यत्र न सन्ति । यत्र [२]**व्यालाः** तथा **श्वापदा** न सन्ति श्वापदभुजगादयो न सन्ति । **पच्चावाय** त्ति एकस्मिन् पथि गच्छतां दिवा [३]**प्रत्यपायाः**, अन्यत्र रात्रौ [४]**प्रत्यपायाः**, तत्र निरूप्य गन्तव्यम् । **जाणविहि** त्ति अयं **गमनविधिः** ॥१४४॥

इदानीं भाष्यकार एनामेव निर्युक्तिगाथां प्रतिपदं व्याख्यानयन्नाह –

**२२३ [५]सो चेव उ निग्गमणे विही उ जो वन्निओ उ एगस्स ।**
**दव्वे खेत्ते काले भावे पंथं तु पडिलेहे ॥७३॥ निभा०**

**सो च्चेव** गाहा । **स एव विधिर्य एकस्य निर्गमने** उक्तः 'विसज्जणा पओसे' इत्येवमादिको विधिरुक्तः, इदानीं पथि व्रजतो विधिरुच्यते—स चायं-**दव्वे खेत्ते काले भावे पंथं तु पडिलेहे** । त्ति **द्रव्यतः क्षेत्रतः कालतो भावतश्च** मार्गं **प्रत्युपेक्षेत** ॥७३॥

---

८६. वृषभः-वृषभ उद्वहने-एष आगमिको धातुः समग्रसंयमभारोद्वहनाद् वृषभः । अतुलं नाणदंसणचरित्तं वा एवं सामण्णं" एष सामान्यत ऋषभशब्दस्य व्युत्पत्तिः । (आ.चू.२)

१. यासु सुखेन गच्छः वसितुं याति ल. यत्र गच्छः सुखेन वसन् याति दा. २. व्यालाः श्वापदा भुजगाः पच्चा. क.ल. ३. प्रत्यपायः दा ४. प्रत्यपायः दा. ५. स च्चेव य ह० हे०

इदानीमेतानेव द्रव्यादीन् व्याख्यानयन्नाह –

**२२४ कंटग तेणा वाला पडिणीया सावया य दव्वंमि ।**
**समविसमउदयथंडिल भिक्खायरि अंतरा खेत्ते ॥७४॥ निभा०**

**कण्टग तेणा** गाहा । तत्र **कण्टकाः स्तेना व्यालाः प्रत्यनीकाः** [१]**श्वापदाः**, एतेषां पथि यत्प्रत्युपेक्षणं सा **द्रव्य**विषया प्रत्युपेक्षणा भवतीति । द्वारम् । तथा **समविषमउदकस्थण्डिलभिक्षाचर्यादीनां** या **अन्तरे** पथि प्रत्युपेक्षणा सा **क्षेत्रतः** प्रत्युपेक्षणा । द्वारम् ॥७४॥

इदानीं कालप्रत्युपेक्षणां प्रतिपादयन्नाह –

**२२५ दिय राओ पच्चवाए य जाणई सुगमदुग्गमे काले ।**
**भावे सपक्खपरपक्खपेल्लणा निण्हगाईया ॥७५॥ निभा०**

**दियराओ** गाहा । **दिवा** प्रत्यपायो **रात्रौ** वा **प्रत्यपायो** न वा प्रत्यपाय इत्येत**ज्जानाति**, तथा दिवाऽयं पन्थाः **सुगमो दुर्गमो** वा रात्रौ वा सुगमो दुर्गमो वा एवं यत्परिज्ञानं सा **कालतः** प्रत्युपेक्षणा । द्वारम्। **भावतः** प्रत्युपेक्षणेयम्, यदुत स विषयः **स्वपक्षेण परपक्षेण** वाऽऽक्रान्तो व्याप्तः । कश्चासौ स्वपक्षः परपक्षश्चात आह–**निण्हगाईया निह्नवकादिः** स्वपक्षः, **आदि**ग्रहणाच्चरकपरिव्राजकादिः परपक्षः, एभिरनवरतं प्रार्थ्यमानो लोको न किञ्चिद् दातुमिच्छति, इत्येवं या निरूपणा सा भावप्रत्युपेक्षणा । दारं ॥७५॥

कथं पुनस्ते व्रजन्तीत्यत आह –

**२२६ [२]सुत्तत्थे अकरिंता भिक्खं काउं अइंति अवरण्हे ।**
**बिइयदिणे सज्झाओ पोरिसिअद्धाए संघाडो ॥१४५॥ नि०**

**सुत्तत्थे** गाहा । **'सूत्रपौरुषीमर्थपौरुषीं चाकुर्वन्तो'** व्रजन्ति तावद्यावदभिमतं क्षेत्रं [३]प्राप्तं भवति, पुनश्च ते किं कुर्वन्तीत्यत आह-**भिक्खं काउं अइंति अवरण्हे । भिक्षां कृत्वा** [४]तदासन्नग्रामे तद्बहिर्वा भक्षयित्वा पुन**श्चापराह्णे** प्रविशन्ति, ततो वसतिम[५]न्वेषयन्ति, लब्धायां च वसतौ कालं गृहीत्वा **द्वितीयदिवसे** किञ्चिन्न्यून-पौरुषीमात्रं कालं **स्वाध्यायं** कुर्वन्ति । पुनश्च **पोरिसिअद्धाए संघाडो** पोरिसिअद्धाए

---

१. श्वापदानि क.ल. २. सुत्तत्थं दा. ३. प्राप्ता भवन्ति पुन. दा. ४. ग्रामस्थास्तद् क० ५. अन्विषन्ति क.ल.

**पौरुषी**काले **सङ्घाटकं** कृत्वा भिक्षार्थं प्रविशन्ति, अथवा स्वाध्यायं कियन्तमपि कालं कृत्वा **पोरुसिअद्धाए अर्द्धपौरुष्या**मित्यर्थः । सङ्घाटकं कृत्वा प्रविशन्तीति ॥१४५॥

इदानीं ते सङ्घाटकेन प्रविष्टास्तत्क्षेत्रं त्रिधा विभजन्ति, एतदेवाह –

**२२७ खेत्तं तिहा करेत्ता दोसीणे नीणिअंमि उ वदंति ।**
**अण्णो लद्धो बहुओ [१]थोवं दे मा य रूसिज्जा ॥१४६॥ नि०**

**खेत्तं ति** गाहा । **क्षेत्रं त्रिधा कृत्वा** त्रिभिर्विभागैर्विभज्य एको विभागः प्रत्युषस्येव हिण्ड्यते, अपरो मध्याह्ने हिण्ड्यते, अपरोऽपराह्ने, एवं ते भिक्षामटन्ति । **दोसीणे नीणिअंमि उ वदंति । दोसीणे** पर्युषिताहारे निस्सारिते सति **वदन्ति- अण्णो लद्धो बहुओ, अन्य** आहारो **लब्धः** प्रचुरः, ततश्च **थोवं दे** त्ति **स्तोकं ददस्व** स्वल्पं प्रयच्छ, **मा य रूसिज्ज** त्ति **मा रोषं** ग्रहीष्यस्यनादरजनितम्॥१४६॥

एतच्चासौ परीक्षार्थं करोति, किमयं लोको दानशीलो ? न वेति ।

**२२८ अहव न दोसीणं चिय जायामो देहि दहिं घयं खीरं ।**
**खीरे गुलघयपेज्जा थोवं थोवं च सव्वत्थ ॥१४७॥ नि०**

**अहव ण दोसीणं** गाहा । **अथवा** एतदसौ साधुर्ब्रवीति-**न** वयं **दोसीणं चिय याचयामः,** किन्तु **देहि दहिं, दधि** याचयामः, तथा **खीरं क्षीरं** याचयामः, तथा **क्षीरे** लब्धे सति **गुडं घृतं पेयां ददस्व** । **सर्वत्र** सर्वेषु कुलेषु **स्तोकं स्तोकं** गृह्णन्ति ते साधवः, एवं तावत्प्रत्युषसि भिक्षाटनं कुर्वन्ति ॥१४७॥

अधुना मध्याह्नाटनविधिरुच्यते –

**२२९ मज्झण्हि पउर [२]भिक्खं परिताविय पिज्ज जूस पय कढिअं ।**
**[३]ओहट्ठमणोहट्ठं लब्भइ जं जत्थ पाउग्गं ॥१४८॥ नि०**

**मज्झण्हि** गाहा । **मध्याह्ने प्रचुरा भिक्षा** लभ्यते, **परिताविअ** त्ति **परितलितं** सुकुमारिकादि, तथा **पेया** लभ्यते, **जूषः** पटोलादेः, तथा **पयः क्वथितम्, ओहट्ठमणोहट्ठं लब्भति** प्रार्थितमप्रार्थितं वा **लभ्यते, 'जं जत्थ' यद्** यद्वस्तु **यत्र** क्षेत्रे **प्रायोग्यमिष्टं** तदित्थंभूतं क्षेत्रं प्रधानमिति ॥१४८॥

---

१. थेवं ह० हे० २. भिक्खा ह० ३. ओभट्ठमणोभट्ठं ह० हे० संपा०

इदानीमपराह्णे भिक्षावेलां प्रतिपादयन्नाह –

**२३० चरिमे परिताविय पेज्ज जूस आएस अतरणट्ठाए ।**
**एक्केक्कगसंजुत्तं भत्तट्ठं एक्कमेक्कस्स ॥१४९॥ नि०**

**चरिमे** गाहा । **चरिमे चरम**पौरुष्यामटन्ति, तत्र च **परितलितानि पेया जूषश्च** यदि लभ्यते ततः **आएस** त्ति प्राघूर्णकः, **अतरण** त्ति ग्लानस्तदेषामर्थाय भ्रमति, ततश्च तत्प्रधानम् । एवं तेऽटित्वा **भत्तट्ठं** ति उदरपूरणमेकस्यानयन्ति, कथम् ? **एक्केक्कगसंजुत्तं एकः** साधुरे**केन** [१]**सह युक्तो** यस्मिन्नानयने तदेकैकसंयुक्तमानयन्ति, **एक्कमेक्कस्स** त्ति परस्परस्यानयन्ति, एतदुक्तं भवति–द्वौ साधू अटतः, एकं आस्ते प्रत्युषसि, पुनर्द्वितीयवेलायां तयोर्द्वयोर्मध्यादेक आस्ते, अपरः प्रयाति प्रथमव्यवस्थितं गृहीत्वा, तृतीयवेलायां च यो द्वितीयवेलायां रक्षपालः स्थितः, स प्रथमस्थितरक्षपालेन सह व्रजति, इतरस्तु येन वारद्वयमटितं स तिष्ठति । एवमेषां त्रयाणा**मेकैकस्य** [२]सङ्घाटककल्पनया वारद्वयं पर्यटनं योजनीयम् ॥**१४९**॥

एवम् –

**२३१ ओसह भेसज्जाणि य कालं च कुले य दाणमाईणि ।**
**सग्गामे पेहित्ता [३]पेहंति ततो परग्गामे ॥१५०॥ नि०**

**ओसह** गाहा । एवम् **औषधं** हरितक्यादि, **भेषजं** पेयादि, [४]एतच्च प्रार्थनाद्वारेण प्रत्युपेक्षन्ते । **कालं च**[५] **त्रिकालं** प्रत्युपेक्षन्ते । **कु**[६]**ले य दाण**[७]**माईणि-कुलानि च दानश्राद्धकादीनि,** दाणे [८]अभिगम (निभा.१२१) इत्यादि एतानि कुलानि प्रत्युपेक्षन्ते। एतानि च **स्वग्रामे पेहित्ता प्रत्युपेक्ष्य ततः परग्रामे प्रत्युपेक्षन्ते**॥१५०॥

**२३२ चोयगवयणं दीहं पणीयगहणे य नणु भवे दोसा ।**
**जुज्जइ तं गुरुपाहुणगिलाणगट्ठा न [९]दप्पट्ठा ॥१५१॥ नि०**

**चोदगवयणं** गाहा । **चोदकवचनम्,** किमित्यत आह- **दीहं दीर्घं** भिक्षाटनं कुर्वन्ति ते **पणीयगहणे य** त्ति स्नेहवद्द्रव्यग्रहणे च **ननु भवन्ति दोषाः** । आचार्यस्त्वाह-'**जुज्जति तं' युज्यते** तत्सर्वं दीर्घं भिक्षाटनं प्रणीतग्रहणं च यतः '**गुरुपाहुणगिलाणगट्ठा' गुरुप्राघूर्णकग्लानार्थ**मसौ प्रत्युपेक्षते **न दप्पट्ठा, न दर्पार्थं**

१. संयुक्तो दा. २. सङ्घाटनकक. क. ३. हिंडंति ह. संपा. ४. तच्च प्रार्थनद्वा. क. ५. च त्तिकालं दा. च तिकालं क. ६. कुलं च क. ७. ०माईणं कु. क. ८. अहिगमसड्ढे.एवमादि दा. ९. तप्पट्ठा ह०

नात्मार्थं प्रणीतादेर्ग्रहणमिति ॥१५१॥

**२३३ जइ पुण खद्धपणीए अकारणे एक्कसिं पि गिण्हिज्जा ।**
**तहिअं दोसा तेण उ अकारणे खद्धनिद्धाइं ॥१५२॥ नि०**

**जइ पुण** गाहा । **यदि पुनः खद्धं** प्रचुरं **प्रणीतं** स्निग्धमेतान्य**कारणे** सकृदपि **गृह्णीयात्, तहिअं दोसा** ततस्तस्मिन् ग्रहणे **दोषा** भवेयुः । किं कारणम्? यतः **तेण उ तेन** साधुनाऽ**कारणे खद्धनिद्धाइं अकारणे** कारणमन्तरेणैव **खद्धाइं** भक्षितानि **स्निग्धानि** स्नेहवन्ति द्रव्याणि, अथवा **अकारणे खद्धनिद्धाइं** प्रचुरस्निग्धानि तेनासेवितानीति ॥१५२॥

**२३४ एवं रुइए थंडिल वसही देउलिअसुण्णगेहमाईणि ।**
**पाउग्गअणुण्णवणा वियालणे तस्स परिकहणा ॥१५३॥ नि०**

**एवं रुचिए** गाहा । **एवमुक्तेन** प्रकारेण **रुइए** त्ति **रुचिते**ऽभीष्टे क्षेत्रे सति **थंडिल** त्ति ततः **स्थण्डिलानि** प्रत्युपेक्षन्ते, येषु मृतः परिष्ठाप्यते [८७]महास्थण्डिलं **वसहि** त्ति **वसतिं** निरूपयन्ति, किं प्रशस्ते प्रदेश आहोस्विदप्रशस्ते सिंगक्खोडादियुक्त इति, पत्तनमध्ये शालादि, तदभावे **देउलिआ देवकुलं** शून्यं [१]प्रत्युपेक्षन्ते, **'सुन्नगेहमादीणि' शून्यानि गृहादीनि, आदिशब्देन** सभा गृह्यते, तां च वसतिं लब्ध्वा किं कर्त्तव्यम् ? **पाउग्गअणुण्णवणा प्रायोग्यानां** तृणडगलकादीनां शय्यातरोऽ**नुज्ञापनां** कार्यते, यथा उत्सङ्कलय एतानि वस्तूनि । अथासौ प्रायोग्यानि न जानाति **वियालणे** त्ति विचारयति, प्रायोग्यं किमभिधीयते ? इति, एवंविधे **विचारे तस्य** शय्यातरस्य कथ्यते **परिकहणा** यथाऽस्माकं तृणक्षार[२]डगलानि उत्सङ्कलयेति ॥१५३॥

**२३५ रुइए महथंडिल्लं पेहिज्जा चोयगो भणइ एवं ।**
**ठायंत च्चिय तुज्झ अमंगलं कुव्वह भंते! ॥७॥ प्र.**

**२३६ आहायरिओ-लोए नगरनिवेसंमि पढमगं वत्थुं ।**
**सीयाणं पेहिज्जइ न य दिट्ठं तं अमंगलयं ॥८॥ प्र.**

---

८७. महास्थाण्डिल्यम्-मृतोज्झनस्थानम् । (आव.)

१. प्रत्युपेक्षते- दा. २. ०डगलादि दा.

[एवं वसतौ लब्धायां किं विधेयम् ? इत्याह –

**पडिलेहियं च खेत्तं, थंडिलपडिलेहऽमंगले पुच्छा ।**
**गामस्स व नगरस्स व, सियाणकरणं पढम वत्थुं ॥१५०५॥**

यदा क्षेत्रं सम्यक् प्रत्युपेक्षितं भवति तदा 'महास्थण्डिलं' शबपरिष्ठापनभूमिलक्षणं प्रत्युपेक्षणीयम्। "अमंगले पुच्छ" त्ति नोदकः पृच्छति-भगवन् ! यूयं तिष्ठन्त एव किमेवममङ्गलं कुरुथ? सूरिराह - ग्रामस्य वा नगरस्य वा "सियाणकरणं" श्मशानस्थापनायोग्यं 'प्रथमम्' आद्यं वास्तु प्रत्युपेक्ष्यत इति वाक्यशेषः । इयमत्र भावना-ग्राम-नगरादीनां तत्प्रथमतया निवेश्यमानानां वास्तुविद्यानुसारेण प्रथमं श्मशानवास्तु निरूप्य ततः शेषाणि देवकुल-सभासौधादिवास्तूनि निरूप्यन्ते, लोके तथादृष्टत्वात्, न च तदमाङ्गलिकम्, एवमत्रापि महास्थण्डिलं प्रथमं प्रत्युपेक्ष्यमाणमस्माकं नामाङ्गलिकं भवतीति । [बृ.क.-१५०५]]

**२३७ दिसा अवरदक्खिणा दक्खिणा य अवरा य दक्खिणपुव्वा ।**
**अवरुत्तरा य पुव्वा उत्तर पुव्वुत्तरा चेव ॥९॥ प्र.**

[तच्च कस्यां दिशि प्रत्युपेक्षणीयम् ? उच्यते –

**दिस अवरदक्खिणा दक्खिणा य अवरा य दक्खिणापुव्वा ।**
**अवरुत्तरा य पुव्वा, उत्तर पुव्वुत्तरा चेव ॥१५०६॥**

प्रथमतो महास्थण्डिलप्रत्युपेक्षणविषया अपरदक्षिणा दिक् । अथ तस्यां नदी-क्षेत्रा-ऽऽरामादिर्व्याघातः ततो दक्षिणा । तस्या अभावे अपरा । तदलाभे दक्षिणपूर्वा । तदसत्त्वे अपरोत्तरा । तस्या अप्यप्राप्तौ पूर्वा । तस्या असम्भवे उत्तरा । उत्तरस्या अभावे पूर्वोत्तरा दिग् मन्तव्या । [बृ.क.-१५०६]]

**२३८ उद्दिट्ठकमेणासिं पढमं पडिलेहिऊण वाघाए ।**
**बीयं पडिलेहिज्जा एवं उद्देसओऽहाणी ॥१०॥ प्र.**

[उद्दिट्ठकमेणासिं. गाथा । आसां उद्दिट्ठक्रमेण प्रथमां प्रतिलिखेत् । व्याघाते द्वितीयां दिशं प्रत्युपेक्षेत। एवं उद्देशतः परिपाट्या हानिर्दिशां उत्तारः स्यात् । [ओ.नि.मा.-प्र.१०]]

**२३९ उद्देसणुपुव्वीए वुच्चत्थं पेहमाणिमे दोसा ।**
**जे य गुणा पढमाए ते वाघायंमि सेसासु ॥११॥ प्र.**

[उद्देसणुपुव्वीए गाथा । उद्देशानुपूर्व्या व्यत्ययस्तेन व्यतिक्रमेण प्रेक्ष्यमाणस्य दोषाः स्युः ये गुणाः प्रथमायां उक्ताः प्रचुरान्नपानलाभाद्यास्ते आद्याव्याघाते सति

द्वितीयादिषु शेषासु दिक्षु प्रत्युपेक्षमाणासु स्युः [ओ.नि.मा.-प्र.११]]

**२४० पउरन्नपाण पढमा बीयाए भत्तपाण न लहंति ।**
**तइआ उवगरणहरी नत्थि चउत्थीइ सज्झाओ ॥१२॥ प्र.**

**[ पउरन्न-पाण पढमा, बीयाए भत्त-पाण न लहंति ।**
**तइयाइ उवहिमाई, चउत्थी सज्झाय न करिंति ॥१५०७॥**

'प्रथमा' अपरदक्षिणा दिक् प्रचुरान्न-पाना भवति, तस्यां प्रत्युपेक्ष्यमाणायां प्रचुरमन्न-पानं प्राप्यत इत्यर्थः । यदि तस्यां सत्यां 'द्वितीयां' दक्षिणां प्रत्युपेक्षन्ते ततो भक्त-पानं न लभन्ते । अथ प्रथमायां कोऽपि व्याघातस्ततो द्वितीयामपि प्रत्युपेक्षमाणाः शुद्धाः । एवमुत्तरास्वपि दिक्षु भावनीयम् । तथा तृतीयस्यां "उवहिमाइ" त्ति उपधिः-वस्त्र-पात्रादिकः स्तेनैरपह्रियते, तस्मिंश्चापहृते तृणग्रहणा-ऽग्निसेवनादयो दोषाः । चतुर्थ्यां 'स्वाध्यायं न कुर्वन्ति' स्वाध्यायः कर्त्तव्यो न भवतीत्यर्थः । [बृ.क.-१५०७]]

**२४१ पंचमिआए असंखड छट्ठीइ गणस्स भेयणं जाण ।**
**सत्तमिआ गेलन्नं मरणं पुण अट्ठमी बिंति ॥१३॥ प्र.**

**पंचमियाए असंखड छट्ठीए गणस्स भेयणं जाण ।**
**सत्तमिया गेलन्नं, मरणं पुण अट्ठमीए उ ॥१५०८॥**

[पञ्चम्याम् 'असङ्खडं' कलहः साधूनां भवति । षष्ठ्यां 'गणस्य' गच्छस्य 'भेदनं' द्वैधीभवनं जानीहि । सप्तमी 'ग्लान्यं' ग्लानत्वं साधूनां जनयति । अष्टम्यां पुनर्मरणमपरस्य साधोरुपजायते । [बृ.क.-१५०८]]

**२४२ बुद्धीए पुव्वमुहं वसह णिओयंतु उत्तरे पासे ।**
**एवं पुव्वुत्तरओ वसहिं गिण्हिज्ज निद्दोसं ॥१४॥ प्र.**

[बुद्धीए गाथा । ग्रामादौ उत्तरपार्श्वे भूमौ बुद्धौ पूर्वाभिमुखं वृषभं निवेश्य एवं पूर्वोत्तरतो वसतिं निर्दोषां गृह्णीत । [ओ.नि.मा. प्र.१४]]

तान्निर्युक्तिगाथां भाष्यकारो व्याख्यानयति, तत्र रुचिते क्षेत्रे स्थण्डिलं [1]परीक्षते, तच्च बहुवक्तव्यत्वादुपरिष्टाद्वक्ष्यति = [नि.२९७ गाथायाम्] । वसतिस्तु कीदृशे स्थाने कर्त्तव्या कीदृशे न कर्त्तव्येति व्याख्यानयन्नाह –

**२४३ सिंगक्खोडे कलहो ठाणं पुण नत्थि होइ चलणेसुं ।**
**अहिट्ठाणि पोट्टरोगो पुच्छंमि य फेडणं [2]जाण ॥७६॥ निभा०**

---

१. परीक्ष्यते क. दा. २. जाणे ता.

**२४४ मुहमूलंमि य चारी सिरे य [१]कउहे य पूयसक्कारो ।**
**खंधे पिट्ठीए भरो पोट्टंमि य धायओ वसहो ॥७७॥ निभा०**

**सिंगक्खोडे** गाहा । तत्र वामपार्श्वोपविष्टपूर्वाभिमुखवृषभरूपं क्षेत्रं बुद्ध्या कल्पयित्वा तत इदमुच्यते-**शृङ्गखोडे** शृङ्गप्रदेशे यदि वसतिं करोति ततः **कलहो** भवतीति क्रियां वक्ष्यति । **स्थानमवस्थितिर्नास्ति**, क्व ? **चरणेषु** पादप्रदेशेषु, **अधिष्ठाने**ऽपानप्रदेशे वसतौ क्रियमाणायामुदर**रोगो** भवतीति क्रिया सर्वत्र योजनीया। **पुच्छे पुच्छ**प्रदेशे **फेडणं** अपनयनं भवति वसत्याः ॥७६॥

**मुहमूलंमि** गाहा । **मुखमूले चारी** भवति । **शिरसि** शृङ्गयोर्मध्ये **ककुदे च पूजासत्कारो** भवति। **स्कन्धे पृष्ठे च** [२]**भारो** भवति, साधुभिरागच्छद्भिराकुला भवति । उदरप्रदेशे तु नित्यं तृप्त एव भवति क्षेत्र**वृषभः** । वसतिर्व्याख्याता, तद्व्याख्यानाच्च देवकुलशून्यगृहाद्यपि व्याख्यातमेव द्रष्टव्यम् । इयं च वृषभपरिकल्पना यावन्मात्रं [३]वसतिनाऽऽक्रान्तं तस्मिन्नोपरिष्टात्, उपरिष्टात्तु तदनुसारेण कर्त्तव्या वसतिः॥७७॥

अधुना पाउग्गअणुण्णवण त्ति (नि. १५३) अमुमवयवं व्याख्यानयन्नाह, तत्र प्रायोग्यानामनुज्ञाऽनुज्ञापना कर्त्तव्या द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतः-

**२४५ दव्वे तणडगलाई अच्छण भाणाइधोवणा खित्ते ।**
**काले उच्चाराई भावे गिलाणाइ कूरुवमा ॥७८॥ निभा०**

**दव्वे तण** गाहा । **द्रव्यतो** द्रव्यमङ्गीकृत्य **तृणानां** संस्तारकार्थं **डगलानां** चाधिष्ठानप्रोञ्छनार्थं लेष्टूनामनुज्ञापना क्रियते । **क्षेत्रे** क्षेत्रविषयाऽनुज्ञापना **अच्छणं** ति आस्या यत्रास्यते यथासुखेन स्वाध्यायपूर्वकम्, '**भाणादिधोवणं**'[४] **भाजनादिधावनं** क्षालनं पात्रकादेर्यत्र क्रियते सा क्षेत्रानुज्ञा । **काल**विषयाऽनुज्ञा दिवा रात्रौ वा [५]**उच्चार**प्रश्रवणादिव्युत्सर्जनम् । **भाव**विषयाऽनुज्ञापना **ग्लानादेः** [६]साम्यकरणार्थं निवातप्रदेशाद्यनुज्ञापना क्रियते । इदानीं 'वियालणे तस्स परिकहण'त्ति (नि.१५३) अमुमवयवं व्याख्यानयन्नाह-**कूरुवमा** यदा शय्यातर एवं ब्रूते-इयति प्रदेशे मया[७]ऽवस्थानमनुज्ञातं भवतां नोपरिष्टात्, तदा तस्य परिकथना क्रियते **कूर**दृष्टान्तेन, यो

---

१. कवुहे ह० २. भरो क० ३. वसिमेना क० ४. धोवणा दा. ५. उच्चारादिव्युत्सर्जनम् क. ६. समीक० क सम्यक्क० ल. ७. स्थानं क. ल.

हि भोजनं कस्यचिद्ददाति स नियमेनैव भाजनोदकासनाद्यपि ददात्यनुक्तमपि सामर्थ्याक्षिप्तम्, एवं वसतिं प्रयच्छतोच्चारप्रश्रवणभूम्यादि सामर्थ्याक्षिप्तं सर्वमेव दत्तं भवति ॥७८॥

अथवेदमसौ शय्यातरो विचारयति, कियन्तं कालमत्र स्थास्यन्ति भवन्तः ? अस्मिन् विचारे 'तस्स परिकहणा' (नि.१५३) –

**२४६ जाव गुरूण य तुज्झ य केवइया तत्थ सागरेणुवमा ।**
**केवइ कालेणेहिह ? सागार ठविंति अण्णे वि ॥१५४॥ नि०**

**जाव गुरूण य** गाहा । **यावद् गुरूणां तव च** प्रतिभाति तावदवस्थानं करिष्यामः । अथैवमसौ विचारयति वियालणा, यदुत **केवइआ कियन्त** इहावस्थास्यन्ते ? तस्स परिकहणा क्रियते, **सागरेणोपमा,** यथा हि सागरः क्वचित्काले प्रचुरसलिलो भवति, क्वचित्पुनर्मर्यादावस्थ एव भवति, एवं गच्छोऽपि कदाचि-द्बहुप्रव्रजितो भवति, कदाचित्स्वल्पप्रव्रजित इति । अथासौ पुनरपि विआलणेत्ति विचारयति, यथा **केवइ कालेणेहिह** त्ति **कियता कालेनागमिष्यथ ?** तत्र [1]एवमुक्ताः सन्तः साधवः **सागार ठविंति** त्ति सविकल्पं कुर्वन्तीत्यर्थः । कथं कुर्वन्ति ? **'अण्णे वि' अन्येऽपि** साधवः क्षेत्रप्रत्युपेक्षणार्थं गता एव, ततश्च तदालोचनेनागमिष्याम इति ॥१५४॥

**२४७ पुव्वदिट्ठे विच्छइ अहव भणिज्जा हवंतु एवइआ ।**
**तत्थ न कप्पइ वासो असई खेत्ताणऽणुन्नाओ ॥१५५॥ नि०**

**पुव्वदिट्ठे विच्छति** गाहा । [2]यदि त्वसौ **पूर्वदृष्टानेवेच्छति** यैः प्राग् मासकल्पः कृत आसीत्, स्वभावेनेर्ष्यालुः स दृष्टप्रत्ययानिच्छति, नान्यान्, तत्र न कल्पते वासः। **अथवा भणेदसौ एतावन्त** एवात्र तिष्ठन्तु, **तत्र न कल्पते वासः**, न युज्यतेऽवस्थानम्, यतः साधवः कदाचित्स्तोकाः कदाचिद्बहवो भवन्ति। अथान्यानि क्षेत्राणि न सन्ति तदा **असती खेत्ताण** त्ति **क्षेत्राणामन्येषामभावे अणुन्नाउ** त्ति तस्यामेव वसताव**नुज्ञातो** वासः ॥१५५॥

शेषक्षेत्राभावे सति तत्र [3]निजपरिमितायां वसतौ यदि प्राघूर्णक आगच्छति ततः को विधिरित्यत आह –

१. एवमुक्ता सन्तः साधवः तत्र दा. २. यदा त्वसौ० क. ल. ३. नियमितपरि० दा. च नियतपरि.. ल.

**२४८ सक्कारो सम्माणो भिक्खगहणं च होइ पाहुणए ।**
**जइ जाणउ वसइ तहिं साहम्मिअवच्छलाऽऽणाई ॥१५६॥ नि०**

**सक्कारो** गाहा । **सत्कारो** वन्दनाभ्युत्थानादिकः, **सन्मानः** पादप्रक्षालनादिकः, **भिक्षाग्रहणं** भिक्षानयनं **च**, एतत्प्राघूर्णक आगते सति क्रियते । पुनश्च तस्य **प्राघूर्णकस्य** वसतिस्वरूपं कथ्यते, यथा-परिमितैरेवैषा लब्धा नान्यस्यावकाशः, ततश्च त्वयाऽन्यत्र वसितव्यम् । **यदि जाणउ वसइ तहिं** ति एवमसावुक्तो [१]ज्ञोऽपि सन् **यदि जानन्नपि तत्र वसति**, ततः को दोषोऽत आह-**साहम्मिअवच्छलाऽऽणाई साधर्मिकवात्सल्यं** न कृतं भवति, यतोऽसौ शय्यातरो रुष्टस्तानपि निर्द्धाटयति, **आज्ञाभङ्गश्च** कृतः, आज्ञालोपश्चैवं कृतो भवति सूत्रस्य, **आदिशब्दात्तद्द्रव्यान्य-द्रव्यव्यवच्छेदः** ॥१५६॥

इदानीं ते क्षेत्रप्रत्युपेक्षका आचार्यसमीपमागच्छन्तः किं कुर्वन्तीत्यत आह—

**२४९ जइ तिन्नि सव्वगमणं एसु न एसु त्ति दोसु वि य दोसा ।**
**अण्णपहेणऽगुणंता नितियावासो हु मा गुरुणो ॥१५७॥ नि०**

**जति तिण्णि** गाहा । **यदि** ते क्षेत्रप्रत्युपेक्षका**स्त्रय** एव तत **सर्व** एव **गमनं** कुर्वन्ति, अथ सप्त पञ्च वा ततः सङ्घाटकमेकं मुक्त्वा व्रजन्ति । **एसु न एसु त्ति** शय्यातरेण पृष्टाः सन्तस्ते नैवं वदन्ति-**एष्यामो न** वा **एष्याम इति**, यत एवं भणने **दोषः**, किं कारणम् ? यद्येवं भणन्ति यदुताऽऽगमिष्यामः, ततश्च शोभनतरे क्षेत्रे लब्धे सति नागच्छन्ति ततश्चानृतदोषः । अथ भणन्ति-नागमिष्यामः, ततश्च कदाचिदन्यत्क्षेत्रं न परिशुध्यति ततश्च पुनस्तत्रागच्छतां दोषोऽनृतजनितः । **अण्ण-पहेणं** ति ते हि क्षेत्रप्रत्युपेक्षका गुरुसमीपमागच्छन्तो**ऽन्येन** मार्गेणागच्छन्ति, कदाचित् स शोभनतरो भवेत्, **अगुणंत** त्ति ते हि सूत्रपौरुषीमकुर्वन्तः प्रयान्ति, **मा भून्नित्यवासो**[८८] **गुरोरिति**, किं कारणम् ? यतस्तेषां विश्रब्धमागच्छतां मासकल्पोऽधिको भवति, ततश्च नित्यवासो गुरोरिति ॥१५७॥

**२५० गंतूण गुरुसमीवं आलोइत्ता कहेंति खेत्तगुणा ।**
**न य सेसकहण मा होज्ज संखडं रत्ति साहंति ॥१५८॥ नि०**

---

८८. नित्यवासः-नित्यमवस्थानाद् नित्यः नित्यवासिनि, ऋतुबद्धवर्षासु प्रमाणाधिकवासे । (नि॰ चू.)

१. ज्ञापितः दा०

**गंतूण** गाहा । **गत्वा गुरुसमीपमालोचयित्वे**र्यापथिकातिचारं **कथयन्त्या**चार्याय **क्षेत्रगुणान्** । **न य सेसकहणं** ति **न च शेष**साधुभ्यः क्षेत्रगुणान् **कथयन्ति** । किं कारणम् ? **मा होज्ज संखडं । मा भवेत्** स्वक्षेत्रपक्षपातजनिता राटिरिति, तस्मात् **रत्ति साहंति** त्ति **रात्रौ** मिलितानां सर्वेषां साधूनां क्षेत्रगुणान् कथयन्ति ॥१५८॥

ते च गत्वैतत्कथयन्ति –

**२५१ पढमाए नत्थि पढमा तत्थ उ घयखीरकूरदहिलंभो ।**
**बिइयाए बिइअ तइआए दो वि तेसिं च धुव लंभो ॥१५९॥ नि०**

**२५२ ओभासिय धुव लंभो पाउग्गाणं चउत्थिए नियमा ।**
**इहरा वि जहिच्छाए तिकालजोग्गं च सव्वेसिं ॥१६०॥ नि०**

**पढमाए** गाहा । **प्रथमायां** पूर्वस्यां दिशि **नास्ति प्रथमा** नास्ति सूत्रपौरुषीत्यर्थः। किन्तु **तत्र घृतक्षीरकूरदधिलाभो**ऽस्ति, अन्ये त्वन्यां दिशं कथयन्ति । **द्वितीयायां** दिशि **नास्ति द्वितीया** नास्त्यर्थपौरुषी, यतस्तत्र द्वितीयपौरुष्यामेव भोजनम्, घृतादयस्तु लभ्यन्त एव । **ततिआए दो वि** त्ति **तृतीयायां** दिशि **द्वेऽपि** सूत्रार्थपौरुष्यौ विद्येते। **तेसिं च धुव लंभो** त्ति **तेषां** घृतादीनां निश्चितं **लाभः** ॥१५९॥

**ओभासिय** गाहा । **ओभासिय धुव लंभो** त्ति प्रार्थितस्य **ध्रुवो लाभः**, केषाम् ? **प्रायोग्यानां** घृतादीनां '**चउत्थीए**' **चतुर्थ्यां** दिशि **नियमादवश्यं इहरा वि** त्ति अप्रार्थितेऽपि **यद्दच्छया त्रिकालयोग्यं** प्रातर्मध्याह्नापराह्नेषु त्रिकालमपि **सव्वेसिं** ति **सर्वेषां** बालादीनां योग्यं प्राप्यत इति ॥१६०॥

एवं तैः सर्वैः क्षेत्रप्रत्युपेक्षकैराख्याते सत्याचार्यः किं करोतीत्यत आह –

**२५३ मतगहणं आयरिओ कत्थ वयामो त्ति ? तत्थ ओयरिआ ।**
**खुहिआ भणंति पढमं तं चिय अणुओगतत्तिल्ला ॥१६१॥ नि०**

**मतगहणं** गाहा । **मतग्रहणम**भिप्रायग्रहण**माचार्यः** शिष्याणां करोति, यदुत भो आयुष्मन्तः ! **क्व व्रजामः** ? कया दिशा गच्छामः ? तत्रैवमामन्त्रिते शिष्यगण आचार्येण **तत्र औदरिका** उदरभरणैकचित्ताः **क्षुभिता** आकुला **भणन्ति**–यदुत **पढमं** ति **प्रथमां** दिशं व्रजामः, यत्र प्रथमपौरुष्यां भुज्यते, **तं चिय** त्ति **तामेव** दिशं **अणुओगतत्तिल्ला** व्याख्यानार्थिन इच्छन्ति, यतस्ते सूत्रग्रहणनिरपेक्षाः केवलमर्थग्रहणार्थिन

एव, स चार्थग्रहणप्रपञ्चो द्वितीयायां पौरुष्यां भवतीत्यतस्तामेवेच्छन्तीति ॥१६१॥

**२५४ बिइयं च सुत्तग्गाही उभयग्गाही य तइययं खेत्तं ।**
**आयरिओ उ चउत्थं सो उ पमाणं हवइ तत्थ ॥१६२॥ नि०**

**बिइयं** गाहा । **द्वितीयां च** दिशं **सूत्रग्राहिण** इच्छन्ति, यतः प्रथमपौरुष्यामेव स्वाध्यायो भवति, स च तेषामस्ति, **उभयग्राहिणश्च** सूत्रार्थग्राहिण**स्तृतीयं क्षेत्रमिच्छन्ति, आचार्यस्तु चतुर्थं** क्षेत्रमिच्छति, यतस्तत्र चतुर्थ्यामपि पौरुष्यां प्राघूर्णकादेः प्रायोग्यं लभ्यत इति, **स** एव **प्रमाणमा**चार्य एव च सर्वेषां प्रमाणं **भवति तत्थ** त्ति **तत्रे**ति शिष्यगणमध्ये ॥१६२॥

किं पुनः कारणमाचार्यश्चतुर्थमेव क्षेत्रमिच्छति ? अत आह –

**२५५ मोहुब्भवो य बलिए दुब्बलदेहो न साहए जोए ।**
**तो मज्झबला साहू दुट्ठऽस्सेणे[१]त्थ दिट्ठंतो ॥१६३॥ नि०**

**मोहुब्भवो य** गाहा । प्रथमद्वितीययोः क्षेत्रयोः प्रचुरभक्तपानकेभ्यः सकाशाद्बलवान् भवति, **बलिनश्च मोहोद्भवो** कामोद्भवो भवतीत्यर्थः । आह-एवं तर्हि यत्र भिक्षा न लभ्यते तत्र प्रयान्तु, उच्यते-**दुर्बलदेहः** कृशशरीरो **न साधयति** नाराधयति **योगान्** व्यापारान् यत**स्ततो मध्यमबलाः साधव** इष्यन्ते । **दुष्टाश्वेन** चात्र **दृष्टान्तः**, दुष्टाश्वो गर्दभ उच्यते, स यथा प्रचुरभक्षणाद्दर्पिष्टः सन् कुम्भकारारोपितभाण्डकानि भनक्ति दर्प्पोत्सेकादुत्प्लुत्य पुनस्तेनैव कुम्भकारेण निरुद्धाहारः सन्नतिदुर्बलत्वात्प्रस्खलितः सन् भनक्ति, स एव च गर्दभो [२]मध्यमाहारक्रियया सम्यग् भाण्डकानि वहति, एवं साधवोऽपि संयमक्रियां मध्यमबला वहन्ति॥१६३॥

**२५६ पणपण्णगस्स हाणी आरेणं जेण तेण वा धरइ ।**
**जइ तरुणा नीरोगा वच्चंति चउत्थगं ताहे ॥१६४॥ नि०**

**पणपण्ण** गाहा । अथ तस्मिन् गच्छे **पञ्चपञ्चाशद्वर्ष**देशीयाः, त्रिंशद्वर्षाः, चत्वारिंशद्वर्षा वा भवन्ति, ततो गम्यते चतुर्थं क्षेत्रम्, यतस्ते **येन** केनचिद् **ध्रियन्ते** याप्यन्ते । तथा **यदि** च **तरुणा नीरोगाः** शक्ता भवन्ति **ततश्चतुर्थ**मेव क्षेत्रं **व्रजन्ति** ॥१६४॥

---

१. ऽस्सेणेह ह० २. विमध्य० क.ल.

**२५७ अह पुण जुण्णा थेरा रोगविमुक्का य असहुणो तरुणा ।**
**ते अणुकूलं खेत्तं पेसंति न या वि खग्गूडे ॥१६५॥ नि०**

**अह पुण जुण्णा** गाहा । **अथ पुनर्जूर्णाः स्थविरा** भवन्ति **रोगेण च** ज्वरादिना **मुक्तमात्रास्तरुणाः**, नाद्यापि येषां साम्यं भवति शरीरस्य, ततस्ता**ननुकूलं क्षेत्रं प्रेषयन्त्याचार्याः** । **न या वि खग्गूडे** त्ति **खग्गूडा** अलसा निर्द्धर्मप्राया**स्तान्न प्रेषयन्ति** ॥१६५॥

कियता पुनः कालेन वृद्धादय आप्याय्यन्ते ? उच्यते-पञ्चमात्रैर्दिवसैः, यत उक्तं **वैद्यके** –

**२५८ एगपणअद्धमासं सट्ठी सुणमणुयगोणहत्थीणं ।**
**राइंदिएहिं उ बलं पणगं तो एक्क दो तिन्नि ॥१६६॥ नि०**

**एगपण** गाहा । **एकेन रात्रिन्दिवेन शुनो बलं** भवति, **पञ्चभिर्दिवसैर्मनुजस्य बलं** भवति, **अर्द्धमासेन** बलीवर्दस्य, **षष्टिभिर्दिवसैर्हस्तिनो बलं** भवति, एवमेतद्यथासङ्ख्यं योजनीयम् । **पणगं तो एक्क दो तिण्णि** एवमसौ तस्मिन् क्षेत्रे **पञ्चकमेकं** धार्यते । अथ तथापि बलं न गृह्णाति, **द्वौ पञ्चकौ** धार्यते, **त्रीन्** वा **पञ्चकान्** धार्यते, पुनरानीयत इति ॥१६६॥

एवं त आलोचितशिष्यगणा आचार्याः शय्यातरमापृच्छ्य क्षेत्रान्तरं सङ्क्रामन्ति। अथ न पृच्छन्ति ततो दोष उपजायते । एतदेवाह –

**२५९ सागारिअपुच्छगमणम्मि[1] बाहिरा मिच्छ छेय कयनासी[2] ।**
**गिहि[3] साहू अभिधारण तेणगसंकाइ जं चऽण्णं ॥१६७॥ नि०**

**सागारि** गाहा । **सागरिकं** शय्यातर**मनापृच्छ्य** यदि **गमनं** क्रियते ततो **बाहिर** त्ति **बाह्या** लोकधर्मस्यैते भिक्षव इत्येवं वक्ति शय्यातरः । ये च धर्मं लोकधर्मं न जानन्ति दृष्टं ते कथमदृष्टं जानन्ति ? इत्यतः **मिच्छ** त्ति **मिथ्यात्वं** प्रतिपद्यते। **छेद** त्ति **छेदो** वसतिदानस्य, पुनस्तेऽन्ये वा वसतिं न लभन्ते । **कतनास** त्ति कृतघ्ना ह्येते प्रव्रजिता इत्येवं मन्यते । **गिहि साहू अभिधारण** त्ति **गृही** कश्चिच्छ्रावकस्तमाचार्यमभिधार्य सञ्चिन्त्यायातः प्रवज्यार्थम्, तेनाप्यागत्य शय्यातरः

---

१. गमणं संपा० गमणे आ० २. कयनासा दा. ३. गिहिसाहूभयधारण ह.

पृष्टः-क्वाचार्यः ? सोऽपि रुष्टः सन्नाह-यः कथयित्वा व्रजति स ज्ञायते, तं तु को जानाति ? तमाकर्ण्य स श्रावकः कदाचिद्दर्शनमप्युज्झति, लोकज्ञानमप्येषां नास्ति कुतः [१]परलोकज्ञानमिति ? कदाचित्साधुः कश्चित्तमाचार्यमभिधार्य मनसि कृत्वा [८९]उपसम्पदादानार्थमा[२]यातः, सोऽपि शय्यातरं पृच्छति, शय्यातरोऽप्याह-न जाने क्व गत इति, ततः स साधुरनाचारवानाचार्य इति विचिन्त्यान्यत्र गतः, सोऽपि निर्जराया आचार्योऽनाभागी जात इति । **तेणग** त्ति कदाचित्तद्गृहं केनचित्तस्मिन्नेव दिवसे मुष्टं भवेत्तत एवंविधा बुद्धिर्भवेत्, यदुत ते **स्तेना** इत्येवं **शङ्कां** करोति, **आदि**शब्दाद्योषित् केनचित्सह गता, ततो गृहात् तेऽप्यनाख्याय गताः, ततश्च शङ्कोपजायते । **जं चऽण्णं** ति **यच्चान्यत्** शङ्कादि जातं पत्तनगतं तत्सर्वमुपजायत इति ॥१६७॥

**२६० वसहीए वोच्छेओ अभिसंधारिताण वावि साहूणं ।**
**पुणरावत्ती होज्ज व पव्वज्जा उज्जुयमईणं ॥१५॥ प्र०**

[तदेवाह -

**वसहीए वोच्छेदो, अभिधारिंताण वा वि साहूणं ।**
**पव्वज्जाभिमुहाणं, तेणेहिं व संकणा होज्जा ॥१५३४॥**

'विप्रलम्भितास्तावदमीभिरेकवारम्, अत ऊर्द्ध्वं ये केचन संयता इति नाम उद्वहन्ते तेभ्यो वसतिं न प्रदास्यामि' इत्येवं वसतेर्व्यवच्छेदो भवेत् । तथा 'अभिधारयन्तो नाम' ये साधवस्तमाचार्यं मनसिकृत्योपसम्पदः प्रतिपत्त्यर्थं समायातास्ते सागारिकं प्रश्नयन्ति-आचार्याः कस्मिन् क्षेत्रे विहृतवन्तः? सागारिकः प्राह-यः कथयित्वा व्रजति स ज्ञायते यथा अमुकत्र गत इति, ये तु प्रथमत एव नापृच्छन्ति ते कथं ज्ञायन्ते ? ततस्तेषामभिधारयतां साधूनाम् 'अहो ! लोकव्यवहारबहिर्मुखा अमी आचार्याः, ततः को नामामीषामुपकण्ठे उपसम्पत्स्यते ?' इति विचिन्त्य स्वगच्छे गणान्तरे वा गमनं भवेदिति वाक्याध्याहारः । स चाचार्यस्तेषां श्रुतवाचनाप्रदानादिजन्याया निर्जराया अनाभागी भवति । प्रव्रज्याभिमुखानां वा "तेणेहिं" त्ति स्तेनविषया शङ्का भवेत् । किमुक्तं भवति ? - केचिदगारिणः संसारप्रपञ्चविरक्तचेतसस्तदन्तिके प्रव्रज्यां प्रतिपित्सवः समायाताः सागारिकं पृच्छन्ति-क्व गता आचार्याः? स प्राह-वयं न जानीमः तत्स्वरूपमिति, ततस्तेषामगारिणां शङ्का समुपजायते, यथा-नूनं किमप्यस्य सागारिकस्य चोरयित्वा गतास्ते, अन्यथा किमर्थमेष परिस्फुटमाचार्याणां गमनवृत्तान्तं न निवेदयति ? इति । ततश्च ते प्रव्रज्यामप्रतिपद्यमाना यत् षण्णां जीवनिकायानां विराधनां कुर्वन्ति यच्च बोटिकनिह्नवादिषु व्रजन्ति अपरान् वा प्रव्रजतो विपरिणामयन्ति

८९. उपसम्पद्-उप सामीप्येन संपादनं गमनमुपसम्पद् । इयन्तं कालं भवदन्तिके आसितव्यमित्येवंरूपे, ज्ञानाद्यर्थगुर्वन्तराश्रयणे । (धर्म. ३ अधि.)

१. पारलौकिकमिति दा. २. याति सो दा.

तन्निष्पन्नमाचार्याणां प्रायश्चित्तम् । यत एवमतः सागारिकमापृच्छ्य गन्तव्यम् । [बृ.क.-१५३४]]

गच्छद्भिश्च शय्यातर आप्रच्छनीयः स च [1]विधिना, यतोऽविधिप्रच्छन एते दोषाः –

**२६१ अविहीपुच्छा उग्गाहितेण सेज्जातरीउ रोएज्जा ।**
**सागारियस्स संका कलहे य सएज्झिया खिंसे ॥१६८॥ नि०**

**अविहीपुच्छा** गाहा । **अविधिपृच्छेयं** वर्त्तते, यदुत-**उद्ग्राहितेनो**त्क्षि-प्तेनो[2]पकरणेन पृच्छति, तत्र **सेज्जातरीउ रोएज्जा** । तेनाकस्मिकेन गमनेन **शय्यातर्यो रोदनं** कुर्युः, ततश्च **सागारिकस्य** शय्यातरस्य **शङ्को**पजायते, **कलहे च** सति **सएज्झिआए** सह **खिंस** त्ति । सैव **सएज्झिया खिंसति,** यथा न शोभना त्वं येन त्वया तत्र काले भिक्षोर्गच्छतो रुदितम्, किं च ते स पिता भवति? येन रोदिषीति ॥१६८॥

अथ अनागतमेव कथयन्ति-अमुकदिवसे गमिष्यामः, तत्राप्येते दोषाः –

**२६२ हरिअच्छेयण थेप्पइय [3]थेच्चणं किच्चणं च पोत्ताणं ।**
**छण्णेयरं च पगयं इच्छमणिच्छे य दोसा उ ॥१६९॥ नि०**

**हरिअच्छेयण** गाहा । तद्धि शय्यातरकुटुम्बं साधवो यास्यन्तीति विमुक्तशेषव्यापारं सद् गृह एव तिष्ठति, कृष्यादिप्रतिजागरणं न करोति, ततश्च क्षणिकं सत् [4]स्वगृहजात**हरितच्छेदं** करोति । तथा निर्व्यापारत्वादेव च ता रण्डाः **षट्पदीनां** परस्परनिरूपणेनोपमर्दनं कुर्वन्ति । **किच्चणं च पोत्ताणं** ति तत्र दिवसे क्षणिका विमुक्त[5]कृषिलवनव्यापारा वस्त्राणि शोधयन्ति । **छण्णेयरं च पगयं** प्रकृतं भोजनं **प्रछन्नं** कुर्वन्ति, अप्रकटमित्यर्थः, **इतरं च** त्ति **प्रकटमेव** भोजनं संयतार्थं कुर्वन्ति, तत्र **चेच्छतामनिच्छतां च दोषा** भवन्ति, कथम्? यदि तद्भोजनं गृह्णन्ति ततोऽशुद्धत्वा-त्संयमबाधा स्यात्, अथ न गृह्णन्ति ततो रोषभावं कदाचित्प्रतिपद्यते ॥१६९॥

एते दोषा अनागतकथने, ततश्च कः पृच्छाविधिरित्याह –

**२६३ जइया चेव य खेत्तं गया उ पडिलेहगा तओ पाए ।**
**सागारियस्स भावं तणुइन्ति गुरू इमेहिं तु ॥१७०॥ नि०**

---

१. विधिना, नाऽविधिना, यतोऽविधिना प्र. दा. ल. २. करकटेनोपकरणेन क. ३. घच्चणं आ.दा. ४. स्वगृहे हरितजातच्छेदकं क. स्वगृहे जातहरितच्छेदकं ल. ५. कृषिबललवन० क.

**जतिया** गाहा । **यदैव क्षेत्रं गताः प्रत्युपेक्षकाः, ततो पाए** त्ति **ततः** प्रभृति **सागारिकस्य** शय्यातरस्य **भावं** स्नेहप्रतिबन्धं **तंनूकुर्वन्ति**[1], के ? **गुरवः**, एभिर्वक्ष्यमाणैर्गाथाद्वयोपन्यस्तैर्वचनैरिति ॥११०॥

**२६४ उच्छू वोलिंति वइं तुंबीओ जायपुत्तभंडाओ ।**
**वसभा जायत्थामा गामा [2]पव्वायचिक्खल्ला ॥१७१॥ नि०**

**उच्छू** गाहा । सुगमा ॥१७१॥

**२६५ अप्पोदगा य मग्गा वसुहा वि य पक्कमट्टिया जाया ।**
**[3]अण्णोक्कंता पंथा साहूणं विहरिउं कालो ॥१७२॥ नि०**

**अप्पोदगा** गाहा । सुगमा ॥१७२॥

[तान्येवाह -

**उच्छू वोलिंति वइं, तुंबीओ जायपुत्तभंडाओ ।**
**वसहा जायत्थामा, गामा पव्वायचिक्खल्ला ॥१५३९॥**
**अप्पोदगा य मग्गा, वसुहा वि य पक्कमट्टिया जाया ।**
**अन्नोक्कंता पंथा, विहरणकालो सुविहियाणं ॥१५४०॥**

इह पूर्वं शरदादिर्विहारो भवतीत्युक्तम्, अतः शरत्कालमेवाङ्गीकृत्याभिधीयते- इक्षवः 'वोलयन्ति' व्यतिक्रामन्ति 'वृतिं' स्वपरिक्षेपरूपाम्, तुम्ब्यश्च 'जातपुत्रभाण्डाः' समुत्पन्नतुम्बकाः, तथा वृषभा जातस्थामानः, ग्रामाः प्रम्लानचिक्खल्लाः, अल्पोदकाश्च मार्गाः, वसुधाऽपि च पक्वमृत्तिका जाता, अन्यैः-पथिकादिभिरुत्क्रान्ताः-क्षुण्णाः पन्थानः सम्प्रति वर्त्तन्ते, अतो विहरणकालः सुविहितानाम्। एतद् गाथाद्वयं शय्यातरस्य शृण्वतो गुरवश्चङ्क्रमणं कुर्वन्तः पठन्ति । ततः शय्यातरो ब्रूयात्-भगवन् ! किमिदानीं यूयं गमनोत्सुकाः ? गुरवः प्राहुः-बाढम्, गन्तुकामा वयम्, प्रेषिताश्चास्माभिः क्षेत्रान्तरं प्रत्युपेक्षितुं साधवः । इत्थमन्तराऽन्तरा प्रज्ञाप्यमानानां शय्यातरमानुषाणां व्यवच्छिद्यते स्नेहानुबन्धः । [बृ.क.-१५३९-१५४०]]

एतद्गाथाद्वयं शृण्वतः शय्यातरस्य पठन्ति, ततः सोऽपि श्रुत्वा भणति-किं यूयं गमनोत्सुकाः ? आचार्योऽप्याह —

---

१. तन्वीकुर्वन्ति क. २. पथा अचिक्खल्ला ह० ३. अन्नक्कंता दा.

**२६६ समणाणं सउणाणं भमरकुलाणं च गोउलाणं च ।**
**अनियाओ वसहीओ सारइयाणं च मेहाणं ॥१७३॥ नि०**

सुगमा ॥१७३॥

[शय्यातरः श्रुत्वा वक्ति । किं यूयं गमनोत्सुकाः । गुरुर्वक्ति -

समणाणं गाथा । श्रमणानां शकुनानां भ्रमरकुलानां गोकुलानाम् अनियता वसतयः शारदानां मेघानाम् । [ओ.नि.मा.-नि.१७३]]

ततश्चैतां गाथां पठित्वा इदमाचरन्ति –

**२६७ [1]आवस्सगकयनियमा कल्लं गच्छाम तो उ आयरिआ ।**
**सपरिजणं सागारियं वाहरिउं दिंति अणुसट्ठिं ॥१७४॥ नि०**

**आवस्सग** गाहा । **आवश्यककृतनियमाः** कृतप्रतिक्रमणा इत्यर्थः । विकालवेलायां कृतावश्यका इदं भणन्ति- यदुत **कल्लं गच्छामः** । पुनश्च **तत आचार्याः सपरिजनं सागारिकं** शय्यातरमाहूयानुशास्ति **ददति** [2]धर्मकथां कुर्वन्तीत्यर्थः ॥१७४॥

**२६८ पव्वज्ज सावओ वा दंसण भद्दो जहण्णयं वसहिं ।**
**जोगंमि वट्टमाणे अमुगं वेलं गमिस्सामो ॥१७५॥ नि०**

**पव्वज्ज** गाहा । सोऽपि सागारिको धर्मकथां श्रुत्वा एवंविधो भवति-**प्रव्रज्यां** प्रतिपद्यते, **श्रावको वा** भवति, [3]**दर्शनधरो** वा भवति, **भद्रको** वा भवति, सर्वथा **जघन्यतो वसति**मात्रमवश्यं ददाति । पुनश्च धर्मकथां कृत्वाऽऽचार्या एवं ब्रुवते- यदुत **योगे वर्त्तमाने** योऽसौ योगो गमनाय मां प्रेरयति तस्मिन्वर्त्तमाने भवति सति **अमुकवेलायां गमिष्याम** इति ॥१७५॥

इदानीं ते विकालवेलायां कथयित्वा प्रत्युषसि व्रजन्ति, किं कृत्वेत्यत आह –

**२६९ तदुभय सुत्तं पडिलेहणा य उग्गयमणुग्गए वा वि ।**
**पडिच्छाहिगरण तेणे नट्ठे खग्गूड संगारो ॥१७६॥ नि०**

**तदुभय** गाहा । **तदुभयं** सूत्रपौरुषीमर्थपौरुषीं च कृत्वा व्रजन्ति, **सुत्तं** ति **सूत्र**पौरुषीं वा कृत्वा व्रजन्ति । अथ दूरतरं क्षेत्रं भवति ततः पादोनप्रहर एव पात्र**प्रतिलेखनां** कृत्वा व्रजन्ति । **उग्गय** त्ति उद्गतमात्र एव वा सूर्ये गच्छन्ति,

---

१. आवासग ह.हे २. पुनश्च धर्म० क० ३. दर्शनपरो क०

**अणुग्गय** त्ति **अनुद्गते वा** सूर्ये रात्रावेव गच्छन्ति । **'पडिच्छ'** त्ति ते साधवस्तस्माद्विनिर्गताः परस्परं **प्रतीक्षन्ते** । **अधिकरण** त्ति अथ ते साधवो न प्रतीक्षन्ते ततो मार्गमजानानाः परस्परतः पूत्कुर्वन्ति, तेन च पूत्कृतेन लोको विबुध्यते, ततश्चा**धिकरणं** भवति । **तेण** त्ति **स्तेनका** वा विबुद्धाः सन्तो मोषणार्थं पश्चाद्व्रजन्ति। **नट्ठ** त्ति कदाचित्कश्चि**न्नश्यति**, ततश्च प्रदोष एव **सङ्गारः** सङ्केत क्रियते, अमुकत्र विश्रमणं करिष्यामः, अमुकत्र भिक्षाम्, अमुकत्र वसतिमिति, ततश्च रात्रौ गच्छद्भिः सङ्केतः क्रियते । **खग्गूड** त्ति कश्चित् **खग्गूड**प्रायो भवति, स इदं ब्रूते-यदुत साधूनां रात्रौ न युज्यत एव गन्तुम्, पुनः स आस्ते, ततश्च **संगारो** त्ति संकेतं खग्गूडाय प्रयच्छन्ति, यदुत त्वयाऽमुकत्र प्रदेश आगन्तव्यमिति ॥१७८॥

इदानीमस्या एव गाथाया भाष्यकृत् कांश्चिदवयवान् व्याख्यानयति, तत्र प्रथमावयवं व्याख्यानयन्नाह –

**२७० पडिलेहंत च्चिअ विंटियाउ[1] काऊण पोरिसि करिंति ।**
**चरिमा उग्गाहेउं सोच्चा मज्झण्हे वच्चंति ॥७९॥ निभा०**

**पडिलेहंत च्चिय** गाहा । ते हि साधवः प्रभातमात्र एव **प्रतिलेखयित्वो**पधिकां पुनश्च **वेण्टलिकां** कुर्वन्ति संवर्त्तयन्तीत्यर्थः, ततश्चानिक्षिप्तोपधय एव **पोरिसिं करिंति** त्ति सूत्र**पौरुषीं कुर्वन्ति** । **चरिमा उग्गाहेउं** ति **चरिम**वेलायां पादोनपौरुष्यां पात्रकाणि **उद्ग्राह्य** संयन्त्रयित्वा पुनश्चानिक्षिप्तैरेव पात्रकैः **सोच्च** त्ति **श्रुत्वा**ऽर्थपौरुषीं कृत्वेत्यर्थः, ततो **मध्याह्ने व्रजन्ती**ति ॥७९॥

ते च शोभन एवाह्नि व्रजन्तीति । अत एवाह –

**२७१ तिहिकरणंमि पसत्थे नक्खत्ते अहिवइस्स अणुकूले ।**
**घेत्तूण निंति वसभा अक्खे सउणे [2]परिक्खंता ॥८०॥ निभा०**

**तिहिकरणं** गाहा । **तिथौ** प्रशस्तायां **करणे** च **बवादिके प्रशस्ते नक्षत्रे** वाऽ**धिपते**राचार्यस्या**नुकूले** सति **गृहीत्वाऽक्षान्** प्राग् **वृषभा** निर्गच्छन्ति, किं कुर्वाणा? अत आह-**'सउणे परिक्खंता'** **शकुनान्** प्रशस्तान् **परीक्षमाणाः** सन्तो वृषभा निर्गच्छन्तीति पश्चादाचार्याः ॥८०॥

---

१. वेण्टियाउ ह० २. निरीक्खंता ह०

किं पुनः कारणं पश्चादाचार्या निर्गच्छन्ति ? तत्र कारणमाह –

**२७२ वासस्स य आगमणं[१] अवसउणे पट्ठिआ निवत्तंति ।**
**ओभावणा पवयणे आयरिआ मग्गओ तम्हा ॥८१॥ निभा०**

**वासस्स य** गाहा । वर्षणं **वर्षस्तस्यागमनं** कदाचिद्भवति, **अपशकुने** वा दृष्टे **प्रस्थिता** अपि **निवर्त्तन्ते** वृषभाः । यदि पुनराचार्या एव प्राग् निर्गच्छन्ति ततोऽपशकुनदर्शने [२]वृष्टौ च निवर्त्तमानस्य सतः किं भवति ? अत आह-'**ओहावणा पवयणे' प्रवचने** हीलना भवति, यदुत यदपि ज्योतिषिकाणां [ज्यौतिषिकाणां] विज्ञानं तदप्येतेषां नास्तीति । **आयरिया मग्गओ** त्ति अत **आचार्या मार्गतः** पृष्ठतो निर्गच्छन्तीति ॥८१॥

गच्छद्भिश्चापशकुनाः शकुना वा निरूपणीयाः, तत्रापशकुनान् प्रतिपादयन्नाह –

**२७३ मइलकुचेले अब्भंगिएल्लए साण खुज्जवडभे य ।**
**एए उ अप्पसत्था हवंति खित्ताउ निंताणं ॥८२॥ निभा०**

**२७४ नारी पीवरगब्भा वड्डकुमारी य कट्ठभारो य ।**
**कासायवत्थ कुच्चंधरा य कज्जं न साहंति ॥८३॥ निभा०**

**मइल** गाहा । **नारी गाहा** । **मलिनः** शरीरकर्पटैः, **कुचेलो** जीर्णकर्पटः, **अब्भंगिएल्लए** त्ति स्नेहाभ्यक्तशरीरः, **श्वा** यदि वामपार्श्वाद्दक्षिणपार्श्वं प्रयाति, **कुब्जो** वक्रः, **वडभो** वामनः, **एतेऽप्रशस्ताः, पीवरगब्भा** आसन्नप्रसवकाला । शेषं सुगमम् ॥८२॥ ॥८३॥

**२७५ रत्तपड चरग तावस रोगी विगला य आउरा विज्जा ।**
**कासायवत्थ उद्धूलिया य जत्तं न साहिंति ॥१६॥ प्र.**

[तथा -

**रत्तपड चरग तावस, रोगिय विगला य आउरा वेज्जा ।**
**कासायवत्थ उद्धूलिया य जत्तं न साहंति ॥१५४८॥**

'रक्तपटाः' सौगताः, 'चरकाः' क(का)णादा धाटीवाहका वा, 'तापसाः' सरजस्काः, 'रोगिणः' कुष्ठादिरोगाक्रान्ताः, 'विकलाः' पाणि-पादाद्यवयवव्यङ्गिताः, 'आतुराः' विविधदुःखोपद्रुताः, 'वैद्याः' प्रसिद्धाः, 'काषायवस्त्राः' कषायवस्त्रपरिधानाः, 'उद्धूलिताः' भस्मोद्धूलितगात्रा धूलीधूसरा वा ।

१. आगमणे दा० ता.सं. २. वृष्टे च क.

एते क्षेत्रान्निर्गच्छद्भिर्दृष्टाः सन्तो यात्रा-गमनं तत्प्रवर्त्तकं कार्यमप्युपचाराद् यात्रा तां न साधयन्ति। [बृ.क.-१५४८]]

**२७६ रत्तवड परिहिपायं नग्गं चक्कयरं पंडुरंग वा ।**
**दट्ठुण तावसं गोणसं च पंथं न गंतव्वं ॥१७॥ प्र.**

[**रत्तवड गाथा** । **रक्तपटो** बौद्धादिः, **परिधिपादं** चक्रं **नग्नं चक्रकरं** चक्रहस्तम् । **पाण्डुरागं** भस्मश्वेताङ्गं भिक्षुं **दृष्ट्वा तापसं** संन्यासिनं **गोणसं** सर्पं च **पथि** मार्गे **न गन्तव्यम्** । ॥ओमाटी. प्र.१७॥ ]

**२७७ [१]चक्कयरंमि भमाडो भुक्खा मारो य पंडुरंगंमि ।**
**तच्चन्नि रुहिरपडणं बोडियमसिए धुवं मरणं ॥१८॥ प्र.**

**२७८ जंबू य चासम[२]ऊरे भारद्दाए तहेव नउले य ।**
**[३]दंसणमेव पसत्थं पयाहिणे सव्वसंपत्ती ॥८४॥ निभा०**

**२७९ नंदी तूरं पुण्णस्स [४]दंसणं संखपडहसद्दो य ।**
**भिंगारछत्तचामर [५]धयप्पडागा पसत्थाइं ॥८५॥ निभा०**

**२८० भंभा मऊंद मद्दल कडंब झल्लरि हुडुक्क कंसाला ।**
**काहल तलिमा वंसो संखो पणवो य बारसमो ॥१९॥ प्र.**

**२८१ समणं संजयं दंतं सुमणं मोयगा दहिं ।**
**मीणं घंटं पडागं च सिद्धमत्थं वियागरे ॥८६॥ निभा०**

**जंबू य** गाहा । सुगमा ॥८४॥

[जंबू य चासमयूरे भारद्दाए गाथा । जम्बुके शृगाले चाषे मयूरे भारद्वाजे पक्षिभेदे नकुले वा । तत्र प्रवेशे नकुलः प्रदक्षिणः श्रेयान् । गमने वामगो भव्यः। [ओ.नि.मा.निभा.८४]]

**नंदी** गाहा । सुगमा, नवरं **पूर्णकलशदर्शनम्**, ध्वज एव पताका **ध्वजपताका** ॥८५॥

**समणं** गाहा । **श्रमणः** लिङ्गमात्रधारी **संयतः** सम्यक् संयमानुष्ठाने यतो

---

१. चक्कधरे० गाहा नास्ति क.ल. ता.सं. २. मयुरे हे० ३. दरिसण ह० हे० ४. दरिसणं ह० हे० ५. ज्झयपडागा ह० हे०

यत्परः, **दंत** त्ति **दान्त** इन्द्रियनोइन्द्रियैः,**सुमनसः** पुष्पाणि, शेषं सुगमम् ॥८६॥

गच्छंश्चासौ –

**२८२ सेज्जातरेऽणुभासइ[1] आयरिओ सेसगा चिलिमिणीए ।**
**अंतो गिण्हन्तुवहिं सारवियपडिस्सया पुव्विं ॥८७॥ निभा०**

**सेज्जातरे** गाहा । व्रजनसमये **शय्यातराननुभाषते** व्रजाम इत्येवमादि **आचार्यः**। '**सेसगा चिलिमिणीए अंतो**' **शेषाः** साधवः **चिलिमिलिण्या** जवनिकाया **अन्तो**ऽभ्यन्तरे, किम् ? उपधिं **गृह्णन्ति** संयन्त्रयन्तीत्यर्थः । **सारविअपडिस्सया पुव्विं** ति किंविशिष्टाः सन्तस्ते साधव **उपधिं** गृह्णन्ति ? संमार्जित उपलिप्तः प्रतिश्रयो यैस्ते संमार्जितप्रतिश्रयाः **पुव्विं** प्रागेव, प्रथममेवेत्यर्थः ॥८७॥

इदानीं कः कियदुपकरणं गृह्णातीत्यत आह –

**२८३ बालाई उवगरणं जावइयं तरति तत्तिअं गिण्हे ।**
**जहण्णेण जहाजायं[2] सेसं तरुणा विरिंचंति[3] ॥८८॥ निभा०**

**बालादी** गाहा । **बाला**[4]:, **आदिशब्दाद्वृद्धा** गृह्यन्ते, ते **ह्युपकरणं यावन्मात्रं तरन्ति** शक्नुवन्ति **तावन्मात्रं गृह्णन्ति,** तैश्च बालादिभि**र्जघन्येन** जघन्यतो **जहाजायं** ति रजोहरणं चोलपट्टकश्च, एतदशक्नुवद्भिरपि ग्राह्यम्, **शेषमुपकरणं तरुणा** आभिग्रहिका **विरिञ्चन्ति** विभजन्ति बालादिसत्कम् ॥८८॥

यदा तु पुनराभिग्रहिका न सन्ति तदा –

**२८४ आयरिओवहि बालाइयाण गिण्हंति संघयणजुत्ता ।**
**दो सोत्ति उण्णि संथारओ य गहणेक्कपासेणं[5] ॥८९॥ निभा०**

**आयरिओवहि** गाहा । **आचार्योपधिं बालाइयाणं** ति **बालादीनां** च सम्बन्धिनीमुपधिं **गृह्णन्ति,** के ? **संघयणजुत्ता** येऽन्ये शेषा अनाभिग्रहिकाः संहननोपेतास्ते गृह्णन्ति, कथं पुनर्गृह्णन्ति ते उपधिम् ? **दो सोत्ति उण्णि** त्ति **द्वौ सौत्रिकौ** कल्पौ, एक **और्णिकः** कल्पः **संस्तारकश्च**शब्दादुत्तरपट्टकश्च, एषां **गहणेक्कपासेणं** ति **ग्रहणमेकस्मिन् पार्श्वे** एकत्र स्कन्धे ग्रहणं कुर्वन्ति, द्वितीये तु

---

१. अणुसासइ ह० हे० ता.सं. । २. अहाजायं संपा० ३. विगिंचंति हे० ४. बालादय आदिश० दा. ५. ०पासम्मि संपा.

पार्श्वे स्कन्धे पात्रकाणि गृह्णन्ति, आत्मीयां तूपधिं वेण्टलिकां कृत्वा यत्र स्कन्धेऽवधिः कृतस्तयैव दिशा कक्षायां कुर्वन्ति ॥८९॥

२८५ **एवं उस्सग्गेणं तइए णिंती अहा उ दूरंमि ।**
**सो गामो जहिं भिक्खं कज्जेहिं तओ करियसुत्तं ॥२०॥ प्र.**

२८६ **नितय अइदूराइसु काउं पडिलेहणं तओ णेंति ।**
**असई य उग्गयंमी असई य अणुमग्गम विभासा ॥२१॥ प्र.**

२८७ **निग्गत्त पेसियारे चेट्ठेज्जा जाव सव्व संपत्ता ।**
**ण य सद्दं कुव्वती अहिगरणं मा इमं होज्जा ॥२२॥ प्र.**

२८८ **सोउं सद्दं तेणं समणाणं पडिय त्ति काऊणं ।**
**उट्ठेऊण मुसेज्जा तम्हा उ इमं विहिं कुज्जा ॥२३॥ प्र.**

२८९ **सद्दं अकुव्वमाणा गंतूण अवेसिए तओ वसहा ।**
**सव्वे गय त्ति काउं करें अण्णं तओ गच्छे ॥२४॥ प्र.**

२९० **वच्चत्ताणं कोइ मंदगइ अणायएसणासेज्जा ।**
**तस्स उ मेलणहेउं संगारो ताव कायव्वो ॥२५॥ प्र.**

इदानीं 'अधिकरणतेणे'त्ति (नि. १७६) अमुमवयवं व्याख्यानयन्नाह –

२९१ **आउज्जोवण वणिए अगणि कुडुंबी कुकम्म कुम्मरिए ।**
**तेणे मालागारे उब्भामग पंथिए जंते ॥९०॥ निभा०**

**आउज्जोवण** गाहा । ते हि यदि सशब्दं व्रजन्ति ततश्च लोको विबुध्यते, विबुद्धश्च सन् **आउज्जोवण** त्ति अप्काययन्त्राणि योत्रिज्यन्ते वहनाय सज्जीक्रियन्ते। अथवा **आउ** त्ति [1]**अप्कायाय** योषितो विबुद्धा व्रजन्ति । **जोवणं** त्ति धान्यप्रकरः, तदर्थं लोको याति, प्रकरो मर्दनं धान्यस्य, **लाट**विषये जोवणं धन्नपइरणं भण्णइ। **वणिय** त्ति **वणिजो** वालञ्जुका विभातमिति कृत्वा व्रजन्ति । **अगणि** त्ति लोहकारशालादिषु **अग्निः** प्रज्वाल्यते । **कुडुंबि** त्ति **कुटुम्बिनः** स्वकर्मणि लगन्ति। **कुकम्म** त्ति कुत्सितं कर्म येषां ते **कुकर्माण** मात्स्यिकादयः । **कुम्मरिए** त्ति कुत्सिता माराः **कुमाराः** सौकरिकाः, एषां बोधो भवति रात्रौ पूत्कारयताम् । **तेणे**

१. अप्कायस्य क.

त्ति **स्तेनकानां** च । **मालाकार** त्ति **मालिका** विबुध्यन्ते । [१]**उब्भामग** त्ति पारदारिका विबुध्यन्ते, **पंथिए** त्ति **पथिका** विबुध्यन्ते, **जंते** त्ति **यान्त्रिका** विबुद्धाः सन्तो यन्त्राणि वाहयन्ति चाक्रिकादयः ॥९०॥

तत्र यदुक्तं प्राक् "नट्ठे खग्गूडसंगारो" (नि. १७६) तत्रेदमुक्तं निर्युक्तिकृता सङ्गारकरणमात्रम्, इह पुनः स एव निर्युक्तिकारः स सङ्गारः कया यतनया कर्त्तव्यः? कस्यां वा वेलायां कर्त्तव्यः ? इत्येतदाह –

**२९२ संगार बिइय वसही तइए सण्णी चउत्थी साहम्मि ।**
**पंचमगंमि य वसही छट्ठे ठाणट्ठिओ होति ॥१७७॥ नि० दारगाहा ।**

**संगार** गाहा । **संगार** त्ति सङ्केतोऽभिधीयते ततः प्रथमद्वारे तद्विधिर्वक्तव्यः, **बितिय वसहि** त्ति **द्वितीये** द्वारे **वसतिर्वक्तव्या**, [२]पूर्वप्रत्युपेक्षितायास्तस्या व्याघाते वा वसतेरन्यवसतिग्रहणविधिर्वक्तव्यः । **ततिए सण्णि** त्ति **तृतीये** द्वारे **सञ्ज्ञी** श्रावको वक्तव्यः । **चउत्थी साहम्मि** त्ति **चतुर्थे** द्वारे **साधर्मिका** वक्तव्याः । **पंचमगंमि य वसहि** त्ति **पञ्चमे** द्वारे **वसतिर्वक्तव्या** वित्थिण्णा [३]खुड्डुलिआ (नि.२१८) इत्येवमादि । **छट्ठे ठाणट्ठिओ होति** । **षष्ठे** द्वारे **स्थानस्थितो भवति**। द्वारगाथेयम् ॥१७७॥

इदानीं निर्युक्तिकृतोपन्यस्तं सङ्गारद्वारं भाष्यकृद् व्याख्यानयन्नाह –

**२९३ आओसे संगारो अमुई वेलाएँ नि[४]ग्गए ठाणं ।**
**अमुगत्थ वसहिभिक्खं बितिओ खग्गूडसंगारो ॥९१॥ निभा०**

**आओसे** गाहा । **आओसे** त्ति प्रदोषे **संगारो** त्ति सङ्केत आचार्येण क[५]र्तव्यः, कथम् ?' **अमुई वेलाए** त्ति **अमुकया वेलया** यास्यामः । पुनश्च **निग्गए ठाणं** अमुगत्थ **निर्गतानां** सताममुकत्र **स्थानं** विश्रामस्थानं करिष्यामः । **वसहि** त्ति **अमुकत्र वसतिर्भविष्यति** वासको भविष्यतीत्यर्थः । **भिक्ख** त्ति अमुकग्रामे **भिक्षाटनं** कर्त्तव्यम् । एकस्तावदयं **सङ्गारः** सङ्केतः । **बितिओ खग्गूडसंगारो** त्ति **द्वितीयः** सङ्केतः **खग्गूडस्य** दीयते ॥९१॥

स चैवमाह –

---

१. ओहामग संपा० २. प्रत्युपेक्षिता तस्या. क. ३. छुड्डुलिया ल. ४. निग्गएण क. ५. वक्तव्यः दा.

**२९४ रत्तिं न चेव कप्पइ नीयदुवारे विराहणा दुविहा ।**
**पण्णवण बहुतरगुणा अणिच्छ बितिओ व उवही वा ॥९२॥ निभा०**

**रत्तिं** गाहा । **रत्तिं न चेव कप्पति** त्ति **रात्रौ** साधूनां गमनं **न कल्पते,** द्विविधविराधनासंभवात्, यत उक्तं, दिवापि तावत्–**नीयदुवारे विराहणा दुविह** त्ति दिवाऽपि तावदयं दोषः, "★**नीयदुवारं तमसं, कोट्ठगं परिवज्जए ।**" इति वचनात्, **नीचद्वारे द्विविधा विराधना** सतमस्कत्वाद्, आस्तां तावद्रात्रौ, एष च धर्मश्रद्धया नेच्छति **पण्णवण बहुतरगुण** त्ति पुनश्च तस्य **प्रज्ञापना** प्ररूपणा क्रियते, तत्र रात्रिगमने **बहवो गुणा** दृश्यन्ते, बालवृद्धादयः सुखेन गच्छन्ति रात्रौ, न तृषा बाध्यन्त इति । **अणिच्छ** त्ति अथ तथापि **नेच्छति** गमनम्, **बितिओ व** त्ति **द्वितीयस्**तस्य दीयते तदर्थं मुच्यत इति । **उवही व** त्ति **उपधिस्**तस्य दीयते जीर्णः, तदीयश्च शोभनो गृह्यत इति, मा भूत्तत्पार्श्वे स्थितमुपधिं स्तेनका आच्छेत्स्यन्ति ॥९२॥

इदानीमसावेकाकी यदि स्वपिति ततो दोषः प्रमादजनितस्ततश्चोपधिरुपहन्यते, उपहतश्चाकल्प्यो भवति, एतदेवाह –

**२९५ सुवणे वीसुवघातो पडिबज्झंतो[१] व जो उ न मिलिज्जा ।**
**जग्गण अप्पडिबज्झण जइवि चिरेणं न उवहम्मे ॥९३॥ निभा०**

**सुवणे** गाहा । **स्वापे वीसुं** एकाकिनो निद्रावशे सति को दोषः ? **उवघातो** त्ति **उपघातस्**तस्यैकाकिनः सुप्तस्य उपधिरुपहन्यते, स ह्येकाकी स्वपन् प्रमादवान् भवति स्त्र्याद्यभियोगसंभवात्, ततश्च निद्रावशं प्राप्तस्य उपधिरुपहन्यते, अतोऽकल्पनीयो भवति परिष्ठापनीयश्चासौ । गच्छे तु स्वपतोऽपि नोपहन्यते, किं कारणम्? यतस्तत्र केचित्सूत्रपौरुषीं कुर्वन्ति, अन्ये द्वितीयप्रहरेऽर्थानुचिन्तनं कुर्वन्ति, तृतीये तु प्रहर आचार्य उत्तिष्ठति ध्यानाद्यर्थम्, चतुर्थे तु प्रहरे सर्व एव भिक्षव उत्तिष्ठन्ति, ततश्च रात्रौ नैकोऽपि प्रहरः शून्यः, अतो नोपहन्यते उपधिः, एकाकिनस्तु जागरणं नास्त्यत उपघातः। **पडिबज्झंतो व जो उ न मिलिज्ज** त्ति **प्रतिबध्यमानो वा** व्रजादिषु क्षीरयाचनेच्छया प्रतिबध्यमानो **यो न मिलेत्** तस्याप्युपहन्यते उपधिः । किं कारणम् ?

---

★नीयदुवारं तमसं कोट्ठगं परिवज्जए । अचक्खुविसओ जत्थ, पाणा दुप्पडिलेहगा ॥ [दश. अ.-५ गाथा २०]
१. पडिवज्जंतो हे० पडिवज्जंतो व जाव सं.

एकाकिनः पर्यटनं नोक्तम्, एकाकी च पर्यटन् प्रमादभाग् भवति, अतो व्रजादि-प्रतिबन्धेऽप्युपधिरुपहन्यते। यस्तु पुन**र्जागर्त्ति** तस्मिन् दिवसेऽभुक्तो **न** च व्रजादिषु **प्रतिबध्यते** स एवंविधस्तस्मिन् दिवसेऽमिलन्नपि नोपधिमुपहन्ति । **जइवि चिरेणं** ति किं बहुना ? जाग्रन्निशि गोकुलादिषु वा**ऽप्रतिबध्यमानो यद्यपि चिरेण** मिलति बहुभिर्दिवसैस्तथाऽप्युपधिस्तस्य **नोपहन्यते,** अप्रमादपरत्वात्तस्येति ॥९३॥

इदानीं गच्छस्य गमनविधिं प्रतिपादयन्नाह –

**२९६ पुरओ मज्झे तह मग्गओ[१] य ठायंति खित्तपडिलेहा ।**
**दाएंतुच्चाराई भावासण्णाइरक्खट्ठा ॥१७८॥ नि०**

**पुरओ मज्झे** गाहा । क्षेत्रप्रत्युपेक्षका एषु विभागेषु भवन्ति-केचन **पुरतो**ऽग्रतो गच्छस्य, केचन **मध्ये** गच्छस्य । ते हि मार्गाभिज्ञा **मार्गतश्च** पृष्ठतश्च गच्छस्य **तिष्ठन्ति क्षेत्रप्रत्युपेक्षकाः** । किमर्थं पुनरेत एवं तिष्ठन्ति ? **'दाएंतुच्चाराई' उच्चार**-प्रश्रवणस्थानानि **दर्शयन्ति** गच्छस्य, **भावासण्णादिरक्खट्ठ** त्ति **भावासण्णो** अणहियासओ, **तद्रक्षणार्थम्,** एतदुक्तं भवति-उच्चारादिना बाध्यमानस्य ते मार्गज्ञाः स्थण्डिलानि दर्शयन्ति ॥१७८॥

**२९७ डहरे भिक्खग्गामे अंतरगामंमि ठावए तरुणे ।**
**उवगरणगहण असहू व ठावए जाणगं चेगं ॥१७९॥ नि०**

**डहरे** गाहा । **डहरे भिक्खग्गामे** त्ति यत्र ग्रामे वासको[१०]ऽभिप्रेतः भिक्षा चाऽटितुमभिप्रेता तस्मिन् **डहरे** क्षुल्लके **ग्रामे** सति किं कर्त्तव्यमत आह-**अंतरगामंमि** अपान्तराल एव यो ग्रामस्तस्मिन् भिक्षार्थं **तरुणान् स्थापयेत्, उवगरणगहणं** ति तदीय**मुपकरणमन्ये** भिक्षवो **गृह्णन्ति, असहू व ठावए** त्ति अथ ते तत्स्थापित-तरुणभिक्षुसत्कमुपकरणं ग्रहीतुं न शक्नुवन्ति ततोऽसहिष्णव एव [२]तत्रान्तरग्रामे भिक्षार्थं **स्थापयन्ते, जाणगं चेगं** ति **ज्ञं चैकं** मार्गज्ञं चैकं तेषां मध्ये स्थापयेद् येन सुखेनैवागच्छन्ति ॥१७९॥

**२९८ दूरुट्ठिअ खुड्डलए नव भड अगणी य पंत पडिणीए ।**
**संघाडेगो धुवकम्मिओ व सुण्णे नवरि रिं[३]क्खा ॥१८०॥ नि०**

---

९०. वासकः-आवासः । (व्य. प्र. १४७ अ.)

१. पिट्ठओ य य. ता. २. तत्रान्तरालग्रामे दा० ३. रेहा हे०

**दूरुट्ठिय** गाहा । अथवाऽसौ वासकभिक्षार्थमभिप्रेतो ग्रामो **दूरे** स्थितः स्याद्, **उत्थितो** वोद्वसितः, **क्षुल्लको** वा प्राक् संपूर्णो दृष्टः, इदानीमर्द्धमुद्वसितमतः **क्षुल्लकः**, **नव** प्राग् यस्मिन् स्थाने दृष्टस्ततः स्थानादन्यत्र प्रदेशे जातः, **भड** त्ति भटाक्रान्तो जातः । **अगणि** त्ति **अग्निना** वा इदानीं दग्धः, **प्रान्तः** प्राक् शोभनो दृष्ट इदानीं प्रान्तीभूतो विरूपो जातः । **पडिणीए** त्ति **प्रत्यनीका**क्रान्त इदानीं जातः, प्राक् प्रतिलेखनाकाले **प्रत्यनीक**स्तत्र नासीद्, इदानीं तु आयातः, पूर्वप्रतिलेखिते ग्राम एवंविधे जाते सति दूरस्थितादिदोषाभिभूते सति किं कर्त्तव्यम् ? **संघाड** त्ति तत्र **सङ्घाटकः** स्थाप्यते, पाश्चात्यप्रव्रजितमीलनार्थम् । **एगो** त्ति सङ्घाटकाभावे **एकः** स्थाप्यते साधुः । **धुवकम्मिओ व** त्ति **ध्रुवकर्मिको** लोहकारादिस्तस्य कथ्यते-यथा वयमन्य ग्रामे यास्यामः, त्वया पाश्चात्यसाधुभ्यः कथनीयम्—यथाऽनेन मार्गेणागन्तव्यमिति। एवं तावद् वसतिग्रामे एस विही। **सुण्णे नवरि रिक्ख** त्ति यदा त्वसौ **शून्यो** ग्रामस्तदा किं कर्त्तव्यम् ? **नवरि रिक्ख** त्ति वर्त्मन्यनभिप्रेते तिरश्चीनं रेखाद्वयं पात्यते, येन तु वर्त्मना गतास्तत्र दीर्घां **रेखां** कुर्वन्ति । यदा तु पुनरेभिरुक्तदोषैर्युक्तो न भवति स ग्रामस्तदा तत्रैव या वसतिस्तस्यां प्रविश्यते । ततश्च ये ते भिक्षार्थमन्तरालग्रामे स्थिता आसन् तेषां मध्ये यदि वसतिमार्गज्ञो भवति ततस्तस्यामेव वसता आगच्छन्ति, न कश्चित्प्रतिपालयति ॥१८०॥

एतदेवाह –

**२९१ जाणंतट्ठिए ता एउ वसहीए नत्थि कोइ पडियरइ ।**
**अण्णाए अजाणंतेसु वावि संघाड धुवकम्मी ॥१८१॥ नि०**

**जाणंत** गाहा । **जाणंतट्ठिए** मार्गाभिज्ञे **स्थिते** तस्यां **वसता**वागच्छन्ति, **नत्थि कोइ पडियरइ** त्ति **न कश्चित्तान्** प्रतिपालयति बहिः स्थितः । **अण्णाए** त्ति यदा तस्याः पूर्वप्रत्युपेक्षिताया वसतेर्व्याघातः सञ्जातः, किन्त्वन्या तस्या**मन्यस्यां** वसतौ जातायां **अजाणंतेसु वावि, अथवा** ये ते भिक्षानिमित्तं स्थिताः पश्चादागमिष्यन्ति ते**ष्वजानत्सु** सत्सु **संघाड धुवकम्मि** त्ति वसति[1]परिज्ञानार्थं **सङ्घाटको** बहिः स्थाप्यते **ध्रुवकर्मिको** लोहकारस्तस्य कथ्यते-ये पुनः साधव आगमिष्यन्ति तेषामियं वसतिर्दर्शनीया कथनीया वेति ॥१८१॥

---

१. ०परिज्ञापनार्थम् दा०

इदानीं ये ते भिक्षार्थं पश्चाद् ग्रामे स्थापितास्तैः किं कर्त्तव्यम् ? अत आह-

**३०० जइ अब्भासे गमणं [१]दूरे गंतुं दुगाउयं पेसे ।**
**ते वि असंथरमाणा एंती अहवा विसज्जंति ॥१८२॥ नि०**

**जइ अब्भासे** गाहा । **यद्यभ्यासे** आसन्ने गच्छस्ततस्ते **गमणं** ति गच्छसमीपमेव **गच्छन्ति, दूरे** त्ति अथ **दूरे** गच्छस्ततो **'गंतुं दुगाउयं' गत्वा द्विगव्यूतं** क्रोशद्वयम्, किम् ? **पेसे** त्ति एकं श्रमणं गच्छसमीपं **प्रेषयन्ति, ते वि तेऽपि** गच्छगताः साधवः **असंथरमाणा असंस्तरमाणा** अतृप्ताः सन्तः किं कुर्वन्ति ? **एंति** आगच्छन्ति, क्व ? यत्र ते साधवो भिक्षया गृहीतया तिष्ठन्ति, **अहवा विसज्जंति** त्ति **अथवा** तृप्तास्ततस्तं साधुं **विसर्जयन्ति,** यदुत पर्याप्तमस्माकम्, यूयं भक्षयित्वाऽऽगच्छत । संगारे त्ति दारं व्याख्यातं, तत्प्रसङ्गायातं च व्याख्यातम् ॥१८२॥

इदानीं वसतिद्वारमुच्यते, तत्प्रतिपादनायेदमाह —

**३०१ पढमबितियाए गमणं गहणं पडिलेहणा पवेसो य ।**
**काले संघाडेगो व असंथरंताण तह चेव ॥१८३॥ नि०**

**पढमबितिया** गाहा । **पढम** त्ति तस्यां च वसतौ **गमनं** प्राप्तिः कदाचि-त्**प्रथम**पौरुष्यां भवति कदाचिच्च **बितियाए** त्ति **द्वितीय**पौरुष्यां **गमनं** प्राप्तिरित्यर्थः। **गहणं** ति दंडउंछयणदोरयचिलिमिलीणं कृत्वा **ग्रहणं** वृषभाः प्रविशन्ति । पुनश्च **पडिलेहणा** तां वसतिं प्रमार्जयन्ति । **पवेसो** त्ति ततो गच्छः **प्रविशति** । **काले** त्ति कदाचिद्भिक्षा**काल** एव प्राप्तास्ततश्च को विधिः ? अत आह-**संघाड** त्ति **सङ्घाटक एको** वसतिं प्रमार्जयति, अन्ये भिक्षार्थं व्रजन्ति । **एगो व** त्ति यदा सङ्घाटको न पर्याप्यते तदा **एको** गीतार्थो वसतिप्रत्युपेक्षणार्थं प्रेष्यते, यदा तु पुनरेकोऽपि न पर्याप्यते तदा किम् ? **असंथरंताणं** अणुघट्टंताणं अतृप्यन्तः सर्व एवाटन्ति, या तु वसतिः पूर्वलब्धा तां कथमन्विषन्ति ? **तह चेव** त्ति यथा भिक्षामन्विषन्ति एवं वसतिमपि सर्वे प्रत्युपेक्षितामन्विषन्ति, अन्विष्य च तत्रैव प्रविशन्ति । यदा तु पूर्वप्रत्युपेक्षिताया वसतेर्व्याघातो जातस्तदाऽपि **तह चेव** त्ति यथा हि भिक्षां मार्गयन्ति तथा वसतिमपि, लब्धायां च तत्रैव परस्परं हिण्डन्तः कथयन्ति, एत्थ वसहीए नियट्टितव्वं ति ॥१८३॥

---

१ दूरं ता. सं.

इदानीं 'पढमबितियाए' त्ति (नि.१८३) इदं द्वारं भाष्यकृद् व्याख्यानयन्नाह –

**३०२ पढमबितियाए गमणं बाहिं ठाणं च चिलिमिणी दोरे ।**
**घित्तूण इंति वसहा वसहिं पडिलेहिउं पुव्विं ॥९४॥ निभा०**

**पढम** गाहा । **प्रथम**पौरुष्यां **गमनं** प्राप्तिर्भवति तत्र क्षेत्रे, कदाचिद्**द्वितीयायां** प्राप्तिस्ततः को विधिरित्यत आह–**'बाहिं ठाणं च' बहिरे**व तावदव**स्थानं** कुर्वन्ति, स्थिताश्चोत्तरकालं ततः **चिलिमिणी दोरे** जवनिकां **दवरकां च गृहीत्वा** प्रविशन्ति वसतौ **वृषभाः,** ग्रहणद्वारं व्याख्यातम् । किं कर्तुम् ? **वसतिं प्रत्युपेक्षितुं** वसतिप्रत्युपेक्षणार्थं प्राग् वृषभा गृहीतचिलिमिलिन्याद्युपकरणा आगच्छन्ति, पडिलेहण त्ति दारं भणितम् ॥९४॥

एवं तावत्पूर्वप्रत्युपेक्षितायां वसतौ विधिः, यदा तु पुनः पूर्वप्रत्युपेक्षिताया व्याघातस्तदा –

**३०३ वाघाए अण्णं मग्गिऊण चिलिमिणि पमज्जणा वसहे ।**
**पत्ताण भिक्खवेलं संघाडेगो परिणओ वा ॥१८४॥ नि०**

**वाघाए** गाहा । पूर्वप्रत्युपेक्षिताया वसते**र्व्याघाते** स**त्यन्यां** वसतिं **मार्गयित्वा** ततः किं ? **चिलिमिणि पमज्जणा वसहे** त्ति ततो **वृषभाश्चिलिमिलिन्या**दीनि गृहीत्वा **प्रमार्जयन्ति** । **पत्ताण भिक्खवेलं** यदा तु पुन**र्भिक्षावेलायामेव प्राप्ता**स्तदा किं कर्त्तव्यम् ? काले त्ति भणितम्, **संघाडे** त्ति **सङ्घाटको** वसतिप्रत्युपेक्षणार्थं प्रेष्यते, संघाडे त्ति भणिअं, **एगो व** त्ति सङ्घाटकाभावे **एको वा** प्रेष्यते, किंविशिष्टः ? **परिणतो** गीतार्थः, एगो त्ति भणिअं ॥१८४॥

यदा तु पुनरेको नास्ति तदा किम् ? –

**३०४ सव्वे वा हिंडंता वसहिं मग्गंति जह उ समुयाणं ।**
**लद्धे संकलियनिवेअणं तु तत्थेव उ नियट्टे ॥१८५॥ नि०**

**सव्वे** गाहा । **सर्वे वा हिण्डन्त** एव **वसतिं मार्गयन्त्य**न्विषन्ति, कथम् ? **'जह उ समुदाणं' यथा समुदानं** भिक्षां प्रार्थयन्ति निरूपयन्ति, एवं वसतिमप्यन्विषन्ति, 'तह चेव'त्ति अवयवो भणितः। **लद्धे संकलियनिवेअणं तु** भिक्षामटद्भि[1]**र्लब्धायां** वसतौ **सङ्कलिकया निवेदनं** यो यथा यं पश्यति स तथा

१. भिक्षामटतां लब्धायां सङ्कलिया नि० क०

तं वक्ति-यदुत इह वसतिर्लब्धा, इह निवर्त्तनीयम्, **तस्यामेव** च वसतौ **निवर्त्तन्ते** ॥१८५॥

तत्र च प्रवेशे को विधिः ? –

**३०५ एक्को धरेइ भाणं एक्को दोण्ह वि पवेसए उवहिं ।**
**गच्छो उवेइ[1] वसहिं सबालवुड्ढाउलो ताहे ॥१८६॥ नि०**

**एगो** गाहा । **एको धारयति** सङ्घट्टयति **भाजनं** पात्रकम्, **एको**ऽन्यस्तस्य द्वितीयो बहिर्व्यवस्थितगच्छात् सकाशाद् भिक्षामटद्भ्यां मुक्तामुपधिं **द्वयोरपी**त्यात्मनः सम्बन्धिनीं तस्य च पात्रकसङ्घट्टयितुः सम्बन्धिनी**मुपधिं प्रवेशयति**, तत उत्तरकालं **गच्छ उपैति** प्रविशति **सबालवृद्ध**त्वा**दाकुलस्तदा** तस्मिन् काले । दारं । ॥१८६॥

**३०६ चोयगपुच्छा दोसा मंडलिबंधंमि होइ आगमणं ।**
**संजमआयविराहण वियालगहणे य जे दोसा ॥१८७॥ नि० दारगाहा ।**

**चोदगपुच्छा** गाहा । चोदकस्य पृच्छा **चोदकपृच्छा,** चोदक एवमाह-यदुत बाह्यत एव भुक्त्वा प्रवेशः क्रियते, किं कारणम् ? उपधिमानयतः क्षुधार्त्तस्य तृषितस्य चेर्यापथमशोधयतः संयमविराधना, उपधिभाराक्रान्तस्य कण्टकादीननिरूपयत आत्मविराधना, ततश्च बहिरेव भुक्त्वा विकाले प्रविशन्तु, आचार्यस्त्वाह-बहिर्भुञ्जतां **दोषाः**, कथम् ? **मण्डलिबन्धे सत्यागमनं भवति** सागारिकाणाम्, तत्र च **संयमात्मविराधना** भवति, **वियालगहणे** त्ति **विकाल**वेलायां **च** वसति**ग्रहणे ये दोषा** भवन्ति ते वक्ष्यन्ते। द्वारगाथेयम् ॥१८७॥

चोदकपृच्छेति व्याख्यानयन्नाह –

**३०७ अइभारेण व इरिअं न सोहए[2] कंटगाइ आयाए ।**
**भत्तट्ठिअ वोसिरिआ अइंतु एवं जढा दोसा ॥१८८॥ नि०**

**अतिभारेण** गाहा । चोदक एवमाह-यदुत गच्छसमीपादुपधिं प्रवेशयन् **तदतिभारेण** बुभुक्षया च पीडितः **सन्नीर्या**पथिकां **न शोधयति** यतोऽतः संयमविराधना भवति, तथा **कण्टकादीनि** च न पश्यति बुभुक्षितत्वादेव यतोऽत **आत्म**विराधना भवति, तस्माद् **भत्तट्ठिय** त्ति बहिरेव भुक्ताः सन्तस्तथा **वोसिरिय**

---

१. अइंति ह० य एइ हे० २. पेहए हे०

त्ति उच्चारप्रश्रवणं कृत्वा ततः **अइंतु** त्ति प्रविशन्तु, क्व ? वसतौ, **एवं जढा दोस** त्ति **एवं** क्रियमाणे **दोषा** आत्मविराधनादयः परित्यक्ता भवन्ति ॥१८८॥

एवमुक्ते सत्याहाचार्यः –

**३०८ आयरियवयण दोसा दुविहा नियमा उ संजमायाए ।**
**वच्चह न तुब्भे सामी असंखडं मंडलीए वा ॥१८९॥ नि०**

**आयरिय** गाहा । **आचार्यस्य**[१] **वचनम्**, किं तदित्यत आह-**दोसा** बाह्यतो भुञ्जतां **दोषा** भवन्ति **द्विविधा नियमा**दवश्यंतया **संजम** त्ति **संयम**विराधनादोषः **आयाए** त्ति **आत्म**विराधनादोषः। तत्र [२]संयमविराधनादोष एवं भवति-तत्र भोजनस्थाने सागारिका यदि बहवस्तिष्ठन्ति ततस्ते साधवो भिक्षामटित्वाऽऽगताः सन्तो यद्येवं भणन्ति-यदुत **वच्चह**-हे सागारिकाः ! गच्छतास्मात् स्थानात्, ततश्चैवमुच्यमाने संयमवि[३]राधना भवति । आत्मविराधना चैवं भवति-यदि ते सागारिका उच्यमाना न गच्छन्ति, किन्त्वेवं भणन्ति-'**न तुब्भे सामी**' **ना**स्य प्रदेशस्य **भवन्तः स्वामिनः**, ततश्च [९१]**असंखडं** भवति **मंडलीए वा** इति अथ मण्डल्यां जातायां सत्याम् ॥१८९॥

**३०९ कोऊहल आगमणं संखोभेणं अकंठगमणाई ।**
**ते चेव संखडाई वसहिं च न देंति जं चऽण्णं ॥१९०॥ नि०**

**कोऊहल** गाहा । [४]मण्डल्यां जातायां कौतुकेन सागारिका **आगमनं** कुर्वन्ति, ततश्च **संखोभेणं** ति **संक्षोभेण** तेषां प्रव्रजितानाम् **अकण्ठगमणादि** कण्ठेन भक्तकवलो नोपक्रामति, **ते चेव** [५]**संखडाइ** त्ति **त एव** वा [९२]**संखडादयो** दोषा भवन्ति, **वसहिं च न देंति** त्ति एवं च सागारिका रुष्टाः सन्तो **वसतिं न** प्रयच्छन्ति, तत्र ग्रामे **जं चऽण्णं** त्ति ग्रहणाकर्षणादि कुर्वन्ति ॥१९०॥

इदानीं तस्माद् ग्रामादन्यत्र ग्रामे भोजनं गृहीत्वा गन्तव्यम्, तत्र चैते दोषाः –

**३१० भारेण वेयणाए न पेहए [६]थाणुकंटआयाए ।**
**इरियाइ संजमंमि य परिगलमाणे य छक्काया ॥१९१॥ नि०**

**भारेण** गाहा । उपधिभिक्षा**भारेण** या **वेदना** क्षुद्वेदना वा तया **न पेहए** त्ति

---

९१. असंखडं-कलह इति । संटी. ९२. संखडादयः कलहादिदोषा इति । संटी.

१. आचार्यवचनम्-स.दा. २. संयमदोषा क. ३. विराधनादोषो भ०दा० ४. मण्डलिकायां ख.भ.व. ५. असंखडादि त्ति क. ६. खाणु० ह.हे.

**न** पश्यति **स्थाणुकण्टकादीन्**, ततश्चा**त्म**विराधना भवति । **इरियाइ** त्ति **संयम**विषया विराधना **ईर्यादि**, तथा **परिगलमाने च** पानादौ **षट्काय**विराधना भवति ॥१९१॥

तथा चैते चान्यत्र ग्रामे गच्छतां दोषा भवन्ति –

**३११ सावय तेणा दुविहा विराहणा जा य उवहिणा उ विणा ।**
**तणअग्गिगहणसेवण वियालगमणे इमे दोसा ॥१९२॥ नि०**

**सावय** गाहा । **श्वापद**भयं भवति, तथा **तेणा दुविहा** भवन्ति-शरीरापहारिण उपध्यपहारिणश्च[1], **विराहणा जा य उवहिणा उ विणा । या चोपधिना** संस्तारकादिना **विना विराधना** भवति, का चासौ? **तणअग्गिगहणसेवण**[2] यथासङ्ख्यं **तृणानां ग्रहण** आत्मविराधना **अग्नेश्च सेवने** संयमविराधनेति । द्वारम् । एवं तावद्ग्राह्यतो भुञ्जतामन्यग्रामे च गच्छतां दोषा व्याख्याताः, इदानीं यदुक्तमासीच्चोदकेन यदुत-विकाले प्रवेष्टुं युज्यते, तन्निरस्यन्नाह-**वियालगमणे इमे दोसा । विकालगमने** वसतौ **एते** वक्ष्यमाणलक्षणा **दोषा** भवन्तीति ॥१९२॥

ते चामी –

**३१२ पविसण मग्गण ठाणे वेसित्थिदुगुंछिए य बोद्धव्वे ।**
**सज्झाए संथारे उच्चारे चेव पासवणे ॥१९३॥ नि० दारगाहा ।**

**पविसण** गाहा । **पविसणे** त्ति तत्र ग्रामे विकाले **प्रविशतां** ये दोषास्तान् वक्ष्यामः । **मग्गण** त्ति वसति**मार्गणे**ऽन्वेषणे विकालवेलायां ये दोषास्तान् वक्ष्यामः । **ठाणे वेसित्थिदुगुंछिए अ** इत्येतद्वक्ष्यतीति (नि.१९५) विकालवेलायां **बोद्धव्यं** विज्ञेयम् । **सज्झाए** त्ति **स्वाध्यायम**प्रत्युपेक्षितायां वसतौ, अगृहीते काले कुर्वतो दोषाः, अथ न करोति तथापि दोषो हानिलक्षणः । **संथारे** त्ति अप्रत्युपेक्षितायां वसतौ **संस्तारक**भुवं गृह्णतः संयमात्मविराधनादोषः । **उच्चारे** त्ति अप्रत्युपेक्षितायां वसतौ स्थण्डिलेष्वनिरूपितेषु व्युत्सृजतां दोषः, धरणेऽपि दोषः, **पासवणे** त्ति अप्रत्युपेक्षितेषु स्थण्डिलेषु व्युत्सृजतो दोषः, धारयतोऽपि दोष एव । इयं द्वारगाथा ॥१९३॥

इदानीं प्रतिपदं व्याख्यायते –

**३१३ सावय तेणा दुविहा विराहणा जा य उवहिणा उ विणा ।**
**गुम्मिअ गहणाऽऽहणणा गोणाईचमढणा चेव ॥१९४॥ नि०**

---

१. उपधिहारि० क.ल. २. ०सेवणा क.

**सावय** गाहा । विकाले प्रविशतां ग्रामे **श्वापद**भयं भवति । **स्तेना** द्विप्रकाराः-शरीरस्तेना उपधिस्तेनाश्च, तद्भयं भवति विकाले प्रविशताम्, **विराधना या चोपधिना विना** भवति-अग्नितृणयोर्ग्रहणसेवनादिका, सा च विकालप्रवेशे दोषः । **गुम्मिय** त्ति **गुल्मं** स्थानं त[1]स्माद् **ग्रहणमाहननं** च भवति विकाले प्रविशतामयं दोषः । **गोणादिचमढणा** बलीवर्दादिपादप्रहारादिश्च, एवमयं विकालप्रदेशे दोषः, 'पविसणे'त्ति गयं ॥१९४॥

इदानीं 'मग्गणे'त्ति (नि.१९३)व्याख्यायते –

**३१४ फिडिए अण्णोण्णारण तेण य राओ दिया य पंथंमि ।**
**साणाइ वेसकुत्थिअ तवोवणं मू[2]सिआ चेव ॥१९५॥ नि०**

**फिडिए** गाहा । **फिडिए** त्ति विकालवेलायां वसतिमार्गणेऽन्वेषणे **फिडितो** भ्रष्टो भवेत्, तत्र **अण्णोण्णारण** त्ति **अन्योऽन्यं** प[3]रस्पर**मारणं** संशब्दनं ग[4]वेषणं तच्छ्रुत्वा **स्तेनका रात्रौ** मुषितुमभिलषन्ति, **दिया य पंथंमि** त्ति **दिवा** वा प्रभाते **पथि** गच्छतस्तान् श्रमणान् मु[5]ष्णन्ति । **साणादि** त्ति रात्रौ वसतेरन्वेषणे **श्वादिर्दशति**। मग्गणे त्ति भणिअं । वे[6]सित्थिदुगुंछिए त्ति (नि.१९३)व्याख्यायतेऽवयवः, तत्राह-**वेसकुत्थिअ तवोवणं मूसिगा चेव** रात्रौ वसतिलाभे न जानन्ति किमेतत्स्थानं वेश्यापाटकासन्नमनासन्नं वा ? ते चाजानानास्तस्यां वसतौ निवसन्ति, तत्र चायं दोषः-**वेश्या**समीपे वसतां लोको भणति-अहो **तपोवनमिति** । **कुत्सित**छिंपकादि-स्थानासन्ने लोको ब्रवीति-स्वस्थाने **मूषिका** गताः, एतेऽप्येवंजातीया **एव** । 'वेसित्थिकुत्थिते त्ति गतं, स्वाध्यायद्वारं व्याख्यातमेव द्रष्टव्यम् ॥१९५॥

इदानीं 'संथारे'त्ति (नि.१९३) व्याख्यायते –

**३१५ अप्पडिलेहिअ कंटा बि[7]लं व संथारगंमि आयाए ।**
**छ[8]क्कायसंजमम्मि चिलीणे सेहऽन्नहाभावो ॥१९६॥ नि०**

**अप्पडिलेहिय** गाहा । **अप्रत्युपेक्षितायां** वसतौ **कण्टका** भवन्ति **बिलं वा**, तत्र **संस्तारके** क्रियमाणे **आयाए** त्ति **आत्म**विराधना भवति । **छक्काय** त्ति **षट्कायस्या**प्यप्रत्युपेक्षितवसतौ स्वपतः **संजमंमि** त्ति **संयम**विषया विराधना भवति।

---

१. तद्रक्षपालास्तैर्ग्र० दा० २. मूसिया जं च हे ता. मुसगा जं च ह ३. परस्परतः क. ४. गवेषणादी ल. ५. मूषन्ति क.ल. ६. कुत्थियासण्णेत० क. ७. बिलम्मि ह०हे० ८. संजमम्मि य ह० हे०

**चिलीणे** त्ति तथा **चिलीन**मशुचिकं भवति, तस्मिंश्च **सेहस्य** जुगुप्सया-ऽश्रुतार्थस्यान्**यथाभाव** उन्निष्क्रमणादिर्भवति । संथारे त्ति गयं ॥१९६॥

इदानीं 'उच्चारपासवणे'त्ति (नि.१९३) व्याख्यायते –

**३१६ कंटगथाणुगवालाबिलंमि जइ वोसिरिज्ज आयाए ।**
**संजमओ छक्काया गमणे पत्ते अइंते य ॥१९७॥ नि०**

**कंटग** गाहा । अप्रत्युपेक्षितायां वसतौ **कण्टकस्थाणुव्यालबिले** समाकुले प्रदेशे **व्युत्सृजत आत्म**विराधना भवति, **संजमओ** त्ति **संयमतो** विराधना **षट्कायो**पमर्दे सति रात्रौ भवति । **गमणे** त्ति कायिकाव्युत्सृजनार्थं **गमने** दोषः । **पत्ते** त्ति कायिकाभुवं **प्राप्तस्य** व्युत्सृजतः **अइंते य** त्ति पुनः कायिकां व्युत्सृज्य वसतिं प्रविशतो **षट्कायो**पमर्दो भवतीति ॥१९७॥

अथ तु पुनर्निरोधं करोति, ततः –

**३१७ मुत्तनिरोहे चक्खू वच्चनिरोहे य जीवियं चयइ ।**
**उड्डनिरोहे [1]कोड्डं गेलन्नं वा भवे तिसु वि ॥१९८॥ नि०**

**मुत्तनिरोहे** गाहा । सुगमा । 'उच्चारपासवणे'त्ति गयं ॥१९८॥

[अथ विराधनाभयाद् न व्युत्सृजति तत इमे दोषाः –

**मुत्तनिरोहे चक्खुं, वच्चनिरोहेण जीवियं चयइ ।**
**उड्डनिरोहे कोड्डं, गेलन्नं वा भवे तिसु वि ॥४३८०॥**

मूत्रस्य निरोधे विधीयमाने चक्षुरुपहन्यते । वर्चः-पुरीषं तस्य निरोधेन जीवितं परित्यजति, अचिरादेव मरणं भवतीत्यर्थः । ऊर्द्ध्वं-वमनं तस्य निरोधे कुष्ठं भवति । 'ग्लान्यं वा' सामान्यतो मान्द्यं 'त्रिष्वपि' मूत्र-पुरीष-वमनेषु निरुध्यमानेषु भवेत् । [बृ.क.-४३८०]]

इदानीमपवाद उच्यते –

**३१८ जइ पुण वियालपत्ता पए व पत्ता उवस्सयं न लभे ।**
**सुन्नघर देउले वा उज्जाणे वा अपरिभोगे ॥१९९॥ नि०**

**यदि पुण** गाहा । **यदि पुनर्विकाल** एव **प्राप्ताः**, ततश्च तेषां विकालवेलायां वसतौ प्रविशतां प्रमादकृतो दोषो न भवति, **पए व पत्त** त्ति प्रागेव प्रत्यूषस्येव वा **प्राप्ताः**

---

१. कोढ ह० कोढं हे०

किन्तु **उपाश्रयं न लभन्ते** ततः क्व समुद्दिशन्तु? **शून्यगृहे देवकुले वा उद्याने वाऽपरिभोगे** लोकपरिभोगरहिते समुद्दिशन्तीति क्रियां वक्ष्यति ॥१९९॥

**३१९ आवाय चिलिमिलीए रण्णे वा निब्भए समुद्दिसणं ।**
**सभए पच्छन्नाऽसइ कमढय कुरुया य संतरिया ॥२००॥ नि०**

**आवाय** गाहा । अथ शून्यगृहादौ सागारिकाण**मापातो** भवति तत आपाते सति **चिलिमिली** जवनिका दीयते, **रण्णे व** त्ति अथ शून्यगृहादि सागारिकाक्रान्तम्, ततोऽ**रण्ये निर्भये समुद्दिशनं** क्रियते[१], **सभए** अरण्ये **प्रच्छन्नस्य** वा **असत्य**भावे, ततो [१३]वसिमसमीप एव **कमढकेषु** शुक्लेन लेपेन सबाह्याभ्यन्तरेषु[२] लिप्तेषु भुञ्जते, **कुरुकुआ य** त्ति **कुरुकुचा** पादप्रक्षालनादिका क्रियते । **संतरित** त्ति **सान्तरा:**सावकाशा बृहदन्तराला उपविशन्ति ॥२००॥

इदानीं भुक्त्वा बहिः पुनर्विकाले वसतिमन्विषन्ति, सा च कोष्ठकादिका भवति, तत्र लब्धायां वसतौ को विधिरित्यत आह –

**३२० कोट्ठय सभा य पुव्विं का[३]ल वियाराइभूमिपडिलेहा ।**
**पच्छा अइंति रत्तिं पत्ता वा ते भवे रत्तिं ॥२०१॥ नि०**

**कोट्ठग** गाहा । **कोष्ठक** आवासविशेषः **सभा** प्रतीता, [४]कोष्ठके सभायां वसतौ लब्धायां प्रागेव **काले** त्ति **काल**भूमिं प्रत्युपेक्षन्ते यत्र कालो गृह्यते । तथा **'वियारभूमिपडिलेहा' विचारभूमिः** संज्ञाकायिकाभूमिस्तस्याश्च [५]**प्रत्युपेक्षणा** क्रियते। तत एवं प्रत्युपेक्षितायां विकाले वसतौ **पच्छा अतिंति रत्तिं** ति **पश्चाच्छेषा:** साधवो **रात्रौ** प्रविशन्ति । **पत्ता वा ते भवे रत्तिं** ति यदा पुन**स्त** आगच्छन्त एव कथमपि **रात्रावेव प्राप्ता**स्तदा रात्रावपि प्रविशन्ति ॥२०१॥

तत्र च प्रविशताम् –

**३२१ गुम्मिअभेसण समणा निब्भय बहिठाण वसहिपडिलेहा ।**
**सुन्नघरपुव्वभणिअं कंचुग तह [६]दारुदंडेणं ॥२०२॥ नि०**

**गुम्मिय** गाहा । [७]**गुल्मिका:** स्थानकरक्षपाला:, **भेसणं** ति यदि ते

---

१३. वसिमम्-जनावासभूतं जनपदम् । (बृ.क. १ उ. ३)

१. कृत्वा यदि स० क० २. ०षु भुञ्जते क० ३. काले आ० ४. कोष्ठकसभावसतौ क ल. ५. प्रत्युपेक्षणं क० ६.चाक ह० ७. गुल्मका क०

कथञ्चित्त्रासयन्ति ततश्चेदं वक्तव्यम्-यदुत **श्रमणा** वयम्, न चौराः, **निब्भय** त्ति अथ तु स सन्निवेशो **निर्भय** एव भवेत्तदा **बहिठाणं** ति **बहिरे**व गच्छस्तावत्तिष्ठति, वृषभास्तु **वसतिप्रत्युपेक्षणार्थं** व्रजन्ति । किंविशिष्टाऽसौ वसतिरन्विष्यते? **शून्यगृहादि** पूर्वोक्तम्, **कंचुग तह दारुदंडेणं** ति दण्डकपुञ्छनं तद्धि [१४]**कञ्चुकं** परिधाय सर्पपतनभयाद्**दण्डक**पुञ्छनकेन वसतिमुपरिष्टात्प्रस्फोटयन्ति, गच्छश्च प्रविशति ॥२०२॥

ततः को विधिः स्वापे ? –

**३२२ संथारगभूमितिगं आयरियाणं तु सेसगाणेगा ।**
**रुंदाए [१]पुप्फकिन्ना मंडलिआ आवली इयरे ॥२०३॥ नि०**

**संथारग** गाहा । **संस्तारकभूमित्रयमाचार्याणां** निरूप्यते, एका निवाता संस्तारकभूमिः, अन्या प्रवाता, अन्या निवातप्रवाता । **सेसगाणेग** त्ति **शेषाणां** साधूना**मेकैका** संस्तारकभूमिर्दीयते, **रुंदाए** त्ति यद्यसौ वसतिर्विस्तीर्णा भवेत्ततः **पुष्पावकीर्णाः** स्वपन्ति-पुष्पप्रकरवदयथायथं स्वपन्ति येन सागारिकावकाशो न भवति । **मंडलिय** त्ति अथाऽसौ वसतिः क्षुल्लिका भवति ततो मध्ये पात्रकाणि कृत्वा **मण्डल्याः** पार्श्वे स्वपन्ति । स्थापना चेयम् - **आवलिय** त्ति प्रमाणयुक्तायां वसतौ **आवल्या** पङ्क्त्या स्वपन्ति, **इयरे** त्ति क्षुल्लिकाप्रमाणयुक्तयोर्वसत्योरयं विधिः– ॥२०३॥

| |
|---|
| ऽ ऽ ऽ |
| । ऽ ऽ |
| ऽ । ऽ |
| । । ऽ |
| ऽ ऽ । |
| । ऽ । |
| ऽ । । |
| । । । |

**३२३ संथारग्गहणीए वेंटिअउक्खेवणं तु कायव्वं ।**
**संथारो घेत्तव्वो मायामयविप्पमुक्केणं ॥२०४॥ नि०**

**संथार** गाहा । **संथारग्गहणीए** संस्तारकभूमिग्रहणकाले एतदुक्तं भवति–यदा स्थविरादिः संस्तारकभूमिविभजनं करोति तदा साधुभिः किं कर्त्तव्यमत आह – **वेंटिअउक्खेवणं तु कायव्वं** । **वेंटिआ** उपधि**वेण्टलिका**स्तासां सर्वैरेव साधुभिरात्मीयात्मीयाना[२]**मुत्क्षेपणं कर्त्तव्यं** येन सुखेनैव दृष्टायां भुवि विभक्तुं संस्तारकाः शक्यन्ते । स च **संस्तारको** यो यस्मै दीयते साधवे स कथं तेन **ग्राह्य** इत्याह–

---

१४. कञ्चुकः-चोलकः । (प्रा.)

१. पुप्फइन्ना दा. २. उपक्षेपणं क०

**मायामदविप्रमुक्तेन,** तेन न माया कर्त्तव्या यदुताहं वातार्थी ममेह प्रयच्छ, नापि मदोऽहङ्कारः कार्यः, यदुताहमस्यापि पूज्यो येन मम शोभनसंस्तारकभूर्दत्तेति ॥ "[A]जइ रत्तिं आगया ताहे कालं न गिण्हंति, निज्जुत्तीओ संगहणीओ य सणिअं गुणंति, मा वेसित्थिदुगुंछिआदओ दोसा होहिंति, कायिकां मत्तएसु छड्डेंति उच्चारं पि जयणाए । जइ पुण कालभूमी पडिलेहिआ ताहे कालं गिह्णंति, यदि सुद्धो कालो करेंति सज्झायं, अह न सुद्धो न पडिलेहिआ वा वसही ताहे निज्जुत्तीओ गुणिंति, पढमपोरिसिं काऊणं बहुपडिपुण्णाए पोरिसीए गुरुसगासं गंतूण भणंति–इच्छामि खमासमणो ! वंदिउं जावणिज्जाए निसीहिआए मत्थएण वंदामि, खमासमणो ! बहुपडिपुण्णा पोरिसी, अणुजाणह राईसंथारयं, ताहे पढमं काइयाभूमिं वच्चंति, ताहे जत्थ संथारगभूमी तत्थ वच्चंति, ताहे उवहिंमि उवओगं करेंता [१]पमज्जंता उवहीए दोरयं उच्छोडिंति, ताहे संथारगपट्टअं उत्तरपट्टयं च पडिलेहंति पडिलेहित्ता दो वि एगत्थ लाएत्ता उरुंमि ठवेंति, ताहे संथारगभूमिं पमज्जयंति, ताहे संथारयं [२]अत्थुरंति सउत्तरपट्टं, तत्थ य लग्गा मुहपोत्तिआए उवरिल्लं कायं पमज्जंति, हेट्ठिल्लं रयहरणेणं, कप्पे य वामपासे ठवेंति, पुणो [३]संथारए चडंतो भणइ जेट्ठज्जादीणं पुरतो चिट्ठंताणं–[४]अणुजाणिज्जह, पुणो सामाइअं तिण्णि वारे कड्ढिऊणं सोवइ, एस ताव कमो" ॥२०४॥

इदानीं गाथा व्याख्यायते –

**३२४ पोरिसिआपुच्छणया सामाइय उभय कायपडिलेहा ।**
**साहणिअ दुवे पट्टे पमज्ज पाए जओ भूमिं ॥२०५॥ नि०**

---

A. यदा रात्रावागतास्तदा कालं न गृह्णन्ति, निर्युक्तीः संग्रहणीश्च शनैर्गुणयन्ति, मा वेश्यास्त्रीकुत्सितादयो दोषा भूवन्, कायिकीं मात्रकेषु व्युत्सृजन्ति उच्चारमपि यतनया। यदि पुनः कालभूमयः प्रतिलेखितास्तदा कालं गृह्णन्ति, यदि शुद्धः कालः कुर्वन्ति स्वाध्यायम्, अथ न शुद्धो न प्रतिलेखिता वा वसतिस्तदा निर्युक्तीर्गुणयन्ति प्रथमां पौरुषीं कृत्वा बहुप्रतिपूर्णायां पौरुष्यां गुरुसकाशं गत्वा भणन्ति–इच्छामि क्षमाश्रमण ! वन्दितुं यापनीयया नैषेधिक्या मस्तकेन वन्दे, क्षमाश्रमण! बहुप्रतिपूर्णा पौरुषी, अनुजानीत रात्रिसंस्तारकम्, तदा प्रथमं कायिकीभूमिं व्रजन्ति, ततो यत्र संस्तारकभूमिस्तत्र व्रजन्ति, तदोपधावुपयोगं कुर्वन्तः प्रमार्जयन्त उपधेर्दवरकमुच्छोटयन्ति, तदा संस्तारकपट्टमुत्तरपट्टकं च प्रतिलेखयन्ति प्रतिलिख्य द्वेप्येकत्र लात्वोरुणि स्थापयन्ति, तदा संस्तारकभूमिं प्रमार्जयन्ति, तदा संस्तारकमास्तृण्वन्ति सोत्तरपट्टकम्, लग्ना मुखवस्त्रिकयोपरितनं कायं प्रमार्जयन्ति, अधस्तनं रजोहरणेन, कल्पांश्च वामपार्श्वे स्थापयन्ति, पुनः संस्तारकमारोहन्तो भणन्ति ज्येष्ठार्यादीनां पुरतस्तिष्ठताम्–अनुजानीत, पुनः सामायिकं त्रीन् वारान् कृष्ट्वा (उच्चार्य) स्वपिति, एष तावत् क्रमः ।

१. पमज्जिज्जा क० २. अच्छुरंति दा० ३. संथारं क० ४. अणुजाणह क०

**पोरिसि** गाहा । **पौरुष्यां** निर्युक्तीर्गुणयित्वा **आपुच्छण** त्ति आचार्यसमीपे मुखवस्त्रिकां प्रतिलेखयित्वा भणति-बहुपडिपुण्णा पोरिसी संदिशत संस्तारके तिष्ठामीति, **सामाइयं** ति **सामायिकं** वारात्रयमाकृष्य स्वपिति । **उभयं** ति संज्ञाकायिकोपयोगं कृत्वा **कायपडिलेह** त्ति सकलं **कायं प्रमृज्य** साहणिअ दुवे पट्टे त्ति **साहणिय**-एगत्थ लाएत्ता **दुवे पट्टे** उत्तरपट्टो संथारपट्टो अ, तत ऊर्वोः स्थापयति, **पमज्ज पाए जओ भूमिं** ति **पादौ यतस्तेन भूमिं प्रमृज्य** ततः सोत्तरपट्टं संस्तारकं मुञ्चति, अस्याश्च सामाचार्यनुक्रमेण गाथायां सम्बन्धो न कृतः, किन्तु स्वबुद्ध्या यथाक्रमेण व्याख्येया ॥२०५॥

एवमसौ संस्तारकमारोहन् किं भणतीत्यत आह –

**३२५ अणुजाणह संथारं बाहुवहाणेण वामपासेणं ।**
**कुक्कुडिपायपसारण अतरंत पमज्जए भूमिं ॥२०६॥ नि०**

**अणुजाणह** गाहा । **अनुजानीध्वं संस्तारकम्**, पुनश्च **बाहूपधानेन वामपार्श्वेन** स्वपिति, **कुक्कुडिपायपसारण** त्ति यथा **कुक्कुटी पादा**वाकाशे प्रथमं **प्रसारयति** एवं साधुनाप्याकाशे **पादौ** प्रथमं शक्नुवता **प्रसारणीयौ**, **अतरंतो** त्ति यदा आकाशव्यवस्थिताभ्यां पादाभ्यां न शक्नोति स्थातुं तदा **पमज्जए भूमिं** ति **भुवं प्रमृज्य** पादौ स्थापयति ॥२०६॥

**३२६ संकोए संडासं उव्वत्तंते य कायपडिलेहा ।**
**दव्वाईउवओगं णिं[1]स्सासनिरुंभणालोयं ॥२०७॥ नि०**

**संकोचए** गाहा । यदा तु पुनः **सङ्कोचयति** पादौ तदा **संडासं** ति **संदंसं** ऊरुसन्धिं प्रमृज्य सङ्कोचयति, **उव्वत्तंते य** त्ति **उद्वर्त्तयं**श्चासौ साधुः **कायं प्रमार्जयति,** एवमस्य स्वपतो विधिरुक्तः । यदा पुनः कायिकार्थमुत्तिष्ठति स तदा किं करोतीत्याह- **'दव्वाईउवओगं' द्रव्यतः** क्षेत्रतः कालतो भावत**श्चोपयोगं** ददाति, तत्र द्रव्यतः कोऽहं प्रव्रजितो [2]गृहस्थो वा ? क्षेत्रतः किमुपरितलेऽन्यत्र वा ? कालतः किमियं रात्रिर्दिवसो वा ? भावतः कायिकादिना पीडितोऽहं न वा इति, एवमुपयोगे दत्तेऽपि [3]यदि निद्रयाऽभिभूयते तदा **णिस्सासनिरुंभण** त्ति **निःश्वासं निरुणद्धि** नासिकां दृढं गृह्णाति निःश्वासनिरोधार्थम्, ततोऽपगतायां निद्रायां **आलोयं** ति **आलोकं**

---

१. उस्सास. ता.त.द. २. अप्रव्रजितो आ. ३. यदा दा०

पश्यति द्वारम् ॥२०७॥

यतः –

**३२७ दारं जा पडिलेहे तेणभए दोण्णि सावए तिण्णि ।**
**जइ य चिरं तो दारे अण्णं ठाविंतु[1] पडिअरइ ॥२०८॥ नि०**

**दारं** गाहा । तदाऽसौ **द्वारं यावत् प्रत्युपेक्षयन्** प्रमार्जयन् व्रजति, एवमसौ निर्गच्छति तत्र च यदि **स्तेनभयं** भवति ततः **दोण्णि** त्ति **द्वौ** साधू निर्गच्छतः, तयोरेको द्वारे तिष्ठति, अन्यः कायिकां व्युत्सृजति, **सावए तिण्णि** त्ति' श्वापदभये सति **त्रयः** साधव उत्तिष्ठन्ति, तत्र एको द्वारे तिष्ठति, अन्यः कायिकां व्युत्सृजति, अन्यस्तत्समीपे रक्षपालस्तिष्ठति । **जति य चिरं** ति **यदि च चिरं** तस्य व्युत्सृजतो जातं **ततो** योऽसौ **द्वारे** व्यवस्थितः साधुः **सोऽन्यं** साधुं द्वारे **स्थापयित्वा** पुनश्चासौ तं व्युत्सृजन्तं **पडिअरति** त्ति प्रतिजागर्ति ॥२०८॥

**३२८ आगंतु[2] पडिक्कंतो अणुपेहे जाव चोद्दस वि पुव्वे ।**
**परिहाणि जा तिगाहा निद्दपमाओ जढो एवं ॥२०९॥ नि०**

**आगंतु** गाहा । सोऽपि साधुः कायिकां व्युत्सृज्या**गत्य** वसतौ **पडिक्कंतो** त्ति ईर्यापथिकां **प्रतिक्रान्तः** सन् **अणुपेहे** अनुगुणनं करोति, कियद्दूरं यावदत आह– **'जाव चोद्दस वि पुव्वे' यावच्चतुर्दश पूर्वाणि** समासानि यश्च साधुः सूक्ष्मान-प्राणलब्धिसंपन्नः, अथैवं न शक्नोति ततः **'परिहाणि जा तिगाहा' परिहाण्या** गुणयति स्तोकं स्तोकतरमिति **यावद् गाथात्रयं** जघन्येन, [3]यद्वा तद्वा परिगुणयति सेहोऽपि, **एवं** च कृते विधौ **निद्राप्रमादो जढो** परित्यक्तो भवति ॥२०९॥

**३२९ अतरंतो य निवज्जे असंथरंतो य पाउणे एक्कं ।**
**गद्दभदिट्ठंतेणं दो तिण्णि बहू जहसमाही ॥२१०॥ नि०**

**अतरंतो** गाहा । अथासौ गाथात्रयमपि गुणयितुं न शक्नोति, ततो **णिवज्जे** त्ति ततः स्वपित्येवेति । **असंथरंतो अ** त्ति उत्सर्गतस्तावत्प्रावरणरहितः स्वपिति, अथ न शक्नोति यापयितुमात्मानम्, ततो**ऽसंस्तरमाणः प्रावृणोत्येकं** कल्पम्, एवं **द्वौ त्रीन्** वा, तथापि यदि शीतेन बाध्यते तदा बाह्यतोऽप्रावृतः कायोत्सर्गं करोति, ततश्च

---

१. ठावेत्तु आ० २. आगओ य ह० ३. यद्द्वारे परिगु० क०

शीतव्याप्तोऽभ्यन्तरं प्रविशति, तत्र च प्रविष्टो निवातमिति मन्यते, तत्रापि स्थातुमशक्नुवन् कल्पं गृह्णाति, एवं द्वौ [१]त्रींस्तावद्यावत्समाधानं जातम् । अत्र च **गर्दभदृष्टान्त:**–"[A]जहा मेच्छगद्दभो अणुरूवभारेण आरूविएण सो वहिउं नेच्छइ, ताहे जो वि अण्णस्स भारो सो वि चडाविज्जइ, अप्पणा वि आरोहति, जाहे नातिदूरं गतो ताहे अप्पणा उत्तरति, ताहे सो जाणति–उत्तरीतो मम भरो त्ति तुरियतरं पधाविओ, पच्छा अण्णो से अवणीओ, ताहे सो सिग्घयरं पहाविओ । एवं साहू वि णिवायतरं मण्णंतो सुहेण अच्छति जावेति रत्तिं, एस विधी, अववाएणं जहा वा समाही होति तहा कायव्वं ।" संगारबितिअवसहि त्ति व्याख्यातम् ॥२१०॥

इदानीं संज्ञिद्वारं व्याख्यायते –

**३३० दुविहो य विहरियाविहरिओ उ भयणा उ विहरिए होइ ।**
**संदिट्ठो जो विहरितो अविहरिअविही इमो होइ ॥२११॥ नि०**

**दुविहो** गाहा । एवं ते व्रजन्त: कञ्चिद्ग्रामं प्राप्ता:, स च ग्रामो **द्विविधो–विहृतोऽविहृतश्च,** विहृत: साधुभिर्य: क्षुण्ण:, आसेवित इत्यर्थ: । अविहृतो य: साधुभिर्न क्षुण्णो नासेवित इत्यर्थ: । **तु**शब्दो विशेषणार्थ:। किं विशिनष्टि ? योऽसौ विहृत: स सञ्ज्ञियुक्त: सञ्ज्ञिरहितो वा । **भयणा उ विहरिए होति** त्ति योऽसौ **विहृत:** सञ्ज्ञियुक्तस्तत्र **भजना** विकल्पना, यद्यसौ संविग्नभावितस्तत: प्रविशन्ति, अथ तु पार्श्वस्थादिभावितस्ततो न प्रविशन्ति । **संदिट्ठो जो विहरितो** त्ति संविग्नविहृते सञ्ज्ञिगृहे **संदिष्ट** [२]उक्त:, यथाऽऽचार्यप्रायोग्यं त्वया सञ्ज्ञिकुलादानयनीयमित्यत: प्रविशन्ति । अथवाऽन्यथा व्याख्यायते–**द्विविध:** कतर: ? सञ्ज्ञिद्वारस्य प्रकान्तत्वात् सञ्ज्ञ्येव, कतमेन द्वैविध्येन द्वैविध्यमत आह–**विहृतोऽविहृतश्च**, साधुभि: क्षुण्णोऽक्षुण्णश्च, तत्र **भजना विहृते** श्रावके **भवति,** यद्यसौ संविग्नविहृत: प्रवेश: क्रियते, अथ पार्श्वस्थादिविहृतस्ततो न प्रवेष्टव्यम्, **संदिट्ठो जो विहरितो** तत्र संविग्नै: साम्भोगिकैरसाम्भोगिकैश्च **यो विहृत**स्तत्राचार्य**संदिष्ट:** प्रविशत्याचार्यप्रायोग्यग्रहणार्थम्,

---

A यथा म्लेच्छगर्दभोऽनुरूपभारेणारोपितेन स वोढुं नेच्छति, तदा योऽप्यन्यस्य भार: सोऽपि चटाय्यते, आत्मनाऽपि आरोहति, यदा नातिदूरं गतस्तदाऽऽत्मनोत्तरति, तदा स जानाति–मम भार उत्तीर्ण इति त्वरिततरं प्रधावति, पश्चादन्यस्तस्मादपनीत: तदा स शीघ्रतरं प्रधावति, एवं साधुरपि निवाततरं मन्यमान: सुखेनास्ते, यापयति रात्रिम्, एष विधि:, अपवादेन यथा वा समाधिर्भवति तथा कर्तव्यम् ।

१. त्रीणि ता० क० २. युक्त: य० क०

**अविहरिअविही इमो होति** त्ति **अविहृते** ग्रामे संज्ञिनि वा **अयं विधिर्व**क्ष्यमाणलक्षणः सप्तमगाथायाम्, अविहरिअमसंदिट्ठो चेतिअ पाहुडिअ (निभा.१०१) अस्यां गाथायामिति ॥२११॥

इदानीं भाष्यकार एनामेव[1] गाथां व्याख्यानयन्नाह –

**३३१ अविहरिअ विहरिओ वा जइ सड्ढो नत्थि नत्थि उ नियोगो ।**
**नाए जइ ओसण्णा पविसंति ततो उ पण्णरस ॥९५॥ निभा०**

**अविहरिय** गाहा । **अविहृतो विहृतो वा** ग्रामः, तत्र विहृते **यदि श्रावको नास्ति** ततो **नास्ति नियोगः**, न नियुज्यते साधुराचार्यप्रायोग्यानयनार्थम् । **णाए** त्ति अथ तु **ज्ञाते** विज्ञात एवं यदुतास्ति श्रावकः, तत्र च **यदि ओसन्ना पविसंति, यद्यवसन्नाः प्रविशन्ति** तथापि नास्ति नियोगः, अथ तु प्रविशन्ति **ततो उ पन्नरस** त्ति **पञ्चदशो**द्गमदोषा भवन्ति, ते चामी –

*"आहाकम्मुद्देसिय पूईकम्मे य मीसजाए य ।*
*ठवणा पाहुडियाए पाओयर कीय पामिच्चे ॥*
*परियट्टिए [2]अभिहडे उब्भिन्ने मालोहडे वि य ।*
*अच्छिज्जे अणिसट्ठे अज्झोयरए य सोलसमे ॥"*

**[ पिण्डनि. ९२-९३ ]**

ननु चामी षोडश उच्यन्ते-"[A]अज्झोयरतो मीसजायं च दोहिं वि एक्को चेव भेदो। अथवेयमपि गाथा सञ्ज्ञिनमेवाङ्गीकृत्य व्याख्यायते-द्विविधः श्रावको-**विहृतोऽविहृतो वा, यदि सड्ढो नत्थि णत्थि उ नियोगो** । तत्र विहृतो **यदि श्राद्धो नास्ति** ततो **नास्ति नियोगः** साधोः । **णाए** त्ति अथ **ज्ञाते** सति श्राद्धके यदुताऽस्ति ततश्च तत्र ज्ञाते सति **यदि ओसण्णा पविसंति, यद्यवसन्नाः प्रविशन्ति** तथापि नास्ति नियोगः । अथैवंविधेऽपि प्रविशन्ति **ततश्च पञ्चदश** दोषा उद्गमादयो नियमाद्भवन्ति यद्यपि तत्रावसन्ना न गृह्णन्ति ॥९५॥

**३३२ संविग्गमणुण्णाए अइंति अहवा कुले वि[3]रिंचंति ।**
**अण्णाउंछं व सहू एमेव य संजईवग्गे ॥९६॥ निभा०**

---

A अध्यवपूरको मिश्रजातश्च द्वयोरप्येक एव भेदः ।

१. एतामेव क० ल० २. हडुब्भिन्ने दा० ३. विरंचंति हे०

**संविग्ग** गाहा । अथ तु स सञ्ज्ञी **संविग्नै**र्विहृतोऽमनोज्ञैर्वसद्भिर्भावितः, ततः **अणुण्णाए अइंति** त्ति तैरेवानु**ज्ञाते** सति श्रावकगृहे प्रविशन्ति । **अथवा** श्रावक**कुलानि विरिंचन्ति** विभजन्ति, एते एवान्यसाम्भोगिकाः संविग्नाः । "[A]**अण्णाउंछं व सहू** अण्णायउंछं जत्थ सावगा नत्थि तत्थ हिंडंति वत्थव्वा जइ सहू समत्था, इयरे य पाहुणगा जप्पसरीरा सावगकुलाणि हिंडंति, अह वत्थव्वा जप्पसरीरा । पाहुणगा य सहू ततो अण्णायउंछं हिंडंति" । **एमेव य संजईवग्गे-एवमेव संयतीवर्गे** विधिः, यदुत ताभिरनुज्ञातेषु श्रावककुलेषु प्रवेष्टव्यम् । बहुषु च कुलेषु सत्सु ता एव विरिंचंति, अण्णाउंछं व सहू इति, अयं च विधिर्द्रष्टव्यः ॥९६॥

**३३३ [1]एवं तु अण्णसंभोइयाण संभोइयाण ते चेव ।**
**जाणित्ता निब्बंधं वत्थव्वेणं स उ पमाणं ॥९७॥ निभा०**

**एमेव** गाहा । **एवमन्यसाम्भोगिकानां** सम्भव उक्तलक्षणो विधिर्द्रष्टव्यः । **संभोइयाण ते चेव** त्ति अथ **साम्भोगिका**स्तत्र ग्रामे भवन्ति, ततः **ते चेव** त्ति **त एव** वास्तव्याः साधवो भैक्ष्यमानयन्ति, अथ तत्र साम्भोगिकसमीपे प्राप्तमात्राणां कश्चिच्छ्रावक आयातः, स च प्राघूर्णकवत्सल एवं भणति-यदुत मदीयगृहे भिक्षार्थं साधुः प्रहेतव्यः, तत्रोच्यते-वास्तव्या एवागमिष्यन्ति, अथैवमुक्तेऽपि **निब्बंधं** त्ति **निर्बन्धं** करोति आग्रहं करोत्यसौ श्रावकस्ततः, **वत्थव्वेणं वास्तव्येन** सहैकेन गन्तव्यम्, यतः **स एव** वास्तव्यः प्राघूर्णकानां **प्रमाण**मल्पाधिकवस्तुग्रहणे ॥९७॥

अथासौ साम्भोगिकवसतिः [2]सङ्कुला भवति ततः:-

**३३४ असइ वसहीए वीसुं रातिणिए वसहि भोयणागम्म ।**
**असहू अपरिणया वा ताहे वीसुं सहू वियरे ॥९८॥ निभा०**

**असइ वसहीए** गाहा । **असत्य**भावे विस्तीर्णाया **वसतेः वीसुं** ति पृथगन्यत्र वसता अवस्थानं कुर्वन्ति, तत्र च तेषां को भोजनविधिरित्यत आह-'**रातिणिए वसहि भोयणागम्म' रत्नाधिकस्य वसतौ भोजनमागम्य** कर्त्तव्यम्, स च रत्नाधिकः कदाचिद्वास्तव्यो भवति कदाचिदागन्तुक इति । अथ **असहू** त्ति अथान्यतरो

---

A अज्ञातोञ्छं वा सहू-अज्ञातोञ्छं यत्र श्रावका न सन्ति तत्र हिण्डन्ति वास्तव्या यदि सहू समर्थाः, इतरे प्राघूर्णकाश्च याप्यशरीराः श्रावककुलानि हिण्डन्ति, अथ वास्तव्या याप्यशरीरकाः प्राघूर्णकाश्च सहू ततोऽज्ञातोञ्छं हिण्डन्ति।

१. एमेव दा. २. संकडा क०

रत्नाधिकोऽ**सहू** भिक्षावेलां प्रतिपालयितुमशक्तः, तथाऽ**परिणता वा** साधवः सेहप्रायाः, मा भूद् राटिं करिष्यन्ति **ततः वीसुं** पृथग् वसतिर्भवति । तथा यदि च ते वास्तव्यसाधवः **सहू** समर्थास्ततो **वियरे** त्ति भिक्षामटित्वा प्राघूर्णकेभ्यः प्रयच्छन्ति ॥९८॥

**३३५ तिण्हं एक्केण समं भत्तट्ठो अप्पणो अवड्ढं तु ।**
**पच्छा इयरेण समं आगमण विरेगो सो चेव ॥९९॥ निभा०**

**तिण्हं** गाहा । अथ तत्र **त्रय** आचार्या भवन्ति, द्वावागन्तुकौ एको वास्तव्यः, तदा **एक्केण समं** ति **एकेना**गन्तुकाचार्यप्रव्रजितेन **सह** वास्तव्यः पर्यटति तावद्यावद् **भत्तट्ठो** त्ति एकस्य प्राघूर्णकाचार्यस्य **भक्तार्थो** भवत्युदरपूरणमात्रमित्यर्थः । अतः **अप्पणो अवड्ढं तु** त्ति आत्माचार्यार्थं वाऽसौ वास्तव्यः अवड्ढं तु अर्द्धध्रुवमात्रं श्रावककुलेभ्योऽन्यकुलेभ्यो वा गृह्णाति । **पच्छा इयरेण समं** ति **पश्चादितरेण** द्वितीयागन्तुकाचार्यप्रव्रजितेन **समं** पर्यटति, तत्रापि भक्तार्थो यावद्भवति प्राघूर्णकस्य तावत्पर्यटति, आत्मनश्चार्द्धध्रुवमात्रं गृह्णाति, एवं पूर्णो ध्रुवो भवति वास्तव्याचार्यस्य, **आगमण** त्ति एवं ते पर्यटित्वाऽऽत्मीयात्मीयवसता **आगमनं** कुर्वन्ति । **विरेगो सो चेव** त्ति **स एव विरेगो** विभजनं श्रावककुलेषु, योऽसौ भिक्षामटद्भिः कृतः, न तु पुनर्वसतिकायामागतानां भवतीति ।

"**असति वसहीए वीसुं राइणिए वसहि भोयणागम्म ।**
**असहू अपरिणया वा ताहे वीसुं सहू वियरे॥१॥**"त्ति (निभा. ९८ वृत्तौ)

यो विधिरुक्तः, अयं च द्वितीयाद्याचार्येष्वप्यागतेषु द्रष्टव्य इति ॥९९॥

एवं तावद्विहृते क्षेत्रे यत्र साधुषु तिष्ठत्सु यो विधिः स उक्तः, इदानीमविहृते क्षेत्रे साधुरहिते च यो विधिस्तत्प्रतिपादनायाह –

**३३६ चेइयवंदनिमंतण गुरूहिं संदिट्ठ जो वऽसंदिट्ठो ।**
**निब्बंध जोगगहण निं[१]वेयण नयणं गुरु[२]सगासं ॥१००॥ निभा०**

**चेइय** गाहा । एवं विहरन्तः क्वचिद् ग्रामादौ प्राप्ताः, तत्र च यदि सञ्ज्ञी विद्यते तत**श्चैत्यवन्दनार्थ**माचार्यो व्रजति, ततश्च श्रावको गृहागतमाचार्यं **निमन्त्रयति**,

---

१. निवेय नयण दा. २. ०सगासे दा.ध.

यथाप्रायोग्यं गृह्णीत, ततश्च यो **गुरूहिं संदिट्ठ** त्ति **गुरुभिर्यः सन्दिष्टः** सङ्घाटकः स गृह्णाति । **जो व असंदिट्ठो** त्ति **यो वाऽसन्दिष्टो**ऽनुक्तः स वा गृह्णाति श्रावक**निर्बन्धे** सति, एतदुक्तं भवति-योऽसावाचार्येण संदिष्टः स यावन्नागच्छत्येव तावत्तेन श्रावकेणान्यसङ्घाटको दृष्टः, स च निर्बन्धे ग्राहे कृते सति **योग्यग्रहणं** प्रायोग्योपादानं करोति । पुनश्च **निवेदण** त्ति अन्येभ्यः सङ्घाटकेभ्यो **निवेदयति**, यथा यदुत मया श्रावकगृहे प्रायोग्यं गृहीतं न तत्र भवद्भिः प्रवेष्टव्यम् । ततश्च **नयणं गुरुसगासं** ति तत्प्रायोग्यं गृहीत्वा **गुरुसमीपं नयति** तत्क्षणादेव येनासावुपभुङ्क्ते इति ॥१००॥

इदानीं यदुक्तं प्राक् अविहरिअविही इमो होति त्ति (नि.२११), तद्व्याख्यानयन्नाह–

**३३७ अविहरिअमसंदिट्ठो चेइय पाहुडियमेत्तं गिण्हंति ।**
**पाउग्गपउरलंभे नऽम्हे किं वा न भुंजंति ?॥१०१॥ निभा०**

**अविहरिय गाहा** । **अविहरिते** ग्रामादा **असंदिष्टा** एव सर्वे भिक्षार्थं प्रविष्टाः, तत्र च भिक्षामटन्तः श्रावकगृहे प्रविष्टाः, तत्र च **चेइए** त्ति **चैत्यानि** वन्दन्ते, तत्र च **पाहुडियमेत्तं गिण्हन्ति** । **प्राभृतिकामात्रं** यदि तत्र लभ्यते ततो **गृह्णन्त्येव** । अथाचार्यप्रायोग्यं लभ्यते प्रचुरं वा लभ्यते ततः '**पाउग्गपउरलंभे**' **प्रायोग्यप्रचुरलम्भे** सतीदमुच्यते-**नऽम्हे** त्ति **न वयमा**चार्यप्रायोग्यग्रहणे नियुक्ताः, किन्त्वन्ये, एवमुक्ते श्रावकोऽप्याह– **किं वा न भुंजंति?** त्ति **किं** भवद्भिर्नीतं **न भुञ्जते** आचार्याः ? एवं निर्बन्धे सति त एव गृह्णन्ति ॥१०१॥

कियत्पुनर्गृह्णन्तीत्यत आह –

**३३८ गच्छस्स परीमाणं नाउं घित्तूण तओ निवेयंति ।**
**गुरुसंघाडग इयरे [1]लद्धं नेयं गुरुसमीवं ॥१०२॥ निभा०**

**गच्छस्स** गाहा । **गच्छस्य परिमाणं ज्ञात्वा** गृह्णन्ति, **गृहीत्वा** च **ततो निवेदयन्ति,** कस्मै ? अत आह–**गुरुसङ्घाटकाय,** यदुताचार्यप्रायोग्यमन्येषां च गुडघृतादि लब्धं प्रचुरम्, **इयरे इतर**सङ्घाटकेभ्यः शेषसङ्घाटकेभ्यो निवेदयन्ति । [2]ततश्च **लब्ध**मात्रमेव **गुरुसमीपं नेतव्यम्** ॥१०२॥

**३३९ एवइयं वा गिण्हह पज्जत्तं वा नियत्तह य भंते ।**
**अणिवेइए अ गुरुणो हिंडंताणं इमे दोसा ॥२६॥ प्र०**

१. मा वच्चह गिण्ह गुरुजोग्गं दा. २. मा वच्चह त्ति मा व्रजत गृह्णीत गुरुयोग्यम् । आ. दा.

[ एष पाठो वृत्तौ न दृश्यते, सार्थश्च दृश्यते । ततो व्याख्यायते । ते साधवो **गुरुसङ्घाटकम् इतरान्** वा यथार्हं वदन्ति । **मा व्रजत योग्याय** गमनं **परिहरत**। **इयद् वा गृह्णीत । इयद**टितमस्ति **पर्याप्तं वा** विकृत्यादिनाऽस्माभिरात्तम् । **निवर्ता**महे आयात वसतौ । **गुरूणामनिवेदिते**ऽदर्शिते **हिण्डमानानामेते दोषाः** ॥ओमाटी. निभा.१०२-प्र.२६॥ ]

**३४० दरहिंडिय वुड्ढाई आगंतु समुद्दिस्संति जंकिंचि ।**
**दव्वविरुद्धं च कयं गुरूहिं जंकिंचि वा भुत्तं ॥२७॥ प्र०**

[ **दरहिण्डिताः** । स्तोकं हिण्डनक्षमाः । **वृद्धादय आगत्य समुद्दिशन्ति** । **यत्किञ्चिद**सारं यद्वाऽयोग्येऽटिते साधुभ्योऽनुक्ते **तैर्द्रव्यविरुद्धं कृतं** योग्यस्य विरुद्धं कृतम् । भुक्तं **गुरुर्वा** योग्याभावाद् **यत्किञ्चिद् वा भुञ्जीत** । तथा एकाकिसमुद्देशका इत्यादि प्राग्वत् । एवं पाठेऽर्थयोजना दृश्यमानाऽस्ति ॥ओमाटी. प्र.२७॥ ]

तथा चाह –

**३४१ एगागिसमुद्दिसगा भुत्ता उ पहेणएण दिट्ठंतो ।**
**हिंडणदव्वविणासो निद्धं महुरं च पुव्वं तु ॥१०३॥ निभा०**

**एगागि** गाहा । **एगागिसमुद्दिसगा** येऽमण्डल्युपजीविनः पृथग् भुञ्जन्ते व्याध्याद्याक्रान्ताश्च तेषां **भुक्तानां** सतां पश्चादानीतं नोपयुज्यते, अत्र च **पहेणएण दिट्ठंतो** –

***'काले दिण्णस्स पहेणयस्स अग्घो न तीरए काउं ।**
**तस्सेवऽथक्कपणामियस्स गिह्णंतया नत्थि ॥१॥' [ ]**

तथाऽनानयनेऽयमपरो दोषः-तेन द्रव्येण घृतादिना गृहीतेन **हिण्डतां द्रव्यविनाशो** भवति, कथञ्चित्प्रमादात् पात्रकविनाशे सति क्षीरादि च विनश्यत्येव, तथा **निद्धमहुराइं पुव्विं** यदुक्तमागमे (निभा.२८३) तच्च कृतं न भवति । 'सण्णि'त्ति दारं गतं ॥१०३॥

इदानीं साधर्मिकद्वारं प्रतिपादयन्नाह –

**३४२ भत्तट्ठिअ आवस्सग[१] सोहेउं तो अइंति अवरण्हे ।**
**अब्भुट्ठाणं दंडाइयाण गहणेक्कवयणेणं ॥२१२॥ नि०**

---

१. आवासग ह० हे० संपा० ★ काले दिण्णस्स पहेणयस्स अग्घो न तीरए काउं । तस्सेव अकालपणामियस्स भुंजंतया णत्थि॥ (तुला-ओ.बृ.भा.१०३०)

**भत्तट्ठिअ** गाहा । इदानीं ते साधर्मिकसमीपे प्रविशन्तः, **भत्तट्ठिअ** त्ति भुक्त्वा तथा **आवस्सग सोहेउं** ति **आवश्यकं** च कायिकोच्चारादि **शोधयित्वा** कृत्वेत्यर्थः। **ततोऽपराह्ण**समय आगच्छन्ति, येन वास्तव्यानां भिक्षाटनाद्याकुलत्वं न भवति, वास्तव्या अपि किं कुर्वन्ति ? इत्यत आह-**अब्भुट्ठाणं** ति तेषां प्रविशताम**भ्युत्थानादि** कुर्वन्ति, **दंडादियाण गहणं** ति **दण्डकादीनां ग्रहणं** कुर्वन्ति, कथम् ? **एक्क-वयणेणं** ति **एकेनैव वचनेनोक्ताः** सन्तः पात्रकादीन् समर्पयन्ति, वास्तव्येनोक्ते मुञ्चस्वेति ततश्च मुञ्चन्ति, अथ न मुञ्चत्येकवचनेन ततो न गृह्यन्ते, मा भूत् प्रमाद इति ॥२१२॥

**३४३ खुड्डलविगिट्ठतेणा उण्हं अवरण्हे तेण उ पए वि ।**
**पक्खित्तं मोत्तूणं निक्खिवमुक्खित्तमो[२]घेणं ॥२१३॥ नि०**

**खुड्डल** गाहा । यदा तु पुनस्तैः साधुभिरभिप्रेतो यो ग्रामः स **क्षुल्लको** न तत्र भिक्षा भवति ततश्च प्रत्यूषस्येवागच्छन्ति । **विगिट्ठ** त्ति **विकृष्ट**मध्वानं यत्र साधर्मिकास्तिष्ठन्ति ततश्च प्रत्यूषस्येवागच्छन्ति । **तेण** त्ति अथ त्वपराह्ण आगच्छतां **स्तेन**भयं भवेत्ततश्च प्रत्यूषस्येवागच्छन्तीति । **उष्णं** वा **अपराह्ण** आगच्छतां भवति यतोऽतः प्रत्यूषस्येवागच्छन्ति । एवं ते प्रत्यूषसि तस्माद् ग्रामात्प्रवृत्ताः साधवो भोजनकाले तु प्राप्ताः साधर्मिकसमीपं निषीधिकां कृत्वा प्रविशन्ति । पुनश्च तेषां प्रविशतां वास्तव्यसाधुभिः किं कर्त्तव्यमित्यत आह-**पक्खित्तं मोत्तूणं** ति प्रक्षिप्तमास्यगतं मुखे **प्रक्षिप्तं** कवलं **मुक्त्वा, निक्खिवमुक्खित्तं** ति **यदुत्क्षिप्तं** भाजनगतं तद् **निक्षिपन्ति** मुञ्चन्ति नैषेधिकीश्रवणानन्तरमेव, ततस्ते प्राघूर्णका **ओघेणं** ति सङ्क्षेपेणालोचनां प्रयच्छन्ति ॥२१३॥

ततो भुञ्जते मण्डल्याम्, सा चेयम् –

**३४४ अप्पा मूलगुणेसुं विराहणा अप्प उत्तरगुणेसुं ।**
**अप्पा पासत्थाइसु दाणग्गहसंपयोगोहा ॥२१४॥ नि०**

**अप्पा** गाहा । **अल्पा मूलगुणेषु**, एतदुक्तं भवति-मूलगुणविषया न काचिद्विराधना, [३]**अल्पा** न काचिदुत्तर**गुण**विषया विराधना, **अल्पा पार्श्वस्थादिषु दाने ग्रहणे** वा **विराधना संपयोग** त्ति तैरेव पार्श्वस्थादिभिः सह **संप्रयोगः**

२. ओहेणं दा० ३. अल्पा उत्तर० ख०

सम्पर्कः, एतदुक्तं भवति–न पार्श्वस्थादिभिः सह संप्रयोग आसीत् । **ओघ** त्ति इय**मोघतः** संक्षेपत आलोचना दीयते, दत्त्वा चालोचनां यदि न भुक्तास्ततो भुञ्जते ॥२१४॥

अथ भुक्तास्ते साधवस्तत इदं भणन्ति –

**३४५ भुंजह भुत्ता अम्हे जो वा इच्छे अभुत्त सह भोज्जं ।**
**सव्वं व तेसिं दाउं अन्नं गिण्हंति वत्थव्वा ॥२१५॥ नि०**

**भुंजह** गाहा । **भुञ्जीध्वं**[1] यूयं **भुक्ता वयम्, यो वा इच्छे** त्ति **यो वा** साधुर्भोक्तु**मिच्छति** ततः **अभुत्त सह भोज्जं** ति तेना**भुक्तेन सह भोज्यं** कुर्वन्ति। एवं यदि तेषामात्मनश्च पूर्वानीतं भक्तं पर्याप्यते ततः साध्वेव । अथ न पर्याप्यते ततः **सर्वं तेभ्यः** प्राघूर्णकेभ्यो **दत्त्वा** भक्त**मन्यद् गृह्णन्ति** पर्यटन्ति **वास्तव्य**भिक्षवः ॥२१५॥

एवमानीय कति दिनानि भक्तं प्राघूर्णकेभ्यो दीयत इत्यत आह –

**३४६ तिण्णि दिणे पाहुण्णं सव्वेसिं असइ बालवुड्ढाणं ।**
[2]**जे तरुणा सग्गामे वत्थव्वा बाहि हिंडंति ॥२१६॥ नि०**

**तिण्णि दिणे** गाहा । **त्रीणि दिनानि प्राघूर्णकं सर्वेषामसति बालवृद्धानां** कर्त्तव्यम् । ततश्च **ये** प्राघूर्णका**स्तरुणा**स्ते **स्वग्राम** एव भिक्षामटन्ति, **वास्तव्यास्तु बहिर्ग्रामे हिण्डन्ति** ॥२१६॥

अथ ते प्राघूर्णकाः केवला हिण्डितुं न जानन्ति ततः किं कर्त्तव्यमित्यत आह–

**३४७ संघाडगसंजोगो आगंतुगभद्दएयरे बाहिं ।**
**आगंतुगा व बाहिं वत्थव्वगभद्दए हिंडे ॥२१७॥ नि०**

**संघाडग** गाहा । **सङ्घाटकसंयोगः** क्रियते, एतदुक्तं भवति–एको वास्तव्य एकश्च प्राघूर्णकः, ततश्चैवं सङ्घाटकसंयोगं कृत्वा भिक्षामटन्ति । **आगंतुगभद्दए** त्ति अथासौ ग्राम **आगन्तुकानामेव भद्रकस्ततः इयरे** त्ति वास्तव्या **बाहिं** ति **बहिर्ग्रामे हिण्डन्ति, आगन्तुका वा बहिर्ग्रामे हिण्डन्ति वास्तव्यभद्रके** सति ग्रामे ॥२१७॥

उक्तं साधर्मिकद्वारम्, इदानीं वसतिद्वारं प्रतिपादयन्नाह –

---

१. भुञ्जीत यूयं० ख० २. जइ हे०

**३४८ वित्थिण्णा खुड्डलिया पमाणजुत्ता उ तिविह वसहीओ ।**
**पढमबिइयासु ठाणे [1]तत्थ उ दोसा इमे होंति ॥२१८॥ नि०**

**वित्थिण्णा** गाहा । **विस्तीर्णा क्षुल्लिका प्रमाणयुक्ता** वा **त्रिविधा वसतीः, पढमबितियासु ठाणे** त्ति यदा **प्रथमायां** वसतौ **स्थानं** भवति विस्तीर्णायामित्यर्थः, **द्वितीया** क्षुल्लिका तस्यां वा **स्थानं** यदा भवति तदा **तत्र** तयोर्वसत्योरे**ते** वक्ष्यमाणका **दोषा भवन्ति** ॥२१८॥

**३४९ खरकम्मिय वाणियगा कप्पडिअ सरक्खगा य वंठा य ।**
**संमीसावासेणं [2]दोसा य हवंति णेगविहा ॥२१९॥ नि०**

**खरकम्मिय** गाहा । तत्र विस्तीर्णायां वसतौ **खरकम्मिय** त्ति दण्डपाशिका रात्रिं भ्रान्त्वा स्वपन्ति, **वाणिजकाश्च** [3]वालिञ्जुकप्राया आगत्य स्वपन्ति, तथा **कार्पटिकाः** स्वपन्ति, **सरजस्काश्च** भौताः स्वपन्ति, **वण्ठाश्च** स्वपन्त्यागत्य । **अकयविवाहा भितिजीविणो य वंठ** त्ति । एभिः सह यदा संमिश्र आवासो भवति तदा तेन **संमिश्रावासेन दोषा** वक्ष्यमाणका **अनेकविधा भवन्ति** ॥२१९॥

ते चामी –

**३५० आवासगअहिगरणे तदुभय उच्चारकाइयनिरोहे ।**
**संजमआयविराहण संका तेणे नपुंसित्थी ॥२२०॥ नि० दारगाहा ।**

**आवासग** गाहा । **आवश्यके** प्रतिक्रमणे क्रियमाणे सागारिकाणामग्रतस्त एव उद्घट्टकान् कुर्वन्ति, ततश्च केचिदसहना राटिं कुर्वन्ति, तत**श्चाधिकरण**दोषः । **तदुभए** त्ति सूत्रपौरुषीकरणेऽर्थपौरुषीकरणे च दोष उद्घट्टकान् कुर्वन्ति । निरोधश्चो**च्चारस्य कायिकायाश्च निरोधे** दोषः । अथ करोति तथापि दोषः **संयमात्मविराधना**-कृतोऽप्रत्युपेक्षितस्थण्डिले । **संका तेणे** त्ति **स्तेनशङ्का**दोषश्च चौराशङ्का, **नपुंसक**कृतो दोषः सम्भवति, तत्र **स्त्री**दोषश्च भवतीति। द्वारगाथेयम् ॥२२०॥

इदानीं प्रतिपदं व्याख्यानयन्नाह –

**३५१ आवस्सयं करिंते पवंचए झाणजोगवाघाओ ।**
**[4]असहण अपरिणओ वा [5]भायणभेओ य छक्काया ॥२२१॥ नि०**

---

१. तत्थ य दा. २. दोसा उ ह०हे० ३. वालञ्जका क० ४. असहू अपरिणया वा, ह०हे० ५. भायणभेयाइ ह०हे०

**आवासय** गाहा । **आवश्यकं** प्रतिक्रमणं **कुर्वतां पवंचए** त्ति ते सागारिका उद्घट्टकान् कुर्वन्ति, तथा **ध्यानयोगव्याघातश्च** भवति चलतामापद्यते चेतो यतः । दारं । अहिगरणे त्ति (नि.२२०) भण्णइ—**असहण** त्ति कश्चि**दसहनः** कोपनो भवति, **अपरिणतो वा** सेहप्रायः, एते राटिं सागारिकैः सह कुर्वन्ति, ततश्च **भाजनानि** पात्रकाणि तद्**भेदो** विनाशो भवति, **षट्कायाश्च** विराध्यन्ते । दारं **॥२२१॥**

तदुभयं ति (नि.२२०.)व्याख्यायते –

**३५२ सुत्तत्थऽकरण नासो करणे उडुंचगाइ अहिगरणं ।**
**पासवणियरनिरोहे गेलन्नं दिट्ठे उड्डाहो ॥२२२॥ नि०**

**सुत्तत्थ** गाहा । **सुत्तत्थअकरणे** त्ति **सूत्रार्थ**पौरुष्य**करणे नाश**स्तयोरेव विस्मरणम् । अथ सूत्रार्थपौरुष्यौ क्रियेते ततश्च [१५]**उडुंचकाद्यु**द्घट्टकादि कुर्वन्ति । ततश्चासहना राटिं कुर्वन्ति, ततोऽ**धिकरण**दोष इति । दारं । उच्चारकाइयनिरोहे त्ति (नि.२२०) व्याख्यायते—**पासवणे** त्ति **प्रश्रवणस्य** कायिकायाः **इयर** त्ति पुरीषस्य च **निरोधे गेलन्नं ग्लानत्वं** भवति । अथ व्युत्सृजन्ति ततो **दिट्ठे उड्डाहो** त्ति सा[१]गारिके **दृष्टे** सत्**युड्डाह** उपघातः प्रवचनस्य भवति । दारं **॥२२२॥**

संजमआयविराहण त्ति (नि. २२०) व्याख्यायते –

**३५३ मा दच्छिहि त्ति तो अप्पडिलेहिए दूरे गंतु वोसिरति ।**
**संजमआयविराहण गहणं आरक्खितेणेहिं ॥२२३॥ नि०**

**मा दच्छिहि त्ति** गाहा । अथ सागारिका मां **मा द्राक्षुरि**ति कृत्वाऽस्थण्डिल एव **दूरे गत्वा व्युत्सृजति** ततः **संयमात्मनोर्विराधना** भवति, **ग्रहणं चारक्षिकाः** कुर्वन्ति । **तेण** त्ति **स्तेनका** वा ग्रहणं कुर्वन्ति । दारं **॥२२३॥**

'संका तेण' त्ति (नि.२२०) व्याख्यायते –

**३५४ ओणयपमज्जमाणं दट्ठुं तेणो त्ति आहणइ कोइ ।**
**सागारिअसंघट्टण अपुमित्थी गिण्ह साहइ वा ॥२२४॥ नि०**

**ओणय** गाहा । स हि रात्रौ कायिकाद्यर्थमुत्थितः **सन्नवनतः प्रमार्जय**न्निर्गच्छति

---

१५. उडुंचगा-उद्घट्टकाः, तान् कुर्वन्ति, आलापकान् कर्णाघाटकेन पठित्वा तथैवोच्चरन्ति इत्यर्थः । (बृ. क.)

१. सागारिकैर्दृष्टे दा०

ततस्तमवनतकायं **दृष्ट्वा स्तेन इति** मत्वाऽऽ**हन्यात् कश्चित्** । दारं । नपुंसित्थि त्ति व्याख्यायते–**सागारिअसंघट्टण** त्ति **सागारिक**संस्पर्शे सति, स हि रात्रौ हस्तेन परामृशन् गच्छति, यतस्ततः स्पर्शने सति कश्चित्सागारिको विबुद्ध एवं चिन्तयति-यदुतायं **अपुमं** ति नपुंसकं तेन कारणेन मां स्पृशति, ततः सागारिकस्तं साधुं नपुंसकबुद्ध्या **गृह्णाति** । अथ कदाचित्**स्त्री** स्पृष्टा ततः सा शङ्कते, यदुतायं मम समीप आगच्छति, ततः सा **साहति** कथयति निजस्य भर्तुः सौभाग्यं ख्यापयन्ती परमार्थेन वा ॥२२४॥

**३५५ ओरालसरीरं वा इत्थि नपुंसा बला वि गिण्हंति ।**
**संबाहाए ठाणे निंते आवडणपडणाई ॥२२५॥ नि०**

**ओराल** गाहा । **औदारिकशरीरं वा** तं साधुं दृष्ट्वा दिवा ततो रात्रौ **स्त्री नपुंसकं** वा **बलादपि गृह्णाति,** औदारिकं चङ्गिकम् । एते विस्तीर्णवसतिदोषा व्याख्याताः । इदानीं क्षुल्लिकावसतिदोषान् प्रतिपादयन्नाह-**संबाहाए** त्ति सङ्कटायां वसतौ **स्थाने**ऽवस्थाने सति **णिंते आवडणपडणादि** त्ति साधौ **निर्गच्छति**[1] **प्रस्खलनपतनादयो** दोषाः ॥२२५॥

तथा -

**३५६ तेणो त्ति मण्णमाणो इमो वि तेणो त्ति आवडइ जुद्धं ।**
**संजमआयविराहण भायणभेयाइया दोसा॥२२६॥ नि०**

**तेणो त्ति** गाहा । एवं साधोरुपरि प्रस्खलिते साधौ यस्योपरि प्रस्खलितः स तं **स्तेनकमिति मन्यमानः**, अयं च सुप्तोत्थितोऽमुं प्रस्खलितं **स्तेनकं मन्यमानः** सन् **आपतति जुद्धं** युद्धं भवति ततश्च **संयमात्मनोर्विराधना भाजनभेदादयश्च दोषाः**, भाजनं पात्रकं भण्यते ॥२२६॥

उक्ता क्षुल्लिका वसतिः, यस्मात्क्षुल्लिकायामेते दोषास्तस्मात्प्रमाणयुक्ता वसतिर्ग्राह्या। एतदेवाह –

**३५७ तम्हा पमाणजुत्ता एक्केक्कस्स उ तिहत्थसंथारो ।**
**भायणसंथारंतर जह वीसं अंगुला होंति ॥२२७॥ नि०**

---

१. निगच्छन्नापतित पतितश्च निर्गच्छदापतनादयो दोषाः क० ल०

**तम्हा** गाहा । **तस्मात्प्रमाणयुक्ता** वसतिर्ग्राह्या, तत्र **चैकैकस्य** साधोर्बाहुल्यत**स्त्रिहस्त**प्रमाणः **संस्तारकः** कर्त्तव्यः, **तु**शब्दो विशेषणार्थः, किं विशिनष्टि? संस्तारकोऽत्र भूमिरूप इति, तत्र तेषु त्रिषु हस्तेषु ऊर्णामयः संस्तारको हस्तं चत्तारि अ अंगुलाइं रुंभइ भायणाइ य हत्थं रुंधंति । इदानीं संस्तारकभाजनयोर्यदन्तरालं तत्प्रमाणं प्रतिपादनायाह–'**भायणसंथारंतरे**'**भाजनसंस्तारान्तरा**ऽन्तराले **यथा विंशतिरङ्गुलानि भवन्ति** तथा कर्त्तव्यम् । एवं त्रिहस्तप्रमाणोऽपि संस्तारकः पूरितः ॥२२७॥

किं पुनः का[1]रणमियद्दूरे भाजनानि न स्थाप्यन्ते ? उच्यते –

**३५८ मज्जारमूसगाइ य वारए नवि य जाणुघ[2]ट्टणया ।**
**दो हत्थे य अबाहा नियमा साहुस्स साहूओ ॥२२८॥ नि०**

**मज्जार** गाहा । **मार्जारमूषकादीन्** पात्रकेषु लगतो **वारयेत्** । आ[3]ह–कस्मादासन्नतराणि न क्रियन्ते ? उच्यते– **नवि य जाणुघट्टणय** त्ति तावति प्रदेशे तिष्ठति पात्रके **जानुकृता घट्टना** ज़ानुकृतं चलनं **न** भवति । इदानीं प्रव्रजितस्य प्रव्रजितस्य चान्तरालं प्रतिपादयन्नाह–द्वौ **हस्ता अबाधा**ऽन्तरालं **नियमात्साधोः साधोश्च** भवति, साधुश्चात्र त्रिहस्तसंस्तारकप्रमाणो ग्राह्यः । स्थापना चेयम्–"[A]उण्णामओ संथारओ २८ अट्ठावीसंगुलप्पमाणो, संथारभायणाणं [4]अंतरं वीसंगुला २०, भायणाणि अ हत्थप्पमाणे पाउंछणे ठविज्जंति २४ । ए[5]तेहिं तिहिं घरएहिं सव्वे वि तिण्णि हत्था, साहुस्स य साहुस्स य अंतरं दो हत्था' २८।२०।२४–ह० ३ ।" एवमेतद्गाथाद्वयं व्याख्यातम् । अत्र च द्विहस्तप्रमाणायामबाधायां महदन्तरालं साधोः साधोश्च भवति, ततश्च तदन्तरालं शून्यं महद् दृष्ट्वा सागारिको बलात्स्वपिति, तस्मादन्यथा व्याख्यायते–तम्हा पमाणजुत्ता एक्केक्कस्स उ तिहत्थसंथारो । अत्र हस्तं साधू रुणद्धि, भाजनानि संस्तारकाद्विंशत्यङ्गुलानि भवन्ति । एतदेवाह–'भायणसंथारंतर जह वीसं अंगुला होंति' । पात्रकमष्टाङ्गुलानि रुणद्धि, पात्रकाद्विंशत्यङ्गुलानि मुक्त्वा परतोऽन्यः साधुः स्वपिति । एतच्च कुतो निश्चीयते ? यदुत पात्रकात्परतो

---

A ऊर्णामयः संस्तारकः २८ अष्टाविंशत्यङ्गुलप्रमाणः, संस्तारकभाजनयोरन्तरं २० विंशतिरङ्गुलानि, भाजनानि च हस्तप्रमाणे पादप्रोञ्छने स्थाप्यन्ते २४ । एतैस्त्रिभिर्धारकैः सर्वेऽपि त्रयो हस्ताः, साधोः साधोरन्तरं द्वौ हस्तौ। २८।२०।२४ हस्ताः ३ ।

१. कारणमिह यद्दूरेभाजनानि स्था०–दा. २. गहणया ह० ३. अथ दा० ४. अंतरालं दा० ५. एवं तिहिं–दा०

विंशत्यङ्गुलान्यतीत्यान्यः साधुः स्वपिति, यत उक्तम्—'दो हत्थे य अबाहा नियमा साहुस्स साहूओ' । स्थापना चेयम्—"[A]साहू सरीरेणं हत्थं रुंधइ २४, साधुस्स साधुसरीरप्पमाणं, संथारयस्स पत्तयाणं च अंतरं वीसंगुला २०, अट्ठहिं अंगुलेहिं पत्तयाइं ठंति ८, पत्तस्स बितियसाहुस्स य अंतरं वीसंगुलाइं २०, एवं एते सव्वेऽवि तिण्णि हत्था, एसो बितिओ साहू ।२४।२०।८।२०। एवं सव्वत्थ ।" अत्र चोर्ण्णामयः संस्तारकोऽष्टाविंशत्यङ्गुलप्रमाण एव बाहुल्येन द्रष्टव्यः, किन्तु साधुना शरीरेण चतुर्विंशत्यङ्गुलानि रुद्धानि, अन्यानि ऊर्णामय-संस्तारकसम्बन्धीनि यानि चत्वार्यङ्गुलानि तैः सह शेषाणि यानि विंशत्यङ्गुलानि, तत्परतः पात्रकाणि भवन्ति । अत्र हस्तद्वयमबाधा साधुशरीराद्यावदन्यसाधुशरीरं तावद्द्रष्टव्यम् । 'मज्जार' इत्येतद्व्याख्यातमेव ॥२२८॥

**३५९ भुत्ताभुत्तसमुत्था भंडणदोसा य वज्जिआ [१]एवं ।**
**सीसंतेण व कुड्डं तु [२]हत्थं मोत्तूण ठायंति ॥२२९॥ नि०**

**भुत्ताभुत्त** गाहा । द्विहस्तान्तरालेन मुच्यमानेन **भुत्ताभुत्तसमुत्था** इति **भुक्त** इति यो भुक्तभोगः, **अभुक्त** इति यः कुमार एव प्रव्रजितः । तत्र भुक्तभोगस्यासन्नस्य स्वपतोऽन्यसाधुसंस्पर्शात्पूर्वक्रीडितानुस्मरणं भवति, यदुतास्मद्योषितोऽप्येवंविध एव स्पर्श इति । अभुक्तभोगस्याप्यन्यसाधुसंस्पर्शेन सुकुमारेण कौतुकं स्त्रियं प्रति भवति, अयमभिप्रायः-तस्याः सुकुमारतरः स्पर्श इति । ततश्च द्विहस्ताबाधायां स्वपतामेते दोषाः परिहृता भवन्ति । तथा **भंडणं** कलहः परस्परहस्तस्पर्शजनित आसन्नशयने, ते **च दोषा एवं वर्जिता** भवन्ति, **सीसंतेण व कुड्डं तु हत्थं मोत्तूण ठायंति** त्ति **शिरो** यतो यत्र **कुड्यं** तत्र **हस्त**मात्रं **मुक्त्वा ठायंति** त्ति स्वपन्ति, पादान्तेऽनुगमनमार्गं विमुच्य हस्तमात्रं स्वपन्ति । अथवाऽन्यथा पाठः-**सीसंतेण व कुड्डं तिहत्थं मुत्तूण ठायंति।** तत्र प्रदीर्घायां वसतौ स्वापविधिरुक्तः, यदि पुनश्चतुरस्रा भवति तदा **सीसंतेण व कुड्डं** ति **शिरो** यतः **कुड्यं** तस्मात्कुड्याद् **हस्तत्रयं मुक्त्वा** स्वपन्ति, तत्र कुड्यं हस्तमात्रेण प्रोज्झ्य ततो भाजनानि स्थाप्यन्ते, तानि

---

A साधुः शरीरेण हस्तं रुणद्धि २४. साधोः साधुशरीरप्रमाणम्, संस्तारकस्य पात्रकानां चाऽन्तरं विंशतिरङ्गुलानि २०. अष्टभिरङ्गुलैः पात्रकानि स्थाप्यन्ते ८, पात्रकस्य द्वितीयसाधोश्चान्तरं विंशतिरङ्गुलानि २०, एवमेते सर्वेऽपि त्रयो हस्ताः, एष द्वितीयः साधुः, २४।२०।८।२०। एवं सर्वत्र ।

१. होंति दा. २. तिहत्थं क.

च हस्तमात्रे पादप्रोञ्छने क्रियन्ते ततो हस्तमात्रं व्याप्नुवन्ति, भाजनसाध्वोश्चान्तरालं हस्तमात्रमेव मुच्यते, ततः साधुः स्वपिति । एवमनया भङ्ग्या स्वपतां तिर्यक् साधोः साधोश्चान्तरालं हस्तद्वयं द्रष्टव्यम् ॥२२९॥

**३६० पुव्वुद्दिट्ठो उ विही इह वि वसंताण होइ सो चेव ।**
**आसज्ज तिन्नि वारे[1] निसन्न आउंटए सेसा ॥२३०॥ नि०**

**पुव्वुदिट्ठो** गाहा । अत्र स्वापकाले **पूर्वोद्दिष्ट** एव **विधिर्द्रष्टव्यः**, कश्चासौ ?

***"पोरिसिआपुच्छणया सामाइय उभय कायपडिलेहा ।***
***साहणिय दुवे पट्टे पमज्ज पाए जओ भूमिं ॥ नि.२०५॥***

"★**अणुजाणह संथारं०**" नि.२०६-२०७ इत्येवमादिकः । [2]**इहापि वसतां** स्वपतां **भवति स एव** विधिः, किन्त्वयं विशेषः-**आसज्ज तिन्नि वारे निसन्नो** त्ति **आसज्जं त्रयो वाराः** करोति, **निसन्नो** त्ति तत्रैव संस्तारक उपविष्टः सन्, शेषाश्च साधवः किं कुर्वन्तीत्याह–**आउंटए सेसा, शेषाः** साधवः पादाना**कुञ्चयन्ती**ति ॥२३०॥

पुनश्चासौ कायिकार्थं व्रजन् किं करोतीत्यत आह –

**३६१ आवस्सिअमासज्जं नीइ पमज्जंतु जाव उ च्छन्नं ।**
**सागारिय तेणुब्भामए य संका तउ परेणं ॥२३१॥ नि०**

**आवासित** गाहा । **आवश्यिकीम् आसज्जं** च पुनः पुनः कुर्वन् **प्रमार्जयन्निर्**गच्छति, कियद्दूरं यावदित्यत आह-**जाव उ च्छन्नं, यावच्छन्नं** यावद्वसतेरभ्यन्तरमित्यर्थः । बाह्यतश्च नैवं प्रमार्जनादि कर्त्तव्यम्, यतः '**सागारिय तेणुब्भामए य संका तउ परेणं' सागारिकाणां स्तेनशङ्को**पजायते, यदुत किमयं चौरः ? **उब्भामओ** पारदारिकस्ततस्तदाशङ्कोपजायते, अत**स्तत्परेण**संछन्नाद् बाह्यतो नेदं प्रमार्जनादि कर्त्तव्यमिति । एवं प्रमाणयुक्तायां वसतौ वसतां विधिरुक्तः ॥२३१॥

---

१. वारा संपा० २. इहैव वसतां भ० क०

★ अणुजाणह संथारं बाहुवहाणेण वामपासेणं । कुक्कुडिपायपसारण अतरंत पमज्जए भूमिं ॥२०६॥ नि०
संकोए संडासं उव्वत्तंते य कायपडिलेहा । दव्वाईउवओगं णिस्सासनिरुंभणालोयं ॥२०७॥ नि०

यदा तु पुनः—

**३६२ नत्थि उ पमाणजुत्ता [1]खुड्डलियाए वसंति जयणाए ।**
**पुरहत्थ पच्छ पाए पमज्ज जयणाए निग्गमणं ॥२३२॥ नि०**

**नत्थि उ पमाणजुत्ता** गाहा । यदा **तु प्रमाणयुक्ता** वसतिर्**नास्ति** तदा **क्षुल्लिकायां**[2] वसतौ **वसन्ति यतनया,** का चासौ यतना ? '**पुरहत्थ पच्छ पाए**' **पुरत**ऽग्रतो हस्तेन परामृशति **पश्चात्पादौ प्रमृज्य** न्यस्यति, ततश्चैवं **यतनया** बाह्यतो **निर्गच्छति** ॥२३२॥

एवं तावत्कायिकाद्यर्थं [3]गमने विधिरुक्तः, इदानीं स्वपनविधिं प्रतिपादयन्नाह —

**३६३ उस्सीसभायणाइं मज्झे विसमे अहाकडा उवरिं ।**
**ओवग्गहिओ दोरो तेण य [4]वेहासि लंबणया ॥२३३॥ नि०**

**उस्सीस** गाहा । **उपशीर्षकाणां मध्ये भाजनानि** पात्रकाणि क्रियन्ते । स्थापना चेयम् ।  **विसमे** त्ति **विषमा** भूः [९६]गर्तोपेता भवति, ततश्च [5]तस्यां गर्त्तायां पात्रकाणि पुञ्जीक्रियन्ते । **अहागडा उवरिं** ति प्रासुकानि [6]अल्पपरिकर्माणि च यानि तान्यन्येषां पात्रकाणा**मुपरि** पुञ्जीक्रियन्ते, माङ्गलिकत्वात्तेषाम्। अथातिसङ्कटत्वाद् वसतेर्भूमौ नास्ति स्थानं पात्रकाणां ततश्च '**ओवग्गहितो दोरो**' **औपग्रहिको** यो **दवरको** यवनिकार्थं गृहीतः, ओवग्गहितो गच्छसाहारणो **तेन विहायस्याकाशे लंबणय** त्ति तेन दवरकेन **लम्ब्यन्ते** कीलकादौ क्रियन्ते ॥२३३॥

**३६४ खुड्डलियाए असई वित्थिण्णाए उ मालणा भूमी ।**
**बिलधम्मो चारभडा साहरणेगंत कडपोत्ती ॥२३४॥ नि०**

**खुड्डलियाए** गाहा । **क्षुल्लिकाया** वसतेरभावे **वित्थिण्णाए उ** त्ति **विस्तीर्णायां** वसतौ स्थातव्यम्, तत्र च को विधिरित्यत आह-**मालणा भूमी** विस्तीर्ण-वसते**र्भूमिर्माल्यते** व्याप्यते पुष्पप्रकरसदृशैः स्वपद्भिः **बिलधम्मो चारभड** त्ति अवलगकादय आगत्येदं भणन्ति—यदुत **बीलधर्मो**ऽयं बिले यावतामवस्थानं भवति तावन्त एव प्रविशन्ति, ततः साधवः किं कुर्वन्ति ? **साहरणे** त्ति **संहृत्य** उपकरणजातं

---

९६. यत्र भूः पृथ्वी गर्तयोपेता युक्ता स्यात्, तत्रेत्यर्थः । संटी.

१. खुड्डलिया चेव वसति, आ० २. यामेव वसतौ दा० ३. गमनागमने दा० ल० ४ वेहासलंबणया हे० ५. तस्मिन् गर्त्ते क० ६. स्वल्पप० क०

विरलत्वं च **एगंत** त्ति **एकान्ते** तिष्ठति । **कडपोत्ती** त्ति यदि **कटो**ऽस्ति ततस्तमन्तराले ददति, अथ स नास्ति तत **पोत्ति** चिलिमिनीं ददति ॥२३४॥

**३६५ असई य चिलिमिणीए भए व पच्छन्न भूइए लक्खे ।**
**आहारा नीहारो निग्गमणपवेस वज्जेह ॥२३५॥ नि०**

**असति** गाहा । **असत्य**भावे **चिलिमिलिन्याः भए व** त्ति चिलिमिनीहरण**भए वा** न ददति। किं कुर्वन्त्यत आह- **पच्छण्णे** त्ति ततः **प्रच्छन्नतरे** प्रदेशे तिष्ठन्ति। **भूइए लक्खे** त्ति स च प्रदेशो **भूत्या**[1] **लक्ष्यते** चिह्नयते, अबोट्टोऽयं प्रदेश इति कथ्यते । इदं च तेऽभिधीयन्ते—**आहारान्नीहारो** भवत्यवश्यमतो **निर्गमप्रवेशौ वर्जनीयाविति** ॥२३५॥

इदं च कर्तव्यं साधुभिः –

**३६६ पिंडेण सुत्तकरणं, आसज्ज निसीहियं च न करिंति ।**
**कासण, न पमज्जणया न य हत्थो, जयण [2]वेरत्ती ॥२३६॥ नि०**

**पिंडेण** गाहा । **पिण्डेन** समुदायेन **सूत्रकरणं** सूत्रपौरुषीकरणं कर्त्तव्यम्, मा भूत् कश्चित्पदं वाक्यं वा कण्णाहिडिस्सिति त्ति । तथा **आसज्जं निसीहियं च** तत्र **न कुर्वन्ति** । [3]किं वा कर्त्तव्यमित्यत आह—**कासणं** ति **काशनं** [4]खाट्करणं करोति, **न च प्रमार्जनं** करोति **न य हत्थो** त्ति **न च हस्तेन** पुरस्तात्परामृश्य निर्गच्छति, **यतनया** च **वेरत्तिअं** कुर्वन्ति । "[A]वेरत्तिओ कालो घेप्पति दोण्हं पहराणं उवरिं, ततो सज्झाओ कीरति, यदिवा ताए वेलाए सज्झाओ" । उक्तं वसतिद्वारम् ॥२३६॥

इदानीं स्थानस्थितद्वारमुच्यते, तत्राह –

**३६७ पत्ताण खेत्त जयणा काऊणावस्सयं ततो ठवणा ।**
**पडिणीय पंत मामग भद्दगसद्धे य अचियत्ते ॥२३७॥ नि०**

**पत्ताण** गाहा । एवं तेषां विहरतां **प्राप्तानाम**भिमत**क्षेत्रे जयण** त्ति यथा **यतना** कर्त्तव्या तथा वक्ष्यति, **'काऊणावस्सयं' कृत्वा चावश्यकं** प्रतिक्रमणं **ततो ठवण** त्ति **ततः स्थापना** क्रियते [5]केषाञ्चित्कुलानाम्, कानि च तानीत्यत आह-**प्रत्यनीकः**

---

A वैरात्रिकः कालो गृह्यते द्वयोः प्रहरयोरुपरि, ततः स्वाध्यायः क्रियते, यदिवा तया वेलया स्वाध्यायः ।

१. भूतिना क. २. वेरत्तिं आ० ३. किं भो कु० क० ४. खासकरणं क० ५. केषां कुलानां क०

शासनादेः, **प्रान्तोऽ**दानशीलः, स **मामगो** य एवं वक्ति-[A] मा मम समणा घरमइंतु, **भद्रकश्राद्धकौ** प्रसिद्धौ, **अचियत्ते** त्ति यः साधुभिरागच्छद्भिर्दुःखेनास्ते, शोभनं भवति यद्येते नायान्ति गृहे । एतेषां कुलानां यो विभागः क्रियते प्रतिषेधाप्रतिषेधरूपः स स्थापनेत्युच्यते ॥२३७॥

इदानीं भाष्यकार एनां गाथां प्रतिपदं व्याख्यानयन्नाह –

**३६८ बाहिरगामे वुत्था उज्जाणे ठाण वसहिपडिलेहा ।**
**इहरा उ गहियभंडा वसही वाघाय उड्डाहो ॥१०४॥ निभा०**

**बाहिर** गाहा । एवं ते **बाह्यग्राम** आसन्नग्रामे पर्युषिताः सन्तोऽभिमतं क्षेत्रं प्राप्य[1] क्व तावत्तिष्ठन्ति ? **उज्जाणे ठाणं** ति **उद्याने** तावत्**स्थानमास्थां** कुर्वन्ति, **वसहिपडिलेह** त्ति पुन**र्वसतिप्रत्युपेक्षकाः** प्रेष्यन्ते । **इहरा उ** त्ति यदि प्रत्युपेक्षका वसतेर्न प्रेष्यन्ते ततो **गृहीतभाण्डा** गृहीतोपकरणा **वसतेर्व्याघाते** सति निवर्त्तन्ते ततश्च **उड्डाहो** भवति, उपघात इत्यर्थः ॥१०४॥

तत्र च प्रविशतां शकुनापशकुननिरूपणायाह –

**३६९ मइलकुचेले अब्भंगिएल्लए साण खुज्जवडभे य ।**
**एए उ अप्पसत्था हवंति खि[2]त्तं अइंताणं ॥१०५॥ निभा०**

**३७० नारी पीवरगब्भा वड्डकुमारी य कट्ठभारो य ।**
**कासायवत्थ कुच्चंधरा य कज्जं न साहिंति ॥१०६॥ निभा०**

**३७१ रत्तवड चरग तावस रोगी विगला य आउरा विज्जा ।**
**कासायवत्थ उद्धूलिया य कज्जं न साहिंति ॥२८॥ प्र०**

**३७२ च[3]क्कय[4]रंमि भमाडो भुक्खा मारो य पंडुरंगंमि ।**
**तच्चन्नि रुहिरपडणं बोडियमसिए धुवं मरणं ॥१०७॥ निभा०**

**३७३ जंबूअ चास मउरे भारद्दाए तहेव नउले य ।**
**दंसणमेव पसत्थं पयाहिणे सव्वसंपत्ती ॥१०८॥ निभा०**

---

A श्रमणा ! मा मम गृहमागच्छन्तु ।

१. प्राप्य तावदवतिष्ठन्ते ? दा० २. खेत्ताउ निंताणं हे० खेत्तं अइंतस्स दा० खित्तं अयंताणं संपा० ३. चक्क० गाथा ह० हे० संपा० प्रतिषु नास्ति ४. चक्कयरंमि० जंबूअ चास : गाहा 'क०ल प्रत्योर्नास्ति० (निभा. १०७-१०८)

**३७४ नंदीतूरं पुण्णस्स दंसणं संख पडहसद्दो य ।**
**भिंगारछत्तचामर [१]धयप्पडागा पसत्थाई ॥१०९॥ निभा०**

**३७५ समणं संजयं दंतं सुमणं मोयगा दहिं ।**
**मीणं घंटं पडागं च सिद्धमत्थं वियागरे ॥११०॥ निभा०**

**मइल** गाहा । एता निगदसिद्धाः ॥

[**चक्कयरं** गाथा । चक्रकरे चक्रहस्ते भ्रमणं गन्तॄणां स्यात् । भुक्खामारो य पंडुरंगंमि । पाण्डुरागे भस्मश्वेताङ्गे दृष्टे बुभुक्षामारः क्षुधाकष्टं स्यात् । तच्चन्नि रुहिरपडणं । तत्त्वज्ञे रक्तपटे बौद्धे दृष्टे रुधिरपतनं मार्गे ज्ञेयम् । बोडियमसिए धुवं मरणं । बोटिके दृष्टे स्तेनाद्याः स्युः । मसीए मसीखरण्टितेऽशिवे सति बोटिके दृष्टे ध्रुवं मरणं स्यात् । [ओ.नि.मा.-निभा.१०७]]

**३७६ तम्हा पडिलेहिय दीवियंमि पुव्वगय असइ सारविए ।**
**फड्डयफड्डपवेसो कहणा [२]न य उट्ठ इयरेसिं ॥१११॥ निभा०**

**तम्हा** गाहा । यस्मात्पूर्वप्रत्युपेक्षितायां वसता उड्डाहो भवति **तस्मात्प्रत्युपेक्ष्य** प्रवेष्टव्यम् । **दीवियंमि** त्ति **दीपिते** कथिते शय्यातराय, यदुताचार्या आगताः, **पुव्वगय** त्ति **पूर्वगत**क्षेत्रप्रत्युपेक्षकैः प्रमार्जिता ततः साध्वेव, **असति** त्ति पूर्वगतक्षेत्र-प्रत्युपेक्षकाभावे, ततः क्षेत्रप्रत्युपेक्षकैः प्रविश्य **सारविते** प्रमार्जितायां वसतौ, कथं प्रवेष्टव्यम् ? इत्यत आह-[१७]**फड्डकफड्डकैः प्रवेशः** कर्त्तव्यः । **कहण** त्ति यो धर्मकथालब्धिसंपन्नः स पूर्वमेव गत्वा शय्यातराय वसतेर्बहिर्धर्मकथां करोति । **न य उट्ठ** त्ति **न चासौ** धर्मकथां कुर्वन्नु**त्तिष्ठति** अभ्युत्थानं करोति **इयरेसिं** ति ज्येष्ठार्याणाम्, आह-किमाचार्यागमने धर्मकथी अभ्युत्थानं करोति उत नेति? आचार्य आह-अवश्यमेवाभ्युत्थानमाचार्याय करोति **॥१११॥**

यतोऽकरण एते दोषाः —

**३७७ आयरियअणुट्ठाणे ओहावण बाहिराऽदक्खिण्णा ।**
**साहणय वंदणिज्जा अणालवंते वि आलावो ॥११२॥ निभा०**

---

१७. फड्डगफड्डपवेस-स्पर्धकस्पर्धप्रवेशः-शेषा साधवः-स्पर्धकस्पर्धकैः प्रविशन्ति, न पुनः सर्वेऽप्येकत्र पिण्डीभूयेति भावः । (बृ. क. उ.२ गा.१५६४)

१. एवमाई पसत्थाई ह० २. उट्ठणिय० हे०

**आयरिय** गाहा । **आचार्या**गमने **सत्यनुत्थाने ओहावण** त्ति म्लानता[1] भवति, **बाहिर** त्ति लोकाचारस्य **बाह्या** एत इति, पञ्चानामप्यङ्गुलीनामेका महत्तरा भवति, **अदक्खिण्ण** त्ति दाक्षिण्यमप्येषामाचार्यं प्रति नास्तीत्येवं शय्यातरश्चिन्तयति । **साहणय** त्ति तेन धर्मकथिनाऽऽचार्याय कथनीयं यदुतायमस्मद्वसतिदाता । **वंदणिज्ज** त्ति शय्यातरोऽपि धर्मकथिनेदं वक्तव्यो **वन्दनीया** आचार्याः, एवमुक्ते यद्यसौ वन्दनं करोति ततः साध्वेव, अथ न करोति ततः **अणालवंते वि** तस्मिन् शय्यातरे-**ऽनालपत्यपि** आचार्येणालापः कर्त्तव्यः, यदुत कीदृशा यूयम् ? ॥११२॥

अथाचार्य आलपनं न करोति तत एते दोषाः –

**३७८　थद्धा निरोवयारा अग्गहणमलोगजत्त वोच्छेओ ।**
**तम्हा खलु आलवणा[2] सयमेव य[3] तत्थ धम्मकहा ॥११३॥ निभा०**

**थद्धा** गाहा । **स्तब्धा** ह्येत आचार्यास्तथा **निरुपकारा** उपकारमपि न बहु मन्यन्ते, **अग्गहणं** ति अनादरोऽस्याचार्यस्य मां प्रति, **अलोगजत्त** त्ति लोकयात्राबाह्याः, **वोच्छेओ** त्ति **व्यवच्छेदो** वसतेरन्यद्रव्यस्य वा, **तस्मात्खल्वालपना** कर्त्तव्या, **स्वयमेव च तत्र धर्मकथा** कर्त्तव्याऽऽचार्येणेति ॥११३॥

**३७९　वसहिफलं धम्मकहा कहणअलद्धी उ सीस वावारे ।**
**पच्छा अइंति वसहिं तत्थ य भुज्जो इमा जयणा ॥११४॥ निभा०**

**वसति** गाहा । **धर्मकथां** कुर्वन् **वसतेः फलं** कथयति, **कहणअलद्धी उ** त्ति यदा तु पुनराचार्यस्य **धर्मकथालब्धिर्न** भवति तदा **सीस वावारे** त्ति **शिष्यं व्यापारयति** नियुङ्क्ते धर्मकथाकथने, शिष्यं च धर्मकथायां व्यापार्य **पश्चादाचार्याः** प्रविशन्ति **वसतिम्, तत्र च** वसतौ **भूयः** पुनरियं **यतना** वक्ष्यमाणलक्षणा कर्त्तव्या ॥११४॥

**३८०　राया देसो नगरं भवणं गिहवइ य सो धण्णो ।**
**जत्थ साहू विहरन्ति अणुग्गहं मण्णमाणाणं ॥२९॥ प्र.**

[ **गृहपतिः** शय्यातरः श्राद्धो **यत्र** येषु देशपुरादिषु **साधवो विहरन्ति** संयमयात्रया तिष्ठन्ति । राजादीना**मनुग्रहम्** आस्थां **मन्यमानानां** दधतामित्यर्थः ॥ओमाटी.प्र.२९॥ ]

---

१. मलना क. २. आलवणं दा० ३. उ तत्थ दा०

**३८१ इहलोए निप्पिवासा निच्चं[1] परलोय-साहणिक्कजुया ।**
**एए महाणुभावा देवाण वि वंदणिज्जा य ॥३०॥ प्र.**

[ **इहलोके निप्पिपासा** अप्रतिबद्धा **परलोकसाधनेन** रत्नत्रयेण **ऐक्यम**भिन्नत्वम्, तेन **युताः** । **एते** साधवः ॥ओमाटी.प्र.३०॥ ]

**३८२ जो देइ उवस्सयं जतिवराण गुणसयसहस्सकलियाणं[2] ।**
**तेणं दिण्णा वत्थ-ऽण्ण-पाण-सयणाऽऽसण-विकप्पा ॥३१॥ प्र.**

[ **कलितानां** सुविहितानाम् । **विकल्पाः** प्रकाराः ॥ओमाटी. प्र.३१॥ ]

**३८३ जं तत्थ ठियाण भवे सव्वेसिं चेव तेसि उवभोगो ।**
**रक्ख परिपालणा वि य तो दिण्णा एव ते सव्वे ॥३२॥ प्र.**

[ **यद्** यस्मात् कारणात् **तत्रो**पाश्रये **स्थितानामेव** साधूनां **तेषां** वस्त्रान्नादीनां **सर्वेषामुपभोगो भवेत्**, वस्त्रादीनां **रक्षा प्रतिपालना** स्थापनाऽपि **च** भवेत् । तत् तस्मात् कारणात् शय्यातरेण **ते सर्वे** विकल्पा **दत्ता एव** ॥ओमाटी.प्र.३२॥ ]

**३८४ तो सव्वेसिं तेसिं जं फल तेहिं समण्णियमुदारं ।**
**होती उवस्सय-फलं तं सुणह[3] इमं समासेणं ॥३३॥ प्र.**

[ **ततः सर्वेषां तेषां** वस्त्रान्नदानादीनां **यानि फलानि** भोगलाभादीनि भवन्ति, तैः फलैः **समन्वितं** वसतिदातुर्वस्त्राद्यददतोऽपि **यदुदारं** गुरुवस्त्रदानादिवत्वात् **तुः** पुन**रुपाश्रयफलं भवति** ॥ओमाटी.प्र.३३॥ ]

**३८५ लभती सग्गम्मि इतो भवण-विकप्पे अणेग-विधि-जुत्ते ।**
**वेरुलिय-वइर-विद्दुम-खंभ-सहस्सूसिए रम्मे ॥३४॥ प्र.**

[ शय्यातर **इतः** स्थानात् **स्वर्गे** गतो **भवनविकल्पान्** भवनप्रकारान् **लभते** । **अनेकविधिभि**रनेकचित्रादिभङ्गिभि**र्युक्तान् वैडूर्यवज्रविद्रुममयस्तम्भसहस्त्रोच्छ्रितान् रम्यान्** ॥ओमाटी.प्र.३४॥ ]

बहुगाथाभिर्विमानविशेषणान्याह –

---

१. किच्चं द. २. णेगगुण-जोगधारीणं द. ३. मुणह ता.

३८६ **तवणिज्जुज्जल-कंदे[1] तडच्छिद्दाडोव[2]-पवर-विच्छड्डे ।**
**मणि-कर-णिकर-परद्धंधकार-रयण-प्पभ-पिणद्धे ॥३५॥ प्र.**

[ **तपनीयोज्ज्वल-कन्दान् तटच्छिद्राटोपप्रवर-विच्छर्दान्** तटच्छिद्राणि पार्श्वजाल-च्छिद्राणि । तेषामाटोपस्य विच्छर्दो विस्तारो यत्र **मणीनां करनिकरैः पराद्धं** विक्षिप्त**मन्धकारं** येषु तानि । तथा **रत्नप्रभाभिः पिनद्धाना**च्छादितान् । ततो द्वन्द्वः । तत्र मणयश्चन्द्रकान्ताद्याः, रत्नानि कर्केतनादीनि ॥ओमाटी.प्र.३५॥]

३८७ **कणग-पडिबद्ध-वर-वइर-सुदढ-गाढोवगूढ-मणि-पीढे ।**
**दीह[3]-सुइ-मरगय-वरजलमणिकोट्टिम-बद्ध-भूमितले ॥३६॥ प्र.**

[**कनकप्रतिबद्धवरवज्रैः सुदृढं** यथाभवति तथा **गाढमवगूढं** भूमग्नं **मणिपीठं** यत्र **दीर्घाः शुचयः** कराः, येषु ईदृशै**र्मरकतरत्नैर्वरैर्जलमणिभि**र्जलकान्तैः **कुट्टिमं बद्धं भूमितलं** यत्र ॥ओमाटी.प्र.३६॥]

३८८ **रयणमय-फुल्ल-वल्ली-णाणा-भत्ती-विचित्तउल्लोगे ।**
**उल्लोय-ट्ठिय-[4]जलरुह-कुट्टिम-संकंत-[5]मणिदव्वे ॥३७॥ प्र.**

[**रत्नमयफुल्लवल्लीभिर्नानाभित्तिभि**र्नानादिरचनाभि**र्विचित्रोल्लोच उल्लोच-स्थितानां जलरुहाणां मणिकुट्टिमे सङ्क्रान्तेन** सङ्क्रमणेन दिव्यान् प्रधानान् ॥ओमाटी.प्र.३७॥]

३८९ **णर-मगर-विहग-वालग-कुंजर-जलरुह-विफास[6]-कलियाए ।**
**मणि-रयण-वेदियाए परिकर-परिणद्ध-पेरंते ॥३८॥ प्र.**

[**नरा मकरा विहगा व्यालाः कुञ्जरा जलरुहानि** कमलानि । तेषां **विस्पर्शेन** चित्रेण **कलितया मणिरत्नवेदिकया परिकर**स्थानत्वेन **परिणद्धो** व्याप्तः **पर्यन्तो** येषां विमानानाम् ॥ओमाटी.प्र.३८॥]

३९० **णिज्जूह-चंदसाले-कंचण-जालोवसोभिते दारे ।**
**सुब्भऽब्भ-विब्भमऽब्भुतरयतगिरीसण्णिभागारे ॥३९॥ प्र.**

[ **निर्व्यूहं** नागदन्ताद्यं **चन्द्रशाला चतुःखण्डी, काञ्चनजालानि तैरुपशोभितो**

---

१. देहे द. २. तडिच्छडा द. ३. दधि-मधु द. ४. तल द. ५. पडिबिंबे द. ६. विभाव द.

द्वारान् शुभ्राभ्रविभ्रमकराद्भूतरजतगिरिसंनिभाकारो येषां तान् ॥३९॥ ]

३९१ कपूरा-ऽगरु-चंदण-तुरुक्क-वर-धूव-सुरभि-गंधड्ढे ।
[1]नारय-संगीयज्झणि-मुतिंग-वर-रुंद-सद्दाले ॥४०॥ प्र.

[ कर्पूरागुरुचन्दनतुरुष्कवरधूपसुरभिगन्धाढ्यान् नारद-सङ्गीत-ध्वनिमृदङ्ग-वररुन्द्र-शब्दालान् । रुन्द्रो विस्तीर्णः शब्दयुक्तान् ॥ओमाटी. प्र.४०॥ ]

३९२ गंगा-पुलिणोवम-मणहरेहिं णवणीय-तूलफासेहिं ।
सयणाऽऽसणेहि य जुत्ते मणि-कंचण-भत्तिजुत्तेहिं[2] ॥४१॥ प्र.

[ गङ्गापुलिनोपममनोहरैर्नवनीततूलस्पर्शैः शयनासनैर्युतान् मणि-काञ्चन-भक्तियुक्तैः । भक्तिर्व्युत्पत्तिः ॥ओमाटी.प्र.४१॥ ]

३९३ [3]रुंटंतभमर-मधुकरिसु सुरभि-लंबंत-पवर-वणमाले ।
दारोभय-सुपतिट्ठिय-कंचण-सोहंत-[4]मणि-कलसे ॥४२॥ प्र.

[ रुद्दद्भ्रमरमधुकरीयुक्तसुष्ठु सुरभि लम्बमानप्रवरवनसम्बन्धिमालायुक्तान् । उभयद्वारसुपरिस्थितकाञ्चनशोभमान-मणिकलशान् ॥ओमाटी.प्र.४२॥ ]

३९४ उवसोभिते समंता आरामुज्जाण-काणण-वणेहिं ।
पुक्खरिणि-वावि-दीहिय-कयलि-लयारम्भ-घरएहिं ॥४३॥ प्र.

[ समन्तादारामोद्यानकाननवनैर्नानावनभेदैः । तथा पुष्करिणी-वापीदीर्घिका कदलीलतारम्यगृहैरुपशोभितान् ॥ओमाटी.प्र.४३॥ ]

३९५ [5]सव्वाइं सुहाभिगम्मे [6]मणस्स-सव्विंदियत्थ उववेदे ।
एयारिसे विमाणे लभंति वसहिप्पदाणेणं ॥४४॥ प्र.

[ वसतिप्रदानेन एतादृशान् विमानान् लभन्ते सर्वान् मनसः-सुखाभिगम्यान् सर्वेन्द्रियार्थोपेतान् ॥ओमाटी.प्र.४४॥ ]

३९६ संगय-वेस-विभूसण-जोव्वण-लावण्ण-रूव-कलियाहिं ।
कसिण-घण-णिग्गयाहिं व विज्जु-लयाहिं मणहराहिं ॥४५॥ प्र.

---

१. णाडगसंगीयद्धणि द. २. चित्तेहिं द. ३. रुट्टंत द. रुद्दंत प. ४. वरकलसे ता. ५. सव्वो हु सुहाभिगमे द. ६. मणुण्ण द.

[ सङ्गता मिलिता वेषा विभूषणानि यासां ताः **सङ्गतवेषविभूषणास्ताभि-यौवनलावण्यरूपकलिताभिश्च कृष्णघननिर्गताभिः, विद्युल्लताभिर्मनोहरादिभिरिव** दृश्यमानाभिः ॥ओमाटी.प्र.४५॥ ]

**३९७ सव्वंगसुंदरीहिं सुंदर-कर-चरण-नयण-वयणाहिं ।**
**पीण-पयोहर-गुरु-भर-णामिय-पणयंग-लट्ठीहिं ॥४६॥ प्र.**

[ **सर्वाङ्गसुन्दरीभिः सुन्दरकरचरणनयनवचनैः पीनपयोधर-गुरुभारनामिताः प्रणताः** सुललितत्वात् नम्रा **अङ्गयष्टयो** यासां ताभिः ॥ओमाटी.प्र.४६॥ ]

**३९८ पवरच्छरसाहिं [1]समं विसयसुहमणोवमं अणुभवंति ।**
**गंधव्व-गीय-वाइय-पमुइय-पक्कीलिया णिच्चं ॥४७॥ प्र.**

[ **प्रवराप्सरोभिः समं विषयसुखमनुपममनुभवन्ति । गन्धर्व-गीतवाद्यप्रमुदित-प्रक्रीडिता नित्यम्** ॥ओमाटी.प्र.४७॥ ]

**३९९ सुहमणुभविऊण चिरं तत्तो वि चुता पुणो मणुय-लोए ।**
**[2]रायादीसु महिड्ढिसु आता य कुलेसु [3]विउलेसु ॥४८॥ प्र.**

[ **सुखमनुभूय चिरं ततश्च्युताः पुनर्मनुजलोके राजादिषु महर्धिष्वायाताः कुलेषु विपुलेषु** ॥ओमाटी.प्र.४८॥ ]

**४०० तहीयं पी पावंती भवण-वराइं बहु-प्पगाराइं ।**
**[4]सरदब्भरयत-गिरिवर-सिहरागाराइं रम्माइं ॥४९॥ प्र.**

[ **तत्रापि च प्राप्नुवन्ति भवनवराणि बहुप्रकाराणि शरदभ्ररजत-गिरिवर-शिखराकाराणि रम्याणि** ॥ओमाटी.प्र.४९॥

**४०१ फलिहिंदनील-मरगय-वेरुलियंजण-मसारगल्लेहिं ।**
**संखंक-वइर-विद्दुम-जोतिरस-सुगंधि-पुलएहिं ॥५०॥ प्र.**

[ **स्फटिकेन्द्रनीलमरकतवैडूर्याञ्जनमसारगल्लैः शङ्खाङ्कवैर-विद्रुमज्योतीरसैः** सुगन्धपुष्पैः सौगन्धिकरत्नैर्भृतानि ॥ओमाटी.प्र.५०॥ ]

---

१. समयं प. २. रायाई प. ३. विमलेसु द. ४. सरदह द.

**४०२ णाणा-मणि-रयणुज्जल-जंबूणय-कणग-भित्तिचित्ताइं ।**
**कंचण-रस-खवि-उज्जल-थूभिय-जलमाण-सिहराइं ॥५१॥ प्र.**

[ **नानामणिरत्नोज्ज्वलजाम्बूनदकनकभित्तिचित्राणि काञ्चन-रसखचितो-ज्ज्वल-स्तूपिकाज्वलच्छिखराणि** ॥ओमाटी.प्र.५१॥ ]

**४०३ णिज्जूह-चंदसालिय-विडंक-[1]जालिंद य-वरकलिए ।**
**जाल-गवक्खेहि य पुलइंताइं [2]दिसिदंसिय-मुहाइं ॥५२॥ प्र.**

[ **निर्व्यूहाश्चन्द्रशालाः, विटङ्कजालं** व्युत्पत्तिजालम्, **अलिन्दा** बाह्यद्वारे कोष्ठाः, तेषां वृंदेन **वरकलितानि जालगवाक्षैश्च पुलकितानि** रोमाञ्चितानि **दिशिदर्शितमुखानि** ॥ओमाटी.प्र.५२॥ ]

**४०४ मणि-कणग-[3]रयण-परिमंडिएहिं पवर-सयणाऽऽसणेहिं च ।**
**आइण्णाइं-वरहंस-तूलिए[4]पच्चत्थयघणेहिं ॥५३॥ प्र.**

[**मणिकनकरत्नपरिमण्डितैः प्रवरशयनासनैः । वरहंस-तूलिकायाः** प्रत्य-वस्तृतेनाच्छादनेन **घनैराकीर्णानि** ॥ओमाटी.प्र.५३॥]

**४०५ तह खुज्ज-वामणी वडभियाहिं [5]वच्छरि-चिलादि-[6]दमणीहिं ।**
**[7]सबरी-बहुलि-मुरुंडी-[8]वउलसीहिं पारसीहिं च ॥५४॥ प्र.**

[**तथा कुब्जवामनीवटभीवच्छरिचिलातीदमनीभिः शबरीबहुली-मुरंडी-वलल-कुशीपारसीभिः** स्त्रीभिर्वटभी बलवतीस्त्री वत्सतरी पुत्रीस्थानीया स्त्री । शेषा देशस्त्रीभेदाः ॥ओमाटी.प्र.५४॥]

**४०६ दासी-दास समाउल-णाणादेसीहिं विविह-वेसाहिं ।**
**गो-महिसेहिं य तहा णाणा-धण-धण्ण-पडिपुण्णा ॥५५॥ प्र.**

[प्रागुक्ताभिर्नानादेशीभिर्विविधवेषाभिः **समाकुला दासैः** समाकुला गृहिणः स्युः **गोमहिषैश्च** समाकुलाः, **नानाधनधान्यप्रतिपूर्णाः ॥ओमाटी.प्र.५५॥**]

**४०७ [9]एयारिसेसु भवणेसु सोक्खं माणुस्सयं अणुभवंति ।**
**वर-तरुणीहिं समग्गा सिरि-लच्छि-सरिच्छ-रूवाहिं ॥५६॥ प्र.**

---

१. जालऽद्धयंद द. २. दिसिमुहाइं द. ३. रयत द. ४. पच्चत्थअघणेहिं द. ५. बब्बरि द. ६. दमिलीएहिं द. ७. सफरी-बहलि द. ८. पउसीहिं द. ९. एयारिस प.

[**एतादृशभवनेषु मानुष्यं सौख्यमनुभवन्ति श्रीलक्ष्मीसदृशरूपाभिर्वर-तरुणीभिः** सहिताः । लक्ष्मीरैरावतस्तु पुण्डरीक-हृदाधिष्ठात्री ॥ओमाटी.प्र.५६॥]

**४०८ संगय-गय-हसिय-वियक्खणाहिं कमलेक्खणाहिं दक्खाहिं ।**
**अक्खय-सुह-[१]क्खणीहिं वरलक्खण-लक्खिय-तणूहिं ॥५७॥ प्र.**

[**सङ्गतं** सङ्गमनं **गतं** गमनं **हसितं** हसनम् । तत्र **विचक्षणाभिः कमलेक्षणाभि-र्दक्षाभि**र्लघुकार्यकर्त्रीभिर्विनयशिक्षाभिः । **अक्षयसुख-खानिभिर्वरलक्षणलक्षिततनूभिः** स्त्रीभिर्युताः ॥ओमाटी.प्र.५७॥]

**४०९ [२]णाणा-वियप्प-भोयण-मणि-रयण-सुवण्ण-भायण-विहीहिं ।**
**वर-गंध-[३]जुत्तीसु-सुरभि-चंदण-वरधूव-गंधड्ढा ॥५८॥ प्र.**

[**नानाविधपानभोजनैर्मणिरत्नसुवर्णभाजनविधिभिः** प्रीताः स्युः । तथा **वरगन्ध-युक्तिसुसुरभिचन्दनवरधूपगन्धाढ्याः** सुखं लभन्ते ॥ओमाटी. प्र.५८॥]

**४१० वर-पुप्फ-वास-वासियंतंबोल-सुगंध-सुरभि-मुहवासा ।**
**णाणा-[४]वेसणविभूसण-विभूसिया संगय-सरीरा ॥५९॥ प्र.**

[**वरपुष्पवासवासितताम्बूलसुगन्धद्रव्यसुरभिमुखवासाः । नानावेषण-विभूषणानि । तैर्विभूषिता** ? शोभा तया युक्तशरीरा ॥ओमाटी.प्र.५९॥]

**४११ गंधव्व-गीय-वाइय-रवेण महुरेण समुवगिज्जंता ।**
**सुह-सागरमोगाढा अणुभविऊणं विसय-सोक्खं ॥६०॥ प्र.**

[**गन्धर्वैर्गीतवाद्यरवेन मधुरेण समवगीयमानाः सुखसागरमवगाढा अनुभूय विषयसौख्य**मनुष्यभवे ॥ओमाटी.प्र.६०॥]

**४१२ बोहिं लद्धूण तओ काऊण तवं अणुत्तरमुदारं ।**
**पवर-सुह-[५]परंपरएण जंति सिद्धिं धुय-किलेसा ॥६१॥ प्र.**

[ततो नृभवे जीवा **बोधिं लब्ध्वा** प्रव्रज्ययाऽनुत्तरं श्रेष्ठ**मुदारं** प्रौढचारित्र-सहित-भावतपः **कृत्वा प्रवरसुखपरम्परया धुतक्लेशाः सिद्धिं** मोक्षं **यान्ति** ॥ ओमाटी.प्र.६१ ॥]

---

१. खाणीहिं प. २. णाणावियह प. ३. जुत्ती द. ४. वेस द. ५. परंपराएण द.

**४१३ साधू-वसही-दाणस्स फलमिणं वण्णियं समासेणं ।**
**जं पावेइ गिहत्थो इह-परलोगे य कल्लाणं ॥६२॥ प्र.**

[**साधुवसतेर्दानस्य फलमिदं वर्णितं समासेन** । किमित्याह-**यद्गृहस्थो** वसतिदाना**दिहलोके परलोकेषु च कल्याणं प्राप्नोति** । इहलोके कल्याणं पुण्ययशः सुक्रियत्वादिलाभात् ॥ओमाटी.प्र.६२॥]

**४१४ इह कहयंती धम्मं सागारियस्स सयमेव आयरिया ।**
**अह कहणलद्धि णत्थी वावारे [१]काहियं चेव ॥६३॥ प्र.**

[**इत्याचार्याः सागारिकस्य स्वयमेव धर्मं कथयन्ति**। **अथ** गुरोः **कथनलब्धिर्नास्ति**। ततः **काथिकं** कथालब्धिमन्तं साधुं धर्मकथायां **व्यापारयेत्** । वसतिफलं समाप्तम् । एताः क्षेपकगाथाः [९८]**कल्पभाष्यादिषु** दृश्यमाना इह **ओघे** काष्वपि प्रतिषु न दृश्यन्ते । ततो लिखिताः ॥ओमाटी.प्र.६३॥]

**४१५ दाऊणुवस्सए वि य जोगे साहूणं तो सुभे दाया ।**
**पवरे विमाणरयणे अच्छरगणसंकुले रम्मे ॥६४॥ प्र.**

**४१६ रययगिरिसिहरसरिसे तुंगत्थे पवरथुहियाकलिए ।**
**णिज्झायं( ? ) तत्थ दिसाजालगवक्खपंतीहिं ॥६५॥ प्र.**

**४१७ कंचणरययखयउज्जलवइरामयथूभविउलविक्खंभे ।**
**णाणामणिरयणुज्जलफुरंतसोहासमाउत्ते ॥६६॥ प्र.**

**४१८ उल्लोयपलंबुज्जलमोत्तियवरदामविरइयालोए ।**
**कालागरुपवरतुरुक्कधूवसुसुयंधगंधड्ढे ॥६७॥ प्र.**

**४१९ निरुवमा जाईसोहागुणलच्छिनिहाणमणहरसिरीए ।**
**नाडगसंगीयद्धणिमुइंगवररुंदसद्दाले ॥६८॥ प्र.**

**४२० वरसयणासणकलिए पवरे एयारिसे वरविमाणे ।**
**वसहीदाणफलेणं साहूणं पावए दाया ॥६९॥ प्र.**

---

९८. अत्र निर्युक्तिकारेणाऽगृहीताः कल्पभाष्याद्यनुसारेण वृत्तिकारेण विवृत्ताः प्रक्षेपगाथाः, किन्तु साम्प्रतमुपलब्ध कल्प-लघु-बृहदभाष्ययोरवलोकनान्तरं तत्र न मीलिताः । एता गाथा ओघबृहद्भाष्ये ११०८-११४० तम गाथासु वर्तन्ते।

१. तहेव तं द.

**४२१ मोक्खंतरालमेयं वसहिफलं वण्णियं समासेणं ।**
**अक्खयमउलमबाहं पावइ अंते य सिद्धत्तं ॥७०॥ प्र.**

**४२२ पडिलेहण संथारग आयरिए तिण्णि [1]सेसग कमेण ।**
**विंटिअउक्खेवणया पविसइ ताहे य धम्मकही ॥११५॥ निभा०**

**पडिलेहण** गाहा । तत्र च वसतौ प्रविष्टाः सन्तः पात्रकादि**प्रत्युपेक्षणां** कुर्वन्ति, **संस्तारक**ग्रहणं च क्रियते, तत **आचार्यस्य त्रयः** संस्तारका निरूप्यन्ते, **शेषाणां** साधूनां **क्रमेण** यथारत्नाधिकतया, ते च साधव आत्मीयात्मीयोपधि**वेण्टलिका-नामुत्क्षेपणं** कुर्वन्ति येन भूमिभागो ज्ञायते, अस्मिन्नवसरे बाह्यतो **धर्मकथी** संस्तारकग्रहणार्थं **प्रविशति** ॥११५॥

**४२३ उच्चारे पासवणे लाउय निल्लेवणे य अच्छणए ।**
**पुव्वट्ठिय तेसि [2]कहेऽकहिए आयरण वोच्छेओ ॥११६॥ निभा०**

**उच्चार** गाहा । ते हि क्षेत्रप्रत्युपेक्षका **उच्चार**भुवं दर्शयन्ति ग्लानाद्यर्थम्, **पासवणे** त्ति कायिकाभूमिं दर्शयन्ति, **लाउए** त्ति तुम्बकत्रेपणभुवं दर्शयन्ति, **निर्लेप**स्थानं च दर्शयन्ति, **अच्छणए** त्ति यत्र स्वाध्यायं कुर्वद्भिरास्यते । **पूर्वस्थिताः क्षेत्रप्रत्युपेक्षका** एवं **तेषामागन्तुकानां कथयन्ति** । **अकहिए** त्ति यदि **न कथयन्ति** ततः **आयरण वोच्छेओ** त्ति अस्थाने कायिकादेराचरणे सति **व्यवच्छेद**स्तद्-द्रव्यान्यद्रव्ययोः, वसतेर्निर्[3]द्धारयतीति ॥११६॥

**४२४ भत्तट्ठिया व खवगा अमंगलं चोयए जिणाहरणं ।**
**जइ खवगा वंदंता दाएंतियरे विहिं वोच्छं ॥११७॥ निभा०**

**भत्तट्ठिय** गाहा । ते हि श्रमणाः क्षेत्रं प्रविशन्तः कदाचि**द्भक्तार्थिनः** कदाचि**त्क्षपका** उपवासिका इत्यर्थः । तत्रोपवासिकानां प्रविशतां **अमंगलं चोयए** त्ति **चोदक** इदं वक्ति-यदुत क्षेत्रे प्रविशता**ममङ्गलमिदं** यदुपवासः क्रियते, तत्र **जिनाहरण**मिति जिनोदाहरणम्, यथा हि जिना निष्क्रमणकाल उपवासं कुर्वन्ति न च तत्तेषाममङ्गलम्, किन्तु प्रत्युत मङ्गलं तत्तेषामेवमिदमपीति । इदानीं **यदि क्षपका**स्तस्मिन्दिवसे साधव उपवासिकास्तत्र च सन्निवेशे यदि श्रावकाः सन्ति ततस्तद्गृहेषु चैत्यानि

---

१. सेस उ आ०स० २. कहणं हे० ३. निर्धाटयतीति दा०

**वन्दन्तो दर्शयन्ति**, कानि? स्थापनादीनि कुलान्यागन्तुकेभ्यः, **इयरे** त्ति भक्तार्थिषु यो **विधिस्तं वक्ष्ये** ॥११७॥

कश्चासौ विधिरित्यत आह –

**४२५ सव्वे दट्ठुं उग्गाहिएहिं ओयरिय भयं समुप्पज्जे ।**
**तम्हा ति दु एगो वा उग्गाहिअ[1] चेइए वंदे ॥११८॥ निभा०**

**सव्वे** गाहा । ते हि भक्तार्थिनः श्रावककुलेषु चैत्यवन्दनार्थं व्रजन्तो यदि **सर्व** एव पात्रकाण्युद्ग्राह्य प्रविशन्ति ततः को दोष इत्यत आह– **दट्ठुमुग्गाहिएहिं ओदरिअ** त्ति **दृष्ट्वा** तान् साधून् पात्रकै**रुद्ग्राहितैः औदरिका** एत इति भट्टपुत्रा इति, एवं श्रावकश्चिन्तयति । **भयं समुप्पज्जे** त्ति **भयं** च श्रावक**स्योत्पद्यते**, यदुत कस्याहमत्र ददामि ? कस्य वा न ददामि ? इति कथं वा एतावतां दास्यामीति, यस्मादेवं **तस्मात्, 'ति दु एगो वा' त्रय उद्ग्राहितेन** प्रविशन्त्याचार्येण सह, **द्वौ** वा **एको वोद्ग्राहितेन** प्रविशति **चैत्यवन्दनार्थमिति** ॥११८॥

अतः –

**४२६ सङ्ढाभंगोऽणुग्गाहियंमि ठवणाइया भवे दोसा ।**
**घरचेइअ आयरिए कइवयगमणं च गहणं च ॥११९॥ निभा०**

**सङ्ढा** गाहा । अथानुद्ग्राहितपात्रका एव प्रविशन्ति, दातव्ये च मतिर्जाता श्राद्धस्य, ततश्च पात्रकाभावेऽग्रहणम्, अग्रहणाच्च **श्रद्धाभङ्गो** भवति । अथैवं भणन्ति– पात्रकं गृहीत्वाऽऽगच्छामि ततश्च **स्थापनादिका दोषा भवन्ति, आदिशब्दा**त्कदाचित्किञ्चित्संस्कारमपि कुर्वन्ति, तस्माद् **गृहचैत्य**वन्दनार्थ**माचार्येण कतिपयैः** साधुभिः सह **गमनं** कार्यम्, **ग्रहणं** घृतादेः कर्त्तव्यमिति ॥११९॥

'पत्ताण खित्तजयण'त्ति व्याख्यातं इदानीं 'काऊणावस्सयं ततो ठवण'त्ति (नि.२३७) व्याख्यायते –

**४२७ खेत्तंमि अपुव्वंमी तिट्ठाणत्था [2]कहिंति दाणाइं ।**
**असई य चेइयाणं हिंडंता चेव दाएंति ॥१२०॥ निभा०**

**खित्तंमि** गाहा । यदि तत्**क्षेत्रमपूर्वकं** न तत्र मासकल्पः कृत आसीत्, ततः

---

१. उग्गाहिएण ह० हे० २. साह हे०

**तिह्वाणत्थ** त्ति **त्रिषु स्थानेषु** श्रावकगृहचैत्यवन्दनवेलायां भिक्षामटन्तः प्रतिक्रमणावसाने वा **कथयन्ति दानादीनि** कुलानि । **असई अ चेइआणं** यदा पुनस्तत्र श्रावककुलेषु चैत्यानि न सन्ति ततोऽ**सति चैत्यानां** भिक्षामेव **हिण्डन्तः** कथयन्ति ॥१२०॥

कानि पुनस्तानि कथयन्तीत्यत आह –

**४२८ दाणे अभिगमसद्धे संमत्ते खलु तहेव मिच्छत्ते ।**
**मामाए अचियत्ते कुलाइं दायंति गीयत्था ॥१२१॥ निभा०**

**दाण** गाहा । **दान**श्राद्धकः, **अभिगमश्राद्धो**ऽभिनवः श्राद्धः, **सम्यक्त्व**श्राद्धः, **तथा मिथ्यादृष्टिः**, एतानि **कुलानि** कथयन्ति। शेषं सुगमम् ॥१२१॥

इदानीं यदि तत्र चैत्यानि न सन्ति, उपवासिकैर्भिक्षा न पर्यटिता तत आवश्यकान्ते क्षेत्रप्रत्युपेक्षकाः कथयन्त्याचार्याय । एतदेवाह –

**४२९ [1]काउस्सग्गामंतण पुच्छणाया अकहिएगयरदोसो ।**
**ठवणकुलाण य ठवणा पविसइ गीयत्थसंघाडो ॥१२२॥ निभा०**

**काउस्सग्गामंतण** गाहा । आवश्यक**कायोत्सर्ग**स्यान्ते **आमंतण** त्ति आचार्य **आमन्त्र्य** तान् क्षेत्रप्रत्युपेक्षकान् **पुच्छण य** त्ति **पृच्छति**, यदुत कान्यत्र स्थापना-कुलानि ? कानि चेतराणि ? पुनश्च ते पृष्टाः कथयन्ति, **अकहिएगतरदोस** त्ति तैः क्षेत्रप्रत्युपेक्षकै**रकथितेषु** कुलेषु स**त्स्वेकतरो**ऽन्यतमो **दोष** संयमात्मविराधनाजनितः, कथिते च सति **स्थापनादिकुलानां स्थापना** क्रियते । पुनश्च स्थापनाकुलेषु **गीतार्थसङ्घाटकः प्रविशति** ॥१२२॥

**४३० गच्छंमि एस कप्पो वासावासे तहेव उउबद्धे ।**
**गामागरनि[2]गमेसुं अइसेसी ठावए सड्ढी ॥१२३॥ निभा०**

**गच्छंमि** गाहा । **गच्छे एष कल्प** एष विधिरित्यर्थः यतः स्थापनाकुलानां स्थापना क्रियते, कदा ? **वासावासे तहेव उउबद्धे** वर्षाकाले शीतोष्णकालयोश्च । केषु पुनरयं नियमः क्रियते ? इत्यत आह-'**गामागरनिगमेसुं**' **ग्रामः** प्रसिद्धः, **आकरः** सुवर्णादिरुत्पत्तिस्थानम्, **निगमो** वाणिजकप्रायः सन्निवेशः, एषु स्थापनाकुलानि स्थापयेत्। किंविशिष्टानि इत्यत आह-**अतिसेसि** त्ति स्फीतानीत्यर्थः । **सड्ढि** त्ति

---

१. कयउस्सग्ग ह० आ० २. निगमेसु य ह० निगमेसु उ हे०

**श्रद्धावन्ति** कुलानि **स्थापयेदिति** ॥१२३॥

**४३१ किं कारणं ? चमढणा दव्वक्खओ उग्गमो वि य न सुज्झे ।**
**गच्छे य नियय कज्जं आयरियगिलाणपाहुणए॥२३८॥ नि० दारगाहा ।**

**किं कारणं** गाहा । **किं कारणं** तानि कुलानि स्थाप्यन्ते ? यतः **चमढण** त्ति अन्यैरन्यैश्च साधुभिः प्रविशद्भिश्चमढ्यन्ते कदर्थ्यन्त इत्यर्थः । ततः को दोष ? इत्यत आह-**दव्वक्खओ** आचार्यादियोग्यानां **द्रव्याणां क्षयो** भवति । **उग्गमो वि य न सुज्झे। उद्गमस्तत्र** गृहे **न शुद्ध्यति** । **गच्छे य** त्ति **गच्छे च नियतं कार्यं** योग्येन, केषामित्यत आह-**आयरिअगिलाणपाहुणए-आचार्यग्लानप्राघूर्णकाना**मर्थाय नित्यमेव कार्यं भवतीति । निर्युक्तिगाथेयम् ॥२३८॥

इदानीं भाष्यकारो व्याख्यानयति, तत्र चमढण त्ति (नि.२३८) व्याख्यानयन्नाह-

**४३२ पुव्विं पि वीरसुणिया छिक्का छिक्का पहावए तुरियं ।**
**सा चमढणाए सिग्गा संतं पि न इच्छए घित्तुं ॥१२४॥ निभा०**

**पुव्विं** गाहा । "[A]जहा काचित् वीरसुणिआ केणइ आहेडइल्लेणं तित्तिरमयूराईणं गहणे सिस्सकारिआ छिक्कारिआ तित्तिराईणि गिण्हइ, एवं पुणो तित्तिराईहिं विणा वि सो छिछिक्कारेइ, सा य पहाविआ जया न किंचि पिच्छइ तया विआरिआ संती कज्जे वि न धावति, एवं सड्ढयकुलाइं अण्णमण्णेहिं चमढिज्जंताइं पाहुणाइकारणे समुप्पण्णे वि संतं पि न देंति । किं कारणं ? जतो अकारणा एव निव्वेइयाणि, तेण कारणे समुप्पण्णे वि न देंति त्ति" । इदानीं गाथाऽक्षरार्थ उच्यते-**पूर्वमपि वीरशुनी छीत्कृता छीत्कृता प्रधावती त्वरितम्**, पुनश्चासौ अलीक**चमढणतया सिग्ग** त्ति **श्रान्ता सदपि** मयूरादि **नेच्छति ग्रहीतुम्** ॥१२४॥

**४३३ एवं सड्ढकुलाइं चमढिज्जंताइं अण्णमण्णेहि ।**
**नेच्छंति किंचि दाउं संतं पि तहिं गिलाणस्स ॥१२५॥ निभा०**

**एवं** गाहा । सुगमा ॥१२५॥

---

A यथा काचिद् वीरशुनी केनचिदाखेटकेन तित्तिरमयूरादीनां ग्रहणे छीत्कृता छीत्कृता तित्तिरादीनि गृह्णाति, एवं पुनस्तित्तिरादीभिर्विनाऽपि सा छीत्छीत् करोति । सा च प्रधाविता यदा न किञ्चित् प्रेक्षते तदा विचारिता सन्ती कार्येऽपि न धावति, एवं श्राद्धकुलान्यन्यैरन्यैः कदर्थ्यमानानि प्राघूर्णादिकारणे समुत्पन्नेऽपि सन्तमपि न ददति। किं कारणम् ? यतोऽकारणादेव निर्वेदितानि तेन कारणे समुत्पन्नेऽपि न ददतीति ।

[अर्थोपनयस्त्वेवम् –

**एवं सड्ढकुलाइं चमढिज्जंताइँ अन्नमन्नेहिं ।**

**नेच्छंति किंचि दाउं संतं पि तहिं गिलाणस्स ॥१५८६॥**

'एवम्' अमुनैव प्रकारेण श्राद्धकुलानि "चमढिज्जंताइं" ति उद्वेज्यमानानि 'अन्यान्यैः' क्षुल्लक-स्थविर-क्षपकादिभिः । यद्वा "अन्नमन्नेहिं" ति अन्यान्यैः-परिफल्गुप्रायैः कारणैः । यथा एकः प्राह-ग्लानस्य शीर्षं दुष्यति शर्करां प्रयच्छ; अपरः प्राह-ममोदरं दुष्यति दध्नः करम्बेण प्रयोजनम्; तदपरः प्राह-प्राघूर्णक आयातोऽस्ति घृतादिकं देहि; अन्यः प्राह-अहमाचार्यस्य हेतोरायातोऽस्मि दुग्धं सशर्करं प्रतिलाभयेत्यादि । ततस्तानि ब्रुवीरन्-यूयं सर्व एव ग्लाना अतो वयं कियतां प्रयच्छामः ? को वा जानाति यूयमाचार्यादीनां हेतोर्गृह्णीथ ? आहोश्विदात्मार्थम् ? इति । एवमुद्वेज्यमानानि नेच्छन्ति 'सदपि' विद्यमानमपि घृतादिकं 'किञ्चित्' स्तोकमात्रमपि ग्लानस्य, उपलक्षणत्वादाचार्य-प्राघूर्णकादेरप्यर्थाय दातुम् । ततश्च यत् ते ग्लानादयः परिताप्यन्ते तन्निष्पन्नं प्रायश्चित्तम् । [बृ.क.-१५८६]]

चमढण त्ति गयं, दव्वक्खय त्ति (नि. २३८)व्याख्यायते –

**४३४ दव्वक्खएण पंतो इत्थि घाएज्ज कीस ते दिण्णं ?।**

**भद्दो हट्ठपहट्ठो करिज्ज अन्नं[1] पि साहूणं[2] ॥१२६॥ निभा०**

**दव्वक्खए** त्ति गाहा । बहूनां साधूनां घृतादिद्रव्ये दीयमाने तद्द्रव्यक्षयः सञ्जातस्ततस्तेन **द्रव्यक्षयेण** यदि **प्रान्तो** गृहपतिस्ततः **स्त्रियं घातयेत्,** एतच्च भणति–**किमिति तेभ्यः** प्रव्रजितेभ्यो **दत्तम्** ? दव्वक्खय त्ति गयं, उग्गमो वि य न सुज्झे त्ति (नि.२३८) व्याख्यायते, तत्राह–**भद्दो हट्ठपहट्ठो करिज्ज अन्नं पि साहूणं । भद्रो** यदि गृहपतिस्ततो दत्तमपि मोदकादि पुनरपि **कारयेत्** । उग्गमो वि य न सुज्झे त्ति गयं **॥१२६॥**

उद्गमशुद्धिर्गता । गच्छम्मि निययकज्जं आयरिय त्ति (नि.२३८) -

गच्छे[3] य निययकज्जं आयरिय त्ति (नि.२३८) व्याख्यानयन्नाह –

**४३५ आयरियअणुकंपाए[99] गच्छो अणुकंपिओ महाभागो ।**

**गच्छाणुकंपयाए[4] अव्वोच्छित्ती कया तित्थे ॥१२७॥ निभा०**

---

९९. अनुकम्पा - "अनुकम्पाया भक्तिवाचित्वम्," इति कल्पसूत्रटीकायाम् । अनुकम्पा-"अन्नदानादिरूपा भक्तिः ।" इति धर्मसङ्ग्रहे ।

१. किंपि ह० हे० २. समणट्ठा आ० ३. गच्छम्मि य-ख. ४. गच्छाणुकंपाए-दा. गच्छाणुकंपणाए त.ध.

**आयरिय** गाहा । सुगमा ॥१२७॥

[ **आयरिय** गाथा । **आचार्यानुकम्पया**ऽऽचार्यभक्त्या **महाभागो** माहात्म्यवान् **गच्छोऽनुकम्पितः** पूजितः । शेषं स्पष्टम् ॥ ओमाटी.१२७ ॥ ]

अथ ग्लानेति –

इदानीं 'गिलाण'त्ति (नि. २३८) व्याख्यायते–

४३६ **परिहीणं तं दव्वं चमढिज्जंतं तु अण्णमन्नेहिं ।**
**परिहीणंमि उ[1] दव्वे नत्थि गिलाणस्स पाउग्गं ॥१२८॥ निभा०**

४३७ **चत्ता होंति गिलाणा आयरिया बालवुड्ढसेहा य ।**
**ख[2]मगा पाहुणगा वि य मज्जायमइक्कमंतेणं ॥१२९॥ निभा०**

४३८ **सारक्खिया गिलाणा आयरिया बालवुड्ढसेहा य ।**
**ख[3]मगा पाहुणगा वि य मज्जायं ठावयंतेणं ॥१३०॥ निभा०**

**परिहीणं** गाहा । **चत्ता** गाहा । **सारक्खिया** गाहा । गाथात्रयमपि सुगमम् ॥१२८॥१२९॥१३०॥

[ **परिहीणं** गाथा । **अन्यान्यैर्ग्रहणेन** कदर्थ्यमानं **तद्ग्लानयोग्यं द्रव्यं न** ॥ओमाटी. १२८॥ ]

[ **चत्ता हुंति** गाथा । **ग्लानास्त्यक्ता** न मानिता इत्यर्थः । एते त्यक्ताः । **मर्यादां** स्थापनाकुलां स्थापनारूपा**मतिक्रमयता**ऽपालयता साधुना ॥ओमाटी. १२९॥ ]

[लोउत्तरिएसु दाणाइसड्ढकुलेसु पविसंतस्स इमे दोसा –

**आयरिय बालवुड्ढा खमग-गिलाणा महोदरा सेहा ।**
**सव्वे वि परिच्चत्ता जो ठवण-कुलाइं णिव्विसती ॥१६२४॥**

महोदरोऽयं बह्वासी, आएस प्राधूर्णकः, णि आधिक्केण विशति निविशति प्रविशतीत्यर्थः । [नि.चू.-१६२४]]

[जो एते ठवणाकुले ण णिव्विसति तस्सिमे गुणा –

---

१. य दा. २. खवगा संपा० ३. खवगा संपा०

**गच्छो महाणुभागो सबाल-वुड्ढोऽणुकंपिओ तेणं ।**
**उग्गमदोसा य जढा जो ठवण-कुलाइं परिहरइ ।।१६२६।।**

जिनकल्पिकादिरत्नानामागरत्वात् समुद्रवद् महानुभागः । बाल-वृद्ध-गिलानादीनां च साधारणत्वाद् महानुभागः । जो तेसु ण णिव्विसति तेण सो गच्छो अणुकंपितो, उद्गमदोषाश्च परित्यक्ता भवन्ति । [नि.चू.-१६२६]]

[**सारक्खिया गाथा** । ग्लानाः पालिताः । आचार्या बालवृद्धशैक्षाः क्षपकाः प्राघूर्णकाश्चैते पालिता मर्यादां स्थापनाकुलां स्थापनारूपां पालयता साधुना ।।संटी. १३०।।]

तथा चात्रायं दृष्टान्तो द्रष्टव्यः —

**४३९ जड्डे महिसे चारी आसे गोणे तेसि जावसिया ।**
**एएसिं पडिवक्खे चत्तारि य संजया होंति ।।२३९।। नि०**

**जड्डे** गाहा । "[A]जहा एक्कं महाबीयं परिसूअं, तत्थ य चारीओ नाणाविहाओ अत्थि, तं जहा—जड्डुस्स हत्थिस्स जा होइ सा तत्थ अत्थि, महिसस्स सुकुमारा जोग्गा सा वि तत्थ अत्थि, आसस्स महुरा जोग्गा सा वि तत्थ अत्थि, गोणस्स सुयंधा जोग्गा चारीया सा वि तत्थ अत्थि, तं च रायपुरिसेहिं रक्खिज्जइ ताणं चेव जड्डाईणं, जइ परं कारणे घासिआ आणिंति, अह पुण तं मोक्कलयं मुच्चइ ताहे पट्टणगोणेहिं गामगोणेहिं च चमढिज्जइ, चमढिज्जए य तस्सिं महापरिसूए ताणं रायकेराणं जड्डाईणं अणुरूवा चारी न लब्भइ, विध्वंसितत्वाद् गोधनैस्तस्य, एवं सड्ढयकुलाणि वि जइ न रक्खिज्जंति ततो अण्णमण्णेहिं चमढिज्जंति, तेसु य चमढिएसु जं जड्डाइसब्भावाणं पाहुणयाणं पाउग्गं तं न देंति" । इदानीमक्षरार्थ उच्यते—**जाड्यो** हस्ती, **महिषः** प्रसिद्धः, तयोरनुरूपां **चारीं** यावसिका घासवाहिका ददति, तथाऽ**श्वस्य गोणो** बलीवर्दस्तस्य च चारीमानयन्ति **यावसिकाः** । **एतेषां** जाड्यादीनां प्रतिरूपोऽनुरूपः पक्षः**प्रतिपक्ष**स्तुल्यपक्ष इत्यर्थः । तस्मिन् **चत्वारः संयताः** प्राघूर्णका **भवन्ति** ।।२३९।।

---

A यथा एकं महाबीजं परिश्रुतम्, तत्र च चार्यो नानाविधा सन्ति, तद्यथा- जाड्यस्य हस्तेर्या भवति, सा तत्राऽस्ति, महिषस्य सुकुमारा योग्या साऽपि तत्रास्ति, अश्वस्य मधुरा योग्या साऽपि तत्रास्ति, बलीवर्दस्य सुगन्धा योग्या चारी साऽपि तत्रास्ति, तच्च राजपुरुषैरक्ष्यते तेषामेव हस्त्यादीनाम्, यदि परं कारणे घासिका आनयन्ति, अथ पुनस्तं स्थानं मुत्कलं मुच्यते तदा पट्टनबलीवर्दैर्ग्रामबलीवर्दैश्च कदर्थ्यन्ते, कदर्थिते च तासां महोद्यानिकायां राजकीयहस्त्यादीनामनुरूपां चारिं न लभ्यते विध्वंसितत्वाद् गोधनैस्तस्य, एवं श्राद्धकुलान्यपि यदि न रक्ष्यन्ते, ततोऽन्यैरन्यैः कदर्थ्यन्ते तेषु च कदर्थितेषु यद् हस्त्यादिसद्भावानां प्राघूर्णकानां प्रायोग्यं तद् न ददति ।

इदानीमेतेषामेव जाड्यादीनां यथासङ्ख्येन भोजनं प्रतिपादयन्नाह —

**४४० जड्डो जं वा तं वा सुकुमारं महिसओ महुरमासो ।**
**गोणो सुगंधदव्वं इच्छइ एमेव साहू वि ॥१३१॥ निभा०**

**जड्डो जं** गाहा । सुगमा, नवरं **साधुरप्येवमेव** द्रष्टव्यः-"[A]तत्थ पढमो पाहुणसाहू भणइ-मम जं दोसीणं उण्हगं कंजिअं वा लब्भइ तं चेव आणेह, तेण एवं भणिते किं दोसीणं चेव आणेअव्वं? न, विसेसेणं सोहणं तस्स आणेअव्वं । बितिओ पाहुणसाहू भणइ-परं मे णेहरहिया वि पूयलिआ सुकुमाला होउ। ततिओ भणति-महुरं नवरि मे होउ अंबं मा होउ । चउत्थो भणति--निप्पडिगंधं अन्नं वा पाणं वा होउ । एवं ताणं भणंताणं जं जोग्गं तं सङ्ख्यकुलेहिंतो विसेसियं आणिज्जइ" ॥१३१॥

**[ जड्डो जं वा तं वा, सुकुमालं महिसओ महुरमासो ।**
**गोणो सुगंधिदव्वं, इच्छइ एमेव साहू वि ॥१५९०॥**

'जड्डः' हस्ती, सः 'यद्वा तद्वा' कर्कश-कटुकादिकमप्याहारयति । यस्तु महिषः सः 'सुकुमारं' वंशकरीलादिकमभिलषति । अश्वः 'मधुरं' मुद्ग-माषादिकमभिकाङ्क्षति । 'गौः' बलीवर्दः सः 'सुगन्धिद्रव्यम्' अर्जुनक-ग्रन्थिपर्णादिकमिच्छति । एवमेव साधवश्चत्वारः चतुर्विधं भक्तमिच्छन्ति-

तत्थ पढमो जड्डसमाणो पाहुणगसाहू भणइ-मम जं दोसीणं वा उण्हगं वा कंजियं वा लब्भइ तं चेव आणेहि, नवरं उदरपूरं । एवं भणिए किं दोसीणं चेव आणेयव्वं ? न, विसेसेण सोहणं तस्स आणेयव्वं । बिइओ पाहुणयसाहू भणइ-परं मे नेहरहिया वि पूवलिया सुकुमाला होउ । तइओ भणइ-महुरं नवरिं मे होउ । चउत्थो भणइ-अन्नं वा पाणं वा निप्पडिगंधं मे आणेह । एवं ताणं भणंताणं जं जोग्गं तं सङ्ख्यकुलेहिंतो विसेसियं आणिज्जइ । तं च ठविएसु चेव सङ्ख्यकुलेसु लब्भइ नाठविएसु । पाहुन्ने य कीरमाणे महंतो निज्जरालाभो साहुक्कारो या पाविज्जइ । अतो कायव्वं तं जहाविसयं साहूहिं ति । [बृ.क.-१५९०]]

एवमुक्ते सत्याह परः-यस्मादेवं तस्मान्न कदाचित्केनचित्प्रवेष्टव्यं प्राघूर्णका-

---

A तत्र प्रथमः प्राघूर्णसाधुर्भणति-मम यद् दोषान्नम्, उष्णकं वा काञ्जिकं वा यल्लभ्यते तदेवाऽऽनयत । तेनैवं भणिते किं दोषान्नमेवाऽऽनेतव्यम् ? न, विशेषेण शोभनं तस्याऽऽनेतव्यम् । द्वितीयः प्राघूर्णसाधुर्भणति- परं मे स्नेहरहिताऽपि पूपिका सुकुमारा भवतु। तृतीयो भणति- मधुरं मे नवरं भवतु, आम्लं मा भवतु । चतुर्थो भणति- निष्प्रतिगन्धमन्नं वा पानं वा भवतु । एवं तेषां भणतां वा यद् योग्यं तत् श्राद्धकुलेभ्यो विशेषितमानीयते ।

गमनमन्तरेण श्रावककुलेषु, यदैव प्राघूर्णका आगमिष्यन्ति तदैव तेषु प्रवेशो युक्तः। एवमुक्ते सत्याहाचार्य :-

**४४१ एवं च पुणो ठविए अप्पविसंते इमे भवे दोसा ।**
**वीसरण संजयाणं विसुक्खगोणी य आरामो ॥१३२॥ निभा०**

**एवं च पुणो** गाहा । **एवं च पुनः ठविते स्थापिते** स्थापनाकुले यदि सर्वथा न प्रवेशः क्रियते **तदैते दोषा अप्रविशत्सु भवन्ति-'वीसरण संजयाणं' विस्मरणं संयत**विषयं तेषां श्रावकाणां भवति । अत्र च **विशुष्कगोण्या गवारामेण च** दृष्टान्तः-"[A]जहा एगस्स माहणस्स गोणी, सा कुडवदोहणी, ताहे सो चिंतेति-एसा गावी बहुअं खीरं देइ, मज्झ य मासेण पगरणं होहिति, तो अच्छउ तहिं चेव एक्कवारिआए दुज्झिहिति, एवं सो न दुहति, ताहे सा तेण कालेण विसुक्का तद्दिवसं बिंदुं पि न देइ । एवं संजया अणल्लिअंता तेसिं सड्ढाणं पम्हुट्ठा, ण चेव जाणंति किं संजया अत्थि न वा ? ते वि संजया जंमि दिवसे कज्जं जायं [१]तद्दिवसं गया, जाव नत्थि ताणि दव्वाणि, तम्हा तत्थ दोण्हं वा तिण्हं वा दिवसाणं अवस्स गंतव्वं । अहवा आरामदिट्ठंतो, एगो मालिओ चिंतेइ-अच्छंतु एयाणि पुप्फाणि अहं कोमुईए एक्कवारिआए उच्चेहामि जेण बहूणि होंति, ताहे सो आरामो उप्फुल्लो, कोमुईए न एक्कं पि फुल्लं जायं । एवं सावगकुलेसु एए चेव दोसा एक्कवारिआए पविसणे तम्हा पविसिअव्वं कहिंचि कहिंचि दिवसे त्ति **॥१३२॥**

इदानीं योऽसौ आचार्यादीनां वैयावृत्यकरः श्राद्धकुलेषु प्रविशति स एभिर्दोषै-र्विरहितो नियोक्तव्यः –

**४४२ अलसं घसिरं [२]सुविरं खमगं कोहमाणमायलोहिल्लं ।**
**कोऊहल पडिबद्धं वेयावच्चं न कारिज्जा ॥१३३॥ निभा०**

---

A यथा एकस्य ब्राह्मणस्य गोः, सा कुडवदोहनी, तदा स चिन्तयति- एषा गोर्बहुकं क्षीरं ददाति, मासमध्ये च सङ्खडिर्भविष्यतीति, ततस्तिष्ठन्तु तत्रैव एकवारं धोक्ष्यामीति, एवं स न दोग्धि, तदा सा तेन कालेन विशुष्का तद्दिवसं बिन्दुमपि न ददाति । एवं संयता नोपसर्पन्तः, तेषां श्रावकाणां विस्मरणम्, नैव जानन्ति किं संयताः सन्ति न वा ? तेऽपि संयता यस्मिन् दिवसे कार्यं जातं तद्दिवसे गताः, यावन्न सन्ति तानि द्रव्याणि, तस्मात्तत्र द्वयोर्वा त्रिषु वा दिवसेष्ववश्यं गन्तव्यम्, अथवा आरामदृष्टान्तः- एको माली चिन्तयति- तिष्ठन्त्वेतानि पुष्पाणि, अह कौमुद्यामेकवारेणोच्चिनोमि येन बहुनि भविष्यन्ति । तदा स आरामः पुष्परहितः, कौमुद्यां नैकमपि पुष्पं जातम् । एवं श्रावककुलेष्वेत एव दोषा एकवारायां प्रवेशने, तस्मात् प्रवेष्टव्यं कस्मिंश्चित् कस्मिंश्चिद् दिवस इति ।

१. तद्दिवसे दा० २. सुइरं ह०

**अलसं** गाहा । [A] **अलसो** आलसितो सो वेयावच्चं न कारेयव्वो, जदि कारवेइ असमाचारी, सो आलस्सेण ताव अच्छइ जाव फिडिओ देसकालो, ताहे पच्छा सड्ढयाणि जं किंचि देंति तेण आयरिआईणं विराहणा, अहवा सो अइप्पए वच्चइ, कम्मं निस्सारितं होउ त्ति, ताहे तत्थ अकाले वच्चंतस्स ते चेव दोसा, अहवा ताणि धम्मसड्ढियआणि उस्सक्कणदोसे अवसक्कणदोसे वा करिज्जा ठवियगदोसा वा, अहवा आयरियनिमित्तं पए वा उस्सूरे वा उवक्खडिज्जा, एते एवमाइया [1] अलसे दोसा। **घसिरो** बहुभक्खगो, सो वि न पट्ठवेयव्वो, सो पढमं चेव अप्पणो अट्ठाए हिंडइ पज्जत्तं, जाव सो अप्पणो पज्जत्तं हिंडइ ताव फिडिता वेला, अहवा तत्थेव पढमं वच्चइ, पच्छा तत्थ ण चेव वेला होइ, ते चेवोस्सक्कणादिआ दोसा, अहवा तत्थ सड्ढकुले [2] पभूयं गिण्हइ ताहे उग्गमदोसा न सुज्झंति । **सुविरो** ताव सुवइ जाव फिडिआ भिक्खावेला, अहवा पढमं तत्थ गंतुं अवेलाए पच्छा सुवइ, ते चेव दोसा । **खमओ** जदि अप्पणो हिंडइ ताहे आयरियादि परितावणा पावंति, अह खमओ पढमओ आयरिआणं गिण्हइ ततो अप्पणा परितावणादि पावइ । **कोहिल्लो** पुव्वलाभाओ फिडितो [3] कसातिओ संतो भणइ–अम्हे अण्णतो लभामो, तं पि तुज्झपच्चएण न गिण्हामो, अहवा थेवं लब्भइ तत्थ भंडइ, अहवा ऊणं पाणेण वा जेमणेण वा तत्थ वि रूसति । **माणिओ** जइ न अब्भुट्ठिज्जति तो पुणो वि न अतीति, को विसेसो सावगाणं ? **माइल्लो** भद्दगं भद्दगं अप्पसागारिअं भोच्चा पंतं आणेत्ति । **लोभिल्लो** जत्तिअं लभति

---

A अलस आलसितः स वैयावृत्यं न कारयितव्यः, यदि कारयति असमाचारी, स आलस्येन तावत्तिष्ठति यावत् स्फिटितो देशकालः, तदा पश्चात् श्राद्धिका यत्किञ्चिद् ददति तेनाऽऽचार्यादीनां विराधना, अथवा सोऽतिप्रगे व्रजति, कर्म निस्सारितं भवत्विति, तदा तत्राकाले व्रजतस्त एव दोषाः । अथवा तानि धर्मश्राद्धिका उत्स्वष्कणदोषा अवस्वष्कणदोषा वा कुर्यात् स्थापितकदोषा वा, अथवा आचार्यनिमित्तं प्रगे वोत्सूरे वा उपस्कुर्यात्, एत एवमादिका अलसे दोषाः । ग्रसिता बहुभक्षकः, सोऽपि न प्रस्थापयितव्यः, स प्रथममेवात्मार्थं हिण्डति पर्याप्तम्, यावत् स आत्मनः पर्याप्तं हिण्डति तावत् स्फिटिता वेला, अथवा तत्रैव प्रथमं व्रजति, पश्चात् तत्र नैव वेला भवति । त एव उत्स्वष्कणादिका दोषाः, अथवा तत्र श्राद्धकुले प्रभूतं गृह्णाति तदोद्गमदोषा न शुध्यन्ति । स्वप्ता तावत् स्वपिति यावत् स्फिटिता भिक्षावेला, अथवा तत्र प्रथमं गन्तुमवेलया पश्चात् स्वपिति त एव दोषाः । क्षपको यद्यात्मनो हिण्डति तदाऽऽचार्या परितापना प्राप्नुवन्ति, अथ क्षपकः प्रथमत आचार्यादीनां गृह्णाति तत आत्मना परितापनादि प्राप्नोति । क्रोधी पूर्वलाभात् स्फिटितः कषायितः सन् भणति- वयमन्यतो लभामहे, तदपि तवप्रत्ययेन न गृह्णीमः, अथवा स्तोकं लभ्यते तत्र भत्स्यंति, अथवा न्यूनं पानेन वा जेमनेन वा तत्रापि रूष्यति । मानी यदि नाभ्युत्तिष्ठति ततः पुनरपि न गच्छति, को विशेषः श्रावकानामिति । मायावी भद्रकं भद्रकमल्पसागारिकं भुक्त्वा प्रान्तमानयति । लोभी यावल्लभते तं सर्वं गृह्णाति, एषणां वा लोभेन प्रेरयेत् ।

१. आलसे क० २. बहुयं क० ३. सकोहिओ आ.

तं सव्वं गिण्हति, एसणं वा लोभेणं पेल्लिज्जा । **कोऊहलिल्लो** जत्थ नडादि पेच्छणा तत्थ पेच्छंतो अच्छइ । **पडिबद्धो** जो सुत्तत्थेसु अभिउत्तो सो ताव अच्छइ जाव कालवेला जाया, एए दोसा जम्हा तम्हा एरिसं साहुं **वेयावच्चं न कारिज्जा**" ॥१३३॥

[यतश्चैवमतः प्रवेष्टव्यं स्थापनाकुलेषु गीतार्थसङ्घाटकेन, स च कीदृग्दोषैर्विरहितः ? इत्यत आह –

**अलसं घसिरं सुविरं, खमगं कोह-माण-माय-लोहिल्लं ।**
**कोऊहल पडिबद्धं, वेयावच्चं न कारिज्जा ॥१५९२॥**

'अलसं' निरुद्यमम्, 'ग्रसितारं' बहुभक्षिणम्, 'स्वप्तारं' स्वपनशीलम्, "शीलाद्यर्थस्येरः" (सिद्ध० ८-२-१४५) इति प्राकृतलक्षणबलादुभयत्रापि तृन्प्रत्ययस्येरादेशः, क्षपकं प्रतीतम्, "कोह-माण-माय-लोहिल्लं" ति क्रोधवन्तं मानवन्तं मायावन्तं लोभवन्तम्, सर्वत्रापि भूम्नि मतुप्रत्ययः, यथा गोमानिति, "कोऊहल" त्ति मत्वर्थीयप्रत्ययलोपात् कुतूहलिनम्, 'प्रतिबद्धं' सूत्रार्थग्रहणसक्तम् । एतान् वैयावृत्यमाचार्यो न कारयेदिति समासार्थः । [बृ.क.-१५९२]]

**४४३ ता अच्छइ जा फिडिओ सइकालो अलससोविरे दोसा ।**
**गुरुमाई तेण विणा विराहणुस्सक्क ठवणाई ॥७१॥ प्र०**

[तत्रालस-स्वपनशीलयोर्नियोजने दोषानाह –

**ता अच्छइ जा फिडिओ सइकालो अलससोविरे दोसा ।**
**गुरुमाई तेण विणा विराहणुस्सक्क-ठवणादी ॥१५९४॥**

अलसः स्वपनशीलश्च तावदुपविष्टः शयानो वा आस्ते यावत् सन्-विद्यमानः कालः सत्कालो भिक्षायाः 'स्फिटितः' अतिक्रान्तो भवति । यद्वा तावलस-निद्रालू चिन्तयेताम्-'समापतितं तावदिदमस्माकमवश्यकरणीयं कर्म, अत एतदपि निर्वाहितं भवतु' इति कृत्वा अप्राप्ते एव भिक्षाकाले पर्यटेताम्, ततो यद्वा तद्वा भक्त-पानं लभेते, न प्रायोग्यम्, 'तेन' प्रायोग्येण विना या 'गुर्वादीनाम्' आचार्य-बाल-वृद्ध-ग्लानादीनां विराधना तन्निष्पन्नं प्रायश्चित्तम् । यद्वाऽतिक्रान्तायां वेलायामायान्तं वैयावृत्यकरं मत्वा प्रायोग्यस्योत्ष्वष्करणं श्राद्धकानि कुर्युः, उत्सूरे तद् विद्ध्युरिति भावः । यद्वा तानि तदुपस्कृतं प्रायोग्यभक्तं स्थापयेयुः, ततः स्थापनादोषः । आदिशब्दात् 'साधूनामसंविभक्तं भक्तं कथं स्वमुखे प्रक्षिप्यते ?' इति बुद्ध्या तेषामभुञ्जानानामन्तरायमित्यादयो दोषाः । [बृ.क.-१५९४]]

---

(पीडयेत्) कुतूहली यत्र नाट्यादिप्रेक्षणा तत्र प्रेक्षमानो तिष्ठति । प्रतिबद्धो यः सूत्रार्थेष्वभियुक्तः स तावत्तिष्ठति यावत् कालवेला जाता, यस्मादेते दोषाः, तस्मादिदृशं साधुं वैयावृत्यं न कारयेत् ।

**४४४ अपत्ते य अलंभो हाणी ओसक्कणाइ अइभद्दे ।**
**अणहिंडितो य चिरं न लहइ जंकिंचि वाऽऽणेइ य ॥७२॥ प्र०**

**[ अप्पत्ते व अलंभो, हाणी ओसक्कणा य अइभद्दे ।**
**अणहिंडंतो य चिरं, न लहइ जं किंचि वाऽऽणेइ ॥१५९५॥**

अथ 'यदेतत् कर्मास्माकं मध्ये समापतितं तद् निर्वाहितं भवतु' इति कृत्वा अप्राप्ते काले भिक्षामटति तदा 'अलाभः' न किमपि प्राप्यते इति भावः । ततश्चाचार्यादीनां 'हानिः' असंस्तरणं भवति । यस्तु 'अतिभद्रकः' अतीवधर्मश्रद्धावान् गृहपतिः सः 'अवष्वष्कणं' विवक्षितकालादर्वाग् भक्तनिष्पादनं कुर्यात् । यद्वा असावलसत्वाद् निद्रालुत्वाद्वा चिरमहिण्डमान सन् न किमपि लभते, 'यत्किञ्चिद्वा' पर्युषितं वल्ल-चणकादिकं वा आनयति, तेन भुक्तेनाऽपथ्यतया गुर्वादीनां ग्लानत्वं भवति, ततः परिताप-महादुःखादिका ग्लानारोपणा । [बृ.क.-१५९५]]

**४४५ गिण्हामि अप्पणो ता पज्जत्तं तो गुरूण पच्छा उ।**
**धित्तूण तेसि पच्छा सीअलओसक्कमाईओ ॥७३॥ प्र०**

[अथ "घसिर" त्ति पदं भावयति –

**गिण्हामि अप्पणो ता पज्जत्तं तो गुरूण घिच्छामि ।**
**घेत्तुं च तेसि घिच्छं सीयल-ओसक्क-ओमाई ॥१५९६॥**

यो महोदरः स वैयावृत्त्ये नियुक्तो भिक्षामटन् चिन्तयति-गृह्णामि तावदात्मनो योग्यं पर्याप्तं ततो गुरूणां हेतोर्ग्रहीष्यामि । यद्वा तेषां गुरूणां योग्यं गृहीत्वा तत आत्मनोऽर्थाय ग्रहीष्ये । इत्थं विचिन्त्य यदि प्रथमं गुरूणां योग्यं गृहीत्वा पश्चादात्मार्थं गृह्णाति ततो यावता कालेनात्मनः पर्याप्तं पूर्यते तावता तत् पूर्वं गृहीतं शीतलं स्यात्, तच्च गुरूणामकारकम्, ततः सैव ग्लानारोपणा । अथवा स्थापनाकुलेषु प्रथमतः प्रवेशे तत्राद्यापि वेलाया अप्राप्तत्वादवष्वष्कणादयो दोषाः । अथ प्रथममात्महेतोर्गृह्णाति ततो यावता तत् पर्याप्तं भवति तावता स्थापनाकुलेषु वेलातिक्रमो भवेत् । अथ वेलातिक्रमभयाद् देशकाल एव तेषु प्रविशति तत आत्मनोऽवमं भवेत्, उदरपूरणं न भवेदिति भावः । ततश्चावमाहारतया तस्यैवानागाढा-ऽऽगाढपरितापादयो दोषाः । [बृ.क.-१५९६]]

**४४६ परिताविज्जइ खवगो अह गिण्हइ अप्पणो इअरहाणी ।**
**अविदिण्णे कोहिल्लो रूसइ किं वा तुमं देसी ? ॥७४॥ प्र०**

[अथ क्षपक-क्रोधवतोर्दोषानाह –

**परिताविज्जइ खमओ अह गिण्हइ अप्पणो इयरहाणी ।**
**अविदिन्ने कोहिल्लो रूसइ किं वा तुमं देसि ॥१५९७॥**

यदि क्षपको गुरूणां हेतोः प्रायोग्यं गृह्णाति नात्मनस्ततः स एव परिताप्यते, अथात्मनो

गृह्णाति तत इतरेषाम्-आचार्याणां हानिः-परितापना । यस्तु क्रोधवान् सः 'अवितीर्णे' अदत्ते सति रुष्यति । रुष्टश्चागारिणं भणति-यदि भवान् न ददाति तर्हि मा दात् किं भवदीयं गृहं दृष्ट्वाऽस्माभिः प्रव्रज्या प्रतिपन्ना ? इति, किं वा त्वं ददासि येन 'एवमहं ददामि' इति गर्वितो भवसि ? इत्यादिभिर्दुर्वचनैः श्राद्धं विपरिणमयति । [बृ.क.-१५९७]]

**४४७ अब्भुट्ठाणमदिण्णे थद्धो न उ गच्छई पुणो जं च ।**
**माई भद्दगभोई पंत्तेण व अप्पणो छाए ॥७५॥ प्र०**

[मानि-मायिनोर्दोषानाह –

**ऊणाणुट्ठमदिन्ने थद्धो न य गच्छए पुणो जं च ।**
**माई भद्दगभोई पंतेण व अप्पणो छाए ॥१५९८॥**

यः स्तब्धः सः 'ऊने' तुच्छे दत्ते "अणुट्ठ" त्ति अभ्युत्थाने वा अकृते "अदिन्न" त्ति सर्वथैव वा अदत्ते सति 'पुनः' भूयस्तदीयं गृहं न गच्छति, भणति च-श्रावकाणामितरेषां च को विशेषः ? यदि द्वितयेऽपि साधूनामभ्युत्थानादिविनयप्रक्रियामन्तरेण भिक्षां प्रयच्छन्ति ततो नाहममुष्य गृहं भूयः प्रविशामीति । ततः "जं च" त्ति तद्गृहे प्रवेशं विना प्रायोग्यस्यालाभे यत् किञ्चिदाचार्यादीनां परितापनादिकं भवति तन्निष्पन्नं प्रायश्चित्तम् । यस्तु मायी सः 'भद्रकभोजी' प्रायोग्यमुपाश्रयाद् बहिर्भुक्त्वा प्रान्तमानयतीति भावः, यद्वा 'प्रान्तेन' वल्ल-चणकादिना आत्मनो योग्यं स्निग्ध-मधुरद्रव्यं छादयति, छादयित्वा च गुरूणां दर्शयति । [बृ.क.-१५९८]]

**४४८ ओहासइ खीराई दिज्जंतं वा न वारई लुद्धो ।**
**जे य गवेसणदोसा एगस्स उ ते वि लुद्धस्स ॥७६॥ प्र०**

[लुब्धस्य दोषानाह –

**ओभासइ खीराई दिज्जंते वा न वारई लुद्धो ।**
**जेऽणेगविसणदोसा एगस्स वि ते उ लुद्धस्स ॥१५९९॥**

यो लुब्धः स स्थापनाकुलेषु क्षीरादीन्यवभाषते । यद्वा श्रद्धातिरेकतस्तैर्दीयमानानि स्निग्धमधुराणि न वारयति । ततश्च येऽनेकेषु सङ्घाटकेषु स्थापनाकुलं प्रविशत्सु चमढणादयो दोषा वर्णितास्ते सर्वेऽप्येकस्यापि लुब्धस्य प्रविशतो द्रष्टव्याः । [बृ.क.-१५९९]]

**४४९ नडमाई पिच्छंतो ता अच्छइ जाव फिट्टई वेला ।**
**सुत्तत्थे पडिबद्धो ओसक्कणुसक्कमाईया ॥७७॥ प्र०**

[कुतूहलिनः प्रतिबद्धस्य च दोषानाह –

**नडमाई पिच्छंतो ता अच्छइ जाव फिट्टई वेला ।**
**सुत्तत्थे पडिबद्धो ओसक्कऽहिसक्कमाईया ॥१६००॥**

यः कुतूहली स नटादीन् प्रेक्षमाणस्तावदास्ते यावद् वेला स्फिटति । यस्तु सूत्रेऽर्थे वा 'प्रतिबद्धः' आसक्तः स गुरूणां धर्मकथादिव्यग्रतया यदैवान्तरं लभते तदैवाप्राप्तकालेऽपि भिक्षार्थमवतरति, वेलातिक्रमं वा कृत्वा कालवेलादाववतरति, ततोऽवष्वष्कणाऽभिष्वष्कणादयो दोषाः । [बृ.क.-१६००]]

कीदृशं पुनः कारयेद्वैयावृत्त्यम् ? इत्यत आह –

४५० **एयद्दोसविमुक्कं कडजोगिं नायसीलमायारं ।**
**गुरुभत्तिमं विणीयं वेयावच्चं तु कारिज्जा ॥१३४॥ निभा०**

**एतद्दोस** गाहा । **एभिरुक्तदोषैर्विमुक्तम्**, किं विशिष्टम् ? इत्यत आह-**कडजोगिं** ति कृतो योगो घटना ज्ञानदर्शनचारित्रैः सह येन स **कृतयोगी** गीतार्थ इत्यर्थः । तम्, पुनरप्यसावेव विशेष्यते-**ज्ञातं** [१]**शीलमाचारश्च** यस्य तं **वैयावृत्त्यं कारयेत्** । **गुरौ भक्तिः**-[१००]भावप्रतिबन्धः,**विनीतो** बाह्योपचारेण ॥१३४॥

४५१ **साहंति य पियधम्मा एसणदोसे अभिग्गहविसेसे ।**
**एवं तु विहिग्गहणे दव्वं वड्ढंति [२]गीयत्था ॥१३५॥ निभा०**

**साहंति** गाहा । ते चेव वैयावृत्त्यकराः श्राद्धकुलेषु प्रविष्टाः सन्तः कथयन्ति **एषणादोषान्** शङ्कितादीन् **अभिग्रहविशेषांश्च** साधुसम्बन्धिनः, कीदृशास्ते वैयावृत्त्यकराः ? प्रिय इष्टो धर्मो येषां ते **प्रियधर्माणः**, **एवमुक्तेन** प्रकारेण **विधिग्रहणे द्रव्यं** घृतादि वृद्धिं नयन्ति अव्यवच्छित्तिलाभेन, के ? **गीतार्थाः** ॥१३५॥

तैश्च गीतार्थैर्भिक्षां गृह्णद्भिः श्राद्धकुलेष्विदं ज्ञातव्यम् –

४५२ **दव्वपमाणं गणणा खारिअ फोडिअ तहेव अद्धा य ।**
**संविग्ग एगठाणे अणेगसाहूसु पन्नरस ॥१३६॥ निभा०**

**दव्वपमाण** गाहा । **द्रव्यं** गोधूमादि तद्विज्ञेयं कियत्सूपकारशालायां प्रविशति दिने दिने ततश्च तदनुरूपं गृह्णाति । **गणण** त्ति एतावन्मात्राणि घृतगुडादीनि प्रविशन्त्यस्मिनित्येतावन्मात्रं च ग्राह्यम् । **खारिअ** त्ति सलवणानि [३]कारितानि

---

१००. भावप्रतिबन्धः भावेन प्रीतिः, इत्यर्थः । संटी.

१. शीलं सामाचाराश्च क० २. खेयन्ना हे० ३. कानि व्य० दा.

व्यञ्जनानि लवण[१०१]करीरादीनि कियन्ति सन्ति ? इति, ततश्च ज्ञात्वा यथाऽनुरूपाणि गृह्णन्ति । "[A]**फोडिअ** त्ति वाइंगणाणि मत्थाफोडिआणि कित्तिआणि घरे सं[१]ज्जिज्जंति नाऊण जहाणुरूवाणि घेप्पंति ।" **तथा अद्धा य** त्ति काल उच्यते, किमत्र प्रहरे वेलाऽऽहोस्वित्प्रहरद्वय एतद्विज्ञातव्यम्, **संविग्ग एगठाणे** त्ति **संविग्नो** मोक्षाभिलाषी, एगट्ठाणे त्ति **एकः** सङ्घाटकः प्रविशति, **अणेगसाहूसु** त्ति **अनेकेषु साधुषु** प्रविशत्सु **पण्णरस** त्ति **पञ्चदश** दोषा नियमाद्भवन्ति "**आहाकम्मुद्देसिअ**" (**पिण्डनि.९२-९३**) इत्येवमादयः । [B]**अज्झोयरओ मीसजायं च एक्को भेओ** ॥१३६॥

[२]यस्मादनेकेषु साधुषु दोषास्तस्मात् –

**४५३ संघाडेगो ठवणाकुलेसु सेसेसु बालवुड्ढाई ।**
**तरुणा बाहिरगामे पुच्छा दिट्ठंतऽगारीए ॥१३७॥ निभा०**

**संघाडेगो** गाहा । **सङ्घाटक एकः स्थापनाकुलेषु** प्रविशति, **शेषेषु** कुलेषु **बालवृद्धाश्च** प्रविशन्ति, **आदिशब्दात्क्षपकाश्च** । **तरुणाः** शक्तिमन्तो **बहिर्ग्रामे** हिण्डन्ति। **पुच्छ** त्ति अत्र चोदकः **पृच्छति**-पूर्वमेव क्षेत्रं प्रत्युपेक्षितं यत्र सबालवृद्धस्य गच्छस्य भक्तपानं पर्याप्त्या भवति तत्रैव स्थीयते तत्कस्मात्तरुणा बहिर्ग्रामे हिण्डन्ति ? आचार्य आह–**दिट्ठंतऽगारीए-अगार्या दृष्टान्तो** ज्ञातव्यः, तं च तृतीयगाथायां भाष्यकारो वक्ष्यति ॥१३७॥

तथेयमपरा द्वारगाथा –

**४५४ पुच्छा गिहिणो चिंता दिट्ठंतो तत्थ खुज्जबोरीए ।**
**आपुच्छिऊण गमणं दोसा य इमे [३]अणापुच्छे ॥२४०॥ नि० । दारगाहा।**

**पुच्छा गिहिणो** इत्यादि । **पुच्छ** त्ति चोदकः **पृच्छति**, ननु च तस्या अगार्या घृतादिसङ्ग्रहः कर्त्तुं युक्तो भर्तृप्रदत्त[१०२]तवणिमध्याद् येन प्राघूर्णकादेः सुखेनैव तेनोपचारः क्रियते, साधूनां च पुनः स्थापनाकुलसंरक्षणे न किञ्चित्प्रयोजनम्, यतस्तत्र यावन्मात्रस्याहारस्य पाकः क्रियते स सर्वः प्रतिदिवसमुपयुज्यते, न तु तानि कुलानि सञ्चयित्वा साधुप्राघूर्णकागमने सर्वमेकमुखेनैव प्रयच्छन्ति, एवं चोदकेनोक्ते आचार्य

---

१०१. करीरः-वृक्षविशेष इति । संटी. १०२. तवणि-खाद्यसामग्रीति । संटी.

A फोडिअ त्ति वृत्ताकानि मस्तकस्फोटितानि कृतानि गृहे सज्जितानि ज्ञात्वा यथारूपाणि गृह्यन्ते ।

B अध्यवपूरको मिश्रजातश्च एको भेदः ।

१. सज्जजति सोऊण क० २. यस्मादनेके दोषास्तस्मात् क० ३. अणापुच्छा ह० हे०

आह-'**गिहिणो चिंता**' **गृहिणश्चिन्ता** भवति, यदुत एते साधवः प्राघूर्णकाद्यागमन आगच्छन्ति ततश्चैतेभ्यो यत्नेन देयमिति, एवंविधामादरपूर्विकां चिन्तां करोति । यच्चोक्तम्-तरुणा बहिर्ग्रामे किमिति हिण्डन्ति ? **दिट्ठंतो तत्थ खुज्जबोरीए** स च **दृष्टान्तो** वक्ष्यमाणः । **आपुच्छिऊण गमणं** ति तत्र च बहिर्ग्रामादा आचार्य**मापृच्छ्य गन्तव्यम्**, यतः **दोसा य इमे अणापुच्छे** त्ति **दोषा अनापृच्छायामेते च** वक्ष्यमाणलक्षणाः ॥२४०॥

इदानीं भाष्यकारः प्रतिपदमेतानि द्वाराणि व्याख्यानयति, तत्र च यदुक्तं दृष्टान्तोऽगार्याः, स उच्यते –

"[A]एगो वाणिओ परिमिअं भत्तं अप्पणो महिलाए देइ, सा य ततो नेहादि दिणे दिणे थोवं थोवं [१]अवणेइ, किं निमित्तं ? जदा एयस्स अवेलाए मित्तो वा सही वा एस्सइ तदा किं सक्का आवणाउ आणेउं ? एवं सव्वतो संगहं करोति, अण्णया तस्स अवेलाए पाहुणगो आगतो, ताहे सो भणइ–किं कीरउ ? [२]रत्ती य वट्टइ, णीसंचाराओ रत्थाओ, ताहे ताए भणिअं-मा [३]आउलयो होहि, ताहे तस्स पाहुणगस्स उवक्खडिअं, [४]गतो तग्गुणसहस्सेहिं वड्ढंतो, भत्तारो वि से परितुट्ठो । एवं आयरिआ वि ठवणकुलाणि ठावेंति जेण अवेलागयस्स पाहुणयस्स तेहिंतो आणेउं दिज्जइ, तेण तरुणा संतेसु वि कुलेसु बाहिरगामे हिंडंति त्ति। इदाणिं एस चेव विवरीओ भण्णइ, अण्णो अण्णाए अगारीए परिमिअं देइ, सा य तओ मज्झाओ थोवं थोवं न गेण्हइ, तओ पाहुणए आगए विसूरति ।"

अमुमेवार्थं गाथाद्वयेनोपसंहरन्नाह –

---

A एको वणिक् परिमितं भक्तमात्मने महिलायै ददाति, सा च ततो स्नेहादि दिने दिने स्तोकं स्तोकमपनयति, किं निमित्तम् ? यदैतस्यावेलायां मित्रं वा सखी वा एष्यति तदा किं शक्यमापणादानयितुम् ? एवं सर्वतः सङ्ग्रहं करोति, अन्यदा तस्यावेलायां प्राघूर्णक आगतः, तदा स भणति-किं क्रियते ? रात्रिर्वर्तते निस्सञ्चारा रथ्या । तदा तया भणितम्-मा आकुलो भव, तदा तस्य प्राघूर्णकस्योपस्कृतम्, गतस्तद्गुणसहस्रैर्वर्धयन्, भर्ताऽपि तस्य परितुष्टः । एवमाचार्या अपि स्थापनाकुलानि स्थापयन्ति, येनावेलाऽऽगतस्य प्राघूर्णकस्य तेभ्यरानीय दीयते, तेन तरुणाः सत्स्वपि कुलेषु बहिर्ग्रामे हिण्डन्तीति । इदानीमेष एव विपरीतो भण्यते । अन्योऽन्यायै अगारीयै परिमितं ददाति, सा च ततो मध्यात् स्तोकं स्तोकं न गृह्णाति, ततः प्राघूर्णक आगते खिन्दति ।

१. थेवथेवं क० २. रत्ती वहइ । ख. रयणी वट्टइ । दा. ३. आतुरो दा० आउरो ख. ४. भुंजिउं च गतो दा.

४५५ **परिमियभत्तपदाणे नेहादवहरइ थोवं[1] थोवं तु ।**
**पाहुण वियाल आगम विसन्न आसासणा दाणं ॥१३८॥ निभा०**

४५६ **एवं पीइविवड्ढी विवरीयण्णेण होइ दिट्ठंतो ।**
**लोउत्तरे विसेसो असंचया जेण समणा उ ॥१३९॥ निभा०**

**परिमित** गाहा । **एवं** गाहा । **परिमितभक्तप्रदाने** सति साऽगारी **स्नेहादेर्घृतादेरपहरति स्तोकं स्तोक**मिति । पुनश्च **प्राघूर्णकस्य विकाल आगमने विषण्णो**ऽगारः, पुनश्च स्त्रियाऽऽ**श्वासितः, दाणं** ति तया स्त्रिया भक्तपानं दत्तं प्राघूर्णकायेति ।

**एवं** तयोर्दम्पत्योः **प्रीतिवृद्धिः** सञ्जाता, **विपरीतश्चान्येन** प्रकारेण **भवति दृष्टान्तः**। एवं यदि तावद्गृहस्था अपि सञ्चयपरा भवन्त्यनागतमेव चिन्तयन्ति, साधुना पुनः [2]कुक्षिशम्बलेन सुतरामनागतमेव चिन्तनीयम्, यदि परं **लोकोत्तरे**ऽयं **विशेषः**, यदुत **निःसञ्चयाः** सुतरां चिन्तामाचार्या वहन्तीति । ''पुच्छा दिट्ठंत-ऽगारीए''त्ति भणिअं ॥१३८-१३९॥

इदानीं 'पुच्छा गिहिणो चिंत'त्ति (नि.२४०) गाथायाः प्रथमावयवं व्याख्यानयन्नाह—

४५७ **जणलावो परगामे हिंडन्ताऽऽ[3]णेंति वसहि इह गामे ।**
**दिज्जह बालाईणं कारणजाए य सुलभं तु ॥१४०॥ निभा०**

**जणलावो** गाहा । यच्चोदकेन पृष्टमासीत्तत्रेदमुत्तरम्—जनानामालापो **जनालापो** लोक एवं ब्रवीति-यदुत **परगामे हिंडन्ताऽऽणेंति, परग्रामे हिण्डयित्वाऽऽनयन्ति**- अत्र भुञ्जते । **वसहि इह गामे** त्ति **वसतिः** केवलमस्मिन् **ग्राम** एतेषां साधूनाम्, ततश्च **दिज्जह बालाईणं** ति **बालादीनां दद्ध्वम्, आदिशब्दात्प्राघूर्णकादयो** गृह्यन्ते, एवंविधां चिन्तां गृहस्थः करोति । ततश्च **कारणजाते य सुलभं तु** त्ति एवंविधायां चिन्तायां प्राघूर्णकादि**कारण** उत्पन्ने घृतादि **सुलभं** भवतीति ॥१४०॥

आह—किं पुनः कारणं प्राघूर्णकानां दीयते ? तथा चायमपरो गुणः —

४५८ **पाहुणविसेसदाणे निज्जर कित्ती य इहर विवरीयं ।**
**पुव्विं चमढणसिग्गा न देंति संतं पि कज्जेसु ॥१४१॥ निभा०**

---

१. थोवथोवं ह. हे. २. कुक्षिशम्बलानां सु० क० ३. हिंडन्ताऽऽणंतु-हे० ह०

**पाहुण** गाहा । **प्राघूर्णकाय विशेषदाने** सति **निर्जरा** कर्मक्षयो भवति, इहलोके **कीर्तिश्च** भवति । **इहर विवरीयं** ति यदि प्राघूर्णकविशेषदानं न क्रियते ततश्च निर्जराकीर्त्ती न भवतः, एवं च प्राघूर्णकविशेषदानं न भवति, यस्मात् **पुव्विं** पूर्वं [103]**चमढणसिग्गा** ततश्च **न देंति संतं पि कज्जेसु** ॥१४१॥

गिहिणो चिंत'त्ति वक्खाणिअं, इदानीं कुब्जबदरीदृष्टान्तं (नि.२४०) व्याख्यानयन्नाह–

"[A]एगो गामो, तत्थ खुज्जबोरी, सा य गामणिज्जासेण कडुया, तत्थ चेडरूवा भणंति-वच्चामो बोराणि खामो, तत्थ खुज्जबोरीविलग्गाइं ताणि डिंभरूवाणि तूवरतुवराणि खायंति, न य पज्जत्तीए होइ, अण्णाणि भणंति, किं एएहिं, ताहे अडविं गता, तत्थ बोराणि धणिए खाइऊण बहूणि [1]पोट्टलगाइयं बंधिऊण आगया सिग्घतरं जाव इमे झाडेंता चेव अच्छंति, न तित्ती जाया, ताहे तेसिं अन्नेसिं च दिंति । एवं चेव इमं खेत्तं चमढिअं, एत्थ अंबिलकूरो, तं घेतूण आगच्छन्ति दिवसं च हिंडियव्वं, एवं किलेसो [2]अप्पगं च भत्तं होति, जहा ते अणलसचेडा तहा आयपरहिआवहा तरुणा, ते बाहिरगामे भिक्खायरिअं जंति ताहे ते च अचमढितगामाओ खीरं दहिमाइआइं घित्तूण लहुं आगया उग्गमदोसाई जढा होंति, बालवुड्ढा य अणुकंपिया होंति, वीरियायारो य अणुचिन्नो भवति, तम्हा गंतव्वं बाहिरगामे हिंडएहिं तरुणएहिं ।"

इदानीममुमेवार्थं गाथाभिरुपसंहरन्नाह –

**४५९ गामब्भासे बयरी नीसंदकडुप्फला य खुज्जा य ।**
**पक्कामालसडिंभा खायंतियरे गया दूरं ॥१४२॥ निभा०**

---

१०३. चमढणसिग्गा – चमढनया दिने दिने प्रविशद्भिः साधुभिः सिग्गानि परिश्रान्तानि स्थापनाकुलानीति । (बृ.क. ५२९६)

A एको ग्रामस्तत्र कुब्जबदरी, सा च ग्रामनिर्यासेन कटुका, तत्र चेडरूपा भणन्ति- व्रजामः, बदर्यः खादामः, तत्र कुब्जबदरीविलग्नानि तानि डिम्भरूपाणि तुवरतुवराणि खादन्ति, न च पर्याप्त्यै भवति, अन्यानि भणन्ति, किमेतैः, तदाऽटवीं गताः, तत्र बदराणि बहुनि खादित्वा बहुनि पोट्टलकानि बद्धयित्वाऽऽगताः शीघ्रतरं यावदिमानि वृक्षान्त एव तिष्ठन्ति, न तृप्तिर्जाता, तदा तेषामन्येषाञ्च ददति । एवमेवेमं क्षेत्रं कदर्थितम् । अत्राऽऽम्लकूरः,तं गृहीत्वाऽऽगच्छन्ति, दिवसं च हिण्डितव्यम्, एवं क्लेश आत्मनश्च भक्तं भवति, यथा तेऽनलसचेटास्तथाऽऽत्मपरहितावहा तरुणाः, ते बाह्यग्रामे भिक्षाचर्यां यान्ति, तदा तेऽकदर्थितग्रामतः क्षीरं दध्यादिनि गृहीत्वा शीघ्रमागताः, उद्गमदोषास्त्यक्ता भवन्ति,बालवृद्धाश्चानुकम्पिता भवन्ति, वीर्याचारश्चानुचीर्णो भवति, तस्माद् गन्तव्यं बाह्यग्रामे हिण्डकैस्तरुणैः ॥

१. पोट्टलगे भ. २. अप्पगणुभ० क०

**४६० सिग्घयरं आगमणं तेसिऽण्णेसिं च देंति सयमेव ।**
**खायंती एमेव उ आयपरहियावहा तरुणा ॥१४३॥ निभा०**

**४६१ खीरदहिमाइयाणं लंभो सिग्घतरगं च आगमणं ।**
**पइरिक्क उग्गमाई विजढा अणुकंपिया इयरे ॥१४४॥ निभा०**

**गाम** गाहा । **सिग्घयरं** गाहा । **खीर** गाहा । **गामब्भासे बदरी** सा च आम**निस्यन्दकटुकफला कुब्जा च,** सा च फलिता, तत्र च फलानि **पक्काम** त्ति पक्कानि चामानि च पक्वामान्यर्द्धपक्वानीत्यर्थः, **ये**[१]**ऽलसा डिम्भास्ते** भक्षयन्ति । **इयरे** त्ति अनलसा उत्साहवन्तो डिम्भरूपास्ते **दूरं गताः** । तेषां च **शीघ्रतरमागमनं** सञ्जातम्, ततश्च बाह्यत आगत्य **तेसिं अण्णेसिं च देंति । तेषामलसडि**[२]**म्भानामन्येषां च ददति स्वयमेव** च भक्षयन्ति, **एवमेव** तरुणा अप्यात्मपरयोर्हितमावहन्तीति **आत्मपरहितावहास्तरुणाः**, एवं तरुणानां [३]**क्षीरदध्यादीनां लम्भः, शीघ्रतरं चागमनम्, पइरिक्क** त्ति प्रचुरं लभन्ते, **उद्गमादयश्च** दोषाः **परित्यक्ता** भवन्ति, तथा**ऽनुकम्पिताश्चेतरे** बालादयो भवन्तीति **॥१४२-१४३-१४४॥**

उक्तः कुब्जबदरीदृष्टान्तः, इदानीं 'आपुच्छिऊण गमणं'ति (नि.२४०) व्याख्यानयन्नाह —

**४६२ आपुच्छिअ उग्गाहिअ अण्णं गामं वयं तु वच्चामो ।**
**अण्णं च अपज्जत्ते होंति अ**[४]**पुच्छे इमे दोसा ॥१४५॥ निभा०**

**आपुच्छिय** गाहा । **आपृच्छ्य** गुरु**मुद्ग्राहित**पात्रका [५]एवं भणन्ति, यदुत- **अन्यं ग्रामं वयं व्रजामः, अण्णं च अपज्जत्ते** त्ति यदि तस्मिन् ग्रामे **पर्याप्त्या न** भविष्यति ततस्तस्मादपि ग्रामादन्यं **ग्रामं** गमिष्यामः । आपुच्छिऊण गमणं ति भणियं । इदानीं **दोसा य इमे अणापुच्छे** त्ति, **दोषा एतेऽनापृच्छ्य** गतानां **भवन्ति ॥१४५॥**

के च ते दोषाः ? तान् व्याख्यानयन्नाह —

**४६३ तेणाएसगिलाणे सावय इत्थी नपुंसमुच्छा य ।**
**आयरियबालवुड्ढा सेहा खमगा य परिचत्ता ॥१४६॥ निभा०**

---

१. ऽलसप्रायास्ते दा. ल. २. शिशू. दा. ३. दधिक्षीरादीनां लाभः शी० क० ४. अपुच्छो ह० हे० अपुच्छा य. ५. एव भ० क०

**तेणा** गाहा । कदाचिदन्यग्रामान्तराले व्रजतां **स्तेना** भवन्ति, ततश्च तद्ग्रहण-उपधिशरीरापहरणं भवति, आचार्योऽप्यकथिते न जानाति कया दिशा गता इति, ततश्च दुःखेनान्वेषणं करोति । अथवा **आएस** प्राघूर्णक आयातः, ते चानापृच्छ्य गताः, "[A]ते य आयरिया एवं भणंता जहा पाहुणयस्स वट्टावेह, अहवा **गिलाणस्स** पाओग्गं गिण्हह, अहवा अंतराले **सावयाणि** अत्थि तेहिं भक्खिया होंति, अहवा तत्थ गामे **इत्थि**दोसा **नपुंसग**दोसा वा, अहवा **मुच्छाए** पडेज्जा ताहे न नज्जइ, अपुच्छिए कयराए दिसाए गय त्ति न नज्जति" । ततश्चानापृच्छ्य [1]गताना**माचार्य-बालवृद्धसेहक्षपकाः परित्यक्ता** भवन्ति ॥१४६॥

यत आचार्यादीनां प्रायोग्यमन्नं नानयन्त्यनुक्तत्वात्, न च प्रच्छन्नं कृतं येनोच्यन्ते, यत एते दोषाः परित्यागजनितास्तस्मादेतद्दोषभयात् –

**४६४ आयरिए आपुच्छा तस्संदिट्ठे व तंमि उ असंते ।**
**चेइयगिलाणकज्जाइएसु गुरुणो उ निग्गमणं ॥२४१॥ नि०**

**आयरिए** गाहा । तस्मा**दाचार्यमापृच्छ्य** गन्तव्यम् । अथाचार्यः कथञ्चिन्न भवति, ततः [2]**तस्संदिट्ठे व** त्ति **तेना**चार्येण यः **संदिष्टः**, यथाऽमुमापृच्छ्य गन्तव्यं ततस्तमापृच्छ्य व्रजन्ति । **तस्मिन्नसत्या**चार्येऽविद्यमाने क्वचिन्निर्गते, केन पुनः कारणेनाचार्यो निर्गच्छति ? अत आह-**चेइय चैत्य**वन्दनार्थं **ग्लानादिकार्येषु च गुरोर्निर्गमनं** भवति ॥२४१॥

अथाचार्येण गच्छता न कश्चिन्नियुक्तस्ततः ? –

**४६५ अभणिए पु[3]व्वनिउत्ते आपुच्छित्ता वयंति ते समणा ।**
**अणभोगे आसण्णे काइयउच्चार[4]भोमाई ॥२४२॥ नि०**

**अभणिए** गाहा । **अभणिते**ऽनियुक्ते कस्मिंश्चिद्भि[5]क्षौ, प्रागेव यो **नियुक्त** आस्ते **तमापृच्छ्य** [6]**व्रजन्ति ते श्रमणा** भिक्षार्थम् । **अणभोगे** त्ति **अनाभोगेनात्यन्त-**स्मृतिभ्रंशेन गताः, ततः **आसण्णे** त्ति **आसन्ने** भूमिप्रदेशे यदि स्मृतं ततश्चागत्य

---

A ते चाऽऽचार्या एवं भणन्तः-यथा प्राघूर्णकस्य वर्तापयेत् अथवा ग्लानस्य प्रायोग्यं गृह्णीत । अथवा अन्तराले श्वापदा सन्ति तैर्भक्षिता भवन्ति, अथवा तत्र ग्रामे स्त्रीदोषा नपुंसकदोषा वा, अथवा मुर्छया पतेत् तदा न ज्ञायते, अनापृच्छ्य कतरस्यां दिशि गता इति न ज्ञायते ।

१. गच्छतां दा० २. तस्संदिट्ठे भवति क० ३. पुव्वनिउत्तं ह० हे० ४. भूमाई ह० ५. भिक्षावेलायाम् दा. ६. गच्छन्ति ल.

पुनः कथयित्वा यान्ति, **काइय** त्ति **कायिकार्थं** यो निर्गतः साधुस्तस्मै कथयन्ति, यदुता[1]ऽहममुकत्र गतः । **उच्चारभोमादि** त्ति सञ्ज्ञाभूमिं यो गतस्तस्मै कथयन्ति, यदुत-कथनीयमहममुकत्र गत इति, **आदि**ग्रहणात्प्रथमालिकार्थं यो गतस्तस्य च[2] हस्ते संदिशन्ति ॥२४२॥

**४६६ दवमादिनिग्गयं वा सेज्जायर पाहुणं च अप्पाहे ।**
**असई दूरगओ वि य नियत्त इहरा उ ते दोसा ॥२४३॥ नि०**

**दवमादि** गाहा । **द्रवं** पानकं तदर्थं **निर्गतो** यः साधुस्तं दृष्ट्वा क[3]थयति **सेज्जायर पाहुणं च अप्पाहे** त्ति **शय्यातरं वा** दृष्ट्वा [4]संदिशति **प्राघूर्णकं** वा साध्वादिकं दृष्ट्वा संदिशति, यतः कथनीयं मम विस्मृतमिति । यदा त्वेतान् गच्छन्न पश्यति तदा दूरगतो **वि णियत्त** त्ति **दूरमपि गतः सन्निवर्त्तते, इहरा उ** त्ति यदि न निवर्त्तते ततः **ते दोस** त्ति **ते** पूर्वोक्ताः स्तेनादयो **दोषा** भवन्तीति ॥२४३॥

**४६७ अण्णं गामं च वए इमाइं कज्जाइं तत्थ नाऊण ।**
**तत्थ वि अप्पाहणता नियत्तणं वा सई काले ॥२४४॥ नि०**

**अण्णं** गाहा । अथाऽसौ साधुस्तस्माद् ग्रामादन्यं **ग्रामं व्रजेत्, एतानि कार्याणि** वक्ष्यमाणलक्षणानि **दूरुट्ठिअखुड्डलए** इत्येवमादीनि **तत्रे**ति तस्मिन् ग्रामे योऽसावभिप्रेतो **ज्ञात्वा** विज्ञाय, ततश्च किं कर्त्तव्यमित्यत आह-**तत्राप्य**न्यस्मिन् ग्रामे व्रजता **अप्पाहणता** संदेशकस्तथैव दातव्यः, अथ कश्चिन्नास्ति यस्य हस्ते संदिश्यते ततो **निवर्त्तनं वा** क्रियते, कदा ? अत आह-**सति काले** विद्यमाने [5]पहुप्पंति **काले** एतदनुष्ठीयते ॥२४४॥

यदुक्तम्-एतानि कार्याणि तत्र ज्ञात्वाऽन्यत्र ग्रामे व्रजन्ति, तानि प्रदर्शयन्नाह —

**४६८ [6]दूरुट्ठिअ खुड्डलए नव भड अगणी य पंत पडिणीए ।**
**पाउग्ग कालऽइक्कम एक्कगलंभे अपज्जत्तं ॥२४५॥ नि०**

**दूरुट्ठिअ** गाहा । प्रथमं गाथार्द्धं सुगमम्, एतानि [7]**दूरोत्थिता**दीनि कारणान्यर्द्धपथ एव जानाति, कदाचिद्गतः सन्, तथा **पाउग्ग** त्ति तत्र ग्रामे **प्रायोग्यमा**चार्यादीनां न

---

१. वयममुकत्र गताः । दा. २. वा दा. ३. कथयन्ति दा. ४. सन्दिशन्ति दा. ५. पहुच्चंते क० पहुप्पंते ल० ६. दूरुट्ठिय दा० ७. दूरस्थिता० आ.

लब्धं ततोऽन्यत्र व्रजति, **कालातिक्रमो** भिक्षाकालस्यातिक्रमो जातः, **एकस्य** वा साधोस्तत्र भोजन**लम्भो** जातस्ततोऽन्यग्रामे व्रजन्ति । **अपज्जत्तं** ति न वा पर्याप्त्या तत्र भक्तं सञ्जातमथवा भक्तं लब्धं पानकं न लब्धम्, एभिरनन्तरोक्तैः कारणैरन्यग्रामं व्रजन्तीति ॥२४५॥

**४६९ पाउग्गाईणमसई संविग्गं सण्णिमाइ अप्पाहे ।**
**जइ य चिरं तो इयरे ठवित्तु साहारणं भुंजे ॥२४६॥ नि०**

**पाउग्गाई** गाहा । एवमसौ **प्रायोग्यादीनामसत्य**न्यग्रामं व्रजति, व्रजंश्च **संविग्ग** त्ति **संविग्नं** साधुं यदि पश्यति ततस्तस्य हस्ते संदिशति, **सण्णिमाइ** त्ति **संज्ञी** श्रावकस्तस्य हस्ते संदिशत्यन्यस्य [1]वा, **आदिग्रहणात्** पूर्ववच्छेषम् । एवं तावद्भिक्षामटतां विधिरुक्तः, ये पुनर्वसतौ तिष्ठन्ति साधवस्तैः किं कर्त्तव्यमित्यत आह-'**जइ य चिरं**' **यदि च चिरं** तेषां ग्रामं गतानां **तत इतरे** वसतिनिवासिनः साधवः **ठवित्तु साहारणं** यद् गच्छ**साधारणं** विशिष्टं किञ्चित्त**स्थापयित्वा** शेषमपरं प्रान्तप्रायं **भुञ्जते** ॥२४६॥

अथ तथापि चिरयन्ति ततः –

**४७० जाए दिसाए उ गया भत्तं घित्तुं तओ पडियरंति ।**
**[2]अणपुच्छिनिग्गयाणं चउद्दिसिं होइ [3]पडियरणा ॥२४७॥ नि०**

**जाए** गाहा । **जाए दिसाए उ गया, यया दिशा** भिक्षाटनार्थं **गता**स्तया दिशा गृहीतभक्तपानकाः साधवः **पडियरंति** त्ति प्रतिजागरणं निरूपणं कुर्वन्ति, अथ तु ते भिक्षाटका अनाभोगेनाकथयित्वैव गतास्ततः किं कर्त्तव्यमित्यत आह-**अनापृच्छ्य निर्गतानां** भिक्षाहिण्डकानां **चतसृष्वपि दिक्षु** प्रतिजागरणं निरूपणं कर्त्तव्यं साधुभिः ॥२४७॥

प्रतिजागरणगमनविधिः कः ? –

**४७१ पंथेणेगो दो उप्पहेण सद्दं करेंति वच्चंता ।**
**अक्खर परिसाडणया पडियरणिअरेसिं मग्गेणं ॥२४८॥ नि०**

**पंथे** गाहा । **पथा** मार्गेण प्रसिद्धेनैकः साधुः प्रयाति, **द्वौ** साधू**त्पथेनो**न्मार्गेण

---

१. वा हस्ते दा० २. अणापुच्छ नि० ह० हे० ३. पडिलेहा आ.

व्रजतः, वर्त्तन्या एक एकया दिशाऽन्यश्चान्यया, ते च त्रयोऽपि व्रजन्तः **शब्दं कुर्वन्ति**, ते च **व्रजन्तः** स्तेनादिना गृहीताः[1] सन्तः साधवः किं कुर्वन्तीत्यत आह- **अक्खर** त्ति वर्त्तन्याम**क्षराणि** लिखन्तः पादादिना व्रजन्ति, **परिसाडणय** त्ति **परिशाटनं**[2] वस्त्रादेः कुर्वन्तो व्रजन्ति येन कश्चित्तेन मार्गेणान्विषति । **पडियरणिअरेसिं** ति **इतरेषामन्वेषणार्थं** निर्गतानां साधूनां **मार्गेण** तत्कृतेन चिह्नेन प्रतिजागरणं कर्त्तव्यम् ॥२४८॥

**४७२ गामेव गंतुं पुच्छे घरपरिवाडीए जत्थ उ न दिट्ठा ।**
**तत्थेव बोलकरणं पिंडियजणसाहणं चेव ॥२४९॥ नि०**

**गामेव** गाहा । यदा तु पुनस्तेषां स्तेननीतानां चिह्नं न किञ्चित्पश्यति तदाऽपि **ग्राममेव गत्वा पृच्छति**, कथम् ? **गृहपरिपाट्या, जत्थ उ न दिट्ठ** त्ति **यदा न दृष्टा**स्तस्मिन् ग्रामे, न च तद्ग्रामनिर्गतानां वार्त्ता, **तत्रैव बोलकरणं** ति [१०४]बोलं कुर्वन्ति, पश्चाच्च '**पिंडियजनसाहणं**' **पिण्डितो** मिलितो यो **जन**स्तस्य कथनीयम्, यदुतास्मिन् ग्रामे प्रव्रजिता भिक्षार्थं प्रविष्टाः, न च तेषां पुनरस्माद् ग्रामाद्वार्त्ता श्रुतेति ॥२४९॥

एवं तैस्तरुणैरन्यग्रामेऽटद्भिरेतच्च[3] कृतं भवति –

**४७३ एवं उग्गमदोसा विजढा पइरिक्कया अणोमाणं ।**
**मोहतिगिच्छा य कया विरियायारो य अणुचिण्णो ॥२५०॥ नि०**

**एवं उग्गम** गाहा । **एवमन्य**ग्रामे भिक्षाटनेनो**द्गमदोषा** आधाकर्मादयः **विजढा** परित्यक्ता भवन्ति, **पइरिक्कय** त्ति प्रचुरस्य भक्तादेर्लाभो भवति, **अणोमाणं** ति न वाऽ**पमानम**नादरकृतं भवति लोके, तथा **मोहचिकित्सा च कृता** भवति, श्रमाऽऽतप-[4]वैयावृत्त्यादिभिर्मोहनिग्रहः कृतो भवत्यवकाशो दत्तो न भवतीति, **विरियायारो य अणुचिण्णो । वीर्याचारश्चानुचीर्णो**ऽनुष्ठितो भवति ॥२५०॥

एवमुक्ते सति चोदक आह –

**४७४ अणुकंपायरियादी दोसा पइरिक्कजयणसंसट्ठं[5] ।**
**पुरिसे काले खवणे पढमालिय तीसु ठाणेसु ॥२५१॥ नि०**

---

१०४. बोलं-रोलं-संशब्दनमिति । संटी.

१. नीयमाना स० क० २. परिशातनां व० क० ३. तरुणैरेतत्कृतं भवत्यन्यग्रामोऽटद्भिः क० ४. श्रमतपोवैया० क० ५. संसट्ठे ह० हे०

**अणुकंपायरियादी** गाहा । सत्यम्, आचार्यादयोऽनुकम्पिता भवन्ति, किन्त्वेवं वृषभाः परित्यक्ता भवन्ति, आचार्योऽप्यनेनैव वाक्येन प्रत्युत्तरं ददाति काक्का— **अणुकंपायरियादी** त्ति एव**माचार्यादीनामनुकम्पा**, तयाऽनुकम्पया त एव परलोक इहलोके चानुकम्पिता भवन्ति, यत एव परलोके निर्जरा इहलोके च प्रशंसा, पुनरप्याह परः-**दोसा** इति भवतु नाम परलोकानुकम्पादि किन्तु क्षुत्पीडा पीपासापीडा च तदवस्थैव, आचार्योऽप्याह—क्रियत एव प्रथमालिका, किन्तु त्रिषु स्थानेषु, कानि च तानि ? अत आह-**पुरिसे** त्ति **पुरुषः**, किं सहिष्णुरुतोऽसहिष्णुः ? पुरुषो यद्यसहिष्णुस्ततः करोति, **काल**—उष्णकालादौ, यद्युष्णकालस्ततः करोति, **खवणे** त्ति कदाचित्**क्षपको** भवत्यक्षपको वा, यदि क्षपकस्ततः करोति, एवमेतेषु **त्रिषु स्थानेषु प्रथमालिकां** करोति, क्व करोति ? कथं वा करोति ? अत आह-**पतिरिक्कजयण** त्ति **प्रतिरिक्त** एकान्ते **यतनया** करोति, पुनरप्याह परः-आचार्यादीनां तेन तद्भक्तं **संसृष्टं** कृतं भवति, आचार्योऽप्यनेनैव वाक्येनोत्तरं ददाति-पतिरिक्कजयणसंसट्ठं एकान्ते **यतनया**-**ऽसंसृष्टं** च यथा भवति तथा [१०५] प्रथमालियन्ति मात्रके पृथगाकृष्य भुङ्क्ते हस्तेन वा द्वितीयहस्ते कृत्वा, अकारप्रश्लेष आचार्यवाक्ये द्रष्टव्यः ॥२५१॥

इदानीमेतामेव गाथां भाष्यकारः प्रतिपदं व्याख्याति तत्र प्रथमावयवव्याचिख्यासयाह —

**४७५ चोयगवयणं अप्पाऽणुकंपिओ ते य भे परिचत्ता ।**
**आयरियअणुकंपाए [१] परलोओ इह पसंसा य ॥१४७॥ निभा०**

**चोयगवयणं** गाहा । चोदकस्य वचनं **चोदकवचनम्**, किं तद् ? **आत्मै**वैव-म**नुकम्पित** आचार्येण, **ते च भे** भवता **परित्यक्ता** भवन्ति । आचार्योऽप्याह-**आचार्यानुकम्पया परलोको** भवतीहलोके **च प्रशंसा** भवति ॥१४७॥

अणुकंपा आयरियाई वक्खाणिअं, इदार्नी दोस त्ति (नि. २५१) व्याख्यानयन्नाह—

**४७६ एवं पि परिचत्ता काले खवणे य असहुपुरिसे य ।**
**कालो गिम्हो उ भवे खवगो वा [२] पढमबिइएहिं ॥१४८॥ निभा०**

**एवं पि परिचत्ता** गाहा । चोदकः पुनरप्याह-**एवमपि** ते **परित्यक्ता** एव,

---

१०५. प्रथमालियंति- प्रथमालिकां कारयति इत्यर्थः । संटी.

१. परलोओ इह पसंससणया दा० परलोए इह पसंसणया ध.र. २. पढमबीएसु य.र. पढमबितिएसु थ.

यतः क्षुधादिना बाध्यन्ते, आचार्योऽप्याह-**काले** त्ति काल उष्णकाले करोति, **खवणे** त्ति **क्षपको** यदि भवति ततः स करोति प्रथमालिकामसहिष्णुश्च **पुरुषो** यदि भवति ततः स करोति प्रथमालिकाम्, तत्र **कालो ग्रीष्मो** यदि **भवेत्पुरुषः क्षपको** यदि **भवेत्**, पढमबिइएहिं ति अत्र पुरुषोऽसहिष्णुः केन कारणेन भवति ? **पढमे** त्ति **प्रथम**परीषहेण बाध्यमानः, [1]क्षुधेत्यर्थः, **बितिएहिं** ति **द्वितीय**परीषहेण तृषा बाध्यमानः, पिपासया [2]पीड्यमानोऽसहिष्णुर्भवतीति ॥१४८॥

अत्राह परः –

**४७७ जइ एवं संसट्ठं अप्पत्ते दोसिणाइणं गहणं ।**
**लंबणभिक्खा दुविहा जहण्णमुक्कोस तियपणए ॥१४९॥ निभा०**

**जइ एवं** गाहा । **यद्येवमसौ** बाह्यत एव प्रथमालिकां करोति ततो भक्तं **संसृष्टं** कृतं भवति, आचार्योऽप्याह-**अप्पत्ते दोसिणादिणं गहणं, अप्राप्तायामेव** भिक्षावेलायां पर्युषितान्न**ग्रहणं** कृत्वा प्रथमालयति, कियत्प्रमाणां पुनः प्रथमालिकां करोत्यसौ ? द्विविधा प्रथमालिका भवति-'**लंबणभिक्खा दुविहा**' **लम्बनैः** कवलैर्भिक्षाभिश्च **द्विविधा** प्रथमालिका भवति, इदानीं जघन्योत्कृष्टतः प्रमाणं प्रतिपादयन्नाह–**जहन्नमुक्कोस तियपणए** यथासङ्ख्येन **जघन्यतस्त्रयः** कवलास्तिस्रो वा भिक्षाः, **उत्कृष्टतः पञ्च** कवलाः पञ्च वा भिक्षाः ॥१४९॥

इदानीं तेन सङ्घाटकेन किं वस्तु केषु पात्रकेषु गृह्यते ? का वा प्रथमालिकाकरणे यतना क्रियते ? एतत्प्रतिपादयन्नाह –

**४७८ एगत्थ होइ भत्तं बिइयंमि पडिग्गहे दवं होइ ।**
**पायोग्गायरियादी मत्ते बिइए उ संसत्तं ॥२५२॥ नि०**

**एगत्थ** गाहा । **एकस्मिन्पात्रके भक्तं** गृह्णाति **द्वितीये** च **पतद्ग्रहे द्रवं भवति,** तथा **पाउग्गायरियाई मत्ते** त्ति **प्रायोग्यमाचार्यादीनामेकस्मिन्मात्रके** भक्तं गृह्यते, '**बितिए उ संसत्तं**' **द्वितीये तु मात्रके संसक्तं** संसृष्टं किञ्चित्पानकं गृह्यते ॥२५२॥

**४७९ जइ रिक्को तो दवमत्तगंमि पढमालियाए करणं तु ।**
**संसत्तगहण दवदुल्लहे य तत्थेव जं पंतं ॥२५३॥ नि०**

---

१. क्षुधित इ० दा० २. बाध्यमान दा.

**जति रित्तो** गाहा । **यदि रिक्तः** संसक्तद्रवमात्रकस्ततस्तस्मिन् **प्रथमालिकायाः करणम्, संसत्तगहणे** त्ति, अथ तस्मिन् **द्रवमात्रके संसक्तद्रवग्रहणं** कृतं ततस्तत्रैव पात्रके यत्प्रान्तं तद्भुङ्क्ते । **दवदुल्लहे य** त्ति अथवा **दुर्लभं** पानकं तत्र क्षेत्रे ततश्च तत्रापि संसक्तमात्रके [१]पानकेनाक्षणिके सति **तत्थेव** त्ति **तस्मिन्नेव** भक्तपतद्ग्रहे **यत्प्रान्तं** तद्धस्तेनाकृष्यान्यस्मिन् हस्ते कृत्वा समुद्दिशति ॥२५३॥

एवं चासौ सङ्घाटकः प्रथमालिकां करोति –

**४८० अंतरपल्लीगहियं पढमागहियं व सव्व भुंजेज्जा ।**
**धुवलंभो संखडीयं व जं गहियं दोसिणं वावि ॥२५४॥ नि०**

**अंतर** गाहा । **अन्तरपल्ली** तस्माद् ग्रामात्परतो योऽन्य आसन्नग्रामस्तत्र **यद्गृहीतं** तद्भुङ्क्ते, पुनस्तत्क्षेत्रातिक्रान्तत्वादभोज्यं भवति, **पढमागहिअं व** त्ति **प्रथमायां** वा पौरुष्यां यद्गृहीतं तत्**सर्वं भुङ्क्ते** [१०६]तृतीयायां पौरुष्यामकल्प्यं यतस्तद्भवति । **धुवलंभो संखडीयं व** अथवा **ध्रुवो** वाऽवश्यंभाव्यत्र **सङ्खड्यां लाभो** भविष्यतीति मत्वा, ततश्च **यद्गृहीतं 'दोसिणं वावि'** पर्युषितमन्नं तत्सर्वं भुञ्जते ॥२५४॥

**४८१ दरहिंडिए व भाणं भरियं भोच्चा पुणो वि [२]हिंडंति ।**
**कालो वाऽइक्कमई भुंजेज्जा अंतरा सव्वं ॥२५५॥ नि०**

**दरहिंडिते व** गाहा । **अर्द्धहिण्डिते वा** यत्पात्रकं गृहीतं तद्**भृतम्,** ततश्च तद्**भुक्त्वा पुनरपि हिण्डन्ति** । [१०७]**कालो वाऽइक्कमई** त्ति भोजन**कालो वा** प्रव्रजिताना**मतिक्रामति** यावदसौ तद्भक्तं गृहीत्वा गच्छति तत**श्चान्तराल** एव तत्**सर्वं** भुक्त्वा प्रविशति ॥२५५॥

**४८२ [३]एसो उ विही भणिओ तंमि वसंताण होइ खेत्तंमि ।**
**पडिलेहणं पि एत्तो वोच्छं अप्पक्खरमहत्थं ॥२५६॥ नि०**

**एसो** गाहा । **एष विधिर्भणित** उक्तस्तस्मिन् **क्षेत्रे वसतां भवति, प्रतिलेखना-**

---

१०६. अत्र तृतीयपदस्य प्रथमापेक्षया यत् तृतीया सोऽर्थः, न तु तृतीया पौरुषी, अपि तु चतुर्थपौरुषीत्यर्थः, अतो न निषेध अनुपपत्तिः। संटी.

१०७. कालाइक्कंत-कालातिक्रान्तः-कालं दिवसस्य प्रहरत्रयलक्षणमतिक्रान्तं कालातिक्रान्तम् । कालातिक्रमदोषदुष्टे पानभोजने। (भ.७ श.१ उ.)

१. पानकाक्षणिके स० क० २. हिंडिज्जा दा० हिंडेज्जा सं. ३. एसो विही, दा०

**मपीत** ऊर्ध्वं **वक्ष्ये,** किंविशिष्टाम् ? **अल्पाक्षरां महार्थां** चेति । उक्तं स्थानस्थित-द्वारम्, तत्प्रतिपादनाच्च व्याख्यातेयं गाथा, यदुत "संगार बितिय वसही ततिए सण्णी" (नि.१११) इत्येवमादिका, तत्प्रतिपादनाच्चोक्ता 'जतमाणा विहरंता ओहाणाहिंडका चउद्ध'त्ति (नि.१२५), तत्प्रतिपादनाच्चोक्ता इति अनेके प्रत्युपेक्षकाः, तत्प्रतिपादनाच्चोक्तं प्रत्युपेक्षकद्वारमिति ॥ **२५६॥**

तत्र यदुक्तम्–"एत्तो पडिलेहणं वोच्छं" तामिदानीं व्याख्यानयन्नाह –

**४८३ दुविहा खलु पडिलेहा छउमत्थाणं च केवलीणं च ।**
**अब्भिंतर बाहिरिआ दुविहा दव्वे य भावे य ॥२५७॥ नि०**

**दुविहा** गाहा । **द्विविधा प्रत्युपेक्षणा** भवति, कतमेन द्वैविध्येनेत्यत आह - **छद्मस्थानां** सम्बन्धिनी **केवलिनां** सम्बन्धिनी **च**, सा चैकैका द्विविधाऽ**भ्यन्तरा बाह्या** च । याऽसौ छद्मस्थानां सा द्विविधा-अभ्यन्तरा बाह्या च, याऽपि केवलिनां साऽप्यभ्यन्तरा बाह्या च । **दव्वे य भावे य** त्ति याऽसौ बाह्या प्रत्युपेक्षणा सा **द्रव्य**विषया, या अभ्यन्तरा सा **भाव**विषयेति ॥२५७॥

तत्र केवलिप्रत्युपेक्षणां प्रतिपादयन्नाह –

**४८४ पाणेहि उ संसत्ता पडिलेहा होइ केवलीणं तु ।**
**संसत्तमसंसत्ता छउमत्थाणं तु पडिलेहा ॥२५८॥ नि०**

**पाणेहिं तु** गाहा । **प्राणिभिः संसक्तं** यद्द्रव्यं तद्विषया **प्रत्युपेक्षणा भवति केवलिनाम्, संसत्तमसंसत्त** त्ति **संसक्त**द्रव्यविषया तथाऽ**संसक्त**द्रव्यविषया च **छद्मस्थानां प्रत्युपेक्षणा** भवतीति । आह-**यथोपन्यासस्तथा निर्देश** इति न्यायात्प्रथमं छद्मस्थानां व्याख्यातुं युक्तं पश्चात्केवलिनामिति, उच्यते-प्रधानत्वात्केवलिनां प्रथमं व्याख्या कृता पश्चाच्छद्मस्थानामिति, आह-तत्कथं प्रथममेवैवमुपन्यासो न कृतः[१] ? इत्यतो उच्यते-तत्पूर्वकाः केवलिनो भवन्तीत्यस्यार्थस्य ज्ञापनार्थमिति ॥२५८॥

अनेन कारणेन केवलिनः प्रत्युपेक्षणां कुर्वन्तीति प्रतिपादयन्नाह –

**४८५ संसज्जइ धुवमेयं अपेहियं तेण पुव्व पडिलेहे ।**
**पडिलेहियं पि संसज्जइ त्ति संसत्तमेव जिणा ॥२५९॥ नि०**

---

१. कृतः उच्यते दा.

**संसज्जइ** गाहा । **संसज्यते** प्राणिभिः सह संसर्गमुपयाति **ध्रुवम**वश्यमे**तद्** वस्त्राद्य**प्रत्युपेक्षितं** सत् **तेन पूर्व**मेव केवलिनः प्रत्युपेक्षणां कुर्वन्ति, यदा तु पुनरेवं संविद्रवते इदमिदानीं वस्त्रादि **प्रत्युपेक्षितमप्यु**पभोगकाले **संसज्यते** तदा **संसत्तमेव जिण** त्ति **संसक्तमेव जिनाः** केवलिनः प्रत्युपेक्षन्ते न त्वनागतमेव, पलिमन्थदोषात् ॥२५९॥

उक्ता केवलिद्रव्यप्रत्युपेक्षणा, इदानीं केवलिन एव भावप्रत्युपेक्षणां प्रतिपादयन्नाह–

**४८६ नाऊण वेयणिज्जं अइबहुयं आउयं च थोवागं ।**
**कम्मं पडिलेहेउं वच्चंति जिणा समुग्घायं ॥२६०॥ नि०**

**नाऊण** गाहा । **ज्ञात्वा वेदनीयं** कर्माऽतिप्रभूतं तथाऽऽ**युष्कं च स्तोकं कर्म प्रत्युपेक्ष्य** ज्ञात्वेत्यर्थः । किमित्यत आह–**वच्चंति जिणा समुग्घायं** । **जिनाः** केवलिनः [१०८]**समुद्घातं व्रजन्ति**, अत्र च भावः–कर्मण उदय औदयिको भाव इत्यर्थः ॥२६०॥

उक्ता केवलिभावप्रत्युपेक्षणा, इदानीं छद्मस्थद्रव्यप्रत्युपेक्षणामाह –

**४८७ संसत्तमसंसत्ता छउमत्थाणं तु होइ पडिलेहा ।**
**चोयग जह आरक्खी [१]हिंडिताहिंडिया तह उ[२] ॥२६१॥ नि०**

**संसत्त** गाहा । **संसत्त** त्ति **संसक्त**द्रव्यविषया **असंसत्त** त्ति **असंसक्त**द्रव्यविषया च **छद्मस्थानां भवति प्रत्युपेक्षणा** । अत्र **चोदक** आह–युक्तं तावत् संसक्तवस्त्रादेः प्रत्युपेक्षणां कर्त्तुम्, असंसक्तस्य तु कस्मात् प्रत्युपेक्षणा क्रियते ? आचार्य आह– **यथा आरक्षकयोर्हिण्डिताहिण्डितयो**र्यथासङ्ख्येन प्रसादविनाशौ सञ्जातौ **तथा**ऽत्रापि द्रष्टव्यम्, तथाहि– "[A]किंचिन्नगरं, तत्थ राया, तेन चोरनिग्गहत्थं आरक्खिओ ठविओ, सो एगं दिवसं हिंडइ, बिइए वि एवं हिंडंतो चोरं न किंचि पासति ताहे ठितो निव्विण्णो, चोरेहिं आगमिअं जहा वीसत्थो जाओ आरक्खिओ, ताहे एकदिवसेण सव्वं नगरं मुट्ठं, ताहे ना[३]गरा रायमुवट्ठिआ मुट्ठा, तो राया भणइ–[४]वाहरह

---

१०८. समुद्घातः–वेदनादिभिः सह एकीभावेन प्राबल्यतया निर्जरणम् । (प्रज्ञा.)

A किञ्चिन्नगरम्, तत्र राजा, तेन चौरनिग्रहार्थमारक्षिकः स्थापितः । स एकं दिवसं हिण्डति, द्वितीयेऽप्येवं हिण्डन् चौरं न कञ्चित् पश्यति तदा स्थितो निर्विण्णः, चौरैर्ज्ञातं यथा विश्वस्तो जात आरक्षिकः, तदैकस्मिन् दिवसे सर्वं नगरं मुष्टम् । तदा नागरा राजानमुपस्थिताः, मुष्टाः, ततो राजा भणति– व्याहरत आरक्षकम् । आहूय पृष्टम्–

१. अणहिंडिय हिंडिया हे० ता. २. चेव दा० ३. णागरगा उट्ठिता क० ४. वाहर आ० क०

आरक्खिअं, वाहित्ता पुच्छित्तो–किं तुमए अज्ज हिंडिअं नगरे ? सो भणति–न हिंडिअं, ताहे रुट्ठो राया भणइ–जइ नाम इत्तिए दिवसे चोरेहिं न मुट्ठं सो ताण चेव गुणो, तए पुण पमायं करिंतेणं मुसाविअं, ततो सो निग्गहिओ राइणा, अण्णो ठविओ, सो पुण जइवि न दिक्खति चोरे तहवि रत्तिं सयलं हिंडति । अह तत्थ एगदिवसे अण्णरत्थाए गयं नाऊणं चोरेहिं खत्तं[1] कयं, सो य नागरओ रायउले उवट्ठिओ, राइणा पुच्छिओ आरक्खिओ–जहा तुमं किं हिंडसि ? सो भणइ, आमं हिंडामि, ताहे राइणा लोगो पुच्छिओ भणइ–आमं हिंडइ त्ति, ताहे सो निद्दोसो कीरति । एवं चेव रायत्थाणिया तित्थयरा,आरक्खिअत्थाणिआ साहू, उवगरणं नगरत्थाणिअं, कुंथुकीडियत्थाणिया चोरा, णाणदंसणचरित्ताणि हिरण्णत्थाणियाणि, संसारो दंडो । एवं केण वि आयरिएण भणितो सीसो दिवसे[2] दिवसे पडिलेहइ, जाहे न पेच्छइ ताहे न पडिलेहइ, एवं तस्स अपडिलेहंतस्स सो संसत्तो उवही न सक्को सोहेउं, ततो तेण तित्थयराणा भग्गा, तं च दव्वं अपरिभोगं जायं, एवं अण्णो भणितो, तेण य सव्वं कयं, तित्थयराणा य कया, वत्थं च परिभोगं जायं" ॥२६१॥

अमुमेवार्थमुपसंहरन्नाह[3] –

**४८८ तित्थयरा रायाणो साहू आरक्खि भंडगं च पुरं ।**
**तेणसरिसा य पाणा तिगं च रयणा भवो दंडो ॥२६२॥ नि०**

**तित्थयरा** इत्यादि । सुगमा ॥२६२॥

---

किं त्वयाद्य हिण्डितं नगरे ? स भणति- न हिण्डितमिति, तदा रुष्टो राजा भणति- यदि नाम एतावन्ति दिनानि चौरैर्न मुष्टं स तेषामेव गुणः, त्वया पुनः प्रमादं कुर्वता मोषितम्, स निग्रहीतो राज्ञा, अन्यश्च स्थापितः, यद्यपि स पुनश्चौरान्न पश्यति तथापि सकलां रात्रिं हिण्डति । अथ तत्रैकदिवसेऽन्यरथ्यायां गतं ज्ञात्वा चौरैः क्षात्रं खनितम्, स च नागरको राजकुल उपस्थितः, राज्ञा पृष्ट आरक्षिकः- यथा त्वं किं हिण्डसि ? स भणति- आम्, हिण्डामि, तदा राज्ञा लोकः पृष्टो भणति- आम्, हिण्डतीति, तदा स निर्दोषः क्रियते । एवमेव राजस्थानीयास्तीर्थकराः, आरक्षिकस्थानीयाः साधवः, उपकरणं नगरस्थानीयम्, कुंथुकीटिकास्थानीयाश्चौराः, ज्ञानदर्शनचारित्राणि हीरण्यस्थानीयानि, संसारो दण्डः, एवं केनाप्याचार्येण भणितः शिष्यः दिवसे दिवसे प्रतिलेखयति, यदा न प्रेक्षते तदा न प्रतिलेखयति, एवं तस्याऽप्रतिलेखयतः स संसक्त उपधिर्न शक्यः शोधयितुम्, ततस्तेन तीर्थकराज्ञाभङ्गः कृतः, तच्च द्रव्यमपरिभोगं जातम्, एवमन्यो भणितः, तेन च सर्वं कृतम्, तीर्थकराज्ञा च कृता, वस्त्रं च परिभोगं जातम् ।

१. खत्तयं कयं ल. २. दिणे दिणे क. ३. ०र्थं गाथयोप० आ.

[ **तित्थयरा** गाहा । **तीर्थंकरा राजानः, साधुरारक्षकः, भाण्डमुपकरणं पुरम्,** रत्नत्रिकं **च** हेमरत्नानि, **स्तेनसदृशाः प्राणाः, भवो दण्डः** ॥ओमाटी. २६२॥ ]

उक्ता छद्मस्थविषया द्रव्यप्रत्युपेक्षणा । इदानीं भावप्रत्युपेक्षणां प्रतिपादयन्नाह–

**४८९ किं कत किं वा सेसं किं करणिज्जं तवं च न करेमि ।**
**पुव्वावरत्तकाले जागरओ भावपडिलेहा ॥२६३॥ नि०**

**किं कत** गाहा । सुगमा, नवरं **पुव्वावरत्तकाले** त्ति **पूर्वरात्रकाले** रात्रिप्रहर-द्वयस्याद्यस्यान्त उपरिष्टादपररात्रकालस्तस्मिन् **जाग्रतश्चिन्तयतः** । एवमुक्ता छद्मस्थविषया **भावप्रत्युपेक्षणा**, तद्भणनाच्च भणिता प्रत्युपेक्षणा ॥२६३॥

इदानीं प्रत्युपेक्षणीयमुच्यते, तत्प्रतिपादयन्नाह –

**४९० ठाणे उवगरणे या थंडिल अवट्ठंभ मग्गपडिलेहा ।**
**किंमाई पडिलेहा पुव्वण्हे ? चेव अवरण्हे ॥२६४॥ नि० दारगाहा ।**

**ठाण** गाहा । **स्थानं** कायोत्सर्गादि त्रिविधं वक्ष्यति, तथो**पकरणं** पात्रकादि **स्थण्डिलं** यत्र कायिकादि क्रियते, **अवष्टम्भनम**वष्टम्भस्तत्प्रत्युपेक्षणा **मार्गः** पन्था, यदेतत्पञ्चकमुपन्यस्तम्, एतद्विषया **प्रत्युपेक्षणा** भवति । **किंमाई पडिलेहा पुव्वण्हे ? किमादिका प्रत्युपेक्षणा पूर्वाह्णे** ? मुखवस्त्रिकादिकेति, **अपराह्णे किमादिका** ? तत्रापि मुखवस्त्रिकादिका । द्वारगाथेयम् ॥२६४॥

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्र सामान्येन तावत्सर्वाण्येव द्वाराणि व्याख्यानयन्नाह –

**४९१ ठाण निसीय तुयट्टण उवगरणाईण गहणनिक्खेवे ।**
**पुव्वं पडिलेहे चक्खुणा उ पच्छा पमज्जिज्जा ॥१५०॥ निभा०**

**ठाण निसीय** गाहा । **स्थानं** कायोत्सर्गस्तं कुर्वन् प्रथमं चक्षुषा प्रत्युपेक्षते पश्चात्प्रमार्जयति, तथा **निषीदनमु**पवेशनम्, **त्वग्वर्त्तनं** स्वपनम्, **तथोपकरणादीनां ग्रहणे निक्षेपे** च, **आदिग्र**हणात्स्थण्डिलमवष्टम्भश्च गृह्यते, एतानि सर्वाण्येव **पूर्वं चक्षुषा प्रत्युपेक्ष्य पश्चाद्र**जोहरणेन **प्रमृज्यन्ते** ॥१५०॥

इदानीमेतामेव द्वारगाथां विशेषेण व्याख्यानयन्नाह –

**४९२ उड्ड निसीय तुयट्टण ठाणं तिविहं तु होइ नायव्वं ।**
**उड्डं उच्चारादी गुरुमूलपडिक्कमागम्म ॥१५१॥ निभा०**

**उड्ड निसीय** गाहा । तत्र **स्थानं त्रिविधं ज्ञातव्यम्—ऊर्ध्वस्थानं निषीदनस्थानं त्वग्वर्त्तनस्थानं** च, तत्राद्यमूर्ध्वस्थानं व्याख्यानयन्नाह—**उड्डं उच्चाराई** ऊर्ध्वस्थानं कायोत्सर्गः, स **चोच्चारादीन्** कृत्वा, **आदि**ग्रहणात्प्रश्रवणं कृत्वा, ततश्च **गुरुमूल आगत्य प्रतिक्रामतः,** काम् ? ईर्यापथिकां प्रतिक्रामतो भवत्यूर्ध्वस्थानम् ॥१५१॥

**४९३ पक्खे उस्सासाई पुरतो अविणीय मग्गओ वाऊ ।**
**निक्खमपवेसवज्जण भावासण्णे गिलाणाई ॥१५२॥ निभा०**

**पक्खे** गाहा । कायोत्सर्गं च कुर्वताऽऽचार्य**पक्षके** पक्षप्रदेशे न स्थातव्यम्, यतो गुरु**रुच्छ्वासेना**भिहन्यते, नापि **पुरतः** स्थातव्यम्, यतः पुरतो**ऽविनीतत्व**मुपजायते [१]गुरुमाच्छाद्य तिष्ठतः, नापि **मार्गतो** गुरोः पृष्ठतो यतो गुरो**र्वायु**निरोधेन [२]ग्लानता भवति, वायुरपानेन निर्गच्छति, कथं पुनः स्थातव्यम् ? यत्र **निष्क्रमणप्रवेश**स्थानं त**द्वर्जयित्वा** कायोत्सर्गं करोति । **भावासन्ने** त्ति य उच्चारादिना पीडितः स च निर्गमे रुद्धे सञ्ज्ञानिरोधं करोति, ततश्च **ग्लानता** भवति, अथ निर्गच्छति ततः कायोत्सर्गभङ्गः ॥१५२॥

**४९४ भारे वेयण खमगुण्ह मुच्छ परियाव [३]छिंदणे कलहो ।**
**अव्वाबाहे ठाणे सागारपमज्जणा जयणा ॥१५३॥ निभा०**

**भारे** गाहा । तथा च मार्गे कायोत्सर्गकरण एते दोषाः-भिक्षामटित्वा कश्चिदायातः साधुः, स च **भारे** सति यदि प्रतिपालयति ततो **वेदना** भवति । तथा **क्षपकः** कश्चिद्भक्तं गृहीत्वाऽऽयातस्तथाऽन्य **उष्णसं**तप्त आयातः, अनयोर्द्वयोरपि प्रतिपालयतोः सतोर्यथासङ्ख्यं **मूर्च्छापरितापौ** भवतः, क्षपकस्य मूर्च्छागम उष्णतप्तस्य परितापः । अथैते कायोत्सर्गं छित्त्वा प्रविशन्ति ततः परस्परं **कलहो** भवति, तस्मा**दव्याबाधे स्थाने** कायोत्सर्गः कर्त्तव्य एतद्दोषभयात् । **सागारपमज्जणा जयण** त्ति यदा तु पुनः **सागारिको** भवति कायोत्सर्गं कुर्वतस्तदा**ऽप्रमार्जनमे**व करोति, **यतनया** वा **प्रमार्जयति,** कथम्? रजोहरणबाह्यनिषद्यया प्रमृज्य कायोत्सर्गस्थानं ततस्तां निषद्यां सागारिकपुरत एकान्ते मुञ्चति, गते च तस्मिन् गृह्णाति ॥१५३॥

---

१. गुरुं प्रच्छाद्य क० २. म्लानता क. ३. छिन्ने हे० छिंदणा हे०

उक्तमूर्ध्वस्थानम्, इदानीं निषीदनस्थानं प्रतिपादयन्नाह –

**४९५ संडासं पमज्जित्ता पुणो वि भूमिं पमज्जिआ निसीए ।**
**राओ य पुव्वभणियं तुयट्टणं कप्पई न दिवा ॥१५४॥ निभा०**

**संडास** गाहा । **संदशं** जङ्घोर्वोरन्तरालं तं प्रमृज्य उत्कुटुकः स्थित्वा पुनर्भुवं प्रमृज्य निषीदेत् । उक्तं निषीदनस्थानम्, त्वग्वर्तनमुच्यते–**रात्रौ** पूर्वोक्तमेव त्वग्वर्त्तनम्, **दिवा** तु पुनस्**त्वग्वर्त्तनं न कल्पते,** नोक्तं भगवद्भिः ॥१५४॥

किं सर्वथैव न कल्पते ? इति, न इत्याह –

**४९६ अद्धाणपरिस्संतो गिलाणवुड्ढा अणुण्णवित्ताणं ।**
**संथारुत्तरपट्टे अत्थुरण निवज्जणाऽऽलोयं ॥१५५॥ निभा०**

**अद्धाण** गाहा । **अध्वनि परिश्रान्तस्**तथा **ग्लानो वृद्धश्च,** एते त्रयोऽ**प्यनुज्ञाप्या**-चार्यांस्ततश्च **संस्तारकोत्तरपट्टा आस्तीर्य निवज्जण** त्ति स्वपन्ति, **आलोयं** ति सावकाशं प्रदेशं मुक्त्वाऽभ्यन्तरे स्वपन्ति, मा भूत् सागारिकस्य शङ्का स्यात्, यदुत–नूनं रात्रौ [१]सुरतप्रपञ्चे स्थितोऽयमासीत्, कुतोऽन्यथाऽस्य निद्रेति ? त्वग्वर्त्तन-स्थानमुक्तं तत्प्रतिपादनाच्च स्थानद्वारमुक्तम् ॥१५५॥

इदानीमुपकरणद्वारं प्रतिपादयन्नाह –

**४९७ उवगरणादीयाणं गहणे निक्खेवणे य संकमणे ।**
**ठाण निरिक्खपमज्जण काउं [२]पडिलेहए उवहिं ॥१५६॥ निभा०**

**उवगरणादी** गाहा । **उपकरणादीनां ग्रहण** आदाने यत्स्थानं तन्निरीक्ष्य प्रमृज्य च उपधिः प्रत्युपेक्षणीय इत्यत्र सम्बन्धः । तथोपकरणादीनां **निक्षेपणे च** यत्स्थानं तन्निरीक्ष्य प्रमृज्य चोपधिः प्रत्युपेक्षणीयः । तथा उपकरणादीनामेव **यत्सङ्क्रमणं** स्थानात्स्थानान्तरसङ्क्रमणं तस्मिन् **यत्स्थानं तन्निरीक्ष्य प्रमार्जनं कृत्वोपधिं प्रत्यु-पेक्षेत** । योऽय**मादि**शब्दोऽयमुपधिप्रकारप्रतिपादनार्थः । उपकरणादेर्ग्रहणनिक्षेपण-सङ्क्रमणेषु यत्स्थानं तस्य निरीक्ष्य प्रमार्जनमुक्तम् ॥१५६॥

इदानीमुपकरणप्रत्युपेक्षणाप्रतिपादनायाह –

---

१. सुरतप्रसङ्गे दा० २. आयरे संपा०

**४९८ उवगरण वत्थपाए वत्थे पडिलेहणं तु वोच्छामि ।**
**पुव्वण्हे अवरण्हे [१]मुहपोत्तियमादि पडिलेहा ॥१५७॥ निभा०**

**उवगरण** गाहा । **उपकरण**प्रत्युपेक्षणा द्विविधा-**वत्थे पाए** त्ति **वस्त्र**विषया **पात्र**विषया चेति, तत्र ताव**द्वस्त्रे** वस्त्रविषयां **प्रत्युपेक्षणां वक्ष्ये** । आदौ वस्त्र-प्रत्युपेक्षणोच्यते, यतः प्रव्रजितस्य प्रथमं वस्त्रोपकरणमेव दीयते न पात्रोपकरणम्, सा च वस्त्रप्रत्युपेक्षणा कस्मिन् काले भवतीत्यत आह-**पुव्वण्हे अवरण्हे पूर्वाह्णे** वस्त्रप्रत्युपेक्षणा भवत्य**पराह्णे** च । किमादिका पुनः प्रत्युपेक्षणा भवतीत्यत आह-**मुहपोत्तियमादि पडिलेह** त्ति मुखवस्त्रिकादौ यस्याः प्रत्युपेक्षणायाः सा **मुख-वस्त्रिकादिका प्रत्युपेक्षणा**, कदा ? पूर्वाह्णेऽपराह्णे चेति ॥१५७॥

तत्र मुखवस्त्रिकाऽऽदिवस्त्रप्रत्युपेक्षणायामयं विधिः –

**४९९ उड्ढं थिरं अतुरियं सव्वं ता वत्थ पुव्व पडिलेहे ।**
**तो बिइयं पप्फोडे तइयं च पुणो पमज्जिज्जा ॥२६५॥ नि०**

**उड्ढं थिरं** गाहा । तत्र वस्त्रोर्ध्वं कायोर्ध्वं चाचार्यमतेन भविष्यति, चोदकमतेन च वक्ष्यमाणम् । तत्र वस्त्रोर्ध्वं कायोर्ध्वं च यथा भवति तथा प्रत्युपेक्षेत, **थिरं** ति यथा **स्थिरं** सुगृहीतं कृत्वा प्रत्युपेक्षेत, **अतुरियं** ति **अत्वरितं** स्तिमितं प्रत्युपेक्षेत चक्षुषा निरीक्षेत, **सव्वं** ति **सर्वं** कृत्स्नं **वस्त्रं तावत्पूर्वं** प्रथमं **प्रत्युपेक्षेत** चक्षुषा निरीक्षेत, एवं तावदर्वाग्भागः परभागोऽपि परावृत्त्य एवमेव चक्षुषा निरीक्षेत । **तो बिइयं पप्फोडे** त्ति **ततो द्वितीयायां** वारायां **प्रस्फोटयेद्वस्त्रम्**, षट् पुरिमाः कर्त्तव्या इत्यर्थः । **तइयं च पुणो पमज्जिज्ज** त्ति **तृतीयायां** वारायां हस्तगतान् प्राणिनः **प्रमार्जयेदिति** ॥२६५॥

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**५०० वत्थे काउड्ढंमि य परवयण ठिओ गहाय दसियंते ।**
**तं न भवति उक्कुडुओ तिरियं पेहे जह विलित्तो ॥१५८॥ निभा०**

**वत्थे** गाहा । तत्रोर्ध्वं द्विधा-**वस्त्रोर्ध्वं कायोर्ध्वं चे**ति, एतस्मिन्नुक्ते **परवयणं** ति परश्चोदकस्तस्य वचनं **परवचनम्**, किं तद् ? इत्याह-**ठिओ गहाय दसियंते**

---

१. मुहणंतगमाइ आ. सं

त्ति **स्थितस्योर्ध्वस्य गृहीत्वा दशान्ते** वस्त्रं प्रस्फोटयतो वस्त्रोर्ध्वं **कायोर्ध्वं** च यथा भवति, एवमुक्ते सत्याचार्य आह- **तं न भवति, तन्न भवति** यच्चोदकेनाभिहितम्, कुतः ? यस्मात् **उक्कुडुओ तिरिअं पेहे । उत्कुटुकस्थितस्तिर्यक्** प्रसार्य वस्त्रं **प्रत्युपेक्षेत**, एतदेव च नः कायोर्ध्वं वस्त्रोर्ध्वं च, नान्यत्, **यथा** चन्दनादिना **विलिप्ताङ्गः** परस्परमङ्गानि न लगयति एवं सोऽपि [1]प्रत्युपेक्षेत । ततश्चैवमुत्कुटुकस्य कायोर्ध्वं भवति, तिर्यक्प्रसारितवस्त्रस्य च वस्त्रोर्ध्वं भवति ॥१५८॥

उड्ढं ति भणिअं, इदानीं स्थिरादीनि पदानि (नि.२६५) भाष्यकार एव व्याख्यानयन्नाह –

**५०१ घेत्तुं थिरं अतुरिअं तिभागबुद्धीए चक्खुणा पेहे ।**
**तो बिइयं पप्फोडे तइयं च पुणो पमज्जिज्जा ॥१५९॥ निभा०**

**घेत्तुं** गाहा । **घित्तुं गृहीत्वा स्थिरं** [2]निबिडं दृढं वस्त्रं ततः प्रत्युपेक्षेत, **अत्वरितं** स्तिमितं वस्त्रं ततः प्रत्युपेक्षेत, **तिभागबुद्धिए** त्ति **भागत्रयबुद्ध्या** इत्यर्थः । **चक्षुषा प्रत्युपेक्षेत, ततो द्वितीय**वारायां **प्रस्फोटयेत्, तृतीय**वारायां **प्रमार्जयेदि**ति पूर्ववत् ॥१५९॥

इदानीं प्रत्युपेक्षणां कुर्वतेदं कर्त्तव्यम् –

**५०२ अणच्चाविअं अवलिअं अणाणुबंधिं अमोसलिं चेव ।**
**छप्पुरिमा नव खोडा पाणी [3]पाणिपमज्जणं ॥२६६॥ नि० । दारगाहा।**

**अणच्चावियं** गाहा । तत्र प्रत्युपेक्षणां कुर्वता वस्त्रमात्मा वा **न नर्त्तयितव्यः**, तथा **अवलितं** च वस्त्रं शरीरं च कर्त्तव्यम्, **अणाणुबंधिं** ति न अनुबन्धोऽननुबन्धः सोऽस्मिन्नस्तीति **अननुबन्धि** प्रत्युपेक्षणं नानवरतं प्रस्फोटनादि कर्त्तव्यम्, किं तर्हि? सान्तरं सविच्छेदमित्यर्थः । **अमोसलिं** ति न मोसली क्रिया यस्मिन् प्रत्युपेक्षणे **तदमोसलि** प्रत्युपेक्षणम्, यथा मुशलं झटित्यूर्ध्वं लगति अधस्तिर्यक् च, नैवं प्रत्युपेक्षणा कर्त्तव्या, किन्तु यथा प्रत्युपेक्षमाणस्योर्ध्वं पीढिषु न लगति न च तिर्यक्कुड्ये न च भूमौ तथा कर्त्तव्यम् । **छप्पुरिमा** तत्र वस्त्रं चक्षुषा निरूप्यार्वाग्भागं निरूप्य त्रयः पुरिमाः कर्त्तव्याः, तथा परावर्त्यापरभागं निरूप्य पुनरपरेऽपि त्रयः

---

१. प्रत्युपेक्षते दा० २. निबिडं दृढं च अंततः प्रत्युपेक्षेत, अत्वरितं स्तिमितं प्रत्यु० तिभाग० क० ३. पाणपमज्जणं हे० ता.सं.

पुरिमाः कर्त्तव्याः, एवं **षट् पुरिमाः**, षड्वाराः प्रस्फोटनानीत्यर्थः **नव खोड** नव वाराः **खोटकाः** कर्त्तव्याः पाणेरुपरि, **पाणी पाणिपमज्जणं** ति **प्राणिनां** कुन्थ्वादीनां **पाणौ** हस्ते **प्रमार्जनं** नवैव वाराः कर्त्तव्याः । इयं द्वारगाथा ॥२६६॥

इदानीं भाष्यकारः पूर्वार्द्धं व्याख्यानयन्नाह –

**५०३ वत्थे अप्पाणंमि य चउहा अणच्चावियं अवलिअं च ।**
**अणुबंध निरंतरया तिरिउड्ढह य घट्टणा मुसली ॥१६०॥ निभा०**

**वत्थे** गाहा । **वस्त्र आत्मनि चे**त्यनेन पदद्वयेन भङ्गचतुष्टयं सूचितं भवति, ततश्चानेन प्रकारेण **अनर्त्तापितं चतुर्द्धा** भवति, कथम् ? "[A]वत्थं अणच्चाविअं अप्पाणं च अणच्चाविअं एगो भंगो १, तथा वत्थं अणच्चाविअं अप्पाणं च णच्चाविअं २, तहा वत्थं णच्चाविअं अप्पाणं अणच्चाविअं ३, तथा वत्थं पि नच्चाविअं अप्पाणं पि ४, एस चउत्थो, एत्थ पढमो भंगो सुद्धो ।" एवं **अवलिअं** पि **अवलिते**ऽपि चत्वारो भङ्गाः, यथा - वत्थं अवलिअं अप्पाणं च अवलिअं एगो १, तहा वत्थं अवलिअं अप्पाणं च वलिअं २, तहा अप्पाणं अवलिअं वत्थं वलिअं ३, अप्पाणं पि वलिअं वत्थं पि वलिअं ४, एत्थ वि पढमो भंगो सुद्धो । **अणुबंधश्च निरंतरय** ति **अनुबन्धो निरन्तरतो**च्यते, ततश्चानुबन्धेन नैरन्तर्येण प्रत्युपेक्षणा न कर्त्तव्या । इदानीममोसलिं व्याख्यानयन्नाह- **तिरिउड्ढह य घट्टणा मुसलि** त्ति त्रिविधा **मुसली- तिर्यग्**घट्टना १, **ऊर्ध्व**घट्टना २, **अधो**घट्टना ३ चेति, तत्र प्रत्युपेक्षणां कुर्वन् वस्त्रेण तिर्यक् कुड्यादि घट्टयति स्पृशति, ऊर्ध्वं कुटिकादिपटलादि घट्टयति, अधो भुवं घट्टयति, एवं न मुशली किन्त्वमुशली न किञ्चित्प्रत्युप्रेक्षणां कुर्वन् वस्त्रेण घट्टयति ॥१६०॥

इदं तावत्पूर्वोक्तमनर्त्तापितादि कर्त्तव्यम्, इदं तु वक्ष्यमाणं न कर्त्तव्यम्, किं तद् इत्याह –

---

A वस्त्रमनर्तितम् आत्मानं चानर्तितम् एको भङ्गः १, तथा वस्त्रमनर्तितम् आत्मानं च नर्तितम् २, तथा वस्त्र नर्तितम् आत्मानमनर्तितम् ३, तथा वस्त्रमपि नर्तितम् आत्मानमपि ४, एष चतुर्थः, अत्र प्रथमो भङ्गः शुद्धः । एवमावलितमपि अवलितेऽपि चत्वारो भङ्गाः, यथा वस्त्रमवलितम् आत्मानं चावलितम् एकः १, तथा वस्त्रमवलितम् आत्मानं च वलितम् २, तथा आत्मानमवलितं वस्त्रं वलितम् ३, आत्मानमपि वलितं वस्त्रमपि वलितम् ४, अत्रापि प्रथमो भङ्गः शुद्धः ।

**५०४ आरभडा संमद्दा वज्जेयव्वा य मोसली तइया ।**
**पप्फोडणा चउत्थी विक्खित्ता वेइया छट्टी ॥२६७॥ नि० । दारगाहा ।**

**आरभडा** गाहा । **आरभड** त्ति **आरभटा** प्रत्युपेक्षणा न कार्या, **संमद्द** त्ति **संमर्दा** न कार्या, **वर्जनीया च मोसली तृतीया, प्रस्फोटना चतुर्थी, विक्षिप्ता** पञ्चमी[1] वर्जनीया, **वेदिका षष्ठी** विवर्जनीयेति । द्वारगाथेयम् **॥२६७॥**

इदानीं प्रतिपदं भाष्यकारो व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाऽऽह –

**५०५ वितहकरणं[2] च तुरियं अण्णं अण्णं व गिण्हणाऽऽरभडा ।**
**अंतो व होज्ज कोणा निसियण तत्थेव संमद्दा ॥१६१॥ निभा०**

**वितहकरणं** गाहा । **वितथं** विपरीतं यत्**करणं** तदारभटाशब्देनोच्यते, सा चारभटा प्रत्युपेक्षणा न कार्या, विपरीता प्रत्युपेक्षणा न कर्त्तव्येत्यर्थः । **वा** विकल्पे, इयं वाऽऽरभटोच्यते यदुत **त्वरितमाकुलं यदन्यान्यवस्तुग्रहणं** न कर्त्तव्यमित्यर्थः । आरभडेति भणिअं, इदानीं संमर्दा व्याख्यायते, तत्राह–**अंतो व होज्ज कोणा निसियण तत्थेव संमद्दा। अन्त**र्मध्यप्रदेशे वस्त्रस्य संवलिताः **कोणा** यत्र **भवन्ति** सा **संमर्दो**च्यते, सा प्रत्युपेक्षणायां तादृशी क्रिया न कार्या, **निसीयण तत्थेव** त्ति **तत्रैवो**पधिकायामुपविश्य [3]यत्प्रत्युपेक्षणं करोति सा वा **संमर्दो**च्यते, सा च न कर्त्तव्येति ॥१६१॥

संमद्देति भणिअं, इदानीं मोसलीवर्जनं प्रतिपादनायाह –

**५०६ मोसलि पुव्वुद्दिट्ठा पप्फोडण रेणुगुंडिए चेव ।**
**विक्खेवं तु क्खेवो वेइयपणगं च छद्दोसा ॥१६२॥ निभा०**

**मोसलि** गाहा । **मोसलि पूर्वोद्दिष्टा** पूर्वमेव भणितेत्यर्थः । मोसलि त्ति गयं, इदानीं पप्फोडण त्ति व्याख्यायते, तत्राह–**पप्फोडण रेणुगुंडिए चेव** प्रकर्षेण धूननं स्फोटनं **प्रस्फोटनम्, तद्रेणुगुण्डितस्येव** वस्त्रस्य करोति, यथाऽन्यः कश्चिद् गृहस्थो रेणुना गुण्डितं सद्वस्त्रं प्रस्फोटयति, एवमसावपि, इयं च न कर्त्तव्या। पप्फोडण त्ति गयं, विक्खित्त त्ति भण्यते, तत्राह–'**विक्खेवं तु क्खेवो**' **विक्षेपां** तु तां विद्धि यत्र वस्त्रस्यान्यत्र **क्षेपणम्**, एतदुक्तं भवति–प्रतिलेखयित्वा वस्त्रमन्यत्र जवनिकादौ क्षिपति,अथवा **विक्षेपो** वस्त्राञ्चलानामूर्ध्वं यत्क्षेपणं स उच्यते, स च प्रत्युपेक्षणायां

१. पञ्चमी वे० दा० २. वितहकरणे व त.द. ३. यत्प्रत्युपेक्षणाकरणं आ०

न कार्यः । विक्खित्त त्ति गयं, **वेदिय** त्ति व्याख्यायते, तत्राह—"[A]वेइयपणगं च वेदिका पञ्चप्रकारा, तंजहा-उड्डवेइया अहोवेइया तिरिअवेइया दुहओवेइया एगओवेइया, तत्थ उड्डवेइया उवरि जण्णुयाणं हत्थे काऊण पडिलेहइ, अहोवेइया अहोजण्णुयाणं हत्थे काऊण पडिलेहेइ," तिरियवेइया संडासणागं मज्झे हत्थे णेऊण पडिलेहेति, दुहतोवेदिया बाहाणं [१]अंतरे दो वि जण्णुगा काऊण पडिलेहेति, एगतो वेदिया एगं जण्णुअं बाहाणं अंतरे काऊण पडिलेहेति ।" इदं **वेदिकापञ्चकं** प्रत्युपेक्षणां कुर्वता न कर्त्तव्यम् । **छद्दोसा** इति एत आरभटादयः **षड् दोषाः** प्रत्युपेक्षणां कुर्वता न कर्त्तव्या इति **॥१६२॥**

तथैते च दोषाः प्रत्युपेक्षणायां न कर्त्तव्याः —

**५०७ पसढिल पलंब लोला ए[२]गामोसा अणेगरूवधुणणा ।**
**कुणइ प[३]माणपमायं संकिए गणणोवगं कुज्जा ॥२६८॥ नि० । दारगाहा ।**

**पसढिल** गाहा । **पसिढिलं** दृढं न गृहीतम्, **पलंब** त्ति **प्रलम्बमाना**ञ्चलमेकान्ते गृहीतं ततश्च प्रलम्बते, **लोला** इति भूमौ **लोलते** हस्ते वा पुनः पुनर्लोलयति प्रत्युपेक्षयन् । लोल त्ति गयं, "[B]**एगामोस** त्ति मज्झे गहिऊण हत्थेहिं वत्थं घसंतो तिभागावसेसं जाव नेइ, दोहिं वि पासेहिं जाव गिण्हणा इत्यर्थः । अहवा तिहिं अंगुलीहिं घेत्तव्वं तं एक्काए चेव गिण्हइ ।" अहवा **णेगामोसा** इति केचित्पठन्ति, तत्र नैक आमर्शा **अनेकामर्शा** अनेकस्पर्शा इत्यर्थः । "[C]**अणेगरूवधुणण** त्ति **अणेग**पगारं कंपेइ, अथवा अणेगाणि वत्थाणि एगओ काऊण **धुणइ** । तथा **कुणइ पमाणपमायं** ति पुरिमेसु खोटकेसु वा यत्**प्रमाण**मुक्तं तत्र **प्रमादं करोति,** एतदुक्तं भवति-तान् पुरिमादीन् न्यूनानधिकान् वा करोति, **संकिते गणणोवगं कुज्ज** त्ति शङ्किता चासौ गणना च शङ्कितगणना तां शङ्कितगणनामुपगच्छति या प्रत्युपेक्षणा

A वेदिकापञ्चकं च- वेदिका पञ्चप्रकारा, तद्यथा- उर्ध्ववेदिका, अधोवेदिका, तिर्यग्वेदिका, द्विधातोवेदिका, एकतोवेदिका । तत्र उर्ध्ववेदिका- हस्तं जानुनामुपरि कृत्वा प्रतिलेखयति, अधोवेदिका हस्तं जानुनामधो कृत्वा प्रतिलेखयति । तिर्यग्वेदिका- संदशकानां मध्ये हस्तं नीत्वा प्रतिलेखयति, द्विधातोवेदिकाबाहूनामन्तरे द्वावपि जानूनी कृत्वा प्रतिलेखयति । एकतोवेदिका- एकं जानूकं बाहुनामन्तरे कृत्वा प्रतिलेखयति ।

B एगामोस त्ति । हस्ताभ्यां वस्त्रं मध्ये गृहीत्वा घर्षयन् त्रिभागावशेषं यावन्नयति, द्वाभ्यां वा पार्श्वाभ्यां यावद् ग्रहणमित्यर्थः । अथवा त्रिभिरङ्गुलिभिर्गृहीतव्यम्, तदेकयैव गृह्णाति ।

C अनेकरूपधूननेति-अनेकप्रकारं कम्पयति, अथवा अनेकानि वस्त्राणि एकतः कृत्वा धुनाति ।

१. अंतरं जहन्नगाणि का० क० २. णेगामोसा हे० ३. पमाणे प० ह० हे० ता.

सा शङ्कितगणनोपगा तामेवंगुणविशिष्टां न कुर्यात्, एतदुक्तं भवति-पुरिमादयः शङ्किता न जानाति कियन्तो गता इति ततो गणनां करोति, अथवाऽनाभोगात् **शङ्किते** सति गणनोपगां गणनामुपगच्छतीति गणनोपगा तां **गणनोपगां** गणनायुक्तां प्रत्युपेक्षणां **करोति** पुरिमादीन् गणयतीत्यर्थः[1] । द्वारगाथेयम् ॥२६८॥

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयन्नाह –

**५०८ पसिढिलमघणं अणिरायय[2] व विसमगह लंबकोणं[3] वा ।**
**भूमीकरलोलणया कड्ढणगहणेग आमोसा ॥१६३॥ निभा०**

**पसिढिल** गाहा । **प्रशिथिलमघनमदृढं** गृह्णाति, **अनिरायतं[4] वा**ऽतंडितं वा प्रशिथिलमुच्यते । पसिढिल त्ति गयं, पलंब त्ति भण्यते–**विसमगह लंबकोणं व** त्ति **विषमग्रहणे** सति **लम्बकोणं** भवति वस्त्रम् । पलंब त्ति गयं, लोला भण्यते, अत्राह–'**भूमीकरलोलणया**' **भूमौ लोलयति, करे** हस्ते वा लोलयति प्रत्युपेक्षयन्। 'लोल'त्ति गयं, एगामोस त्ति भण्यते, तत्राह–**कड्ढणगहणेग आमोसा** मध्ये वस्त्रं **गृहीत्वा** ताव**दाकर्षणं** करोति यावत्त्रिभागशेषग्रहणं जातम्, इयं एगामोसा एकाघर्षणमित्यर्थः । अथवाऽऽ**कर्षणे ग्रहणे चानेक आमोसा** अनेकानि स्पर्शनानि, एतदुक्तं भवति-तद्वस्त्रमनेकधा स्पृशति ॥१६३॥

एगामोस त्ति गयं, अणेगरूवधुणण त्ति (नि.२६८) भण्यते –

**५०९ धुणणा तिण्ह परेणं बहूणि वा घित्तु एक्कओ[5] धुणइ ।**
**खोडणपमज्जणासु य संकिए गणणं[6] करि पमाई ॥१६४॥ निभा०**

**धुणणा** गाहा । **धुनना** कम्पना **त्रयाणां** पुरिमाणां **परत** उपरिष्टाद्यत्करोति, अत्र च त्रयाणां परत इति यदुक्तं तदेकवस्त्रापेक्षया[7], **बहूनि वा गृहीत्वा** वस्त्राणि **एकीकृत्य** यौगपद्येन **धुनाति** प्रस्फोटयति । अणेगधुणण त्ति भणिअं, कुणइ पमाणे पमायं ति भण्णइ, तत्राह–'**खोडणपमज्जणासु य**' **खोटकेषु** नवसु **प्रमार्जनासु च** नवसु प्रमादं करोति । कुणइ पमाणे पमायं ति गयं, संकिए गणणोवगं ति भण्णइ, अत्राह-**संकिए गणणं करि पमाई । शङ्किते** सति **गणनां करोति** यः **प्रमादी** भवति । एवमियमित्थम्भूता प्रत्युपेक्षणा न कर्त्तव्येति स्थितम् ॥१६४॥

---

१. गणयन्नित्यर्थः क० २. अणिराइयं च पा.य. अणिरायय च त.ह. ३. ०कोणे वा दा. हे. ह. य. ४. अतिरायितं ली. ५. एक्कइ दा. ६. गणणं करे ह० हे० ७. तद्वस्त्रकाहित्यापेक्षया क०

किंविशिष्टा पुनः कर्त्तव्या इति ? अत आह –

**५१० अणूणाइरित्तपडिलेहा अविवच्चासा तहेव य ।**
**पढमं पयं पसत्थं सेसाणि उ अप्पसत्थाणि ॥२६९॥ नि०**

**अणूणाइरित्त** गाहा । **अन्यूनातिरिक्ता** [1]**अविपर्यासेन प्रत्युपेक्षणा** कर्त्तव्या, एभिश्च त्रिभिः पदैरष्टौ भङ्गाः सूचितास्तेषां चैषा स्थापना –

| | | |
|---|---|---|
| ऽ | ऽ | ऽ |
| । | ऽ | ऽ |
| ऽ | । | ऽ |
| । | । | ऽ |
| ऽ | ऽ | । |
| । | ऽ | । |
| ऽ | । | । |
| । | । | । |

एतेषां **प्रथमं पदं प्रशस्तं शेषाणि त्वप्रशस्तान्य**नादेयानि ॥२६९॥

इदानीं भाष्यकारः शुद्धाशुद्धप्रदर्शनायाह –

**५११ नवि ऊणा नवि रित्ता अविवच्चासा य पढमओ सुद्धो ।**
**सेसा होंति असुद्धा उवरिल्ला सत्त जे भंगा ॥१६५॥ निभा०**

**नवि ऊणा** गाहा । **नापि न्यूना नाप्यतिरिक्ता** [2]**अविपर्यासेन च,** अयं **प्रथमो** भङ्गः **शुद्धः**, शेषं सुगमम् ॥१६५॥

इदानीं येऽशुद्धाः सप्त भङ्गकाः प्रदर्शितास्त एवं भवन्ति –

**५१२ खोडणपमज्जवेलासु चेव ऊणाहिया मुणेयव्वा ।**
**अरुणावासग १ पुव्वं २ परोप्परं ३ पाणिपडिलेहा ४ ॥२७०॥ नि०**

**खोडपमज्जण** गाहा । **खोटका** यदि ऊना अधिका वा क्रियन्ते ततो[3]ऽशुद्धता भवति, **प्रमार्जना** च नवसङ्ख्यया यद्यूना अधिका वा क्रियते ततोऽशुद्धता भवति, **वेलायां च** न्यूनायामधिकायां वा प्रत्युपेक्षणायां क्रियमाणायामशुद्धा भङ्गका भवन्ति, एवं ते **न्यूनाधिका** भवन्ति **विज्ञेयाः** । आह—वेलायां न्यूनाधिकायां प्रत्युपेक्षणायां क्रियमाणायां दोष उक्तस्तत्कस्यां पुनर्वेलायां प्रत्युपेक्षणा कर्त्तव्या ? तत्र केचनाहुः- **'अरुणावासग पुव्वं' अरुणादावश्यकं पूर्व**मेव कृत्वा ततोऽरुणोद्गमनसमये प्रभास्फुटनवेलायां प्रत्युपेक्षणा क्रियते १, अपरे त्वाहुः-अरुणोद्गमे सति प्रभायां स्फुटितायां सत्यामावश्यकं **पूर्वं** प्रथमं कृत्वा ततः प्रत्युपेक्षणा क्रियते २, अन्ये त्वाहुः-**परोप्परं** ति **परस्परं** यदा मुखानि विभाव्यन्ते तदा प्रत्युपेक्षणा क्रियते ३, अन्ये त्वाहुः- **पाणिपडिलेहा** यस्यां वेलायां **पाणिरेखा** दृश्यन्ते तस्यां वेलायां **प्रत्युपेक्षणा** क्रियते ४ ॥२७०॥

---

१. अविपर्ययेण क० २. अविपर्ययेण क. ३. ऽशुद्धा क.

सिद्धान्तवाद्याह –

**५१३ एते उ अणाएसा अंधारे उग्गए वि हु न दीसे ।**
**मुहरयनिसिज्जचोले कप्पतिग दुपट्ट थुइ सूरो ॥२७१॥ नि०**

**एते उ** गाहा । **एते** सर्व एव **अनादेशा** असत्पक्षाः, यतः **अंधारे उग्गए वि हु न दीसे । अन्धकारे** प्रतिश्रय **उद्गतेऽपि** सूर्ये रेखा **न दृश्यन्ते** तस्मादसत्पक्षोऽयम्, शेषं पक्षत्रयं सान्धकारत्वादेव दूषितमेव द्रष्टव्यम्, तत्कस्यां वेलायां प्रत्युपेक्षणा कार्या ? इत्यत आह–मुहरयनिसिज्जचोले कप्पतिगदुपट्टथुई सूरो **मुख** इति **मुखवस्त्रिका, रय** इति **रज़ोहरणम्, निसिज्जा** रजोहरणस्योपरितनपट्टः, **चोले** त्ति **चोलपट्टकः कप्पतिग** त्ति एक और्णिको द्वौ सौत्रिकौ, **दुपट्ट** त्ति संस्तारकपट्ट उत्तरपट्टश्च, **थुइ** त्ति प्रतिक्रमणसमाप्तौ ज्ञानदर्शनचारित्रार्थं **स्तुति**त्रये दत्ते सत्येतेषां मुखवस्त्रिकादीनां प्रत्युप्रेक्षणासमाप्त्यनन्तरं यथा **सूर्य** उद्गच्छति एष प्रत्युपेक्षणा-कालविभाग इति ॥२७१॥

यदुक्तं प्रागुपधेर्विपर्यासः प्रत्युपेक्षणायां न कर्त्तव्य इत्युत्सर्गतोऽभिहितम्, तस्यापवादमाह –

**५१४ पुरिसुवहिविवच्चासो सागरिए करिज्ज उवहिवच्चासं ।**
**आपुच्छित्ता व गुरुं पहुव्वमाणेयरे वितहं ॥२७२॥ नि०**

**पुरिसुवहि** गाहा । तत्र विपर्यासो द्विविधः **पुरुषविपर्यास उपधिविपर्यास**श्च, तत्रोपधिविपर्यासप्रतिपादनायाह–**सागारिए करिज्ज उवहिवच्चासं । सागारिके** स्तेनादिके सत्यागते **विपर्यासः क्रियते** [1]प्रत्युपेक्षणायाम्, प्रथमं पात्रकाणि प्रत्युपेक्षन्ते पश्चाद्वस्त्राणि । एवमयं प्रत्युषसि विपर्यासः प्रत्युपेक्षणायाम्, एवं विकालेऽपि सागारिकानागन्तुकान् ज्ञात्वा । इदानीं पुरुषविपर्यास उच्यते, तत्राह–'**आपुच्छित्ता व गुरुं पहुव्वमाणे' आपृच्छ्य गुरु**मात्मीयामुपधिं ग्लान[2]सत्कां वा प्रत्युपेक्षते, कदा? अत आह–**पहुव्वमाणे** यदाऽऽभिग्रहिका उपधिप्रत्युपेक्षकाः **पहुव्वंति पर्याप्यन्ते** तदैवं [3]करोति । **इतरे वितहं** ति **इतर** आभिग्रहिका यदा न सन्ति तदा प्रथम-मात्मीयामुपधिं प्रत्युपेक्षमाणस्य **वितथम**नाचारो भवतीत्यर्थः ॥२७२॥

तत्र न केवलं प्रत्युपेक्षणाकाल उपधिविपर्यासं कुर्वतो वितथमनाचारो भवति,

---

१. प्रत्युपेक्षणायाः प्र० क० २. ०सत्कं वा क० ३. कुर्वति क०

एवं च वितथं भवति –

**५१५ पडिलेहणं करेंतो मिहो कहं कुणइ जणवयकहं वा ।**
**देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥२७३॥ नि०**

**पडिलेहणं** गाहा । **प्रत्युपेक्षणां कुर्वन्मिथः कथां** मैथुनसंबद्धां **करोति जनपदकथां वा, प्रत्याख्यानं वा** श्रावकादेर्ददाति, **वाचयति** कञ्चित्साधुं पाठयतीत्यर्थः । **सयं पडिच्छति वा, स्वयं वा प्रतीच्छत्या**त्मना वाऽऽलापकं दीयमानं प्रतीच्छति गृह्णाति ॥२७३॥

एतच्च कुर्वन् षण्णामपि जीवनिकायानां विराधको भवति, अत आह –

**५१६ पुढवी आउक्काए तेऊवाऊवणस्सइतसाणं ।**
**पडिलेहणापमत्तो छण्हं पि विराहओ होइ ॥२७४॥ नि०**

**पुढवी** गाहा । सुगमा ॥२७४॥

['पुढवी'ति स्पष्टम्, नवरं 'पुढवीआउक्काय'त्ति पृथिव्यप्काययोः 'प्रतिलेखनाप्रमत्तो' मिथः कथादिना तत्रानवहितः सन् षण्णामपि, आस्तामेवैकादीनामित्यपिशब्दार्थः, विराधकश्चैवम्-प्रमत्तो हि कुम्भकारशालादौ स्थितो जलभृतघटादिकमपि प्रलोठयेत्, ततस्तज्जलेन मृदग्निबीजकुन्थ्वादयः प्लाव्यन्ते, प्लावनातश्च विराध्यन्ते, यत्र चाग्निस्तत्रावश्यं वायुरिति षण्णामपि द्रव्यतो विराधकत्वम्, भावतस्तु प्रमत्ततयाऽन्यथाऽपि विराधकत्वमेव । [उत्त.अ.२६-३०]]

कथं पुनः षण्णामपि कायानां विराधकः ? अत आह –

**५१७ घडगादिपलोट्टणया मट्टिय अगणी य बीय कुंथाई ।**
**उदगगया व तसेयर [1]उम्मुग संघट्ट [2]झावणया ॥२७५॥ नि०**

**घडगाइ** गाहा । स हि साधुः [3]कुम्भकारशालादौ वसतौ प्रत्युपेक्षणां कुर्वन्ननुपयुक्तस्तोय**घटादि प्रलोठयेत्**, स च तोयभृतो घटो **मृत्तिकाग्निबीज-कुन्थ्वादीना**मुपरि प्रलुठितस्ततश्चैतान् व्यापादयेत्, यत्राग्निस्तत्र वायुरप्यवश्यंभावी, अथवाऽनया भङ्ग्या षण्णां कायानां व्यापादकः, **उदगगता व तसेतर** त्ति योऽसौ **उदकघटः** प्रलोठितस्तद्गता एव **त्रसा** भवन्ति पूतरकादयः, **इतर** त्ति वनस्पतिकायश्च, तथा वस्त्रान्तेन **चोल्मुकं सङ्घट्टयेत्** चालयेत्, ततश्च **झावणय** त्ति तेनोल्मुकेन चालितेन सता प्रदीपनकं सञ्जातं ततश्च संयमात्मविराधना जातेति ॥२७५॥

---

१. ओमुय ह० २. झामणया सं. ३. कुम्भकारादिवसतौ दा०

**५१८ इय दव्वओ य छण्हं पि विराहओ भावओ वि इहरहा वि ।**
**उवउत्तो पुण साहू संपत्तीए वि अवहओ उ ॥७८॥ प्र०**

[उक्तं हि-"इय दव्वओ उ छण्हं विराहतो भावतो इहरहा वि । उवउत्तो पुण साहू संपत्तीए वऽवहओ उ ॥१॥" तदनेन जीवरक्षार्थत्वात्प्रतिलेखनायास्तत्काले च प्रमादजनकत्वेन हिंसाहेतुत्वान्मिथः कथादीनां परिहार्यत्वमुक्तम् । [उत्त.अ.२६-३०]]

अथोपयुक्तः प्रत्युपेक्षणां करोति ततश्चैतेषामेव षण्णां जीवनिकायानामाराधको भवति, एतदेवाह –

**५१९ पुढवी आउक्काए तेऊवाऊवणस्सइतसाणं ।**
**पडिलेहण[1]माउत्तो छण्हंऽप्पाऽऽराहओ[2] होइ ॥२७६॥ नि०**

**पुढवी** गाहा । सुगमा । नवरम् **आराधको**ऽविराधको **भवति** । न केवलं प्रत्युपेक्षणा, अन्योऽपि यः कश्चिद् व्यापारो भगवन्मते सम्यक् प्रयुज्यते स एव दुः[3]खक्षयायालं भवति ॥२७६॥

एतदेवाह –

**५२० जोगो जोगो जिणसासणंमि दुक्खक्खया पउंजंतो ।**
**अण्णोण्णमबाहाए असवत्तो होइ कायव्वो ॥२७७॥ नि०**

**जोगो** इत्यादि । **योगो योग** इति वीप्सा, ततश्च व्यापारो **जिनशासने** प्रयुज्यमानो **दुःखक्षयाय** [4]**प्रयुज्यमानः** क्रियमाणः, कथम् ? **अन्योऽन्याबाधया** परस्परापीडया, एतदुक्तं भवति-यथा क्रिया क्रियमाणा नान्येन क्रियान्तरेण बाध्यते एवमन्योऽन्याबाधया प्रयुज्यमानः, **असवत्तो असपत्नो**ऽविरुद्धो **भवति कर्त्तव्यः** ॥२७७॥

इदानीं फलं प्रदर्शयन्नाह –

**५२१ [5]जोगे जोगे जिणसासणंमि दुक्खक्खया [6]पउंजंते ।**
**एक्केक्कंमि अणंता वट्टंता केवली जाया ॥२७८॥ नि०**

**जोगे** गाहा । सुगमा । नवरम् **एकैकस्मिन् योगे** व्यापारे **वर्त्तमाना अनन्ताः केवलिनो जाता** इति ॥२७८॥

---

१. ०णा आउत्तो हे० संपा० ०णाऽपमत्तो ह० २. आराहउ भणिउ पा. ३. कर्मक्षया० क० ४. क्रिय० क० ५. जोगो जोगो ह० हे० ६. पउंजंतो ह० हे०

**५२२ एवं पडिलेहंता अईयकाले अणंतगा सिद्धा ।**
**चोयगवयणं सययं पडिलेहेमो जओ सिद्धी ॥२७९॥ नि०**

**एवं** गाहा । **एवं** प्रत्युपेक्षणां कुर्वन्तो**ऽतीतकालेऽनन्ताः सिद्धाः** । एवमाचार्येणोक्ते सति **चोयगवयणं** अत्र **चोदकवचनं** चोदकपक्षः, किं तद् ? इत्याह-**सततं पडिलेहेमो** यद्येवं प्रत्युपेक्षणाप्रभावादनन्ताः सिद्धास्ततः **सततमेव** प्रत्युपेक्षणामेव कुर्मः, किमन्येन योगेनानुष्ठितेन ? **यतस्तत** एव **सिद्धि**र्भवति ॥२७९॥

आचार्यः प्राह –

**५२३ सेसेसु अवट्टंतो पडिलेहंतो वि देसमाराहे ।**
**जइ पुण सव्वाराहणामिच्छसि तो णं निसामेहि ॥२८०॥ नि०**

**सेसेसु** गाहा । **शेषेषु** योगे**ष्ववर्त्तमानः** सम्यक् शास्त्रोक्तेन न्यायेन प्रत्युपेक्षणां कुर्वन्नपि **देशत आराधक** एवासौ, न तु सर्वमाराधितं भवति, तेन **यदि पुनः संपूर्णामाराधनामिच्छसी**त्यादि सुगमम् ॥२८०॥

कथं च सर्वाराधको भवति ? अत आह –

**५२४ पंचिंदिएहिं गुत्तो मणमाईतिविहकरणमाउत्तो ।**
**तवनियमसंजमंमि य [१]जुत्तो आराहओ होइ ॥२८१॥ नि० दारगाहा ।**

**पंचिंदिय** गाहा । **पञ्चभिरिन्द्रियैर्गुप्तो मानसादिना त्रिविधेन करणेनायुक्त** यत्नवान् **तपसा** द्वादशविधेन **युक्तः, नियम** इन्द्रियनियमो नोइन्द्रियनियमश्च तेन **युक्तः, संयमः** सप्तदशप्रकारः "[A]पुढविक्काओ आउक्काओ तेउक्काओ वाउक्काओ वणस्सइकाओ बेइंदिय-तेइंदिय-चउरिंदिय-पंचिंदिय-अजीवकाय-संजमो पेहा-उप्पेहा-पमज्जणं परिट्ठावणं मण-वइ-काए" । अत्र संयतः सन् मोक्ष**स्याराधको भवति** प्रव्रज्याया वा**ऽऽराधकः** । द्वारगाथेयम् ॥२८१॥

इदानीं भाष्यकार एतां गाथां प्रतिपदं व्याख्यानयति, तत्र पंचिंदिएहिं गुत्तो त्ति प्रथममवयवं व्याख्यानयन्नाह –

---

A पृथ्वीकायः, अप्कायः, तेजस्कायः, वायुकायः, वनस्पतिकायः, द्वीन्द्रीय-त्रीन्द्रिय-चतुरेन्द्रिय-पञ्चेन्द्रिय-अजीवकायसंयम-प्रेक्षा-उपेक्षा-प्रमार्जन-परिष्ठापन-मन-वचन-कायः ।

१. जातो हे०

**५२५ इंदियविसयनिरोहो पत्तेसु वि रागदोसनिग्गहणं ।**
**अकुसलजोगनिरोहो कुसलोदय एगभावो वा ॥१६६॥ निभा०**

**इंदियविसय** गाहा । इन्द्रस्यामूनी**न्द्रियाणि** तेषां **विषयाः** शब्दादयः, तेषां यो **निरोधः** सा पञ्चेन्द्रियगुप्तिरभिधीयते, अयमप्राप्तानां शब्दादिविषयाणां निरोधः, तथा **पत्तेसु वि रागदोसनिग्गहणं** ति तथा **प्राप्तेषु** गोचरमागते**ष्वपि** शब्दादिविषयेषु **रागद्वेषयोर्निग्रहणं** यत्सा पञ्चेन्द्रियगुप्तता, तत्रेष्टशब्दादिविषयप्राप्तौ रागं न गच्छति, अनिष्टशब्दादिविषयप्राप्तौ द्वेषं न गच्छति, भणिता पञ्चेन्द्रियगुप्तता, इदानीं मणमाई-तिविहकरणमाउत्तो[1] भन्नति, तत्राह—**अकुसलजोगनिरोहो अकुशलानाम**शोभनानां मनोवाक्काय**योगानां** व्यापाराणां यो **निरोधः** सा त्रिविधकरणगुप्तता[2], तथा **कुसलोदय** त्ति **कुशलानां** प्रशस्तानां मनोवाक्कायव्यापाराणां य **उदयः** सा त्रिविधकरणाऽऽयुक्तता[3], तथा **एगभावो व** त्ति न कुशलेषु योगेषु प्रवृत्तिर्नाप्यकुशलेषु योगेषु प्रवृत्तिर्या मध्यस्थता सा वा त्रिविधकरणगुप्तता ॥१६६॥

भणिता त्रिविधकरणगुप्तता, इदानीं 'तव'त्ति भण्णति —

**५२६ अब्भिंतरबाहिरगं तवोवहाणं दुवालसविहं पि ।**
**इंदियतो पुव्वुत्तो नियमो कोहाइओ बिइओ ॥१६७॥ निभा०**

**अब्भिंतर** गाहा । **अभ्यन्तरं बाह्यं** च यत्**तप उपधानम्**उपदधातीत्युपधान-मुपकरोतीत्यर्थः । तत्तप उपधानं **द्वादशविधमपि** तप उच्यते । तवो गओ, नियमो भण्णति, स च द्विविधः-इन्द्रियनियमो नोइन्द्रियनियमश्च, तत्र **इन्द्रियत** इन्द्रियाण्यङ्गीकृत्य **पूर्वोक्तो नियमः, कोहाइओ बिइओ** त्ति **द्वितीयो** नोइन्द्रिय-नियमः [4]**क्रोधादिकः, आदिग्रहणान्मानमायालोभा** गृह्यन्ते, एतेषां नियमो निरोधः ॥१६७॥

नियमो त्ति गयं, इदानीं संजमो भण्णइ, स च सप्तदशप्रकारस्तत्राह —

**५२७ पुढविदगअगणिमारुयवणस्सईबितिचउक्कपंचिंदी ।**
**अजीव पोत्थगाइसु गहिएसु असंजमो जेणं ॥१६८॥ निभा०**

**पुढवि** गाहा । **पुढविदगअगणिमारुअवणस्सईबेइंदिअतेइंदियचउरिंदिअ-**

---

१. ०माउत्तया क० २. ०करणायुक्तता दा० ३. ०करणगुप्तता क० ल० ४. क्रोधादीनाम् दा.

**पंचिंदिआ** । तथा **अजीव** त्ति **अजीवेषु** पनकसंसक्त**पुस्तकादिषु गृहीतेष्वसंयमो** भवति **येन** तत्र ग्राह्यम्, **आदिशब्दात्** [१०९] [१] दूसपणगं [११०] तणपणगं [१११] चम्मपणगं च, [२] एतेष्वपरिगृहीतेषु संयमः, परिगृहीतेष्वसंयमः ॥१६८॥

तथा –

**५२८ पेहित्ता संजमो वुत्तो उपेहित्ता वि संजमो ।**
**पमज्जित्ता संजमो वुत्तो परिट्ठवित्ता वि संजमो ॥१६९॥ निभा०**

**पेहित्ता** गाहा । प्रेक्षासंयमश्चक्षुषा यन्निरूपणम्, ततश्चैवं पूर्वं चक्षुषा निरूपयतः प्रेक्षा**संयम उक्तः** । **उपेहित्ता वि संजमो** त्ति उपेक्षा द्विप्रकारा तां कुर्वतः **संयम** उक्तस्तां च वक्ष्यति । **पमज्जित्ता संजमो वुत्तो** त्ति **प्रमार्जयतः संयम उक्तः** । **परिट्ठवित्ता वि संजमो** त्ति **परिष्ठापयतः** परित्यजतोऽपि पानकाद्यतिरिक्तं **संयम उक्तः**, एवमेते चतुर्दश, मनोवाक्कायसंयमश्च त्रिविध उक्त एव द्रष्टव्यः ॥१६९॥

इदानीं भाष्यकृद्व्याख्यानयति, प्रथमगाथार्थ एकाकिकारणिकगमनयतनायामुक्तः, अजीवपुस्तकादिसंयमोऽपि अचित्तवनस्पतिगमनयतनायां व्याख्यात एव द्रष्टव्यः, इदानीं यदुपन्यस्तं पेहित्ता संयम इत्यादि तत्र क्वचिद्व्याख्यातमिति व्याख्यानयन्नाह –

**५२९ ठाणाइ जत्थ चेए पुव्वं पडिलेहिऊण चेएज्जा ।**
**संजयगिहिचोयणाचोयणे य वावारउवेहा ॥१७०॥ निभा०**

**ठाणाइ** गाहा । स्थानमूर्ध्वस्थानं कायोत्सर्गादि, आदिग्रहणान्निषीद[३]नं त्वग्वर्त्तनस्थानं च गृह्यते, तत्**स्थानादि यत्र चेतयते, 'चिती संज्ञाने' (पा. धा. ३९)** जानाति चेष्टते करोति कर्त्तुमभिलषतीत्यर्थः, तत्र **पूर्वं** प्रथमं **प्रत्युपेक्ष्य** चक्षुषा निरीक्ष्य तत**श्चेतयते**, स्थानं कायोत्सर्गादि, उक्तः प्रेक्षासंयमः, इदानीमुपेक्षासंयम उच्यते, सा

---

१०९. दूसपणग-दूष्यपञ्चक-वस्त्रपञ्चके, (दश.) दूष्यं वस्त्रं तद् द्विविधम्-अप्रत्युपेक्ष्यं दुष्प्रत्युपेक्ष्यं च । तत्र अप्रत्युपेक्षितदूष्यपञ्चकं यथा-१ तूली, २ उपधानकम्, ३ गण्डोपधानिका, ४ आलिङ्गिनी, ५ मसूरकश्च । तथा दुष्प्रत्युपेक्षितदूष्यपञ्चकं यथा - १ पह्लविः, २ कोपविः, ३ प्रावारकः, ४ तवकः तथा ५ दृढगालिश्च । (जीत.)

११०. तणपणग-तृणपञ्चक-तृणानि च पञ्चोपयोगीनि । (धर्म.२ अधि.) तृणपञ्चकं पुनर्भणितं जिनैर्जितरागद्वेषमोहैर्यथा शालिव्रीहिककोद्रवरालकसंबन्धीनि तृणानि प्रलालप्रायाणि अरण्येऽरण्यविषयाणि च । (प्रव. ६८२-८२ द्वार)

१११. चम्मपणग-चर्मपञ्चक-अजादिचर्मपञ्चके, अजा एडका, गावो महिष्यश्च मृगाः, एतेषां सम्बन्धीनि पञ्च अजिनानि चर्माणि भवन्ति । (प्रव.६७६) (प्रव.८३ द्वार)

१. दुमपणगं च क० । २. एतेष्वपरिह्रतेषु संयमः, परिह्रतेष्वसंयमः क. । ३. ०दनास्थानं क०

चोपेक्षा द्विविधा, कथम् ? **संयतव्यापारोपेक्षा गृहस्थव्यापारोपेक्षा च**, तत्र च यथासङ्ख्यं **चोदनाचोदन**विषया, संयतस्य चोदनविषया **व्यापारोपेक्षा**, गृहस्थस्य चाचोदनविषया व्यापारोपेक्षा, एतदुक्तं भवति-साधुं विषीदन्तं दृष्ट्वा संयमव्यापारेषु चोदयतः संयतव्यापारोपेक्षा, उपेक्षाशब्दश्चात्र **'ईक्ष दर्शने' (पा. धा. ६४९)** उप-सामीप्येनेक्षा उपेक्षा, तथा गृहस्थव्यापारोपेक्षा, गृहस्थमधिकरणव्यापारेषु प्रवृत्तं दृष्ट्वाऽचोदयतो गृहस्थव्यापारोपेक्षा उच्यते, उपेक्षाशब्दश्चात्रावधीरणायां वर्त्तत इति **॥१७०॥**

इदानीं 'परिट्ठवित्ता वि संजमो' त्ति (निभा.१६९) व्याख्यायते, तत्राह –

**५३० उवगरणं अइरेगं पाणाई वाऽवहट्टु संजमणा ।**
**सागारिय अपमज्जण संजम सेसे पमज्जणया ॥१७१॥ निभा०**

**उवगरणं** गाहा । **उपकरणं** वस्त्रादि **यदतिरिक्तं** गृहीतं तथा **पाणाई वा** तथा **पानकादि वा यदतिरिक्तं** गृहीतं तद् **अवहट्टु** त्ति परित्यज्य, किम् ? **संजमणा संयमो** भवतीति, **आदिग्रहणाद्**भक्तं वाऽतिरिक्तं परित्यज्य संयमः । इदानीं "पमज्जित्ता वि संजमो (निभा.१६९) व्याख्यायते–**सागारिय अपमज्जण संजमो** सागारिकाणामग्रतो यत्पादाऽप्रमार्जनमसावेव **संयमः, सेसे पमज्जणय** त्ति **शेषेषु** सागारिकाद्यभावेषु **प्रमार्जनेनैव संयमः ॥१७१॥**

इदानीं योगत्रयसंयमप्रतिपादनायाह –

**५३१ जोगतिग पुव्वभणियं समत्तपडिलेहणाए सज्झाओ ।**
**चरिमाए पोरिसीए पडिलेहे [1]ताहे पत्तदुगं ॥१७२॥ निभा०**

**जोगतिग** गाहा । **योगत्रयं पूर्व**मेव व्याख्यातम्, मणमाइतिविहकरणमाउत्तो इत्यस्मिन् ग्रन्थे (नि. २८१ वृत्तौ) अत्रायमपि तथैव द्रष्टव्यम् । उक्तः सप्तदशप्रकारः संयमः, तत्प्रतिपादना[2]च्चोक्ता वस्त्रप्रत्युपेक्षणा, तत्समाप्तौ च किं कर्त्तव्यमित्यत आह– **समत्तपडिलेहणाए सज्झाओ । समाप्तायां प्रत्युपेक्षणायां स्वाध्यायः** कर्त्तव्यः सूत्रपौरुषीत्यर्थः, पादोनप्रहरं यावत् । इदानीं पात्रप्रत्युपेक्षणामाह–**चरिमाए चरिमायां** पादोन**पौरुष्यां प्रत्युपेक्षते ताहे** त्ति **तदा** तस्मिन् काले स्वाध्यायानन्तरं **पात्रकद्वितयं** प्रत्युपेक्षते ॥१७२॥

---

१. तओ उ ह० २. उक्ता प्रत्युपेक्षणा क० ल०

इदानीं यदुक्तं 'चरमपौरुष्यां पात्रकद्वितयं प्रत्युपेक्षणीयं' तत्र पौरुषी एव न ज्ञायते किंप्रमाणा ? अतस्तत्प्रतिपादनायाह –

**५३२ पोरिसिपमाणकालो निच्छयववहारिओ जिणक्खाओ ।**
**निच्छयओ करणजुओ ववहारमतो परं वोच्छं ॥२८२॥ नि०**

**पोरिसिपमाण** गाहा । **पौरुष्यां प्रमाणकालो** द्विविधः, **निश्चयतो व्यवहारतश्च** ज्ञातव्यः, तत्र निश्चयो भवत्येवं **निश्चयतो** निश्चयनयाभिप्रायेण **करणयुतो** गणितन्यायात्, **अतः परं व्यावहारिकं** व्यवहारनयमतेन **वक्ष्ये** ॥२८२॥

तत्र निश्चयपौरुषीप्रमाणकालप्रतिपादनायाह –

**५३३ [1]अयणाईयदिणगणे अट्ठगुणेगट्ठिभाइए लद्धं ।**
**उत्तरदाहिणमाई पोरिसि पयसु[2]ज्झ[3]पक्खेवा[4] ॥२८३॥ नि०**

[5]**अयणाई** गाहा । ॥२८३॥

[निश्चयतस्तु* -

**अयणाईयदिनगणे अट्ठगुणेगट्ठिभाइए लद्धं ।**

**उत्तरदाहिणमाई उत्तरपयसोज्झपक्खेवो ॥१॥**

अत्र चायनम्–उत्तरायणं दक्षिणायनं च तस्यातीतदिनानि–अतिक्रान्तदिवसास्तेषां गणः-समूहोऽयनातीतदिनगणः, स चोत्कृष्टतस्त्र्यशीतं शतं, तच्चाष्टगुणं जातानि चतुर्दशशतानि चतुःषष्ट्यधिकानि, तत्र चैकषष्ट्या भागे हृते लब्धानि चतुर्विंशतिरङ्गुलानि, तत्रापि द्वादशभिरङ्गुलैः पदमिति जाते द्वे पदे, एतयोश्च 'उत्तरदाहिणमाई'त्ति उत्तरायणादौ दक्षिणायनादौ च 'उत्तरपद'त्ति उत्तरपदयोः 'सोज्झ'त्ति शुद्धिः प्रक्षेपश्च, तत्र हि उत्तरायणप्रथमदिने चत्वारि पदान्यासन् ततस्तन्मध्यात्पदद्वयोत्सारणे जाते कर्कटसंक्रान्तिदिने द्वे पदे, दक्षिणायनाद्यदिने तु द्वे पदे अभूतां, तन्मध्ये च द्वयोः क्षिप्तयोर्जातानि मकरसङ्क्रान्तौ चत्वारि पदानि, इदं चोत्कृष्टजघन्यदिनयोः पौरुषीमानं, मध्यमदिनेष्वप्यभिहितनीतितः सुधिया भावनीयमिति। सूत्रार्थः । [उत्त. अ. २६/१३]]

१. अय० माई पाठ क०-उत्तरपदसोज्झपक्खेवो क. २. पक्खेवो=क० ३. पक्खेवो ह० हे० ४. सोज्झपक्खेवो ख०. ५. दक्षिणायने उत्तरायणदिनानि उत्तरायणे दक्षिणायनदिनानि मीलयित्वा गण्यन्ते, स च राशिरष्टभिर्गुण्यते, एकषष्ट्या भागो ह्रियते, लब्धान्यङ्गुलानि, द्वादशाङ्गुलैः पादः, यावत्पुनरपि मकरदिने चत्वारि पादाः । (दाहिण त्ति-कर्कदिने २ पादौ, शेषेषु पदशुद्धिप्रक्षेपौ) *मुद्रितेषु प्रकाशिता इयं वृत्तिः क-ख-ग-घ-ल-ताडप्रतिषु नोपलभ्यते ।

**५३४ अट्ठेगसट्ठिभागा खयवुड्ढी होइ जं अहोरत्ते ।**
**तेणट्ठगुणक्कारो एगट्ठी सूरतेएणं ॥७९॥ प्र०**

**५३४A कक्कडसंकंतिदिणे पोरिसिमाणं इमं मुणेयव्वं ।**
**तत्तो परं तु वुड्ढी दक्खिणअयणे इमा नेया ॥७९A॥ प्र०**

**५३४B अट्ठेगसट्ठिभागा पइदिवसं अंगुलस्स वड्ढंति**
**उत्तरअयणम्मि पुणो ति च्चिय हायंति पइदियहं ॥७९B॥ प्र०**

[१]इदानीं व्यवहारतः पौरुषीप्रमाणकालप्रतिपादनायाह –

**५३५ आसाढे मासे दोपया पोसे मासे चउप्पया ।**
**चेत्तासोएसु मासेसु तिपया होइ पोरिसी ॥२८४॥ नि०**

**आसाढ** गाहा । **आषाढे मासे** पौर्णमास्यां **द्विपदा** पौरुषी भवति, पदं च द्वादशाङ्गुलं ग्राह्यम्, **पौषे मासे** पौर्णमास्यां **चतुष्पदा** पौरुषी भवति, तथा **चैत्राश्वयुक्**पौर्णमास्यां **त्रिपदा पौरुषी भवति** ॥२८४॥

इदानीं कियती वृद्धिः कियत्सु दिनेषु ? कियती वा हानिरेतत्प्रतिपादयन्नाह –

**५३६ अंगुलं सत्तरत्तेणं पक्खेणं तु दुअंगुलं ।**
**वड्ढए हायए वा वि मासेणं चउरंगुलं ॥२८५॥ नि०**

**अंगुलं** गाहा । आषाढपौर्णमास्याऽऽरभ्याङ्गुलं **सप्तरात्रेण वर्धते, पक्षेणाङ्गुलद्वयं वर्धते** । तथा **मासेनाङ्गुलचतुष्टयं वर्धते,** इयं च वृद्धिरुत्तरोत्तरं तावन्नेया यावत्पौषमासपौर्णमास्यां पदचतुष्टयेन पौरुषी जातेति, हानिरपि पौषपौर्णमास्याः परत एवमेव द्रष्टव्या, यदुताङ्गुलं सप्तरात्रेणापह्रियते, पक्षेणाङ्गुलद्वयम्, मासेनाङ्गुल-चतुष्टयमपह्रियते, एवमियं हानिरुत्तरोत्तरं तावन्नेया यावदाषाढपौर्णमास्यां द्विपदा पौरुषी जातेति । स्थापना चेयम्–"[A]आसाढपुण्णिमाए पद २ पोरुसी, सावणपुण्णिमाए पद २ अंगुलं ४, भद्दवयपुण्णिमाए पद २ अंगुलं ८, आसोयपुण्णिमाए पद ३, कत्तियपुण्णिमाए पद ३ अंगुलं ४, मग्गसिरपुण्णिमाए पद ३ अंगुल ८, पोसपुण्णिमाए पद ४, एत्तियं जाव वुड्ढी । इतो आरंभहाणीमेव जाव आसाढो। माहपुण्णिमाए पद

---

A आषाढपूर्णिमायां पद २ पौरुषी, श्रावणपूर्णिमायां पद २ अङ्गुलं ४, भाद्रपदपूर्णिमायां पद २ अङ्गुलं ८, अश्वयुक् पूर्णिमायां पद ३, कार्तिकपूर्णिमायां पद ३ अङ्गुलं ४, मृगशीर्षपूर्णिमायां पद ३ अङ्गुलं ८, पौषपूर्णिमायां पद ४, एतावन्ती यावद् वृद्धिर्भवति । इत आरंभहानि एव यावद् आषाढः । माघपूर्णिमायां पद ३ अङ्गुलं

१. व्यवहारतोऽधुना० पौ० - व० ख०

३ अंगुल ८,फग्गुणपुण्णिमाए पद ३ अंगुल ४, चेत्तपुण्णिमाए पद ३, वइसाहपुण्णिमाए पद २ अंगुल ८, जेट्ठपुण्णिमाए पद २ अंगुल ४, आसाढपुण्णिमाए पद २, इत्तियं जाव हाणी ।

सूरसंवच्छरे दिन ३६६, अयणे दिन १८३ उउदिन ६१, मासे दिन ३०॥, भावत्थो इमो-सावणस्स पढमदिवसाओ आरब्भ वुड्ढी जदा भवति तदा दिवसे दिवसे अंगुलस्स सत्तमो भागो किंचिणूणो वड्ढइ, जदा उण हाणी तदा एवमेव अंगुलस्स सत्तमो भागो किंचिणूणो हायति, इमं भणियं होइ-सावणपढमदिवसे दोहिं पएहिं पोरुसी होइ अंगुलस्स य सत्तमभागेणं किंचूणं अहिया, एवं बितियदिवसे दो पयाइं दो अ सत्तभागा अंगुलस्स किंचिणूणा, एवं तइयदिवसे दो पयाइं अंगुलस्स य सत्तभागा तिण्णि किंचूणा, एवं एयाए वुड्ढिए ताव जाव सावणपुण्णिमाए दो पयाइं चत्तारि अंगुलाइं वुड्ढी जाया, एवं इमाए कमवुड्ढीए ताव णेयव्वं जाव पोसमासपुण्णिमा । तत्थ य चउप्पया पोरुसी, ततो परं माहपढमदिवसातो आरब्भ हाणी एतेण चेव कमेण णेयव्वा जाव आसाढपुण्णिमा" । आह-इदमुक्तं सप्तभिर्दिवसैरङ्गुलं वर्द्धते, तथा पक्षेणाङ्गुलद्वयं वर्द्धते इत्युक्तम्, तदयं विरोधः, कुतः ? यदा पक्षेणाङ्गुलद्वयं वर्द्धते तदाऽङ्गुलं सप्तभिः सार्द्धैर्दिवसैर्वर्द्धते ? आचार्यस्त्वाह, सत्यमेवमेतत्, किन्त्वनेनैतत्प्रख्याप्यते-वरं किञ्चिद्वृद्धायां पौरुष्यां पारितं मा भून्न्यूनायाम्, प्रत्याख्यानभङ्गभयात्, न्यूनता च पौरुष्या एवं भवति, या[१]ऽसौ मातुमारब्धा छाया तस्यां यदि प्रदीर्घायां भुङ्क्ते तदा न्यूना पौरुषी, अधिका च तदा भवति यदा सा छाया स्वल्पा भवतीति ॥२८५॥

---

८, फाल्गुनपूर्णिमायां पद ३ अङ्गुलं ४, चैत्रपूर्णिमायां पद ३, वैशाखपूर्णिमायां पद २ अङ्गुलं ८, ज्येष्ठपूर्णिमायां पद २ अङ्गुलं ४, आषाढपूर्णिमायां पद २, एतावन्ती यावद् हानिः ।

सूर्यसंवत्सरे दिन. ३६६, अयने दिन १८३, ऋतौ दिन ६१, मासे दिन ३०. अयं भावार्थः- श्रावणस्य प्रथमदिवसादारभ्य वृद्धिर्यदा भवति तदा दिवसे दिवसेऽङ्गुलस्य सप्तमो भागः किञ्चिदूनो वर्धते, यदा पुनर्हानिस्तदा एवमेवाङ्गुलस्य सप्तमो भागः किञ्चिदूनो हीयते, इदं भणितं भवति- श्रावणप्रथमदिवसे द्वाभ्यां पदाभ्यां पौरुषी भवति, अङ्गुलस्य च सप्तमभागेन किञ्चिदूनमधिका, एवं द्वितीयदिवसे द्वे पदे, द्वौ च सप्तमभागा अङ्गुलस्य किञ्चिदूना, एवं तृतीयदिवसे द्वे पदेऽङ्गुलस्य च सप्तभागास्त्रीणि किञ्चिदूना, एवमेतया वृद्ध्या तावद् यावत् श्रावणपूर्णिमायां द्वे पदे चत्वारि च अङ्गुलानि वृद्धिर्जाता, एवमनया क्रमवृद्ध्या तावन्नेतव्यं यावत् पौषपूर्णिमा । तत्र च चतुष्पदा पौरुषी, ततः परं माघप्रथमदिवसादारभ्य हानिरेतेन एव क्रमेण ज्ञातव्या यावदाषाढपूर्णिमा ।

१. यदि याऽसौ मातुमारब्धा छाया यदा तस्याः प्रदीर्घायाः । क. यदि या दा.

अधुना येषु मासेष्वहोरात्राणि पतन्ति तान् मासान् प्रतिपादयन्नाह –

**५३७ आसाढबहुलपक्खे भद्दवए कत्तिए य पोसे य ।**
**फग्गुणवइसाहेसु य बोधव्वा ओमरत्ताओ ॥२८६॥ नि०**

**आसाढ** गाहा । **आषाढ**मासस्य **बहुलपक्षे** कृष्णपक्षेऽहोरात्रं पतति, तथा **भाद्रपदे** बहुलपक्षे कृष्णपक्षेऽहोरात्रं पतति तथा **कार्तिक**बहुलपक्षे **पौष**बहुलपक्षे **फाल्गुन**बहुलपक्षे **वैशाख**बहुलपक्षे चैतेष्वहोरात्राणि पतन्ति । **ओमरत्तं अहोरात्रम्**, न च तैरहोरात्रैः पतद्भिः पौरुष्या न्यूनता वेदितव्या, अस्यार्थस्य ज्ञापनार्थमिदमुक्तम् ॥२८६॥

एवं तावत्पौरुष्याः प्रमाणमुक्तम्[1], या तु पुनश्चरमपौरुषी सा कियत्प्रमाणा भवतीत्यतस्तत्स्वरूपं प्रतिपादनायाह –

**५३८ जेट्ठामूले आसाढसावणे छहिं अंगुलेहिं पडिलेहा ।**
**अट्ठहि बितियतियंमि य तइए दस अट्ठहिं चउत्थे ॥२८७॥ नि०**

**जेट्ठामूले** गाहा । **ज्येष्ठमूले** मासे तथाऽऽ**षाढे श्रावणे** च **षड्भिरङ्गुलै**र्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति । **अट्ठहिं बितियतियंमि** त्ति भाद्रपदेऽश्वयुजि कार्त्तिके च तस्मिन् **द्वितीयत्रिकेऽष्टभि**रङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरम-पौरुषी भवति । **ततिए दसहि**[2] त्ति मार्गशिरे [मृगशीर्षे] पौषे माघे चैतस्मिन् **तृतीये** त्रिके **दशभि**रङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति । **अट्ठहिं चउत्थे** त्ति फाल्गुने चैत्रे वैशाखे चास्मिंश्च**तुर्थे** त्रिके**ऽष्टभि**रङ्गुलैर्यावदद्यापि पौरुषी न पूर्यते तावच्चरमपौरुषी भवति ॥२८७॥

**५३९ आसाढपुन्निमाए अंगुलछक्कं छुभित्तु पडिलेहा ।**
**अंगुलवुड्ढी सेसा पुस्संता हाणि माहाई ॥८०॥ प्र०**

एतस्यां चरमपौरुष्यां पात्रकाणि प्रतिलेख्यन्ते । स च पात्रकप्रत्युपेक्षणसमये[3] उपयोगपूर्वं कं व्यापारं करोतीत्यत आह –

**५४० उवउंजिऊण पुव्वं तल्लेसो जइ करेइ उवओगं ।**
**[4]सोएण चक्खुणा घाणएण जीहाए फासेणं ॥२८८॥ नि०**

---

१. ०मुपगतम्, यदि तु पुन० क० दस त्ति दा. ३. पेक्षणासमये पूर्वं व्या० दा.० – पेक्षणसमये उपयोगपूर्वमेनं व्या० दा. ४. सोतेण ह०

**उवउंजिऊण** गाहा । **उपयुज्योपयोगं** दत्त्वा **पूर्वमेव,** यदुत मयाऽस्यां वेलायां पात्रकाणि प्रत्युपेक्षणीयानीत्येवमुपयुज्य पुनः **तल्लेश्य** एव प्रत्युपेक्षणाभिमुख एव **जंति करेतीति यतिः** प्रव्रजितः पात्रकसमीप उपवि**श्योपयोगं करोति** मतिं व्यापारयति, कथम् ?- **श्रोत्रेण** श्रोत्रेन्द्रियेण पात्रक उपयोगं करोति, कदाचित्तत्र भ्रमरादिं गुञ्जन्तं शृणोति, पुनस्तं यतनयाऽपनीय तत्पात्रकं प्रत्युपेक्षते, तथा **चक्षुषा** उपयोगं ददाति कदाचित्तत्र मुषकोत्केरादिरजो भवति, ततस्तद्यतनयाऽपनयति, **घ्राणेन्द्रियेण** चोपयोगं करोति कदाचित्तत्र सिरसुबकादिर्मर्दितो भवति पुनश्च घ्राणेन्द्रियेण ज्ञात्वा यतनयाऽपनयति, **जिह्वया** च रसं ज्ञात्वा यत्र गन्धस्तत्र रसोऽपि गन्धपुद्गलैरोष्ठो यदा व्याप्तो भवति, तदा जिह्वया रसं जानातीति, **स्पर्शनेन्द्रियेण** चोपयोगं ददाति कदाचित्तत्र मूषकादिः प्रविष्टस्तन्निःश्वासवायुश्च शरीरे लगति, ततश्चैवमुपयोगं दत्त्वा पात्रकाणि प्रत्युपेक्षते ॥२८८॥

इदानीं भाष्यकृत् किञ्चिद्व्याख्यानयन्नाह –

**५४१ पडिलेहणिया काले फिडिए कल्लाणगं तु पच्छित्तं ।**
**पायस्स पास बिट्ठो सोयादुवउत्त तल्लेसो ॥१७३॥ निभा०**

**पडिलेहणिया** गाहा । **प्रत्युपेक्षणाकाले फिटिते**ऽतिक्रान्त एकं **कल्याणकं** यतः **प्रायश्चित्तं** भवति अतः पूर्वमुपयोगं प्रत्युपेक्षणाविषयं करोति । किंविशिष्टोऽसा उपयोगं करोतीत्यत आह-**पायस्स पास बिट्ठो पात्रकस्य पार्श्वे** उपविष्टः **श्रोत्रादिभिरुपयुक्तस्तल्लेश्यस्त**च्चित्तो भवतीति ॥१७३॥

कथं पुनः पात्रकप्रत्युपेक्षणां करोतीत्यत आह –

**५४२ मुहणंतएण गोच्छं गोच्छग[1]गहिअंगुलीहिं पडलाइं ।**
**[2]उक्कुडुयभाण[3]वत्थे पलिमन्थादीसु तं न भवे ॥२८९॥ नि०**

**मुहणंतएण** गाहा । **मुहणंतएण** त्ति रजोहरणमुखवस्त्रिकया **गोच्छकं** वक्ष्यमाण-लक्षणं प्रमार्जयति, पुनस्तदेव **गोच्छकमङ्गुलीभिर्गृहीत्वा पटलानि** प्रमार्जयति । अत्राह परः-**'उक्कुडयभाणवत्थे' उत्कुटुकः** सन् **भाजनवस्त्राणि** गोच्छकादीनि प्रत्युपेक्षये[4]द् यतो वस्त्रप्रत्युपेक्षणोत्कुटुकेनैव कर्त्तव्या, आचार्य आह-**पलिमंथादीसु**

---

१. लइयंगुलीउ ह० हे० २. उक्कुडुओ ह० हे० ३. पोत्ते हे० ४. ०यतु यतो क०

**तं न भवे** । तदेतन्न **भवति** यच्चोदकेनोक्तम्, यत: [११२]**पलिमन्थ:** सूत्रार्थयोर्भवति, कथम् ? प्रथममसौ पादप्रोञ्छने निषीदति पश्चात् पात्रकवस्त्रप्रत्युपेक्षणायामुत्कुटुको भवति पुन: पात्रकप्रत्युपेक्षणायां पादप्रोञ्छने निषीदति, एवं तस्य साधोश्चिरयत: सूत्रार्थयो: पलिमन्थो भवति, [१]अत: पादप्रोञ्छने निषण्णेनैव पात्रकवस्त्रप्रत्युपेक्षणा कर्त्तव्येति ॥२८९॥

तत: किं करोतीत्यत आह –

**५४३ चउकोण भाण[२]कण्णं पमज्ज [३]पाएसरीए तिगुणं तु ।**
**भाणस्स पुप्फगं तो इमेहिं कज्जेहिं पडिलेहे ॥२९०॥ नि०**

**चउकोण** गाहा । पटलानि प्रत्युपेक्ष्य पुनर्गोच्छकं वामहस्तानामिकाङ्गुल्या गृह्णाति, तत: पात्रककेसरिकां पात्रकमुखवस्त्रिकां पात्रकस्थामेव गृह्णाति, **चउक्कोण** त्ति **चतुर:** पात्रबन्ध**कोणान्** संवर्त्योपरिस्थापितान् प्रमार्जयति, पुन**र्भाजनस्य कर्णं प्रमार्जयति,** पुनश्च **पात्रककेसरिकयैव तिगुणं** तिस्र एव वारा बाह्यतोऽभ्यन्तरतश्च तिस्र एव वारा: प्रमार्जयति, तत: **भाणस्स** पात्रकस्य **पुष्पकं** बुध्नं **तत एतानि** वक्ष्यमाणानि **कार्याणि** यदि न भवन्ति तत: प्रथमं बुध्नं पात्रकस्य **प्रत्युपेक्षेत** ॥२९०॥

कानि पुनस्तानि कार्याणि ? अत आह –

**५४४ मूसगरयउक्केरे, घणसंताणए इय ।**
**उदए मट्टिया चेव, एमेया पडिवत्तिओ ॥२९१॥ नि०**

**मूसग** गाहा । कदाचित्तत्र **मूषकोत्केररजो** लग्नं भवति ततस्तद्यतनयाऽपनीयते, तथा **घन: सन्तानको** वा कदाचित् [A]तत्थ कोलिअतंतुयं लग्गं होइ तद्यतनयाऽपनीयते। तथा **उदए** त्ति कदाचि**दुदकं**'लग्नं भवति, सार्द्राया भूमेरुन्मज्ज्य लगति, तत्र यतनां वक्ष्यति, **मट्टिआ चेव** तथा कदाचिद् **मृत्तिका** गृहकारिकाया: सम्बन्धिनी लगति तत्र यतनां वक्ष्यति, **एवमेता: प्रतिपत्तय:** प्रकारा भेदा यदि न भवन्ति ततो बुध्नं प्रत्युपेक्षते ॥२९१॥

कुत: पुनरुत्केरादिसम्भव: ? इत्यत आह –

---

११२. पलिमन्थ: सूत्रार्थयो: पलिमन्थो विनाश इत्यर्थ: । संटी.

A तत्र कोलियकतन्तुकं लग्नं भवति ।

१. यतोऽत: पादपुञ्छने क० ख० २. कण्णा ह० ३. पाएसरीइ दा०

**५४५ नवगनिवेसे दूराउ उक्केरो मूसएहिं उक्किण्णो ।**
**निद्धमहि [1]हरतणू वा ठाणं भेत्तूण पविसेज्जा ॥२९२॥ नि०**

**नवग** गाहा । **नवगणिवेसे** यत्र ग्रामादौ ते साधव आवासिताः स **नवोऽ**भिनवो **निवेशः** कदाचिद्भवति, तत्र च पात्रकसमीपे **मूषकैरुत्केर उत्कीर्ण**स्तेन रजसा पात्रकं गुण्ड्यते । मूसगरयउक्केरे त्ति भणियं । **निद्धमहि हरतणू वा** तथा **स्निग्धायां** सार्द्रायां भुवि हरतणू व त्ति सलिलबिन्दव उन्मज्ज्य लगन्ति ततो भुव उन्मज्ज्य पात्रक**स्थापनकं भित्त्वा प्रविशेत्** स लग्नो भवेत् तद्यतनां वक्ष्यति । उदए त्ति गयं, इह कस्मा[2]दुदकमस्थान एवोक्तम् ? उच्यते-पृथिवीकायस्य घनसन्तानस्य चास्य तुल्ययतनाप्रतिपादनार्थम् ॥२९२॥

तथा –

**५४६ कोत्थलगारिय घरगं घणसंताणाइया व लग्गेज्जा ।**
**उक्केरं सट्ठाणे हरतणु [3]चिट्ठेज्ज जा सुक्को ॥२९३॥ नि०**

**कोत्थल** गाहा । **कोत्थलकारिका** गृहकारिका [4]**गृहकं** मृन्मयं करोति तत्र यतनां वक्ष्यति । मट्टिए त्ति भणिअं, **घनसन्तानिका वा** कदाचि**ल्लगति** घणसंतानिया लग्गा, [5]आदिशब्दात्तदण्डकादिः । इदानीं सर्वेषामेवैतेषां यतनां प्रतिपादयन्नाह– **उक्केरं सट्ठाणे** मूषको**त्केरः स्वस्थाने** मुच्यते–यतनया मूषकोत्केरमध्य एव स्थाप्यते प्रमृज्य। **हरतणू** अथ [113]**हरतनु**रधस्तात्सलिलबिन्दव उन्मज्ज्य लग्नास्ततस्तावत्प्रतिपाल्यं **यावदेते शोषमु**पगच्छन्ति, ततः पश्चात्पात्रं प्रत्युपेक्षते । 'उदए' त्ति गयं ॥२९३॥

**५४७ इयरेसु पोरिसितिगं संचिक्खावेत्तु तत्तिय छिंदे ।**
**सव्वं वा वि [6]विगिंचइ पोराणं मट्टियं ताहे ॥२९४॥ नि०**

**इयरेसु** गाहा । **इयरेसु** त्ति कोत्थलकारिआघणसंताणियादीणं **पोरिसितिगं संचिक्खावेत्तु** त्ति प्रहर**त्रयं** यावत्तत्पात्रकं संचिक्खावेत्तु प्रतिपाल्य, यदि तावत्याऽपि वेलया नापैति ततः पात्रकस्थापनादे**स्तावन्**मात्रं **छित्त्वा** परित्यज्यते । **सव्वं वा वि**

---

११३. हरतनुः-तृणाग्रव्यवस्थिते जलबिन्दौ, (सूत्र. २ श्रु. ३ अ.) यो भुवमुद्भिद्य गोधूमाङ्कुरतृणाग्रादिषु बद्धो बिन्दुरूपजायते । (प्रज्ञा. १५६)

१. हरतणुओ त.द. हरतणु भ. । २. ०दुदकं संस्थान० क० ३. संचिट्ठ ख. ४. गृहं लगति गृ० क० ल० ५. शब्दादण्डकादि क० प० ६. विगिंचे हे० विगिंचसु ह०

**विगिंचति** । अन्येषां वा पात्रकस्थापनादीनां सद्भावे **सर्वमेव** तत्पात्रकस्थापनादि परित्यजति । **पोराणं मट्टिअं ताहे** त्ति अथ तत्कोत्थलकारिगृहकं न सचेतनया मृत्तिकया कृतं किन्तु पुराणमृत्तिकया, ततस्तां **पुराणां मृत्तिकां ताहे** त्ति **तस्मिन्नेव** प्रतिलेखनाकालेऽपनयति, यदि तत्र कृमिकास्तया न प्रवेशिता इति ॥२९४॥

**५४८ पत्तं पमज्जिऊणं अंतो बाहि [१]सइं तु पप्फोडे ।**
**केइ पुण तिण्णि [२]वारे चउरंगुल [३]भूमिं पडणभया ॥२९५॥ नि०**

**पत्तं** गाहा । इदानीं त**त्पात्रकं** पात्रकेसरिकया पात्रकमुखवस्त्रिकया तिस्रो वारा **बाह्यतः प्रमृज्य** संपूर्णांस्ततो हस्ते स्थापयित्वाऽभ्यन्तरतस्तिस्रो वाराः पुनः 'समन्ततस्तं प्रमृज्य ततः स किं करोतु **सइं तु पप्फोडे** त्ति **सकृदे**कां वारामधोमुखं कृत्वा बुध्ने **प्रस्फोटयेत्**, एवं **केचिदा**चार्या ब्रुवते, **केचित्पुन**राचार्या एवं भणन्ति, यदुत **तिस्रो वाराः** प्रस्फोटनीयम्, एतदुक्तं भवति–एकां वारां प्रमृज्य पश्चादधोमुखं प्रस्फोट्यते पुनरपि प्रमृज्य प्रस्फोट्यते पुनरपि प्रमृज्य प्रस्फोट्यते, एवं एतास्[४]तिस्रो वाराः प्रस्फोटनीयम्। तत्पात्रकं भुव उपरि कियद्दूरे प्रत्युपेक्षणीयमित्यत आह- **चउरंगुल भूमिं पडणभया, चतुर्भिरङ्गुलै**र्भुव उपरि धारयित्वा प्रत्युपेक्षणीयम्, मा **भूत्पतन**-भङ्ग**भयं** स्यादिति । एवं तावत्[५]प्रत्यूषसि वस्त्रपात्रप्रत्युपेक्षणा उक्ता ॥२९५॥

इदानीमुपधिं पात्रकं च प्रत्युपेक्ष्य किमुपधेः कर्त्तव्यम् ? क्व वा पात्रकं स्थापनीयमित्यत आह –

**५४९ वेंटियबंधणधरणे अगणी तेणे य दंडियक्खोभे ।**
**[६]उउबद्धधरणबंधण वासासु अबंधणा ठवणा ॥२९६॥ नि०**

**वेंटिय** गाहा । उपधे**र्वेण्टिकाबन्धनं** कर्त्तव्यम्, **धरणे** त्ति पात्रकस्य चात्मसमीप [७]आत्मसकाशे **धरणं** कार्यम्, अनिक्षिप्तमित्यर्थः । किमर्थं पुनरेतदेवं क्रियते ? यदुपधिका बध्यते पात्रकमनिक्षिप्तं क्रियत इति ? उच्यते-**अगणि** त्ति **अग्नि**भयात् प्रदीपनभयात् **स्तेनक**भयाद् **दण्डिकक्षोभा**च्चैतदेवं क्रियते, कस्मिन् पुनः काले एतदेवं क्रियत इत्याह–**उउबद्ध ऋतुबद्ध** उच्यते शीतकाल उष्णकालश्च, तस्मिन् पात्रक**धरण**मुपधेश्च **बन्धनं** कर्त्तव्यम्, **वासासु** त्ति **वर्षा**काले **अबंधण** त्ति उपधे**रबन्धनं**

---

१. च ताहे ह० २. वारा आ० सं० ३. भूमी चउरंगुलं वज्जे, ह० ४. तावत् तिस्रो क० ५. प्रत्युषे व० क० ल० ६. उडुबद्ध ह० हे० ७. आत्मोत्सङ्गे; ध.दा.ल.

कर्त्तव्यमुपधिर्न बध्यते, **ठवण** त्ति पात्रकं च निक्षिप्यत एकदेशे **स्थाप्यते**, प्रयोजनमुपधेरबन्धने निक्षेपणे पात्रकस्य च वक्ष्यति ॥२९६॥

इदानीं भाष्यकारो व्याख्यानयन्नाह –

**५५० रयत्ताण भाण धरणं उउबद्धे निक्खिविज्ज वासासु ।**
**अगणीतेणभएण व [1]रायक्खोभे विराहणया ॥१७४॥ निभा०**

**रयत्ताण** गाहा । **रजस्त्राणस्य भाजनस्य च धरणम**निक्षेपणं कर्त्तव्यम्, कदा ? **ऋतुबद्धे** शीतोष्णकालयोः, **वर्षासु** पुनर्भाजनं **निक्षिपेदे**कान्ते, किमर्थं पुनर्भाजनस्योत्सङ्गे धरणं क्रियते ? अत आह—**अगणी अग्निभयेन** प्रदीपभयेन **स्तेनभयेन** वा **राजक्षोभेण वा**, मा भूदाकुलस्य गृह्णतः पलिमन्थेनात्म**विराधना** संयम**विराधना** वा स्यात् ॥१७४॥

**५५१ परिगलमाणा हीरेज्ज डहण भेदा तहेव छक्काया ।**
**गुत्तो व सयं डज्झे हीरेज्ज व जं च तेण विणा ॥१७५॥ निभा०**

**परिगलमाणा** गाहा । अग्न्यादिक्षोभे निर्गच्छत आकुलस्योपधिरबद्धा परिगलति ततश्च **परिगलमाना** केनचिद**पह्रियते** । **डहण** त्ति **दह्यते** वाऽबद्धा सत्यवधिर्यावद् गृह्यते, **भेद** त्ति आकुलस्य निर्गच्छतोऽनासन्नं पात्रकं गृह्णतो [2]**भेदो** वा विनाशो भवति ततश्च **षट्कायस्या**पि विराधना संभवति पात्रकस्यापि । **गुत्तो व सयं डज्झे**, संमूढो वोपधिपात्रकग्रहणे **स्वयं दह्येत**, स्तेनकसंक्षोभे च सत्यवधिपात्रक-ग्रहणव्याक्षेपेण स्तेनकैर्म्लेच्छै**रपह्रियते**, **जं च तेण विण** त्ति **यच्च तेन विनो**पधिपात्रकादिना विना भवति, आत्मविराधना संयमविराधना च तत्तदवस्थमेवेति ॥१७५॥

आह—पुनः किं कारणं वर्षासूपधिर्न बध्यते पात्रकाणि च निक्षिप्यन्ते ? उच्यते-

**५५२ वासासु नत्थि अगणी नेव य तेणा वि दंडिया [3]सुत्था ।**
**तेण अबंधण ठवणा एवं पडिलेहणा पाए ॥१७६॥ निभा०**

**वासासु** गाहा । **वर्षासु नास्ति अग्निभयं नापि च** स्तेनभयम्, **स्तेना**श्चात्र पल्लीपतिकादयो द्रष्टव्याः, यतस्त एव वर्षासु [4]प्रतिबन्धेन नागच्छन्तीति, **दण्डिन**श्च

---

१. रज्जक्खोभे ह० हे० २. भेदो वि० दा० ३. सत्था ता.सं. ४. प्रबन्धेन क०

राजानो वर्षासु **स्वस्था**स्तिष्ठन्ति, विग्रहस्य तस्मिन् कालेऽभावात्, अतस्तेन कारणेन **अबंधण** त्ति **अबन्धन**मवधेः, **ठवण** त्ति पात्रकं च पार्श्वे निक्षिप्तं न क्रियते, अपि तु **स्थाप्यते** मुच्यते । एवं **प्रत्युपेक्षणा** पात्रविषया प्रतिपादिता, तत्प्रतिपादनाच्चोक्त-मुपकरणप्रत्युपेक्षणाद्वारम् ॥१७६॥

इदानीं स्थण्डिलद्वारस्य स्वरूपप्रतिपादनायाह –

**५५३ अणावायमसंलोए अणावाए चेव होइ संलोए ।**
**आवायमसंलोए [१]आवाए चेव संलोए ॥२९७॥ नि०**

**अणावाय** गाहा । **अणावायमसंलोए** त्ति न आपात अभ्यागमः स्वपक्ष-परपक्षयोर्यस्मिन् स्थण्डिले तदनापातम्, **'लोकृ दर्शने'** ( **पा.धा. ७८** ) न संलोको न दर्शनं छन्नत्वाद्यस्मिन् स्थण्डिले तदनालोकम्, अनापातं च तदसंलोकं च **अनापातासंलोकम्,** एको भेदः स्थण्डिलस्य, तथा **अणावाए चेव होइ संलोए** नापातः कस्यचिद्यत्र तदनापातम्, **अनापातं च तत्संलोकं** च अनापातसंलोकम्, [२]अच्छन्नत्वात्, एतदुक्तं भवति—यत्रासौ पुरीषं व्युत्सृजति तत्र न कस्यचिदापातः किन्तु दूरस्थिताः पश्यन्ति, आकाशत्वादिति, अयं द्वितीयो भेदः, तथाऽन्यद् **आवायमसंलोए** त्ति **आपातासंलोकम्,** आपातं यत्र कश्चिदागच्छति असंलोकं छन्नम्, आपातं च तदसंलोकं च आपातासंलोकम्, एतदुक्तं भवति-आपातोऽस्ति सागारिका-णामासन्ना एव तिष्ठन्ति न च [३]वनादिवृत्यादितिरोहितत्वाद्व्युत्सृजन्तं साधुं पश्यन्ति, एष तृतीयो भेदः, तथाऽन्यत्-**आवाए चेव संलोए** त्ति **आपात** अभ्यागमः कस्यचिद्यत्र **संलोकः** संदर्शनं यत्र तद् आपातं च तत्संलोकं च आपातसंलोकम्, सागारिकागमो भवति दूरस्थिताश्च सागारिकाः पश्यन्ति साधुं व्युत्सृजन्तम्, अयं चतुर्थः ॥२९७॥

इदानीं चतुर्थमेव तावद्भेदं व्याख्यानयति, यतस्तद्व्याख्यानेऽन्ये विधिप्रतिषेधरूपाः [४]सुज्ञाता भवन्तीति –

**५५४ तत्थावायं दुविहं सपक्खपरपक्खओ य नायव्वं ।**
**दुविहं होइ सपक्खे [५]संजय तह संजईणं च ॥२९८॥ नि०**

**तत्थावायं** गाहा । **तत्रापातं** स्थण्डिलं **द्विविधं** द्विप्रकारं वर्त्तते, कथं द्वैविध्यं

---

१. आवायं चेव संलोयं ता.सं. २. अच्छन्नं च क० ३. वनादितिरो० क० ४. सुज्ञाना भ० दा० ५. संजई वावी द.

भवतीत्यत आह- **सपक्खपरपक्खओ य नायव्वं** ति तत्र **स्वपक्षः**-संयतवर्गः **परपक्षोः**-गृहस्थादिः, तत्र स्वपक्षापातं **द्विविधं संयत**स्वपक्षापातं **संयती**स्वपक्षापातं **च** ॥२९८॥

**५५५ संविग्गमसंविग्गा संविग्गमणुण्णएयरा चेव ।**
**असंविग्गा वि य दुविहा तप्पक्खियएयरा चेव ॥२९९॥ नि०**

**संविग्ग** गाहा । तत्र ये ते संयतास्ते **संविग्नाश्चासंविग्नाश्च**, ये ते **संविग्नास्ते मनोज्ञा इतरे** अमनोज्ञाश्च, **असंविग्ना अपि द्विविधाः- तत्पाक्षिकाः** संविग्नपाक्षिकाः, **इतरे च**, असंविग्नपाक्षिकाः, निर्द्धर्मा नैव श्लाघन्ते तपस्विनश्च निन्दन्ति ॥२९९॥

उक्तः स्वपक्षः, इदानीं परपक्ष उच्यते –

**५५६ परपक्खे वि य दुविहं माणुस तेरिच्छियं च नायव्वं ।**
**एक्केक्कं पि य तिविहं [१]पुरिसित्थिनपुंसगं चेव ॥३००॥ नि०**

**परपक्ख** गाहा । **परपक्षेऽपि च द्विविधं** स्थण्डिलं **मानुषापातं तिर्यगापातं च ज्ञातव्यम्**, यत्तन्मानुषापातं त**देकैकं त्रिविधं-पुरुषापातं स्त्र्यापातं नपुंसकापातं** चेति, तिर्यगापातमपि **त्रिविधं**–तिर्यक्**पुरुष**स्तिर्यक्**स्त्री** तिर्यग्**नपुंसकं चेति** ॥३००॥

**५५७ पुरिसावायं तिविहं दंडियं कोडुंबिए य पागइए ।**
**ते सोयऽसोयवाई एमेवित्थी नपुंसा य ॥३०१॥ नि०**

**पुरिसावायं** गाहा । तत्र **पुरुषापातं त्रिविधम्-दण्डको** राजा, **कौटुम्बिकः** श्रेष्ठ्यादिः, **प्राकृतिकः** प्रकृतीनां मध्ये यः, अयं त्रिविधः पुरुषः, तेषामेकैकस्त्रयाणामपि पुरुषाणां **शौचवादी अशौचवादी** चेति । **एमेवित्थी नपुंसा य** त्ति **एवमेव** दण्डककौटुम्बिकप्रा[२]कृतिकशौचवाद्यशौचवादिनः **स्त्रीनपुंसका** ज्ञातव्या एभिर्भेदैर्भिन्नाः ॥३०१॥

इदानीं मनुष्याणां मध्ये द्वितीयं परपक्षभेदं प्रतिपादयन्नाह –

**५५८ एए चेव विभागा [३]परतित्थीणं पि होंति मणुयाणं ।**
**तिरियाणं पि विभागा अओ परं कित्तइस्सामि ॥३०२॥ नि०**

**एए चेव** गाहा । **एत एव विभागा** भेदा दण्डककौटुम्बिकप्राकृतिकशौचा-

---

१. थीपुरिसनपुंसयं चेव हे० २. ०प्राकृतिकरूपाः शौचाशौचवादिनः आ. ३. परतित्थीयाणं पि हे०

शौचवादिरूपाः **परतीर्थिकानामपि भवन्ति मनुष्याणाम्**, इदानीं **तिरश्चामपि विभागान्** भेदानतः **परं कीर्त्तयिष्यामि** प्रतिपादयामीत्यर्थः ॥३०२॥

**५५९ दित्तादित्ता तिरिया जहन्नमुक्कोसमज्झिमा तिविहा ।**
**एमेवित्थिनपुंसा दुगुंछिअदुगुंछिया नेया ॥३०३॥ नि०**

**दित्तादित्ता** गाहा । **द्विविधास्तिर्यञ्चो-दृप्ताश्चादृप्ताश्च** [१]मारकाश्चामारकाश्चेति, पुनरेकैका**स्त्रिविधा** [२]दृप्ता अदृप्ताश्च य उक्तास्ते **जघन्या उत्कृष्टा मध्यमाश्च** । तत्र जघन्या मूल्यमङ्गीकृत्य मेण्ढकादयः, उत्कृष्टा हस्त्यश्वादयः, मध्यमा गवादयः । **एमेवित्थिनपुंसा** ये ते दृप्ता अदृप्ताश्च ते [३]सर्व एव त्रिप्रकाराः, **एवमेव** प्राग्वत् **स्त्रियः पुमांसो नपुंसकानि** च, ते च पुनः सर्व एव **जुगुप्सिता** निन्दिता **अजुगुप्सिता** अनिन्दिता **ज्ञेयाः** ॥३०३॥

तत्रैतेषां भेदानां मध्ये केषामापाते सति गमनं कर्त्तव्यमित्यत आह –

**५६० गमण मणुण्णे [४]इयरे वितहायरणंमि होइ अहिगरणं ।**
**पउरदवकरण दट्टुं कुसील सेहऽण्णहाभावो ॥३०४॥ नि०**

**गमण मणुण्णे** गाहा । **मनोज्ञा**नामापातो यत्र स्थण्डिले तत्र **गमनं** कर्त्तव्यम्, **इयरे** त्ति अमनोज्ञास्तेषामापाते गमनं न कर्त्तव्यम्, यतः **वितहायरणंमि होइ अहिगरणं** ति **वितथाचरणम**न्यसामाचार्या आचरणं तस्मिन् सति शिक्षकाणां [५]परस्परं स्वसामाचारीपक्षपातेन राटिर्भवति **ततश्चाधिकरणं भवति** । तथा कुशीलापातेऽपि न गन्तव्यम्, यतः-'**पउरदवकरण दट्टुं**' **प्रचुरेण द्रवेण** शौच**करण**क्रियामुच्छोलनां **दृष्ट्वा कुशीला**नामसंविग्नानां सम्बन्धिनीं पुनश्च **सेहादीनामन्यथाभावो** भवेत्, यदुतैते शुचयो न त्वस्मत्साधवः, तस्मादेत एव शोभनाः पूज्याश्चेति तन्मध्ये यान्ति, संयतापातेऽयं दोषः, [६]संयतीनामापातं त्वेकान्तेनैव वर्जनीयम् ॥३०४॥

[७]इदानीं परपक्षमानुषापातदोषान् दर्शयन्नाह –

**५६१ जत्थऽम्हे [८]वच्चामो जत्थ य आयरइ [९]नाइवग्गो णे ।**
**परिभव कामेमाणा संकेयगदि[१०]न्नया वावि ॥३०५॥ नि०**

---

१. मारणकामारणकाश्चेति क० २. दीप्ता अदीप्ताश्च क. ३. सर्व एव प्रा० दा० ४. णियरे हे० ५. परस्परतः क० ६. संयत्यापा० दा० ल० ७. अधुना प० क० ८. गच्छामो ता. ९. नाय० ह० हे० संपा० १०. दिन्नओ ह० संपा० ता.

**जत्थऽम्हे** गाहा । तत्पुरुषा एवमाहुः, यदुत–ययैव दिशा **वयं** पुरीषव्युत्सर्जनार्थं **व्रजामः, यत्र चाचरति,** सञ्ज्ञाव्युत्सृजनं करोति **नोऽस्मदीयो ज्ञातिवर्गः** स्वजनयोषिद्वर्गः, तयैव दिशा एतेऽपि व्रजन्ति, **परिभव** त्ति ततश्चैते **परिभवमस्माकं** कुर्वन्ति, **कामेमाण** त्ति नूनमेते **कामयन्ति,** अभिलषन्ति स्त्रियं तेन तत्र प्रयान्ति, **संकेयगदिन्नआ दत्तसङ्केतका वा** तेन स्त्र्यापाते व्रजन्ति ॥३०५॥

एते च दोषाः –

**५६२ दव अप्प कलुस असती अवण्ण पडिसेह [1]विपरीणामो वा ।**
**संकाईया दोसा पंडित्थिसु [2]गहिते य जं चऽण्णं ॥३०६॥ नि०**

**दव अप्प** गाहा । कदाचिद् **द्रवमल्पं** भवति तत उड्डाहादि, **कलुस** त्ति **कलुषं** वोदकं भवति, **असती** त्ति अभावो वा द्रवस्य भवति, ततश्चैते दोषाः-**अवर्णो**ऽश्लाघा प्रवचने भवति, प्रधानो वा कश्चिद् दृष्ट्वा **प्रतिषेधं** भिक्षादेः करोति, **विपरिणामो वा** कस्यचिदभिनवश्राद्धस्य भवति, **शङ्कादयश्च दोषाः पण्डकस्त्री**विषया भवन्ति, **गहिते जं चऽण्णं** ति पण्डकस्त्रीभ्यां बलाद् **गृहीतस्य यच्चान्यदा**कर्षणोड्डाहादि [3]भवति स च दोषः ॥३०६॥

अधुना तिर्यगापाते दोषान्दर्शयन्नाह –

**५६३ आहणणादी दित्ते गरहियतिरिएसु [4]संकमाईया ।**
**एमेव य संलोए तिरिए वज्जित्तु मणुयाणं ॥३०७॥ नि.**

**आहणणादी** गाहा । **दृप्त**तिर्यगापाते मारणकतिर्यगापात **आहननादि**दोषाः, **आदि**ग्रहणाद्भक्षणदोषश्च मर्कटादिकृतः, **गर्हितेषु** गर्दभ्यादिषु **तिर्यक्षु** मैथुना**शङ्काद्याः**, **आदि**ग्रहणान्निःशङ्कमेव वा भवति । एवं तावदेत आपातदोषा उक्ताः, '**एमेव य संलोए**' **एवमेव संलोके**ऽपि **मनुष्याणाम्,** मनुष्यसम्बन्धिनि दोषा द्रष्टव्याः, किन्तु **तिरिए वज्जित्तु** त्ति **तिरश्चो** मुक्त्वा, एतदुक्तं भवति–तिर्यक् संलोके न कश्चिद्दोषो भवतीति ॥३०७॥

इदानीं संलोके दोषानेव दर्शयन्नाह –

---

१. विप्परीणामो दा० २. गहिय जं चऽन्नं हे. ३. भवति । इदानीं तिर्यगापाते दोषं द० दा० भवति, अधुना क. ४. संकणादीणि दा० संकमाईणि हे०

**५६४ कलुसदवे असई य व पुरिसालोए हवंति दोसा उ।**
**पंडित्थीसु वि एए खद्धे वेउव्वि मुच्छा य ॥३०८॥ नि०**

**कलुसदवे** गाहा। **कलुषे द्रवे** सत्य**सत्य**भावे वा द्रवस्य **पुरुषालोके** पुरुषो यस्मिन् स्थितः पश्यति, **पण्डकस्त्री**जनिताश्च शङ्कादयो **दोषाः** पूर्वोक्ताः, तथा **खद्धे** बृहत्प्रमाणे [११४]शेफे, **विउव्वि** त्ति **विक्रिया**मापन्ने शेफे दृष्टे सति **पण्डकस्य स्त्रिया** वा **मूर्च्छा**ऽनुरागो भवति ॥३०८॥

उक्तं चतुर्थं स्थण्डिलमापातसंलोकरूपम्, इदानीं तृतीयमापातासंलोकरूपमुच्यते, तत्राह –

**५६५ आवायदोस तइए बिइए संलोयओ भवे दोसा।**
**ते दो वि नत्थि पढमे तहिं गमणं तत्थिमा मेरा ॥३०९॥ नि०**

**आवायदोस** गाहा। **तृतीयं** स्थण्डिलं यद्यप्यसंलोकं तथा**प्यापातदो**षदुष्टं वर्त्तते। उक्तं तृतीयम्, इदानीं द्वितीयमनापातसंलोकरूपमुच्यते, तत्राह–**बिइए संलोयओ भवे दोसा। द्वितीये** यद्यप्यापातदोषो नास्ति तथापि **संलोकतो भवन्ति दोषाः।** उक्तं द्वितीयं स्थण्डिलम्, इदानीं प्रथममनापातमसंलोकमुच्यते, तत्राह–**ते दो वि नत्थि पढमे** त्ति **ते दोषा** आपातजनिताः संलोकजनिताश्च **न सन्ति प्रथमे** स्थण्डिले-ऽत**स्तत्रै**व **गमनं** कर्त्तव्यम्, **तत्र चेयं मेरा** मर्यादा वक्ष्यमाणेयं नीतिरिति ॥३०९॥

तत्र यदुक्तम् - प्रथमे स्थण्डिले गच्छतामियं मेरा साऽभिधीयते –

**५६६ कालमकाले सण्णा कालो तइयाए सेसयमकालो।**
**पढमा पोरिसि आपुच्छ पाणगमपुप्फि अण्णदिसिं ॥३१०॥ नि०**

**काल** गाहा। अत्रैका **काले** सञ्ज्ञा भवति अन्या**ऽकाले सञ्ज्ञा** भवति। **कालो ततियाए** त्ति **कालः** सञ्ज्ञाया**स्तृतीयायां** पौरुष्यां भवति, **सेसयमकालो** त्ति **शेष**काले या सञ्ज्ञा भवति सा**ऽकाल**सञ्ज्ञेत्युच्यते। **पढमा पोरिसि** त्ति तत्राकालसञ्ज्ञा **प्रथमपौरुष्यां** यदि भवति ततः **आपुच्छ पाणग** त्ति **आपृच्छ्य** साधून्, एतदुक्तं भवति–साधूनेवमसावापृच्छति यदुत–भवतां किं कश्चिच्चङ्क्रमणभूमिं यास्यति न वा ? इति। पुनः **पाणगं** ति तदनुरूपं **पानकमा**नयति, किंविशिष्टम्?

---

११४. शेफः-पुंश्चिह्नमित्यर्थः। संटी.

**अपुप्फियं** [१]**अपुष्पितं** तरिकारहितं येन स्वच्छतयोदकभ्रान्तिर्भवति, **अण्णदिसिं** ति **अन्यया** पतनस्य **दिशोदकं** गृह्यते, **अन्यया** च **दिशा** चङ्क्रमणभूमिं प्रयाति येन सागारिकाशङ्का न भवति यदुतैते काञ्जिकेन शौचं कुर्वन्तीति ॥३१०॥

**५६७ अइरेगगहण उग्गाहिएण आलोय पुच्छिउं गच्छे ।**
**एसा उ अकालंमी अणहिंडियहिंडिया [२]काले ॥३११॥ नि०**

**अतिरेग** गाहा । अतिरिक्तं च तत्पानकं गृह्यते कदाचिदन्यसाधोः कार्यं [३]भवेत्, सागारिकपुरस्ताद्वा [११५]उच्छोलनादि क्रियते । **उग्गाहिएण** त्ति **उद्ग्राहितेन** पात्रबन्धबद्धेन पात्रकेणानीयते गुप्तं सत्, **आलोए** त्ति आनीय चाचार्यस्य **तदालोच्यते**, **पुच्छिउं गच्छे** त्ति पुनस्तमेवाचार्यं **पृष्ट्वा** [४]चङ्क्रमणिकायां **गच्छति, इयमकाले** सञ्ज्ञाऽकालसञ्ज्ञेत्यर्थः, **अहिण्डितानां** सतां भवति । **काल**सञ्ज्ञा पुन**र्हिण्डितानां** भिक्षाटनकालस्योत्तरकालं भुक्त्वा या भवति सा कालसञ्ज्ञा भवति । अन्ये त्वाहुः- **अणहिंडिय हिंडिया काले** त्ति **अहिण्डितानाम**र्थपौरुषीकरणोत्तरकाले या भवति सा **काल**सञ्ज्ञैव तथा **हिण्डितानां** भिक्षाभ्रमणभोजनोत्तरकालं या भवति सा **काल**-सञ्ज्ञोच्यते ॥३११॥

भुक्तोत्तरकालं या सञ्ज्ञा भवति तत्र किं कृत्वा कथं वा गम्यते ? इत्यत आह –

**५६८ कप्पेऊणं पाए एक्केक्कस्स उ दुवे पडिग्गहए ।**
**दाउं दो दो गच्छे तिण्हऽट्ठ दवं तु घित्तूणं ॥३१२॥ नि०**

**कप्पेऊण** गाहा । **पात्रकाणि कल्पयित्वा** पत्ताई [११६]तिप्पिऊण इत्यर्थः, पुन**रेकैकस्य** साधोः **पतद्ग्रहद्वयं दत्त्वा**, एतदुक्तं भवति-योऽसौ तिष्ठति साधुस्तस्याऽऽत्मीय-मेवैकं पतद्ग्रहकं द्वितीयं तु पतद्ग्रहकं योऽसौ साधुश्चङ्क्रमणभूमिं प्रयाति स चात्मीयमपि तद्धस्ते समर्पयित्वा व्रजति अत एकैकस्य द्वौ द्वौ पतद्ग्रहकौ भवतः। **दो दो गच्छे** त्ति **द्वौ द्वौ गच्छतः**, नैकको गच्छति, तत्र च '**तिण्हऽट्ठ दवं तु घित्तूणं**' **त्रयाणां** साधूना**मर्थे** यावदुदकं भवति तावन्मात्रं तौ **गृहीत्वा** व्रजतः ॥३१२॥

ते च कथं गच्छन्ति ? अत आह –

---

११५. उच्छोलनम्-उत्क्षालनम्, प्रभूतजलेन प्रक्षालनमित्यर्थः । संटी. ११६. तिप्पिऊण-क्षालयित्वेति । संटी.
१. अपुष्पिकं दा. २. कालो दा. ३. भवति क. ४. चङ्क्रमणिकया ग० क.

**५६९ अजुगलिया [1]अतुरंता विकहारहिया वयंति पढमं तु ।**
**निसिइत्तु डगलगहणं आवडणं वच्चमासज्ज ॥३१३॥ नि०**

**अजुगलिया** गाहा । न युगलितौ समश्रेणिस्थौ व्रजतः, किन्तु **अयुगलिता अत्वरमाणा विकथारहिताश्च व्रजन्ति,** ततश्चङ्क्रमणभुवं प्राप्य **प्रथमं निषीदयित्वो-**पविश्य **डगलकानाम्**[2]पानपुञ्छनार्थमिष्टकाखण्डलकानां लघुपाषाणकानां वा **ग्रहणं** करोति, **आवडणं** ति प्रस्फोटनं तेषां डगलकानां करोति, कदाचित्तत्र पिपीलिकादि स्यात्, तेषां च ग्रहणे किं प्रमाणमत आह–**वच्चमासज्ज** पुरीषमङ्गीकृत्य, श्लथं कठिनं वा विज्ञाय पुरीषं ततस्तदनुरूपाणि डगलकानि गृह्णाति, ततो डगलकानि गृहीत्वोत्थाय स्थण्डिल उपविशति ॥३१३॥

**५७० आलोएऊण दिसा संडासगमेव संपमज्जित्ता ।**
**पेहिय पमज्जणासु य जयणाए थंडिले निसिरे ॥८१॥ प्र०**

**[आलोइऊण य दिसा संडासगमेव संपमज्जित्ता ।**
**पेहिय पमज्जिएसु य जयणाए थंडिले निसिरे ॥४४२॥**

स्थण्डिलं गत्वा तत्र दिशामापात-संलोकवर्जनार्थमालोकनं कुर्यात् । दिश आलोक्य तदनन्तरं सण्डासकं सम्प्रमार्ज्य प्रेक्षितेषु प्रमार्जितेषु च भूप्रदेशेषु स्थण्डिले पुरीषं 'निसृजेद्' व्युत्सृजेत् । कथम् ? इत्याह-'यतनया' "दिसि पवण गाम सूरिए" (गा० ४५६) इत्यादिवक्ष्यमाणलक्षणया। तत् पुनरनापातासंलोकं स्थण्डिलमेभिर्वक्ष्यमाणैर्दशभिः स्थानैर्विशुद्धं ज्ञातव्यम् । [बृ.क.-४४२] ]

कीदृश इत्यत आह –

**५७१ अणावायमसंलोए परस्स अणुवघाइए ।**
**समे अज्झुसिरे या वि अचिरकालकयंमि य ॥३१४॥ नि०**

**५७२ वित्थिण्णे दूरमोगाढे नासण्णे बिलवज्जिए ।**
**तसपाणबीयरहिए उच्चाराईणि वोसिरे ॥३१५॥ नि० । दारगाहा ।**

**अणावाय** गाहा । **अनापात असंलोकश्च परस्य** यस्मिन् तदनापातासंलोकं स्थण्डिलं लोकस्य, तथा **अणुवघाइए** त्ति उपघातश्च यत्र न भवति उड्डाहादिस्तस्मि**न्ननुपघातिके,** तथा **समं** यत्र लुठनं न भवति, [3]लुठिते स्थण्डिल आत्मपतनभयं पुरीषं च मुक्तं कीटिकादि चूर्णयति, तथा **अज्झुसिरे या वि** त्ति

---

१. अतुरिया ह० २. अधिष्ठानपु० क० ३. लुठने स्थ० क०

यत्तृणादिच्छन्नं न भवति, तत्र हि वृश्चिकादिरागत्य दशति कीटकादि वा प्लाव्यते, **अचिरकालकयंमि य** त्ति **अचिरकालकृतं** तस्मिन्नेव द्विमासिक ऋतौ यदग्न्यादिना प्रासुकीकृतं तस्मिन् ॥३१४॥

**वित्थिण्णे** गाहा। तथा **विस्तीर्णे**, तत्र विस्तीर्णं जघन्येन हस्तप्रमाणं चतुरस्रमुत्कृष्टेन चक्रवर्त्त्यावासनिकाप्रमाणं द्वादशयोजनप्रमाणमिति गम्यते तस्मिन्, **दूरमोगाढे** त्ति **दूरम**धोऽ**वगाह्य** अग्न्यादितापेन प्रासुकीकृतं जघन्येन चत्वार्यङ्गुलान्यधः, **नासण्णे** त्ति तत्रासन्नं द्विविधं- भावासन्नं द्रव्यासन्नं च, "[A]भावासन्नं अणहियासओ अतिवेगेण आसन्ने चेव वोसिरइ, दव्वासण्णं धवलघरआरामाईणं आसन्ने वोसिरइ।" न आसन्नम् अनासन्नम्, यद् द्रव्यासन्नं भावासन्नं वा न भवति तस्मिन् व्युत्सृजति। तथा **बिलवर्जिते** बिलादिरहिते स्थण्डिले व्युत्सृजति, तथा **त्रसप्राणबीजरहिते** व्युत्सृजतीति, एतस्मिन् दशदोषरहिते स्थण्डिले सति **उच्चारादीनि व्युत्सृजति** ॥३१५॥

इदानीमेकादिसंयोगेन यावन्ति स्थण्डिलानि भवन्ति तावन्ति प्रतिपादयन्नाह –

**५७३ एगदुगतिगचउक्कपंचगछक्कसत्तट्ठनवगदसगेहिं ।**
**संजोगा कायव्वा भंगसहस्सं चउव्वीसं ॥३१६॥ नि०**

**एगा** गाहा । **एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवदशकैः[१] संयोगाः कर्त्तव्याः**, ततश्च सर्वैरेभिर्निष्पन्नं **भङ्गकसहस्रं चतुर्विंशत्युत्तरं** भवति ॥३१६॥

**५७४ दस पणयाल विसुत्तर सयं च दो सय दसुत्तरा दो य ।**
**बावण्णा दो दसुत्तर विसुत्तरं पंचचत्ता य ॥८२॥ प्र०**

[एकैकद्रव्यादिसंयोगपरिमाणमाह –

**दस पणयाल विसुत्तर सयं च दो सय दसुत्तरं दो अ ।**
**बावण्ण दो दसुत्तर विसुत्तरं पंचचत्ता य ॥४०४॥**

अधिकृतगाथायां दर्शिता अपि तत्त्वतः कियन्तो भवन्तीत्याह-एककसंयोगा दश, द्विकसंयोगाः पञ्चचत्वारिंशदित्येवमादि भावितार्थमेवेति गाथार्थः । [पञ्च.४०४]]

---

A भावासन्नमनध्यासकोऽतिवेगेनासन्न एव व्युत्सृजति, द्रव्यासन्नं धवलगृहाऽऽरामादिनामासन्ने व्युत्सृजति ।
१. दशकसं० क०

**५७५ दस एक्को य कमेणं भंगाउ भवंति चारणाए उ।**
**सुद्धेण समं मिलिया भंगसहस्स चउव्वीसं ॥८३॥ प्र०**

**[ दस एगो अ कमेणं भंगा एगाइचारणाए उ।**
**सुद्धेण समं मिलिआ भंगसहस्सं चउव्वीसं ॥४०५॥**

भाविताथैंव । [पञ्च.४०५]]

**५७६ उभयमुहं रासिदुगं हेट्ठिल्लाणंतरेण भय पढमं ।**
**लद्धऽहरासिविभत्ते तस्सुवरिगुणं तु संजोगा ॥८४॥ प्र०**

[भङ्गपरिसङ्ख्यापरिज्ञानोपायान्तरमाह - अहवा —

**उभयमुहं रासिदुगं हिट्ठिल्लाणंतरेण भय पढमं ।**
**लद्धऽहरासिविहत्तं तस्सुवरिगुणं तु संजोगा ॥४०३॥**

उभयमुखमिति स्थापनया दर्शयिष्यामः, राशिद्वयम्-एकादिस्थापनासम्पातद्वयम्, तत्र चाधस्तनानन्तरेण भजेत् प्रथमम्-उपरितनम्, लब्धाधोराशिविभक्तेन-अधोराशिना विभक्ते सत्युपरितनराशौ यल्लब्धं तेन, तस्योपरि यत् तद्गुणितं तत्संयोगा इति गाथाक्षरार्थः ।

भावार्थस्तु दर्श्यते, तत्रेयं स्थापना -

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| भङ्गसङ्ख्या : | १ | १० | ४५ | १२० | २१० | २५२ | २१० | १२० | ४५ | १० |
| उभयमुखम् : | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| राशिद्वयम् : | १० | ९ | ८ | ७ | ६ | ५ | ४ | ३ | २ | १ |

इह चाधस्त्यपर्यन्ते एककः तस्यानन्तरो द्विकः, तेनोपरितनो दशको भज्यते, तत्र च पञ्च लभ्यन्ते यतो द्विधा विभक्ताः (दश) पञ्चैव भवन्ति, तेन च पञ्चकेन तस्योपरि यो नवकः स गुण्यते, स च पञ्चकेन गुणितः पञ्चचत्वारिंशद् भवन्ति । पुनश्चाधस्त्यानन्तरस्त्रिकः तेन पञ्चचत्वारिंशद्विभज्यन्ते, तत्र पञ्चदश लभ्यन्ते, यतः पञ्चचत्वारिंशत् त्रिधा विभक्ताः पञ्चदशैव भवन्ति, तेन पञ्चदशकेन तस्योपरि योऽष्टकः स गुण्यते, स च तेन गुणिते विंशत्युत्तरं शतं भवति। पुनश्चाधस्त्यानन्तरश्चतुष्कः, तेन विंशत्युत्तरं शतं विभज्यते, तत्र त्रिंशल्लभ्यते, यतो विंशत्युत्तरं शतं चतुर्भिर्विभक्तं त्रिंशदेव भवति, तैस्त्रिंशद्भिस्तेभ्य उपरि यः सप्तकः स गुण्यते, स च तैर्गुणितः द्वे शते दशोत्तरे भवतः । पुनश्चाधस्त्यानन्तरः पञ्चकस्तेन दशोत्तरे द्वे शते विभज्येते, तत्र च द्विचत्वारिंशल्लभ्यन्ते, यतो दशोत्तरे द्वे शते पञ्चधा विभक्ते द्विचत्वारिंशदेव भवन्ति, तैश्च तस्योपरि यः षट्कः स गुण्यते, स च तैर्गुणितो द्विपञ्चाशदुत्तरे द्वे शते भवतः । इत्येवं सर्वत्र भावना कार्येति गाथार्थः । [पञ्च.४०३]]

इदानीं भाष्यकार एतान्येव स्थण्डिलपदानि व्याख्यानयति, तत्राद्यमनापातमसंलोकं व्याख्यातमेव, इदानीमनुपघातिकपदव्याचिख्यासयाह –

**५७७ आया पवयण संजम तिविहं उवघाइयं तु नायव्वं ।**
**आराम वच्च अगणी पिट्टण असुई य अन्नत्थ ॥१७७॥ निभा०**

**आया पवयण** गाहा । **औपघातिकं त्रिविधं ज्ञातव्यम्–आत्मौ**पघातिकं **प्रवचनौ**पघातिकं **संयमौ**पघातिकं च, तत्रात्मौपघातिकं क्व भवति ? अत आह– **आरामे** आरामादौ व्युत्सृजतः, प्रवचनौपघातिकं च क्व भवतीत्यत आह- **वच्च** [११७] **वर्चो** गूथं तत्करीषे व्युत्सृजतः, संयमौपघातिकं च क्व भवतीत्यत आह-**अगणी अग्निः** स यत्र प्रज्वाल्यते, एतच्च यथासङ्ख्येन योजनीयम् । कथमात्मोपघातादि भवतीत्यत आह-यथासङ्ख्येन **पिट्टण असुई य अन्नत्थ** आरामे व्युत्सृजतः **पिट्टणं** ताडनं भवति, वर्चः करीषे व्युत्सृजतोऽ**शुचि**रयमिति लोक एवं संभावयति, अङ्गारदहनभूमौ व्युत्सृजतः सोऽङ्गारदाहकः **अण्णत्थ** त्ति **अन्यत्रा**ङ्गारार्थं प्रज्वालयति ततश्च संयमोपघात इति, यतश्चैते दोषा भवन्ति अतोऽनुपघातिके स्थण्डिले व्युत्सृजनीयमिति **॥१७७॥**

अनुपघातिकं गतम्, इदानीं समे त्ति (नि.३१४) व्याख्यानयन्नाह –

**५७८ विसम पलोट्टण आया इतरस्स [१] पलोट्टणंमि छक्काया ।**
**झुसिरंमि विच्छुगाई उभयक्कमणे तसाईया ॥१७८॥ निभा०**

**विसम** गाहा । **विषमे** स्थण्डिले व्युत्सृजतः **प्रलुठनं** साधोरेव भवति ततश्च तस्मिन् प्रलुठने सति **आत्मोप**घातो भवति । **इयरस्स** इति **इतरयोः** कायिकापुरीषयोः **प्रलुठने** सति **षट् काया** विराध्यन्ते, तस्मात् समे व्युत्सृजनीयम् । समे त्ति गतं, अज्झुसिरे त्ति व्याख्यायते, तत्राह–**झुसिरंमि विच्छुगाई** झुसिरं पलालादिछन्नं तत्र व्युत्सृजतो **वृश्चिकादि**भक्षणं संभवति ततश्चात्मविराधना । **उभय** त्ति मूत्रपुरीषं तदा**क्रमणेन त्रसादयो** विराध्यन्ते ततश्च संयमोपघातो भवति तस्मादशुषिरे व्युत्सृजनीयम् । द्वारम् **॥१७८॥**

इदानीं अचिरकालकयंमि त्ति (नि.३१४)व्याख्यायते –

---

११७. वर्चः-गूथम्-विष्टा इत्यर्थः । संटी.

१. पलोट्टणे ह० हे० संपा०

**५७९ [1]जे जंमि उउंमि कया पयावणाईहि थंडिला ते उ ।**
**होंति इयरंमि चिरकया वासा वुत्थे य बारसगं ॥१७९॥ निभा०**

**जे जम्मि** गाहा । **यानि यस्मिनृतौ** शीतकालादौ **प्रतापनादिभि**-रग्निप्रज्वालनादिभिः **स्थण्डिलानि कृतानि** तानि तस्मिन्नेव ऋतौ स्थण्डिलान्यचित्तानि, **तान्येव** स्थण्डिलानि **इतरस्मिन**नन्तरऋतौ **चिरकृतानि** मिश्रीभूतानि चायोग्यानि **भवन्ति । वासा वुत्थे य बारसगं** ति यस्मिन् प्रदेश एकं **वर्षा**कालं ग्राममुषितः, स **च** प्रदेशो **द्वादश** वर्षाणि यावत्स्थण्डिलं भवति, यत्र पुनर्वर्षमात्रमुषितो ग्रामस्तत्र भवत्येव स्थण्डिलं द्वादश वर्षाणीति ॥१७९॥

इदानीं वित्थिण्णं ति (नि.३१५) [2]व्याख्यायते –

**५८० हत्थायामं [3]चउरंसं जहण्णं जोयणे बिछक्कियरं ।**
**चउरंगुलप्पमाणं जहण्णयं दूरमोगाढं ॥१८०॥ निभा०**

**हत्थायामं** गाहा । विस्तीर्णं द्विधा-जघन्यमुत्कृष्टं च, तत्र जघन्यं **हस्तायामं चतुरस्रं** च **जघन्यतो** विस्तीर्णं स्थण्डिलम्, **जोयणे बिछक्कियरं** ति **इतरमुत्कृष्टं** विस्तीर्णं **योजनानां द्विषट्कम्,** द्वादशयोजनविस्तीर्णमित्यर्थः । वित्थिण्णे त्ति गयं, इदानीं दूरमोगाढं ति व्याख्यायते, तत्राह-**चतुरंगुलप्पमाणं चत्वार्यङ्गुलानि** भुवोऽधो [4]यदवगाढं **तज्जघन्यतो दूरमोगाढमित्यु**च्यते, मध्यममुत्कृष्टं च चतुर्णामङ्गुलानाम-धस्ताद्विज्ञेयमिति । द्वारम् ॥१८०॥

आसन्नं (नि.३१५) व्याख्यायते, तत्राह –

**५८१ दव्वासण्णं भवणाइयाण तहियं तु संजमायाए ।**
**आयापवयणसंजमदोसा पुण भावमासण्णे ॥१८१॥ निभा०**

**दव्वासण्णं** गाहा । आसन्नं द्विविधं-द्रव्यतो भावतश्च, तत्र **द्रव्यासन्नं भवनादीनामास**न्ने व्युत्सृजतो द्रव्यासन्नं भवति, **तत्र** च **संयमात्मो**पघातो भवति, तत्र संयमोपघात एवं भवति-स गृहपतिस्तत्पुरीषं साधुव्युत्सृष्टं केनचित्कर्मकरेणान्यत्र त्याजयति ततश्च तत्प्रदेशविलेपने हस्तप्रक्षालने च संयमोपघातो भवति, आत्मोपघातश्च स गृहपती रुष्टः सन् कदाचित्ताडयति ततश्चात्मोपघात [5]भवति, तस्माद् द्रव्यासन्ने न

---

१. जं जंमि दा० २. व्याख्यानयन्नाह क० ३. चउरस्स ह० हे० ४. यद्गतं क० ल० ५. इति दा०

व्युत्सृजनीयम् । इदानीं भावासन्नं प्रतिपादयन्नाह-**आयापवयण** त्ति **आत्मप्रवचन-संयमोपघातदोषा भावासन्ने** भवन्ति, कथम्? स हि साधुरन्ययोगव्यावृत्त(पृत)स्तावदास्ते यावदतीव भावासन्नः सञ्जातः, ततश्च त्वरितं प्रयाति, पुनश्च केनचिद् धूर्त्तेनोपलक्ष्य भावासन्नतां धर्मप्रच्छनव्याजेनार्द्धपथ एव धृतः, ततश्च तस्य पुरीषवेगं धारयत आत्मोपघातो भवति, अथार्द्धपथ एव व्युत्सृजति ततश्च प्रवचनोपघातो भवति, संयमोपघातोऽपि तत्रैवाप्रत्युपेक्षितस्थण्डिले व्युत्सृजतो भवति, तस्मादनागतमेव गमने प्रवर्त्तते । द्वारम् ॥१८१॥

इदानीं बिलवर्जितं (नि. ३१५) व्याख्यायते, तत्राह –

**५८२ होंति बिले दो दोसा तसेसु बीएसु वावि ते चेव ।**
**संजोगओ य दोसा मूलगमा होंति सविसेसा ॥१८२॥ निभा०**

**होंति बिले** गाहा । **बिल**प्रदेशे व्युत्सृजतो **दोषद्वयं भवति**-आत्मविराधना संयमविराधना च, दारं। इदानीं तसपाणबीयरहियं ति व्याख्यायते, तत्राह– **तसेसु बीएसु वावि ते चेव । त्रसेषु** व्युत्सृजत [१]आत्मविराधना संयमविराधना भवति, **बीजेषु** च व्युत्सृजत**स्त एव** दोषा भवन्ति–आत्मविराधना संयमविराधना च, तत्रात्मविराधना गोक्षुरकप्रभृतीनामुपरि व्युत्सृजतो भवति, संयमविराधनाऽपि तथैवेति। दारं । एवं तावदेकैकदोषदुष्टं स्थण्डिलमुक्तम् । इदानीं द्वितीयादिसंयोगेन[२] दोषदुष्टतां प्रतिपादयन्नाह–'**संजोगओ अ' संयोगतो** द्व्यादिदोषसम्बन्धेन **मूलगमाद्** [३]मूलदोषात् सकाशात् **सविशेषा** द्विगुणतरादयो **दोषा भवन्ति,** एतदुक्तं भवति- मूलभेदस्तावदापातसंलोकदोषदुष्टता तथाऽन्यस्तत्रैव यद्युपघातदोषो भवति ततो द्विदोषसंयोगतः सविशेषा दोषा भवन्ति । एवं दोषत्रयादिसंयोगतः सविशेषा अधिका एकैकस्मिन् स्थण्डिले ज्ञेया इति ॥१८२॥

इदानीं तस्मिन् दोषरहिते स्थण्डिले प्रासस्य यो विधिः स उच्यते –

**५८३ दिसिपवणगामसूरियछायाएँ पमज्जिऊण तिक्खुत्तो ।**
**जस्सोग्गहो त्ति [४]काऊण वोसिरे [५]आयमिज्जा वा ॥३१७॥ नि०**

**दिसि** गाहा । तत्र तेन साधुना सञ्ज्ञां व्युत्सृजता **दिसि** त्ति उत्तरस्यां **दिशि** पूर्वस्यां च न पृष्ठं दातव्यं लोकविरोधात्, तथा **पवनग्रामसूर्याणां** च पृष्ठं दत्त्वा

१. आत्मसंयमविराधना दा.० ल० २. ०गेन दुष्टतां क० ३. दोषभेदात् क० ४. किच्चाण ह० ५. आयमो जाव ह०

न व्युत्सृजनीयं लोकविरोधादेव । तथा **छायायां प्रमार्जयित्वा तिक्खुत्तो** त्ति **तिस्रो** वाराः प्रमार्जयित्वा तत्र व्युत्सर्जनीयम्, **जस्सोग्गहो** त्ति **यस्यायमवग्रहस्तेनानुज्ञातव्य इत्येवं कृत्वा व्युत्सृजनीयम् आयमिज्जा वा** निर्लेपनं च पानकेन एवमेव कुर्यात्, यदुत- स्थण्डिलेऽनुज्ञापयित्वा चेति ॥३१७॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**५८४ उत्तरपुव्वा पुज्जा जम्माए निसियरा अहिवडंति ।**
**घाणाऽरिसा य पवणे सूरियगामे अवण्णो उ ॥१८३॥ निभा०**

**उत्तर** गाहा । **उत्तरा** दिक् **पूर्वा** च किल लोक एते द्वेऽपि **पूज्ये,** ततश्च तयोः पृष्ठं न दातव्यम्, **जम्माए निसियरा अभिवडंति** त्ति **याम्यां** दक्षिणा दिक् तस्यां च रात्रौ पृष्ठं न दातव्यम्, [१]किमित्येतदेवम् ? उच्यते - रात्रौ **निशाचराः** पिशाचादयः **अभिपतंति** त्ति अभिमुखा आगच्छन्ति, एतदुक्तं भवति–रात्रौ दक्षिणाया दिश उत्तरायां दिशि देवाः प्रयान्ति । (इति) लोके श्रुतिः, ततश्च तत्र पृष्ठं प्रयच्छतो लोकविरोधो भवति । **घाणारिसा य पवणे** त्ति **पवनस्य च** पृष्ठं यदि दीयते ततो **घ्राणार्शो** भवतीति । **सूर्यग्रामयोश्च** पृष्ठप्रदाने**ऽवर्णो**ऽयशो भवतीति ॥१८३॥

इदानीं छायाए त्ति (नि.३१७) व्याख्यानयन्नाह –

**५८५ संसत्तगहणी पुण छायाए निग्गयाए वोसिरइ ।**
**छायासइ उण्हंमि वि वोसिरिय मुहुत्तयं चिट्ठे ॥१८४॥ निभा०**

**संसत्त** गाहा । **संसक्तग्रहणिः** कृमिसंसक्तोदर इत्यर्थः । यद्यसौ साधुर्भवेत्ततो वृक्ष**छायायां निर्गतायां व्युत्सृजति,** अथ छाया न भवति ततो **व्युत्सृज्य मुहूर्त्त**मात्रं **तिष्ठेद्** येन ते कृमयः स्वयमेव परिणमन्ति ॥१८४॥

किं चासौ करोतीत्यत आह –

**५८६ उवगरणं वामे ऊरुगंमि मत्तं च दाहिणे हत्थे ।**
**तत्थऽन्नत्थ व पुंछे [२]तिहिं आयमणं अदूरंमि ॥३१८॥ नि०**

**उवगरणं** गाहा । **उपकरणं** रजोहरणदण्डकादि **वाम ऊरुणि** स्थापयति, **मात्रकं च दक्षिणे हस्ते** करोति, प्रोञ्छनं चापानस्य **तत्रान्यत्र वा** करोति, यदि कठिनं

---

१. किमिति रा० दा० २. तर्हि दा०

पुरीषं ततस्तत्रैव **प्रोज्छयति,** अथ श्लथं ततोऽन्यत्र, **तिहिं आयमणं** ति **त्रिभिश्चुलुकै-**र्निर्लेपनं करोति, **अदूरंमि** त्ति स्थण्डिलस्यासन्नप्रदेशे निर्लेपनीयमिति ॥३१८॥

इदानीं स्थण्डिलयतनोच्यते, तत्राह –

**५८७ पढमासइ अमणुन्नेयराण गिहियाण वावि आलोए ।**
**पत्तेयमत्त कुरुकुय दवं च [1]पउरं गिहत्थेसु ॥३१९॥ नि०**

**पढमासति** गाहा । **प्रथमस्या**नापातासंलोकरूपस्या**सत्य**भावे, अथवा प्रथमस्य संविग्नमनोज्ञापातस्थण्डिलस्यासति क्व गन्तव्यमित्यत आह–**अमणुण्ण** त्ति **अमनोज्ञानामा**पाते स्थण्डिले गन्तव्यम् । **इतराण** त्ति कुशीलानां संविग्नपाक्षिका-णामसंविग्नपाक्षिकाणां चापातस्थण्डिले गन्तव्यम्, एतेषां चानन्तरोदितानां सर्वेषा-मेवैवमर्थमालोको नोपात्तः, यतस्ते दूरस्थिता नाभोगयन्त्येव । **गिहियाण वावि आलोए** त्ति तदभावे **गृहस्थालोके** स्थण्डिले गन्तव्यम् । **पत्तेयमत्त** त्ति प्रत्येकं प्रत्येकं यानि मात्रकाणि गृहीतानि तैः **प्रत्येकं मात्रकैः कुरुकुचां** पादप्रक्षालनाचमनरूपां **प्रचुरद्रवेण** कुर्वन्ति, **गिहत्थेसु** त्ति **गृहस्थ**विषय आलोके सतीदं पूर्वोक्तं कुरुकुचादि कुर्वन्तीत्यर्थः ॥३१९॥

**५८८ तेण परं पुरिसाणं असोयवाईण वच्च आवायं ।**
**इत्थिनपुंसालोए परंमुहो कुरुकुया सा उ ॥३२०॥ नि०**

**तेण परं** गाहा । ततः **परं** यदि गृहस्थालोकम्, नास्ति स्थण्डिलं ततः **पुरुषाणामा**पाते तत्रापि **अशौचवादिनां व्रज आपात**स्थण्डिलम् । अथाशौचवादि-पुरुषापातस्थण्डिलं नास्ति ततः **इत्थिनपुंसालोए स्त्रीनपुंसकालोके** स्थण्डिले **पराङ्मुखो** व्युत्सृजति, **कुरुकुचा** च **सैव** कर्त्तव्या ॥३२०॥

**५८९ तेण परं आवायं पुरिसेयरइत्थियाण तिरियाणं ।**
**तत्थ वि य परिहरिज्जा दुगुंछिए दित्तचित्ते य ॥३२१॥ नि०**

**तेण परं** गाहा । [2]ततः **परं** तदभावे सति पूर्वोक्तस्थण्डिलस्य **तिरश्चां** सम्बन्धिनो ये **पुरुषा इतरे** च नपुंसकास्तथा **स्त्रियः**, एतेषा**मापात**स्थण्डिले व्युत्सृजन्ति । **तत्थ वि य** त्ति **तत्रापि तिरश्चां** मध्ये **जुगुप्सिता दृप्तचित्ताश्च परिहरणीयाः,** यतस्तत्रात्मसंयमोपघातो भवतीति ॥३२१॥

१. बहुयं ता. २. ततस्तदा० क०

**५९० तत्तो इत्थि नपुंसा तिविहा तत्थ वि [1]असोयवाईणं ।**
**तहियं तु सद्दकरणं आउलगमणं कुरुकुया य ॥३२२॥ नि०**

**तत्तो** गाहा । **ततस्तदभावे** स्त्रीनपुंसकापातस्थण्डिले गन्तव्यम्, तत्र **स्त्री त्रिविधा** दण्डिककौटुम्बिकप्राकृतभेदभिन्ना, **नपुंसकमपि त्रिविधम्**–दण्डिक-कौटुम्बिक-प्राकृत-भेदभिन्नम्, **तत्राप्यशौचवादीनामा**पाते व्युत्सृजति । आह–स्त्र्याद्याशङ्कादयस्तत्र तदवस्था एव दोषाः ? उच्यते-**तहियं तु सद्दकरणं, तत्र** स्थण्डिले व्रजनन्येषामा-शङ्काविनिवृत्त्यर्थमुच्चैः काशितादिरूपं **शब्दं करोति,** परस्परं वा जल्पन्तो व्रजन्ति ततश्च ते गृहस्था नाशङ्कां स्त्र्याद्यभिलषणरूपां कुर्वते यतस्ते प्रसभं' प्रयान्तीति, **आकुलगमनं** वा कुर्वन्ति, एकत्र मिलित्वा गच्छन्तीत्यर्थः, **कुरुकुचा च** पूर्ववत्कार्या ॥३२२॥

उक्तं स्थण्डिलद्वारम्, इदानीमवष्टम्भद्वारं (नि.२६४) प्रतिपादयन्नाह –

**५९१ अव्वोच्छिन्ना तसा पाणा पडिलेहा न सुज्झई ।**
**तम्हा [2]हट्ठपहट्ठस्स अवट्ठंभो न कप्पई ॥३२३॥ नि०**

**अव्वोच्छिन्ना** गाहा । अवष्टम्भः स्तम्भादौ न कर्त्तव्यः, यतः प्रत्युपेक्षितेऽपि तस्मिन् पश्चादपि **अव्यवच्छिन्ना** अनवरतं **त्रसाः प्राणा** भवन्ति, ततश्च तत्र **प्रत्युपेक्षणा न शुद्ध्यति, तम्हा हट्ठपहट्ठस्स, हृष्टो** नीरोगः **प्रहृष्टः** समर्थस्तरुण-स्तस्यैवंविधस्य साधो**रवष्टम्भो न कल्पते** नोक्तः ॥३२३॥

इदानीं के ते त्रसाः प्राणिन इत्येतत्प्रदर्शयन्नाह –

**५९२ संचरं कुंथुद्देहिय लूयावेहे तहेव दाली य ।**
**घरकोइलिया सप्पे [3]विस्संभर उंदुरे सरडे ॥३२४॥ नि०**

**संचरं** गाहा । तत्रावष्टम्भे स्तम्भादौ **सञ्चरन्ति** प्रसर्पन्ति, के ते ? [4]**कुन्थुसत्त्वा उद्देहिकाश्च लूता** कोलियकस्तत्कृतो **वेधो** भक्षणं भवति, **तथा च दाली** राजिर्भवति तस्यां च वृश्चिकादेराश्रयो भवति, तथा **गृहकोकिलिका** घरोलिका उपरिष्टान्मूत्रयति, तन्मूत्रेण चोपघातो भवति चक्षुषः, **सर्पो** वा [5]तत्राश्रितो भवेत्, **विश्वम्भरो** जीवविशेष **उन्दुरो** वा भवेत्, **सरटः** कृकलाशः, स च दशनादि करोति ॥३२४॥

---

१. असोयवाईसु ह० हे० संपा० २. हट्ठसमत्थस्स हे० संपा० ३. विसंभुर ह० ४. कुन्थवः सत्त्वाः क० ५. तत्राश्रयो क०

इदानीं भाष्यकारो व्याख्यानयन्नाह –

**५९३ संचारगा चउद्दिसि [१]पुव्विं पडिलेहिए वि [२]अन्नेंति ।**
**[३]उद्देहि मूल पडणं विराहणा तदुभए भेओ ॥१८५॥ निभा०**

**संचारगा** गाहा । **सञ्चारकाः** कुन्थ्वादयः पूर्वोक्ताश्**चतसृष्वपि दिक्षु** तस्मिन्नवष्टम्भे परिभ्रमन्ति, **पूर्वं प्रत्युपेक्षितेऽपि** तस्मिन् स्तम्भाद्यवष्टम्भे**ऽन्ये** आगच्छन्ति । दारं । **उद्देहि** त्ति कदाचिदसौ स्तम्भादिरवष्टम्भो **मूल उद्देहिका**दिभक्षितस्ततश्च पुनरवष्टम्भं कुर्वतः **पतति,** पुनश्च **विराधना तदुभये** भवत्यात्मनि संयमे च **भेदश्च** पात्रकादिर्भवति । द्वारम् ॥१८५॥

**५९४ लूयाइचमढणा संजमंमि आयाए [४]विच्चुगाईया ।**
**एवं घरकोइलिया अहिउंदुरसरडमाईसु ॥१८६॥ निभा०**

**लूयादि** गाहा । **लूतादिचमढने** मर्दने **संयमे** संयमविषया विराधना भवति, **आत्म**विराधना च **वृश्चिकादिभिः** क्रियते । **एवं गृहकोकिलिकासर्पउन्दुरसरडादि**विषया संयमविराधना आत्मविराधना च भवति ॥१८६॥

उक्त उत्सर्गः, इदानीमपवाद उच्यते –

**५९५ अतरंतस्स व [५]पासा गाढं दुक्खंति तेणऽवट्ठंभे ।**
**संजयपट्ठी थंभे सेल छुहाकुड्ड[६]वेंटीए ॥३२५॥ नि०**

**अतरंतस्स** गाहा । **अतरंतस्स** अशक्नुवतो ग्लानादेः **पार्श्वानि गाढमत्यर्थं दुःखन्ति तेन** कारणेना**वष्टम्भं** कुर्वीत, क्व ? अत आह–**संयतपृष्ठे स्तम्भे** वा **सेल** त्ति पाषाणमये स्तम्भे सुधामाष्र्ये **कुड्ये** वाऽवष्टम्भं कुर्वीत, अवधिकां [७]वेण्टलिकां वा कुड्यादौ कृत्वा ततोऽवष्टम्भं करोति ॥३२५॥

उक्तमवष्टम्भद्वारम्, इदानीं मार्गद्वारं (नि.२६४) प्रतिपादयन्नाह –

**५९६ पंथं तु वच्चमाणो जुगंतरं चक्खुणा उ पडिलेहे ।**
**अइदूरचक्खुपाए सुहुमतिं[८]रिच्छगय न पेहे ॥३२६॥ नि०**

**पंथं तु** गाहा । **पथि व्रजन् युगान्तरं** युगं चतुर्हस्तप्रमाणं तन्मात्रान्तरं **चक्षुषा**

---

१. पुव्वं ता.सं. २. अन्नन्ति दा० ३. उद्दीढ ह० हे० ४. विच्चुगाईसु ह० हे० संपा० ५. उ पासा हे० हे० ६. विंट्टी य ह० ७. वेण्टिकां दा० वेण्टिकायां ल. ८. तिरिअगय ण पेहे हे०

**प्रत्युपेक्षेत**, किं कारणम् ? यतोऽतिदूरचक्षुःपाते सति **सूक्ष्मांस्तिर्यग्गतान्** प्राणिनः **न पेहे, न** पश्यति, दूरे प्रहितत्वाच्चक्षुषः ॥३२६॥

**५९७ अच्चासन्ननिरोहे दुक्खं दट्ठुं पि पाय[1]संहरणं ।**
**छक्कायविओरमणं सरीर तह भत्तपाणे य ॥३२७॥ नि०**

**अच्चासन्न** गाहा । अथ **अत्यासन्ने निरोधं** करोति चक्षुषस्ततो **दृष्ट्वाऽपि** प्राणिनं **दुःखेन पादसंहरणम्**, पादं प्राणिनि निपतन्तं धारयतीत्यर्थः, अतिसन्निकृष्टत्वाच्चक्षुषः । **छक्कायविओरमणं** ति [2]**षट्कायविराधनं** भवति **शरीर**विराधनां **तथा भक्तपान**विराधनां **च** करोतीति ॥३२७॥

इदानीमस्या एव गाथायाः पश्चार्द्धं व्याख्यानयन्नाह –

**५९८ उड्ढमुहो कहरत्तो अवयक्खंतो वियक्खमाणो य ।**
**बायरकाए वहए तसेतरे संजमे दोसा ॥१८७॥ निभा०**

**उड्ढमुहो** गाहा । **ऊर्ध्वमुखो** व्रजन् **कथासु** च **रक्तः** सक्तः **अवयक्खंतो** त्ति पृष्ठतोऽभिमुखं निरूपयन् [3]**वियक्खमाणो** त्ति विविधं सर्वासु दिक्षु पश्यन्, स एवंविधो **बादरकायानपि व्यापादयेत् त्रसेतरांश्च** पृथिव्यादीन् स्थावरकायान्, ततश्च **संयमे** संयमविषया एते **दोषा** भवन्तीति ॥१८७॥

इदानीं शरीरविराधनां [4]प्रदर्शयन्नाह –

**५९९ निरविक्खो वच्चंतो आवडिओ [5]खाणुकंटविसमेसु ।**
**पंचण्ह इंदियाणं अन्नतरं सो विराहिज्जा ॥१८८॥ निभा०**

**निरवेक्खो** गाहा । **निरपेक्षो व्रजनाऽऽपतितः** सन् **स्थाणुकण्टकविषमेषु**, विषममुन्नतं तेष्वापतति ततः **पञ्चानामिन्द्रियाणां** चक्षुरादीनामन्य**तरत् स विराधयेत्** ॥१८८॥

इदानीं भत्तपाणे य त्ति (नि.३२७) अवयवं व्याख्यानयन्नाह –

**६०० भत्ते वा पाणे वा आवडियपडियस्स [6]भिन्नपाए वा ।**
**छक्कायविओरमणं उड्डाहो अप्पणो हाणी ॥१८९॥ निभा०**

---

१. ०साहरणं सं २. षट्कायविराधनां करोति दा० ३. वियक्कमाणो क० ४. प्रतिपादनायाह–द. ५. खाणुकंटगाईसु ह० विसमेखाणुकंटेसु हे० ६. भिन्नभाणे वा० हे० भिन्ने वा ह०

**भत्ते** गाहा । आपतितश्चासौ पतितश्च **आपतितपतितस्य** साधो**र्भिन्ने** भग्ने **वा** **पात्रके** सति **भक्ते वा** प्रोज्झिते **पानके वा** ततः **षट्कायव्युपरमणा**[118] भवति, **उड्डाहश्च** भवति, **आत्मनश्च हानिः** क्षुधा बाधनं भवति ॥१८९॥

कथं पुनः षट्कायव्युपरमणमुड्डाहश्च ?

**६०१ दहि घय तक्कं [1]पयमंबिलं व सत्थं तसेतराण भवे ।**
**खद्धंमि य जणवाओ [2]बहुफोडा जं च परिहाणी ॥१९०॥ निभा०**

**दहि** गाहा । तानि गृहीतानि कदाचिद् **दधिघृततक्रपयः**काञ्जिकानि भवन्ति, ततश्च तानि **शस्त्रम्**, केषाम् ? **त्रसानामितरेषां** च पृथिव्यादीनां **भवेत्**, **खद्धंमि** त्ति प्रचुरे च तस्मिन् भक्ते लोकेन दृष्टे सति **जनापवादो** भवत्युड्डाहः, यदुत **बहुफोड** त्ति बहुभक्षका एत इति, **या चा**त्मपरितापनादिका **परिहाणिः** सा च भवति ॥१९०॥

तथा पात्रविराधनायां याचनादोषान् प्रदर्शयन्नाह –

**६०२ [3]पायं च मग्गमाणे हविज्ज पंथे विराहणा दुविहा ।**
**दुविहा य भवे तेणा परिकम्मे सुत्तपरिहाणी ॥३२८॥ नि०**

**पायं** गाहा । **पात्रं** चान्विषति सति ग्रामादौ **भवेत्पथि विराधना [4]द्विविधा**-आत्मविराधना संयमविराधना च, पथि **स्तेनाश्च द्विविधा भवन्ति**-उपधिस्तेनाः शरीरस्तेनाश्च । लब्धेऽपि कृच्छात्पात्रे **तत्परिकर्मयत**स्तद्व्यापारे लग्नस्य **सूत्रार्थ-परिहाणिः** ॥३२८॥

अधुना निगमयन्नाह –

**६०३ [5]एसा पडिलेहणविही कहिया भे धीरपुरिसपन्नत्ता ।**
**संजम[6]गुणड्ढगाणं निग्गंथाणं महरिसीणं ॥३२९॥ नि०**

**एसा** गाहा । **अयं प्रत्युपेक्षणाविधिः कथितो भे** भवताम्, किंविशिष्टः ? **धीरपुरुषैः प्रज्ञप्तः**, गणधरैः प्ररूपितः, **संयमगुणैराढ्यानां निर्ग्रन्थानां [7]महर्षीणां** सत्यवादीनां कथित इति ॥३२९॥

---

११८. विऊरमण-व्यवरमणम्-व्युपरमणा-विराधना । (धर्म.३ अधि.)

१. पय अंबिलं च ह० २. बहिफोडा ह० हे० संपा० ३. पत्तं आ० ४. द्विप्रकारा क० ५. एस ख. ६. तवड्ढगाणं हे० ह० ७. महर्षीणां कथित दा०

अधुनाऽस्यैवाचीर्णस्य फलमाह –

**६०४ एयं पडिलेहणविहिं जुंजंता चरणकरणमाउत्ता ।**
**साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥३३०॥ नि०**

**एयं पडिलेहणविहिं** गाहा । **एतं प्रत्युपेक्षणाविधिं युञ्जन्तः** कुर्वाणा**श्चरण-करण**योगयुक्ता उद्युक्ताः सन्तः **साधवः क्षपयन्ति कर्म**, किंविशिष्टम् ? **अनेक-भवसञ्चितम**नेकभवोपात्तम्, **अनन्तम**नन्तकर्मपुद्गलनिर्वृत्तत्वादनन्तम्, अनन्तानां वा भवानां हेतुर्यत्त**दनन्तं** क्षपयन्तीति । उक्तं मार्गप्रत्युपेक्षणाद्वारम्, तत्प्रतिपादनाच्चोक्तं प्रत्युपेक्षणाद्वारमिति । प्रतिलेखनाद्वारं समाप्तम् ॥३३०॥

इदानीं पिण्डद्वारप्रतिपादनायाह –

**६०५ [१]पिंडं च एसणं वा एत्तो वोच्छं गुरूवएसेणं ।**
**गवेसणगहणघा[२]सेसणाए [३]तिविहाइ वि विसुद्धं ॥३३१॥ नि०**

**पिंडं** गाहा । **पिण्डं** वक्ष्ये **एषणां च**, एषणा गवेषणादि तां **चातः** परं **वक्ष्ये, गुरूपदेशेन** न स्वमनीषिकया, सा चैषणा त्रिविधा भवति–**गवेषणै**षणा **ग्रहणै**षणा **ग्रासै**षणा चेति, अनया **त्रिविधयाऽप्येषणया विशुद्धः** शुचिर्यः पिण्डस्तं वक्ष्य इति योगः ॥३३१॥

**यथोद्देशं निर्देश** इति न्यायात्प्रथमं पिण्डमेव व्याख्यानयन्नाह –

**६०६ पिंडस्स उ निक्खेवो चउक्कओ छक्कओ य कायव्वो ।**
**निक्खेवं काऊणं परूवणा तस्स कायव्वा ॥३३२॥ नि०**

**पिंडस्स उ** गाहा । तत्र पिण्डनं पिण्डः, **पिडि सङ्घाते (पा. धा. १७४०)** पिण्ड इत्यस्य पदस्य **निक्षेपः कर्त्तव्यः**, स च निक्षेप**श्चतुष्ककः** क्रियते **षट्को** वा, एवं **निक्षेपं कृत्वा प्ररूपणा** व्याख्या **तस्यै**व पिण्डस्य **कर्त्तव्या** ॥३३२॥

तत्र चतुष्ककनिक्षेपं प्रतिपादयन्नाह –

**६०७ नामं ठवणापिंडो दव्वपिंडो य भावपिंडो य ।**
**एसो खलु पिंडस्स उ निक्खेवो चउव्विहो होइ ॥३३३॥ नि०**

**नामं ठवणा** गाहा । **नामपिण्डः स्थापनापिण्डो द्रव्यपिण्डो भावपिण्डश्चेत्येष**

---

१. पिंडं व एसणं वा. आ० २. घासेसणा य हे० ह० ३. तिविहा य विहिसुद्धं ह० हे०

तावच्चतुष्कको **निक्षेपः**, यदा [1]तु पुनः क्षेत्रपिण्डः कालपिण्डश्च निक्षिप्यते तदाऽयमेव षट्को भवति । तत्र नामपिण्डः पिण्ड एव नाम यस्य स नामपिण्डः ॥३३३॥

तच्च नाम –

**६०८ गोण्णं समयकयं वा जं वावि हविज्ज तदुभएण कयं ।**
**तं बिंति नामपिण्डं ठवणापिण्डं अओ वोच्छं ॥३३४॥ नि०**

**गोण्णं** गाहा । तच्च नाम [११९]**गोण्णं** भवति यथा गुडपिण्ड इति, तथाऽन्यत् **समयकृतं** भवति, समयः सिद्धान्तस्तेन कृतम्, यथा-"[A]**से भिक्खू वा भिक्खुणी वा गाहावतिकुलं पिंडवायपडियाए पविट्ठे समाणे जं जाणिज्जा** [2]**अंबपाणगं वा**" इत्यादि, यद्यप्यसौ पानकस्य द्रवस्वभावस्य कृते प्रविष्टस्तथाप्यसौ पिण्डार्थं प्रविष्ट इत्युच्यते, एष समयसिद्धः पिण्डः, **यद्वा** नाम **भवेत्तदुभयेन कृतं** लोकलोकोत्तरकृतं वा यन्नाम भवेत्, यथा "[B]**गाहावतिकुलं पिंडवातपडियाए पविट्ठेण पिंडो चेव सत्तुगाणं केरओ लद्धो गुडपिंडो वा**" तत्र लोके गुडपिण्डको पिण्डक एवोच्यते, समयेऽप्येवमेव पिण्डक एवोच्यते, **तमेवं**गुणविशिष्टं सर्वमेव **नामपिण्डं ब्रुवते, इत** ऊर्ध्वं **स्थापनापिण्डं वक्ष्य** इति ॥३३४॥

**६०९ अक्खे वराडए वा कट्ठे पोत्थे व चित्तकम्मे वा ।**
**सब्भावम[3]सब्भावं ठवणापिंडं वियाणाहि ॥३३५॥ नि०**

**अक्खे** गाहा । स्थापना द्विविधा—सद्भावस्थापना असद्भावस्थापना चेति, तत्राक्षविषया सद्भावस्थापना असद्भावस्थापना च भवति, कथम् ? यदैक एवाक्षः पिण्डकल्पनया बुद्ध्या विकल्प्यते तदाऽसद्भावस्थापना, यत्र पुनस्त **एवाक्षास्त्रिक**-प्रभृतय एकत्र स्थाप्यन्ते तदा सद्भावस्थापना, एवं **वराटकेषु** कपर्दकेषु, तथा **काष्ठकर्मणि पुस्तकर्मणि चित्रकर्मणि** चेति । यदैकमेव काष्ठं पिण्ड एष इत्येवं कल्प्यते तदाऽसद्भावस्थापना, यदा तु बहून्येकत्र मिलितानि पिण्डत्वेन कल्प्यन्ते तदा सद्भावस्थापना, एवं पुस्तेऽपि पुत्तलिकास्वपि एवं चित्रकर्मण्यपि, यदैकचित्रकर्मणि

A. स भिक्षुर्वा भिक्षुणी वा गाथापतिकुलं पिण्डपातप्रतिज्ञया प्रविष्ट सन् स यत्पुनर्जानीयात्-आम्रपानकं वा....।

B. गाथापतिकुलं पिण्डपातप्रतिज्ञया प्रविष्टेन पिण्ड एव सक्तूनां सम्बन्धी लब्धो गुडपिण्डो वा ।

११९. गोण्णं-गौणम्-गुणादागतं गौणम्, व्युत्पत्तिनिमित्तं द्रव्यादिरूपं गुणमधिकृत्य यद्वस्तुनि प्रवृत्तं नाम तद्गौणनामेति भावार्थः । [पिण्डनि. ६]

१. यदा पुनः क० २. अन्नं वा पाणगं दा० क० ३. ०मसब्भावे ह०

पुत्तलकः पिण्ड इति स्थाप्यते तदाऽसद्भावपिण्डस्थापना, यत्र त्रिप्रभृति पिण्डबुद्ध्या कल्प्यते तदा सद्भावस्थापना, एवं **सद्भावपिण्डमसद्भावपिण्डं** च **जानीहि** ॥३३५॥

इदानीं द्रव्यपिण्डस्य ज्ञशरीर-भव्यशरीर-भव्यशरीरव्यतिरिक्तस्य प्रतिपादनायाह-

**६१० तिविहो य दव्वपिंडो सच्चित्तो मीसओ य अच्चित्तो ।**
**अच्चित्तो य दसविहो सच्चित्तो मीसओ नवहा ॥३३६॥ नि०**

**तिविहो** गाहा । **त्रिविधो द्रव्यपिण्डः-सचित्तो मिश्रोऽचित्तश्चे**ति । तत्र योऽसा**वचित्तः** स **दशविधः, सचित्तो नव**प्रकारः, **मिश्रश्च नवधा** ॥३३६॥

तत्राचित्तपिण्डप्रतिपादनायाह —

**६११ पुढवी आउक्काए तेउवाऊवणस्सई चेव ।**
**बियतियचउरो पंचिंदिया य लेवो य दसमो उ ॥३३७॥ नि० । दारगाहा ।**

**पुढवी** गाहा । **पृथिवी**कायपिण्डः, **अप्काय**पिण्ड**स्तेज**स्कायपिण्डः, **वायु**काय-पिण्डः, **वनस्पति**कायपिण्डः, [1]**द्वीन्द्रिय**पिण्डः, **त्रीन्द्रिय**पिण्डः, **चतुरिन्द्रिय**पिण्डः, **पञ्चेन्द्रिय**पिण्डः, पात्रकार्थं **लेप**पिण्ड**श्चे**ति **दशमः** । एवमयं दशप्रकारोऽचित्तपिण्डः ॥३३७॥

इदानीं योऽसा अचित्तः [2]पृथिवीकायादिपिण्डः स सचित्तपूर्वको भवतीति कृत्वा ततः स एव प्रथमं सचित्तः प्रतिपाद्यते, तथोपन्यासोऽपि सचित्तस्यैव प्रथमं कृतः, तथा योऽसौ सचित्तो मिश्रश्च एकैको नवप्रकार उक्तः सोऽप्यनेन क्रमेण व्याख्यातो भवतीति कृत्वा पूर्वं सचित्तं व्याख्यानयन्नाह —

**६१२ पुढविक्काओ तिविहो सच्चित्तो मीसओ य अचित्तो ।**
**सच्चित्तो पुण दुविहो निच्छयव[3]वहारओ चेव ॥३३८॥ नि०**

**पुढविक्काओ** गाहा । **पृथिवीकायस्त्रिविधः सचित्तो मिश्रोऽचित्तश्च** । तत्र **सचित्तो द्विविधः-निश्चय**सचित्तो **व्यवहार**सचित्तश्च ॥३३८॥

**६१३ निच्छयओ सच्चित्तो पुढविमहापव्वयाण बहुमज्झे ।**
**अच्चित्तमीसवज्जो सेसो ववहारसच्चित्तो ॥३३९॥ नि०**

---

१. द्वीन्द्रियकायपिण्डः, त्रीन्द्रियकायपिण्डः, चतुरिन्द्रियकायपिण्डः, पञ्चेन्द्रियकायपिण्डः । दा. २. पृथिवीकायः स क० ३. ववहारिओ ह० हे०

**निच्छयओ** गाहा । **निश्चयतः सचित्तः पृथिवीनां रत्नशर्करा**प्रभृतीनां सम्बन्धी यः **महापर्वतानां हिमवदादीनां** च **बहुमध्ये** मध्यदेशभागे । इदानीं व्यवहारसचित्त-प्रतिपादनायाह—**अचित्त**वर्जो **मिश्रवर्ज**श्च, एतदुक्तं भवति-योऽचित्तो न भवति न च मिश्रः स व्यवहारतः सचेतन इति, स चारण्यादौ भवति यत्र वा गोमयादिर्नास्ति ॥३३९॥

उक्तः सचित्तः पृथिवीकायः, इदानीं मिश्रपृथिवीकायं प्रतिपादयन्नाह –

**६१४ खीरदुमहिट्ठ पंथे [1]कट्ठोल्ला इंधणे य [2]मीसो य ।**
**पोरिसी एग दुग तिगं बहुइंधण मज्झ थोवे य ॥३४०॥ नि०**

**खीरदुम** गाहा । **क्षीरद्रुमा** उदुम्बरादयस्तेषामधो यः पृथिवीकायः स मिश्रः, ते हि क्षीरद्रुमा मधुरस्वभावा भवन्ति, **पथि** च मिश्रः पृथिवीकायः, [3]**कट्ठोल्ला** त्ति हलकृष्टो यः पृथिवीकायस्तत्क्षणादेव आर्द्रश्च शुष्कश्च क्वचिन्मिश्रः पृथिवीकायः, **इंधणे य** त्ति [4]इंघणं गोमउ भण्णति "[A]तत्थ कुम्भकारेण सद्रवो आणिओ तेण मिलितो संतो पृथिवीकायो **मिश्रो** भवति," कियत्कालं यावद् ? अत आह-**पोरिसी एग दुग तिगं** यथासङ्ख्येन-**बहुइंधण मज्झ थोवे य बहुइंधण मज्झिंधण थोविंधण,** यदि **बहु इन्धनं** स्वल्पः पृथिवीकायस्ततः **पौरुषी**मात्रं यावन्मिश्रो भवति, **मध्ये त्विन्धने**ऽर्द्धमिन्धनस्यार्द्धं पृथिवीकायस्य यत्र स **पौरुषीद्वितयं** यावन्मिश्रः, स्वल्पेन्धनस्तु पृथिवीकायः **पौरुषीत्रयं** यावन्मिश्रो भवति ॥३४०॥

उक्तो मिश्रः, इदानीमचित्त उच्यते, स चैवं भवति –

**६१५ सीउण्हखारखत्ते अग्गीलोणूसअंबिले नेहे ।**
**वक्कंतजोणिएणं पओयणं तेणिमं होइ ॥३४१॥ नि०**

**सीउण्ह** गाहा । **शीत**शस्त्राभिहतः, **उष्ण**शस्त्राभिहतः, **क्षारस्ति**लक्षारादिस्तेनाभिहतो यः, **क्षत्र**शस्त्रेणाभिहतः, क्षत्रं करीषविशेषः, **अग्नि**शस्त्राभिहतः, **लवण**शस्त्राभिहतः, **उष**शस्त्राभिहतः, काञ्जिकशस्त्राभिहतः, **स्नेहेन** घृतादिना शस्त्रेणाभिहतः सन् यो **व्युत्क्रान्तयोनिकः**, अथवा वक्कंतजोणिए व्विय केचित्पठन्ति, तत्रायमर्थः—व्युत्क्रान्ता अपगता योनिः स्वयमेव यस्य पृथिवीकायस्य, **तेन चेदं** वक्ष्यमाणं **प्रयोजनं**

---

A तत्र कुम्भकारेण सद्रव आनीतः, तेन मिलितः सन्तः पृथिवीकायो मिश्रो भवति ।

१. कट्ठोल्लो भ. २. मीसो उ ह० हे० ३. कट्ठोल्लो त्ति क.ल.भ. ४. इंधणे त्ति गोमयो भण्यते । व.

**भवति** ॥३४१॥

किं च तत्प्रयोजनमित्यत आह –

**६१६ अवरद्धिग विसबंधे लवणेण व सुरभिउवलएणं वा ।**
**अच्चित्तस्स उ गहणं पओयणं होइ जं चऽन्नं ॥३४२॥ नि०**

**अवरद्धिग** गाहा । **अवरद्धिगा** लूताफोडिआ तस्यां लूतास्फोटिकायामुत्थितायां दाहोपशमार्थमचेतनेन पृथिवीकायेन परिषेकः क्रियते, यदि वा **अवरद्धिगा** सर्पदंशस्तस्मिन् परिषेकादि क्रियते, दंशे **विषे** वा पतिते सति तयाऽचेतनया मृत्तिकया **बन्धो** वा दीयते, **लवणेन वा प्र**योजनमचित्तेन भवति, **सुरभिउवलएणं व** त्ति गन्धारोहकेणापि किञ्चित्प्रयोजनं भवेत्पामादौ, एभिः प्रयोजनै**रचेतन**स्य पृथिवीकायस्य **ग्रहणं** भवति **प्रयोजनं भवति** ॥३४२॥

इदं च वक्ष्यमाणमन्यत् –

**६१७ ठाण निसीयण तुयट्टण उच्चाराईण चेव उस्सग्गो ।**
**घट्टग डगल लेवो एमाइ पओयणं बहुहा ॥३४३॥ नि०**

**ठाण निसीयण** गाहा । **स्थानं** कायोत्सर्गः सोऽचेतने पृथिवीकाये क्रियते, **निषीदनमु**पवेशनम्, **त्वग्वर्त्तनं** निमज्जनं च क्रियते, **उच्चारादीनां वोत्सर्गः** क्रियते, **घट्टग** त्ति **घट्टकः** पाषाणकः येन पात्रकं लेपितं सद् घृष्यते, तथा **डगलका** अपानप्रोञ्छनार्थम् **लेपश्च** पात्रकाणाम्, **एवमादि प्रयोजनम**चित्तेन पृथिवीकायेन भवति ॥३४३॥

उक्तः पृथिवीकायः, इदानीमप्काय उच्यते, असावपि त्रिविधः सचित्तमिश्राचित्त-भेदतः, तत्र सचित्तप्रतिपादनायाह –

**६१८ घणउदही घणवलया करग समुद्ददहाण बहुमज्झे ।**
**अह निच्छयसच्चित्तो ववहारनयस्स अगडाई ॥३४४॥ नि०**

**घणउदही** गाहा । **घनोदधयो रत्नप्र**भापृथिव्यादीनां **घनवलयानि** च **करकाश्च**, एतेषु [१]निश्चयतः सचित्तोऽप्कायः **समुद्रबहुमध्ये** मध्यप्रदेशे **द्रहमध्ये** च [२]**निश्चयतः** सचेतनः, **व्यवहारनयस्य** पुनर**गडादौ** कूपादौ योऽप्कायः स व्यवहारतः सचित्तः ॥३४४॥

---

१. नियमात् स०दा० २. निश्चयसचेतनः ख.

इदानीं मिश्रप्रतिपादनायाह –

**६१९ उसिणोदगमणुवत्ते दंडे वासे य पडियमेत्तम्मि ।**
**मोत्तूणाएसतिगं चाउलउदगं बहुपसन्नं ॥३४५॥ नि०**

**उसिणोदग** गाहा । **उष्णोदकमनुद्वृत्ते दण्डे** मिश्रं भवति, "[A]तत्थ मज्झे जीवसंघातो पिंडीभूतो अच्छइ पच्छा उव्वत्ते सो परिणमइ, सो जाव न परिणमइ ताव मीसो," **वासे य पडिअमेत्तम्मि, वर्षे च पतितमात्रे** मिश्रो भवत्यप्कायः, तन्दुलोदके व्यवस्था का ? इति तदुच्यते-**मोत्तूण** इत्यादि, तदपि मिश्रम्, **चाउलउदगं बहुप्रसन्नं** सदचेतनं भवति, **आदेशत्रितयं मुक्त्वा** तत्रानेकान्तात् ॥३४५॥

के च ते आदेशाः ? –

**६२० आदेसतिगं बुब्बुय बिन्दू तह चाउला न सिज्झंति ।**
**मोत्तूण तिण्णि एए चाउलउदगं बहुपसन्नं ॥३४६॥ नि०**

**आएसतिगं** गाहा । "[B]आदेसतियं केई भणंति-जाव **बुब्बुया न** फिट्टंति ताव तं मीसं, अण्णे भणंति–भंडयलग्गा **बिंदुणो ण** सुक्कंति जाव ताव मीसं, अण्णे भणंति-जाव **चाउला न सिज्झंति** ताव मीसं, एते अणादेसा, जम्हा एयाणि तिण्णि वत्थूणि कदाइ चिरेण होंति, कदाइं सिग्घतरं चेव आहारवसाओ, तम्हा चाउलोदगं जदा बहुपसन्नं होइ तदा तं अचित्तमिति", अथवा **मुक्त्वा तन्दुलोदकं बहुप्रसन्नं** यदन्यदा**देशत्रितयं** प्रतिपादितं तन्मिश्रं द्रष्टव्यमिति ॥३४६॥

उक्तो मिश्रोऽप्कायः, इदानीमचित्तप्रतिपादनायाह –

**६२१ [१]सीउसिणखारखत्ते अग्गीलोणूसअंबिले नेहे ।**
**वक्कंतजोणिएणं पओयणं तेणिमं होति ॥३४७॥**

**सीउसिण** गाहा । पूर्ववत् [नि० ३४१] ॥३४७॥

---

A. तत्र मध्ये जीवसङ्घातः पिण्डीभूतस्तिष्ठति पश्चादुद्वृत्ते स परिणमति, स यावन्न परिणमति तावद् मिश्रः।

B. आदेशत्रिकं केचन भणन्ति- यावद् बुद्बुदा न स्फिटन्ति तावत्तं मिश्रम्, अन्ये भणन्ति- भाण्डकलग्ना बिन्दवो न शुष्यन्ति यावत्तावद् मिश्रम्, अन्ये भणन्ति-यावत्तन्दुला न सिध्यन्ति तावद् मिश्रम्, एतेऽनादेशाः, यस्मादेतानि त्रीणि वस्तुनि कदाचिच्चिरेण भवन्ति, कदाचिच्छीघ्रतरमेव भवत्याहारवशात्, तस्मात्तन्दुलोदकं यदा बहुप्रसन्नं भवति तदा तदचित्तमिति ।

१. सीउण्ह दा.

तेन चाचित्ताप्कायेनेदं प्रयोजनम् –

**६२२ परिसेय पियण हत्थाइ[१]धोवणे चीरधोवण चेव ।**
**आयमण भाण[२]धुवणे एमाइ पओयणं बहुहा ॥३४८॥ नि०**

**परिसेय गाहा** । **परिषेकः** सेचनं व्रणकुष्ठाद्युत्थिते सति क्रियते, तथा **पिबण** त्ति **पानं हस्तादिधावनं चीरधावनं च** क्रियते, तथा **आचमनं भाजन**प्रक्षालनं च क्रियते, **एवमादीनि प्रयोजनानि बहुधा** भवन्ति ॥३४८॥

इदानीं चीरप्रक्षालनं क्रियत इत्युक्तं तच्च ऋतुबद्धे न कर्त्तव्यम्, अथ क्रियते तत एते दोषा भवन्ति –

**६२३ [३]उउबद्धधुवण बाउस बंभविणासो अठाणठवणं च ।**
**संपाइमवाउवहो [४]पलवण आतोपघातो य ॥३४९॥ नि०**

**उउबद्ध** गाहा । **ऋतुबद्धः** शीतकालोष्णकालौ मिलितावेव भण्येते, तत्र यदि चीवराणां **धावनं** क्रियते ततो **बाकुशिको** भवति विभूषणशील इत्यर्थः, यदा च विभूषणशीलो भवति तदा **ब्रह्मविनाशो** भवति, तथा **अस्थानस्थापनं च** भवति, यदुत नूनमयं कामी तेनात्मानं मण्डयति ततश्चास्थानस्थापनमयोग्यतास्थापनं भवतीति, तथा **संपातिम**सत्त्वानां **वायोश्च वधो** भवति तथा **प्लवनेन** च सत्त्ववधो भवति, तथाऽऽ**त्मोपघातश्च** भवति हस्ते कण्डकपतनादिति ॥३४९॥

आह–यद्येवं न पक्षालयितव्यान्येव चीवराणि, उच्यते-वर्षाकाले [५]प्रक्षालयितव्यानि, अथ न प्रक्षाल्यन्ते तत एते दोषा भवन्ति –

**६२४ अतिभारचुडणपणए सीयलपाउरण अजीरगेलन्ने ।**
**ओभावण कायवहो वासासु अधोवणे दोसा ॥३५०॥ नि०**

**अतिभार** गाहा । [६]मेलेनातिगुरूणि भवन्ति तथा **चुडण** त्ति जीर्यन्ते, पनकश्च तत्र लगति **पनकः** फुल्ली, **शीतलप्रावरणे चाजीर्णं** भवति, ततश्च **ग्लानता** भवति, तथा **ओभावणा** परिभवो भवति **कायवधश्च** भवति, तानि हि आर्द्राणि श्च्योतन्ति सन्त्यप्कायादि विनाशयन्ति, एते **वर्षास्वधावने दोषाः** ॥३५०॥

---

१. धोवणा ह० हे० २. धुवणं दा० ३. उडुबद्ध ह० हे० ४. पावण सं. ५. धावितव्यान्येव दा० ६. मलेनाति० दा०

कदा प्रक्षालनं कार्यमित्याह –

**६२५ अप्पत्ते च्चिय वासे सव्वं उवहिं धुवंति जयणाए ।**
**असइए व दवस्स उ जहन्नओ पायनिज्जोगो ॥३५१॥ नि०**

**अप्पत्ते चिय** गाहा । **अप्राप्त एव वर्षा**कालेऽर्द्धमासमात्रेण **सर्वमुपधिं** प्रक्षालयन्ति **यतनया** । अथोदकं प्रासुकं प्रचुरं नास्ति ततो **जघन्येन पात्रनिर्योगं** पात्रकोपकरणं प्रक्षालनीयम्, येन गृहस्था भिक्षां प्रयच्छन्तो न जुगुप्सन्त इति ॥३५१॥

आह–किं सर्वेषां वर्षपर्यन्त एवोपधिः प्रक्षाल्यते ? न इत्यत आह –

**६२६ आयरियगिलाणाणं मइला मइला पुणो वि धोवंति ।**
**मा हु गुरूण अवन्नो लोगंमि अजीरणं इयरे ॥३५२॥**

**आयरिय** गाहा । सुगमा, नवरं **अजीरणं इयरे** त्ति **इतरेषां ग्लानानां** चीवराणि प्रक्षालनीयानि, यदि न प्रक्षाल्यन्ते ततोऽ**जीर्णं** भवति ॥३५२॥

इदानीमुपधिप्रक्षालनकाले कानि न विश्रामणीयानि ? इत्येतत्प्रदर्शयन्नाह –

**६२७ पायस्स पडोयारं दुनिसेज्ज तिपट्ट पोत्ति रयहरणं ।**
**एते ण उ विस्सामे जयणा संकामणा [१]धुवणं ॥३५३॥ नि०**

**पायस्स** गाहा । **पात्रकस्य पडोयारं** परिकरं पात्रबन्धादिकं न विश्रामयेत्, तथा **दुनिसेज्ज** त्ति रजोहरण**निषद्याद्वयम्**-एका और्णिकी बाह्यनिषद्या द्वितीया मध्यवर्त्तिनी क्षौमी निषद्या, एतद्द्वयं न विश्रामणीयम् । **तिपट्ट** त्ति एकः संस्तारपट्टको द्वितीय उत्तरपट्टकस्तृतीयश्चोलपट्टकः, **पोत्ति** त्ति मुखवस्त्रिका, **रयहरणं** ति **रजोहरणं** [२]प्रसिद्धमेव, **एतानि न विश्रामयेत्**, यतो नान्यान्यनुपभोग्यानि सन्ति । तत्र च षट्पदसङ्क्रामणं कथं क्रियत इत्यत आह- **जयणा संकामणा यतनया** वस्त्रान्तरितेन हस्तेनान्यस्मिन् वस्त्रे षट्पदीः **सङ्क्रामयति** ततो **धावति** ॥३५३॥

शेषमुपधिं विश्रामयतो विधिमाह –

**६२८ [३]अब्भिंतरपरिभोगं उवरिं पाउणइ णातिदूरे य ।**
**तिन्नि य तिन्नि य एक्कं निसिं तु काउं परिच्छिज्जा ॥३५४॥ नि०**

**अब्भिंतर** गाहा । **अभ्यन्तरपरिभोगं** क्षौमकल्पं शेषकल्पयोरुपरि **प्रावृणोति,**

१. धुवणा ह० हे० २. प्रतीतमेव भ. ३. अब्भंतर ह० हे०

कति रात्रय: ? तिस्र इति वक्ष्यति, तथा **नातिदूरे चा**त्मासन्ने तमेव कल्पं रात्रित्रयमेव स्थापयति, **तिन्नि य तिन्नि य** त्ति पदद्वयं योजितमेव द्रष्टव्यम्, **एक्कं निसिं तु काउं** ति **एकां** रात्रिमात्मोपरि कीलकादौ [1]तमेव कल्पं स्थापयेत् । **परिछिज्ज** त्ति एवं सप्त दिनानि परीक्षा कर्त्तव्या । अथवा **परिच्छिज्ज** त्ति एवं सप्तवारा: कृत्वा पुनश्च शरीरे वस्त्रं प्रावृत्य **परीक्षणीयम्**, यदि षट्पद्यो न लगन्ति तत: प्रक्षालनीयमिति ॥३५४॥

**६२९ केई एक्केक्कनिसिं संवासेउं तिहा परिच्छंति ।**
**पाउणिय जइ ण लग्गंति छप्पया ताहे [2]धोविज्जा ॥३५५॥ नि०**

**केई** गाहा । **केचनाचार्या** एवमाहु:-**एक्केकनिसिं संवासेउं** ति अयमत्रार्थ:- [3]तमभ्यन्तरकल्पं क्षौममितरकल्पयोरुपरि **एकां** रात्रिं प्रावृणोति, पुनरपरस्यां रात्रावात्मासन्ने करोति, पुनरपरस्यां रात्रा आत्मोपरि कीलकादौ लम्बमानं करोति, एवं त्रिरात्रं यावत्**परीक्षते** पश्चाच्च तं कल्पं पुन: प्रावृणोति, **प्रावृते** च कल्पे **यदि न लगन्ति षट्पद्यस्तदा धावयेत्** प्रक्षालयेत् ॥३५५॥

ते च प्रक्षालयन्त: –

**६३० निव्वोदगस्स गहणं केई भाणेसु असुइ पडिसेहो ।**
**गिहिभायणेसु गहणं ठितवासे [4]मीसगं छारो ॥३५६॥ नि०**

**निव्वोदगस्स** गाहा । ते च साधवश्चीवरप्रक्षालनार्थं **नीव्रोदकस्य ग्रहणं** कुर्वन्ति, तत्राह- **केई भाणेसु** त्ति **केचनै**वं ब्रुवते यदुत-**भाजनेषु** पात्रेषु नीव्रोदकग्रहणं कार्यम्, आचार्य आह–**असुइ** लोका एवं भणन्ति, यदुत **अशुचय** एते, ततश्च **प्रतिषेधं** कुर्वन्ति । क्व पुनर्ग्राह्यमित्याह–**'गिहिभायणेसु' गृहस्थ**सत्केषु **भाजनेषु** कुण्डादिषु गृह्यते, कदा ? **ठियवासे, स्थिते प्रवर्षणे** [120]थक्के वरिसियव्वे, **मीसगं** ति अथ तत्र प्रवर्षति पर्जन्ये गृह्यते ततो गृह्णतो **मिश्रं** भवत्यन्तरिक्षोदकपातात्, तस्मात्स्थिते प्रवर्षणे ग्राह्यम्, [5]गृहीते च **क्षार:** क्षेपणीयो येन सचित्ततां न याति ॥३५६॥

कस्य पुन: प्रथममुपधि: प्रक्षालनीय इत्याह –

**६३१ गुरुपच्चक्खाणगिलाणसेहमाईण धोवणं पुव्वं ।**
**तो अप्पणो पुव्वमहाकडे य इतरे दुवे पच्छा ॥३५७॥ नि०**

---

१२०. थक्के वरिसियव्वे: थक्क-स्था. थक्कई-तिष्ठति, प्रवर्षणे तिष्ठति सति, पर्जन्ये निवृत्ते सतीत्यर्थ: । संटी.

१. स एव कल्प स्थाप्यते । क० २. धोवन्ति ह० ३. तमभ्यन्तरकल्पं=क० ४. मीसिअं दा. ५. गृहीत्वा च दा०

**गुरु** गाहा । प्रथमं **गुरोरुपधिः** प्रक्षाल्यते, ततः **पच्चक्खाय** त्ति **प्रत्याख्याता** अनशनस्थस्तस्योपधिः प्रक्षाल्यते समाधानार्थम्, ततो **ग्लानस्य** पश्चात्**सेहस्यो**[१२१]पधि-प्रक्षालनम्, मा भून्मलपरीषहपीडया चित्तभङ्गः, एवमेतेषां **पूर्व**मुपधिः प्रक्षाल्यते, **तत आत्मनः** प्रक्षालयत्युपधिम् । इदानीं कानि प्रथमं प्रक्षालनीयानि ? इत्यत आह–**पुव्वमहाकडे य** त्ति यान्येकखण्डान्यतूर्णितानि **यथाकृतानि पूर्वं** प्रक्षालयति, **इतरे दुवे पच्छ** त्ति **इतरौ द्वौ** वस्त्रभेदौ **पश्चात्**प्रक्षालयति, एकान्यल्पपरिकर्माणि यानि क्वचिन्मनाक् तूर्णितान्यन्यानि बहुपरिकर्माणि यानि द्वेधा सीवितानि तूर्णितानि च, स्वल्पपरिकर्माणि च क्षालयित्वा ततो बहुपरिकर्माणि क्षालयति **॥३५७॥**

**६३२ अच्छोडपिट्टणासु य न धुवे धोवे पतावणं न करे ।**
**परिभोगमपरिभोगे छायातव पेह कल्लाणं ॥३५८॥ नि०**

**अच्छोड** गाहा । इदानीं स साधुः प्रक्षालयन् कर्पटानि **नाच्छोटयति** रजकवत्, **नापि च पिट्टयति** काष्ठपिट्टनेन स्त्रीवत्, किन्तु हस्तेन मनाग्यतनया **धावनं** करोति, धौतानि च वस्त्राण्यातपे **न प्रतापयति**, मा भूत्तत्र काचित् षट्पदी स्यात्, कानि पुनरातपे कर्त्तव्यानि कानि वा न कर्त्तव्यानि ? इत्याह-**परिभोगमपरिभोगे** त्ति तानि कर्पटानि द्विविधानि भवन्ति–**परिभोग्यानि अपरिभोग्यानि** च, तत्र यथासङ्ख्येन **छायातपयोः** कर्त्तव्यानि, परिभोग्यानि छायायां शोष्यन्ते, मा भूत्तत्र षट्पदी स्यात्, अपरिभोग्यान्यातपे शोषयति, **पेह** त्ति तानि च कर्पटानि शुष्यन्ति सन्ति निरूपयत्यपहरणभयात् । **कल्लाणं** ति पश्चात्तस्य प्रक्षालनप्रत्ययमेक**कल्याणकं** प्रायश्चित्तं दीयते **॥३५८॥**

उक्तोऽप्कायः, [१]साम्प्रतमग्निकाय उच्यते –

**६३३ इट्टगपागाईणं बहुमज्झे विज्जुयाइ निच्छइओ ।**
**इंगालाई इयरो मुम्मुरमाई य मीसो उ ॥३५९॥ नि०**

**इट्टग** गाहा । असावपि त्रिविधः, तत्र सचित्त **इष्टकापाकादीनां बहुमध्ये विद्युदादिको नैश्चयिको** भवति, **अङ्गारादिश्चेतरो** व्यावहारिको **मुर्मुरादिक** उल्मुकादि**र्मिश्रो** भवति **॥३५९॥**

---

१२१. सेहः-सेधः-सेध्यते निष्पाद्यते यः स सेधःशिष्यः । सेहः शैक्षः-शिक्षां वाऽधीते इति शैक्षः । अभिनवप्रव्रजितः (स्था.५ ठा.१. उ.)

१. इदानीं दा०

इदानीमचित्ताग्निकायस्योपयोगमचित्ताग्निशरीरोपयोगं च दर्शयन्नाह –

**६३४ ओदण वंजण [१]पाणग आयामुसिणोदगं च कुम्मासा ।**
**डगलग सरक्ख सूई पिप्पलमाई य[२] परिभोगो ॥३६०॥ नि०**

**ओदण** गाहा । **ओदनं** कुरादि, **व्यञ्जनं** तिम्मणं **पानकमा**चाम्लम्, **आयाममव**श्रावणम्, **उष्णोदं कुल्माषाश्च,** एतान्यग्नेर्निर्वर्त्त्यानि कार्याणि, ततश्चै-भिरुपयोगः क्रियते । इदानीमग्निर्निर्वर्त्तितशरीरोपभोगं दर्शयन्नाह-**डगलका** [३]**इष्टका** अतीव पक्वाः, **सरक्खो** भस्मसूच्यः **पिप्पलकः** क्षुरकः, एवमादिभिरचित्तैरग्नि-शरीरैरुपयोगः क्रियते, अग्निशरीराणि च द्विविधानि भवन्ति- [१२२]बद्धिल्लयाणि [१२३]मुक्किल्लयाणि च, तत्रात्र मुक्किल्लयाणि द्रष्टव्यानि ॥३६०॥

इदानीं वायुकाय उच्यते, असावपि त्रिविधः सचित्तादिरूपः, तत्र नैश्चयिक-सचित्तप्रतिपादनायाह –

**६३५ सवलयघण[४]तणुवाया अतिहिम अति[५]दुद्दिणे य निच्छइओ ।**
**ववहार पाइणादी अक्कंतादी य अच्चित्तो ॥३६१॥ नि०**

**सवलय** गाहा । सह वलयैर्वर्त्तन्त इति सवलया घनवाताश्च तनुवाताश्च सवलयाश्च ते घनतनुवाताश्चेति **सवलयघनतनुवाता** ते निश्चयतः सचित्ताः । तथाऽ**तिहिम**पाते यो वायु**रतिदुर्दिने च** यो वायुः स **नैश्चयिकः** सचित्तः, **व्यवहारतः** पुनः **प्राच्यादि** पूर्वस्यां यो दिशि, आदिग्रहणादुत्तरादिग्रहणम्, एतदुक्तं भवति-अतिहिम-अतिदुर्दिनरहितो यः प्राच्यादिवायुः स व्यवहारतः सचित्तः । इदानीमचित्तः-**अक्कंतादी य अच्चित्तो** त्ति यः कर्दमादा**वाक्रान्ते** सति भवति सोऽ**चित्तः,** स च पञ्चधा–"[A]अक्कंते धंते पीलिते सरीराणुगते संमुच्छिमे, तत्थ अक्कंतो चिक्खल्लादिसु, धंतो दतियाइसु, पीलिओ पोत्तचम्मादिसु, सरीराणुगतो ऊसासनीसासवाऊ उदरत्थाणीओ, संमुच्छिमो तालियंटादीहिं जणितो" ॥३६१॥

---

१२२. बद्धेलग-बद्धिल्ल-स्वार्थे इल्लकप्रत्ययः । बद्धः, (अनु.)

१२३. मुक्केल्लय-मुक्किल्ल-मुक्तः प्राकृतत्वात् स्वार्थे इल्लकप्रत्ययः । अन्यजन्मनि जीवेनोज्झितं शरीरम् । (अनु.)

A आक्रान्तः, ध्मातः, पीडितः, शरीरानुगतः, संमूर्च्छिमः, तत्राऽऽक्रान्तः कर्दमादिषु, ध्मातो दृतिकादिषु, पीडितः पोतचर्मादिषु, शरीरानुगत उच्छ्वासनिःश्वासवायु उदरस्थानीयः, संमूर्च्छिमस्तालवृन्तादिभिर्जनितः ।

१. कंजिय हे० २. उ उवओगो ता. ३. इष्टकाखण्डा ख. दा. ४. तणुवाते ह० हे० संपा० ५. दुद्दिणेसु ह०

इदानीं मिश्र उच्यते - आह—किं पुनः कारणमिह मिश्रः पश्चाद्व्याख्यायते ? उच्यते-अचित्तेनैव साधुर्व्यवहारं करोति, स च गृहीतः सन्नेव मिश्रीभवति, अस्यार्थस्य प्रदर्शनार्थं पश्चान्मिश्र उच्यते ।

**६३६ हत्थसयमेग गंता दइओ अचित्तो [१]बिइयए संमीसो ।**
**तइयंमि उ सच्चित्तो बत्थी पुण पोरिसि[२]दिणेहिं ॥३६२॥ नि०**

**हत्थसय** गाहा । अचित्तवायुभृतो **दृति**स्तरणार्थं गृह्यते, स च क्षेत्रतो **हस्तशतमेकं** याव**द्गत्वा**ऽपि **अचित्त** एव, तोयं तीर्त्वाऽपि ततो हस्तशतादूर्ध्वं **द्वितीय**हस्तशतप्रारम्भे **मिश्रो** भवति, **तृतीय**हस्तशतप्रारम्भे **सचित्तो** भवति, क्षेत्रमङ्गीकृत्य यावता क्षेत्रेण मिश्रः सचित्तो वा भवति तथोक्तम्, इदानीं कालमङ्गीकृत्य यावता कालेनाचित्तः सन् मिश्रः सचित्तो वा भवति तत्प्रदर्शयन्नाह—**बत्थी पुण पोरिसिदिणेहिं** ति तत्र **बस्ति** चर्ममयी खल्लोच्यते, सा चाचित्तवायोरापूरिता उत्कृष्टस्निग्धकाले पौरुषीमात्रं कालं यावत्तत्रस्थो वायुरचित्त एवास्ते, अयमत्र भावार्थः-कालो हि द्विविधः-"[A]निद्धो लुक्खो य, तत्थ निद्धो कालो सपाणितो इयरो लुक्खो, तत्थ निद्धो तिविहो उक्कोसो मज्झिमो जहण्णो य, तत्थ उक्कोसनिद्धे काले एगं पोरुसीं जाव बत्थी वाउणा पूरितो अचित्तो होइ, तदुवरिं सो चेव बिइए पहरे मिस्सो होइ, तदुवरिं सो चेव तइए पहरे सचित्तो होति त्ति, मज्झिमनिद्धे काले बत्थी वाउणाऽऽपूरिओ दो पोरुसीओ जाव अचित्तो होइ, तदुवरिं सो चेव तइए पहरे मीसो होति, तदुवरिं सो चेव चउत्थे पहरे सचित्तो होइ, जहण्णे निद्धे काले बत्थी वाउणाऽऽपूरितो तिण्णि पहरे जाव अचित्तो [३]होइ, तदुवरिं सो चेव चउत्थे पहरे मिस्सो होइ, तदुवरिं सो चेव पंचमे पहरे सचित्तो होइ । एवं निद्धकाले माणं भणिअं ।

इदाणिं रुक्खकाले दिणेहिं परूवणा किज्जइ, तत्थ लुक्खकालोऽवि तिविहो-जहण्णलुक्खो मज्झिमलुक्खो उक्कोसलुक्खो य, तत्थ जहण्णलुक्खे काले बत्थी वाउणाऽऽपूरिओ एगं दिवसं जाव अचित्तो होइ, तदुवरिं सो चेव बितिए दिवसे

---

A स्निग्धो रूक्षश्च, तत्र स्निग्धः कालः सपानीय इतर रूक्षः, तत्र स्निग्धस्त्रिविधः- उत्कृष्टो मध्यमो जघन्यश्च, तत्रोत्कृष्टस्निग्धे काल एकं पौरुषी यावद् वस्तिर्वायुनापूरितोऽचित्तो भवति, तदुपरि स एव द्वितीये प्रहरे मिश्रो भवति, तदुपरि स एव तृतीये प्रहरे सचित्तो भवतीति । मध्यमस्निग्धे काले वस्तिर्वायुनाऽऽपूरितो द्वे पौरुष्यौ यावदचित्तो भवति, तदुपरि स एव तृतीयेप्रहरे मिश्रो भवति, तदुपरि स एव चतुर्थे प्रहरे सचित्तो भवति, जघन्ये स्निग्धे काले वस्तिर्वायुनाऽऽपूरितस्त्रीन् प्रहरा यावदचित्तो भवति, तदुपरि स एव चतुर्थे प्रहरे मिश्रो भवति, तदुपरि स एव पञ्चमे प्रहरे सचित्तो भवति । एवं स्निग्धकाले मानं भणितम् ।

१. बिइयओ हे ह० बिइए संमीसो दा० २. ०दिणेसु ह० ३. अच्छति क० ल०

मिस्सो होइ, सो चेव ततिए दिवसे [१]सचित्तो होइ, मज्झिमलुक्खे काले बत्थी वाउणाऽऽपूरिओ दो दिणाणि जाव अचित्तो होइ, तदुवरिं सो चेव तइए दिवसे मिस्सो होइ, तदुवरिं चउत्थे दिवसे सचित्तो होति, सो चेव वाऊ उक्कोस-लुक्खकाले दिवसतिगं जाव अचित्तो होइ, तदुवरिं सो चेव चउत्थे दिवसे मिस्सो होइ, तदुवरिं सो चेव पंचमे दिवसे सचित्तो होति । एवं एगदुगतिसंखा पोरुसिदिणेसुं अणुवट्टावणीया इति" ॥३६२॥

इदानीमचित्तेन वायुना यत्प्रयोजनं भवति तत्प्रदर्शयन्नाह –

**६३७ दतिएण वत्थिणा वा पओयणं होज्ज वाउणा मुणिणो ।**
**गेलन्नंमि वि[२] होज्जा सचित्तमीसे परिहरिज्जा ॥३६३॥ नि.**

**दइएण** गाहा । सुगमा, नवरं "[A]**दतिएणं** अंतरिएण तरणं [३]कीरति, गेलण्णे **बत्थिणा** कज्जं होइ" ॥३६३॥

['दृतिना' दृतिस्थेन 'बस्तिना' बस्तिस्थेन वेति समुच्चये नद्याद्युत्तारे प्रयोजनं भवेद्वायुना मुनेः, अनेन जलस्थो वायुर्गृह्यते, अथवा 'ग्लानत्वे' मन्दत्वे सति वायुना प्रयोजनं भवति, क्वापि हि रोगे दृत्यादिना संगृह्य वातोऽपानादौ प्रक्षिप्यते, अनेन स्थलस्थो गृहीतः, सचित्तमिश्रौ तु यत्नतः परिहरेत्, जलमध्ये त्वशक्ये परिहारे प्रायश्चित्तं पश्चादभिगृह्णीयात् । तदेवमुक्तो वायुकायपिण्डः । (पिण्डनि.४२)]

उक्तो वायुकायः, इदानीं वनस्पतिकाय उच्यते, असावपि सचित्तादिभेदात्त्रिधा, तत्र निश्चयसचित्तप्रतिपादनायाह –

**६३८ सव्वो [४]व अणंतकाओ सच्चित्तो होइ निच्छयनयस्स ।**
**[५]ववहाराउ अ सेसो मीसो य पव्वायरोट्टाई ॥३६४॥ नि०**

**सव्वो** गाहा । **सर्व एवानन्त**वनस्पति**कायो निश्चयनयेन सचित्तः, शेषः** परित्तवनस्पतिर्व्य**वहार**नयमतेन **सचित्तः, मीसो य पव्वायरोट्टाई** त्ति **मिश्रस्तु**

---

इदानीं रूक्षकाले दिनैः प्ररूपणा क्रियते, तत्र रूक्षकालोऽपि त्रिविधः- जघन्यरूक्षो मध्यमरूक्ष उत्कृष्टरूक्षश्च, तत्र जघन्यरूक्षे काले वस्तिर्वायुनाऽऽपूरित एकं दिवसं यावदचित्तो भवति, तदुपरि स एव द्वितीये दिवसे मिश्रो भवति, तदुपरि स एव तृतीये दिवसे सचित्तो भवति, मध्यमरूक्षे काले वस्तिर्वायुनाऽऽपूरितो द्वौ दिनौ यावदचित्तो भवति, तदुपरि स एव तृतीये दिवसे मिश्रो भवति, तदुपरि चतुर्थे दिवसे सचित्तो भवति, स एव वायु उत्कृष्टरूक्षकाले दिवसत्रिकं यावदचित्तो भवति, तदुपरि स एव चतुर्थे दिवसे मिश्रो भवति, तदुपरि स एव पञ्चमे दिवसे सचित्तो भवति। एवमेकद्वित्रिसङ्ख्या पौरुषीदिनेष्वनुवर्तनीया इति ।

A दृतिकेनान्तरितेन तरणं क्रियते, गैलन्ये वस्तिना कार्यं भवति ।

१. सचित्तो होति उक्कोस० क० ल० २. व ह० ३. कीरई क० ४. अणंतकाओ ह० हे० ५. ववहारिओ य ह०

प्रम्लानानि फलानि यानि कुसुमानि पर्णानि च **रोट्टो** लोट्टो तन्दुलाः कुट्टिताः, "[A]तत्थ तंदुलमुहाइं अच्छंति तेण कारणेण सो मिस्सो भण्णइ" ॥३६४॥

इदानीमचित्तवनस्पतिकायं तदुपयोगं च दर्शयन्नाह –

**६३९ संथारपायदंडगखोमियकप्पाइ[1] पीढफलगाई[2] ।**
**ओसहभेसज्जाणि य एमाइ पओयणं तरुसु ॥३६५॥ नि०**

**संथार** गाहा । तत्र **संस्तारको**ऽशुषिरतृणैः क्रियते, **कल्प**द्वयं च कार्पासिकं भवति, **औषध**मन्तरुपयोगि[3], **भेषजं** तु बहिर्लेपः ॥३६५॥

उक्तो वनस्पतिकायः, इदानीं द्वीन्द्रियादिपिण्डप्रतिपादयन्नाह –

**६४० बियतियचउरो पंचिंदिया य तिप्पभिइं जत्थ उ समिंति ।**
**सट्ठाणे सट्ठाणे सो पिंडो तेण[4] कज्जमिणं ॥३६६॥ नि०**

**बियतिय** गाहा । **द्वित्रिचतुष्पञ्चेन्द्रिया** एकैके **त्रिप्रभृतयो यत्र** समवायं गच्छन्ति स द्वीन्द्रियादिपिण्डः, ते चैवं समवायं गच्छन्ति **स्वस्थाने स्वस्थाने**, एतदुक्तं भवति–द्वीन्द्रिया द्वीन्द्रियैरेव मिलितैर्द्वीन्द्रियपिण्ड उच्यते, तथा त्रीन्द्रियास्त्रीन्द्रियैरेव त्रिप्रभृतिभिर्मिलितैस्त्रीन्द्रियपिण्ड उच्यते, एवं स्वजातीयैर्मिलितैः पिण्डो वक्तव्यो यावत्पञ्चेन्द्रिया इति स्वस्थाने स्वस्थाने **स पिण्डः** । अयं तावद् द्वीन्द्रियादिः पञ्चेन्द्रियपर्यन्तः सचित्तादिपिण्डो भवति, यश्चाचित्तपिण्डो द्वीन्द्रियादिसत्कस्**तेन चैतत्कार्यम्** ॥३६६॥

**६४१ बेइंदियपरिभोगो अक्खाण ससंखसिप्पिमाईणं ।**
**तेइंदियाण उद्देहिगाइ जं वा वए विज्जो ॥३६७॥ नि०**

**बेइंदिय** गाहा । **द्वीन्द्रियाणां परिभोगो**ऽ**क्षाणां** चन्दनकानां **सशङ्खा** या **शुक्तयः** तदादीनाम्, शङ्खेषु शुक्तिषु चौषधानि क्रियन्ते । **त्रीन्द्रियाणां** मध्ये **उद्देहिकया, आदिशब्दा**दन्येन वा त्रीन्द्रियेण, **यद्वा वैद्यो ब्रूयाद्,** उद्देहिकासत्कया मृत्तिकया प्रयोजनम्, स सर्वस्त्रीन्द्रियपरिभोगः ॥३६७॥

इदानीं चतुरिन्द्रियपरिभोग उच्यते –

---

A. तत्र तन्दुलमुखानि तिष्ठन्ति तेन कारणेन स मिश्रो भण्यते ।

१. कप्पा य ह० हे० २. फलगा य ह० हे० ३. ० रप्रयुज्यते ल० ०रूपयुज्यते ४. तेसि ह० संपा०

**६४२ चउरिंदियाण [१]मक्खियपरिहारो [२]आसमक्खिया चेव ।**
**पंचिंदियपिंडम्मि उ [३]अव्ववहारी उ नेरइया ॥३६८॥ नि०**

**चउरिंदियाण** गाहा । **चतुरिन्द्रियाणां** मध्ये **मक्षिकापरिहारेण** मक्षिकापुरीषेण ऊर्ध्वविरेकः क्रियते शरीरपाटवार्थम्, **अश्वमक्षिकोपयोगश्च** तयाऽक्ष्णोरक्षराः पतिता उद्ध्रियन्ते । अयं चतुरिन्द्रियपिण्डपरिभोगः, **पञ्चेन्द्रियपिण्डे तु** यदि परं नारकैर्व्यवहार उपयोगो न कश्चित् क्रियते । शेषास्तु तिर्यञ्चो मनुष्या देवाश्चोपयुज्यन्ते ॥३६८॥

तत्र तिरश्चां पञ्चेन्द्रियाणां सत्कमुपयोगं दर्शयन्नाह —

**६४३ चम्मट्ठि दंत नह रोम सिंग [४]अविलाइच्छगण गोमुत्ते ।**
**खीरदहिमाइयाणं पंचिंदियतिरियपरिभोगो ॥३६९॥ नि०**

**चम्मट्ठि** गाहा । तत्र **चर्मणा** कुष्ठिनः [५]प्रयोजनं भवति, **अस्थ्ना** गृध्रनलकेन प्रयोजनं भवति वाय्वपहरणार्थं पादे बध्यते, [१२४]**दन्तेन** सूकरादेः सम्बन्धिना प्रयोजनं **नखेन** वा, **रोमभिः** प्रयोजनमुरभ्रादीनां सत्कैस्तैः कम्बलिका भवति, **शृङ्गेण** किञ्चित्प्रयोजनं भवति, **अविला** उरभ्रा तत्पुरीषं पामादावुपयुज्यते [१२५]पामा मर्द्यते, तेन **गोमूत्रेण** चोपयोगः, शेषं सुगमम् ॥३६९॥

इदानीं मनुष्योपयोगः प्रदर्श्यते —

**६४४ सच्चित्ते पव्वावण [६]पंथुवदेसे य भिक्खदाणाई ।**
**सीसट्ठिय अच्चित्ते मीसट्ठिसरक्ख पहपुच्छा ॥३७०॥ नि०**

**सच्चित्ते** गाहा । प्रथमार्द्धं सुगमम्, सचित्तमनुष्यप्रयोजनमुक्तम्, इदानीमचित्त-मनुष्यपिण्डप्रतिपादनायाह— [१२६]**सीसट्ठिय अच्चित्ते** त्ति **अचित्ते** शिरःकपालेन प्रयोजनं भवति, [A]पित्तारुएसुं घसिऊण दिज्जइ । [७]अस्थिभिर्वेषपरावर्त्तादि क्रियते । इदानीं मिश्रमनुष्यपिण्ड उच्यते—**'मीसट्ठिसरक्ख पहपुच्छा' मिश्रोऽस्थियुक्तो यः सरजस्कः**

---

१२४. शृगालदन्तेन तिमिरापहारः । कल्पे-ख. १२५. पामा-रोगविशेष इति । संटी.

१२६. सीसट्ठिय-शिरसोऽस्थि--तद्धि लिङ्गे व्याधिविशेषापनोदाय घर्षित्वा दीयते, यद्वा कदाचित्कश्चित्परिरुष्टो राजादिः साधूनां विनाशाय कृतोद्यमो भवेत, ततस्ते साधवः शिरोऽस्थिकमादाय कापालिकवेषेण नंष्ट्वा देशान्तरं व्रजितुमिच्छन्ती तेन प्रयोजनमिति । (पिण्ड नि.५१)

A पित्तरोगेषु घर्षित्वा दीयते । १. मच्छिय दा० २. आसमच्छिया दा० ३. अव्ववहारा दा० ४. अमिलाइ ह० हे० संपा० ५. कार्यं भ० क० ६. पंथुवएसाइ हे० ७. वेष० दा०

कापालिकस्तस्य मिश्रस्य [1]**पथि प्रच्छनो**पयोगः ॥३७०॥

इदानीं देवोपयोगप्रतिपादनायाह –

**६४५ खमगाइकालकज्जातिएसु पुच्छिज्ज देवयं किंचि ।**
**पंथे सुभासुभे वा पुच्छिज्ज व [2]दिव्वमुवओगो ॥३७१॥ नि०**

**खमग** गाहा । **क्षपकादिः** कश्चिद्, **आदिशब्दादाचार्यादयः कालकार्यादौ** स्वमृत्युप्रच्छनादौ, **आदिग्रहणात्सङ्घादिकार्ये** वोत्पन्ने **पृच्छेत्,** अर्थयेत् **काञ्चिद्देवताम्, पथि वा** गच्छन् **शुभाशुभं पृच्छेत्,** अथवा **शुभाशुभं** दुर्भिक्षादि **पृच्छेत्,** ततश्चायं **दिव्यपिण्डोपयोगः** । एवं तावत्सचित्तो नवप्रकारः पिण्ड उक्तः, तदनन्तरं मिश्रोऽपि पिण्डो नवप्रकारः प्रतिपादितः, अचित्तोऽपि नवप्रकारः प्रतिपादित एव **॥३७१॥**

इदानीं दशमो भेदोऽचित्तो लेपपिण्ड उच्यते, स चैतेषामेव पृथिव्यादीनां नवानां भेदानां संयोगेन भवति, एतदेव प्रदर्शयन्नाह –

**६४६ अह होइ लेवपिंडो संजोगेण नवण्ह पिंडाणं ।**
**नायव्वो निप्फन्नो परूवणा तस्स कायव्वा ॥३७२॥ नि०**

**अह होइ** गाहा । **अथ भवति लेपपिण्डः संयोगेन नवानां पिण्डानां निष्पन्नो ज्ञातव्यः,** कथम्? "[A]दुचक्का गड्डिआ, तत्थ अक्खे मक्खिए पुढविकायस्स रजो लग्गति, आउक्काओ नदीए उत्तरणे लग्गइ, तेउकाओ तत्थ लोहं घस्सति, वायू तत्थेव, यत्राग्निस्तत्र वायुना [3]भाव्यम् । वणस्सई अक्खो बितिचउ संपातिमा पाणा पडंति, पंचिंदियाण वि वरत्ता घस्सति, एवं संजोएण निप्फन्नो लेवो" इदानीं **तस्य प्ररूपणा कर्त्तव्या ॥३७२॥**

**६४७ अव्वाक्कालियलेवं भणंति लेवेसणा नवि य दिट्ठा ।**
**ते वत्तव्वा लेवो दिट्ठो तेलोक्कदंसीहिं ॥३७३॥ नि०**

**अव्वाक्कालिय** गाहा । पर आह—**अर्वाक्कालिकं लेपं** केचन प्रतिपादयन्ति, सदोषत्वाल्लेपस्य, तथा **लेपैषणा च** समये **न** क्वचिद् **दृष्टा,** यतो द्विविधैव एषणा

---

A द्विचक्री गन्त्रीका, तत्राऽक्षे म्रक्षिते पृथिवीकायस्य रजो लगति, अप्काय नद्या उत्तरणे लगति । तेजस्कायस्तत्र लोहं घर्षति, वायुस्तत्रैव, यत्राग्निस्तत्र वायुना भाव्यम् । वनस्पतिरक्षद्वित्रिचतुः सम्पातिमा प्राणाः पतन्ति, पञ्चेन्द्रियानामपि वरत्रा घर्षति, एवं संयोगेन निष्पन्नो लेपः ।

१. पथपृच्छयोपयोगः ल. पृच्छयोपयोगः भ. २. देवउवओगो हे० ३. भवितव्यम् दा०

प्रतिपादिता—वस्त्रैषणा पात्रैषणा च, ततश्चायमर्वाक्कालिको यतो न युक्त्या घटते नाऽपि समये दृष्ट इति । एवमुक्त आचार्य आह- **ते वक्तव्या** त एवं भणन्त इदं वक्तव्याः, यदुत-**लेपो दृष्टस्त्रैलोक्यदर्शिभि**र्जिनैः, एतदुक्तं भवति—पात्रैषणां प्रतिपादयता लेपैषणाऽप्युक्तैव द्रष्टव्या, अन्यथा तद्व्यतिरेकेण पात्रग्रहणानुपपत्तेः, पात्रं हि लेपादिसंस्कृतमेवोपयोगभाग् भवति नान्यथेति ॥३७३॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह —

**६४८ आयापवयणसंजमउवघाओ दीसई जओ तिविहो ।**
**तम्हा वदंति केई न लेवगहणं जिणा बिंति ॥१९१॥ निभा०**

**आया** गाहा । पर आह—**आत्मप्रवचनसंयमोपघातो दृश्यते यतस्त्रिविध-स्तस्माद्वदन्ति केचन न लेपग्रहणं जिना ब्रुवते** ॥१९१॥

इदानीं पर एवात्मोपघातादि प्रदर्शयन्नाह —

**६४९ रहपडणउत्तिमंगाइभंजणं घट्टणे य करघाओ ।**
**अह आयविराहणया जक्खुल्लिहणे पवयणंमि ॥१९२॥ निभा०**

**रह** गाहा । तस्य साधोर्लेपं गृह्णतो दुःस्थितर**थपतनेनोत्तमाङ्गादिभङ्गो** भवति, **घट्टने च** चलने सति रथस्य **करस्य** हस्तस्य **घातो** भवति संपीडनं भवतीत्यर्थः। **अथैषाऽऽत्मविराधन**नोक्ता, इदानीं प्रवचनोपघातं प्रदर्शयन्नाह—**जक्खुल्लिहणे पवयणंमि** यक्षः श्वानोऽक्षप्रदेशमुल्लिहति[१] ततश्च तस्मिन् [२]**यक्षोल्लिहने** सति **प्रवचने** प्रवचनविषय उपघातो भवति ॥१९२॥

इदानीं संयमविराधनां प्रदर्शनायाह —

**६५० गमणागमणे गहणे तिट्ठाणे संजमे विराहणया ।**
**महि [३]सरि उम्मुग हरिया [४]कुंथू वासं रओ व सिया ॥१९३॥ निभा०**

**गमणागमणे** गाहा । लेपार्थं **गमने चागमने** च **ग्रहणे** च लेपस्य **संयमविराधना** भवति, कथम् ? **महि सरि उम्मुग हरिआ कुंथु** त्ति तत्र गच्छतो **मही** सचित्ता भवति, तथा **सरिदु**त्तरणेऽप्कायविराधना भवति, तथा ग्रहणे चाग्निविराधना भवति, स हि गृह्णन् कदाचि**दुल्मुकं** चालयति ततश्चाग्निविराधना, यत्राग्निस्तत्र वायुना

---

१. ०मुल्लिखति क० २. यक्षोल्लिखने क० ३. सरिदुम्मुग द. ४. कुंथु त.भ.

भवितव्यम्, तथा कदाचिदसौ गन्त्री **हरितकुन्थुका**दिमध्ये व्यवस्थिता भवति ततश्चासौ लेपं गृह्णन् तानि विराधयति, अथवाऽनया भङ्गया संयमविराधना भवति-**वासं रओ व सिया** तत्र गतस्य कदाचिद्**वर्षं** भवति ततश्चाप्कायविराधना भवति । अथ **रजः**संपातो भवति ततश्च पृथिवीकायविराधना भवति ॥१९३॥

एवमुक्ते सत्याह सूरिः –

**६५१ दोसाणं परिहारो चोयग ! जयणाए कीरए तेसिं ।**
**पाए उ अलिप्पंते ते दोसा होंतिऽ[१]णेगगुणा ॥१९४॥ निभा०**

**दोसाणं** गाहा । **दोषाणां परिहार**स्तेषां चोदकोक्तानां क्रियत इति सम्बन्धः, कथं क्रियते ? इत्यत आह-हे **चोदक! यतनया** लेपस्य ग्रहणं **क्रियते,** ततश्च यतनया ग्रहणे सत्यात्मोपघातादयो दोषा न भवन्ति, **पात्रे चालिप्यमाने त** एव **दोषा** यत्त्वयोदिता आत्मोपघातादयोऽ**नेकगुणा** अनेकप्रकारा **भवन्ति** ॥१९४॥

इदानीं आचार्य एवात्मोपघातादि दर्शयन्नाह –

**६५२ [२]उड्डाइणि उ विरसंमी भुंजमाणस्स हुंति आयाए ।**
**दुग्गंधि [३]भायणंमि य गरहइ लोगो पवयणंमि ॥१९५॥ निभा०**

**उड्डादीणि** गाहा । **ऊर्ध्वादि** [४]छर्दनादिदोषा भवन्ति **विरसे** तस्मिन् पात्रे **भुञ्जतस्ततश्चात्म**विराधनैव **भवति** । तथा **दुग्गंधि** तस्मिन् **भाजने** भिक्षां गृह्णतो **लोको** गर्हां करोति ततश्च **प्रवचने** प्रवचनविषये उपघातो भवति ॥१९५॥

यच्चोक्तं चोदकेन जक्खुल्लिहणे पवयणंमि (निभा.१९२) तत्रेदमुच्यते –

**६५३ पवयणघाया अन्ने वि [५]अत्थि जयणा उ कीरए तेसिं ।**
**आयमणभोयणाई लेवे तव मच्छरो को णु ॥१९६॥ निभा०**

**पवयण** गाहा । **प्रवचनोपघाता अन्येऽपि सन्ति** किन्तु **यतना क्रियते तेषाम्,** के च ते प्रवचनोपघाताः ? अत आह- **आचमनभोजनादयः,** आचमनं निर्लेपनादि भोजनं चैकमण्डल्याम्, एतानि प्रवचनोपघातं कुर्वन्ति यदि प्रकटानि क्रियन्ते, किन्तु यतनया करणान्न प्रवचनोपघातो भवतीति, ततश्च **लेपे तव को**

---

१. णेगविहा ह० २. उड्डाईणि य ह० हे० ३. भायणं ति य ह० हे० ४. छर्दनादिदोषो भवति दा० ५. अत्थि ते उ जयणाए कीरंति, ह०

**मत्सरः ? इति ॥१९६॥**

अधुना पात्रस्यालेपने संयमविराधनां प्रतिपादयन्नाह –

**६५४ खंडंमि मग्गियम्मी लोणे दिन्नंमि अवयवविणासो ।**
**अणुकंपाई पाणंमि होइ उदगस्स उ विणासो ॥३७४॥ नि०**

**खंडंमि** गाहा । अथवाऽयं दोषो भवति पात्रस्यालेपने । "[A]एगेण साहुणा गिलाणट्ठं खंडं मग्गिअं, तम्मि च विसए लोणं पि खंडं भण्णइ, ततो तेणं सावएणं लोणं मग्गियं ति काउं भायणे लोणं दिण्णं, पच्छा पडिस्सयं गएण दिट्ठं जाव तं लोणं, ततो तेण पुढविकाउ त्ति काऊण परिट्ठविअं, ततो परिट्ठवियंमि लोणंमि तत्थ खरफरुसे भायणे लग्गा राइसु य पविट्ठा लोणावयवा, ततो जदि तत्थ अण्णपाणगादि घेप्पइ ततो ताणं लोणावयवाणं विणासो होति, अह न गिण्हइ लोणखरडिए भायणे तत आत्मादिविराधना भवति, अहवा कंजियपाणे मग्गियम्मि गिहत्थीए अणुकंपाए आउक्काओ दिण्णो, आदिग्गहणातो पडिणीयत्तणेण अणाभोएणं वा तओ तंमि कडुयभायणंमि सो विणस्सइ-विराध्यते ततो संजमविराधणा भवति" ॥३७४॥

[सम्प्रत्यन्यानपि पात्रालेपे दोषानाह –

**खंडम्मि मग्गियम्मी लोणे दिन्नम्मि अवयवविणासो ।**
**अणुकंपादी पाणम्मि होति उदगस्स उ विणासो ॥४७९॥**

अलेपिते पात्रे कस्मिंश्चित् प्रयोजने समापतिते खण्डं याचितम्, तया चाऽविरत्या खण्डमिति भ्रान्त्याऽनाभोगेन सैन्धवादि लवणं दत्तम्, तस्मिंश्चालेपिते भाजने केचिदवयवा अद्याप्यम्लाः सन्ति, ततस्तैरवयवैस्तस्य लवणस्य पृथिवीकायस्य विनाशः । तथा पानके याचिते कयाचिदविरत्या एते उदकस्य स्वादं न जानन्तीत्यनुकम्पया आदिशब्दादनाभोगेन वा उदकं दीयते तत एवमुदकस्याम्लावयवसंस्पर्शतो विनाशः । [बृ.क.-४७९]]

---

A. एकेन साधुना ग्लानार्थं खण्डं मार्गितम्, तस्मिंश्च विषये लवणमपि खण्डं भण्यते, ततस्तेन श्रावकेण लवणं मार्गितमिति कृत्वा भाजने लवणं दत्तम्, पश्चात् प्रतिश्रयं गतेन दृष्टं यावत्तं लवणम्, ततस्तेन पृथिवीकाय इति कृत्वा परिस्थापितम्, ततः परिस्थापितेऽपि लवणे तत्र खरपरुषे भाजने लग्ना राजिषु च प्रविष्टा लवणावयवाः, ततो यदि तत्राऽन्नपानकादि गृह्यते, ततस्तेषां लवणावयवानां विनाशो भवति, अथ न गृह्णाति लवणखरण्टिते भाजने, तत आत्मादिविराधना भवति, अथवा काञ्जिकपाने मार्गिते गृहस्थयाऽनुकम्पयाऽप्कायो दत्तः, आदिग्रहणात् प्रत्यनीकत्वेनाऽनाभोगेन वा ततस्तस्मिन् कटुकभाजने स विनस्यति विराध्यते, ततः संयमविराधना भवति ।

अहवा इमो दोसो हवइ पायस्स अलेवणे –

**६५५ पूयलियलग्ग[१] अगणी पलीवणं गाममाइणं होज्जा ।**
**रोट्टपणगा तरुंमी भिगुकुंथादी य छट्ठंमि ॥३७५॥ नि०**

**पूयलिय** गाहा । "[A]एगेण साहुणा कणिक्कमंडलिआ लद्धा, तीए हेट्ठा सुहुमो अंगारो लग्गो दिण्णो, सो य साहुणा न दिट्ठो, ततो भमंतस्स तं पत्तं पडलेहिं समं पलित्तं, ततो तेण पलित्तं पायं दट्ठूण घत्तियं, तं पि वाडीए पडिअं, गामपलीवणं जायं," यत्राग्निस्तत्र वायुरपिः । "[B]अहवा [२]रोट्टो चाउलरोट्टो लद्धो, सो अपरिणओ होइ, एस वणस्सइ **पणगा तरुंमि** त्ति पणगो उल्ली राइसु होइ, ततो तव्विणासो-तरुविणासो, वणस्सइविणासो त्ति भणिअं, **भिगु** रायी भण्णति, तत्र कुंथाईआ पाणिणो हवंति, ततो एवं छट्ठो तसकाओ विणासिओ होइ, एवं अलेविए पत्ते छज्जीवणिकायविराहणा अवस्सं होइ **॥३७५॥**

**[ पूयलियलग्ग अगणी पलीवणं गाममादिणं होज्जा ।**
**रोट्टपणगा तरुम्मि भिगु-कुंथादी य छट्ठम्मि ॥४८०॥**

कयाचिदविरत्याऽनाभोगतः साङ्गारा पूपलिका दत्ता भवेत्, तत्राम्लावयवसंस्पर्शतस्तस्य विध्वंसः; यद्वा स पूपलिकालग्नोऽग्निर्दहेत्, स च साधुर्न चेतयते ततः प्रदीप्ते पात्रे परितापलगनतः सहसा तत् पात्रं त्यजेत्, तच्च कण्टकवृत्यादिमध्ये पतितमिति कृत्वा तद्दाहप्रसङ्गतो 'ग्रामादीनां' ग्रामस्य नगरस्य पाटकस्य वा प्रदीपनं भवेत्, ततो महती अग्निकायस्य विराधना । यत्राग्निस्तत्र वायुरिति वायुविराधना । वनस्पतिविराधनामाह–"रुट्ट"इत्यादि । कयाचिदविरत्या 'रोट्टः' लोट्टो दत्तः, सोऽम्लावयवसंस्पर्शतः प्राणविपत्तिमाप्नोति । तथा भृगुर्नाम श्लक्ष्णा राजिस्तासु पनकः सम्मूर्च्छति, सोऽन्न-पानग्रहणतो विध्वंसमापद्यते । एषा 'तरौ' वनस्पतिकाये विराधना । भृगुषु पनके सम्मूर्च्छिते कुन्थ्वादयोऽपि सम्मूर्च्छन्ति, तेऽवयवानामम्लभावेनान्न-पानग्रहणतो वा विराध्यन्ते । एषा 'षष्ठे' त्रसकाये विराधना । एवं षण्णामपि कायानां पात्रस्यालेपने विराधना । [बृ.क.-४८०]]

यच्चोक्तं 'त्रैलोक्यदर्शिभिः समये लेपैषणा नोक्ता' तत्रेदमुच्यते –

---

A. "एकेन साधुना कणिकमण्डलिका लब्धा, तस्या अधस्तात् सूक्ष्म अङ्गारो लग्नो दत्तः, स तु साधुना न दृष्टः, ततो भ्रमतस्तत्पात्रं पडलैस्समं प्रदीप्तम्, ततस्तेन प्रदीप्तं पात्रं दृष्ट्वा क्षिप्तम्, तदपि वाट्यां पतितम्, ग्रामप्रदीपनं जातम् ।

B. अथवा रोट्टो तन्दुलरोट्टो लब्धः, सोऽपरिणतो भवति, पनक राजिसु भवति, ततो तद्विनाशस्तरुविनाशः, वनस्पतिविनाश इति भणितम् । भृगुर्राजिर्भण्यते, तत्र कुन्थ्वादिका प्राणिनो भवन्ति, तत एवं षष्ठस्त्रसकायो विनाशितो भवति, एवमलेपिते पात्रे षड्जीवनिकायविराधना अवश्यं भवति।

१. ०मग्ग हे० २. लोट्टो ल० क०

**६५६ पायग्गहणंमि य देसिअंमि लेवेसणा वि खलु वुत्ता ।**
**तम्हा उ [१]आणणं लिंपणा य जयणाए कायव्वं ॥३७६॥ नि०**

**पादगहणम्मि** गाहा । **पात्रग्रहणे दर्शित** उपदिष्टे सति **लेपैषणाऽपि खलूक्तैव** द्रष्टव्या, **तस्मादानयनं** लेपस्य **ले[२]पनं** पात्रस्य **च यतनया कर्त्तव्यम्** ॥३७६॥

अत्राह परः –

**६५७ हत्थोवघाय गंतूण लिंपणा सोसणा य हत्थंमि ।**
**सागारिए पभु जिंघणा य छक्कायजयणा य ॥३७७॥ नि०**

**हत्थोवघाय** गाहा । यदि नाम पात्रं लिप्यते लिप्यतां नाम, किन्तु तत्रैव शकटसमीपे ग[३]त्वा लिप्यतां यतो लेपानयने **हस्तस्योपघातो** बाधा भवति, अथवा हस्तेन यदि लेप आनीयते ततः संपातिमसत्त्वानामुपघातो भवति, तस्मा**द्गत्वा** पात्र**लेपनं** कार्यम्, एवमुक्त आचार्या भणिष्यन्ति, [४]यदुत-त्वदीयेऽपि पक्षे आत्मोपघातादि भवत्येव। तथा पुनरपि पर एवं भणति-तत्पात्रकं लेपयित्वा पुन**श्च शोषणा** [५]**हस्ते** व्यवस्थितस्यैव तस्य पात्रकस्य कार्या, येन [६]सार्द्रनिक्षेपदोषः परिहृतो भवति, आचार्योऽप्यत्र प्रत्युत्तरं दास्यति, यदुत-हस्ते ध्रियमाणेन पात्रेणात्मोपघातादयो दोषा भवन्ति, तस्मात्पात्रकं हस्ते न शोषणीयं लेपश्चानयनीयः, तत्र च लेपार्थं गच्छन् स साधुः कदाचिदासन्न एव **सागारिए** त्ति **सागारिकः** शय्यातरस्तच्छकटानि यदि पश्यति ततस्तेष्वेव लेपं गृह्णाति, न तत्र गृह्णतः शय्यातरपिण्डदोषो भवति, **पभु** त्ति तेन साधुना लेपं गृह्णता यस्तेषां शकटानां **प्रभुः** स प्रच्छनीयः, अप्रच्छने तु दोषा भवन्ति । तथा लेपस्य **जिघ्रणं** कर्त्तव्यम्, किमयं कटुरकटुर्वा ? तथा **षट्काययतना च** कार्या, इत्येतत्सर्वं वक्ष्यति ॥३७७॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाह –

**६५८ चोदगवयणं गंतूण लिंपणा आणणे बहू दोसा ।**
**संपाइमाइघाओ [७]अतिउव्वरिए य उस्सग्गो ॥१९७॥ निभा०**

**चोदग** गाहा । **चोदकस्य वचनम्,** किं तद् ? **गत्वा लेपना** पात्रकस्य कर्त्तव्या,

---

१. आणणा लिंपणा य हे० आणयणा लिंपणा पायस्स जयणाए आ० २. लिम्पनं च दा० ३. नीत्वा दा० ४. यथा । ख ५. हस्तव्यवस्थितस्य तस्य पात्रकस्य कार्या । ख. (हस्तव्यव. क. हस्तव्यवस्थितस्य च तस्य भ.) ६. ०क्षेपणा दोषः । ख ७. अइउस्सग्गो य उद्धरिए हे० - अधिउस्सग्गो य उव्वरिए ह०

यत **आनयने** लेपस्य **बहवो दोषा** भवन्ति, कथम् ? यदि तावद्धस्तेनानीयते लेपस्ततो हस्तस्य बाधोपजायते तथा **संपातिम**सत्त्व**घातो** भवति, **अत्युद्धरिते च** तस्मिन् लेपे **उत्सर्गः** परिष्ठापनं भवति, [१]ततश्चासंयमस्तस्मात्तत्रैव गत्वा लिम्पतु ॥१९७॥

एवमुक्ते [२]सत्याचार्य आह –

**६५९ एवं पि भाणभेओ वियावडे अत्तणो य उवघाओ ।**
**नीसंकियं च पायंमि गिण्हणे इहरहा संका ॥१९८॥ निभा०**

**एवं पि** गाहा । **एवमपि** गत्वा भाजनं लिम्पतो **भाजनभेदो** भवति, **व्यापृतस्य** चाऽऽकुलितस्य पात्रकलेपने गन्त्याश्लने **सत्यात्मोपघातो** भवति, तथा प्रकटं तत्रैव **पात्रे** लेप**ग्रहणं** कुर्वतो **निःशङ्कितं** लोकस्य भवति यदुतैतेऽशुचयः, येनाशुचिना लेपेन पात्रकलेपनं कुर्वन्ति । **इहरहा संक** त्ति **इतरथा** यदि तत् पात्रं प्रकटं न लिप्यते ततो लोकस्य **शङ्कैव** केवला भवति, यदुत- न विद्मः किमप्यनेन लेपेनैते करिष्यन्तीति, ततः प्रतिश्रय एवागत्य लेपना कर्त्तव्येति ॥१९८॥

**६६० जइ ते हत्थुवघाओ आणिज्जंते व होइ लेवम्मि ।**
**पडिलेहणाइ चेट्ठा तम्हा उ न काइ कायव्वा ॥८५॥ प्र०**

[यदप्युक्तं "भारेण हस्तोपघातः" (गा० ४८२) इति तत्रापि प्रत्युत्तरमाह –

**जइ वा हत्थुवघाओ आणिज्जंतम्मि होइ लेवम्मि ।**
**पडिलेहणादि चेट्ठा तम्हा उ न काइ कायव्वा ॥४८५॥**

यदि लेपे आनीयमाने भारेण हस्तोपघात इति नानयनं क्रियते तर्हि न कदाचिदपि प्रतिलेखनादिका क्रिया कर्तव्या, तत्रापि यथायोगं हस्त-पादादेरुपघातसम्भवात् । तस्माद्यथा प्रतिलेखनादिका क्रियाऽवश्यं कर्तव्या तत्करणे गुणसम्भवाद् एवं लेपानयनमपि । [बृ.क.-४८५]]

**६६१ चोएइ पुणो लेवं आणेउं लिंपिऊण तो हत्थे ।**
**[३]अच्छउ धारेमाणो सद्दवनिक्खेवपरिहारी ॥१९९॥ निभा०**

**चोदेति** गाहा । अत्र परः **पुनरपि चोदयति**-एवं **नामानीय लेपमा**श्रये लिम्पतु पात्रकम्, **लेपयित्वा ततो हस्ते** तत्पात्रकं लिप्तं सद् **धारयंस्तिष्ठतु** यावत्तद्धस्तस्थितमेव शोषमुपयाति, किं कारणम् ? यतो यूयं सद्रवनिक्षेपपरिहारिणः सद्रवस्य निक्षेपः सद्रवनिक्षेपस्तं परिहर्त्तुं शीलं येषां भवतां ते **सद्रवनिक्षेपपरिहारिणः,**

१. तत्र चासंयम इत्यतस्त० दा० २. सत्याह गुरुः ख. व. ३. अच्छइ ह० हे०

एतदुक्तं भवति-पात्रकं तोयार्द्रमपि न निक्षिपथ किं पुनर्लेपलिप्तमिति ॥१९९॥

एवमुक्ते सति परेणाचार्य आह –

**६६२ एवं होउवघाओ आताए संजमे पवयणे य ।**
**मुच्छाई पवडंते तम्हा उ न सोसए हत्थे ॥२००॥ निभा०**

**एवं** गाहा । **एवं** पात्रकं [१]लेपितं हस्तेन धारयतो **भवत्युपघात** [२]**आत्मनि संयमे प्रवचने च**, तत्रात्मविषयः संयमविषयश्च कथम् ? **मुच्छाई पवडंते** त्ति कदाचित्तस्य साधोर्निरोधे पात्रकं हस्तस्थं धारयतो **मूर्च्छा** भवति ततश्च प्रपतति, **पतितस्य** चात्मोपघातो भवत्यङ्गविनाशलक्षणः, पात्रकभेदे च संयमविराधना भवति, तथा प्रवचनोपघातश्चैवं भवति, तं तथापतितं साधुं दृष्ट्वा कश्चित्सा[३]गारिक एवं ब्रूयात्, यदुत-[४]त्वदीयसर्वज्ञेन हस्ते पात्रधारणमुपदिशताऽयमप्यपायो भावी न दृष्ट इति, **तस्मादेतद्दोषभयान्न हस्ते शोषयेत्** पात्रमिति ॥२००॥

**६६३ दुविहा य होंति पाया जुन्ना य नवा य जे उ लिप्पंति ।**
**जुन्ने दाएऊणं लिंपइ पुच्छा य इयरेसिं ॥३७८॥ नि०**

**दुविहा य** गाहा । तानि **च** लेपयितव्यानि **पात्रकाणि द्विविधानि भवन्ति, जूर्णानि** पुराणानि **नवान्यधुनैव यान्यानीतानि** तानि प्रथमं **लिप्यन्ते**, तत्र यानि [५]**जीर्णानि** पात्रकाणि लिम्पनीयानि तानि गुरोः प्रदर्श्य **लिम्पति**, एवंविधान्येतानि पश्य किं लिप्यन्त उत न ? इति, **इतरेषां** नवानां पात्रकाणां लेपने **पृच्छा** कर्त्तव्या, किं एतानि लि[६]प्यन्तु उत तिष्ठन्तु ? इति ॥३७८॥

आह-कः पुनरनापृच्छ्य पात्रकाणि विलिम्पति सति दोषः ? उच्यते-यो मायावी भवति स चैवं ज्ञात्वा पात्रकाणि लिम्पति –

**६६४ पाडिच्छगसेहाणं नाऊणं कोइ आगमण माई ।**
**दढलेवे वि उ पाए लिंपइ मा तेसि दिज्जिज्जा ॥३७९॥ नि०**

**पाडिच्छग** गाहा । **पाडिच्छगा** सूत्रार्थग्रहणार्थं य आचार्यसमीपमागच्छन्ति **सेहा** अभिनवप्रव्रजिताः, एतेषा**मागमनं ज्ञात्वा कश्चिन्मायावी दृढलेपान्यपि** तानि पुराण**पात्रकाणि** [७]**लिम्पति, मा** भूदाचार्य**स्तेभ्यः** प्रतीच्छकसेहेभ्यो **दद्यात्** ॥३७९॥

---

१. लिप्त सत् क, ख. २. आत्मनः संयमे क ३. सागारिकमे० दा० ४. एतदीय० क, ख. ५. जूर्णानि दा०
६. लिप्यन्ते दा. ७. लेपयति दा०

**६६५ अहवा वि विभूसाए लिंपइ जा सेसगाण परिहाणी ।**
**अपडिच्छणे य दोसा सेहे काया अओ दाए ॥२०१॥ निभा०**

**अहवा** गाहा । **अथवा** दृढलेप**मपि** पात्रं **विभूषया लिम्पति,** तस्मिंश्च लिप्ते पात्रे **या शेषकाणां** ग्लानादीनां **परिहाणिः,** सा सर्वा तेन कृता भवति । **अपडिच्छणे य दोस** त्ति [A]पत्तयाभावे आयरिओ ते न पडिच्छति ततो **अपडिच्छणे** दोषा निर्जराद्यभावलक्षणाः । **सेहे** त्ति यः प्रव्रजितमात्रस्तस्मै यदि पात्रकादि न दीयते ततस्तस्योपकरणरहितस्य चित्तविपरिणामो भवति, [१]विपरिणतश्च **कायान्** व्यापादयति, **अतोऽस्मात्** कारणाद्दर्शयित्वा पात्रं लिप्यते, कदाचिदसावाचार्यः प्रतीच्छकादीनागन्तुकान् श्रुत्वा निवारयेत्तं साधुं लिम्पन्तमिति ॥२०१॥

कदा पुनर्लेपग्रहणं दानं च कर्त्तव्यमित्यत आह –

**६६६ पुव्वण्हि लेवदाणं लेवग्गहणं [२]सुसंवरं काउं ।**
**लेवस्स आणणे लिंपणे य जयणाविही वोच्छं ॥३८०॥ नि०**

**पुव्वण्हि** गाहा । **पूर्वाह्णे लेपप्रदानं** पात्रकस्य कर्त्तव्यं लेपेन लेपनमित्यर्थः, येन तत्प्रत्यूषसि लिप्तं दिवसेन शुष्यति, तथा **लेवग्गहणं सुसंवरं काउं** ति गृह्यतेऽस्मिन्निति **ग्रहणम्,** शरावसंपुटं **सुसंवरं** सुगुप्तं चीवरेण **कृत्वा** तं शरावसंपुटम् । इदानीं **लेपस्यानयने लेपने च** पात्रकस्य यो **यतनाविधिर्भ**वति तं **वक्ष्ये**॥३८०॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयति –

**६६७ पुव्वण्हे लेवगहणं काहिंति चउत्थगं करिज्जाहि ।**
**असहू वासियभत्तं अकार[३]ऽलंभे व दिंतियरे ॥२०२॥ निभा०**

**पुव्वण्हे** गाहा । **पूर्वाह्णे लेपग्रहणं करिष्यामीति** कृत्वा **चतुर्थमे**कमुपवासं **कुर्याद्** येन निर्व्यापारः सुखेनैव करोति, अथासौ चतुर्थं कर्त्तुं न शक्नोति, अत्यन्तमसहिष्णुस्ततो **वासिकभक्तं** भक्षयित्वा पात्रकाणि लेपयति । **अकारऽलंभे** त्ति अथ तद्वासिकभक्त**मकारकम**पथ्यं तस्या**लम्भो** वा तया वेलया स न लभते भक्तम्, ततः **दिंतियरे** त्ति **इतरे**ऽन्ये साधव आनीय **ददति** लब्धिसंपन्ना ये ॥२०२॥

---

A. पात्रकाभावे आचार्यस्तेभ्यो न प्रतीच्छति ततोऽप्रतीच्छने दोषाः ।

१. विपरिणामतश्च दा० २. उ संवरं ह० ३. लंभे य ह० ऽलंभे च दा.

ततश्च लेपयित्वा कृतकृत्यो घट्टयन्नास्ते –

**६६८ कयकितिकम्मो छंदेण छंदिओ भणइ लेवऽहं घेत्तुं ।**
**[१]तुब्भं पि अत्थि अट्ठो ? आमं तं कित्तियं किं वा ॥३८१॥ नि०**

**कयकितिकम्मो** गाहा । स हि लेपार्थं व्रजन् गुरोः कृतिकर्म द्वादशावर्त्तवन्दनं करोति, **कृतकृतिकर्मा** च **छन्देनेति** द्वादशावर्त्तवन्दनके गुरुवाक्यमेतत्, **छन्दितोऽ**नुज्ञातः सन् **भणति-लेपमहं ग्रहीष्यामि,** ततश्च **तुभ्यं** भवतामप्**यस्त्यर्थित्वं** लेपेन ? पुनरसौ गुरुर्भणति- **आममस्ति** कार्यम्, पुनः साधुर्भणति-'**तं कित्तिअं**' **तं** लेपं **कियन्तं** ग्रहीष्यामि ? **किं व** त्ति **किं वा** मलिकया तव प्रयोजनमुत लेपेन ? किमाचार्यस्य च लेपेन प्रयोजनं भवति ? तस्य गच्छसाधारणं नन्दीपात्रमस्ति तदर्थं तस्य वाऽऽचार्यश्चिन्तां करोति ॥३८१॥

**६६९ सेसे वि पुच्छिऊणं कयउस्सग्गो गुरुं पणमिऊणं ।**
**मल्लगरुवे गिण्हइ जइ तेसिं कप्पिओ होइ ॥३८२॥ नि०**

**सेसे वि** गाहा । न केवलं गुरुमेव पृच्छति **शेषानपि** साधून् **पृष्ट्वा कृतोत्सर्गः** कृतोपयोगो **गुरुं नमस्कृत्य**, किं करोतीत्यत आह- **मल्लगरूवे गिण्हइ** मल्लकं शरावं यत्र लेपो गृह्यते रूतं च गृह्णाति येनासौ लेपो छाइज्जइ, **मल्लकरूतयोश्च** तदा **ग्रहणं** करोति **यदा तयोः कल्पिको भवति,** एतदुक्तं भवति-यद्यसौ वस्त्रैषणायां पात्रैषणायां च गीतार्थस्तदा मल्लकं रूतं च मार्गयित्वा गच्छतीति ॥३८२॥

**६७० गीतत्थपरिग्गहिए अयाणओ रूवमल्लए घित्तुं ।**
**छारं च तत्थ वच्चइ गहिए तसपाणरक्खट्ठा ॥३८३॥ नि०**

**गीतत्थ** गाहा । अथासौ मल्लकरूतयोर्मार्गणे न कल्पिकस्ततो **गीतार्थपरिगृहीते** स्वीकृते **मल्लकरूते गृहीत्वा क्षारं च** भूतिं गृहीत्वा **तत्र** मल्लके **व्रजति, गृहीते** लेपे सति चीरमुपरि दत्त्वा लेपस्य ततो रूतं तत उपरि भूतिं ददाति, किमर्थम् ? **त्रसप्राणरक्षणार्थमिति** ॥३८३॥

इदानीं यदुक्तं प्रेरकेणासीद् यदुत [२]सागारिकगन्त्र्यां लेपग्रहणं न कार्यं यतोऽसौ शय्यातरपिण्डो वर्त्तत इति, तत्प्रतिषेधायाह –

---

१. तुहं ति हे० २. सागारिकं लेप० क.

**६७१ वच्चंतेण य दिट्ठं सागारिदुचक्कगं तु अब्भासे ।**
**तत्थेव होइ गहणं न होइ सो सागारियपिंडो ॥३८४॥ नि०**

**वच्चंतेण** गाहा । **व्रजता** साधुना लेपार्थं यदि **दृष्टं सागारिक**सम्बन्धि **द्विचक्रं** गन्त्रिकाऽ**भ्यासे** समीपे तत**स्तत्रैव ग्रहणं** कर्त्तव्यम्, **न भवत्यसौ सागारिकपिण्डः** शय्यातरपिण्डोऽसौ न भवति ॥३८४॥

इदानीमसौ गत्वा किं कृत्वा लेपं गृह्णातीत्यत आह –

**६७२ गंतुं दुचक्कमूलं अणुन्नवित्ता पहुं तु साहीणं ।**
**एत्थ य पहु त्ति भणिए कोई गच्छे निवस[1]मीवं ॥३८५॥ नि०**

**गंतुं** गाहा । **गत्वा द्विचक्रमूलं** गन्त्रीसमीपम्, यदि त**त्प्रभुः स्वाधीनः** सन्निहितो भवति ततस्त**मनुज्ञाप्य** गृह्यते, अथ तत्र गन्त्र्या आसन्नः प्रभुर्नास्ति ततश्चासौ साधुः पृच्छति-कोऽत्र प्रभुः ? इति, पुनश्चैवं पृष्टे सति कश्चित्पुरुष एवं ब्रूयाद्, यदुत **एत्थ य पहु त्ति अत्र** शकट**प्रभू** राजा, ततश्चैवं **भणिते** सति **कश्चिद**गीतार्थो गन्त्रीणामनुज्ञापनार्थं **नृपसमीपमेव गच्छेत्** ॥३८५॥

एत्थ य अविहीअणुण्णवणाए दिट्ठंतो –

**६७३ किं देमि त्ति नरवई तुज्झं खरमक्खिआ [2]दुचक्कि त्ति ।**
**सो य पसत्थो लेवो इत्थ य भद्देतरे दोसा ॥३८६॥ नि०**

**किं देमि** गाहा । "[A]एगो साहू लेवस्स कज्जे निग्गतो जाव पेच्छइ सगडाइं, साहुणा पुच्छिअं-कस्स एते सगडा ? गिहत्थेण सिट्ठं–राउला, साहू अगीतत्थो चिंतेइ-पभू अणुण्णवेयव्वो, वच्चामि रायं पिच्छामि तेण राया दिट्ठो, भणति राया– **किं** तुह **देमि** ? साहू भणति–**तुब्भं** सगडे तेल्लेण मक्खिए अत्थि, तत्थ **लेवो पसत्थो** हवति, तं मे देहि, **एत्थ य भद्देयरे दोसा** भवंति, तत्थ जइ सो राया भद्दो ताहे सव्वहिं चेव उग्घोसणं करावेति जहा न केण वि सगडा घएण

A एकः साधुर्लेपस्य कार्ये निर्गतो यावत् पश्यति शकटानि, साधुना पृष्टम्- कस्यैतानि शकटानि ? गृहस्थेन शिष्टम्- राज्ञः, साधुरगीतार्थश्चिन्तयति- प्रभुरनुज्ञापयितव्यः, व्रजामि, राजानं पश्यामि, तेन राज्ञा दृष्टः, भणति राजा- किं तुभ्यं ददामि? साधुर्भणति- युष्माकं शकटानि तैलेन म्रक्षितानि सन्ति, तत्र लेपः प्रशस्तो भवति तं मम देहि, अत्र च भद्रेतरे दोषा भवन्ति । तत्र यदि स राजा भद्रकस्तदा सर्वत्रैव उद्घोषणां कारयति, यथा- न केनापि शकटानि घृतेन म्रक्षितव्यानि, यो म्रक्षति स दण्डं प्राप्तः, एवमादि भद्रकः प्रसङ्गं कुर्यात् । अथ स

१. ०समीवे दा० २. दुचक्कं ति ख. पा.

मक्खियव्वा, जो मक्खेइ सो दंडं पत्तो, एवमाई भद्दओ [१]पसंगं कुज्जा, अह सो पंतो राया ताहे सो भणिज्जा-अण्णं किंचि न जाइयं इमीए परिसाए मज्झे तो लेवो जातितो, अहो असुइ समणा खलु एते, मा एतेसिं कोइ भिक्खं पि देउ । एते अविहीअणुण्णवणाए दोसा" ॥३८६॥

**[किं देमि त्ति नरवई तुब्भं खरमक्खिया दुचक्कि त्ति ।**
**सो य पसत्थो लेवो एत्थ य भद्देयरे दोसा ॥४९८॥**

तत्र स नरपतिर्ब्रूयात्-किं ददामि ? साधुर्वदति-युष्माकं 'द्विचक्राणि' शकटानि खरेण तैलेन म्रक्षितानि सन्ति, तत्र च यो लेपः स प्रशस्त इति तमनुजानीत । अत्र 'भद्रेतरदोषाः' भद्रकदोषाः प्रान्तदोषाश्च । तत्र भद्रकदोषा इमे-स राजाऽनुज्ञापितः सन् ब्रूयाद्-अहो ! निर्ममत्वा भगवन्त एतदप्ययाचितं न गृह्णन्ति, ततः स आज्ञापयेत्-यानि कानिचिन्मम विषये शकटानि तानि सर्वाण्यपि तैलेन म्रक्षणीयानि । प्रान्तः पुनरेवं चिन्तयेत्-अहो ! अमी अशुचयो यदेतन्मां याचन्ते, नूनं सर्वमिदं नगरममीभिर्धर्षयितव्यमिति प्रद्वेषं यायात्, प्रद्विष्टश्च घोषापयेत्, यथा-मम राज्ये न कोऽपि शकटं तैलेन म्रक्षयेत् किन्तु घृतेनान्येन वा । [बृ.क.-४९८]]

**६७४ तम्हा दुचक्कवइणा तस्संदिट्ठेण वा अणुण्णाए ।**
**कडुगंधजाणणट्ठा जिंघे [२]नासेणं अफुसंता ॥३८७॥ नि०**

**तम्हा** गाहा । "[A]**तम्हा** विहीए अणुण्णवेयव्वो, सो य विही-जो सगडाणं पासे ठितो अच्छति जाव [३]दुचक्कवई आगओ, तओ **दुचक्कवइणा** गड्डियापतिणा **अणुण्णाए** सति लेवो गहेयव्वो, तेण दुचक्कवतिणा जो संदिट्ठो [४]पत्थए ठवितो जहा तुमे भलेयव्वं, तेण वा अणुण्णातो संतो गेण्हइ, **कडुगंधजाणणट्ठं** जिंघेयव्वो लेवो-किं सो कडुओ ? कडुयतेल्लेण मक्खिओ नव त्ति, [५]जइ कडुतेल्लेण मक्खितो ताहे न घेप्पति, सो अथिरो होइ, जो मिट्ठतिलतेल्लमक्खिओ सो घिप्पइ" । कथं पुन**र्जिघ्रणं**

---

प्रान्तो राजा,तदा स भणेत्- अन्यत् किञ्चिन्न याचितमनया पर्षदि मध्ये, ततो लेपो याचितः, अहो! अशुचिश्रमणाः खल्वेते, मा एतेषां कोऽपि भिक्षामपि ददातु । एतेऽविध्यनुज्ञापनायां दोषाः ।

A. तस्माद् विधिनाऽनुज्ञापयितव्यः, स च विधिः- यः शकटानां पार्श्वे स्थितोऽस्ति यावद् द्विचक्रपतिरागतः। ततो द्विचक्रपतिना गन्त्रीकापतिनाऽनुज्ञाते सति लेपो ग्रहीतव्यः, तेन वा द्विचक्रपतिना य सन्दिष्टः, प्रस्तावे स्थापितो यथा- त्वया भालयितव्यम्, तेन वाऽनुज्ञातः सन्तो गृह्णाति । कटुगन्धज्ञापनार्थं जिघ्रातव्यो लेपः किं स कटुकःकटुकतैलेन म्रक्षितो नवेति, यदि कटुकतैलेन म्रक्षितस्तदा न गृह्यते, सोऽस्थिरो भवति, यो मिष्टतिलतैलम्रक्षितः स गृह्यते ।

१. सपसंगं क. २. नासं च अफुसंतो हे० ह० ३. तत्थ आओ दुचक्कवइणा क. ४. पहुत्ते व. ५. ०तिल्लम० दा०

करोति ? **नासिकया अस्पृशन्** । जिंघणा इति अवयवो भणिओ ॥३८७॥

**[ तम्हा दुचक्कपतिणा तस्संदिट्ठेण वा अणुण्णाते ।**
**कटुगंधजाणणट्ठा जिंघे नासं अघट्टंतो ॥४९९॥**

यस्मादेवं भद्रक-प्रान्तदोषास्तस्माद्राजा नानुज्ञापयितव्यः । कोऽनुज्ञापयितव्यः ? इति चेद्, उच्यते-यस्तस्य द्विचक्रस्य-शकटस्य पतिः-स्वामी यो वा तेन-शकटपतिना सन्दिष्टः, तेन द्विचक्रपतिना तत्सन्दिष्टेन वाऽनुज्ञाते तैलस्य किल कटुको गन्ध इति 'कटुगन्धज्ञानार्थं' कटुगन्धोऽस्ति न वेति परिज्ञानार्थं नासाम् 'अघट्टयन्' असंस्पृशन् तं लेपं दूरस्थो जिघ्रति । घ्राते च यदि कटुको गन्धः समायाति ततस्तैललेप इति कृत्वा तं समादत्ते । [बृ.क.-४९९]]

इदानीं छक्कायजयण त्ति (नि.३७७) व्याख्यानयन्नाह –

**६७५ हरिते बीए चले जुत्ते वच्छे साणे जलट्ठिए ।**
**पुढवी संपाइमा सामा महवाते महियाऽमिए ॥३८८॥ नि० । दारगाहा ।**

**हरिते** गाहा । **हरिते बीजे** वा तच्छकटं प्रतिष्ठितं भवति ततश्च तत्र न ग्राह्यो लेपः, तथा तत्कदाचिच्छकटं **चलं** गमनाभिमुखं[1] भवति तदापि न ग्राह्यः, तथा **जुत्ते** वा हवइ तदापि न ग्राह्यः, कदाचिच्च तस्मिन् शकटे **वत्सको** बद्धो भवति तदासन्नो वा ततश्च न ग्राह्यः, **श्वा** वा तत्र बद्धः तथापि न ग्राह्यः, जलमध्ये वा तत् शकटं व्यवस्थितं भवति ततश्च न ग्राह्यः, कदाचिच्च सचित्त**पृथिवी**प्रतिष्ठितं भवति तथापि न ग्राह्यः, कदाचित्**संपातिम**सत्त्वैः स [2]प्रदेशो व्याप्तो भवति ततश्च न ग्राह्यः, तथा **श्यामा** रात्रिस्तस्यां च न ग्राह्यः, **महावाते** च वाते सति न गृह्यते, **महिकायां** धूमिकायां निपतन्त्यां न गृह्यते, **अमित**श्चासौ लेपो न गृह्यते किन्तु प्रमाणयुक्त एव ग्राह्यः । द्वारगाथेयम् ॥३८८॥

इदानीं भाष्यकृद्व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाह –

**६७६ हरिए बीएसु तहा अणंतरपरंपरे वि य चउक्का ।**
**आया दुपयं च [3]पतिट्ठियं ति एत्थं पि चउभंगो ॥२०३॥ निभा०**

**हरिए** गाहा । **हरिते बीजे** च द्वौ **चतुष्कौ** भवतः, कथम् ? **अनन्तरपरम्पर**-कल्पनया, एतदुक्तं भवति- हरितबीजयोरनन्तरप्रतिष्ठितत्वमाश्रित्य भङ्गचतुष्टयं निष्पद्यते, तथा तयोरेव हरितबीजयोः परम्परप्रतिष्ठितत्वमाश्रित्य द्वितीयभङ्गचतुष्टयं निष्पद्यते ।

---

१. ०मुखं व्यवस्थितं आ. २. प्रदेशेऽसौ व्याप्तोऽत न । क ३. पइट्ठियम्मि ह० हे०

अत्र चेयं भावना- "[A]अणंतरं हरिते पतिट्ठिया गड्डी बीए अणंतरं पतिट्ठिआ, एगो भंगो १। तहा-अणंतरं हरिए पतिट्ठिआ ण बीए तेषामभावात्, बिइओ भंगो २। अण्णा हरिए अणंतरं न पतिट्ठिया तस्याभावात् बीए अणंतरं पइट्ठिआ तइओ ३। तहा-अन्ना ण हरिए अणंतरं पइट्ठिआ ण बीए अणंतरं पइट्ठिआ तयोरभावात्, चउत्थो ४, एस सुद्धो भंगो"। एवं हरितबीजपदद्वयेनानन्तरप्र[1]तिष्ठितत्वकल्पनया भङ्गचतुष्कं लब्धम्।

इदानीं हरितबीजयोरेव परम्परप्रतिष्ठितत्वकल्पनया यथा भङ्गचतुष्कं लभ्यते तथोच्यते, तच्चैवम्-"[B]हरिते परंपरपइट्ठिया गड्डी बीए परंपरपइट्ठिया •एगो भंगो, अण्णा हरिए परंपरपइट्ठिता न बीए परंपरपइट्ठिता बीजानामभावात्, बिइओ भंगो, तहा-अण्णा हरिते ण परंपरपइट्ठिआ हरिताभावात्, बीजे उण परंपरपइट्ठिआ तइओ, अण्णा ण हरिए परंपरपइट्ठिआ ण बीए परंपरपइट्ठिआ तयोरभावात् चउत्थो भंगो, एस सुद्धो भंगो"। **आया दुपयं च पतिट्ठिअं ति एत्थं पि च[2]उभंगो**। तथा तेष्वेव हरितबीजेषु **आत्मा** प्रतिष्ठितः **द्विपदं च प्रतिष्ठितमिति, एतस्मिन्नपि** पदद्वये **चतुर्भङ्गिका** भवति कथम्? "[C]आया हरितबीएसु पइट्ठिओ दुपयं च हरितबीएसु पइट्ठिअं एगो भंगो १। तथा आया हरितबीएसु पइट्ठिओ न दुपयं हरितबीएसु पइट्ठियं बितिओ २। तथा-आया न हरितबीजेसु पइट्ठिओ दुपयं च हरितबीएसु पइट्ठिअं तइओ ३। तथा-न आया हरितबीएसु पइट्ठिओ णावि दुपयं च हरितबीएसु पतिट्ठिअं चउत्थो भंगो ४, एसो य सुद्धो। एवं अन्ने वि परित्तणंताईहिं भंगा सबुद्धीए ऊहेयव्वा" ॥२०३॥

---

A. अनन्तरं हरिते प्रतिष्ठिता गन्त्री बीजेऽनन्तरं प्रतिष्ठिता, एको भङ्गः १। तथा- अनन्तरं हरिते प्रतिष्ठिता, न बीजे तेषामभावाद्, द्वितीयो भङ्गः २। अन्या हरितेऽनन्तरं न प्रतिष्ठिता, तस्या अभावात्, बीजेऽनन्तरं प्रतिष्ठिता तृतीयः ३। तथा- अन्या न हरितेऽनन्तरं प्रतिष्ठिता न बीजेऽनन्तरं प्रतिष्ठिता तयोरभावात्, चतुर्थः ४, एष शुद्धो भङ्गः।

B. हरिते परम्परप्रतिष्ठिता गन्त्री बीजे परम्परप्रतिष्ठिता एको भङ्गः, अन्या हरिते परम्परप्रतिष्ठिता, न बीजे परम्परप्रतिष्ठिता बीजानामभावात्, द्वितीयो भङ्गः, तथा- अन्या हरिते न परम्परप्रतिष्ठिता हरिताभावात्, बीजे पुनः परम्परप्रतिष्ठिता, तृतीयः अन्या न हरिते परम्परप्रतिष्ठिता न बीजे परम्परप्रतिष्ठिता, तयोरभावाच्चतुर्थो भङ्गः, एष शुद्धो भङ्गः।

C. आत्मा हरितबीजेषु प्रतिष्ठितो द्विपदं च हरितबीजेषु प्रतिष्ठितम्, एको भङ्गः, १) तथा- आत्मा हरितबीजेषु प्रतिष्ठितो न द्विपदं हरितबीजेषु प्रतिष्ठितं द्वितीयः २) तथा- आत्मा न हरितबीजेषु प्रतिष्ठितो द्विपदं च हरितबीजेषु प्रतिष्ठितं तृतीयः, तथा- आत्मा न हरितबीजेषु प्रतिष्ठितो नापि द्विपदं च हरितबीजेषु प्रतिष्ठितं चतुर्थो भङ्गः ४, एष च शुद्धः। एवमन्येऽपि परित्तानन्तादिभिर्भङ्गा स्वबुद्ध्या ऊहेतव्या।

१. ०प्रतिबद्धकल्प० क. २. चउत्थो भंगो क.

हरिते बीए त्ति गयं, इदानीं चले त्ति (नि.३८८)व्याख्यानयन्नाह –

**६७७ दव्वे भावे य चलं दव्वंमि दुपइट्ठिअं तु जं दुपयं ।**
**आयाए संजमंमि य दुविहा उ विराहणा तत्थ ॥२०४॥ निभा०**

**दव्वे** गाहा । **चलं** द्विविधं **द्रव्य**चलं **भाव**चलं **च**, तत्र द्रव्यचलं [1]**दुपइट्ठिअं तु जं दुपयं, दुष्प्रतिष्ठितं यद् द्विपदं** शकटं तद्द्रव्यचलमुच्यते, **तत्र** च **द्रव्यचले** लेपं गृह्णत **आत्मसंयमविराधना द्विविधा** भवति ॥२०४॥

इदानीं भावचलप्रतिपादनायाह –

**६७८ भावचलं गंतुमणं गोणादी अंतराइयं तत्थ ।**
**जुत्ते वि अंतरायं वित्तस चलणे य आयाए ॥२०५॥ निभा०**

**भावचलं** गाहा । **भावचल**मुच्यते यच्छकटं गमनाभिमुखं वर्त्तते, **तत्र** च लेपं गृह्णतः **गोणादी अंतराइयं** ति **गवादीनामन्तरायं** भवति, कथम् ? "[A]स कयाइ सगडवई भद्दओ भवति ततो सो जाव साहू लेवं गेण्हति ताव ते बइल्ले न जोएति, पच्छा ऊसूरे जोत्तेति ततो ताणं बइल्लाणं पयट्ट त्ति काउं चारिं न दिंति अग्गतो य जा चारी सा ऊसूरे पत्ता, एवं भावचले गिण्हंतस्स अंतरायं हवइ ।" द्वारम् । जुत्ते त्ति व्याख्यायते, तत्राह-**जुत्ते वि अंतरायं** [2]बलीवर्द**युक्तेऽपि** शकट एवम**ेवान्तरायं** भवति । तथाऽयं च दोषः, **वित्तस चलणे य आयाए** ते बलीवर्दाः कदाचित्तं साधुं दृष्ट्वा **वित्रसन्ति,** ततश्च गन्त्या**श्चलने** लेपं गृह्णत **आत्मो**पघातो भवति । द्वारम् ॥२०५॥

इदानीं वच्छे त्ति (नि.३८८)व्याख्यायते –

**६७९ वच्छो भएण नासइ भंडिक्खोभेण आयवावत्ती ।**
**आया पवयण साणे काया य भएण नासंति ॥२०६॥ निभा०**

**वच्छो** गाहा । यदि च तत्र **वत्सक** आसन्नो भवति ततश्चासौ तं साधुं दृष्ट्वा कदाचि**द्भयेन नश्यति,** ततो नश्यन् कायान् व्यापादयति । अथासौ तस्यामेव

---

A स कदाचित् शकटपतिर्भद्रको भवति ततः स यावत् साधुर्लेपं गृह्णाति तावत्ते बलीवर्दान्न योजयति, पश्चादुत्सूरे योजयति, ततस्तेषां बलीवर्दानां प्रवृत्त इति कृत्वा चारिं न ददाति, अग्रतश्च या चारी सा उत्सूरे प्राप्ता, एवं भावचले गृह्णतोऽन्तरायं भवति ।

१. दुट्ठितं क. २. बलीवर्दानां युक्तेऽपि दा.

[1]गन्त्र्यां बद्धस्ततोऽसौ भयेन नश्यन् गन्त्र्याः क्षोभं करोति तेन च **भण्डिक्षोभेण** गन्त्रीक्षोभेण **आत्मव्यापत्ति**र्भवति । द्वारम् । इदानीं **साणे** त्ति व्याचष्टे–कदाचित्तत्र **श्वा** तिष्ठति, स च तमक्षं जिह्वया लिखति ततो लेपं गृह्णत **आत्मो**पघातो भवति **प्रवचनो**पघातश्च, **भयेन** नश्यता **कायाश्च विनाश्यते** । द्वारम् ॥२०६॥

जलपुढवि त्ति (नि.३८८) व्याख्यायते, तत्राह –

**६८० जो चेव य हरिएसुं सो चेव गमो उ उदगपु[2]ढवीसु ।**
**संपातिमा तसगणा [3]सामाए होइ चउभंगो ॥२०७॥ निभा०**

**जो चेव य** गाहा । **य एव हरित**बीजेषु **गमो**ऽधिगम उक्तो**ऽसावेवोदक-पृथिव्योर्द्रष्टव्यः**, एतदुक्तं भवति–यथा तत्र पदद्वयेन भङ्गका उपलब्धाः, एवमत्राप्युदक-पृथिवीपदद्वयेन भङ्गकाः कर्त्तव्याः । द्वारम् । संपातिम त्ति व्याख्यायते, तत्राह– **संपाइमा तसगणा संपातिम**शब्देन **त्रसगणा** उच्यन्ते, ते यदि भवन्ति ततो लेपो न ग्राह्यः, तत्र च भङ्गचतुष्टयं भवति, तद्यथा–"[A]संपातिमेसु अप्पा पइट्ठिओ भंडी वि पइट्ठिआ एगो १, तहा–अप्पा संपातिमेसु पतिट्ठिओ न भंडी पतिट्ठिया बीओ २, अप्पा न पतिट्ठितो भंडी तु पइट्ठिआ तइओ ३, अप्पा न पतिट्ठितो न भंडी पइट्ठिआ चउत्थो ४, एसो सुद्धो" । द्वारम् । **सामाए**त्ति व्याख्यायते, तत्र च **श्यामायां भङ्गचतुष्कं भवति,** कथम् ? "[B]लेवो दिवा गहितो अण्णंमि दिवसे लाइतो एगो भंगो १, दिवा गहितो राईए लाइओ बीओ २, राईए गहिओ दिवा लाइओ तइओ ३, रातो गहितो राओ लाइओ चउत्थो ४," दारं **॥२०७॥**

'महावाए'त्ति (नि. ३८८) व्याख्यायते –

**६८१ वाउंमि वायमाणे संपयमाणेसु वा तसगणेसु ।**
**नाणुन्नायं गहणं अमियस्स य मा वि[4]गिंचणया ॥२०८॥ निभा०**

**वाउंमि** गाहा । **वायौ वाति** सति **संपतत्सु वा त्रसगणेषु नानुज्ञातं** लेपस्य

---

A. संपातिमेष्वात्मा प्रतिष्ठितो गन्त्र्यपि प्रतिष्ठिता एकः १, तथा- आत्मा संपातिमेषु प्रतिष्ठितो, न गन्त्री प्रतिष्ठिता द्वितीयः २, आत्मा न प्रतिष्ठितो गन्त्री तु प्रतिष्ठिता तृतीयः ३, आत्मा न प्रतिष्ठितो न गन्त्री प्रतिष्ठिता चतुर्थः ४, एष शुद्धः ।

B. लेपो दिवा गृहीतोऽन्यस्मिन् दिवसे लेपितः, एको भङ्गः १, दिवा गृहीतो रात्र्यां लेपितो द्वितीयः २, रात्रौ गृहीतो दिवा लेपितस्तृतीयः ३, रात्रौ गृहीतो रात्रौ लेपितश्चतुर्थः ४ ।

१. गन्त्र्यां प्रक्षेपं करोति । क. २. पुढवीए ह० ३. सामइए ह० ४. विगिंचणिया ह० हे० संपा०

**ग्रहणम्** । द्वारम् । इदानीं महिका, सा च **संपयमाणेसु वा तसगणेसु** इत्यनेन **वा**शब्देन व्याख्यातैव द्रष्टव्या, एतदुक्तं भवति-वाशब्दान्महिकायां च निपतन्त्यां लेपो न ग्राह्य इति । द्वारम् । **अमियस्स य** त्ति व्याख्यायते-**अमितस्य च** प्रमाणाधिकस्य लेपस्य ग्रहणं न कर्त्तव्यम्, यतः **मा विकिंचणय** त्ति **मा** भूत्प्रभूतलेपस्य ग्रहणे **विकिंचण** त्यागस्तत्कृतो दोषो भविष्यतीति । द्वारम् ॥२०८॥

**६८२ एतद्दोसविमुक्कं घित्तूं छारेण अक्कमित्ताणं ।**
**चीरेण बंधिऊणं गुरुमूलपडिक्कमालोए ॥३८९॥ नि०**

**एतद्दोस** गाहा । **एतद्दोषविप्रमुक्तं** लेपं **गृहीत्वा** वस्त्रेणाच्छाद्य **छारेणाक्रम्य** तत**श्चीवरेण** तं शरावसंपुटं **बद्ध्वा गुरुमूल**मागत्येर्यापथिकां **प्रतिक्रम्य** गुरव **आलोचयति** ॥३८९॥

**६८३ दंसिअ छंदिअ गुरु सेसए य [१]ओमंथियस्स भाणस्स ।**
**काउं चीरं उवरिं रूयं च छुभिज्ज तो लेवं ॥३९०॥ नि०**

**दंसिअ** गाहा । पुनश्चासौ कायव्यापारेण **दर्शयति,** पुनश्च **गुरुं छन्दयत्या**मन्त्रयति, यदि भदन्तस्य प्रयोजनमनेन लेपेन ततो गृह्यतामिति, एवं छन्दयति । **सेसए य** त्ति **शेषांश्च** साधून् छन्दयति, यदुत-यदि भवतामनेन लेपेन किञ्चित्प्रयोजनं ततो गृह्यतामिति । एवं यदा न कश्चिद् गृह्णाति तदा **ओमंथियस्स भायणस्स** त्ति **ओमस्थितस्या**धोमुखीकृतस्य **भाजनस्य कृत्वोपरि चीरम्,** ततश्चीरस्योपरि **रूत**पटलं करोति, **छुभिज्ज तो लेवं** ति **ततो** रूतस्योपरि **लेपं** प्रक्षिपेत् ॥३९०॥

**६८४ अंगुट्ठपएसिणि[२]मज्झिमाहि घित्तुं घणं तओ चीरं ।**
**आलिंपिऊण भाणे एकं दो तिण्णि वा घट्टे ॥३९१॥ नि०**

**अंगुट्ठ** गाहा । पुनश्चासौ रूतस्योपरि परिक्षिप्य लेपं पुन**रङ्गुष्ठप्रदेशिनी-मध्यमाभिर**ङ्गुलिभिर्गृह्णाति, **गृहीत्वा** च **घनम**त्यर्थं **चीरं** पुनः [१२७]पोट्टलिकाविनिर्गतेन लेपरसेन पात्रमालिम्पति, तच्च पात्रकं कदाचि**देकं** भवति कदाचिद् **द्वे त्रीणि** वा, **तान्यालिप्य** पुन**र्घट्टयत्य**ङ्गुल्या मसृणानि करोतीत्यर्थः ॥३९१॥

---

१२७. पोट्टलिया-पोटली इति ख्याते वस्तुकम्बलाऽऽदिमये वेष्टनके, (भ.१ श.६ उ.)

१. ओमत्थियस्स ह० हे० २. मज्झिमाए ख.

तानि च एवं लिम्पति –

**६८५ अन्नोऽन्नं अंकंमि उ अन्नं घट्टेइ वारवारेणं ।**
**आणेइ तमेव दिणं दवं [1]रएउं अभत्तट्ठी ॥३९२॥ नि०**

**अण्णण्ण** गाहा । **अन्यद् अन्यदङ्क** उत्सङ्गे स्थापयति, स्थापयित्वा चा**न्यद् घट्टयत्य**ङ्गुल्या [2]मसृणयति, एवं **वारया वारया** एकं द्वे वाऽङ्के स्थापयति, अन्यच्चैकं मसृणं करोति, एवं तावद्यावन्मसृणानि सञ्जातानि भवन्ति । यदा पुनरेकमेव [3]लेपितमुत्कृष्टलेपेन भवति तदा रूढे सति **आणेइ तमेव दिणं** ति **आनयति तस्मिन्नेव दिवसे द्रवं** पानकम् । **रएउं रङ्गयित्वा** पात्रकं तदेव **अभत्तट्ठी** त्ति उपोषितो यः स एवं करोति ॥३९२॥

अथासौ ग्लानादीनां वैयावृत्त्यकरो स्यात्ततः –

**६८६ अभत्तट्ठियाण दाउं अन्नेसिं वा अहिंडमाणाणं ।**
**हिंडिज्ज असंथरणे असहू घेत्तुं अरइयं तु ॥३९३॥ नि०**

**अभत्तट्ठिय** गाहा । अथ तत्र पात्रकं रूढं ग्लानादयश्च सीदन्ति सोऽपि वैयावृत्त्यकरस्ततो येऽ**भक्तार्थिका** उपवासिकाः साधवस्तेभ्यो **दाउं दत्वा** [4]समर्प्य भिक्षार्थं व्रजति । अथवा '**अन्नेसिं वा अहिंडमाणाणं**' **अन्ये वा** ये भिक्षां नाटन्ति तेषा**महिण्ड-मानानां** भोक्तृणां साधूनां समर्प्य **हिण्डते** । **असंथरणे** त्ति ग्लानादीना**मसंस्तरणे असंतरए** होंतए एवमसौ करोति । **असहु** त्ति अथासौ स्वयमे**वासहिष्णु**रुपवासं कर्त्तुं ततः **घेत्तुं अरइयं तु** त्ति **गृहीत्वा**ऽन्यसाधुसत्कं पात्रं अरइयं तु **अरञ्जितं** तस्मिन् दिवसे [5]पूर्वलेपितमित्यर्थः, तद् गृहीत्वा हिण्डेत ॥३९३॥

यदा पुनरेवंविधः साधुर्नास्ति कश्चिद्यस्य तन्नवलेपं पात्रकं समर्प्य भिक्षामटति, आत्मना च त्रीणि पात्रकाणि संवाहयितुं न शक्नोति, कानि त्रीणि ? एकं नवलेपं पात्रकमन्यो भक्तपतद्ग्रहस्तृतीयमशुद्धार्थं मात्रकम् तदा को विधिरित्यत आह –

**६८७ न तरिज्जा जइ तिन्नी हिंडावेउं तओ य[6] छारेणं ।**
**उच्चुण्णेउं हिंडइ अन्ने य दवं सि गिण्हंति ॥३९४॥ नि०**

---

१. रवेउं ह० २. मसृणं करोति । दा० ३. लिप्तम् क, ख. ४. समर्पयित्वा दा० ५. पूर्वलिप्तमि० क. ६. उ छारेण हे० ह०

**न तरेज्ज** गाहा । **न तरेत्** न शक्येत **यदि त्रीणि** [१]**पात्रकाणि हिण्डयितुं ततो** नवलेपं पात्रकं **छारेण** भूतिना **अवचूर्ण्य** गुण्डयित्वैकस्मिन् प्रदेशे स्थापयित्वा **हिण्डते** । **अन्ने य दवं सि गिण्हंति** त्ति **अन्ये** साधवस्तदर्थं **द्रव**पानकं **गृह्णन्ति** ॥३९४॥

तथा च –

**६८८ लेत्थारियाणि जाणि उ घट्टगमाईणि तत्थ लेवेणं ।**
**संजमफाइनिमित्तं ताई भूतीए गुंडिज्जा ॥३९५॥ नि०**

**लेत्थारियाणि** गाहा । **लित्थारियाणि लिप्तानि,** केन ? **लेपेने**ति सम्बन्धः, **यानि घट्टकादीनि, तत्र** घट्टको येन पाषाणकेन पात्रं नवलेपं [२]सन् मसृणं क्रियते, **आदि**ग्रहणाच्छरावं चीरं च लेपलिप्तम्, एतानि लेपेन सर्वाण्येव लिप्तानि तत्र पात्रकं लिम्पतः, ततश्च **तानि** घट्टकादीनि **भूत्या गुण्डयति** येन तत्र प्रतिष्ठापितानां सतां कीटिकाद्युपघातो न भवेत् । किमर्थं पुनरेवं क्रियते ? अत आह-**संजमफाइ-निमित्तमिति संयमवृ**द्धि**निमित्तमिति** ॥३९५॥

**६८९ एवं लेवग्गहणं आणयणं लिंपणा य जयणा य ।**
**भणियाणि अतो वोच्छं परिकम्मविहिं तु लित्तस्स ॥३९६॥ नि०**

**एवं** गाहा । **एवमुक्ते**न न्यायेन **लेपग्रहणं** तथा तस्यै**वानयनं लिम्पना च** पात्रकस्य **यतना च** ग्रहणे लेपस्यैतानि **भणितानि, अतः** परं **वक्ष्ये परिकर्मविधिं लिप्तस्य** पात्रकस्य यो भवति ॥३९६॥

स चायं परिकर्मविधिः –

**६९० लित्ते छगणियछारो घणेण चीरेणऽबंधिउं उण्हे ।**
**अंछण [३]परियत्तण सोसणा य धोए पुणो लेवो ॥३९७॥ नि०**

**लित्ते** गाहा । **लिप्ते** तस्मिन्पात्रके सति **छगणियछारो** त्ति गोमयछारेण तत्पात्रकं गुण्ड्यते, पश्चाच्च **घनेन चीरेण** पात्रकबन्धेन वेष्टयित्वा रजस्त्राणेन च परिवेष्ट्य **अबंधिउं** त्ति पात्रकबन्धग्रन्थिमदत्त्वा तत एवंविधं कृत्वा **उण्हे** त्ति **उष्णे** स्थापयति, **अंछण** त्ति ततोऽङ्गुल्या लिप्तस्य रङ्गितस्य पात्रकस्याकर्षणं समारणं करोति, **परियत्तण**

१. पात्रकाणि हिण्डापयितुं क. २. मसृणीक्रियते । क. ३. घट्टण परियट्टणा य ह० हे० परियत्तण घट्टणे य आ०

त्ति आतपे कृत्वा पुनः **परिवर्त्तयत्या**तपाभिमुखं करोति, एवं **शोषणा** तस्य नवलेपस्य पात्रकस्य, **धौते** च छारगुण्डिते तस्मिन् पात्रके **पुनर्लेपो** दीयत इति ॥३९७॥

एतामेव गाथां भाष्यकृदाह, तत्र 'लित्ते छगणियछारो' त्ति इदं व्याख्यातमेव द्रष्टव्यम्, शेषं व्याख्यानयन्नाह –

**६९१ दाउं सरयत्ताणं पत्ताबंधं अबंधणं कुज्जा ।**
**साणाइरक्खणट्ठा पमज्ज छाउण्हसंकमणा[1] ॥२०९॥ निभा०**

**दाउं सरयत्ताणं** गाहा । **दत्त्वा** तस्मिन् पात्रके **सरजस्त्राणं पात्रबंधं** पुन**श्चाबंधणं कुज्ज त्ति** तत्र ग्रन्थिं न ददाति, किमर्थम्? अत आह-**साणादिरक्खणट्ठा श्वानादिरक्षणार्थं** ग्रन्थिं न ददाति, एतदुक्तं भवति–ग्रन्थिना दत्तेन सता कर्पटैकदेशे गृहीतं सत् शुना मार्जारेण वा नीयते, पुनश्च तत्पात्रकं **प्रमृज्य** भुवं **छायात उष्णे सङ्क्रामयति**, एतदुक्तं भवति-अपराह्णछायाक्रान्तं सत् पुनरुष्णे स्थापयति ॥२०९॥

**६९२ [2]तद्दिवसे पडिलेहा कुंभमुहाईण होइ कायव्वा ।**
**छन्ने य निसिं कुज्जा [3]कए य कज्जे विउस्सग्गो ॥२१०॥ निभा०**

**तद्दिवसे** गाहा । यस्मिन् दिवसे पात्रकं [4]लेपयति **तस्मिन् दिवसे कुम्भमुखादीनां** घटग्रीवादीनां **प्रत्युपेक्षणं** कृत्वा ततश्च गृह्णाति, येन लिप्तं पात्रकं बहिस्तस्यां ग्रीवायां तस्मिन् दिवसे क्रियते, **निशायां** तु **छन्ने** तत्पात्रकं **कुर्या**दात्मसमीपे, **कृते च कार्ये व्युत्सर्गः** कर्त्तव्यस्तेषां घटग्रीवादीनां तस्मिन्नेव दिवसे येन [5]परिग्रहकृतो दोषो न भवेत्, अन्यस्मिन् दिवसेऽन्यानि भविष्यन्तीति ॥२१०॥

अथ लेपशेषः कश्चिदास्ते ततस्तस्य को विधिरित्यत आह –

**६९३ अट्ठगहेउं लेवाहियं तु सेसं सरूवगं पीसे ।**
**अहवा वि नत्थि कज्जं सरूवमुज्झे तओ विहिणा ॥३९८॥ नि०**

**अट्ठगहेउं** गाहा । कदाचित्तत्रान्यत्र वा पात्रकेऽष्टको दातव्यो भवति, ततस्तदर्थ-**मष्टक**निमित्तं करेण तं **लेपाधिकं शेषं सरूतं पिष्यते,** अथ तेन लेपशेषेण **न** किञ्चित्**कार्यमस्ति ततः सरूतमेव विधिना** परित्यजेत्, छारेण गुण्डयित्वेत्यर्थः ॥३९८॥

---

१. संकमणे हे० संकमे हे० २. तद्दिवसं ह० हे० ३. कयकज्जाणं आ० ४. लिम्पति क ५.परिग्रहकृतदोषो दा०

इदानीं तत्पात्रकं कस्यां पौरुष्यां बाह्यतः स्थापनीयम् ? कस्यां चाभ्यन्तरे प्रवेश्यमित्येतत्प्रदर्शयन्नाह –

**६९४ पढमचरिमाउ सिसिरे गिम्हे अद्धं तु तासि वज्जिज्जा ।**
**पायं ठवे सिणेहातिरक्खणट्ठा [१]पवेसे वा ॥३९९॥ नि०**

**पढमचरमाओ** गाहा । **शिशिरे** शीतकाले **प्रथम**पौरुषीं वर्जयित्वा तत्पात्रकं बहिरातपे स्थाप्यते, **चरमायां** चतुर्थप्रहरे **शिशिरे** पौरुष्यां तत्पात्रकमभ्यन्तरे प्रवेशयेत्, **गिम्हे अद्धं तु तासि वज्जिज्ज** त्ति **ग्रीष्म**काले **तयोः** प्रथमचरमपौरुष्योर**र्द्धं वर्जयेत्**, ततः **पात्रकं स्थापयेत् प्रवेशयेद्वा**, एतदुक्तं भवति-ग्रीष्मेऽर्द्धपौरुष्यां गतायां सत्यां पात्रकं बहिः स्थापयेत्, तथा चरमप्रहरार्द्धे गते सति तत्पात्रकं प्रवेशयेत्, किमर्थम् ? **सिणेहातिरक्खणट्ठा** एतदुक्तं भवति-शिशिरे प्रथमप्रहरश्च[२]रमप्रहरश्च स्निग्धः कालस्तस्मिंश्च पात्रकं न क्रियते (स्थाप्यते), लेपविनाशभयात्, तथोष्णकाले च प्रथमप्रहरार्द्धे चतुर्थप्रहरार्द्धे च न स्थाप्यते, सोऽपि स्निग्ध एव कालः, अतीवोष्णे स्थापनीयं येन रुह्यत इति ॥३९९॥

**६९५ उवओगं च अभिक्खं करेइ [३]वासाइरक्खणट्ठाए ।**
**वावारेइ व अन्ने गिलाणमाईसु कज्जेसु ॥४००॥ नि०**

**उवओगं** गाहा । तस्मिंश्चातपस्थापिते पात्रक **उपयोगं** निरूपण**मभीक्ष्णं** पुनः पुनः **करोति**, किमर्थमित्यत आह-**वासाइरक्खणट्ठा, वर्षादिरक्षणार्थम्, आदि**ग्रहणात् श्वादिरक्षणार्थं च, **अन्यान् वा** साधून् **व्यापारयति** पात्रकरक्षणार्थं यद्यात्मना **ग्लानादिकार्येष्व**क्षणिको भवति ॥४००॥

कियन्तः पुनर्लेपा दीयन्त इत्यस्यार्थस्य प्रदर्शनायाह –

**६९६ एक्को व जहन्नेणं दुग तिग चत्तारि पंच उक्कोसा ।**
**संजमहेउं लेवो वज्जित्ता गारवविभूसं ॥४०१॥ नि०**

**एक्को व** गाहा । **एको जघन्येन** प्रलेपो दीयते मध्यमेन न्यायेन, **द्वौ त्रयश्चत्त्वारो** वा **उत्कृष्टतः पञ्च लेपा** दीयन्ते, स च **संयमार्थं** दीयते **वर्जयित्वा गौरवविभूषे,** तत्र गौरवं येन मां कश्चिद्भणति यथैतदीयं शोभनं पात्रमिति, विभूषा सुगमा ॥४०१॥

---

१. पवेसेज्जा द० त० २. चतुर्थप्र० ख० ३. वासाइरक्खणट्ठा दा०

इदानीं 'धोते पुणो लेवो' त्ति (नि.३९७), अमुमेवावयवं व्याख्यानयन्नाह –

**६९७ अणुवट्टंते तहवि हु सव्वं अवणित्तु तो पुणो लिंपे ।**
**तज्जायसचोप्पडगं घट्टगरइयं ततो धोवे ॥४०२॥ नि०**

**अणुवट्टंते** गाहा । **अनुपतिष्ठत्य**रुह्यमाणेऽरुज्झन्ते, एतस्मिन्पात्रके **तथापि** तेनापि प्रकारेण यदा न रोहति तदा **सर्वं** लेप**मपनीय ततः पुनर्लिम्पति** । एष तावत् खञ्जनलेपविषयो विधिरुक्तः, इदानीं तज्जातलेपविधिं प्रदर्शयन्नाह–**तज्जायसचोप्पडगं** तस्मिन्नेव जात**स्तज्जातो** गृहस्थ[१]स्यैवाऽलाबुकस्य सचोप्पडगस्स तैलस्निग्धस्य यद्रजः श्लक्ष्णं चिक्कणं लग्नं स तज्जातलेप उच्यते, एवं तज्जातलेपः **सचोप्पडगं** सस्नेहं यत्पात्रकं तद् **घट्टगरइयं घट्टकेन रचितं** मसृणितं घृष्टं **सत्ततः** काञ्जिकेन क्षालयेत् ॥४०२॥

कतिप्रकारः पुनर्लेपः ? इत्यत आह –

**६९८ तज्जाय जुत्तिलेवो खंजणलेवो य होइ बोद्धव्वो ।**
**मुद्दियनावाबंधो [२]तेणगबंधो य पडिकुट्ठो ॥४०३॥ नि०**

**तज्जाय** गाहा । **तज्जातलेपो युक्तिलेपः** पाषाणादिः **खञ्जनलेपश्चे**ति विज्ञेयः । एवं च यदा तत्पात्रकं पूर्वमेव भग्नं भवेद् लेपयतो वा भग्नं भवेत् तदा किं कर्त्तव्यमित्यत आह–तदाऽन्यद् गृह्यते पात्रकम्, यदात्वन्यस्याभावस्तदा किं कर्त्तव्यमित्यत आह–**मुद्दियनावाबंधो** त्ति तदा तदेव पात्रकं [३]सीवयति । केन पुनर्बन्धेन तत्सीवनीयम्? **मुद्रिका**बन्धेन ग्रन्थिबन्धेन तथा **नौबन्धेन** सीवयति यादृशो नावि बन्धो भवति तादृशेन गोमूत्रिकाबन्धेनेत्यर्थः, अन्यः **स्तेनकबन्धो** गूढो भवति स वर्जितो यतस्तत्पात्रकं तेन स्तेनकबन्धेनाऽदृढं भवति झुसिरं च होति त्ति ॥४०३॥

इदानीमेतामेव गाथां व्याख्यानयति, तत्र तज्जातखञ्जनलेपौ व्याख्यातावेव, इदानीं युक्तिलेपं प्रतिपादयन्नाह –

**६९९ जुत्ती उ पत्थराई पडिकुट्ठो [४]सो उ सन्निही जेणं ।**
**दयसुकुमार असन्निहि खंजणलेवो अओ भणिओ ॥४०४॥ नि०**

**जुत्ती उ** गाहा । **युक्तिलेपः** पुनः **प्रस्तरादिरूपः**, **आदि**ग्रहणाच्छर्करिकालेपो

---

१. ०स्थसमीपस्यै० ख० २. तेणगबंधेण दा० ३. सीव्यति० ख. ४. सो य हे०

वा, स च प्रस्तरादिलेपः **प्रतिक्रुष्टः** प्रतिषिद्धो भगवद्भिर्यतः **स सन्निधिम**न्तरेण न भवति, यतश्चैवमतो जीवदयार्थं **सुकुमारत्वादसन्निधि**रिति च कृत्वा **खञ्जनलेप** एभिः कारणैरुक्तो **भणितः** ॥४०४॥

आह-एवं हि सुकुमारं लेपमिच्छतस्तस्य विभूषा भवति ? उच्यते-नैतदस्ति, यतः –

**७०० संजमहेउं लेवो न विभूसाए वदंति तित्थयरा ।**
**सइ असई दिट्ठंतो सइसाहम्मे उवणओ उ ॥४०५॥ नि०**

**संजम** गाहा । **संयमहेतुं** संयमनिमित्तं **लेप** उक्तो **न विभूषार्थं वदन्ति तीर्थकराः** । अत्र च **सतीदृष्टान्त असतीदृष्टान्तश्च** । "[A]एक्कंमि सन्निवेसे दो इत्थियाओ, ताणं एक्का सती अण्णा असती, जा सा सती सा अत्ताणं विभूसंती अच्छति, असती वि एवमेव, तओ सतीए भत्तारभत्ति त्ति काउं उव्वणो वेसो लोगेण गणिज्जइ न य हसिज्जइ, असईए उण वेस उव्वणो लोए हसिज्जइ ।" यतस्तस्या असौ वेषोऽन्यार्थं वर्त्तते, एवमत्र **सतीसाधर्म्य उपनयः** कर्त्तव्यः, यथा सत्या विभूषार्थं प्रकुर्वत्या अपि सा विभूषा [१]लोकेनान्यार्थं न कल्प्यते, एवं साधोः संयमार्थं शोभनं लेपयतोऽपि न विभूषादोष इति ॥४०५॥

इदानीं मुद्रिकादिबन्धान् व्याख्यानयति, तत्सम्बन्धं प्रतिपादयन्नाह –

**७०१ भिज्जिज्ज लिप्पमाणं लित्तं वा असइए पुणो बंधे ।**
**मुद्दियनावाबंधो न तेणएणं तु बंधिज्जा ॥४०६॥ नि०**

**भिज्जिज्ज** गाहा । **भिद्येत तल्लिप्यमानं** पात्रकं **लेपितं वा** सद्भिद्येत ततोऽन्यस्याभावे **पुनरपि बध्यते** सीव्यते । तत्र **मुद्रिका**बन्धस्येयं स्थापना 
**नौबन्धः** पुनर्द्विविधो भवति तस्य चेयं स्थापना  स्तेनकबन्धः पुनर्गुप्तो भवति, मध्येनैव पात्रककाष्ठस्य दवरको याति तावद्यावत् सा राजिः सीविता भवति, तेन **स्तेनक**बन्धेन दुर्बलं पात्रकं भवत्यतोऽसौ वर्जनीयः ॥४०६॥

A. एकस्मिन् सन्निवेशे द्वे स्त्रियौ, तयोरेका सती अन्याऽसती, या सा सती साऽऽत्मानं विभूषयन्ती तिष्ठति, असत्यपि एवमेव, ततः सत्या भर्त्तारभक्तिरिति कृत्वोल्बणो वेशो लोकेन गण्यते, न च हस्यते । असत्या पुनर्वेश उल्बणो लोके हस्यते ।

१. लोकेऽन्यथा न दा०

इदानीं स लेप उत्तममध्यमजघन्यभेदेन त्रिविधो भवत्यत आह –

**७०२ खर अयसि कुसुंभ सरिसव कमेण उक्कोस मज्झिम जहण्णो ।**
**नवणीए सप्पि वसा [१]गुले य लोणे अलेवो उ ॥४०७॥ नि०**

**खर** गाहा । **खरं**[२] इति-"[A]**खर**सण्हयं तिलतेल्लं तेण कओ उक्कोसो लेवो, **अयसिकुसुंभिआ**तिल्लेण मज्झिमो लेवो, **सरिसव**तेल्लेण य जहण्णो होइ," अनेन **क्रमेणोत्कृष्टो मध्यमो जघन्य** इति । कैः पुनर्लेपो न भवतीत्याह-**नवनीतेन** [३]**सर्पिषा** घृतेन **वसया गुडेन लवणेन** च, एभी रसैर**लेपः**, एभिर्लेपो न भवतीति ॥४०७॥

उक्तो द्रव्यपिण्डः, इदानीं पिण्डस्यैकार्थिकान्युच्यन्ते, अत्राह –

**७०३ पिंड निकाय समूहे संपिंडण पिंडणा[४] य समवाए ।**
**समोसरण निचय उवचय चए य जुम्मे य रासी य ॥४०८॥ नि०**

**पिंड** गाहा । **पिण्डो निकायः समूहः संपिण्डनं पिण्डना च समवायः समवसरणं** 'सृ गतौ'( पा. धा. १००७ ) सम्यगेकत्र गमनं समवसरणम्, **निचयः, उपचयः, चयश्च जुम्मश्च राशिश्च** सङ्घातार्थः ॥४०८॥

प्रतिपादितो द्रव्यपिण्डः, इदानीं भावपिण्डप्रतिपादनायाह –

**७०४ दुविहो य भावपिंडो पसत्थओ होइ अप्पसत्थो य ।**
**दुग सत्तट्ठ चउक्कग जेणं वा बज्झइ इयरो ॥४०९॥ नि०**

**दुविहो य** गाहा । **द्विविधो भावपिण्डः प्रशस्त**भावपिण्डो**ऽप्रशस्त**भावपिण्डश्च, तत्राप्रशस्तं प्रतिपादनायाह- **दुयसत्तट्ठ** इत्यादि, "[B]**दुविहो** रागो य दोसो य, सत्तविहो **सत्त** भयट्ठाणाणि, एतानि च तानि-इहलोकभयं परलोकभयं आयाणभयं अकम्हाभयं आजीवियाभयं मरणभयं असिलोगभयं, **इहपरलोयायाणमकम्हाआजीव-मरणमसिलोए त्ति** । अट्ठविहो **अट्ठ** कम्मपयडीओ णाणावरणाइयाओ, अहवा **अट्ठ**

---

A. खरश्लक्ष्णं तिलतैलम्, तेन कृत उत्कृष्टो लेपः, अतसीकुसुम्भतैलेन मध्यमो लेपः, सर्षपतैलेन च जघन्यो भवति।

B. द्विविधो रागश्च दोषश्च, सप्तविधः सप्त भयस्थानानि, एतानि च तानि- इहलोकभयम्, परलोकभयम्, आदानभयम्, अकस्माद्भयम्, आजीविकाभयम्, मरणभयम्, अश्लोकभयम्, इहपरलोकादानमकस्मादाजीविकामरणाश्लोक

१. गुडेण लोणेण आ० २. खरं सण्हं तिलतिल्लं तेण दा. ३. सर्पिर्घृतसतैलवसया० । क. ४. पिंडणे हे०

**मयट्ठाणाइं-जाइकुलबलरूवे तवईस्सरिए सुए लाभे । चउव्विहो कोहमाण-मायालोहरूवो**"। रागद्वेषावेव पिण्ड औदयिको भावोऽनन्तकर्मपुद्गलनिर्वृत्तः पिण्डः, एवं सप्तभिर्भयस्थानैर्यो जन्यते स कर्मपिण्डः, एवमन्यत्रापि योज्यम्, **येन वा** बाह्येन वस्तु**नेतर** आत्मा **बध्यते** कर्मणाऽष्टप्रकारेण सोऽप्रशस्तः ॥४०९॥

इदानीं प्रशस्तं भावपिण्डं प्रतिपादयन्नाह –

**७०५ तिविहो होइ [१]पसत्थो नाणे तह दंसणे चरित्ते य ।**
**मोत्तूण अप्पसत्थं पसत्थपिंडेण अहिगारो ॥४१०॥ नि०**

**तिविहो** गाहा । **त्रिविधः प्रशस्त**भावपिण्डः-**ज्ञान**विषयो **दर्शन**विषय**श्चारित्र**विषय**श्च** । तत्र ज्ञानपिण्डो ज्ञानं स्फातिं नीयते येन स, तथा दर्शनं स्फातिं नीयते येन, चारित्रपिण्डः चारित्रं स्फातिं नीयते येन, स बाह्योऽभ्यन्तरश्च पिण्डः, **मुक्त्वाऽप्रशस्तं प्रशस्तपिण्डेनाधिकारः** । अयं च भावपिण्डः, केन पिण्ड्यते ? प्रचुरीक्रियते, शुद्धेनाहारोपधिशय्यादिना, अत्र चाहारेण प्रकृतम्, स एव प्रशस्तो भावपिण्डः, कारणे कार्योपचारात्, ज्ञानादिपिण्डकारणमसौ, स चाहार एषणाशुद्धो ग्राह्यः, अनेन सम्बन्धेनागता एषणा प्रतिपाद्यते ॥४१०॥

अथवा पूर्वमिदमुक्तम्-'पिंडं च एसणं च वोच्छं' (नि.३३१) तत्र पिण्ड उक्तः, इदानीमेषणा प्रतिपाद्यते, अथवा स्वयमेवायं भाष्यकृत्सम्बन्धं करोति –

**७०६ लित्तंमि भायणम्मी पिंडस्स उवग्गहो य कायव्वो ।**
**जुत्तस्स एसणाए तमहं वोच्छं समासेणं ॥२११॥ निभा०**

**लित्तंमि** गाहा । **लिप्ते भाजने** सति ततः **पिण्डस्योपग्रहो** ग्रहणं **कर्त्तव्यम्**, किंविशिष्टस्य पिण्डस्य ? **एषणायुक्तस्य**, अतस्तामेवैषणां प्रतिपादयन्नाह ॥२११॥

**७०७ नामं ठवणा दविए भावंमि य एसणा मुणेयव्वा ।**
**दव्वंमि हिरण्णाई गवेसगहभुंजणा भावे ॥४११॥ नि०**

**नामं** गाहा । **नामस्थापने** सुगमे, **द्रव्ये** द्रव्यविषया, यथा **हिरण्यादे**र्गवेषणां करोति कश्चिद्, **भावे** भावविषया त्रिविधा-**गवेषणै**षणाऽन्वेषणैषणा, **ग्रहणै**षणा

---

इति । अष्टविधोऽष्ट कर्मप्रकृतय ज्ञानावरणादिकाः, अथवाऽष्ट मदस्थानानि जातिकुलबलरूपाः तपऐश्वर्यौ श्रुतं लाभः। चतुर्विधः क्रोधमानमायालोभरूपः ।

१. पसत्थे दा०

पिण्डादानैषणा, **भुञ्जनैषणा** ग्रासैषणा चेति ॥४११॥

सा च गवैषणैषणा एभिर्द्वारैरभिगन्तव्या –

**७०८ पमाणे काले आवस्सए य संघाडए य उवकरणे ।**
**मत्तग काउस्सग्गो जस्स य जोगो सपडिवक्खो ॥४१२॥ नि० । दारगाहा ।**

**पमाणे** गाहा । **प्रमाणं** कतिवारा भिक्षार्थं प्रवेष्टव्यमिति, एतद्वक्ष्यति । **काले** त्ति कस्यां वेलायां प्रवेष्टव्यम् ? भिक्षा गवेषणीया इत्यर्थः । **आवस्सए** त्ति **आवश्यकं** कायिकादिव्युत्सर्गं कृत्वा भिक्षाटनं कर्त्तव्यं गवेषणमित्यर्थः । **संघाडए** त्ति **सङ्घाटक**युक्तेन हिण्डनीयं नैकाकिना, **उवकरणे** त्ति भिक्षामटता किं **सर्वमुपकरणं** ग्राह्यमाहोस्वित्स्वल्पम्, **मत्तग** त्ति भिक्षामटता गवेषयता **मात्रक**ग्रहणं कर्त्तव्यम्, **कायोत्सर्गः** भिक्षार्थं गच्छतोपयोगप्रत्ययः कार्यः, तथा **यस्य च योगो** भिक्षार्थं गच्छन्निदं वक्ति यस्य योगः, येन वस्तुना सह सम्बन्धो भविष्यति तद् ग्रहीष्यामीत्यर्थः । **सपडिवक्खो** त्ति सर्व एवायं द्वारकलापः **सप्रतिपक्षो**ऽपि वक्तव्यः, सापवादोऽपीत्यर्थः ॥४१२॥

इदानीं भाष्यकारः प्रतिपदमेतां गाथां व्याख्यानयति, तत्र 'पमाणे'त्ति व्याख्यानयन्नाह –

**७०९ दुविहं होइ पमाणं काले भिक्खा पवेसमाणं च ।**
**सन्ना भिक्खायरिआ भिक्खे दो काल पढमद्धा ॥२१२॥ निभा०**

**दुविहं** गाहा । **द्विविधं प्रमाणं भवति, काले** त्ति एकं **काल**प्रमाणं कालनियमो वेलानियम इत्यर्थः । तथाऽन्य**द्भिक्षार्थं प्रविशमानानां प्रमाणं** वारालक्षणं भवति, तत्र भिक्षाप्रवेशप्रमाणं प्रतिपादयन्नाह-**सन्ना भिक्खायरिया भिक्खे दो, भिक्षार्थं** वारा**द्वयं** प्रविशति, एकमकाल**सञ्ज्ञा**पानकनिमित्तं द्वितीयं **भिक्षाचर्या**काले प्रविशतीति। "[A]जति पुण ततियवारं भिक्खायरिअं करेति ततो खेत्तं चमढिज्जति उड्डाहो य हवति, जहा णत्थि एतेसिं भिक्खाहिंडणे नियमो, तम्हा दोण्णि वारा उ हिंडियव्वं, एयं च पुव्वभणितमेव-पुणो पुणो पविसणे सड्ढयकुलाणि चमढिज्जंति त्ति, तेण भासकारेण बहुवारा पविसणे दोसा(निभा.१२४)निदंसिआ" । उक्तं भिक्षाप्रवेशवाराप्रमाणम्,

A. यदि पुनस्तृतीयवारं भिक्षाचर्यां करोति ततः क्षेत्रं कदर्थ्यन्त उड्डाहश्च भवति, यथा नास्ति एतेषां भिक्षाहिण्डने नियमः, तस्माद् द्वे वारे हिण्डितव्यम्, एतच्च पूर्वभणितमेव- पुनःपुनः प्रवेशने श्राद्धकुलानि कदर्थ्यन्त इति, तेन भाष्यकारेण बहुवारप्रवेशने दोषा निदर्शिता ।

इदानीं भिक्षाकालप्रमाणं प्रतिपादयन्नाह—**काल पढमद्धा काल** इति। भिक्षाकालस्तस्मिन् प्रवेशितव्यम्, तथा **पढमद्धा** इति **प्रथम**पौरुष्यां **यदर्द्धं** तस्मिंश्च भिक्षार्थं प्रवेशितव्यम्, उक्तं कालप्रमाणम् ॥२१२॥

**७१० आरेण भद्दपंता भद्दग उद्धवण भंडण [१]पदोसा ।**
**दोसीण पउरकरणं ठवियगदोसा य भद्दंमि ॥२१३॥ निभा०**

**आरेण** गाहा । यदि पुनरर्द्धपौरुष्या **आरत** एव प्रत्यूषस्येव भिक्षार्थं प्रविशति ततो [२]**भद्रकप्रान्तकृता** दोषा भवन्ति, तत्र **भद्रक**कृता एते दोषाः-**उद्धवण भंडण पदोसा** "[A]उट्ठावणं पसुत्तमहिलाए करेति, जहा पव्वतियगा आगता, अत उट्ठेत्ता देसु त्ति, [३]आहता सा आलस्सेण न उट्ठेति तओ **भंडणं** कलहो होज्जा, अहवा सा चेव पदोसिज्जा ।" प्रद्वेषं गच्छेदित्यर्थः । **दोसीण पउरकरणं** ति "[B]सो चेव गिहवई इमं भणति—जहा एते तवस्सिणो, रत्तिं अजिमिता एत्ताहे छुहाईता अतो समतिरेगं रंधिज्जासु जेण एयाणं पसरवेलाए आगयाणं होति त्ति" । तथा **ठवियगदोसा य** त्ति **स्थापनाकृ**ताश्चैवं **दोषा** भवन्ति ॥२१३॥

साम्प्रतं प्रान्तकृतदोषकथनायाह —

**७११ [४]अद्दागमंगलं वा ओभावण खिंसणा हणण पंते ।**
**फिडिउग्गमे य ठविया भद्दग चारी किलिस्सणया॥२१४॥ निभा०**

**अद्दाग** गाहा । "[C]गिहवती घरे अच्छति, तओ पसरे साधू आगतो, तं दट्ठूण य गिहवती इमं भणिज्जा-अहो मे **अद्दागमिव** अधिट्ठाणं दिट्ठं । **अमंगलं** वाऽसौ गृहपतिर्मन्यते साधुदर्शनम्, ततश्चैवं **ओभावणा** परिभवो भवति, तथा **खिंसणा** वा भवति, अवभावना परिभवो भवति, तथा खिंसना वा भवति, "[D]जहा एते पेट्टपूरणत्थमेव पव्वइता ।" **आहणणा** वा **पंते प्रान्त**विषये भवति । [५]एते

A. उत्थापनं प्रसुप्तमहिलायाः करोति, यथा प्रव्रजितका आगताः, अत उत्थाय देहीति, आहूता साऽऽलस्येन नोत्तिष्ठति ततो भण्डनं कलहो भवेत्, अथवा सा एव प्रद्विष्यात् ।

B. स एव गृहपतिरिदं भणति- यथैते तपस्विनः, रात्रा अजेमिता इदानीं क्षुधिता, अतः समतिरेकं राध्नुह येनैतेषां प्रसरवेलायामागतानां भवतीति ।

C. गृहपतिर्गृहे तिष्ठति, ततः प्रसरे साधूरागतः, तं दृष्ट्वा च गृहपतिरिदं भणेत्-अहो ! ममाऽऽदर्शमिवाधिष्ठानं दृष्टम् ।

D. यथैते पेट्ट-उदरपूरणार्थमेव प्रव्रजिताः ।

१. पओसो ह० २. भद्रकप्रान्तदोषा दा० ३. अहवा सा दा० ४. अद्दामलगं वा. ५. एवं ख.

तावत्प्रत्यूषस्येव प्रविशतो [1]दोषा उक्ताः । **फिडिए** त्ति अथापगतायामतिक्रान्ताया-मर्द्धपौरुष्यां भिक्षार्थं प्रविशति ततश्च यदि भद्रको भवति तत एवं ब्रवीति-यदुत अद्यदिवसादारभ्य यथेयती वेला राद्धस्य भक्तस्य भवति तथा कर्त्तव्यं तत**श्चोद्गमदोष** आधाकर्मादिदोषः, **ठविय** त्ति अथवा यदुद्धरितं तत्त्वयाऽद्यदिवसादारभ्य साध्वर्थं स्थापनीयम्, ततश्चैवं **स्थापना**दयो दोषा **भद्रक**विषया भवन्ति । अथासौ गृहपतिर्भद्रको न भवति ततः **चारी** इति ततश्चावेलायां भिक्षार्थं प्रविष्ट एवं प्रान्तो ब्रवीति-यदुतायं **चारी** भण्डिकः कश्चिदन्यथा कोऽयं भिक्षाकाल इति, नायं प्रत्यूषकालो नापि मध्याह्नकाल इति । **किलिस्सणय** त्ति तथाऽवेलायां भिक्षानिमित्तं प्रविष्टस्य **क्लेश** एव पर्यटनजनितः परं न तु भिक्षाप्राप्तिः, तम्हा दोसीणवेलाए चेव उयरेयव्वं ॥२१४॥

इदानीं मध्याह्नस्यारत एव यदि भिक्षामटति ततः को दोषः ? इत्यत आह –

**७१२ भिक्खस्स वि य अवेला ओसक्कहिसक्कणे भवे दोसा ।**
**भद्दगपंतातीया तम्हा पत्ते चरे काले ॥२१५॥ निभा०**

**भिक्खस्स** गाहा । **भिक्षाया अवेलायां** यदि प्रविशति ततो यदि भद्रकः **ओसक्क** त्ति याऽसौ रन्धनवेला [2]तां मध्याह्नादारत एव कारयति येन साधोरपि दीयते, एवं तावद्भिक्षावेलायामप्राप्तायां [3]हिण्डतो दोषाः, अथ पुनर्निवृत्तायां भिक्षावेलायामटति ततः **अहिसक्कणे** त्ति रन्धवेलां तामुत्सूर एव कारयति येन साधोरपि भक्तं भवति, एवमेते **दोषा भद्रके भवन्ति** । **पंतादीय** त्ति **प्रान्तकृता**स्तु दोषाः पूर्ववद् द्रष्टव्याः । भण्डिकोऽयमिति ब्रूते प्रान्तः, **तस्मात्प्राप्ते काल** एव **चरेद्**भिक्षां न न्यूनेऽधिके वा ॥२१५॥

काल त्ति गयं, इदानीं आवस्सए त्ति (नि.४१२)व्याख्यायते –

**७१३ [4]आवस्सग सोहेउं पविसे भिक्खस्सऽसोहणे दोसा ।**
**उग्गाहियवोसिरणे दवअसईए य उड्डाहो ॥२१६॥ निभा०**

**आवस्सग** गाहा । अवश्यं कर्त्तव्य**मावश्यकं** कायिकाव्युत्सर्गरूपं **शोधयित्वा** कृत्वेत्यर्थः । ततो **भिक्षार्थं प्रविशेत्, अशोधन** आवश्यकस्य **दोषा** भवन्ति,

---

१. दोष उक्तः । ख. २. तां रन्धवेलां मध्या० ख ३. हिण्डमानस्य दोषाः । ख ४. आवासग हे० ह०

कथम् ? **उग्गाहियवोसिरणे** त्ति यद्यसौ साधु**रुद्ग्राहितेन** गृहीतेनैव पात्रकेण **व्युत्सृजति** तत उड्डाहः, अथ तत्पात्रकमन्यस्य साधोः समर्प्य यदि व्युत्सृजति ततश्च **द्रवस्य** त्वसम्भवे**ऽसत्युड्डाह** उपघातो भवति ॥२१६॥

**७१४ अइदूरगमणफिडिओ अलहंतो एसणं पि पिल्लिज्जा ।**
**छड्डावण पंतावण धरणे मरणं च छक्काया ॥२१७॥ निभा०**

**अइदूर** गाहा । अथाऽसा **अतिदूरं गमनं** करोति स्थण्डिले ततः **फिडिओ** त्ति भ्रष्टः सन् भिक्षावेलायां भिक्षामप्राप्नुवन्नेषणामपि **प्रेरयेद्** विक्षिपेत [१]अतिक्रामेत, अथ तत्रैव क्वचिद् गृहासन्ने व्युत्सृजति ततः **छड्डावण** त्ति स गृहपतिस्तदशुचिं **छड्डावेति** त्याजयतीत्यर्थः । अथवा **पंतावणं** ताडनं कशादिना करोति, अथैतद्दोष-भया**द्धरणं** करोति पुरीषवेगस्य ततो **मरणं** भवेत्, व्युत्सृजतस्तु **षट्काय**विराधनेति, स्थण्डिलाभावात् ॥२१७॥

आवस्सए ति गयं, इदानीं संघाडए त्ति (नि.४१२)व्याख्यायते –

**७१५ एकाणियस्स दोसा इत्थी साणे तहेव पडिणीए ।**
**भिक्खविसोहि महव्वय तम्हा सबितिज्जए गमणं ॥४१३॥ नि०**

**एगाणिय** गाहा । यदि सङ्घाटकोपेतः सन् भिक्षाटनं न करोति तत **एकाकिन** एते **दोषाः स्त्री**कृतः **श्व**जनितः **प्रत्यनीक**जनितः, **भिक्षाविशुद्धि**रेकस्य न भवति तथा [२]**महाव्रतो**पघातश्च भवति **तस्मात्सद्वितीयेन गन्तव्यम्** ॥४१३॥

इयं च प्रतिद्वारगाथा, इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति –

**७१६ [३]संघाडगअग्गहणे दोसा एगस्स इत्थियाउ भवे ।**
**साणे भिक्खुवओगं संजमआएगयरदोसा ॥२१८॥ निभा०**

**संघाडग** गाहा । **सङ्घाटकस्य** सङ्घाटकसंयोगस्या**ऽग्रहणे**ऽकरणे **दोषा एकाकिनः स्त्रीभ्यो भवन्ति,** एकाकिनं दृष्ट्वा साधुं कदाचिद् गृह्णीयात् । इत्थि त्ति गयं, **साणे** त्ति व्याख्यायते–**शुन्यु**पयोगं ददाति ततः **संयम**विषयो दोषो भवति, अथ **भिक्षायामुपयोगं** ददाति तत **आत्मो**पघातदोषः, एवमेकाकिनः प्रविशतः शुनीकृत **एकतरदोषो** भवतीति, यथासङ्ख्यं चैतद् व्याख्येयम् ॥२१८॥

---

१. अतिक्रामयेत्, दा० २. तथा महाव्रतोपघातो भवति । दा० ३. संघाडएण गमणं सं०

साणे त्ति गयं, पडिणीए त्ति (नि.४१३)व्याख्यायते –

**७१७ दोण्णि उ दुद्धरिसतरा एगो त्ति हणे पदुट्ठपडिणीए ।**
**तिघरगहणे असोही अग्गहण पदोस परिहाणी ॥२१९॥ निभा०**

**दोण्णि** गाहा । **द्वौ** साधू भिक्षामटन्तौ प्रत्यनीकस्य **दुष्प्रधृष्यतरौ**[1] भवतः, दुःखेन परिभूयेते दुर्जयतरौ इत्यर्थः । **एगो त्ति हणे, एकाकिनं** पुनर्दृष्ट्वा **प्रहन्यात् प्रद्विष्टः** सन् **प्रत्यनीक**स्तस्मात् सङ्घाटकेन गन्तव्यम् । पडिणीए त्ति गयं, भिक्खविसोहि त्ति भण्णइ–यदा स एकाकी कस्मिंश्चित्पाटके भिक्षार्थं प्रविष्टः समकमेव च **गृहत्रयान्निर्ग**तां भिक्षां **गृह्णतो** भिक्षाया **अशुद्धि**र्भवत्याहृतदोषो भवति, यत ईर्यापथिकां शोधयितुं न शक्नोति, अथ तत्रैकां भिक्षां गृह्णाति यस्यामुपयोगो दत्तः, अत इतरस्य भिक्षाद्वय**स्याग्रहणे पओस** त्ति ते भिक्षादातारः **प्रद्वेषं** गच्छेयुः, यदुतास्माकमयं परिभवं करोति येन नास्मदीयं गृह्णाति, **परिहाणि** त्ति **अग्रहणे** च **परिहाणि**र्भवति भिक्षाया गच्छस्य वा तेनागृहीतेन । भिक्खविसोहि त्ति गयं ॥२१९॥

'महव्वय'त्ति (नि.४१३) व्याख्यायते –

**७१८ पाणिवहो**[2] **तिसु गहणे पउंजणे कोंटलयस्स बितियं**[3] **तु ।**
**तेणं उच्छुद्धाई परिग्गहोऽअणेसणग्गहणे ॥२२०॥ निभा०**

**पाणिवहो** गाहा । **त्रिषु** गृहेषु यौगपद्यागतां भिक्षां यदा **गृह्णाति** तदा **प्राणिवधः** कृतो भवति, ततश्च प्रथमव्रतभङ्गः, तथाऽसा एकाकी [4]**कौटिलं** ज्योतिषं निमित्तं वा **प्रयुङ्क्ते**, तत्र चानृतस्य नियमेनैव सम्भवो यतस्तत्रोपघातकरमवश्यमुच्यते, उपघातजनकं चानृतम्, तदुच्चारणे **द्वितीय**व्रतभङ्गः । **तेणं उच्छुद्धाई** अथ तत्र गृह एकाकी प्रविष्टः सन् **उच्छुद्धं** विक्षिप्तं हिरण्यादि पश्यति ततश्च तद् गृह्णाति, एकाकिनो मोहसंभवात्, **तेणं** ति ततः **स्तैन्य**दोषस्तृतीयव्रतभङ्ग इत्यर्थः । तथा कदाचिदेकाक्यनेषणीयमपि गृह्णीयात्, ततस्तस्मि**न्ननेषणीये गृहीते परिग्रह**कृतो दोषश्चतुर्थः, चतुर्थव्रतमत्र पृथग् नोक्तम्, मध्यमतीर्थकराणां परिग्रह एव तस्यान्तर्भावात्, किल नापरिगृहीता स्त्री भुज्यत इति ॥२२०॥

---

१. ०धृष्यौ क. २. पाणवहो ह० हे० क. ख. ३. बितियं ति ह० हे० क. ख. ४. कोंटलं क. ख.

पश्चिमस्य तु तीर्थकृतः पृथक् चतुर्थं व्रतम्, तन्मतेन चतुर्थव्रतभङ्गं दर्शयन्नाह –

**७१९ विहवा पउत्थवइया पयारमलभंति दट्ठुमेगागी ।**
**दारपिहणे य गहणं इच्छमणिच्छे य दोसा उ ॥२२१॥ निभा०**

**विहवा** गाहा । **विधवा** स्त्री, धवो मनुष्यः स विनष्टो यस्या इति समासः, तथा **प्रोषितभर्तृका**, तथा या **प्रचारं न लभते** निरुद्धा ध्रियते, सैवंविधा त्रिप्रकारा स्त्री, **एकाकिनं** प्रविष्टं साधुं गृहे **दृष्ट्वा द्वारं** ढक्कयित्वा **गृह्णीयात्**, तत्र यद्यसौ तां स्त्रियमि**च्छति** ततः संयमभ्रंशः, अथ **नेच्छति** तत उड्डाहः, सैव स्त्री लोकस्य कथयति - यदुतायं मामभिभवतीति, ततश्चोड्डाहः ॥२२१॥

प्रतिद्वारगाथा व्याख्याता, कैः पुनः कारणैरसौ एकाकी भवति ? तत्राह–

**७२० गारविए काहीए माइल्ले अलस लुद्ध निद्धम्मे ।**
**दुल्लभ अत्ताहिट्ठिय अमणुन्ने [1]वा असंघाडो ॥४१४॥ नि०**

**गारविए** गाहा । **गारविए** त्ति **गर्वेण** लब्धिसंपन्नोऽहमिति कृत्वा [2]एकाकी भवति, तथा **काहीए** त्ति भिक्षार्थं प्रविष्टो धर्मकथां महतीं करोति, महतीं वेलां तिष्ठति, ततस्तेन [3]सार्द्धं न कश्चित्प्रयाति ततश्चैकाकी भवति, तथा **मायावाने**काकी भवति, स हि शोभनं भुक्त्वाऽशोभनमानयति, स च द्वितीयं नेच्छतीत्यत एकाकी भवति, **अलसो**ऽन्येन सह प्रभूतं पर्यटितुमसमर्थस्तत एकाक्येवानीय भक्षयति, गच्छवैयावृत्त्येऽलसः स एकाकी भवति, **लुद्ध** त्ति **लुब्धो** विकृतीः प्रार्थयति, ताश्च द्वितीये सति न शक्यते प्रार्थयितुमत एकाकी भवति । **निर्द्धर्मो**ऽनेषणीयं गृह्णाति ततश्च द्वितीयं नेच्छति, **दुल्लभ** त्ति **दुर्लभे** दुर्भिक्ष एकाकी भवति, तत्र हि [4]एकैक एव गच्छति, येन पृथक् पृथग् भिक्षा लभ्यते, तथा **अत्ताहिट्ठिय** त्ति **आत्माधिष्ठितो** यदाऽऽत्मना लभते तदाहारयति, अत्तलद्धिउ त्ति जं भणिअं । अथवा **अमनोज्ञो** न कस्यचित्प्रतिभाति रटनशीलत्वात्ततश्चैकाकी हिण्डते, एव**मसङ्घाटको** भवतीति ॥४१४॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयति, तत्राद्यावयवप्रतिपादनायाह –

**७२१ संघाडगरायणिओ अलद्धि ओमो य लद्धिसंपन्नो ।**
**जेट्ठज्ज पडिग्गहगं मुय गारवकारणा एगो ॥२२२॥ निभा०**

---

१. य असंघाडो ह० हे० २. एको क ३. सह क. ख. ४. एक एव दा.

**संघाडग** गाहा । कस्यचित्**सङ्घाटकस्य** योऽसौ **रत्नाधिकः** पर्यायज्येष्ठः स **अलद्धि** त्ति **अलब्धिको** लब्धिरहितः, **ओमो य** त्ति पर्यायलघुर्द्वितीयः स च **लब्धिसंपन्नः**, ततो योऽसौ पर्यायेण लघुर्लब्धिमान् स भिक्षामटन्नग्रतो गच्छति रत्नाधिकस्तस्य पृष्ठत एव व्रजति । पुनश्च मण्डल्यां भोजनकाल आचार्या एवं भणन्ति, यदुत **ज्येष्ठार्य**स्याग्रतः **पतद्ग्रहं मुञ्च**, पुनरसौ ओमराइणिओ चिन्तयति, यदुतास्यां वेलायामयं ज्येष्ठार्यः सञ्जातो न तु भिक्षावेलायां ज्येष्ठार्यः, अहं भक्तं लभे यावता ज्येष्ठार्यस्य प्रथमं समर्प्यते । ततश्चानेन **गर्वकारणेनैकाकी** भवति, एकाक्येवाहं भि[1]क्षां यामीति । गारविए त्ति गतम् ॥२२२॥

काहीए त्ति (नि.४१४) व्याख्यायते –

**७२२ काहीओ कहेइ कहं बिइओ वारेइ अहव गुरुकहणं ।**
**एवं सो एगागी माइल्लो भद्दगं भुंजे ॥२२३॥ निभा०**

**काहीओ** गाहा । भिक्षार्थं प्रविष्टः **कथको** धर्म**कथां** कुर्वन्नास्ते, ततश्च तस्य **द्वितीयो वारयति**, मा कृथा धर्मकथाम्, ग्लानादयः सीदन्तीति, **अथवा**ऽऽगत्य **गुरोः कथयति** यदुताऽयं धर्मकथां कुर्वंस्तिष्ठति, गुरुरपि तं निवारयति, यदि वारितोऽपि कथयति तदा [2]**स एकाक्येव** सञ्जायते । काहिए त्ति गयं । **मायावी भद्रकं भुङ्क्ते** अत एव एकाकी भ[3]वति । माइल्ले त्ति गयं ॥२२३॥

अलस त्ति (नि.४१४)व्याख्यायते –

**७२३ अलसो चिरं न हिंडइ लुद्धो ओहासए विगईओ ।**
**निद्धम्मोऽणेसणाई दुल्लहभिक्खे व एगागी ॥२२४॥ निभा०**

**अलस** गाहा । **अलसश्चिरं न हि[4]ण्डति,** कतिपयां भिक्षां गृहीत्वाऽऽगच्छति, अलसे त्ति गयं । **लुद्धो** त्ति भण्णति, **लुब्धो विकृतिः** प्रार्थयते, ततश्चैकाक्येव याति, लुद्धो त्ति गयं । **णिद्धम्म** त्ति भ[5]ण्यते, **निर्धर्मोऽनेषणादि** करोति कृत्वा चानेषणां शीघ्रमागच्छति, णिद्धम्मे त्ति गयं । **दुल्लभ** त्ति भण्यते, दुर्भिक्षे **दुर्लभायां भिक्षायां** सङ्घाटकं नेच्छति **एकाक्येव** भिक्षयति, ततश्चैकाकी भवति, दुल्लभ त्ति गयं ॥२२४॥

अत्ताहिट्ठिय त्ति (नि.४१४) व्याख्यायते –

---

१. भक्षयामीति । क – भिक्षयामीति । ख २. स एवं एका० क. ख. ३. गच्छति दा० ४. हिण्डते । दा० हिण्डयति । ख. ५. व्याख्यायते, क.

**७२४ अत्ताहिट्ठियजोगी असंखडीओ वऽणिट्ठ सव्वेसिं ।**
**एवं सो एगागी हिंडइ उवएसऽणुवएसा ॥२२५॥ निभा०**

**अत्ताहिट्ठिय** गाहा । आत्मनाधिष्ठितेन लब्धेन भक्तादिना युज्यत इति **आत्माधिष्ठितयोगी** अत्तलद्धिओ इत्यर्थः । स एकाकी भवति, अत्ताहिट्ठिए[१२८] त्ति गयं । अमणुन्ने त्ति व्याख्यायते–**असंखडिओ वऽणिट्ठ सव्वेसिं** ति कलहकारकः **सर्वेषामनिष्टः** सन् ततश्चैकाकी क्रियते, **एवमेभिः** कारणै**रेकाक्य**सौ **हिण्डते, अनुपदेशेन** वा, उपदेशेन गुरुणाऽनुज्ञातः, **अनुपदेशेन** गुरुणाऽनुक्तः । व्याख्यातं सङ्घाटकद्वारम् ॥२२५॥

इदानीमुपकरणद्वारमुच्यते (नि.४१२) –

**७२५ सव्वोवगरणमादाय असहू आयारभंडगेण समं ।**
**नयणं तु मत्तगस्सा न य परिभोगो विणा कज्जे ॥२२६॥ निभा०**

**सव्वोवगरण** गाहा । तत्रोत्सर्गतः **सर्वमुपकरणमादाय** भिक्षागवेषणां करोति, अथासौ सर्वेण गृहीतेन भिक्षामटितुमसमर्थस्तत **आचारभण्डकेन समम्,** आचारभण्डकं पात्रं पटलानि रजोहरणं दण्डकः कल्पद्वयम्-और्णिकः क्षौमिकश्च मात्रकं च, एतद् गृहीत्वा याति । उवगरणे त्ति गयं । इदानीं मात्रकग्रहणप्रतिपादनायाह-**नयणं** गाहर्द्धं, **नयनं मात्रकस्य** करोति भिक्षामटन्, **न च** तस्य मात्रकस्य **कार्येण विना** संसक्तादिना **परिभोगः** क्रियते । मत्तए त्ति गयं ॥२२६॥

काउस्सग्ग त्ति (नि.४१२) व्याख्यायते –

**७२६ आपुच्छण त्ति पढमा बिइया पडिपुच्छणा य कायव्वा ।**
**आवस्सिया य तइया जस्स य जोगो चउत्थो उ ॥२२७॥ निभा०**

**आपुच्छण** गाहा । "[A]पढमं **आपुच्छइ**, यदुत-संदिसह उवओगं करेमि, एसा **पढमा**, उवओगकरावणिअं काउस्सग्गं, अट्ठहिं उस्सासेहिं नमोक्कारं चिंतेइ, ततो नमोक्कारेण पारेऊण भणति-संदिसह, आयरिओ भणइ-लाभो, साहू भणइ-कह त्ति,

---

१२८. अत्ताहिट्ठिअ-आत्मार्थिक-आत्मलब्धिकः । धर्म. ३ अधि.

A प्रथममापृच्छति, यदुत- संदिशत उपयोगं करोमि, एषा प्रथमा, उपयोगकरणार्थं कायोत्सर्गम्, अष्टभिरुच्छ्वासैर्नमस्कारं चिन्तयति, ततो नमस्कारेण पारयित्वा भणति- संदिशत, आचार्यो भणति- लाभः, साधुर्भणति- कथम् ?

एसा **पडिपुच्छा**, ततो आयरिओ भणइ—तहत्ति, तओ **आवस्सिया य जस्स य जोगो** त्ति जं जं संजमस्स उवगारे वट्टइ तं तं गिण्हिस्सामि । जस्स य जोगो त्ति व्याख्यातम्''॥२२७॥

इदानीमेतान्येव प्रमाणादीनि द्वाराणि सप्रतिपक्षाण्यभिधीयन्ते, तत्र यदुक्तं प्रमाणद्वारे-[१]वाराद्वयं प्रवेष्टव्यम्, तस्य प्रतिपक्ष उच्यते, वारात्रयमपि प्रविशति, किमर्थमत आह –

**७२७ आयरियादीणट्ठा ओमगिलाणट्ठया य बहुसो वि ।**
**गेलन्नखमगपाहुण अतिप्पएऽतिच्छिए [२]या वि ॥४१५॥ नि०**

**आयरिया** गाहा । **आचार्यादीनामर्थाय बहुशोऽपि** वाराः प्रविशति, **ओमो** बालस्तदर्थं **ग्लानार्थं च** बहुशः प्रविशति । प्रमाणयतनोक्ता । इदानीं यदुक्तं कालद्वये प्रवेष्टव्यं तत्प्रतिपक्ष उच्यते, **ग्लानक्षपकप्राघूर्णार्थम**तिप्रत्यूषस्यपि प्रविशति । तथा **अतिच्छिए या वि** त्ति अतिक्रान्तायामपि भिक्षावेलायां प्रविशति बहुशः । दारं ॥४१५॥

**७२८ अणुकंपापडिसेहो कयाइ हिंडेज्ज वा न वा हिंडेज्ज ।**
**[३]अणभोग गिलाणट्ठा [४]आवस्सगऽसोहइत्ताणं ॥४१६॥ नि०**

**अणुकंपा** गाहा । स च प्रत्युषस्येव प्रविष्टः कस्मिंश्चिद् गृहे ग्लानार्थम्, लब्धं च तत्तेन तत्र, ततश्च गृहपतिः पुनर्भणति **अनुकम्पया,** यदुत पुनरपि त्वया ग्लानार्थमस्यां वेलायां गन्तव्यम्, ततश्चासौ साधुः **प्रतिषेधं** करोति, कथम् ? तं गृहस्थमेवं भणति, यदुत प्रत्यूषसि श्वः **कदाचिदहं हिंडेज्जा कदाचिन्न हिंडेज्ज,** [A]एवं भणंतेण आगंतुका उग्गमदोसा परिहरिया होंति । न च प्रतिषेधः कृतो भवति । उक्ता कालयतना, इदानीमावश्यकयतनोच्यते- कदाचिदसौ साधु**रनाभोगेनावश्यकं** कायिकाव्युत्सर्गलक्षणमकृत्वा **ग्लानार्थं** त्वरितं गतः ॥४१६॥

ततः –

---

इति, एषा प्रतिपृच्छा, तत आचार्यो भणति- तथेति । तत आवश्यिका च यस्य च योग इति- यद् यत् संयमस्योपकारे वर्तते तत्तद् ग्रहीष्यामि । यस्य च योग इति व्याख्यातम् ।

A एवं भणता आगन्तुका उद्गमदोषाः परिहृता भवन्ति ।

१. वारद्वयं क २. वावि ह० हे० ३. अणभोगि द० ४. आवासग हे० ह०

**७२९ आसन्नाउ नियत्तइ काले पहुप्पंते दूरपत्तो वि ।**
**अपहुप्पंते [१]तओ च्चिय एगो धरे वोसिरे एगो ॥४१७॥ नि०**

**आसन्नातो** गाहा । तत **आसन्नात्**सञ्ज्ञातकायिकाद्याशङ्को **निवर्त्तते, कालो पहुच्चति** यदि ततो **दूरगतोऽपि** निवर्त्तते, अथ निवर्त्तमानस्य कालो **न पहुच्चति,** ततः **तओ च्चिअ तत एव** यतो भिक्षार्थं [२]गतस्तत एव व्युत्सृजति, कथम् ? **एकः** साधुर्भाजनं **धारयति एकस्तु व्युत्सृजति** कायिकादि ॥४१७॥

**७३० भावासन्ने समणुन्न अन्न ओसन्न सड्ढविज्जघरे ।**
**सल्लपरूवणविज्जे इत्थेव परोहडे वावि ॥४१८॥ नि०**

**भावासन्ने** गाहा । अथवा **भावासन्नो**ऽसहिष्णुरत्यन्तं भवति ततः **समनोज्ञा** यदि तस्मिन् क्षेत्र आसन्ना अन्यस्मिन् प्रतिश्रये ततस्तत्र प्रविश्य व्युत्सृजति । **अण्ण** त्ति अथवा [३]असमनोज्ञा अत्रासन्नास्ततस्तद्वसतौ प्रविश्य व्युत्सृजति, तदभावे**ऽवसन्नानां** वसतौ व्युत्सृजति तदभावे **श्राद्धगृहे,** तदभावे **वैद्यगृहे**[४] व्युत्सृजति, तत्र च वैद्यगृहे **प्ररूपयति** यदुत-'**तिण्णि सल्ला महाराय**' (प्र.९०) इत्येवमादि, ततश्चासौ वैद्यः स्मारितग्रन्थ एवं भणति-**इत्थेव** त्ति **अत्र** पश्चाद्गृहके व्युत्सृज, [१२९]**परोहडे वावि** गृहस्य पश्चादङ्गणे व्युत्सृजेति ॥४१८॥

**७३१ एतेसिं असईए रायपहे दोघराण वा मज्झे ।**
**हत्थं हत्थं मोत्तुं मज्झे सो नरवइस्स भवे ॥४१९॥ नि०**

**एतेसिं** गाहा । **एतेषां** पूर्वोद्दिष्टानाम**भावे** नरपति**पथे राजमार्गे** व्युत्सृजेद् यतोऽसौ सामान्यो लोकस्य, तदभावे **द्वयोर्गृहयोर्मध्ये** व्युत्सृजति, तयोश्च **मध्ये** व्युत्सृजन् **हस्त**मात्रं **हस्त**मा[५]त्रमोलिकाया उभयोर्गृहयो**र्मुक्त्वा** व्युत्सृजति, यतोऽसौ मध्यप्रदेशः **स** च **नरपतेः** परिग्रहस्ततश्च कलहादिर्न **भवति** ॥४१९॥

**७३२ उग्गहकाइयवज्जं [६]छड्डणि ववहारो लब्भए तत्थ ।**
**गारविए पन्नवणा [७]तव चेव अणुग्गहो एस ॥४२०॥ नि०**

**उग्गह** गाहा । तदभावे गृहस्थसत्के**ऽवग्रहे** परिगृहीते तस्मिन्नपि व्युत्सृजति,

---

१२९. परोहड "घरवाडयं परोहडं । (पाई. ना. २६४ गाथा)

१. तत्तो दा० २. गत एव क. ३. अमनोज्ञास्तत्रासन्ना० दा० ४. गृहे प्ररूपयति । क, ख. ५. ०मात्रमोलिकापातं मुक्त्वा । ख, मात्रमालिकावारं मुक्त्वा० । क ६. छड्डुणं आ० ७. तुह ह०

कथम् ? **कायिकावर्जं** पुरीषमुत्सृजन्नपि कायिकीं न व्युत्सृजति । किं कारणम्? "[A]जओ **छड्डणि ववहारो लब्भइ,** जदि गिहत्थो भणिज्ज- छड्डेहि, तो न छड्डेइ, ववहारं राउले करेइ । जहा **चाणक्के** वि भणिअं-**जइ काइअं न वोसिरइ ततो अदोसो** ।" अयमित्थंभूत**स्तत्र व्यवहारो लभ्यते,** अतः कायिकां न व्युत्सृजति । उक्ताऽऽवश्यकयतना, इदानीं सङ्घाटकयतनोच्यते, तत्र चेयं प्रतिद्वारगाथोपन्यस्ताऽऽसीत् (नि.४१४) गारविए काहीत्येवमादिका, तस्या यतनोच्यते, तत्र **गारविए** त्ति अस्य पदस्य यतनामाह-गारविए गाहापच्छद्धं **गारविए पन्नवणा** योऽसौ ओमराइणिको लब्ध्या **गर्वितः** सन्नेकाकी भवति तमाचार्यो धर्मकथया **प्रज्ञापयति,** यदुत **तवैवायमनुग्रहो** यत्त्वदीयलब्ध्युपष्टम्भेन स्वाध्यायादि कुर्वन्तीति । गारवियजयणा गया, एवमिदमुपलक्षणं वर्त्तते, अन्येषामपि कथिक-[1]मायावि-अलस-लुब्ध-निर्द्धर्माणां प्रज्ञापना कर्त्तव्या ॥४२०॥

इदानीं दुर्लभपदव्याख्यानं (नि.४१४) कुर्वन्निदमाह –

**७३३ जइ दोण्ह एग भिक्खा न य वेल पहुप्पए तओ एगो ।**
**सव्वे वि अत्तलाभी पडिसेहमणुन्न पियधम्मे ॥४२१॥ नि०**

**जति दोण्ह** गाहा । **यदि** तत्र क्षेत्रे पर्यटता**मेकैव भिक्षा द्वयोर**पि लभ्यते हिण्डतो**र्न च कालः पर्याप्यते** न य **पहुप्पइ तदा एकाकिन** एव हिण्डन्ते । दुर्लभयतनोक्ता, इदानीं अत्ताहिट्ठियजतनोच्यते-यदि ते **सर्व** एव खग्गूडा **अत्तलद्धिया** होइउमिच्छंति तदाऽऽचार्यः **प्रतिषेधं** करोति, अथ कश्चि**त्प्रियधर्मा** आत्मलब्धिको भवति तत आचार्यो**ऽनुज्ञां** करोति, ततश्चैवमेकाकी भवति ॥४२१॥

अत्ताहिट्ठितजयणा भणिया,इदानीं अमणुण्णयतनां (नि.४१४) प्रतिपादयन्नाह –

**७३४ अमणुन्न अन्नसंजोयणा उ सव्वे वि णेच्छण विवेगो ।**
**बहुगुणतदेकदोसं एसणबलियं न उ विगिंचे ॥४२२॥ नि०**

**अमणुन्न** गाहा । यद्यसाव**मनोज्ञो** रटनशीलस्ततो**ऽन्यस्य संयोज्यते** तेन सह हिण्डते । अथ **सर्व** एव **नेच्छन्ति** ततस्तस्यामनोज्ञस्य **विवेकः** परित्यागः क्रियते,

---

A. यतो छर्दने व्यवहारो लभ्यते, यदि गृहस्थो भणेत्- छर्दय, ततो न छर्दयति, व्यवहारं राजकुले करोति। यथा चाणक्येऽपि भणितम्- यदि कायिकां न व्युत्सृजति ततोऽदोषः ।

१. मायावदलस । क.

अथासौ **बहुगुणः** सर्वगुणसंपन्नः किन्तु स **एवैको दोषो** रटनशील[1] इति, **एषणायां** च **बलवां**स्ततो नासौ परित्यज्यते । भणिया अमणुण्णजयणा, इदानीं यदुक्तम् - एगाणियस्स दोसा (नि.४१३) इत्येवमादि तेषां यतनोच्यते, आह किं पुनः कारणमुत्क्रमेण स्त्र्यादीनां पदानां यतनोच्यते ? उच्यते, गर्वितकथिकादयः प्रज्ञापिताः सन्तः कारणवशादेकाकिनोऽपि भिक्षामटन्ति, ततश्चैकाकिनामटतां यद्यपि स्त्रीकृता दोषा भवन्ति तथापि तत्रेयं यतना ॥४२२॥

इदानीं या गाथोपन्यस्ताऽऽसीद् यदुत-एगाणियस्स दोसा [2]इत्यादिका, तत्र यतनां प्रतिपादनायाह –

**७३५ इत्थीगहणे धम्मं कहेइ वयठवण गुरुसमीवंमि ।**
**इह चेवोवर रज्जू भएण मोहोवसम तीसे ॥४२३॥ नि०**

**इत्थीगहणे** गाहा । एवं तस्यैकाकिनो गतस्य सतः **स्त्रीग्रहणे** सति स्त्रिया गृहीतः सन् **धर्मकथां करोति** यदुत- "**नरकगमनाय मैथुनसेवा**" इत्येवमादिकाम्, अथ कथितेऽपि धर्मे न मुञ्चति ततो भणति-यदुत **व्रतानि गुरुसमीपे स्थापयित्वा**-ऽऽगच्छामीति, एतदभिधाय नश्यति, अथ तथापि न लभते गन्तुं ततो भणति-**इहैवापवरके** व्रतमोक्षणं करोमीति, तत्र च प्रविश्य, उल्लम्बनार्थं **रज्जुं** गृह्णाति, ततस्तेन भयेन कदाचिन् **मोहोपशमो**[3] भवति, मोहनीयरसो भयेन ह्रियते, अथैवमपि न मुच्यते ततो म्रियत एवेति । उक्ता स्त्रीयतना ॥४२३॥

इदानीं श्वादियतनोच्यते –

**७३६ साणा गोणाइ घरे परिहरऽणाभोगकुड्डकडनीसा ।**
**वारेइ य दंडएणं वारावे वा अगारेहिं ॥४२४॥ नि०**

**साणा** गाहा । **श्वानो गवादयश्च** येषु **गृहेषु** तानि **परिहरति**, अथा**नाभोगेन** कथमपि प्रविष्टस्ततः **कुड्यकटनिश्रया** तिष्ठति, कुड्यं कटं वा पृष्ठे करोति, अग्रतो **दण्डकेन वारयति, अगारैर्वा वारापयति** । उक्ता [4]श्वादियतना ॥४२४॥

इदानीं पडिणीययतनोच्यते –

**७३७ पडिणीयगेहवज्जण अणभोगपविट्ठ बोल निक्खमणं[5] ।**
**मज्झे तिण्ह घराणं उवओग करित्तु गिण्हेज्जा ॥४२५॥ नि०**

---
१. ०शीलता दा. २. इत्येवमादिका दा० ३. मोहापगमो क. ख ४. श्वयतना दा० ५. निग्गमणं ता.

**पडणीय** गाहा । एकाकिनः **प्रत्यनीकगृहे** न प्रवेष्टव्यम्, अथ**नाभोगेन प्रविष्टः** प्रत्यनीकैश्च ग्रहीतुमारब्धस्ततो **बोलं** करोत्युच्छब्दयति येन लोको मिलति, तत आकुले **निष्क्रामति** । उक्ता प्रत्यनीकयतना, अधुना भिक्षाविशोधियतनोच्यते-**मध्ये** स्थित**स्त्रयाणामपि गृहाणामुपयोगं** दत्त्वा पङ्क्त्या स्थितानां भिक्षां **गृह्णाति** ॥४२५॥

भिक्षाविशोधियतनोक्ता, अधुना पञ्चमहाव्रतयतनोच्यते, तत्र भिक्षायामुपयोगं ददता प्राणातिपातसंरक्षणं कृतमेव, इदानीं द्वितीयमहाव्रतयतनां प्रतिपादनायाह –

**७३८ विंटल पुट्ठो न याणे आइण्णादी वि वज्जए ठाणं ।**
**सुद्धं गवेस उंछं पंचऽइयारे परिहरंतो ॥४२६॥ नि०**

**विंटल** गाहा । **वेण्टलं** निमित्तादि **पृष्टः** सन्नेवं भणति-**न जान** इति एवं भणता द्वितीयमहाव्रतयतना कृता भवति। इदानीं तृतीयमहाव्रतयतनां दर्शयन्नाह-**आइण्णादी वि वज्जए ठाणं** । तत्र भिक्षार्थं प्रविष्ट **आकीर्णादिस्थानं परिवर्जयेत्,** यत्र हिरण्यादि विक्षिप्तमास्ते तदाकीर्णस्थानम्, तच्च साधुना वर्जनीयम्, एवं तृतीयमहाव्रतयतना कृता भवति । इदानीं पञ्चममहाव्रतयतनां प्रतिपादयन्नाह-**शुद्धमु**द्गमादिदोषरहितं **गवेषयत्य**न्वेषयत्यु**ञ्छं** भक्तं [१]**पञ्चमव्रतातीचारान्** रक्षन् ॥४२६॥

उक्ता पञ्चममहाव्रतयतना, चतुर्थमहाव्रतयतना तूक्तैव । 'इत्थिग्गहणे धम्मं' (नि.४२३) इत्येवमादिना, उक्ता सङ्घाटकयतना, इदानीमुपकरणयतनाप्रतिपादयन्नाह—

**७३९ जहन्नेण चोलपट्टं वीसरणालू गहाय गच्छिज्जा ।**
**उस्सग्ग काउ [२]गच्छे मत्तयऽगहणे इमे दोसा ॥४२७॥ नि०**

**जहन्नेण** गाहा । उत्सर्गतस्तावद्भिक्षार्थं गच्छता सर्वमुपकरणं गृहीत्वा गन्तव्यम्, यस्तु **विस्मरणालुः** स **जघन्येन चोलपट्टकमादाय गच्छति,** उपलक्षणं चात्र चोलपट्टकः, अन्यथा पात्रकं पटलानि रजोहरणं दण्डकं कल्पद्वयं चैतद् गृहीत्वा गच्छति । उक्तोपकरणयतना, इदानीं मात्रकयतनां प्रतिपादयन्नाह—मात्रकं गृहीत्वा गन्तव्यम्, गृहीत्वा **चोत्सर्गमित्यु**पयोगं **कृत्वा** व्रजति, अथ मात्रकं न गृह्णाति गच्छंस्ततश्च **मात्रकाग्रहणे एते** च वक्ष्यमा[३]णलक्षणा **दोषाः**, अत्र च यदुत्सर्गग्रहणं कृतं तद्विधिप्रदर्शनार्थं न तु पुनः स्वस्थानमिति ॥४२७॥

---

१. पञ्चाप्यती० दा० २. गमणं दा. ३. ०माण का दोषाः ?, अत्र क. ख

इदानीं मात्रकाग्रहणे दोषान् प्रदर्शयन्नाह –

**७४० आयरिए य गिलाणे पाहुणए दुल्लहे सहसलांभे[1] ।**
**संसत्तभत्तपाणे मत्तगगहणं अणुण्णायं ॥४२८॥ नि०**

**आयरिए** गाहा । **आचार्यार्थं ग्लानार्थं प्राघूर्णकार्थं** वा **दुर्लभं** वा किञ्चिल्लभ्यते तदर्थम्, **सहसा**ऽकस्मात्किञ्चित्कदाचिल्लभ्यते तदर्थम्, तथा **संसक्तभक्तपान**ग्रहणार्थं **मात्रकग्रहणमनुज्ञातम्** ॥४२८॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**७४१ पाउग्गायरियादी कहिं गिण्हउ मत्तए अगहियंमि ।**
**जा तेंसि[2] विराहणया दवभाणे तं[3] दवेण विणा ॥२२८॥ निभा०**

**पाओग्गायरियादी** गाहा । **प्रायोग्यमाचार्यादीनां क्व गृह्णातु मात्रकेऽगृहीते** सति ? तदग्रहणाच्च **या तेषामाचार्यादीनां विराधना** सा तेनाङ्गीकृता भवति, अथैवं मन्यसे, **द्रवभाजने** गृह्णातु ततश्चैवं द्रवेऽगृहीते **तेन द्रवेण विना** या विराधना सा तदवस्थैव, आदिग्रहणाद् ग्लानप्राघूर्णका अपि व्याख्याता एव ॥२२८॥

**७४२ दुल्लभ दव्वं व सिया घयाइ गिण्हे उवग्गहंकरं तु ।**
**पउरऽन्नपाणलंभे असंथरे कत्थइ सिया उ ॥२२९॥ निभा०**

**दुल्लभ** गाहा । **दुर्लभं वा द्रव्यं घृतादि स्याद्** भवेत् ततश्च **घृतादि गृह्यते** यत **उपग्रहं करोति**-अवष्टम्भं करोति तत्, अथ सहसाऽऽकस्मिकः **प्रचुरान्नपान-लम्भः** स्यात्ततो**ऽसंस्तरतां** प्रव्रजितानामात्मानं कृच्छ्रेण यापयतां **कुत्रचित् स्याद्** ग्रहणमिति ॥२२९॥

तथा च –

**७४३ संसत्तभत्तपाणे मंत्ते[4] सोहेउ[5] पंक्खिवे[6] उवरिं ।**
**संसत्तगं च णाउं परिट्ठवे सेसरक्खट्ठा ॥२३०॥ निभा०**

**संसत्त** गाहा । **संसक्तभक्तपान**ग्रहणे सति **मात्रके शोधयित्वा** प्रत्युपेक्ष्य सक्तुकाञ्जिकादि पात्रकस्यो**परि प्रक्षिपेत्** । अथ तत्पानकादि गृहीतं मात्रके किन्त्वशुद्धं **संसक्तं** जातम्, ततश्चैवं **ज्ञात्वा** विधिना तस्मिन्नेव क्षणे **परिष्ठापयति** किमर्थम् ?

---

१. ०दाणे ह० हे० २. एसि दा. ३. जं दा. ४. मत्तग दा. ५. पेहेउ ता. ६. पक्खिवेण ह. हे.

**शेषभक्तरक्षणार्थम्,** मा भूत्तद्गन्धेन शेषस्यापि संसक्तिः स्यात्, तस्मान्मात्रकं ग्रहीतव्यम् ॥२३०॥

एभिश्च कारणैर्न गृह्णाति –

**७४४ गेलन्नकज्जतुरिओ अणभोगेणं व[१] लित्त अग्गहणं ।**
**अणभोगगिलाणट्ठा उस्सग्गादीणि न वि कुज्जा ॥४२९॥ नि०**

**गेलन्न** गाहा । **ग्लानकार्येण त्वरितो** गतस्ततश्चैवं न गृह्णाति, **अनाभोगेन वा** निर्गतो यदि, **लिप्तं** वा लेपेन तन्मात्रकं यदि, ततश्चैव**मग्रहणं** मात्रकस्य, संभवतीति उक्ता मात्रकयतना । इदानीमुत्सर्गयतना प्रतिपादनायाह-अणभोग पच्छर्द्धं, **अणाभोगेण गिलाणट्ठा अनाभोगेनोत्सर्गमु**पयोगं **न कुर्यात्,** ग्लानार्थं वा त्वरित [२]उत्सर्गादि **न कुर्यात्, आदि**ग्रहणादावश्यकं च न कुर्यादिति उत्सर्गयतनोक्ता ॥४२९॥

इदानीं 'जस्स य जोगो' (निभा.२२७) अस्य विधिरुच्यते –

**७४५ जस्स य जोगमकाऊण निग्गओ न लहई तु सच्चित्तं ।**
**नवि वत्थपायमाई ते[३]ण्णं गहणे कुणसु तम्हा ॥४३०॥ नि०**

**जस्स य** गाहा । **जस्स य जोगो** इत्येव**मकृत्वा**ऽभणित्वा **निर्गतः** सन्नेवं **न लभते** न भवत्या[१३०]भाव्यं **सच्चित्तं** प्रव्रज्यार्थमुपस्थितं गृहस्थम्, **नाप्य**चित्तं **वस्त्रपात्रकादि,** अथ यस्य योग इत्येवमकृत्वा **गृह्णाति** ततः **स्तैन्यं** भवति, **तस्मात्कुरु** यस्य योग इत्येवम् ॥४३०॥

**७४६ आपुच्छि अणुण्णाओ सग्गामे हिंड अहव परगामे ।**
**सग्गामे सइ काले पत्ते परगामे वोच्छामि ॥४३१॥ नि०**

**आपुच्छि** गाहा । "[A]**आपुच्छणा** णाम संदिसह उवओगं करेमि'त्ति, बितिया पडिपुच्छणा-किह गिण्हामि त्ति, गुरू भणइ-तहत्ति," यथा पूर्वसाधवो गृह्णन्तीत्यर्थः । एवमसौ अनेन क्रमेण [४]प्रच्छने कृते सत्य**नुज्ञात** आवश्यकीं कृत्वा यस्य च योग इत्येवमभिधाय निर्गत्य **स्वग्रामे हिण्डते, अथवा परग्रामे** [५]समीपस्थे ग्रामे तत्र

---

१३०. आभाव्यम्-क्षेत्रतद्गतशिष्यभक्तपानवस्त्रपात्रादिकमागमप्रसिद्धम् । (पञ्चा.)

A. आप्रच्छना नाम सन्दिशत उपयोगं करोमीति । द्वितीया प्रतिप्रच्छनाकथं गृह्णामीति । गुरुर्भणति-तथेति ।

१. च. दा. २. उत्सर्गं न दा. ३. तिण्णं दा. ४. आप्रच्छने क. ५. समीपग्रामे दा.

**स्वग्रामे** यदि हिण्डते ततः **सति काले प्राप्तायां** भिक्षावेलायामित्यर्थः । इदानीं **परग्रामे वक्ष्यामि** हिण्डतो विधिम् ॥४३१॥

**७४७ पुरतो जुगमायाए गंतूणं अन्नगामि बाहिठिओ ।**
**तरुणे मज्झिमथेरे नव पुच्छाओ जहा हेट्ठा ॥४३२॥ नि०**

**पुरतो** गाहा । **पुरतो युगमात्रं** निरीक्षमाणो **गत्वान्यग्रामं** संप्राप्य **बहिर्व्यवस्थितः** पृच्छति-किं विद्यते भिक्षावेलाऽत्र ग्राम उत न ? कान् पृच्छतीत्यत आह-**तरुणं मध्यमं स्थविरम्,** एकैकस्य त्रैविध्यान्नव **पृच्छाः** कर्त्तव्याः, **यथाऽधस्तात्** [नि. २२] प्रतिपादितास्तथैवात्रापि न्याय्याः, अत्र च तरुणं स्त्रीपुंनपुंसकं मध्यमं स्त्रीपुंनपुंसकं स्थविरं स्त्रीपुंनपुंसकमिति ॥ ४३२॥

एवं पृष्ट्वा यदि तत्र भिक्षावेला तत्क्षण एव, ततः को विधिरित्यत आह –

**७४८ पायपमज्जण पडिलेहणा य भाणदुग देसकालंमि ।**
**अप्पत्तेऽवि य पाए पमज्ज पत्ते य पायदुगं ॥४३३॥ नि०**

**पायपमज्जण** गाहा । तत्र हि ग्रामासन्न उपविश्य **पादप्रमार्जनं** करोति, किं कारणम् ? तत्पादरजः कदाचित्सचित्तं भवति कदाचिन्मिश्रं लग्नं भवेत्, ग्रामे च नियमादचित्तं रजोऽतः प्रमार्जयति, पुनश्च **प्रत्युपेक्षणां** करोति पात्रद्वितयस्य पतद्ग्रहस्य मात्रकस्य च, एवं **देशकाले** भिक्षावेलायां प्राप्तायां करोति, अथाद्यापि न भवति भिक्षाकालस्ततस्तस्मि**न्नप्राप्ते** भिक्षाकाले **पादौ प्रमार्ष्टि,** ततस्तावदास्ते यावद् भिक्षाकालः प्राप्तः, ततस्तस्मिन् **प्राप्ते** सति तस्यां वेलायां **पात्रद्वितयं** प्रत्युपेक्षत इति ॥४३३॥

एवमसौ पात्रद्वितयं प्रत्युपेक्ष्य ग्रामे प्रविशन् कदाचिच्छ्रमणादीन् पश्यति ततस्तान् पृच्छति, एतदेवाह –

**७४९ समणं समणिं सावग साविग गिहि अन्नतित्थि बहि पुंच्छे ।**
**अत्थिह समण ? सुविहिया सिट्ठे तेसालयं गच्छे ॥४३४॥ नि०**

**समणं** गाहा । **श्रमणं श्रमणीं श्रावकं श्राविकां गृहस्थमन्यतीर्थिकान्** वा **बहिर्दृष्ट्वा पृच्छति,** एताननन्तरोक्तान् सर्वान् दृष्ट्वा पृच्छति, **अत्र सन्ति श्रमणाः** ?

१. अन्नगाम आ. २. अप्पत्ते च्चिय ह. हे. ३. ०णादि पश्यति ततस्त पृच्छति, क. ४. पुच्छा ह. ५. ०क्तान् दृष्ट क.

किं विशिष्टाः ? शोभनं विहितमेषामिति **सुविहिताः** शोभनानुष्ठानाः, ततश्चैतेषामन्यतमेन कथिते सति तत**स्तेषा**मेव श्रमणादीना**मालयमा**वासं **गच्छेत्**[1] ॥४३४॥

ततस्तेषामालयं प्राप्य किं करोति ? इत्याह –

**७५० समणुण्णेसु पवेसो बाहिं ठवेऊण अन्न किइकम्मं[2] ।**
**खग्गूडोसन्नेसु ठवणा उच्छोभवंदणयं ॥४३५॥ नि०**

**समणुण्णेसु** गाहा । यदि हि ते **समनोज्ञा** एकसामाचारीप्रतिबद्धास्ततस्तेषां मध्ये **प्रविशति, अथान्ये**ऽसमनोज्ञा भवन्ति यदि ततो **बाह्यत** उपकरणं **स्थापयित्वा** प्रविश्य **कृतिकर्म** द्वादशावर्त्तवन्दनं ददाति, अथ ते संविग्नपाक्षिका [3]अवसन्ना भवन्ति ततो बहिर्व्यवस्थित एव वन्दनं कृत्वाऽबाधां पृच्छति, अथ ते**ऽवसन्नाः खग्गूड**प्रायास्ततो बहिरेवोपकरणं स्थापयित्वा पुनश्च प्रविश्य तेषा**मुच्छोभवन्दनं** करोति ॥४३५॥

**७५१ गेलन्नाइ अबाहं पुच्छिय सयकारणं च दीवित्ता ।**
**जयणाए ठवणकुले पुच्छइ दोसा अजयणाए ॥४३६॥ नि०**

**गेलन्नाइ** गाहा । एवं सर्वेष्वेतेष्वनन्तरोदितेषु समनोज्ञादिषु प्रविश्य **ग्लानाद्यबाधां पृष्ट्वा स्व**कीयमागमन**कारणं दीपयित्वा** निवेद्य **यतनया** मधुरवाक्यलक्षणया, यदिवा वक्ष्यमाणलक्षणया **स्थापनाकुलानि पृच्छति** । **अयतनया** पृच्छतो [4]**दोषा** वक्ष्यमाणा यतोऽतो यतनया पृच्छतीति ॥४३६॥

एतानि तानि स्थापनाकुलानि –

**७५२ दाणे अभिगमसड्ढे संमत्ते खलु तहेव मिच्छत्ते ।**
**मामाए अचियत्ते कुलाइ जयणाइ दायंति ॥४३७॥ नि०**

**दाणे** गाहा । **दान**श्राद्धकोऽ**भिगमश्राद्धको** यत्र कारण आपन्ने प्रविश्यते, **सम्यक्त्वधर**कुलं **मिथ्यात्व**कुलम्, **मामाकः** मा[A] मम समणा घरमइंतु । तत्कुलम्, **अचियत्तं** अदानशीलकुलम्, एतानि **कुलानि** ते वास्तव्यास्तस्य साधो**र्यतनया** दर्शयन्ति ॥४३७॥

---

A. श्रमणा मा मम गृहमागच्छतु ।

१. गच्छेत् । आलयम् क. २. कितिकम्म ता. ३. अवमग्नाः क. ४. दोषवक्ष्यमाणलक्षणो–दा.

**७५३ सागारि वणिम सुणए गोणे पुन्ने दुगुंछियकुलाइं ।**
**हिंसागं मामागं सव्वपयत्तेण वज्जेज्जा ॥४३८॥ नि०**

**सागारि** गाहा । **सागारिकः** शय्यातरस्तद् गृहं दर्शयति, तथा **वणीमओ** दरिद्रस्तद्गृहं दर्शयति, तत्रैतदर्थं न गम्यते, स हि दरिद्रोऽसति भक्ते लज्जां करोति, यद्वा यत्किञ्चिदस्ति तद्दत्त्वा पुनरात्मार्थं रन्धनं करोति, तथा **श्वा** यत्र दुष्टस्तच्च, **गौर्वा** यत्र दुष्टो गृहे तच्च, तथा **पुण्णे** त्ति **पुण्यार्थं** यत्र बहु रन्धयित्वा श्रमणादीनां दीयते, अथवा **पूर्णं** यद् गृहस्थैर्बहुभिस्तच्च दर्शयति, **जुगुप्सितं** छिम्पकादि तच्च, **हिंसागं** सौकरिकादिगृहं तच्च, **मामाकं** मा मया चोक्तम्, एतानि दर्शितानि सन्ति **सर्वप्रयत्नेन** परिहर्त्तव्यानीति ॥४३८॥

इदानीं यदुक्तं 'यतनया स्थापनाकुलानि प्रच्छनीयानि कथनीयानि च' (नि.४३६) तत्प्रतिपादनायाह –

**७५४ बाहाए अंगुलीइ व लट्ठीइ व उज्जुओ ठिओ संतो ।**
**न पुच्छिज्ज न दाएज्जा पच्चावाया भवे दोसा ॥४३९॥ नि०**

**बाहाए** गाहा । **बाहुं** प्रसार्य गृहाभिमुखं न दर्शयति नाऽपि पृच्छति, तथाऽङ्गुल्या **यष्ट्या वा** न पृच्छति, नापि कथयति, [१]**ऋजुर्गृहाभिमुखं स्थितो न पृच्छेत्** साधुर्नापि दर्शयेद्, यतस्तत्र **दोषाः**, किंविशिष्टाः ? **प्रत्यपाय**जनिता **भवन्ति** ॥४३९॥

के च ते प्रत्यपायाः ? इत्याह –

**७५५ अगणीण व तेणेहि व जीवियववरोवणं तु पडिणीए ।**
**[२]खरओ खरिया सुण्हा णट्ठे वट्टक्खुरे संका ॥४४०॥ नि०**

**अगणीण व** गाहा । यया दिशा साधुना बाहुं प्रसार्य गृहं पृष्टं तेन वा बाह्वादि प्रसार्य तत्कथितं तद्गृहं कदाचि**दग्निना** दग्धं भवति ततश्च गृहपतिस्तं साधुमाशङ्कते, यदुत तेन साधुनाऽन्यस्य साधोर्ह्यस्तनेऽह्नि दर्शितमासीत्तद्यदि तत्कृतोऽयं घातः स्यात्, नान्यः, **स्तेनकैर्वा** मुषितं भवति, **जीवितव्यपरोपणं** वा गृहस्थस्य **प्रत्यनीकेन** कृतं भवति तत आशङ्का साधोरुपरि भवति, कदाचिद्वा **खरिय** त्ति द्व्यक्षरिका कर्मकरी नष्टा भवति, **खरओ** द्व्यक्षरो वा कर्मकरप्रायो नश्यति, **सुण्हा** वा **स्नुषा** वा

---

१. राजगृहा० क. २. खरए त.

केनचित्सह गता, एतेषु **नष्टेषु** सत्सु साधोरुपरि शङ्का भवति यदुत तत्कृतोऽयमुपघात इति, **वट्टखुरो वृत्तखुरो**ऽश्वः प्रधानः केनचिदपहृतो भवेत्ततश्च **शङ्का** साधोरुपरि बाह्वादिना दर्शयतो भवति ॥४४०॥

इदानीं यानि प्रतिक्रुष्टकुलानि कथितानि तान्येभिरभिज्ञानैर्वर्जयति –

**७५६ पडिकुट्ठकुलाणं पुण पंचविहा थूभिया अभिन्नाणं ।**
**भग्गघर गोपुराई रुक्खा नाणाविहा चेव ॥४४१॥ नि०**

**पडिकुट्ठकुलाणं** गाहा । तेषां **प्रतिकुष्टकुलानां पञ्चविधा स्तूपिकाऽभिज्ञानं** भवति, कथं **पुनः** पञ्चप्रकारत्वम् ? "[A]जत्थ अमुई थुभिगा तत्थ पडिकुट्ठकुलादि तीसे वा अब्भासे पुरओ वा पक्खओ वा मग्गओ वा तिरियं वा," यदिवा अन्यथा पञ्चविधा स्तूपिका कृष्णनीलरक्तपीतशुक्लभेदभिन्ना या स्तूपिका सा अभिज्ञानं भवति, **भग्नगृह**समीपादौ वा तथा **गोपुर**समीपे वा बहिरन्तर्वा **वृक्षा नानाविधा**ऽभिज्ञानं प्रतिषिद्धकुलानाम् ॥ ४४१॥

इतश्च स्थापनाकुलेषु न प्रवेष्टव्यम्, यतः –

**७५७ ठवणा मिलक्खुनिट्ठं अचियत्तघरं तहेव पडिकुट्ठं ।**
**एयं गणधरमेरं अइक्कमंतो विराहेज्जा ॥४४२॥ नि०**

**ठवणा** गाहा । **स्थापना**कुलानि तथा **मिलक्खु म्लेच्छ**गृहं तथा **अचियत्तगृहं तथा प्रतिकुष्टं** [131]छिम्पकादिगृहं सूतकोपेतगृहं वा, एतेषु न प्रवेष्टव्यम्, **इयं गणधरमेरमियं** गणधरस्थितिस्ततश्चैतां मेरां मर्यादां प्रवेशेना**तिक्रामन् विराधयति** दर्शनादि ॥४४२॥

आह–प्रतिकुष्टकुलेषु प्रविशतोऽपि न कश्चित् षड्जीववधो भवति किमर्थं परिहार इति, उच्यते –

**७५८ छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं ।**
**आहारे नीहारे दुगुंछिए पिंडगहणे य ॥४४३॥ नि०**

---

१३१. छिम्पकः–वस्त्रेषु नानाजातीयमुद्राकर्त्तरि जातिविशेषः । (स्था.८ स्था.)

A. यत्र अमुकी स्तूपिका तत्र प्रतिक्रुष्टकुलादि तस्या वा अभ्यासे पुरतो वा पक्षतो वा मार्गतो वा तिर्यग् वा ।

**छक्काय** गाहा । सुगमा, नवरम् **आहारनीहारौ** यद्यगुप्तः [१]स करोति, **जुगुप्सितेषु** छिम्पकादिगृहेषु यदि **पिण्डग्रहणं** करोति ततो **दुर्लभां बोधिं करोतीति** ॥४४३॥

ननु च य इह जुगुप्सितास्त एवान्यत्राजुगुप्सितास्ततः कथं परिहरणं कर्त्तव्यम्? उच्यते –

**७५९ जे जहिं दुगुंछिया खलु पव्वावणवसहिभत्तपाणेसु ।**
**जिणवयणे पडिकुट्ठा वज्जेयव्वा पयत्तेण ॥४४४॥ नि०**

**जे जहिं** गाहा । **ये यस्मिन्** विषयादौ **जुगुप्सिताः प्रव्रज्यामङ्गीकृत्य** तथा **वसतिमङ्गीकृत्य भक्तं पानं** चाङ्गीकृत्य ते वर्जनीयाः, "[A]तत्थ पव्वावणं प्रतीत्य अवरुद्धिगा ण पव्वावणजोग्गा वसहिभत्तपाणेसु जोग्गा, वसहिमङ्गीकृत्य जुगुप्सितो [२]भंडाण वाडओ, तत्थ वसई न कीरइ जतो तत्थ गाइयव्व नच्चियव्वएणं असज्झायादि होइ, पव्वावणभत्तपाणेसु पुण जुग्गो, तथा भक्तपानग्रहणेषु जुगुप्सितानि सूतकगृहाणि पव्वावणेसु य, ताणि पुण वसहिं अण्णत्थ दवावेंति, अण्णाणि पुण तिहिं पि दोसेहिं दुट्ठाणि [३]चम्मकराईणि ।" एते **जिनवचनप्रतिकुष्टा वर्जनीयाः प्रयत्नेन** ॥४४४॥

अथवा पश्चार्द्धमन्यथा व्याख्यायते, पव्वावणे [४]दुगुंछिया एते –

**७६० [५]अट्ठारस पुरिसेसु वीसं इत्थीसु दस नपुंसेसुं ।**
**पव्वावणाए एते दुगुंछिया जिणवरमयंमि ॥४४५॥ नि०**

**अट्ठारस** गाहा । "[B]पव्वावणे जिणवयणे पडिसिद्धा, वसहिदुगुंछिया अमणुण्णा ओसण्णा वा, भत्तपाणे वि एते चेव ।" एते जिनवचनप्रतिकुष्टाः ॥४४५॥

[तच्चेदम् -

**अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसु ।**
**पव्वावणाअणरिहा अनला एएत्तिया वुत्ता ॥४३६५॥**

---

A. तत्र प्रव्राजनं प्रतीत्याऽपराधिकाः, न प्रव्राजनयोग्याः, वसतिभक्तपानेषु योग्याः, वसतिमङ्गीकृत्य जुगुप्सितो भाण्डानां वाटकः, तत्र वसतिर्न क्रियते यतो तत्र गायनेन नर्तनेन चाऽस्वाध्यायादिर्भवति, प्रव्राजनभक्तपानेषु पुनर्योग्यः, तथा भक्तपानग्रहणेषु जुगुप्सितानि सूतकगृहाणि प्रव्राजनेषु च, तानि पुनर्वसतिमन्यत्र दापयन्ति, अन्यानि पुनस्त्रिभिरपि दोषैर्दुष्टानि चर्मकरादीनि ।

B. प्रव्राजने जिनवचने प्रतिषिद्धाः, वसतिजुगुप्सिता अमनोज्ञा अवसन्ना वा भक्तपानेऽपि एत एव ।

१. सन् करोति । दा० २. बंभण वडुओ इति पाठान्तरम् ख. ३. कम्मकराईणि प. ४. जुगुप्सिता क० ५. अट्ठारस गाथा ह०हे०ता० प्रतिषु नास्ति ।

'पुरुषेषु' पुरुषविषया: 'बाले वुड्ढे नपुंसे य०' इत्यादिगाथाद्वयोक्ता अष्टादश भेदा:, स्त्रीषु त एव गुर्विणी-बालवत्सासहिता विंशतिर्भेदा:, नपुंसकेषु तु "पंडए वाइए कीवे०" इत्यादयो दश भेदा: प्रव्राजनाया अनर्हा:-अयोग्या: । अत एव ["एएत्तिय" त्ति] एते एतावन्तो भेदा अनला इति निशीथाध्ययने उक्ता:, "अली भूषण-पर्याप्ति-वारणेषु" इति धातुपाठाद् अपर्याप्ता:, [सि.हे.धातु-९१९] प्रव्रज्यापरिपालनेऽसमर्था इत्यर्थ: । [बृ.क.-४३६५]]

[बाले १ वुड्ढे २ नपुंसे य ३, कीवे ४ जड्डे य ५ वाहिए ६ ।
तेणे ७ रायावगारी य ८, उम्मत्ते य ९ अदंसणे १० ॥७९०॥
दासे ११ दुट्ठे य १२ मूढे य १३, अणत्ते १४ जुंगिए इय १५ ।
ओबद्धए य १६ भयए १७, सेहनिप्फेडिया इय १८ ॥७९१॥
जे अट्ठारस भेया पुरिसस्स तहित्थियाए ते चेव ।
गुव्विणी १ सबालवच्छा २ दुन्नि इमे हुंति अन्ने वि ॥७९२॥
पंडए १ वाइए २ कीवे ३, कुंभी ४ ईसालुय त्ति य ५ ।
सउणी ६ तक्कमसेवी ७ य, पक्खियापक्खिए ८ इय ॥७९३॥
सोगंधिए य ९ आसत्ते १०, दस एते नपुंसगा ।
संकिलिट्ठि त्ति साहूणं, पव्वावेउं अकप्पिया ॥७९४॥ [प्रव.-७९०-७९४]]

**७६१ दोसेण [१]जस्स अयसो आयासो पवयणे य अग्गहणं ।**
**विप्परिणामो अप्पच्चओ य कुच्छा य उप्पज्जे ॥४४६॥ नि०**

**दोसेण** गाहा । सर्वथा येन केनचिद् **दोषेण** निमित्तेन **यस्य** सम्बन्धिना-**ऽयशो**ऽश्लाघा**ऽऽयास:** पीडनं **प्रवचने** भवति, **अग्रहणं** वा **विपरिणामो** वा श्रावकस्य शिक्षकस्य वा तन्न कर्त्तव्यम्, तथा**ऽप्रत्ययो** वा शासने येन भवति, यदुतैतेऽन्यथा वदन्ति, अन्यथा कुर्वन्ति, एवंविधोऽप्रत्ययो येन भवति तन्न कर्त्तव्यम्, तथा **जुगुप्सा च येनोत्पद्यते,** यदुत वराका एते दयामनस्कास्तदेवंविधं न किञ्चित्कार्यम् **॥४४६॥**

यस्तु पुनरेवं करोति तस्येदमुक्तं भगवता –

**७६२ पवयणम[२]णपेहंतस्स तस्स निद्धंधसस्स लुद्धस्स ।**
**बहुमोहस्स भगवया संसारोऽणंतओ भणिओ ॥४४७॥ नि०**

**पवयण** गाहा । [३]**प्रवचनमनप्रेक्षमाणस्य तस्य निद्धन्धसस्य** नि:शूकस्य **लुब्धस्य बहुमोहस्य भगवता संसारोऽनन्त** उक्त इति । तथा न केवलं बहुमोहस्यैतद्भवति योऽपि ज्ञस्तस्याप्येवं कुर्वतोऽनन्त एव संसार: ॥४४७॥

१. जेण दा० २. ०मणवेक्खंतस्स ह० हे० ३. प्रवचनमनापकृत: तस्य क

तदाह –

**७६३ जो जह व तह व लद्धं गिण्हइ आहारउवहिमाईयं ।**
**समणगुणमुक्कजोगी संसारपवड्ढओ भणिओ ॥४४८॥ नि०**

**जो जह वा** गाहा । सुगमा ॥४४८॥

[**जो जह व गाहा । यो यथा वा तथा वा लब्धमाहारमुपध्यादिकं** च **गृह्णाति** । जिनलोकयोर्विरुद्धं लाति **श्रमणगुणेषु** मुक्तक्रियाः **संसारप्रवर्धको भणितो**ऽर्हद्दक्षोऽपि । एतावता जिनोपदिष्टविधिनैव शिष्यदीक्षापिण्डोपधिवसतिग्रहणादि कार्यम्, नान्यथा ॥ओमाटी ४४८॥ ]

[कथम् ? इत्याह –

**जो जह व तह व लद्धं भुंजति आहार-उवधिमादीयं ।**
**समणगुणमुक्कजोगी संसारपवड्ढतो होति ॥६२०३॥**

यो नाम यथा वा तथा वा, दोषदुष्टतया निर्दोषतया वा इत्यर्थः, लब्धमाहारोपध्यादिकं 'भुङ्क्ते' उपभोग-परिभोगविषयीकरोति स श्रमणानां गुणाः-मूलगुणोत्तरगुणरूपाः श्रमणगुणास्तैर्मुक्ताः-परित्यक्तास्तद्रहिता ये योगाः-मनो-वाक्कायव्यापारास्ते श्रमणगुणमुक्तयोगाः ते यस्य सन्ति स श्रमणगुणमुक्तयोगी संसारप्रवर्धको भवति । ततो यः संयमदुर्बलो विहृतवान् स एव शोच्यः, भवदीयस्तु भ्रात्रादिः कालगतो दृढश्चारित्रे ततः स परलोकेऽपि सुगतिभागिति न करणीयः शोकः । [बृ.क.-६२०३]]

एवं तावज्ज्ञानवतामपि [१]दोषाः, ये तु पुनराचार्येण मुण्डितमात्रा अगीतार्था एव मुक्तास्ते सुतरामज्ञानादेव एषणादि न कुर्वन्ति, एतदेवाह –

**७६४ एसणमणेसणं वा [२]कह ते नाहिंति जिणवरमयं वा ।**
**[३]कुरिणंमि व पोयाला जे मुक्का पव्वइयमित्ता ॥४४९॥ नि०**

**एसण** गाहा । सुगमा, नवरं **कुरिणंमि** त्ति महत्यरण्ये **पोयाला** मृगादि-**पोतलका**स्त इव यथा यूथपतिना **मुक्ताः** सन्तो विनश्यन्ति एवं तेऽपीति ॥४४९॥

एवं तावदाचार्यदोषेणैवंविधा भवन्ति, एते तु स्वदोषेण भवन्ति, के च ते ? अत आह –

---

१. दोषः क २. किह ता. ३. कुरणंमि ह० हे०

**७६५ गच्छंमि केइ पुरिसा सउणी जह पंजरंतरनिरुद्धा ।**
**सारणवारणचइया पासत्थगया पविहरंति ॥४५०॥ नि०**

**गच्छंमि** गाहा । **गच्छे केचित्पुरुषा** निरुद्धाः सन्तः **शकुनीव पञ्जरान्तरनिरुद्धाः**, ते **सारणवारणचइया सारणं** प्रसर्पणं संयमे तेन **'सृ गतौ'** (पा.धा.१००७) इत्यस्येदं रूपम्, अथवा **सारणं** स्मारणं वा संयमविषयम्, **वारणं** दोषेभ्यो निवारण-मित्येवं निरुद्धाः सन्तः **चइया** त्याजिताः सन्तः **पार्श्वस्थादिषु प्रविहरन्ति**[१] ॥४५०॥

**७६६ जह सागरंमि मीणा संखोहं सागरस्स असहंता ।**
**निंति तओ सुहकामी निग्गयमित्ता विणस्संति ॥८६॥ प्र०**

**७६७ एवं गच्छसमुद्दे सारणवीईहिं चोइया संता ।**
**निंति तओ सुहकामी मीणा व जहा विणस्संति ॥८७॥ प्र०**

**७६८ तिविहोवघायभूयं परिहरमाणो गवेसए पिंडं ।**
**दुविहा गवेसणा पुण दव्वे भावे इमा दव्वे ॥४५१॥ नि०**

**तिविहो** गाहा । एवं **त्रिविधस्य** ज्ञानदर्शनचारित्र**स्योपघातभूतं** पिण्डं **परिहरन्** परित्यजन्, किं कुर्वीत ? अत आह - **गवेसए गवेषयेद**न्वेषयेत्, किम् ? तमेव **पिण्डं** संयमोपकारिणम् । इदानीं सा **गवेषणा द्विविधा-द्रव्यतो भावतश्च, द्रव्यत**स्ताव**दिमा** वक्ष्यमाणलक्षणा । का चासौ वक्ष्यमाणा ? सोच्यते— "[A]**वसंतपुरं** नयरं, **जियसत्तू** राया **धारिणी** देवी, सा य अत्तणो चित्तसभं अइगया [२]कणगपट्ठे मिगे पासइ, सा य गुव्विणी, तेसु [३]कणगपट्ठगेसु डोहलो समुप्पण्णो, चिंतेइ य-धन्नाओ ताओ जाओ एएसिं चम्मेसु सुवंति मंसाणि य खायंति, सा तेणं डोहलेणं अविणिज्जंतेण दुब्बला जाया, रण्णा य पुच्छिया, कहियं च तीए, ताहे रण्णा पुरिसा आणत्ता, वच्चह कणगपिट्ठे मिगे गिण्हह, तेसिं पुण मिगाणं सीवण्णिफलाणि आहारो, तया य सीवण्णीणं अकालो फलस्स, ताहे कित्तिमाणि

---

A. वसंतपुरं नगरम्, जितशत्रुराजा धारिणीदेवी, सा चात्मनश्चित्रसभामतिगता कनकपृष्ठान् मृगान् पश्यति, सा च गर्भिणी, तेषु कनकपृष्ठमृगेषु दोहदः समुत्पन्नः, चिन्तयति च- धन्यास्ता या एतेषां चर्मसु स्वपन्ति मांसानि च खादन्ति, सा तेन दोहदेन अविनिर्वापिन दुर्बला जाता, राज्ञा च पृष्टा, कथितं च तया, तदा राज्ञा पुरुषा आज्ञप्ता, व्रजत कनकपृष्ठान् मृगान् गृहाण, तेषां पुनर्मृगानां श्रीपर्णीफलान्याहारः, तदा च श्रीपर्णीनामकालः फलस्य, तदा कृत्रिमानि कणिक्कमयानि फलानि कृत्वा गता अटव्याम्, तत्र च पुञ्जकपुञ्जका श्रीपर्णीनामधस्तात्

१. तथा-जह सागरंमि---एवं गच्छ---सुगमा । इत्यादि नास्ति । ख.२. पिट्ठिमिगे दा० ३. कणगपिट्ठमिगेसु दा.

[1]कणिक्कामयाणि फलाणि काउं गया अडवीए, तत्थ य पुंजयपुंजया सीवण्णीणं हिट्ठा ठवंति, ताहे कुरंगेहिं दिट्ठा, गया य जूहवइस्स साहेंति, ताहे ते मिगा आगया, जो तेसिं अधिपती सो भणइ-अच्छह तुब्भे पेच्छामि ताव अत्तणा गंतुं, दिट्ठं च तेणं, कहियं च ताणं जहा केणइ धुत्तिमा कया अम्ह गहणत्थं, जेण अकालो सीवण्णिफलाणं, अह भणह-अकाले वि हवंति चेव फलाणि, तं सच्चं, किंतु ण उण पुंजया होंता, अह भणह-वातेण तहा कया तण्ण, जओ पुरा वि एवमेव वाता[2] वायंता न उण पुंजयपुंजएहिं फलाइं कयाइ ठियाणि, ता ण गच्छामो तत्थ, एवं भणिए केइ तत्थ ठिया, अण्णे पुण असद्दहंता गया, तत्थ य बंधणमरणाइं पाविया, जे उण ठिया ते सच्छंदं वणेसु सुहं मोदंति । एस एगो दिट्ठंतो ।

बीओ भण्णइ-एक्को राया, तेण य हत्थिगहणत्थं पुरिसा भणिया, जहा गिण्हह हत्थी, ते भणंति-जत्थ हत्थी चरंति तं नलवणं सुक्कं गिम्हकाले, तो तत्थ अरण्णे अरहट्टो कीरउ त्ति, राइणा तहत्ति पडिवण्णं, तेहिं पि तत्थ गंतूण तहत्ति कयं [3]उल्लूढं च नलवणं हरियं जायं, ताहे जूहवइणा दिट्ठं, निवारेइ नियकलहगे, जहा विदियमेयं गयकुलाणं जया रोहंति नलवणा[4], ण उण एत्थ अकाले, अह भणह-पाणियं पभूयं निज्झरेसु वट्टइ तेण नीला, तं न, अण्णया वि जेण कारणेन बहुयं पाणियं हुंतं न उण नीला नलवणा, ता[5] अच्छह मा एत्थ पविसह-विणासं

---

स्थापयन्ति, तदा कुरङ्गैर्दृष्टा, गता च यूथपतेः कथयन्ति, तदा ते मृगा आगताः, यस्तेषामधिपतिः स भणति- तिष्ठत यूयं पश्यामि तावदात्मना गन्तुम्, दृष्टं च तेन, कथितं च तेषां यथा केनचिद् धूर्त्तत्वं कृतम् अस्माकं ग्रहणार्थम्, येनाकालो श्रीपर्णीफलानाम्, अथ भणत- अकालेऽपि भवन्त्येव फलानि, तत् सत्यम्, किन्तु न पुनः पुञ्जका भवन्ति स्म, अथ भणति- वायुना तथा कृता, तन्न, यतो पुराऽपि एवमेव वाता वान्ति स्म, न पुनः पुञ्जकपुञ्जकैः फलानि कदाचित् स्थितानि, तस्मान्न गच्छामस्तत्र, एवं भणिते केचित्तत्र स्थिताः, अन्ये पुनरश्रद्दधन्तो गताः, तत्र च बन्धनमरणानि प्रापिताः, ये पुनः स्थितास्ते स्वच्छंदं वनेषु सुखं मोदन्ते। एष एको दृष्टान्तः ।

द्वितीयो भण्यते- एको राजा, तेन च हस्तिग्रहणार्थं पुरुषा भणिता, यथा हस्तिनो गृह्णीत, ते भणन्ति- यत्र हस्तयश्चरन्ति तन्नलवनं शुष्कं ग्रीष्मकाले, ततस्तत्रारण्येऽरघट्ट करोत्विति, राज्ञा तथेति प्रतिपन्नम्, तैरपि तत्र गत्वा तथेति कृतम्, शुष्कं च नलवनं हरितं जातम्, तदा यूथपतिना दृष्टम्, निवारयति निजकलभान्, यथा-विदितमेतद् गजकुलानां यथा रोहन्ति नलवनानि, न पुनरत्राऽकाले, अथ भणथ-पानीयं प्रभूतं निर्झरेषु वर्तते, तेन नीलानि, तन्न, अन्यदाऽपि येन कारणेन बहुकं पानीयमभवत, न पुनर्नीलानि नलवनानि, ततस्तिष्ठत, माऽत्र प्रविशत विनाशं समागच्छत, एवं भणिते ये तत्र वचने स्थितास्ते प्रचुरान्नपानीयकेषु सुखं विहरन्ति, ये पुनर्न स्थितास्ते वारिषु बद्धा घ्नन्ति अङ्कुशप्रहारैः । एष द्वितीयो दृष्टान्तः । एषा द्रव्यगवेषणा ।

१. कणिक्कफलाणि ख० २. वाया वायंता दा० ३. उल्लूहं । दा. ४. ०वणा एत्थ पुण अकालेण दा० । ५. तं जहा मा अच्छह विरमह एवं भणिए । क

समागच्छिह, एवं भणिए जे तत्थ वयणे ट्ठिया ते पउरण्णपाणिएसु सुहं विहरंति, जे पुण न ठिया ते वारीसु बद्धा हम्मंति अंकुसपहारेहिं । एस बितिओ दिट्ठंतो। एसा दव्वगवेसणा ।

इमा य भावगवेसणा-लोगुत्तमण्हवणाइसु मिलियाणं साहूणं केणइ सावएणं भद्दएणं वा आहाकम्माणि भक्खाणि रइल्लयाणि, भोयणं वा केणइ साहुणो दट्ठुं भद्दएण कयं, तत्थ य अणेगे निमंतिआ अण्णाण य पभूयं दिज्जइ, सो य भद्दओ चिंतेइ-एयं दट्ठूण साहूणो आगमिस्संति, आयरिएण य तं नायं, ततो साहूणो निवारिता, मा एतेसु अल्लियह, ताहे केइ सुणंति केइ न सुणंति, जेहिँ सुयं ते परिहरंति, ते य अंतपंतकुलेसु हिंडंति, अरहंताणं च आणा आराहिआ परलोगे य महंताणं सुहाणं आभागिणो जाया । जेहिं पुण ण सुयं ते तहिं भोयणे गया अरहंताणं आणाभंगो कओ अणेगाणं च जम्म-मरणाणं आभागिणो जाया" ॥४५१॥

अधुनाऽमुमेवार्थं गाथाभिरुपसंहरन्नाह –

**७६९ जितसत्तुदेवि चित्तसभपविसणं कणगपिट्ठपासणया ।**
**डोहल दुब्बल पुच्छा कहणं आणा य पुरिसाणं ॥४५२॥ नि०**

**७७० सीवन्निसरिसमोदगकरणं सीवन्निरुक्खहिट्ठासु ।**
**आगमण कुरंगाणं पसत्थअपसत्थउवमा उ ॥४५३॥ नि०**

**७७१ विदियमेयं कुरंगाणं, जया सीवन्नि सीदई ।**
**पुरा वि वाया वायंति, न उणं पुंजगपुंजगा ॥४५४॥ नि०**

**जियसत्तुदेवि** गाहा । सुगमा ॥४५२॥

**सीयन्निसरिस** गाहा । सुगमा, नवरं **प्रशस्तोपमा** यैर्यूथपतेर्मतं कृतम्, **अप्रशस्ता** च यैर्न कृतम् ॥४५३॥

---

इमा च भावगवेषणा- लोकोत्तमस्नपनादिषु मिलितानां साधूनां केनचित् श्रावकेण भद्रकेन वाऽऽधाकर्माणि भक्ष्यानि रचितानि, भोजनं वा कांश्चन साधून् दृष्ट्वा भद्रकेन कृतम्, तत्र चानेके निमन्त्रिता अन्येषां च प्रभूतं दीयते, स च भद्रकश्चिन्तयति- एतद् दृष्ट्वा साधव आगमिष्यन्ति, आचार्येन च तज्ज्ञातम्, ततः साधवो निवारिता, मा तेषु प्रविशत, तदा केचित् श्रुण्वन्ति केचिन्न श्रुण्वन्ति, यैः श्रुतं ते परिहरन्ति, ते चान्तकुलप्रान्तकुलेषु हिण्डन्ति, अर्हतां चाज्ञा आराधिता परलोके च महतां सुखानामाभागिनो जाताः । यैः पुनर्न श्रुतं ते तस्मिन् भोजने गताः, अर्हतामाज्ञाभङ्गः कृतोऽनेकेषां च जन्ममरणानामाभागिनो जाताः ।

**विदितमेतं** गाहा। सुगमा, नवरं **जया सीवण्णि सीयई** फलवतीत्यर्थः ॥४५४॥

[यदुक्तं-'दव्वंमि कुरंगगया' इति, तत्र कुरङ्गदृष्टान्तं गाथाद्विकेनाभिधित्सुराह –

**जियसत्तु देवि चित्तसभ पविसणं कणगपिट्ठपासणया ।**
**दोहल दुब्बल पुच्छा कहणं आणा य पुरिसाणं ॥८०॥**
**सीवन्निसरिसमोयगकरणं सीवन्निरुक्खहेट्ठेसु ।**
**आगमण कुरंगाणं पसत्थ अपसत्थ उवमा उ ॥८१॥**

व्याख्या-सुगमम्, नवरं भावार्थः कथानकादवसेयः, तच्चेदम्-क्षितिप्रतिष्ठितं नाम नगरम्, तत्र राजा जितशत्रुस्तस्य भार्या पट्टमहादेवी नाम्ना सुदर्शना, तस्याः कदाचिदापन्नसत्त्वाया राज्ञा सह चित्रसभायां प्रविष्टायाश्चित्रलिखितान् कनकपृष्ठान्मृगानवलोक्य तन्मांसभक्षणे दौहृदमजायत, दौहृदे चासम्पद्यमाने तस्याः खेदवशतः शरीरस्य दौर्बल्यमभवत्, तच्च दृष्ट्वा नृपतिः सखेदं तां पृष्टवान्, यथा-हा प्रिये ! किमतीव शरीरे तव दौर्बल्यमजायत ? ततः सा दौहृदमचकथत्, ततो राजा सत्वरं कनकपृष्ठकुरङ्गानयनाय पुरुषान् प्रेषितवान्, तेऽपि च पुरुषाः स्वचेतसि चिन्तयामासुः- इह यस्य यद्वल्लभं स तत्रासक्तः सन् प्रमादभावं भजमानः सुखेनैव वध्यते, कनकपृष्ठानां च कुरङ्गाणामिष्टानि श्रीपर्णीफलानि, तानि च सम्प्रति न विद्यन्ते, ततस्तत्सदृशान्मोदकान् कृत्वा श्रीपर्णीवृक्षतलेषु सर्वतः पुञ्जकपुञ्जकाकारेण क्षिप्त्वा तेषां समीपे पाशान् स्थापयाम इति तथैव कृतम्, ते च कनकपृष्ठा रुरवो निजेन यूथाधिपतिना सह स्वेच्छया परिभ्रमन्तस्तत्रागताः, यूथाधिपतिश्च श्रीपर्णीफलाकारान् पुञ्जकपुञ्जकस्थितान्मोदकानवलोक्य मृगानुक्तवान्, यथा-भो रुरवो ! युष्माकं बन्धनार्थमिदं केनापि धूर्त्तेन कृतं कूटं वर्त्तते, यतो न सम्प्रति श्रीपर्णीफलानि सम्भवन्ति, न च सम्भवन्त्यपि पुञ्जकपुञ्जकाकारेण घटन्ते, अथ मन्येथास्तथाविधपरिभ्रमद्वातसम्पर्कतः पुञ्जकपुञ्जकाकारेण घटन्ते, तदप्ययुक्तम्, ननु पुरापि वाता वान्ति स्म, न तु कदाचनाप्येवं पुञ्जकपुञ्जकाकारेण भवन्ति स्म । [पिण्डनि.-८०-८१]]

[तथा चैतदेव निर्युक्तिकारः पठति –

**विइअमेयं कुरंगाणं जया सीवन्नि सीयइ ।**
**पुरावि वाया वायंता न उणं पुंजकपुंजका ॥८२॥**

व्याख्या-'विदितं" प्रतीतम्, एतत्कुरङ्गाणां यदा श्रीपर्णी 'सीदति' धातूनामनेकार्थत्वात्फलति, तस्मान्नेदानीं फलानि सम्भवन्ति, सम्भवन्तु वा तथाऽपि कथं पुञ्जकपुञ्जकाकारेण स्थितानि ? वातवशाच्चेन्ननु पुरापि वाता वान्ति स्म, न पुनरेवं पुञ्जकपुञ्जकाः फलानामभवन्, तस्मात्कूट-मिदमस्माकं बन्धनाय कृतं वर्त्तते इति मा यूयमेतेषामुपकण्ठं गमत, एवमुक्ते यैस्तद्वचः प्रतिपन्नं ते दीर्घजीविनो वनेषु स्वेच्छाविहारसुखभागिनश्चाजायन्त, यैस्त्वाहारलम्पटतया तद्वचो न प्रतिपन्नं ते पाशबन्धनादिदुःखभागिनोऽभवन् । इह यद्यूथाधिपतेः श्रीपर्णीफलसदृशमोदकद्रव्यसदोषत्व-

निर्दोषत्वपर्यालोचनं सा द्रव्यगवेषणा । [पिण्डनि.८२]]

**७७२ हत्थिगहणं गिम्हे अरहट्टेहिं भरणं तु सरसीणं ।**
**अच्चुदएण नलवणा अभिरूढा गयकुलागमणं ॥४५५॥ नि०**

**७७३ विइयमेयं गयकुलाणं जया रोहंति नलवणा ।**
**अन्नया वि झरंति सरा न [1]उणं बहुओदगा ॥४५६॥ नि०**

**हत्थिगहणे** गाहा । **विइयमेयं** गाहा । सुगमे, नवरं '**भरणं च सरसीणं**'ति महान्ति सरांसि सरस्य उच्यन्ते तासां **भरणम्** ॥४५५-४५६॥

तथा च –

**७७४ ण्हाणादीसु विरइयं आरंभकडं तु दाणमाईसु ।**
**आयरियनिवारणया अपसत्थितरे उवणओ उ ॥४५७॥ नि०**

**ण्हाणादीसु** गाहा । **स्नानादिषु विरचितं** किञ्चिद्भक्तम्, आरम्भे वा भोजने **दानादि** किञ्चित्प्रवर्त्तितम्, **तत्राचार्यो निवारणां** करोति । अयं **चाप्रशस्तस्येतरस्य चोपनय** उक्तः, "[A]अहवा इमा भावगवेसणा–**धम्मरुई** नाम अणगारो, सो जिट्ठामूले ज्येष्ठमास इत्यर्थः । तहिं आयावेइ अट्ठमं च करेइ, सो य पारणए सग्गामे न हिंडइ अन्नं गामं वच्चइ, तत्थ य वच्चंतं साहुं दट्ठूण एक्का देवया आउट्टा, कोंकणगरूवादि दो विउव्वइ, ताहे सा रुक्खहिट्ठा अणुकंपाए लाउएणं कंजियस्स भरिएणं अच्छइ, ताहे तं साहुं [2]अब्भासगतं दट्ठूण एगो भणइ– तुमं पिव कंजियं, ताहे सो भणइ– अलाहि मम पीएणं, ताहे सो भणइ–को उण एयं वहीहि त्ति तम्हा साहुस्स दिज्जउ, ताहे बीओ भणइ–देहि वा छड्डेहि, तओ तेणं सो अणगारो निमंतिओ भणिओ य तुब्भे इमं गिण्हह, ताहे सो भगवं दव्वओ खेत्तओ कालओ भावओ य गवेसइ, दव्वओ इमं कंजियं सीयलं सुरहिं च, खेत्तत्तो इमाए अडवीए

---

१. उणं बहुउदगा ह० हे० २. अब्भासगं दट्टू० दा०

A. अथवेमा भावगवेषणा– धर्मरुचिर्नाम अणगारः, स ज्येष्ठामूले ज्येष्ठमास इत्यर्थः । तत्राऽऽतापयति अष्टमं च करोति, स च पारणके स्वग्रामं न हिण्डति, अन्यं ग्रामं व्रजति, तत्र च व्रजन्तं साधुं दृष्ट्वा एका देवताऽऽयुक्ता, कोंकणकरूपौ द्वौ विकुर्वतः, तदा सा वृक्षाधस्तादनुकम्पयाऽलाबुकेन काञ्जिकस्य भृतेन तिष्ठति, तदा तं साधुमभ्यासगतं दृष्ट्वा एको भणति– त्वं पिब काञ्जिकम् । तदा स भणति– अलं मम पीतेन, तदा स भणति– क पुनरेतद् वहीष्यतीति, तस्मात् साधोर्ददातु, तदा द्वितीयो भणति– देहि छर्दय वा, ततस्तेन सोऽनगारो निमन्त्रितो भणितश्च–यूयमिदं गृहाण, तदा स भगवान् द्रव्यतः क्षेत्रतः कालतो भावतश्च गवेषयति, द्रव्यत इदं काञ्जिकं शीतलं सुरभि च, क्षेत्रतोऽस्यामटव्यां को ददाति ? कालतो ज्येष्ठमासः, अत्रापि दुक्खं दातुम्, भावतो

को देइ ? कालतो जेट्ठमासो, एत्थ वि दुक्खं दाउं, भावओ हट्ठतुट्ठचित्तेण निमंतेति, तं एत्थ कारणेण भवियव्वं, ताहे सो उवउत्तो हेट्ठा पिच्छइ जाव भूमीए पाया न लग्गंति, उवरि पेच्छइ अच्छीणि अणिमिसाणि ताहे देवय त्ति नाऊण वज्जियं ।

अहवा वइरसामी दिट्ठंतोः- वइरसामी आयरिएहिं समं वरिसारत्तं एगंमि नगरे ठिओ, तत्थ य सत्ताहवद्दले न कोइ साहू णीति, सो वि भगवं डहरओ ण णीति, तस्स पुव्वसंगइया देवा आगया, ते हि तत्थ वणियवेसं काऊण भरिएहिं आगंतूण अब्भासे ठिआ, तेहिं तत्थ अणेगरूवं उवक्खडियं, अव्वत्ता अकलिज्जंता य गता निमंतंति साहुणो, ते भणंति—एस खुड्डुलओ गेण्हउ, ताहे सो आयरियसंदिट्ठो पयट्टो जाव अज्ज वि वरिसइ, ताहे तेहिं देवेहिं सव्वं वद्दलं उवसंहरियं, आगओ तं पएसं, देवेहि य वीहिकूरो दाउमारद्धो पूसफलं माहुरयं च, सो भगवं उवउत्तो—को कालो वाणियगाणं एत्थ आगमणे, एज्ज वा अकाले वासं न उवसमइ तो किह आगया ? इमो य पढमपाउसो कतो वीहिणो पूसफलं वा? एवं चिंतेंतो हेट्ठा उवरिं च निरूवेइ जाव भूमीए पाया न लग्गंति अणिमिसाणि अच्छीणि तओ गुज्झग त्ति काऊण वज्जेइ, ताहे देवा सत्थं साहरित्ता वंदंति, नमंसंति, अभिनंदंति-धन्नोऽसि भयवं ! तत्थ य से वेउव्वियलद्धिं नभगमणलद्धिं च दिंति, ताहे गया देवा ॥ एसा भावगवेसणा" ॥४५७॥

अमुमेवार्थं गाथाभिरुपसंहरति, तत्र निर्युक्तिकारः कथानकद्वयमपि उपसंहरन्नाह –

---

हृष्टतुष्टचित्तेन निमन्त्रयति, तदत्र कारणेन भवितव्यम्, तदा स उपयुक्तोऽधस्तात् पश्यति यावद् भूमौ पादा न लगन्ति, उपरि पश्यत्यक्षीण्यनिमेशाणि, तदा देवतेति ज्ञात्वा वर्जितम् ।

अथवा वज्रस्वामीदृष्टान्तः- वज्रस्वामी आचार्यैस्समं वर्षारात्रमेकस्मिन्नगरे स्थितः, तत्र च सप्ताहवर्दले न कश्चित् साधुर्निगच्छति, सोऽपि भगवान् डहरको(क्षुल्लको) न निर्गच्छति, तस्य पूर्वसङ्गतिका देवा आगताः, ते हि तत्र वणिग्वेशं कृत्वा भृतैरागत्याभ्यासे स्थिताः, तैस्तत्रानेकरूपमुपस्कृतम्, अव्यक्ता अकलयन्तश्च गताः, निमन्त्रयन्ति साधवः, ते भणन्ति- एष क्षुल्लको गृह्णातु, तदा स आचार्यसन्दिष्टः प्रवृत्तो यावदद्यापि वर्षति, तदा तैर्देवैः सर्वं वर्दलमुपसंहृतम्, आगतस्तं प्रदेशम्, देवैश्च व्रीहिकूरो दातुमारब्धः पुष्यफलं मधुरकं च, स भगवान्नुपयुक्तः- कः कालो वणिजामत्राऽऽगमने ? अद्य वाऽकाले वर्षणं वा नोपशमति ततः कथमागता ? इदं च प्रथमप्रावृट् कुतो व्रीहयः पुष्यफलं वा ? एवं चिन्तयित्वाऽधस्तादुपरिं च निरूपयति यावद् भूमौ पादा न लगन्ति, अनिमेशान्यक्षीणि, ततो गुह्यक इति कृत्वा वर्जयति, तदा देवा सार्थं संहृत्य वन्दन्ते, नमस्यन्ति, अभिनन्दन्ति- धन्योऽसि भगवान् ! तत्र च तस्य वैक्रियलब्धिं नभोगमनलब्धिं च ददति, तदा गता देवाः । एषा भावगवेषणा ।

**७७५ धम्मरुइ अज्जवइरे लंभो वेउव्वियस्स नभगमणं ।**
**जिट्ठामूले अह अट्ठमेण [१]हिट्ठा उवरिं य देवाणं ॥४५८॥ नि०**

**धम्मरुइ** गाहा । **धर्मरुचिर**नगारस्तथाऽऽर्य**वैरस्वामी लम्भो वैकुर्विक**लब्धेर्न**भोगमन**लब्धेश्च तस्यैव, तथा [१३२]**ज्येष्ठामूले** ज्येष्ठमास इत्यर्थः । **धर्मरुचिरष्टमभक्तेन** स्थितोऽन्यस्मिन् ग्रामे गच्छन् **देवेन** दृष्टः, स च भगवान**धस्तादुपरि** **चो**पयोगं दत्त्वा पुनश्च न गृहीतवानकल्प्यमिति ॥४५८॥

इदानीं भाष्यकारो **धर्मरुचि**कथानकमुपसंहरन्नाह –

**७७६ आतावणऽट्ठमेणं जेट्ठामूलंमि धम्मरुइणो उ ।**
**गमणऽन्नगामभिक्खट्ठयाए देवस्स अणुकंपा ॥२३१॥ निभा०**

**७७७ कोंकणरूवविउव्वण अंबिल छड्डेमऽहं पियसु पाणं ।**
**छड्डेहि त्ति य बिइओ तं गिण्ह मुणि त्ति [२]उवओगो ॥२३२॥ निभा०**

**आयावण** गाहा । सुगमा । **कोंकण** गाहा । सुगमा ॥२३१-२३२॥

[अत्र भाष्यकृत् –

आयावणऽट्ठमेणं गाथा । आतापनाष्टमेन ज्येष्ठेमूले धर्मरुचिना गमनं त्वन्यग्रामे भिक्षार्थं देवस्यानुकम्पा भक्तिः । [ओ.नि.मा.निभा. २३१]

कुंकणरूवविउव्वण गाथा । कोङ्कणरूपं विकुर्वाणं अम्लं छर्दयाम्यहं हे मित्र ! पिवसु पानम् । द्वितीय छर्दयतेति वक्ति । आद्यो मुने तद् गृहाण इत्यूचे । मुनेरुपयोगः । [ओ.नि.मा.निभा. २३२]]

**७७८ तण्हाछुहाकिलंतं दट्ठूणं कुंकणो भणइ साहुं ।**
**उज्झामि अंबकंजिय अज्जो गिण्हाहि णं तिसिओ ॥२३३॥ निभा०**

**तण्हाछुहा** गाहा । सुगमा ॥२३३॥

[तण्हाच्छुहाकिलंतं गाथा । तृष्णाक्षुधाक्लान्तं दृष्ट्वा कुङ्कुणः साधुं भणति । उज्झाम्यम्लकाञ्जिकं आर्य ! तृषितो गृहाण । [ओ.नि.मा.निभा.२३३]]

**७७९ सोऊण कोंकणस्स य वयणं साहू इमं विचिंतेइ ।**
**गविसणविहिए निउणं जह भणिअं सव्वदंसीहिं ॥२३४॥ निभा०**

---

१३२. ज्येष्ठामूल-ज्येष्ठा मूलं वा पौर्णमास्यां यत्र स्यात् स ज्येष्ठामूलो मासः । ज्येष्ठमासे । (औ.)

१. उवरिं हेट्ठा दा० २. उवओगं दा.

**सोऊण** गाहा । सुगमा ॥२३४॥

[सोऊण गाथा । श्रुत्वा कोङ्कणस्य वचनं साधुरिदं चिन्तयति गवेषणविधिना निपुणं यथा स्यात् तथा । यथा पूर्वदर्शिभिर्भणितं तथाऽचिन्तयत् । [ओ.नि.मा.निभा.२३४]]

**७८० गविसणगहणकुडंगं नाऊण मुणी उ मुणियपरमत्थो ।**
**आहडरक्खणहेउं उवउंजइ भावओ निउणं ॥२३५॥ निभा०**

**गविसण** गाहा । **गवेषणागहनमेव 'कुडंगं'** गह्वरमित्यर्थः । **तज्ज्ञात्वा मुनिः** ॥२३५॥

**७८१ उक्कोसदव्वखित्तं च अरण्णं कालओ निदाहो [१]उ ।**
**भावे हट्ठपहट्ठो हिट्ठा उवरिं च उवओगो ॥२३६॥ निभा०**

**उक्कोस** गाहा । **उत्कृष्टमेतद् द्रव्यं** काञ्जिकं सुरभि **क्षेत्रतोऽरण्ये** कुतोऽस्य सम्भवः ? शेषं सुगमम् ॥२३६॥

**७८२ दट्ठूण तस्स रूवं अच्छि[२]निमेसं च पायनिक्खेवं ।**
**उवउंजिऊण पुव्विं गुज्झगमिणमो त्ति वज्जेइ ॥२३७॥ निभा०**

**दट्ठूण** गाहा । **दृष्ट्वा** च **तस्य** देवस्य **रूपं वर्जयतीति** सम्बन्धः ॥२३७॥

इदानीं भाष्यकार एव **वैर**स्वामिकथानकमुपसंहरन्नाह –

**७८३ सत्ताहवद्दले पुव्वसंगई वणियरू[३]वउवक्खडणं ।**
**आमंतण खुड्ड गुरू अणुण्णवणं बिंदु उवओगो ॥२३८॥ निभा०**

**सत्ताह** गाहा । **सप्ताहवर्दले पूर्वसङ्गतिकदेवो** विरूप**रूपम**नेकप्रकारं **उवक्खडित्ता आमन्त्रणं क्षुल्लकस्य** [४]कृतवान्, **गुरुणा चानुज्ञातः** प्रवृत्तश्च, पुनश्च **बिन्दु**पतनात् स्थितो देवेन चोपसंहरितम्, पुनश्च **वैर**स्वामिनो**पयोगो** दत्त इति ॥२३८॥

**७८४ [५]एसा गवेसणविही कहिया भे धीरपुरिसपन्नत्ता ।**
**गहणेसणं पि एत्तो वोच्छं अप्पक्खरमहत्थं ॥४५९॥ नि०**

**एसा गवेसण** गाहा । सुगमा ॥४५९॥

[**एसा** गाहा । एष गवेषणाविधिः शिष्य ! भवतां कथितो धीरपुरुषैः प्रज्ञप्तः । इत ग्रहणैषणं

---

१. च ह० हे० २. ०निवेसं दा. ३. विरूव दा० ४. कृतं, क. ५. एस क०

अपिर्निश्चयेऽल्पाक्षरां महार्थां वक्ष्ये । [ओ.नि.मा.-नि.४५९]]

तत्र यदुक्तं 'इत ऊर्ध्वं ग्रहणैषणां वक्ष्ये' इति तत्प्रतिपादनायाह –

**७८५ नामं ठवणा दविए भावे गहणेसणा मुणेयव्वा ।**
**दव्वे वानरजूहं[४] भावंमि य ठाणमाईणि ॥४६०॥ नि०**

**नामं** गाहा । याऽसौ **ग्रहणैषणा** सा चतुर्विधा-**नाम**ग्रहणैषणा, **स्थापना**ग्रहणैषणा, **द्रव्य**ग्रहणैषणा, **भावग्रहणैषणा** च ज्ञेया । नामग्रहणैषणा सुगमा, तत्र स्थापनाग्रहणैषणा द्विविधा-सद्भावस्थापनाग्रहणैषणा चित्रकर्मणि साधुर्ग्रहणैषणां कुर्वन् दर्श्यते, असद्भावस्थापनाग्रहणैषणाऽक्षादिषु । तत्र द्रव्यग्रहणैषणा आगमतो नोआगमतश्च, आगमतो ग्रहणैषणापदार्थज्ञः तत्र चानुपयुक्तः, नोआगमतो ज्ञशरीरभव्यशरीरे तथा ज्ञशरीरभव्यशरीरव्यतिरिक्त**द्रव्य**ग्रहणैषणायां **वानरयूथम्, भाव**ग्रहणैषणायां तु **स्थानादीनि** भवन्ति, एतदुक्तं भवति—भावग्रहणैषणां कुर्वन् स्थाने विवक्षिते तिष्ठति, दातृप्रभृतीनि च परीक्षते भावग्रहणैषणायाम्, तत्र द्रव्यग्रहणैषणायामिदमाख्यानकम्-"एकं वणं तत्थ वानरजूहं परिवसइ, कालेण तं परिसडियपंडुपत्तं जायं, [१]उण्हकाले जाहे परिसडियपंडुपत्तं जायं, ताहे जूहवई भणइ-अण्णं वणं गच्छामो, तत्थ तेसिं जूहवई अण्णवणपरिक्खणत्थं दोन्नि व तिन्नि व पंच व सत्त व[२] जणे पयट्टइ, वच्चह वणंतरे जोएह, ताहे गया एगं वणसंडं पासंति पउरफलपुप्फं, तस्स वणस्स मज्झे एगो महादहो, तो तं दट्ठूण हट्ठतुट्ठा गया जूहवइणो साहंति, ताहे सो जूहवई सव्वेहिं समं आगओ, ताहे तं वणं रुक्खेण रुक्खं पलोएइ, [३]जाहे तं वणं सुद्धं, ताहे तेण भणिया—खायह वणफलाइं, जाहे ते तत्थ धाया ताहे पाणियं गया, ताहे सो जूहवई दहस्स परिपेरंतेहिं पलोएइ जाव ओयरंताणि पयाणि दीसंति [४]नीसरंताणि न दीसंति, ताहे सो भणइ-एस दहो [५]सावाओ, ता मा एत्थ तीरट्ठिआ मज्झे वा उयरिय पाणियं पियह किंतु नालेण पियह, तत्थ जेहिं सुयं तस्स वयणं ते पुप्फफलाणं

---

१. जायं दा. २. व पयट्ट० दा. ३. ताहे तं वणं सुद्धं, तेण दा० ४. उत्तरंताणि क ५. ससावउ ता । क. एकं वनम्, तत्र वानरयूथं परिवसति, कालेन तदुष्णकाले यदा परिशटितपाण्डुपत्रं जातम्, तदा यूथपतिर्भणति-अन्यद् वनं गच्छामः, तत्र तेषां यूथपतिरन्यद्वनपरीक्षणार्थं द्वौ वा त्रयो वा पञ्च वा सप्त वा जनान् प्रवर्तयति, व्रजत, वनान्तरं योजयत, तदा गता एकं वनखण्डं पश्यन्ति प्रचुरफलपुष्पम्, तस्य वनस्य मध्य एको महाद्रहः, ततस्तं दृष्ट्वा हृष्टतुष्टा गताः, यूथपतये कथयन्ति, तदा स यूथपतिः सर्वैः सममागतः, तदा तद्वनं वृक्षं वृक्षं प्रलोकयति, यदा तद्वनं शुद्धम्, तदा तेन भणिता- खादत वनफलानि, यदा ते तत्र ध्राताः, तदा पानीयं

आभागिणो जाया, जेहिं न सुयं तस्स ते रुक्खेहिंतो तस्सि दहे झंपाउ दिंति ण चेव उत्तरंति तेन अणाभागिणो जाता, एवं चेव आयरिया ताणं साहूणं आहाकम्मुद्देसियाणि समोसरणण्हवणाइसु परिहारावेंति, उवाएण फासुयं गिण्हावेंति जहा न छलिज्जंति आहाकम्माइणा तहा करेंति, तत्थ पुव्वकयाणि खीरदहिघयाईणि तारिसाणि गिण्हावेंति अकयाकारिया-संकप्पियाणि, तत्थ जे आयरियाणं सुणिंति ते परिहरंति ते य अचिरेणं कालेणं कम्मक्खयं करिहिंति, जे तत्थ आयरियाणं ण सुणंति ते भणंति-एते तुम्हारया असद्विगप्पा, किं कारणं एयं न घिप्पति त्ति ? एवं असुणेंता अणेगाणं जाइयव्व-मरियव्वयाणं आभागिणो जाया" ॥४६०॥

इदानीममुमेवार्थं गाथाभिः प्रदर्शयन्नाह –

**७८६ परिसडियपंडुपत्तं वणसंडं दट्ठुं अन्नहिं पेसे ।**
**जूहवई पडियरिए जूहेण समं तहिं गच्छे ॥४६१॥ नि०**

**७८७ सयमेवालोएउं जूहवई तं वणं समं [1]तेणं ।**
**वियरइ तेसि पयारं चरिऊण य[2] ते दहं गच्छे ॥४६२॥ नि०**

**७८८ ओयरंतं पयं दिट्ठं उत्तरंतं न दीसइ ।**
**नालेण पियह [3]पाणीयं न एस निक्कारणो दहो ॥४६३॥ नि०**

[4]**परिसडिय** गाहा । **सयमेव** गाहा । **ओयरंतं** गाहा । सुगमाः, नवरं **पडियरिए** निरूविए [5]नवरं **वियरइ** ददाति **तेषां** वानराणां **प्रचारमटनमुत्सङ्कलयति**[6] ॥४६१-४६२-४६३॥

---

गताः, तदा स यूथपतिर्द्रहस्य परिपर्यन्तैः प्रलोकयति यावदुत्तरन्ति पदानि पश्यन्ति नीस्सरन्ति न पश्यन्ति, तदा स भणति- एष द्रहः सापायः, ततो माऽत्र तीरस्थिता मध्ये वा उत्तीर्य पानीयं पिबथ, किन्तु नालेन पिबथ, तत्र यैः श्रुतं तस्य वचनं ते पुष्पफलानामाभागिनो जाताः, यैर्न श्रुतं तस्य ते वृक्षात्तस्मिन् द्रहे झम्पां ददति, नैवोत्तरन्ति, तेनाऽनाभागिनो जाताः, एवमेवाऽऽचार्यास्तेषां साधूनामाधाकर्मौद्देशिकानि समवसरणस्नपनादिषु परिहारयन्ति, उपायेन प्रासुकं ग्राह्यन्ति यथा न स्खलेयुराधाकर्मादिना तथा कुर्वन्ति, तत्र पूर्वकृतानि खीरदधिघृतादीनि तादृशानि ग्राहयन्ति अकृताकारिताऽसङ्कल्पितानि, तत्र य आचार्यानां श्रुण्वन्ति ते परिहरन्ति, तेचाऽचिरेण कालेन कर्मक्षयं करिष्यन्ति, ये तत्राऽऽचार्यानां न श्रुण्वन्ति, ते भणन्ति- एते युष्माकमसद्विकल्पाः, किं कारणमेतन्न गृह्णातीति, एवमश्रुण्वन्तोऽनेकानां यातव्यमर्तव्यानामाभागिनो जाताः ।

१. तेहिं दा. २. य तो ह० हे० ३. तोयं य ४. सुगमा क, ख ५. सुगमा क, ख ६. सुगमा क, ख

[तत्र वानरयूथोदाहरणं रूपकत्रयेण भावयति –

**पडिसडियपंडुपत्तं वणसंडं दट्ठु अन्नहिं पेसे ।**
**जूहवई पडियरिए जूहेण समं तहिं गच्छे ॥५१७॥**

**सयमेवालोएउं जूहवई तं वणं समं तेण ।**
**वियरइ तेसि पयारं चरिऊण य तो दहं गच्छे ॥५१८॥**

**ओयरंतं पयं दट्ठुं नीहरंतं न दीसई ।**
**नालेण पियह पाणीयं नेस निक्कारणो दहो ॥५१९॥**

व्याख्या–विशालशृङ्गो नाम पर्वतः, तत्रैकस्मिन् वनखण्डे वानरयूथमभिरमते, अथ च तत्रैव पर्वते द्वितीयमपि वनखण्डं सर्वपुष्पफलसमृद्धं समस्ति, परं तन्मध्यभागवर्त्तिनि ह्रदे शिशुमारोऽवतिष्ठते, स यत्किमपि मृगादिकं पानीयाय प्रविशति तत्सर्वमाकृष्य भक्षयति, अन्यदा च तद्वनखण्डं परिशटितपाण्डुपत्रमपगतपुष्पफलमवलोक्य यूथाधिपतिरन्यस्य वनखण्डस्य निर्वाहसमर्थस्य गवेषणाय वानरयुगलं प्रेषितवान्, गवेषयित्वा च तेन यूथाधिपतेर्निवेदितम्–अस्ति वनखण्डममुकप्रदेशे सर्वर्त्तुपुष्पफलपत्रसमृद्धमस्माकं निर्वाहयोग्यम्, ततो यूथाधिपतिः सह यूथेन तत्र गतवान्, परिभावयितुं च प्रवृत्तः समन्ततस्तद्वनखण्डम्, ततो दृष्टस्तन्मध्ये जलपरिपूर्णो ह्रदः, परं तत्र प्रविशन्ति श्वापदानां पदानि दृश्यन्ते, न निर्गच्छन्ति, ततो यूथमाहूय यूथाधिपतिरुवाच–माऽत्र यूयं प्रविश्य पिबय पानीयम्, किन्तु तटस्थिता एव नालेन पिबय, यतो नैष ह्रदो निष्कारणो–निरुपद्रवः, तथाहि–मृगादीनामत्र पदानि प्रविशन्ति दृश्यन्ते न निर्गच्छन्तीति, एवं चोक्ते यैस्तद्वचः कृतं ते वानराः स्वेच्छाविहारसुखभाजिनो जाताः, इतरे तु विनष्टाः । उक्ता द्रव्यग्रहणैषणा । [पिण्डनि.५१७–५१८–५१९]]

एवं तावद् द्रव्यग्रहणैषणोक्ता, तथेमा भावग्रहणैषणैभिर्द्वारैरनुगन्तव्या –

**७८९ ठाणे य दायए चेव गमणे [१]गहणागमे ।**
**पत्ते परियत्ते पाडिए य गुरुयं तिहा भावे ॥४६४॥ नि० । दारगाहा ।**

**ठाणे** गाहा । तत्र पिण्डग्रहणं कुर्वता वक्ष्यमाणं **स्थान**त्रितयं परिहरणीयम्, तद्यथा–आत्मोपघातिकं प्रवचनोपघातिकं संयमोपघातिकं चेति । तथा पिण्डग्रहणं कुर्वता [२]**दायकः** परीक्षणीयः, योऽव्यक्तादिरूपो यदि न भवति, तथा दातु**र्गमनं** निरूपणीयं भिक्षार्थमभ्यन्तरं प्रविशतो भिक्षां च दत्त्वा गच्छतो **गमनं** निरूपणीयम्, **गहणं** ति स भिक्षादाता यस्माद् हण्डिकादिस्थानाद् **ग्रहणं** भिक्षायाः करोति

१. गमणागमे ह० हे० २. दाता दा०

तन्निरूपणीयम्, स दाता तां भिक्षां गृहीत्वाऽ**भ्यागच्छन्** निरूपणीयः, **पत्ते** त्ति **प्राप्तस्य** दातुस्तस्य हस्त उदकार्द्रो न वेति निरूपणीयः, अथवा **पत्ते** त्ति **पात्रं** स्थानं यस्मिन् भिक्षामादाय गृहस्थ आगतः कडुच्छुकादि तन्निरीक्षणीयम्, अथवा **पत्ते** त्ति **प्राप्तं** द्रव्यमोदनादि तन्निरूपयति, **परियत्ते** त्ति **परावृत्तम**धोमुखं स्थितं भिक्षां ददतो दातुः कडुच्छुकादि निरूपयति कदाचिदुदकार्द्रं भवति, **पाडिए य** त्ति **पातितश्च** पात्रके पिण्डो निरूपणीयः, **गुरुयं** ति गृहस्थभाजनं स्थाल्यादि **गुरु** भवति, कदाचित्तद् द्रव्यं गुडादि गुरु भवति, पाषाणादिर्वा [1]कुण्डकस्योपरि यो दत्तः, तथा **तिह** त्ति **त्रिविधः** कालो वक्तव्यः, **भावश्च** प्रशस्ताप्रशस्तरूपो वक्तव्यः ॥४६४॥

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याख्यानायाह –

**७९० आया पवयण संजम तिविहं ठाणं तु होइ नायव्वं ।**
**गोणाइ पुढविमाई निद्धमणाई पवयणंमि ॥२३९॥ निभा०**

**आया** गाहा । **त्रिविधमु**पघातिकं **स्थानं भवति,** तद्यथा-**आत्मो**पघातिकं **प्रवचनो**पघातिकं **संयमो**पघातिकं चेति, तत्र यथायोगं **गवादि**भिरात्मोपघातिकं भवति, **पृथिवी**कायादिभिः संयमोपघातिकं भवति, **निद्धमणादि** नगरो[2]दकोपघसरादि उपघातस्थानं **प्रवचन**विषयं भवति ॥२३९॥

तत्र गवादिभिः कथमात्मोपघातो भवतीति एतत्प्रदर्शनायाह –

**७९१ गोणे महिसे आसे पेल्लण आहणण मारणं वावि ।**
**दरगहिय भाणभेदो [3]छड्डणे भिक्खस्स छक्काया ॥४६५॥ नि०**

**७९२ चलकुड्डपडण कंटग बिलस्स वा पासि होइ आयाए ।**
**निक्खमपवेसवज्जण गोणे महिसे य आसे य ॥४६६॥ नि०**

**गोणे** गाहा । यदा गोमहिष्यादिस्थाने स्थितो भिक्षां गृह्णाति ततो **गोमहिष्यश्वादिप्रेरणं** विक्षेपण**माघातो वा मारणं** तत्कृतं भवति, इयं आत्मविराधना, अर्द्धगृहीतायां भिक्षायां **भाजनभेदः** पात्रकभेदो भवति, ततश्च **भिक्षायाः छड्डने** प्रोज्झने **षडपि काया** विराध्यन्ते, इयं संयमविराधना ॥४६५॥

**चल** गाहा । अथवाऽनेन प्रकारेणात्मविराधना भवति, तत्र भिक्षाग्रहणस्थाने

---

१. भण्डकस्यो० ख० तद् द्रव्यस्यो०दा० २. दकावघस० क ३. छड्डुण ह० हे०

कदाचिच्चलं **कुड्य**मासन्ने भवति ततस्तत्**पतन**जनित आत्मोपघातो भवति, **कण्टका** वा तत्र भवन्ति, **बिलस्य वा पार्श्वे** आसन्ने तत्स्थानं **भवति** तत**श्चात्म**विराधना । तथा **निष्क्रमणप्रवेश**स्थानं **गोमहिष्यश्वादीनां** वर्जयित्वा तिष्ठति भिक्षाग्रहणार्थम् ॥४६६॥

तथा प्रकारान्तरेण संयमोपघातं प्रदर्शनायाह –

**७९३ पुढविदगअगणिमारुयतरुतसवज्जंमि ठाणि ठाइज्जा ।**
**दिंती व हिट्ठ उवरिं [१]जह व न घट्टेइ फलमाई ॥४६७॥ नि०**

**पुढवि** गाहा । **पृथिव्युदकाग्निमारुततरुत्रसैर्वर्जिते स्थाने स्थातव्यम्**, [२]**यथा वा** भिक्षां प्रयच्छन्ती गृहस्था **अधो** भूमौ **उपरि च** नीव्रादौ **न सङ्घट्टयति फलादि** तत्र प्रदेशे स्थितो गृह्णाति ॥४६७॥

इदानीं प्रवचनोपघा[३]तिस्थानप्रदर्शनायाह –

**७९४ पासवणे उच्चारे सिणाण आयमणठाण उक्कुरुडे ।**
**निद्धमणअसुइमाई पवयणहाणी विवज्जिजज्जा ॥४६८॥ नि०**

**पासवणे** गाहा । **प्रश्रवणस्योच्चारस्य स्थानम्**, स्नानस्या**चमनस्य** च यत्**स्थानं** तथा कज्जवोत्**कुरुटिका**स्थानं तथा **निर्द्धमन**स्थानम् [४]उदकघसरस्थानं यत्र वा[५]ऽन्**यदशुचि** प्रक्षिप्यते स्थाने, एतेषु स्थानेषु भिक्षां गृह्णतः प्रवचनोपघातो भवति, तस्मात् सर्वप्रकारैः **प्रवचनहानिं** हीलनां **वर्जयेत्** । उक्तं स्थानद्वारम् ॥४६८॥

अधुना दातृद्वारमुच्यते । (नि.४६४) तत्र चैतानि द्वाराणि –

**७९५ अव्वत्तमपहु थेरे पंडे मत्ते य खित्तचित्ते य ।**
**दित्ते जक्खाइट्ठे करचरणछिन्नऽन्ध नियले य ॥४६९॥ नि०**

**७९६ तद्दोस गुव्विणी बालवच्छ कंडंति पीस [६]भज्जंती ।**
**कत्तंती पिंजंती भइया दगमाइणो दोसा ॥४७०॥ नि० । दारगाहा ।**

**अव्वत्त** गाहा । **तद्दोस** गाहा । **अव्यक्तो**ऽष्टानां वर्षाणामधो बालः, स यद्यपि भिक्षां ददाति तथापि न गृह्यते, तथा **अप्रभु**र्यस्तस्य हस्तान्न गृह्यते, तथा **स्थविर**हस्तात् **पण्डका**न्नपुंसकहस्तात्, **मत्तो यः** सुरया पीतया तस्य हस्तान्न गृह्यते, **क्षिप्तं चित्तं**

---

१. जह उ ह० हे० ता० २. यथा च भिक्षां प्रयच्छन् गृहस्थ अधो क ३. ०घातं प्र० दा० ४. दकावघसर० क ५. वाऽशुचि दा०, वाऽन्यदन्यदशुचि० क. ६. भुज्जंती ह० ता०

यस्य द्रविणाद्यपहारे सति चित्तविभ्रमो जातः, तथा **दीप्तं** चित्तं यस्यासकृच्छत्रुपराजया-द्युत्कर्षेणातिविस्मयाभिभूतस्य चित्तह्रासो जातो यथा मत्तुल्यो नास्तीति, तथा **यक्षाविष्टः** पिशाचगृहीतः **करच्छिन्नश्चरणच्छिन्नोऽन्धश्च निगडितश्च यः, त्वग्दोषः** कुष्ठी यः, तथा **गुर्विण्या** हस्तात्, तथा **बालवत्सा** शिशुपालका या, [1]**कण्डन्ती** व्रीह्यादि, तथा **पिषन्ती** गोधूमादि, तथा [2]**भृञ्जन्ती** यवधान्यादि, तथा केषाञ्चित्पाठो **भुञ्जन्ती**, तथा **कर्त्तयन्ती** सूत्रम्, **पिञ्जयन्ती** रुतम्, एतेभ्यो गाथाद्वयोपन्यस्तेभ्यो[3]ऽव्यक्तकादिभ्यः पिञ्जयन्तीपर्यन्तेभ्यो दातृभ्यो हस्तान्न ग्राह्या भिक्षा, **भइय** त्ति **भजना** विकल्पनाऽत्र कर्त्तव्या, एतदुक्तं भवति-कदाचिदेतेभ्योऽव्यक्तादिभ्यः पिञ्जयन्तीपर्यन्तेभ्यो दातृभ्यो हस्ताद् गृह्यते कदाचिन्न गृह्णात्यपि, **दगमाइणो दोस** त्ति एतेषु भुञ्जानादिदातृषु आचम**नोदक**प्रोज्झन**दोषः**, अव्यक्तादिष्वनेक उपघातादयः। प्रतिद्वारगाथाद्वयमेतत् ॥४६९-४७०॥

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवप्रतिपादनायाह –

**७९७ कप्पट्ठिग अप्पाहण दिन्ने अन्नन्नगहण पज्जत्तं ।**
**खंतिय मग्गण दिन्नं उड्डाह पदोस चारभडा ॥२४०॥ निभा०**

[A]तत्थ अव्वत्तो भण्णइ जाव अट्ठवरिसो जाओ, तस्स हत्थातो ण गिण्हियव्वं, को दोसो? इमो-एगा भद्दिगा, सा छेत्तं गया, तीए डहरिगा चेडी संदिसिज्जइ, जहा जती एज्ज पव्वइयगो तो तस्स भिक्खं देज्जाहि, तओ ताए गयाए आगओ भिक्खावेलाए पव्वइयगो, ताहे तेण सा चेडी भण्णइ-कहिं तुह अंबा गया ? सा भणइ–खेत्तं, सो भणइ-आणेहि भिक्खं, ताहे ताए [4]कूरादि दिण्णा, ताहे सो अण्णाणि वि जेमणाणि मग्गइ, ताहे सव्वं दिण्णं खीरं दहिं तक्कं , तओ चेव चउत्थरसिअं, तेण वि सव्वं गहेऊण पज्जत्तं काऊण निग्गओ, सा भद्दिगा आगया अवरण्हे ताहे सा खंतिया जेमणं मग्गइ, सा चेडी भणइ–पव्वइयस्स

A. तत्राऽव्यक्तो भण्यते यावदष्टवर्षो जातः, तस्य हस्तान्न गृहीतव्यम्, को दोषः ? अयम्- एका भद्रिका, सा क्षेत्रं गता, तस्या डहरगा (बालिका) चेटी सन्दिश्यते, यथा- यदि आगच्छेत् प्रव्रजितकः, तस्तस्य भिक्षां ददस्व, ततस्तस्यां गतायामागतो भिक्षावेलायां प्रव्रजितकः, तदा तेन सा चेटी भण्यते- कुत्र तवाम्बा गता ? सा भणति- क्षेत्रम्, स भणति- आनय भिक्षाम्, तदा तया कूरादि दत्ता, तदा सोऽन्यान्यपि जेमनानि मार्गयति, तदा सर्वं दत्तं क्षीरं दधि तक्रम्, ततश्चैव चतुर्थरसिकम्, तेनाऽपि सर्वं गृहीत्वा पर्याप्तं कृत्वा निर्गतः, सा भद्रिकाऽऽगता अपराह्णे तदा सा माता जेमनं मार्गयति, सा चेटी भणति- प्रव्रजितस्य मया दत्तम्, सा भणति- सुष्ठु कृतम्-

१. कण्डयन्ती । क २. भर्जयन्ति । क, ख ३. दातृभ्योऽव्यक्तादिभ्यः दा० ४. कूरो दिण्णा दा०

मए दिण्णं, सा भणइ-सुट्ठु कयं, कूरं आणेहि जेमेमि, सा भणति—दिण्णो पव्वइयगस्स, सा भणइ—सुट्ठु कयं, आणेहि कुसणं दधिदुद्धादि, सा भणइ—दिण्णं, सुट्ठु कयं, कंजिअं आणेहि, चेडी भणइ—तं पि दिण्णं, एत्थ सा भद्दिगा रुट्ठा भणति—कीस सव्वं देहि ? चेडी भणइ-सो मग्गइ, सा भणइ—चेडगरूवं परिभविऊण सव्वं घेत्तूण गओ, गया आयरियस्स पासं, तत्थ खिंसति-एस चारभडो इव सव्वं घेत्तूण आगओ, तत्थ वि आयरिएणं तीसे पुरओ चेव तस्स सव्वं उवकरणं [1]अक्खेअयव्वं, एते दोसा अव्वत्तगहत्थाओ गहणे" । द्वारम् ॥२४०॥

इदानीं अप्रभुद्वारमुच्यते (नि.४६९) —

**७१८ अप्पभु भयगाईया उभएगतरे पदोस [2]पभु कुज्जा ।**
**थेरे चलंत पडणं अप्पभुदोसा य ते चेव ॥२४१॥ निभा०**

**अप्पभु** गाहा । **अप्रभवो भृतकादय**स्तेषां हस्ताद्भिक्षा न ग्राह्या, यत **उभयोः** प्रव्रजितभृतकयोः **प्रद्वेषं कुर्यात्, एकतरस्य** वा प्रव्रजितस्य भृतकस्य वोपरि **प्रद्वेषं कुर्यात् प्रभुः**, द्वारम् । इदानीं स्थविरद्वारमुच्यते-**स्थविरस्या**पि हस्ताद्भिक्षा न गृह्यते, यतस्तस्य **चलतः** कम्पमानस्य **पतनं** भवति, **अप्रभुदोषाश्च [3]ते एव** स्थविरः प्रायेणाप्रभुर्भवति परिभूतत्वादिति । द्वारम् ॥२४१॥

[सम्प्रति बालादीनां हस्ताद्भिक्षाग्रहणे ये दोषाः सम्भवन्ति ते दर्शनीयाः, तत्र प्रथमतो बालमधिकृत्य दोषानाह —

**कब्बट्ठिग अप्पाहण दिन्ने अन्नन्न गहण पज्जत्तं ।**
**खंतिय मग्गणदिन्ने उड्डाह पओस चारभडा ॥५७९॥**

व्याख्या - काचिदभिनवा श्राद्धिका श्रमणेभ्यो भिक्षां दद्या । इति निजपुत्रिकाम् 'अप्पाहिऊणं' ति सन्दिश्य भक्तं गृहीत्वा क्षेत्रं जगाम, गतायां तस्यां कोऽपि साधुसङ्घाटको भिक्षार्थमागतः, तया च बालिकया तस्मै तण्डुलौदनो वितीर्णः, सोऽपि च सङ्घाटकमुख्यः साधुस्तां बालिकां मुग्धतरामवगत्य लाम्पट्यतो भूयो भूय उवाच-पुनर्देहि पुनर्देहीति, ततस्तया समस्तोऽप्योदनो

---

कूरमानय जेमामि, सा भणति- दत्तं प्रव्रजितस्य, सा भणति- सुष्ठु कृतम्, आनय तीमनं दधिदुग्धादि, सा भणति- दत्तम्, सुष्ठु कृतम्, आनय काञ्जिकम्, चेटी भणति- तदपि दत्तम्, अत्र सा भद्रिका रुष्टा भणति- कथं सर्वं दत्तम् ? चेटी भणति- स मार्गयति, सा भणति- चेटकरूपं परिभूय सर्वं गृहीत्वा गतः, गताऽऽचार्यस्य पार्श्वम्, तत्र खिंसति- एष चारभट इव सर्वं गृहीत्वाऽऽगतः, तत्रापि आचार्येण तस्याः पुरत एव तस्य सर्वमुपकरणमाक्षिप्तव्यम्, एते दोषा अव्यक्तकहस्ताद् ग्रहणे ।

१. अदक्खेयव्वं ख.प.पु. । २. पहु दा० ३. त एव भवन्ति, एतदुक्तं भवति दा०

दत्तः, तत एवमेवं मुद्गघृततक्रदध्यादिकमपि, अपराह्णे च समागता जननी, उपविष्टा भोजनाय, भणिता च निजपुत्रिका-देहि पुत्रि ! मह्यमोदनमिति, साऽवोचत्-दत्तः समस्तोऽप्योदनः साधवे, साऽब्रवीत्-शोभनं कृतवती, मुद्गान् मे देहि, सा प्राह-मुद्गा अपि साधवे सर्वे प्रदत्ताः, एवं च यद्यत् किमपि सा याचते तत्सर्वं साधवे दत्तमिति ब्रवीति, ततः पर्यन्ते काञ्जिकमात्रमयाचत, तदपि बालिका भणति-साधवे दत्तमिति, ततः साऽभिनवश्राद्धिका रुष्टा सती पुत्रिकामेवमपवदति-किमिति त्वया सर्वं साधवे प्रदत्तम् ? सा ब्रूते-स साधुर्भूयो भूयोऽयाचत ततो मया सर्वमदायि, ततः सा साधोरुपरि कोपावेशमाविशन्ती सूरीणामन्तिकमगमत्, अचकथच्च सकलमपि साधुवृत्तान्तम्, यथा भवदीयः साधुरित्थमित्थं मत्पुत्रिकायाः सकाशाद्याचित्वा याचित्वा सर्वमोदनादिकमानीतवानिति, एवं तस्यां महता शब्देन कथयन्त्यां शब्दश्रवणतः प्रातिवेश्मिकजनोऽन्योऽपि च परम्परया भूयान्मिलितो ज्ञातश्च सर्वैरपि साधुवृत्तान्तः, ततो विदधति तेऽपि कोपावेशतः साधूनामवर्णवादम्-नूनममी साधुवेषविडम्बिनश्चारभटा इव लुण्टाका न साधुसद्वृत्ता इति, ततः प्रवचनावर्णवादापनोदाय सूरिभिस्तस्याः सर्वजनस्य च समक्षं स साधुर्निर्भर्त्स्योपकरणं च सकलमागृह्य वसतेर्निष्काशितः, तत एवं तस्मिन्निष्काशिते श्राविकायाः कोपः शममगमत्, ततः सूरीणां क्षमाश्रमणमादायोक्तवती-भगवन् ! मा मन्निमित्तमेष निष्काश्यताम्, क्षमस्वैकं ममापराधमिति, ततो भूयोऽपि यथावत्साधुः शिक्षित्वा प्रवेशितः । सूत्रं सुगमम् । नवरम् 'उड्डाह पओस चारभडा' इति, लोके उड्डाहः, ततो लोकस्य प्रद्वेषभावतश्चारभटा इव लुण्टाका अमी न साधव इत्यवर्णवादः । यत एवं बालाद्भिक्षाग्रहणे दोषास्ततो बालान्न ग्राह्यमिति । [पिण्डनि.५७९]]

इदानीं पण्डकद्वारमुच्यते (नि.४६९) —

**७९९ आयपरोभयदोसा अभिक्खगहणंमि खुब्भण नपुंसे ।**
**लोगदुगुंछा संका एरिसगा [१]नूणमेते वि ॥२४२॥ निभा०**

**आयपरोभय** गाहा । नपुंसकान्न गृह्यते यत **आत्मनः परत उभयतश्च दोषाः** संभवन्ति, आत्मशब्देन साधुर्गृह्यते, तत एव को दोषः? **क्षोभणं** स्यात् बहुमोह**नपुंसक**दर्शने, **अभीक्ष्णम्,** तत्र भिक्षा**ग्रहणे**[२] च तद्वा, क्षुभ्यति अभीक्ष्णं साधुदर्शनादिना, उभयकृतो वा दोषः, **लोकश्च जुगुप्सते शङ्कते** च, **नूनमेतेऽपि** नपुंसकानीति । द्वारम् ॥२४२॥

मत्तद्वारमाह (नि.४६९) —

**८०० अवयास भाणभेदो वमणं असुइ त्ति लोगउड्डाहो ।**
**खित्ते य दित्तचित्ते जक्खाइट्ठे य दोसा उ ॥२४३॥ निभा०**

---

१. नूण एए वि ह० हे० २. ०ग्रहणेन तद्वा. क.

**अवयास** गाहा । सुरापानेन यो मत्तस्तस्य हस्ताद्भिक्षा न गृह्यते, किं कारणम्? यतः स मत्तो भिक्षां प्रयच्छन् कदाचि**दवयासं** करोत्यालिङ्गतीत्यर्थः । कदाचिद्वा **भाजनं** पात्रकं **भिनत्ति वमनं** वा तत्र छर्दनं करोति, तथा**ऽशुचिरिति** कृत्वा **लोक उड्डाहो** भवति प्रवचनोपघातः । द्वारम् । इदानीं द्वारत्रितयमुच्यते–[१]**व्याक्षिप्तचित्ते दीप्तचित्ते यक्षाविष्ट** एत एव **दोषा** आलिङ्गन-भाजनभेद-वमना-ऽशुचिप्रभृतयो भवन्तीति ॥२४३॥

इदानीं द्वारपञ्चकप्रतिपादनायाह (नि.४६९-४७०) –

**८०१ करच्छिन्न असुइ चलणे पडणं अंधिल्लए य छक्काया ।**
**नियलाऽसुइ पडणं वा [२]तद्दोसी [३]संकमे असुई ॥२४४॥ निभा०**

**करच्छिन्न** गाहा । **छिन्नकरो** यदि भिक्षां ददाति ततोऽपि न गृह्यते यतो**ऽशुचि**दोषो लोके भवति । द्वारम् । तथा यस्यापि चरणौ छिन्नौ तस्मादपि हस्ताद्भिक्षा न गृह्यते यतस्तस्य प्रयच्छतः **पतनं** भवति । द्वारम् । **अन्धाद**पि न गृह्यते यतोऽसौ प्रयच्छन् **षट् कायान्** व्यापादयति । दारं । **निगडित**पुरुषहस्तादपि न गृह्यते भिक्षा यतोऽसा**वशुचि**र्भवति, **पतनं वा** तस्य निगडबद्धस्य स्यात् । दारं । **त्वग्दोष**-दूषितस्यापि हस्तान्न गृह्यते यतः कदाचित्कुष्ठ**सङ्क्रमः** स्यात्, **अशुचि**श्चासौ वर्त्तते। द्वारम् ॥२४४॥

**८०२ गुव्विणि गब्भे संघट्टणा उ उट्ठिंत [४]निविसमाणी य ।**
**बालाई मंसुंडग मज्जाराई विराहिज्जा ॥२४५॥ निभा०**

**गुव्विणि** गाहा । **गुर्विणी**हस्तान्न गृह्यते [५]यतस्तस्या **गर्भे सङ्घट्टनं** भवति, कथम् ? **उत्तिष्ठन्त्याश्चोपवीशन्त्याश्च** । दारं । बालवत्साया अपि हस्तान्न गृह्यते भिक्षा, यतो बालं मुक्त्वा यदि भिक्षां ददाति ततस्तं **बालं मंसुण्डकादि**बुद्ध्या मांसपिण्डादिबुद्ध्या, आदिग्रहणान्नवनीतबुद्ध्या वा **मार्जारादिर्विराधयेत्** । द्वारम् ॥२४५॥

इदानीं द्वारपञ्चकप्रतिपादनायाह (नि.४७०) –

---

१. व्याक्षिप्तदृप्तचित्ते क. २. तद्दोसे हे० ह० ३. संकमो आ० ४. बइसमाणी ह० हे० निवेसमाणीए य.र. ५. यतो गर्भसंघट्टनं भवति । क, ख.

**८०३ बीएदगसंघट्टण[1] कंडण पीसंति[2] भज्जणे डहणं ।**
**कत्तंती पिंजंती हत्थे लित्तंमि उदगवहो ॥२४६॥ निभा०**

**बीएदग** गाहा । **कण्डयन्त्याः पिंषन्त्याश्च** हस्तान्न गृह्यते यतस्तत्र यथासङ्ख्येन एकस्या **बीजसङ्घट्टन**कृतो दोषोऽपरस्या **उदकसङ्घट्टन**कृतो दोषः । इति द्वारद्वयम्। याऽपि यवादीनां **भर्जनं** करोति तस्यापि हस्तान्न गृह्यते यतस्तत्र यवादि**दहन**कृतो दोषो भवति । दारं । तथा **कर्त्तयन्त्याः पिञ्जयन्त्याश्च** हस्तान्न गृह्यते यतस्तयोर्निष्ठीवन**लिप्तौ हस्तौ** भवतः, पुनश्च तत्प्रक्षालन **उदकवधो** भवति । द्वारद्वयम् ॥२४६॥

इदानीं यदुक्तमासीद्-"भजनया विकल्पेनैषामव्यक्तादीनां हस्ताद् गृह्यते न त्वेकान्तेनैवाग्रहणं किन्तु ग्रहणमपि" तत्प्रदर्शयति, तत्राद्यावयवभजनाप्रतिपादनायाह –

**८०४ भिक्खामित्ते अवियालणा[3] तु बालेण दिज्जमाणंमि ।**
**संदिट्ठे वा गहणं अइबहुय वियालऽणुन्नाए ॥४७१॥ नि०**

**भिक्खा** गाहा । **बालो** यदि **भिक्षामात्रं** परोक्षेऽपि ददाति ततो भिक्षामात्रे **दीयमानेऽविचारणया** गृह्णाति, अथाऽसौ बालो गृहपतिना प्रत्यक्षमेव **संदिष्ट** उक्तो यथा प्रयच्छास्मै साधवे भिक्षाम्, ततोऽसौ साधुर्गृह्णाति, अथाऽसौ बालोऽ**तिबहु** प्रयच्छति ततः साधुर्विचारयति[133] यदुत किमित्यद्यातिबहु दीयते ? एवमुक्ते सति यद्यसौ गृहस्थ एवं भणति–यदुताद्य प्राघूर्णकादिवशाद् बहु संस्कृतम्, ततोऽसौ साधुर्गृह्णाति उक्ताऽव्यक्तयतना ॥४७१॥

इदानीमप्रभुयतनोच्यते –

**८०५ अप्पहुसंदिट्ठे वा भिक्खामित्ते व गहणऽसंदिट्ठे ।**
**थेर पहु थरथरंते धरणं अहवा दढसरीरे ॥४७२॥ नि०**

**अप्पहु** गाहा । **अप्रभुर्भृतकादिर्यदि सन्दिष्टः** उक्तो भवति प्रभुणा ततस्तस्य हस्ताद्गृह्यते भिक्षा, यदा पुनर्न सन्दिष्टो नोक्तः स प्रभुणा यथा त्वया दातव्यम्, तत्र[4] **भिक्षामात्रस्यैव ग्रहणं** करोति । अप्रभुयतनोक्ता, इदानीं स्थविरयतनोच्यते–

१३३. विचारयति-पृच्छतीति । संटी.

१. दगबीए ह० हे० २. पीसंत ह० हे० ३. अवियालणं दा० ४. तस्मिन्नसन्दिष्टे सति दा०

[१]**स्थविरः** प्रभुर्यदि ददाति किंविशिष्टः ? कम्पमानः परेण **धृतः** सन् ततो गृह्यते, अथासौ स्थविरः प्रभु**र्द्रढशरीरो** ददाति तथापि गृह्यते । द्वारम् ॥४७२॥

इदानीं पण्डकादीनां यतनादर्शनायाह —

**८०६ पंडग अप्पडिसेवी मत्तो सड्ढो व अप्पसागरिए ।**
**खित्ताइ भद्दगाणं कर चर बिइऽप्पसागरिए ॥४७३॥ नि०**

**पंडग** गाहा । **पण्डकस्य** ददतो गृह्यते यद्यसा**वप्रतिसेवी** भवति— न कुत्सितं कर्म आचरति । दारं। **श्राद्धकस्य** च **मत्तस्य** हस्ताद् गृह्यते, यद्यसाव**ल्पसागारिको** भवेत्, **वा**शब्दादल्पमदश्च यदि स्याद् । दारं । तथा **क्षिप्त**चित्तदीप्तचित्तयक्षाविष्टानां हस्ताद् गृह्यते यदि प्रकृत्या **भद्रका** भवन्ति साधुवासनावन्त इत्यर्थः। द्वारत्रितयम्। तथा कररहितचरणरहितानां हस्ताद् गृह्यते, कथम् ? **चरण**रहितो यद्युपविष्टो ददाति **अल्पसागारिकं** च यदि भवति, **कर**रहितोऽपि **यद्यल्पसागारिके** ददाति ततो गृह्यते नान्यथा । द्वारद्वितयम् ॥४७३॥

इदानीमन्धादियतनाप्रदर्शनायाह —

**८०७ सड्ढो व अन्नरुंभण अंधे सवियारणा य बद्धंमि ।**
**तद्दोसिए अभिन्ने वेला थणजीवियं [२]थेरा ॥४७४॥ नि०**

**सड्ढो व** गाहा । **अन्धस्य** च हस्ताद् गृह्यते यदि **श्रद्धावानन्येना**कृष्यमाणो ददाति । दारं । **बद्धस्य च** हस्ताद् गृह्यते यदि स **सविचारो** भवति परिष्वष्कितुं शक्नोति । दारं । **त्वग्दोषदुष्टस्यापि** कुष्ठिनोऽपि हस्ताद् गृह्यते यद्यसा**वभिन्न**कुष्ठि भवति गलत्कुष्ठी न भवतीति । दारं । **वेले**ति गुर्विण्या यदि **वेला**मासस्ततस्तस्या हस्तान्न गृह्णन्ति स्थविरकल्पिका इतरत्र गृह्णन्ति, जिनकल्पिकादयस्तु यतः प्रभृत्यापन्नसत्त्वा भवति तत एवारभ्य न गृह्णन्ति । दारं । तथा **स्थविराः** स्थविरकल्पिकाः **स्तनोपजीवी** यो बालस्तद्युक्ता या बालवत्सा तस्या हस्तान्न गृह्णन्ति, जिनकल्पिकादयस्तु यावदपि बालस्तावदपि तां बालवत्सां परिहरन्ति, न तस्या हस्ताद् गृह्णन्ति । द्वारद्वयम् ॥४७४॥

इदानीं कण्डयन्त्यादियतनोच्यते —

---

१. स्थविरं ददाति कम्पमानः । क २. थेरे ह०

**८०८ उक्खित्तऽपच्चवाए कंडे पीसे वऽच्छूढ [1]भज्जन्ती ।**
**सुक्कं व पीसमाणी बुद्धीए विभावए सम्मं ॥४७५॥ नि०**

**उक्खित्त** गाहा । तत्र **कण्डयन्त्या** हस्ताद् गृह्यते **यद्युत्क्षिप्तं** मुशलमास्ते साधुश्च प्राप्तस्ततो**ऽप्रत्यपाये** स्थाने मुशलं स्थापयित्वा यदि ददाति । दारं । **पीसे व** त्ति [2]**पेषयन्त्या** हस्ताद् गृह्यते यदि तत्पेषणीयमचेतनं धानादि तथा यदि सचित्तं पूर्वं यत् प्रक्षिप्तं तत्पिष्टम्, अन्यदद्यापि न प्रक्षिप्यते [3]साधुश्च तत्रावसर उपस्थितो भिक्षार्थं ततस्तस्या हस्ताद् गृह्यते, तच्च पेषणं शिलायां घ[4]रट्टे वा । दारं । **अच्छूढ भज्जन्ती** ति **भर्जयन्त्या** अपि हस्ताद् गृह्यते यदि पूर्वप्रक्षिप्तं भृष्टम्, अन्यदद्यापि न प्रक्षिप्यते साधुश्च प्राप्तोऽस्मिन्नवसरे, **शुष्कं वा**ऽचेतनं तद्वस्तु यदि **पिनष्टि** ततश्च **बुद्ध्या विभाव्य** निरूप्योत्तरकालं गृह्णाति ॥४७५॥

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयति –

**८०९ मुसले उक्खित्तंमि य अपच्चवाए य पीस अच्चित्ते ।**
**भज्जंती अच्छूढे भुंजंती जा अणारद्धा ॥२४७॥ निभा०**

**मुसले** गाहा । **मुशल उत्क्षिप्ते** सत्य**प्रत्यपाये** प्रदेशे स्थापयित्वा यदि भिक्षां ददाति, **पीस अच्चित्ते** त्ति अचेतनं वा यदि घरट्टादौ **पिनष्टि** ततो ददाति भिक्षाम्, **भज्जंती**ति "[A]जवधाणे भट्ठंमि अण्णंमि अप्पक्खित्ते सति एयंमि अवसरंमि साहुणो भिक्खं देइ," **भुञ्जानाया** अपि हस्ताद् गृह्यते यद्यद्यापि न विट्टालयति भक्तं यत्तद्भाजनगृहीतं तदुत्थाय ददाति ॥२४७॥

**८१० कत्तंतीए थुल्लं विक्खिणणोरुणण जति य निट्ठवियं ।**
**पिंजण असोयवाई भयणागहणं तु एएसिं ॥४७६॥ नि०**

**कत्तंतीए** गाहा । तथा **कर्त्तयन्त्या** अपि हस्ताद् गृह्यते यदि **स्थूरम**सौ कर्त्तयति, किं कारणम् ? यतः [5]स्थूरमसौ कर्त्तयन्ती न शङ्खचूर्णेन हस्ताङ्गुलीः करोति, नापि निष्ठीवनेन, "[B]विक्खिणणं ति रूयं **विक्खिणंतीए** हत्थाउ घेप्पइ, तथा **ऊरुणणं**-लोढणं **यदि निट्ठवितं** लोढेयव्वयं तीए हत्थाओ भिक्खा घेप्पइ, एतदुक्तं भवति-

A. यवधान्यं भृष्टेऽन्यदप्रक्षिप्ते सत्येतस्मिन्नवसरे साधवे भिक्षां ददाति ।

B. विक्खिणणं ति रूतं, विक्ष्णुवत्या हस्ताद् गृह्यते, तथा उरुणणं- लोढणम्, यदि निष्ठितं लोढितव्यं तस्या

१. भुज्जन्ती ह० हे० २. पीषयन्त्या० क, ख. ३. साधुश्च भिक्षार्थमागतः दा० ४. अरहट्टे क. ५. स्थूलं कर्त्तन्ती न शङ्खचूर्णादिना हस्ताङ्गुलीं करोति । क

जो सो कप्पासघाणो लोढणीए दिन्नो, सो लोढितो अन्नो न अज्ज वि दिज्जति घाणो, एयाए वेलाए घिप्पइ भिक्षा देंतीए" । **पिञ्जयन्त्या** अपि हस्ताद् गृह्णाति यद्यसौ महेला **अशौचवादिनी** भवति न हस्तौ प्रक्षालयति । एव**मेषां** दातृणां हस्ता**द्ब्रजनया ग्रहणं** भवति । उक्ता प्रतिद्वारगाथा, तत्प्रतिपादनाच्चोक्तं दातृद्वारम् ॥४७६॥

इदानीं गमनद्वार(नि.४६४)प्रतिपादनायाह –

**८११ गमणं च दायगस्सा हेट्ठा उवरिं च होइ नायव्वं ।**
**संजमआयविराहण तस्स सरीरे य मिच्छत्तं ॥४७७॥ नि०**

**गमणं च** गाहा । **गमणं च** भिक्षादानार्थमभ्यन्तरप्रवेशस्तस्य **दातुरधस्ताद्** भुवि विज्ञेयम्, **उपरि च** उपरिविभागश्च[1] विज्ञेयः । यदि न निरूपयति ततस्तस्य गच्छतः पृथिव्यादिमर्दने सति साधोः **संयमविराधना** भवति, **आत्मविराधना** च **तस्य** दातुः **शरीरे** सर्पादिदशनजनिता भवति, अत एव **च** निमित्ताच्छ्राद्धः सन् **मिथ्यात्वं** यायाद् यदुतैवंविधस्य दत्तं येन तत्क्षण एव स दाता सर्पेण दष्ट इति ॥४७७॥

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**८१२ वच्चंती छक्काए पमद्दए [2]हिट्ठतो उवरि तिरियं च ।**
**फलवल्लिरुक्खसाला तिरिया मणुया य तिरियं तु ॥२४८॥ निभा०**

**वच्चंती** गाहा । **व्रजन्ती** सा स्त्री [3]भिक्षादात्री **षडपि कायान् प्रमर्दयेत्,** क्व? **अधस्ताद्** भुवि पृथिव्यप्तेजोवनस्पतित्रसान् व्यापादयेत्, वायुकायं कदाचिद् दृतौ स्थितं स्पृशन्ती व्यापादयेत्, तथो**परि तिर्यक् च** व्यवस्थिताः **फलवल्लीवृक्षशालाः** शाखा विराधयति, तथा **तिर्यग्मनुजान्** जातमात्र[4]बालकादीन् **तिरश्चो**ऽश्ववत्सकादीन् सङ्घट्टयेत् ॥२४८॥

अथ चैते दोषाः –

**८१३ कंटगमाई [5]व अहे उवरिं अहिमादिलंबणे आया ।**
**तस्स सरीर[6]विणासे मिच्छत्तुड्डाह वोच्छेओ ॥२४९॥ निभा०**

---

हस्ताद् भिक्षा गृह्यते, एतदुक्तं भवति- य स कार्पासघाणो लोढण्या दत्तः, स लोढितोऽन्यन्नाद्यापि दीयते घाणः, एतया वेलया गृह्यते भिक्षा ददत्या ।

१. ०रिभाग० क, ख २. हिट्ठ ह० हे० ३. भिक्षाया दात्री० क ४. ०बालकान् दा० ५. य अहे उप्पिं दा० ६. विणासो दा०

**कंटगमाई** गाहा । **कण्टकादयो वाऽधो** भवन्ति, **उपर्यह्यादि** सर्पादिल**म्बन आत्म**विराधना दातुः, **तस्य** च दातुः **शरीरविनाशे मिथ्यात्वं** तस्यान्यस्य वा भवति, **उड्डाहश्च** प्रवचनोपघातश्च भवति यदुत एतेषामेतावानपि प्रभावो नास्ति येन दातारं रक्षन्ति । व्याख्यातं गमनद्वारम् ॥२४९॥

इदानीं ग्रहणद्वार(नि.४६४)प्रतिपादनायाह –

**८१४ नीयदुवारेऽ[१]णुग्घाडकवाडे देहदारमाइण्णे ।**
**इड्डरपत्थियलिं[२]दे गहणं पत्तस्सऽपडिलेहा ॥४७८॥ नि०**

**नीयदुवार** गाहा । नीचद्वारं यदि भवति तत्र चक्षुषा निरूपणं कर्तुं न शक्नोति अतो न गृह्यते भिक्षा, तथो**द्घाटकपाटम**नर्गलितकपाटं **न** किन्तु पिहितकपाटम्, तत्रापि न गृह्णाति, यथा दातुः सम्बन्धिना **स्वदेहेन द्वारे** रुद्धे सति न गृह्यते, **आकीर्णं** वाऽन्यपुरुषैर्गमागमं कुर्वद्भिः, तथा [३]**इड्डरं** गन्त्र्याः सम्बन्धि तेन तिरोहिते, **पत्थिका** बृहती पिठिका तया वा तिरोहिते, **अलिन्दं** कुण्डकं तेन वा तिरोहिते द्वारे सति, एवमेतेषु दोषेषु सत्सु **ग्रहणं प्राप्तस्य** गृहस्थस्य गृह्यतेऽस्मिन्निति ग्रहणम्, यस्मात्प्रदेशाद्दण्डकं गृह्णाति तं प्रदेशं प्राप्तस्य **अपडिलेह** त्ति यतः प्रत्युपेक्षणा न शुद्ध्यत्यनन्तरोदितैर्दोषैरतो न गृह्यते भिक्षा, यद्येभिरनन्तरोदितैर्दोषैर्भवद्भिर्न ग्रहणं ततो ग्रहणप्रदेशं प्राप्तस्य गृहस्थस्य प्रत्युपेक्षणा कर्त्तव्या, श्रोत्रादिभिरुपयोगं करोति यदि श्रोत्राद्युपयोगेन शु[४]द्धा ततो ग्रहीष्यति, अथ न शुद्धा श्रोत्राद्युपयोगेन ततो न ग्रहीष्यति ॥४७८॥

इदानीं भाष्यकारः प्रतिपदमेनामेव गाथां व्याख्यानयति, तत्र कथं जिनकल्पिकादयो गृह्णन्ति कथं वा स्थविराः ? इत्येतत्प्रदर्शयन्नाह –

**८१५ नियमा उ दिट्ठगाही जिणमाई गच्छनिग्गया होंति ।**
**थेरा वि दिट्ठगाही अदिट्ठि करेंति उवओगं ॥२५०॥ निभा०**

**नियमा उ** गाहा । **नियमादवश्यन्तयैव दृष्टग्राहिणो जिना** जिनकल्पिका न नीचद्वारादितिरोहिते गृहद्वारे ते गृह्णन्ति यतस्ते **जिन**कल्पिकादयो **गच्छनिर्गताः** परित्यक्तगच्छा **भवन्ति, स्थविराः** स्थविरकल्पिका **अपि दृष्टग्राहिण** एव, अतिरोहितद्वार एव गृहे गृह्णन्ति, किमयमेव नियमः ? नेत्याह-**अदृष्टे** तिरोहिते

१. ०रुग्घाडकवाडे त.ध.य. २. लंदे हे० ह० ३. इड्डुरः क. ४. शुद्धं क.

गृहद्वारे कपाटादिनो**पयोगं** श्रोत्रादिभिरिन्द्रियैर्दत्त्वा ततः परिशुद्धं गृह्णन्ति ॥२५०॥

इदानीं '[1]नीयदुवारुग्घाडकवाडे'त्ति (नि.४७८) व्याख्यानयन्नाह –

**८१६ नीयदुवारुवओगे उड्डाह अवाउडा पदोसो य ।**
**हियनट्ठंमि य संका एमेव कवाडउग्घाडे ॥२५१॥ निभा०**

**णीयदुवार** गाहा । नीचद्वारे गृहे न ग्राह्यं यतस्तत्र **नीचद्वारे** निष्कुटनं कृत्वो**पयोगं** निरीक्षणं कुर्वत **उड्डाहः** पश्चाद्भागदर्शनेऽपानपेलादिदर्शने सति कदाचित्त**त्राप्रावृताः** स्त्रियस्तिष्ठन्ति ततश्च निरूपयतः **प्रद्वेष**मुपरि कुर्वन्ति, तथा **हृते** चौरादिना **नष्टे** स्वयमेवादृश्यमाने क्वचिद्वस्तुनि **शङ्को**पजायते गृहस्थानां "[A][2]जहा तेण पव्वइएणं निउडिऊण निरूवियं आसी जदि तेण हियं भवे ?" **एवमेव** च एत एव दोषाः पिहित**कपाटे** निरर्गल**मुद्घाटयतो**ऽप्रावृतिकादयः ॥२५१॥

**८१७ देहऽन्नसरीरेण व दारं पिहिअं जणाउलं वावि ।**
**इड्डरपत्थियलिं[3]देण वावि पिहियं तहिं वावि ॥२५२॥ निभा०**

**देहन्नसरीरेण** गाहा । दातु**र्देहेन द्वारं पिहितं** स्थूलत्वाद्देहस्या**न्यस्य वा** पार्श्वस्थस्य **शरीरेण द्वारं पिहितम्**। द्वारम् । आकीर्णं(नि.४७८) व्याख्यानयति–**जनाकुलं वा** द्वारं निर्गच्छता प्रविशता वा लोकेन, तथा **इड्डरेण** गन्त्रीसम्बन्धिना **पत्थिकया** बृहत्पिट्टिकया [4]**अलिन्देन** कुण्डकेन **वा स्थगितं** द्वारं भवेत्, **तहिं वावि** त्ति **तत्र वा** इड्डरादौ स्थगितं तद् द्रव्यं भवेत्ततश्च न गृह्यते ॥२५२॥

**८१८ एतेहिं अदीसमाणे अग्गहणं अहव कुज्ज उवओगं ।**
**सोतेण चक्खुणा घाणओ य जीहाए फासेणं ॥२५३॥ निभा०**

**एतेहिं** गाहा । **एभिर**नन्तरोदितै**रदृश्यमाने**ऽचक्षुर्दर्शने **सत्यग्रहणं** भवति, **अथवा** दृश्यमानेऽ**प्युपयोगं कुर्यात्**, कैरित्याह-**श्रोत्रेण चक्षुषा घ्राणतो जिह्वया स्पर्शेन चेति** ॥२५३॥

कथं श्रोत्राद्युपयोगं करोति ?

**८१९ हत्थं मत्तं च धुवे सद्दो उदकस्स अहव मत्तस्स ।**
**गंधेण कुलिंगाई तत्थेव रसो फरिसबिंदू ॥२५४॥ निभा०**

---

A. यथा तेन प्रव्रजितेन निष्कुटनं कृत्वा निरूपितमासीद् यदि तेन आहृतं भवेत् ।

१. नीयदुवारकवाडे-ख. २. यदा तेण क, यदुत दा० ३. लंदेण हे० ह० ४. अलन्देन० क, ख.

**हत्थं** गाहा । **हस्तं मात्रं** वा [१]कुण्डेलिका सा गृहस्था प्रक्षालयेत्ततश्चो**दकस्य** झलज्झला**शब्दो** भवति, **अथवा मात्रकस्य** कुण्डेलिकादेः प्रक्षाल्यमानस्य खसखसाशब्दो भवति, तथा घ्राणेनोपयोगं करोति, कदाचित् **कुलिङ्गः**-द्वित्रीन्द्रियादि-मर्दितो भवेदागच्छन्त्या, एतच्च **गन्धेन** जानात्यशोभनेन, ततश्च न गृह्णाति, यत्र गन्ध**स्तत्र रसो**ऽपीति रसेन जानाति, तथा **स्पर्शेन** चोपयोगं ददाति, कदाचिदुदक-**बिन्दु**र्लगति शीतलः, चक्षुषा तूपयोगं ददाति गमनागमने प्राप्तस्य च द्रव्यस्य हस्तस्य भाजनस्य वा, मा भूदुदकसंस्पृष्टं स्यात् ॥२५४॥

**८२० सो होइ दिट्ठगाही जो एते जुंजई पदे सव्वे ।**
**निस्संकिय निग्गमणं [२]आसंकपयंमि संचिक्खे ॥२५५॥ निभा०**

**सो होइ** गाहा । **स** एवंविधो **दृष्टग्राही भवति य एतानि पदानि** स्थानान्तराणि पूर्वोक्तानि **प्रयुङ्क्ते** उपयोगपूर्वकं **सर्वाणि,** अथ **निःशङ्कित**मेव भवति यदुतानेन गृहस्थेन पुरःकर्मादि कृतं तत्र वारयित्वा **निर्गच्छन्ति,** अथ शङ्कितं भवति [३]किमनेन पुरःकर्मादि कृतं नवेतीत्थ**माशङ्कायां** निरूपयति प्राप्तां सतीं गृहस्थाम् । उक्तं ग्रहणद्वारम् ॥२५५॥

इदानीमागमनद्वार(नि.४६४)प्रतिपादनायाह —

**८२१ आगमण दायगस्सा हिट्ठा उवरिं च होइ जह [४]पुव्विं ।**
**संजमआयविराहण दिट्ठंतो [५]होइ वच्छंमि ॥४७९॥ नि०**

**आगमण** गाहा । **आगमनं** भिक्षां गृहीत्वा साध्वभिमुखमागच्छन्त्या **अधस्तादुपरि च** निरूपणीयमागमनं **यथा पूर्वं** गमने **संयमात्मविराधने** निरूपिते, एवमत्रापि संयमात्मविराधने निरूपणीये । उक्तमागमनद्वारम् । इदानीं पत्ते त्ति द्वारप्रतिपादनायाह-**दिट्ठंतो होइ वच्छंमि,** अत्र प्राप्तायां भिक्षायां दात्र्यां **वत्सकेन दृष्टान्तो** वेदितव्यः । "[A]जहा एगस्स वाणियस्स वच्छओ तद्दिवसं तस्स संखडी न कोइ तस्स भत्तपाणियं देइ, मज्झण्हे वच्छएण रडियं, सुण्हाए से अलंकियविभूसियाए दिण्णं भत्तपाणं,

A. यथैकस्य वाणिजस्य वत्सकः, तद्दिवसं तस्य सङ्खडी, न कश्चित्तस्य भक्तपानीयं ददाति, मध्याह्ने वत्सकेन रटितम्, स्नुषया तस्याऽलङ्कृतविभूषितया दत्तं भक्तपानम्, यथा तस्य वत्सस्य चार्यां दृष्टिर्न महिलायाम्, एवं साधुनाऽपि कर्तव्यम् ।

१. कुण्डलिकादि सा गृहस्थी क २. आसंककयंमि ह० हे० ३. किं मन्ये कृतं पुरः कर्मादि किं वा नेति क० ४. पुव्वं हे० ह० ५. वणियवच्छेणं य. सं.

जहा तस्स वच्छस्स चारीए दिट्ठी ण महिलाए, एवं साहुणा वि कायव्वं" ॥४७९॥

अहवा –

**८२२ पत्तस्स उ पडिलेहा हत्थे मत्ते तहेव दव्वे य ।**
**उदउल्ले ससिणिद्धे संसत्ते चेव परियत्ते ॥४८०॥ नि०**

**पत्तस्स उ** गाहा । **प्राप्तस्य** गृहस्थस्य **प्रत्युपेक्षणा** कार्या हस्ते, किमयं **हस्तो**ऽस्य उदकाद्यार्द्रो न वेति, तथा **मात्रकं** च कुण्डेलिकादि गृहस्थसत्कं निरूपयति यत्र गृहस्था भिक्षामादाय निर्गता, **द्रव्यं च** मण्डकादि निरूपयति संसक्तं न वेति। एवं पत्तदारं निज्जुत्तिकारेण वक्खाणियं, इदानीं निर्युक्तिकार एव परियत्ते त्ति द्वारं- (नि.४६४) व्याख्यानयन्नाह-**परिवर्त्तिते**[१]ऽधोमुखे कृते सति गृहस्थेन **मात्रके** कुण्डेलिकादौ **यद्युदकार्द्रं** दृश्यते **सस्निग्धं** वोदकेनैव **संसक्तं** वा[२] त्रससंयुक्तं ततोऽत्र मात्रके **परिवृत्ते** सति दृष्ट्वा न गृह्यते ॥४८०॥

इदानीं भाष्यकारः 'पत्ते'त्ति (नि.४६४) व्याख्यानयन्नाह –

**८२३ तिरियं उड्डमहे वि य भायणपडिलेहणं तु कायव्वं ।**
**हत्थं मत्तं दव्वं तिन्नि वि पत्तस्स [३]पडिलेहे ॥२५६॥ निभा०**

**तिरियं** गाहा । गृहस्थभाजनस्यागच्छत एव **तिर्यक्** पार्श्वतो भाजनस्य **ऊर्ध्वं** कर्णकेषु **भाजनस्य अधो** बुध्ने **प्रत्युपेक्षणा कर्त्तव्या,** तथा **प्राप्तस्य** आसन्नीभूतस्य गृहस्थस्य **हस्तं मात्रकं द्रव्यं त्रीण्यप्ये**तानि गृहस्थसत्कानि [४]**प्रत्युपेक्षेत** निरूपयेत् ॥२५६॥

किम् ? –

**८२४ ससिणिद्धोदउल्ले तसाउलं मा गिण्ह एगंतरं दट्ठुं ।**
**परियत्तियं च मत्तं ससिणिद्धाईसु पडिलेहा ॥२५७॥ निभा०**

**ससिणिद्धो** गाहा । **सस्निग्धं** तोयेनु**दकार्द्रं त्रसाकुलं** च हस्तं मात्रं द्रव्यं वा **दृष्ट्वा, एकतरमपि** तन्मा **गृहाण** । 'पत्ते'त्ति द्वारमुक्तम् । इदानीं भाष्यकार एव 'परियत्ते'त्ति (नि.४६४) व्याख्यानयन्नाह-**'परियत्तियं च मत्तं' परावर्त्तितं** सद् गृहस्थ**मात्रकं** कदाचित्सस्निग्धादिसमन्वितं भवति ततश्च **सस्निग्धादिषु** सत्सु

---

१. पर्यस्तिते क, ख २. मात्रकं ततस्तस्मिन्नेवंविधे मा० दा० ३. पडिलेहा दा० ४. प्रत्युपेक्षयेत् दा०

**प्रत्युपेक्षणा** कर्त्तव्या। उक्तं परावर्त्तितद्वारम् ॥२५७॥

इदानीं 'पाडिय'त्ति द्वारं (नि.४६४) व्याचिख्यासुराह –

**८२५ पडिओ खलु दट्ठव्वो कित्तिम साभाविओ व जो पिंडो ।**
**संजमआयविराहण दिट्ठंतो सेड्डिकप्पट्ठो[1] ॥४८१॥ नि०**

**पडिओ खलु** गाहा । **पतितः** पात्रके पिण्डो **द्रष्टव्यः** किमयं **कृत्रिमः** ? योगेन निष्पन्नः सक्तुमुद्गपिण्ड इव सिद्धपिण्डो वा किं **स्वाभाविक**कूरखोट्ट **इव**, तत्र यदि कृत्रिमं पिण्डं स्फोटयित्वा न निरूपयति ततः **संयमात्मविराधना** भवति, यथा **सेड्डिकप्पट्ठस्स** हृता काष्ठेन कुण्डिका इत्येतत्कथानकमनुस्मरणीयम्[2], तेन हि संयोगपिण्डो न निरूपितस्तत्र च सङ्कलिकाऽऽसीत्, तत्र राजकुले व्यवहारस्तेन च **कार्ष्ठर्षिणा** भगवता निर्व्यूढम्, अन्यश्च कदाचित्तादृशो न भवति ततश्च निरूपणीय इति ॥४८१॥

तत्रात्मविराधनादिप्रतिपादनायाह –

**८२६ गर विस अट्ठिय कंटा विरुद्धदव्वंमि होइ आयाए ।**
**संजमओ छक्काया तम्हा पडियं विगिंचिज्जा ॥४८२॥ नि०**

**गर विस** गाहा । स गर उच्यते य आहारं स्तम्भयति कार्मणं वा **गरः**, स कदाचित्तत्र पिण्डे भवति, तथा **विषमस्थीनि कण्टकाश्च** कदाचिद्भवन्ति, [3]**विरुद्धं** वा किञ्चिद् द्रव्यं तत्र भवति, ततश्चानिरूपणे एभि**रात्म**विराधना **भवति, तथा संयमतश्च षट्काया** विराध्यन्ते, कथम् ? कदाचित्तत्र पृथिवी उदकं वनस्पतिरग्निर्वा लग्नो भवति, यत्राग्निस्तत्र वायुरपि, द्वीन्द्रियादयश्च कदाचिद्भवन्ति, ततश्च **पडियं विगिंचिज्जा** विभागेन विभजेत निरूपयेदित्यर्थः ॥४८२॥

अथवाऽनाभोगेन कदाचित्तत्र सुवर्णादि स्थापयित्वा ददाति, एतदेवाह –

**८२७ अणभोगेण भएण व पडिणी उम्मीस भत्तपाणंमि ।**
**दिज्जा हिरण्णमाई आवज्जण संकणा दिट्ठे ॥४८३॥ नि०**

**अणभोगेण** गाहा । **अनाभोगेन** ददाति तन्दुलादिमध्ये व्यवस्थितं सुवर्णादि पुनश्च रन्धयित्वा तद् ददात्यनाभोगेन प्रदानं भवति, **भयेन वा** ददाति, कथम् ?

---

१. कप्पट्ठे ह० हे० २. ०नुसरणीयं, दा० ३. विरुद्ध व एवमादि आ.सं. विरुद्धं वा एवमादि आ.र.

कयापि कस्यचित्परसत्कं सुवर्णमपहृतं पुनश्च प्रत्याकलिता सती कलिकलङ्क-भयात्साधोर्वेष्टयित्वा ओदनादिना ददाति, **प्रत्यनीकत्वेन** वो**न्मिश्र्यै**कीकृत्य **भक्तपानादिना** सह **हिरण्यादि ददाति,** ततश्च तस्य साधोरेतद्दोषं विनाऽपि यदि न निरूपयति ततः **आवज्जणं** ति **आवर्जनं** पूर्वोक्तं संयमविराधनादिदोषाणां भवति, प्रमादपरत्वात्तस्य, तथा **शङ्कना दृष्टे** तस्मिन् सुवर्णादौ राजप्रभृतीनां शङ्का भवति, यदुत न विद्मः किं तावदयं साधुरेवंविध आहोस्विद् भिक्षादातेति । तस्मात्पतितः सन् पिण्डो निरूपणीयः । इत्युक्तं पतितद्वारम् ॥४८३॥

इदानीं गुरुकद्वार(नि.४६४)प्रतिपादनायाह –

**८२८ उक्खेवे निक्खेवे महल्लया लुद्धया वहो[1] दाहो ।**
**अचियत्ते वोच्छेओ छक्कायवहो य गुरुमत्ते ॥४८४॥ नि०**

**उक्खेवे** गाहा । यत्पाषाणादिघट्टनं दत्तं तस्यो**त्क्षेपे** सति **निक्षेपे** वा मोक्षणे सति तस्य गृहस्थस्य कटिभङ्गो वा पादस्योपरि पतनं वा भवति । **महल्लया** इति **महत्**प्रमाणं वा तद् गृहस्थभाजनं तस्योत्क्षेपे निक्षेपे सति दोषा भवन्ति, अथवा **महल्लया** इति **महता** भाण्डकेन दीयतामित्येवं कदाचिदसौ साधुर्भणति, ततश्च **लुब्धता** साधोरुपजायते, तथा वधश्च तस्यैव साधोः पादस्योपरि पतितेन भण्डकेन गृहस्थस्य वा पादस्योपरि पतितेन **वधो** भवति, तथा **दाहो** त्ति **दाहो** वा भवति यदि तदुष्णं भण्डकं भवति, अचियत्तं वा भवति तस्यैव गृहस्थस्य तद् गृहपतेर्वा **अचियत्तं** वा अप्रीतिर्वा भवति, महाप्रमाणकेन भण्डकेन दीयमाने सति **व्यवच्छेदो** वा तद्द्रव्यस्यान्यद्रव्यस्य वा भवति, **षट्कायवधश्च** भण्डकपतने सति भवति, एवं **गुरुके** भण्डक एते दोषा भवन्ति ॥४८४॥

एतामेव गाथां भाष्यकृदाह, आद्यावयवमाह –

**८२९ गुरुदव्वेण व पिहिअं सयं व गुरुयं हवेज्ज जं दव्वं ।**
**उक्खेवे निक्खेवे कडिभंजण पाय उवरिं वा ॥२५८॥ निभा०**

**गुरु** गाहा । **गुरुद्रव्येण वा पिहितं** घट्टितं तद् द्रव्यं भवेत्, **स्वयं** वा[2] तद् द्रव्यं गुडपिण्डकादि **गुरुकं भवेत्**, ततश्च तस्यो**त्क्षेपे** उत्पाटने **निक्षेपे** च पुनर्मोचने सति **कटिभङ्गो** भवति, **पादस्य वोपरि** पतेत्ततश्चात्मविराधना भवति ॥२५८॥

---

१. वहे ह० हे० २. वा द्रव्यं गुडपिण्डादि क, ख.

इदानीं महल्लयादीनि (नि.४८४) व्याख्यानयन्नाह –

**८३० महल्लेण देहि मा डहरएण भिन्ने अहो इमो लुद्धो ।**
**उभएगयरे व वहो दाहो [१]अच्चुसिणि एमेव ॥२५९॥ निभा०**

**महल्लेण** गाहा । कश्चित्साधुः कडुच्छुकिकया ददतीं स्त्रियं एवं ब्रूते—यदुत **महल्लेण बृहता भाजनेन** स्थाल्यादिना **देहि, मा डहरकेण** लघुना प्रयच्छ कडुच्छुकादिना, ततः सा तथैव करोति, अशक्नुवन्त्याश्च कदाचित्तद्भाजनं भज्यते ततश्च **भिन्ने** सति तस्मिन् भाजने गृहस्थ एवं भणति-यदु**ताहो ! अयं** साधुर्महा**लुब्धः,** येन बृहता भाजनेन दीयमानं गृह्णाति, तत **उभयस्य** साधोर्गृहस्थस्य पादस्योपरि पतितेन भण्डकेन **वधो** भवति, **एकतरस्य वा वधो** भवति, तथा **दाहश्चात्युष्णे** तस्मिन् द्रव्ये पतिते सति भवति, **एमेव** त्ति उभयोरन्यतरस्य वा ॥२५९॥

इदानीं 'अचियत्ते'त्ति (नि.४८४) व्याख्यानयन्नाह –

**८३१ बहुगहणे अचियत्तं वोच्छेओ तदन्नदव्व तस्स वावि ।**
**छक्कायाण य वहणं अइमत्ते तंमि मत्तंमि ॥२६०॥ निभा०**

**बहुगहणे** गाहा । **बहुग्रहणे** सति तस्य घृतादिद्रव्यस्य **अचियत्तं**[२] अप्रीतिर्भवति तद्गृहपते**र्व्यवच्छेदो** वा, **तदन्यद्रव्यस्य** भवति तस्य घृतादेः, अन्यत्तदन्यक्षीरगुडादि तस्य व्यवच्छेदो भवति, तस्य वा घृतादेर्द्रव्यस्य वा व्यवच्छेदो भवतीति, तथा **षट्कायानां वधनं** भवत्य**तिमात्रे** बृहत्प्रमाणे **मात्रके** स्थाल्यादौ गृहीते सति । उक्तं गुरुकद्वारम् ॥२६०॥

इदानीं त्रिविधेतिद्वारं (नि.४६४) प्रतिपादनायाह –

**८३२ तिविहो य होइ कालो गिम्हो हेमंत तह य वासासु ।**
**तिविहो य दायगो खलु थी पुरिस नपुंसओ चेव ॥४८५॥ नि०**

**तिविहो** गाहा । **कालस्त्रिविधो भवति,** तद्यथा-**ग्रीष्मो हेमन्तो वर्षा च,** तत्र त्रिविधेऽपि काले **दाता त्रिविध एव** भवति, तद्यथा-**स्त्री पुमान्नपुंसकं चे**ति ॥४८५॥

**८३३ एक्केक्को वि य तिविहो तरुणो तह मज्झिमो य थेरो य ।**
**सीयतणुओ नपुंसो सोम्हित्थी मज्झिमो पुरिसो ॥४८६॥ नि०**

---

३. अच्चुण्हि दा० अचुण्हे त. १. ०यत्तं भवति तद् गृहपतेर्व्यवच्छेदो, क, ख.

**एक्केक्को** गाहा । स पुनरे**कैकः** स्त्र्यादिदाता **त्रिविधो** भवति-**तरुणो मध्यमः स्थविरश्च** । इदानीं नपुंसकादीनां स्वरूपप्रतिपादनायाह**—शीतलतनुर्नपुंसको** भवति, **सोम्हित्थि** त्ति **सोष्मा स्त्री** भवति, **मध्यमश्च पुरुषो** भवति नात्युष्णो नातिशीतल इति ॥४८६॥

**८३४ पुरकम्मं उदउल्लं ससिणिद्धं तं पि होइ तिविहं तु ।**
**इक्किक्कं पि य तिविहं सच्चित्ताचित्तमीसं तु ॥४८७॥ नि०**

**पुरकम्मं** गाहा । न केवलं कालादयस्त्रिविधा यच्च पुरःकर्मादि **तदपि त्रिविधम्,** तद्यथा-**पुरःकर्म उदकार्द्रं सस्निग्धं** चेति, तत्पुनरे**कैकं त्रिविधं सचित्ताचित्त-मिश्र**भेदभिन्नं **भवति,** एतदुक्तं भवति-यत्पुरःकर्म तत्सचित्तमचित्तं मिश्रं चेति, यदपि उदकार्द्रं तदपि सचित्तमचित्तं मिश्रं चेति, यदपि सस्निग्धं तदपि सचित्तमचित्तं मिश्रं चेति ॥४८७॥

इदानीं यदुक्तं पुरःकर्मादित्रितयं तत्राद्यद्वयस्य प्रतिषेधं कुर्वन्नाह –

**८३५ [१]आदिदुवे पडिसेहो पुरओ कयं जं तु तं पुरेकम्मं ।**
**उदउल्लबिंदुसहिअं ससणिद्धे मग्गणा होइ ॥४८८॥ नि०**

**आदिदुवे** गाहा । [२]**आदिद्विकस्य** पुरःकर्मण उदकार्द्रस्य च **प्रतिषेधो** द्रष्टव्यः, यतस्ताभ्यां सदोषत्वान्नैव व्यवहार इति। इदानीं पुरःकर्मादीनां लक्षणप्रतिपादनायाह-**पुरओ कयं जं तु तं पुरेकम्मं** । [३]पुरतः कृतं यत्तत् पुरःकर्म, भिक्षायाः **पुरतः** प्रथममेव **यत्कृतं** कर्म क[४]टुच्छुकादीनां प्रक्षालनादि **तत्पुरःकर्मा**भिधीयते, **उदकार्द्रं** पुनरुच्यते **यद्बिन्दुसहितं** भाजनादि गलद्बिन्दुरित्यर्थः, सस्निग्धं पुनरुच्यते यद्बिन्दु-रहितमार्द्रं च, तत्रेह **सस्निग्धे मार्गणा** अन्वेषणा कर्त्तव्या यतः सस्निग्धे हस्तादौ ग्रहणं भविष्यत्यपि ॥४८८॥

**८३६ [५]ससिणिद्धं पि य तिविहं सचित्ताचित्तमीसगं चेव ।**
**अचित्तं [६]पुण ठप्पं अहिगारो मीससच्चित्ते ॥४८९॥ नि०**

**ससिणिद्धं** गाहा । यत**त्सस्निग्धं** तत्त्रिविधं-**सचित्तमचित्तं मिश्रं चे**ति । तत्रा**चित्तं स्थाप्यं** यतस्तत्राचित्तसस्निग्धे ग्रहणं क्रियत एव न तत्र निरूपणा, **अधिकारः**

---

१. आदिदुगे य. २. आद्यद्वयस्य - दा० आदिद्वितस्य ख ३. भिक्षायाः - दा० ४. कडुच्छुकादिप्रक्षा० दा. ख.
५. ससणिद्धं पि ह० हे० ६. पि य ह०

पुनर्निरूपणं **मिश्रसचित्तयोः कर्तव्यम्** ॥४८९॥

इदानीं मिश्रसच्चित्तसस्निग्धे हस्ते सति ग्रहणविधिं प्रतिपादनायाह –

**८३७ पव्वाण किंचि [१]अव्वाणमेव किंचिच्च होअणुव्वाणं ।**
**पाएण हि तं सव्वं एक्केक्कहाणी य वुड्ढी य ॥४९०॥ नि०**

**पव्वाण** गाहा । तत्र हस्ते सस्निग्धं **किञ्चित् प्रम्लानं** मनाक्शुष्कं तथा **अव्वाणं** ति **आव्यानमुद्वानं** किञ्चित्स्निग्धं [२] **किञ्चिच्च होअणुव्वाणं** ति **किञ्चिच्च** स्निग्धमनाव्यान**मनुद्वानं** च, त्रिविधमप्येत**त्सर्वं प्रायेण** सस्निग्धमुच्यते, एवमेतद्विभाव्य तत **एकैक**शुष्कभाग**वृद्ध्या** ग्रहणं कर्त्तव्यं पूर्वानुपूर्व्या, तथा **एकैक**शुष्कभाग**हान्या** पश्चानुपूर्व्या गृह्णाति भिक्षाम् ॥४९०॥

सा एकैकभागवृद्धिः कथं कर्त्तव्येत्यत आह –

**८३८ सत्तविभागे उ करं विब्भावइत्ताण इत्थिमाईणं ।**
**निच्चुन्नएयरे वि य पव्वे रेहा करतले य ॥४९१॥ नि०**

**सत्त** गाहा । **सप्त विभागान्** सप्तधा वा **करं** हस्तं विभज्य **विभागीकृत्य,** केषाम् ? **स्त्र्यादीनाम्,** एते विभागा एतानङ्गीकृत्य कर्त्तव्या, के च ते ? **निम्नोन्नतेतरान्** तत्र निम्नं त्वङ्गुलि**पर्वरेखा उन्नतम**ङ्गुलिपर्वाणि इतरत् **करतलं** नोन्नतं नापि निम्नम् ॥४९१॥

इदानीं केन शुष्केण प्रदेशेन कः प्रदेशः प्रम्लानो भवति ? केन वा प्रम्लानेन प्रदेशेन कः सार्द्रः प्रदेशो भवतीत्यस्यार्थस्य ज्ञापनार्थमाह –

**८३९ जाहे य उन्नयाइं उव्वाणाइं हवंति हत्थस्स ।**
**ताहे तलपव्वाणा लेहा पुण होंतऽणुव्वाणा ॥४९२॥ नि०**

**जाहे य** गाहा । **यदोन्नतानि हस्तस्थानान्युद्वानानि भवन्ति तदा** हस्त**तलं प्रम्लानं** मनाक् शुष्कं भवति **रेखास्तु भवन्त्यनुद्वानाः** ॥४९२॥

इदानीं शुष्कहस्तस्थानानामेकैकवृद्ध्या यथा यस्मिन् काले ग्रहणं भवति तथा प्रदर्शयन्नाह –

---

१. उव्वाणमेव ह० हे० २. त्सस्निग्धं । क

**८४० तरुणित्थि एक्कभागे पव्वाणे होइ गहण गिम्हासु ।**
**हेमंते दोसु भवे तिसु [१]पव्वाणेसु वासासु ॥४९३॥ नि०**

**तरुणित्थि** गाहा । **तरुण्याः स्त्रिय** उन्नतसप्त**मैकभागे प्रम्लाने** शुष्के सत्युष्णकाले गृह्यते भिक्षा यतः स्वोष्मतया कालस्य चोष्णतया यावता कालेनासावुन्नतप्रदेशः शोषमुपगतस्तावता कालेनेतरेऽपि निम्नप्रदेशाः सार्द्रा अपि अचित्ताः सञ्जाता अतः कल्पते भिक्षा**ग्रहणम्**, **हेमन्त**काले तस्या एव तरुण्या **द्वयोः** सप्तमभागयोः शुष्कयोः सतोर्भिक्षाग्रहणं **भवेदि**ति, तस्या एव तरुण्या **वर्षा**काले **त्रिषु** सप्तमभागेषु शुष्केषु सत्सु भिक्षाग्रहणं भवति ॥४९३॥

**८४१ एमेव मज्झिमाए आढत्तं दोसु [२]ठायए चउसु ।**
**तिसु आढत्तं थेरी य नवरि ठाणेसु पंचसु उ ॥४९४॥ नि०**

**एमेव** गाहा । **एवमेव मध्यमायाः** स्त्रिया उष्णकाले **द्वयो**र्भागयोः **प्रारब्धं चतुर्षु** भागेषु **संतिष्ठते**, एतदुक्तं भवति-मध्यमायाः स्त्रिया उष्णकाले द्वयोः सप्तमभागयोः शुष्कयोः सतोर्ग्रहणं भवति, तथा तस्या एव मध्यमायाः स्त्रिया हेमन्ते काले त्रिषु सप्तमभागेषु शुष्केषु सत्सु ग्रहणं भवति, तस्या एव च मध्यमस्त्रिया वर्षाकाले चतुर्षु सप्तमभागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यम्, एवं **स्थविराया** अप्युष्णकाले **त्रिषु** भागेषु **प्रारब्धं पञ्चसु** भागेषु संतिष्ठते, एतदुक्तं भवति-उष्णकाले स्थ[३]विर्यास्त्रिषु सप्तमभागेषु शुष्केषु सत्सु ग्रहणं भवति, तथा तस्या एव स्थविर्या हेमन्तकाले चतुर्षु सप्तमभागेषु शुष्केषु सत्सु भिक्षाग्रहणं भवति[४], तथा तस्या एव स्थविर्या वर्षाकाले पञ्चसु सप्तमभागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यम् ॥४९४॥

**८४२ एमेव होइ पुरिसे दुगाइछट्ठाण पज्जवसिएसुं ।**
**अपुमं तु तिभागाई सत्तमभागे अवसिते उ ॥४९५॥ नि०**

**एमेव** गाहा । **एवमेव पुरुषस्य** द्वयोर्भागयोः प्रारब्धं **षट्स्थानपर्यवसितेषु** भागेषु संतिष्ठते, एतदुक्तं भवति-तरुणपुरुषस्योष्णकाले भागद्वये शुष्के सति गृह्यते, तथा तस्यैव तरुणस्य शीतकाले त्रिषु भागेषु शुष्केषु सत्सु भिक्षा गृह्यते, तथा

---

१. उव्वाणेसु ह० हे० ता० । २. ठाइउ ह० ३. स्थविरायास्त्रिषु सप्तभागेषु क, ख. ४. ०ति, तस्या एव स्थविराया हेमन्ते चतुर्षु भागेषु शुष्केषु गहणं भवति । क

तस्यैव तरुणस्य वर्षाकाले चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणम्, तथा मध्यमपुरुषस्योष्णकाले त्रिषु भागेषु शुष्केषु सत्सु ग्रहणं भवति, तस्यैव मध्यमस्य हेमन्तकाले चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणम्, तथा तस्यैव मध्यमस्य वर्षाकाले पञ्चसु भागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यम्, तथा वृद्धपुरुषस्योष्णकाले चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणं कर्त्तव्यम्, तथा तस्यैव वृद्धस्य हेमन्तकाले पञ्चसु भागेषु शुष्केषु सत्सु ग्रहणम्, तस्यैव वृद्धस्य वर्षाकाले षट्सु भागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यम्। नपुंसकस्य पुन**स्त्रिभागेष्वार**ब्धं **सप्तमभागेऽवसिते** सति संतिष्ठते, एतदुक्तं भवति-सर्वस्मिन् हस्ते शुष्के सति ग्रहणं कर्त्तव्यं भवति, अत्र चेयं भावना-तरुणनपुंसकस्योष्णकाले त्रिषु भागेषु शुष्केषु भिक्षाग्रहणं कल्पते, तस्यैव तरुणनपुंसकस्य हेमन्तकाले चतुर्षु भागेषु शुष्केषु भिक्षाग्रहणम्, तस्यैव च वर्षाकाले पञ्चसु भागेषु शुष्केषु ग्रहणम्, मध्यमनपुंसकस्योष्णकाले चतुर्षु भागेषु शुष्केषु सत्सु ग्रहणम्, तस्यैव च हेमन्तकाले पञ्चसु भागेषु शुष्केषु ग्रहणम्, तस्यैव च वर्षाकाले षट्सु विभागेषु शुष्केषु ग्रहणम्, वृद्धनपुंसकस्योष्णकाले पञ्चसु भागेषु शुष्केषु सत्सु भिक्षाग्रहणम्, तस्यैव हेमन्तकाले षट्सु भागेषु शुष्केषु भिक्षाग्रहणम्, तस्यैव च वृद्धनपुंसकस्य वर्षाकाले सप्तस्वपि सप्तमभागेषु शुष्केषु सत्सु भिक्षाग्रहणं कर्त्तव्यमिति। एवमेकैकवृद्ध्या ग्रहणमुक्तम्, पश्चानुपूर्व्या तु एकैकभागहान्या भिक्षाग्रहणं वेदितव्यम्, तच्चैवम्-स्थविरनपुंसकस्य वर्षाकाले सप्तभिरपि हस्तसप्तमभागैः शुष्कैर्गृह्यते, एवमनया हान्या तावन्नेतव्यं यावत्तरुणी स्त्रीति । उक्तं त्रिधा द्वारम् ॥४९५॥

भावद्वार(नि.४६४)प्रतिपादनायाह –

**८४३ दुविहो य होइ भावो लोइय लोउत्तरो समासेणं ।**
**एक्केक्को वि य दुविहो पसत्थओ अप्पसत्थो य ॥४९६॥ नि०**

**दुविहो** गाहा । **द्विविधो भवति भावः-लौकिको लोकोत्तरश्चे**ति, **समासतः** पुनरे**कैको द्विविधः-प्रशस्तोऽप्रशस्तश्च,** लौकिकः प्रशस्तोऽप्रशस्तश्च, एवं लोकोत्तरोऽपि । तत्रोदाहरणमुच्यते–"[A]एगंमि सन्निवेसे दो भाउया वणिया, ते य परोप्परं विरिक्का, तत्थ एगो गामे गंतूण करिसणं करेइ, अण्णो वि तहेव, तत्थ एक्कस्स सुमहिला अण्णस्स दुम्महिला, जा सा दुम्महिला सा गोसे उट्ठिया मुहोदगदंत-

A. एकस्मिन् सन्निवेशे द्वौ भ्रातृकौ वणिजौ, तौ च परस्परं विभक्तौ, तत्रैको ग्रामं गत्वा कर्षणं करोति, अन्योऽपि तथैव, तत्रैकस्य सुमहिला अन्यस्य दुर्महिला, या सा दुर्महिला सा प्रभात उत्थिता मुखोदकदन्तप्रक्षालना-

पक्खालणअद्दागफलिहमाईहिं मंडंती अच्छइ, कम्मारगाईणं न किंचि जोगक्खेमं वहइ, [1]कल्लेउयं च करेइ, अण्णस्स य महिला कम्मारमाईणं जोगक्खेमं वहइ अत्तणो य सकज्जं मंडणादि करेइ, तत्थ जा सा अत्तणो चेव मंडणे लग्गा अच्छइ तीए अचिरेण कालेणं परिक्खीणं घरं, इयरीए धणधण्णेणं घरं समिद्धं जायं । एवं च जो साहू वण्णहेउं रूवहेउं वा रसहेउं वा आहारं आहारेइ, न वि आयरिए ण वि बालवुड्ढगिलाणदुब्बले य पडियग्गति अप्पणो य गहाय पज्जत्तं नियत्तइ, एवं सो अप्पपोसओ, जहा सा चुक्का हिरण्णाईणं, एवं सो वि जो निज्जरालाभो तस्स चुक्किहिइ, पसत्थो इमो जो णो वण्णहेउं णो रूवहेउं वा रसहेउं वा आहारं आहारेइ, बालाईणं दाउं [2]पच्छा आहारेइ, सो नाणदंसणचरित्ताणं आभागी भवति । एवं पसत्थेणं भावेणं आहारेयव्वो सो पिंडो" ॥४९६॥

इदानीमेतदेवार्थजातं गाथाभिरुपसंहरन्नाह –

**८४४ सज्झिलगा दो वणिया गामं गंतूण करिसणारंभो ।**
**एगस्स देहमंडण बाउसिआ भारिया अलसा ॥४९७॥ नि०**

**८४५ मुहधोवण दंतवणं अद्दागाईण कल्ल आवासं ।**
**पुव्वण्हि करणमप्पण उक्कोसयरं च मज्झण्हे ॥४९८॥ नि०**

**८४६ तणकट्ठहारगाणं न देइ न य दासपेसवग्गस्स ।**
**न य पेसणे निउंजइ पलाण हिय हाणि गेहस्स ॥४९९॥ नि०**

**सज्झिलगा** गाहा । सुगमा, नवरं **बाउसिआ** विहूसणसीला ॥४९७॥

[ **सज्झिलगा गाहा । द्वौ** भ्रातरौ भगीनौ, **एकस्य ग्रामगमनं कर्षणारम्भः, भार्या देहमण्डनबकुशा** देहभूषापराऽ**लसा**ऽभूत् ॥ओ.मा.टी. ४९७॥ ]

---

ऽऽदर्शस्फटिकादिभिर्मण्डयन्ती तिष्ठति, कर्मकारकादीनां न किञ्चिद् योगक्षेमं वहति, प्रातराशश्च करोति । अन्यस्य च महिला कर्मकारकादीनां योगक्षेमं वहति, आत्मनश्च स्वकार्यं मण्डनादि करोति, तत्र या साऽऽत्मन एव मण्डने लग्ना तिष्ठति तयाऽचिरेण कालेन परिक्षीणं गृहम्, इतरस्या धनधान्येन गृहं समृद्धं जातम्, एवं च य साधुर्वर्णहेतुं रूपहेतुं वा रसहेतुं वाऽऽहारमाहारयति, नाप्याचार्यान्नापि बालवृद्धग्लानदुर्बलाञ्च प्रतिजागर्ति, आत्मनश्च गृहीत्वा पर्याप्तं निवर्तते, एवं स आत्मपोषकः, यथा सा भ्रष्टा हीरण्यादीनाम्, एवं सोऽपि यो निर्जरालाभस्तस्माद् भ्रश्यति, प्रशस्तोऽसौ यो न वर्णहेतुं न रूपहेतुं वा रसहेतुं वाऽऽहारमाहारयति, बालादीनां दत्त्वा पश्चादाहारयति, स ज्ञानदर्शनचारित्राणामाभागी भवति । एवं प्रशस्तेन भावेनाऽऽहारयितव्यः स पिण्डः।

१. अकल्लेउयं क २. स पच्छा० । क

**मुहघोवण** गाहा । **मुखधावनं** करोति तथा **कल्ल** त्ति **कल्य**पूपक**मावश्यकं पूर्वाह्णे** करो**त्यात्मन उत्कृष्टतरं च** घृतपूर्णादि **मध्याह्ने** भक्षयत्येकाकिनी ॥४९८॥

**तण** गाहा । **तृणकाष्ठहारकाणां न** किञ्चिद्**ददाति दासवर्गस्य** तथा **प्रेष्यो** यः कश्चित्प्रेष्यते **तद्वर्गस्य च न** किञ्चि**द्ददाति, न च प्रेषणे** कार्ये **नियुङ्क्ते** कर्मकरान्, ततश्च भोजनादिना विना **पलाण** नष्टा **हृतं** च यत्किञ्चिद् गृहे रिक्थमासीत्, एवं **हानि**र्जाता **गेहस्य** । तत्रायं लौकिकोऽप्रशस्तो भावः ॥४९९॥

इदानीं लौकिकप्रशस्तभावप्रतिपादनायाह —

**८४७ बिइयस्स पेसवग्गं वावारेऊण पेसणे कम्मे ।**
**काले देआहारं सयं च उवजीवई इड्ढिं ॥५००॥ नि०**

**बिइयस्स** गाहा । **द्वितीयस्य** या भार्या सा **प्रेष्यवर्गं**[1] **व्यापारयित्वा प्रेषण**कार्ये **कर्मणि** च त्रिविधे **काले** च तेषा**माहारं ददाति स्वयं च काल** आहार**मुपजीवति ऋद्धिं चोपजीवति** । अयं च लौकिकोऽत्र प्रशस्तो भाव उक्तः ॥५००॥

इदानीं लोकोत्तराप्रशस्तभावप्रतिपादनायाह —

**८४८ वन्नबलरूवहेउं आहारे जो तु लाभि लब्भंते ।**
**अतिरेगं न उ गिण्हइ पाउग्ग गिलाणमाईणं ॥५०१॥ नि०**

**८४९ जह सा हिरण्णमाईपरिहीणा होइ दुक्खआभागी ।**
**एवं तिगपरिहीणो साहू दुक्खस्स आभागी ॥५०२॥ नि०**

**वण्णबल** गाहा । **वर्णबलरूपहेतु**[2]**माहारयति यश्च लाभे** क्षीरादौ **लभ्यमाने** सति **प्रायोग्यं ग्लानादीनामतिरिक्तं न गृह्णाति** ॥५०१॥

**जह सा** गाहा । **यथा सा** गृहस्था **हिरण्यादिपरिहीणा** सञ्जाता **दुःखभागिनी** च जाता एवं **साधुरपि त्रिकेण** ज्ञानदर्शनचारित्रलक्षणेन **हीनो दुःखस्याभागी भवति** ॥५०२॥

उक्तो लोकोत्तरोऽप्रशस्तः, इदानीं लोकोत्तरप्रशस्तभावप्रदर्शनायाह-

**८५० आयरियगिलाणट्ठा गिण्हइ न महं ति एव जो साहू ।**
**नो वन्नरूवहेउं आहारे एस उ पसत्थो ॥५०३॥ नि०**

---

१. ०वर्गं व्यापारयित्वा प्रेषणकार्ये कर्मणि । क २. हेतुं वाहार० । क.

**आयरियगिलाणट्ठा** गाहा । **आचार्यादीनामर्थाय गृह्णाति, न ममेदं** योग्यं किन्त्वाचार्यादेः, एवं **यः साधुर्गृह्णाति**, शेषं सुगमम्, उक्तो लोकोत्तरः प्रशस्तो भावः, उक्तं भावद्वारम् ॥५०३॥

**८५१ उग्गमउप्पायणएसणाए बायाल होंति अवराहा ।**
**सोहेउं समुयाणं पडुप्पन्ने वच्चए वसहिं ॥५०४॥ नि०**

**उग्गम** गाहा । एवं साधु**रुद्गमोत्पादनैषणाभिर्द्विचत्वारिंशदपराधा भवन्ति तैः समुदानं** भैक्षं **शोधयित्वा** विविच्य ततः **पडुप्पन्ने वच्चए वसहिं** लब्धे सति भक्तादौ **वसतिं** प्रयाति ॥५०४॥

इदानीं तद्भक्तं गृहीतं सच्छोधयित्वा वसतिं प्रविशति, केषु स्थानेषु ? अत आह –

**८५२ सुन्नघरदेउले वा असई य उवस्सयस्स वा दारे ।**
**संसत्तकंटगाई सोहेउमुवस्सयं पविसे ॥५०५॥ नि०**

**सुन्नघर** गाहा । गृहीत्वा भक्तमुपाश्रयाभिमुखो व्रजन् **शून्यगृहे** तद्भक्तं प्रत्युपेक्ष्य ततो वसतिं प्रविशति, तदभावे **देवकुले वा, असई य** शून्यगृहादीनामभाव **उपाश्रयद्वारे संसक्तं** त्रसैः **कण्टकैर्वा** यद्व्यासं तत् **शोधयित्वा** प्रोज्झ्य संसक्तादिभक्तं तत **उपाश्रयं प्रविशति** ॥५०५॥

एवं तस्य प्रत्युपेक्ष्यमाणस्य कदाचित्संसक्तं भवति ततः किं करोतीत्यत आह –

**८५३ संसत्तं तत्तो च्चिय परिट्ठवित्ता पुणो दवं[१] गिण्हे ।**
**कारणमत्तग[२]गहियं पडिग्गहे छोढु पविसणया ॥५०६॥ नि०**

**संसत्त** गाहा । तत्र यदि **संसक्तं** भक्तं पानकं वा भवेत्त**तस्त**स्मादेव स्थाना**त्प[३]रिस्थाप्य पुनरप्यन्यद्** [४]**द्रवं गृह्णाति**, तथा ग्लानादि**कारणेन** च **मात्रके** यद् **गृहीत**मासीत्त**त्पतद्ग्रहे प्रक्षिप्य प्रविशति**, यतस्तस्य साधुभिराख्यातं यदुत ग्लानस्यान्यल्लब्धमतो निष्कारणं मात्रकोपयोगं परिहरन् पतद्ग्रहे प्रक्षिप्य प्रविशति, निष्कारणमात्रकोपयोगे च प्रमादी भवति । एवमसौ परिशुद्धे सति भक्ते

---

१. दव्वं द. २. उग्गाहिय ह० हे० ३. प्रतिष्ठाप्य – ग.घ. ४. द्रव्यं भ.

प्रविशत्युपाश्रयम् ॥५०६॥

अथाशुद्धं भवति ततः परिष्ठाप्य किं करोतीत्यत आह –

**८५४ गामे य कालभाणे [१]पहुव्वमाणे हवंति भंगट्ठा ।**
**काले अपहुप्पंते नियत्तई सेसए भयणा ॥५०७॥ नि०**

**गामे य** गाहा । यदा **ग्रामः** पर्याप्यते **कालश्च** यदा पर्याप्यते **भाजनं** च पर्याप्यते एवमस्मिंस्त्रये **पर्याप्यमाणे** सति पदत्रयनिष्पन्ना **अष्टौ भङ्गका भवन्ति,** तेषां च भङ्गकानां मध्ये यस्मिन् भङ्गके **कालो न पर्याप्यते** तस्मि**न्निवर्त्तत** एव, **शेषेषु** च चतुर्षु भङ्गकेषु **भजनां** विकल्पनां करोति ॥५०७॥

इदानीं भजनां दर्शयन्नाह –

**८५५ अण्णं व वए गामं अण्णं भाणं च गिण्ह सइ काले ।**
**पढमे बीए छप्पंचमे य भय सेसए नियत्ते ॥५०८॥ नि०**

**अण्णं** गाहा । **अन्यं ग्रामं वा व्रजति** काले पर्याप्यमाणे, **अन्यच्च भाजनं गृह्णाति** पर्याप्यमाणे **काले सति,** एवं **प्रथमे** भङ्गके **द्वितीये** च **षष्ठे पञ्चम**भङ्गके **च भजनां** सेवनां करोति काले सति, **शेष**भङ्गकेषु येषु कालो न पर्याप्यते तेषु **निवर्तेत,** न गन्तव्यं भिक्षाया इत्यर्थः ॥५०८॥

स च पर्याप्यमाणः कालो द्विविधः-जघन्य उत्कृष्टश्च, तत्र जघन्यप्रतिपादनायाह–

**८५६ [२]वोसिट्ठमागयाणं [३]उव्वासिअ मत्तए य भूमितिअं ।**
**पडिलेहअणत्थमिए सेसत्थमिए जहन्नो उ ॥५०९॥ नि०**

**वोसिट्ठ** गाहा । सञ्ज्ञां **व्युत्सृज्यागतानां मात्रकं च** यस्मिन् तोयं गृहीत्वा गत आसीन्निर्लेपनार्थं तस्मि**न्नुद्वासिते** शोषिते सति **भूमित्रिके** च कायिकीभूमौ द्वादश स्थण्डिलानि, सञ्ज्ञाभूमौ द्वादश स्थण्डिलानि, कालभूमौ त्रीणि स्थण्डिलानि, एवमस्मिन् भूमित्रिके **प्रत्युपेक्षिते** सति यदाऽस्त**मनं** भवति तस्मिन् प्रदेशे **सेसत्थमिए** त्ति **शेषा**वधिम**स्तमित** आदित्ये प्रत्युपेक्षते यदाऽयमित्थम्भूतो **जघन्यः** काल इति ॥५०९॥

इदानीमुत्कृष्टकालप्रतिपादनायाह –

---

१. पहुच्चमाणे र. २. वोसिच्च ह० हे० ३. वि सुयाविय ह० हे०

**८५७ भुत्ते वियारभूमिं गयागयाणं तु जह य ओगाहे ।**
**[१]चरमाए पोरिसीए उक्कोसो सेस मज्झिमओ ॥५१०॥ नि०**

**भुत्ते** गाहा । **भुक्ते** सति **विचारभूमिं** सञ्ज्ञाभूमिं **गत्वाऽऽगतानां यथा ओगाहे** आगच्छति **चरमा पौरुषी** चतुर्थः प्रहरः, अथवा चरमपौरुषी पादोनश्चतुर्थप्रहरो यथाऽऽगच्छत्यस्यां वेलायामय**मुत्कृष्टः** कालः, **शेषस्त्वन्यो मध्यमः** काल इति ॥५१०॥

तेन च भिक्षामटित्वा विनिवृत्त्य प्रविशता वसतौ किं कर्त्तव्यमत आह –

**८५८ पायपमज्जण [२]बाहिं निसीहि तिन्नि उ करे पवेसंमि ।**
**अंजलि ठाणविसोही दंडग उवहिस्स निक्खेवो ॥५११॥ नि०**

**पायपमज्जण** गाहा । **बहिरेव** वसतेः **पादौ प्रमार्जयति निषीधिकात्रितयं करोति, प्रविशन्** पुनश्च गुरोः पुरस्ताद**ञ्जलिना** नमस्कारं करोति "[A]नमो खमासमणाणं"ति, तथा प्रविष्टश्च **स्थानं विशोधयति** यत्र **दण्डकस्योपधेश्च निक्षेपं** करोति ॥५११॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**८५९ एवं पडुपन्ने पविसओ उ तिन्नि उ निसीहिया होंति ।**
**अग्गद्दारे मज्झे पवेस पाए असागरिए ॥२६१॥ निभा०**

**एवं पडुप्पन्ने** गाहा । **एवं प्रत्युत्पन्ने** लब्धे सति भक्ते **प्रविशतस्तिस्रो निषीधिका भवन्ति,** क्व ? **अग्रद्वारे** प्रथमा, द्वितीया **मध्य**प्रदेशे वसतेः, **प्रवेशे** च मूलद्वारस्य तृतीयां निषीधिकां करोति **पादौ** च प्रमार्जयति यदि कश्चित्सागारिको न भवति, अथ तत्र सागारिको भवति ततो वरण्डकाभ्यन्तरे प्रमार्जनं करोति, अथ मध्येऽपि भवति-द्वितीयनिषीधिकास्थानेऽपि भवति सागारिकः, ततो मध्ये प्रविश्य प्रमार्जयति पादौ, अनेनैव कारणेन पश्चाद्भाष्यकारेण पादप्रमार्जनं व्याख्यातं येन तदनियतं वर्त्तते, निषीधिकासु कृतास्वपि कारणवशात्संभवतीति ॥२६१॥

इदानीमञ्जल्यवयवं (नि. ५११) व्याख्यानयन्नाह –

---

A. नमः क्षमाश्रमणेभ्यः ।

१. चरिमाए ह० हे० चरिमापो. र. २. निसीहिया उ हे० ह०

**८६० हत्थुस्सेहो सीसप्पणामणं वाइओ नमोक्कारो ।**
**गुरुभायणे पणामो वायाए नमो न उस्सेहो ॥२६२॥ निभा०**

**हत्थुस्सेहो** गाहा । **हस्तस्योत्सेधं** नमस्कारार्थं करोति, **शीर्षप्रणमनं** करोति, **वाचा** च 'नमो खमासमणाणं'ति, इत्येवं **नमस्कारं** करोति, अथ तद् गुरु भिक्षाभाजनं भवति मात्रकं च गुरु गृहीतमङ्गुलीभिः, ततश्चैवं **गुरुणि भाजने** सति शिरसा **प्रणामं** करोति **वाचा** च **नम** इत्येवं ब्रूते, **न** हस्तस्यो**च्छ्रयं** करोति, यतोऽसौ गुरोर्मात्रकस्याधो हस्तो दत्तः सन्धारणार्थमतोऽक्षणिकस्ततश्च नोच्छ्रयं करोति ॥२६२॥

इदानीं स्थानविशोधिं (नि. ५११) व्याख्यानयन्नाह –

**८६१ उवरिं हिट्ठा य पमज्जिऊण लट्ठिं ठवेज्ज सट्ठाणे ।**
**पट्टं उवहिस्सुवरिं भायणवत्थाणि भाणेसु ॥२६३॥ निभा०**

**उवरिं** गाहा । **उपरि** कुड्यस्थाने **अधस्ताच्च** भुवं **प्रमृज्य** पुनश्च **स्वस्थाने यष्टिं स्थापयेत्**, पुनश्च **पट्टकं** चोलपट्टकमु**पधेरुपरि** स्थापयति मुञ्चति **भाजनवस्त्राणि च** पटलानि **भाजनेषु** पात्रकोपरि स्थापयति ॥२६३॥

**८६२ जइ पुण पासवणं से हविज्ज तो उग्गहं सपच्छागं ।**
**दाउं अन्नस्स सचोलपट्टओ काइयं निसिरे ॥२६४॥ निभा०**

**जइ पुण** गाहा । [१]**यदि पुनः स** साधुः **प्रश्रवण**कायिकादितो **भवति ततश्चावग्रहं** पतद्ग्रहं **सपच्छागं सपटलं दाउं** अर्पयित्वा**ऽन्यस्य** साधोः पुनश्च **सह चोलकपट्टकेन** चोलकपट्टकद्वितीयः **कायिकां** व्युत्सृजति ॥२६४॥

कायिकां व्युत्सृज्य कायोत्सर्गं करोति, तत्र च को विधिरित्यत आह –

**८६३ चउरंगुल मुहपत्ती[२] उज्जुए[३] वामहत्थि रयहरणं ।**
**वोसट्ठचत्तदेहो काउस्सग्गं करिज्जाहि ॥५१२॥ नि०**

**चउरंगुल** गाहा । **चतुर्भिरङ्गुलै**र्जानुनोरुपरि चोलपट्टकं करोति नाभेश्चाधश्चतुर्भिरङ्गुलैः पादयोश्चान्तरं चतुरङ्गुलं कर्त्तव्यम्, तथा मुखवस्त्रिकां **उज्जुए** दक्षिणहस्तेन गृह्णाति **वामहस्तेन** च **रजोहरणं** गृह्णाति, पुनरसौ **व्युत्सृष्टदेहः** प्रलम्बितबाहु**स्त्यक्तदेहः** सर्पाद्युपद्रवेऽपि नोत्सारयति कायोत्सर्गम्, अथवा व्युत्सृष्टदेहो दिव्योपसर्गेष्वपि न

---

१. यदि पुनस्तस्य साधोः प्रश्रवणं कायिकादिर्भ० दा० २. ०पोत्ती ह०हे०ता० ३. उज्जुग दव्वे ह० हे०

कायोत्सर्गभङ्गं करोति, त्यक्तदेहोऽक्षिमलदूषिकामपि नापनयति, स एवंविधः **कायोत्सर्गं कुर्यात्** ॥५१२॥

इदानीमेनामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**८६४ चउरंगुलमप्पत्तं जाणुगहिट्ठा छिवोवरिं नाहिं ।**
**उभओ कोप्परधरिअं करिज्ज पट्टं च पडलं वा ॥२६५॥ निभा०**

**८६५ पुव्वुद्दिट्ठे ठाणे ठाउं चउरंगुलंतरं काउं ।**
**मुहपोत्ति उज्जुहत्थे वामंमि य पायपुंछणयं ॥५१३॥ नि०**

**८६६ काउस्सग्गंमि ठिओ चिंते समुयाणिए अईयारे ।**
**जा निग्गमप्पवेसो तत्थ उ दोसे मणे कुज्जा ॥५१४॥ नि०**

**चउरंगुल** गाहा । **चतुर्भिरङ्गुलैरधो जानुन्यप्राप्त**श्चोलकपट्टको यथा भवति तथा **नाभिं चोपरि** चतुर्भिरङ्गुलैर्यथा न स्पृशति, **उभयतो** बाहुकूर्पराभ्यां धृतं करोति **पट्टकं** चोलपट्टकं [१]**पडलं वा उभयकूर्परधृतं करोति**, यदा चोलपट्टकः सच्छिद्रो भवति तदा पटलं गृह्णाति ॥२६५॥

**पुव्वुद्दिट्ठे** गाहा । **पूर्वोद्दिष्टमेव** कायोत्सर्ग**स्थानं** तस्मिन् **स्थित्वा**, तथा पादस्य पादस्य **चान्तरं चतुरङ्गुलं कृत्वा मुखवस्त्रिकां** च दक्षिणहस्ते कृत्वा **वामहस्ते च पादपुञ्छनकं** रजोहरणं कृत्वा कायोत्सर्गेण तिष्ठति ॥५१३॥

पुनश्च –

**काउस्सग्गम्मि** गाहा । [२]**कायोत्सर्गे** च **स्थितश्चिन्तयेत्, सामुदानिकानतिचारान्** भिक्षातिचारानित्यर्थः, कस्मादारभ्य चिन्तयत्यतिचारान् ? **निर्गमादारभ्य यावत्प्रवेशो** वसतौ जातः, अस्मिन्नन्तराले **तत्र ये दोषा** जातास्तान् **मनसि करोति** स्थापयति चेतसि ॥५१४॥

**८६७ ते उ पडिसेवणाए अणुलोमा होंति वियडणाए य ।**
**पडिसेववियडणाए एत्थ उ चउरो भवे भंगा ॥५१५॥ नि०**

**ते तु** गाहा । **तांश्चातिचारान्** [३]**प्रतिसेवनानुलोम्येन** यथैव प्रतिसेवितास्तेनैवानुक्रमेण कदाचिच्चिन्तयति, तथा **वियडणाए** त्ति **विकटनाऽऽलोचना**, तस्यां चानुलोमानेव

१. पटलं क, ख. २. कायोत्सर्गव्यवस्थितश्चिन्तयेत् । क, ख ३. प्रतिसेवनादि अनुलोमेन क.

चिन्तयति, एतदुक्तं भवति-"[A]पढमं लहुओ दोसो पडिसेविओ पुणो वड्डो वड्डुयरो, चिंतेइ एवमेव," ततश्च प्रतिसेवनायामनुकूलम्, आलोचनायामप्यनुकूलमेव, यतः प्रथमं लघुको दोष आलोच्यते [१]पुनर्बृहत्तरः पुनर्बृहत्तम इत्येष प्रथमो भङ्गक इति, "[B]अण्णो पडिसेवणाए अणुकूलो, न उण विअडणाए, एतदुक्तं भवति-आसेविअं पढमं वड्डुं, पुणो लहुअं, पुणो वड्डुं, पुणो [२]वड्डुयरं, चिंतेइ एवमेव," ततश्च प्रतिसेवनाया अनुकूलं न त्वालोचनायाः, यतस्तत्र प्रथमं लघुत्तर आलोच्यते पुनर्बृहत्तरः पुनर्बृहत्तम इत्येष द्वितीयो भङ्गकः, "[C]अण्णो पडिसेवणाए अणणुकूलो आलोयणाए पुण अणुकूलो, एतदुक्तं भवति-अड्डुवियड्डा पडिसेविआ, चिंतेइ पुण आलोयणाणुकूलेणं, एसो तइओ भंगो, अण्णे उण पडिसेवणाए वि अणणुकूलो, आलोयणाए वि अणणुकूलो, एतदुक्तं भवति-पढमं वड्डो पडिसेविओ पुणो लहुओ पुणो वड्डो पुणो वड्डुयरो, चिंतेइ पुण जं जहा संभरइ, पढमं वड्डो पुणो लहुओ पुणो वड्डो पुणो वड्डुयरो, एवं अड्डुवियड्डुं चिंतंतस्स ण पडिसेवणाणुकूलो णालोयणाणुकूलो, एस चउत्थो, एसो य वज्जेयव्वो ।"

इदनीममुमेवार्थं गाथार्द्धेनोपसंहरन्नाह–'पडिसेववियडणाए य होंति एत्थं पि चउभंगा' । इदं व्याख्यातमेवेति ॥५१५॥

इदानीं सामुदानिकानतिचारानालोचयति यदि व्याक्षेपादिरहितो गुरुर्भवेत्, अथ व्याक्षिप्तो गुरुर्भवति तदा नालोचयति, एतदेवाह –

**८६८ वक्खित्त पराहुत्ते पमत्ते मा कयाइ आलोए ।**
**आहारं च [३]करिंतो नीहारं वा जइ करेइ ॥५१६॥ नि०**

**वक्खित्त** गाहा । **व्याक्षिप्तो** धर्मकथनादिना स्वाध्यायेन, **पराहुत्तो** त्ति **पराङ्मुखः**

---

A. प्रथमं लघुको दोषः प्रतिसेवितः पुनर्बृहद् बृहत्तरः, चिन्तयत्येवमेव ।

B. अन्यः प्रतिसेवनाया अनुकूलः, न पुनर्विकटनायाः, एतदुक्तं भवति- आसेवितं प्रथमं बृहत् पुनर्लघुकं पुनर्बृहत् पुनर्बृहत्तरं चिन्तयत्येवमेव ।

C. अन्यः प्रतिसेवनाया अननुकूल आलोचनायाः पुनरनुकूलः, एतदुक्तं भवति- व्युत्क्रमेण प्रतिसेविताः, चिन्तयति पुनरालोचनानुकूलेन, एष तृतीयो भङ्गः, अन्ये पुनः प्रतिसेवनाया अपि अननुकूलः, आलोचनाया अपि अननुकूलः, एतदुक्तं भवति-प्रथमं बृहत् प्रतिसेवितः पुनर्लघुकः पुनर्बृहत् पुनर्बृहत्तरः, चिन्तयति पुनर्यद् यथा संस्मरति, प्रथमं बृहत् पुनर्लघुकः पुनर्बृहत् पुनर्बृहत्तरः, एवं व्युत्क्रमेण चिन्तयतो न प्रतिसेवनानुकूलो नाऽऽलोचनाऽनुकूलः, एष चतुर्थः,एष च वर्जयितव्यः।

१. पुनर्बृहत्बृहत्तर इति एष । क २. विवड्डुं० क. ३. करेंते ह० हे०

पराभिमुख इत्यर्थः । **प्रमत्त** इति विकथयति, एवंविधे गुरौ **न कदाचिदालोचयेत्**, तथाऽऽहारं **कुर्वंति** सति, तथा **नीहारं वा यदि करोति** ततो नालोचयति ॥५१६॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह –

**८६९ कहणाईवक्खित्ते विकहाइ पमत्ते अन्नओ व मुहे ।**
**अंतरमकारए वा नीहारे संक मरणं वा ॥२६६॥ निभा०**

**कहणादी** गाहा । धर्म**कथादिना व्याक्षिप्तः** कदाचिद् गुरुर्भवति, **विकथादिना** वा **प्रमत्तोऽन्यतोऽभिमुखो वा** भवति, भुञ्जतोऽपि वा नालोचनीयम्, किं कारणम्? **अंतरं** ति **अन्तरायं** भवति यावदालोचनां शृणोति, **अकारकं वा** शीतलं भवति यावदालोचनां शृणोति । तथा **नीहारम**पि कुर्वतो नालोचनीयम्, किं कारणम् ? यत **आशङ्कया** साधुजनितया न कायिकादि निर्गच्छति, अथ धारयति, ततो **मरणं वा** भवति ॥२६६॥

यस्मादेते दोषास्तस्मात् –

**८७० अव्वक्खित्ताउत्तं उवसंतमुवट्ठियं च नाऊणं ।**
**अणुन्नवित्तु मेहावी आलोएज्ज सुसंजए ॥५१७॥ नि०**

**अव्वक्खित्त** गाहा । धर्मकथादिना**ऽव्याक्षिप्ते** गुरा आलोचयेत्, **आयुक्तमु**पयोगतत्परम् **उपशान्तम**नाकुलं गुरुं दृष्ट्वो**पस्थितमु**द्यतं **च ज्ञात्वा**, एवंविधं गुरु**मनुज्ञाप्य मेधावी आलोचयेत् सुसंयतः** साधुः ॥५१७॥

इदानीमेतामेव गाथां व्याख्यानयन् भाष्यकृदाह –

**८७१ कहणाइअवक्खित्ते कोहाइअणाउले तदुवउत्ते ।**
**संदिसह त्ति अणुन्नं काऊण विदिन्नमालोए ॥२६७॥ निभा०**

**कहणा** गाहा । धर्म**कथादिनाऽव्याक्षिप्ते क्रोधादिभिरनाकुले तदुपयुक्ते** भिक्षालोचनोपयुक्ते च **संदिसह त्ति अणुन्नं काऊण, संदिशत** आलोचयामीत्येव**मनुज्ञां कृत्वा** मार्गयित्वेत्यर्थः, । **विदिण्ण** त्ति आचार्येण **विदिन्नायाम**नुज्ञायां भणत इत्येवंलक्षणायां तत **आलोचयेत्** ॥२६७॥

तेन च साधुनाऽऽलोचयतैतानि वर्जनीयानि –

**८७२ नट्टं वलं चलं भासं मूयं तह ढड्डरं च वज्जिज्जा ।**
**आलोइज्ज सुविहिओ हत्थं मत्तं च वावारं ॥५१८॥ नि०**

**नट्टं** गाहा । **नृत्यन्नालोचयति वलंश्च** नालोचयत्यङ्गानि **चलयन्नालोचयति**, तथा **भासं** ति गृहस्थ**भाषया** नालोचयति, किं तर्हि ? संयतभाषयाऽऽलोचनीयमिति, तद्यथा—सुयारियाओ इत्येवमादि, तथाऽऽलोचयन् **मूकेन** स्वरेण नालोचयति मिणिमिणंतं, **तथा ढड्डरेण च** स्वरेणुच्चैर्नालोचयति एवंविधं स्वरं **वर्जयेत्** । किं पुनरसावालोचयतीत्येतदाह-**आलोचयेत् सुविहितो हस्तमु**दकस्निग्धम्, तथा **मात्रकं** गृहस्थसत्कं कडुच्छुकादि उदकार्द्रादि, तथा गृहस्थया कतमं **व्यापारं** कुर्वत्या भिक्षा दत्तेत्येतच्चालोचयति ॥५१८॥

इदानीमेतामेव गाथां भाष्यकारो व्याख्यानयन्नाह —

**८७३ करपायभमुहसीसऽच्छिउट्ठमाईहि नट्टिअं नाम ।**
**वलणं हत्थसरीरे चलणं काए य भावे य ॥२६८॥ निभा०**

**८७४ गारत्थियभासाओ य वज्जए मूय ढड्डरं च सरं ।**
**आलोए वावारं संसट्टियरे च करमत्ते ॥२६९॥ निभा०**

**कर** गाहा । **गारत्थिय** गाहा । **करस्य** तथा **पादस्य भ्रुवः शिरसोऽक्ष्णः ओष्ठस्य** च, एवमादीनामङ्गानां सविकारं चलनं **नर्त्तनं नाम,** तच्च नर्त्तितं कुर्वन्नालोचयति, **वलनं हस्तस्य शरीरस्य** च कुर्वन्नालोचयति, तथा **चलनं कायस्य** करोति, [१३४]मोटनं तत्कुर्वन्नालोचयति, तथा **भावतश्चलनमन्यथा** गृहीतमन्यथाऽऽलोचयति [१३५]अड्डुवियड्डुं । आलोचयन् **गृहस्थभाषया** नालोचयति [१]यदुत '[A]तलंगणीओ लद्धाओ मंडया लद्धा' इत्येवमादि, •किन्तु संयतभाषयाऽऽलोचनीयमिति '[B]सुयारियाओ पडुपन्नाओ' इत्येवमादि, **मूक**स्वरं मनाक् **ढड्डरं च** महान्तं **स्वरं वर्जयन्नालोचयति,** किमालोचयति ? **व्यापारं** गृहस्थायाः सम्बन्धिनम्, तथा **संसृष्टमु**दकार्द्रादि, **इतरम**संसृष्टम्, किं तत् ? **करं** संसृष्टमसंसृष्टं चोदकेन, तथा **मात्रकं** गृहस्थसत्कं कुण्डेलिकादि उदकसंसृष्टमसंसृष्टं चेति, एतदालो[२]चयेत् ॥२६८॥२६९॥

---

१३४. मोटना-मोडना-गात्रभञ्जनायाम् । (प्रश्न ३ आश्रवद्वार)

१३५. अड्डुवियड्डुं-अर्दवितर्दम्, आलोचनादिक्रमरहितमिति । संटी.

A. तलंगण्य लब्धा मण्डका लब्धाः । B. सुकुमारिकाः प्रत्युत्पन्नाः ।

१. यथा मंडीइ लद्धा । क २. ०लोचयतो विधिः । क

८७५ **एयद्दोसविमुक्कं गुरुणो गुरुसम्मयस्स वाऽऽलोए ।**
**जं जह गहियं तु भवे पढमाए जा[1] भवे चरिमा ॥५१९॥ नि०**

**एयद्दोस** गाहा । **एभिर्दोषैर्विमुक्तम**नन्तरोक्तैर्भैक्षमालोचये**द्गुरोः** समीपे **वा** यो **गुरोः संमतो** बहुमतस्तस्य समीप आ**लोचयेत्**, कथमालोचनीयम् ? **यद्यथा गृहीतं भवेद्**-येन क्रमेण यद् गृहीतं **प्रथम**भिक्षाया आरभ्य **यावच्चरमा** पश्चिमा भिक्षा तावदालोचयेदिति । एष तावदुत्सर्गेणालोचनाविधिः **॥५१९॥**

यदा पुनरेतानि कारणानि भवन्ति तदौघत आलोचयतीत्येतदेवाह –

८७६ **काले अपहुप्पंते उच्चाओ वावि ओहमालोए ।**
**वेला गिलाणस्स व अइच्छई गुरू व उच्चाओ ॥५२०॥ नि०**

**काले अपहुप्पंते** गाहा । यदा तु पुनः **काल** एव **न पर्याप्यते** यावदनेन क्रमेणालोचयति तावदस्तं गच्छत्यादित्यः, तदा तस्मिन् काल **ओघतः** संक्षेपेणा-**लोचयति**, यदिवा श्रान्तः कदाचिद्भवति तदा**प्योघत** एव **आलोचयति**, **वेला वा ग्लानस्यातिक्रामति** यावत्क्रमेणालोचयति अत **ओघत आलोचयति**, **अथवा गुरु उच्चातो** श्रान्तः कुलादिकार्येण केनचित्तत ओघत आलोचयति एभिः कारणैरिति ॥५२०॥

का चासावोघालोचना ? –

८७७ **पुरकम्मपच्छकम्मे अप्पऽसुद्धे य ओहमालोए ।**
**तुरियकरणंमि जं से न सुज्झई तत्तिअं कहए ॥५२१॥ नि०**

**पुरकम्म** गाहा । आकुलत्व आपन्ने सत्येवमोघालोचनयाऽऽलोचयति **पुरःकर्म पश्चात्कर्म** च **अल्पं** नास्ति किञ्चिदित्यर्थः। **असुद्धे य** त्ति **अशुद्धं** चाल्पम्, अशुद्धमाधाकर्माद्यभिधीयते तदल्पं नास्तीति, एव**मोघतः** संक्षेपेणा**लोचयेत्** । **तुरियकरणंमि** त्ति **त्वरिते कार्ये** जाते सति **यन्न शुद्ध्यत्यु**क्तेन प्रकारेण **तावन्मात्र**मेव **कथयति**, एषा ओघालोचनेति ॥५२१॥

८७८ **आलोएत्ता सव्वं सीसं सपडिग्गहं पमज्जित्ता ।**
**उड्ढमहे तिरियम्मि य पडिलेहे सव्वओ सव्वं ॥५२२॥ नि०**

---

१. आवि दा० यावि हे०

**आलोएत्ता** गाहा । एवमेषा मानसी आलोचना वाचिकी वाऽऽलोचनोक्ता, इदानीं कायिकी आलोचना भण्यते-आचार्यस्य भिक्षा दर्श्यते, एवं मनसा वाचा कायेना**लोचयित्वा सर्वं** निरवशेषम्, तथा मुखवस्त्रिकया **शिरः प्रमृज्य पतद्ग्रहं** च सपटलं प्रमृज्य **ऊर्द्ध्वं** पीठी **अधो** भुवि **तिर्यक्** तिरश्चीनं **प्रत्युपेक्षेत** निरूपयेत् **सर्वतः** समन्ताच्चतसृष्वपि दिक्षु **सर्वं** नैरन्तर्येण, ततः पतद्ग्रहं हस्ते कृत्वा भक्तादि गुरोर्दर्शयतीति वक्ष्यति भाष्यकृत् ॥५२२॥

इदानीमेतामेव गाथां भाष्यकृद् व्याख्यानयति, अत्र गुरुदोषत्वात्प्रथममूर्द्ध्वादीनि त्रीणि पदानि व्याख्यानयन्नाह –

**८७९ उड्ढं पुप्फफलाई तिरियं मज्जारसाणडिंभाई ।**
**खीलगदारुगआवडणरक्खणट्ठा अहो पेहे ॥२७०॥ निभा०**

**उड्ढं** गाहा । उद्यानादा आवासितानां सतां **पुष्पफलादि**पात**मूर्द्ध्वं** निरूप्य ततो गुरवे दर्शयति, **तिर्यङ् मार्जारश्वडिम्भाना**लोक्यालोचयति मा भूत्ते आगच्छन्तस्तत्पात्र-मुत्प्रेर्य पातयिष्यन्ति, **आदि**शब्दात्काण्डं वा केनचिद्विक्षिप्तमायाति, अतस्तिर्यग् निरूप्यते, तथाऽधो निरूपयति, किमर्थम् ! कदाचित्**कीलको** भवति **दारु**काष्टं वा भवति, तत्रा**पतनमा**स्खलनं मा भूदिति, अतो**ऽधो** निरूप्य ततो भक्तादि दर्शयति ॥२७०॥

इदानीं सीसं सपडिग्गहं पमज्जित्त'त्ति (नि.५२२) व्याख्यानयति –

**८८० ओणमओ पवडिज्जा सिरओ पाणा सिरं पमज्जेज्जा ।**
**एवमेव उग्गहंमि वि मा संकुडणे तसविणासो ॥२७१॥ निभा०**

**ओणमओ** गाहा । हस्तस्थे पतद्ग्रहेऽ**वनमतः शिरसः**[१] **प्रपतेयुः प्राणिनः** कदाचिदतः **शिरः** प्रथममेव **प्रमार्जयेत्, एवमेव** पतद्ग्रहे प्रमार्जनं कृत्वा प्रदर्शयेद्भक्तादि, किं कारणम् ? **मा संकुडणे तसविणासो** त्ति **मा** भूत्**सङ्कोचने** सति पटलानां **त्रसादिविनाशो** भविष्यत्यतः प्रमृज्य पतद्ग्रहं भक्तं प्रदर्शयतीति ॥२७१॥

**८८१ काउं पडिग्गहं करयलंमि अद्धं च ओणमित्ताणं ।**
**भत्तं वा पाणं वा पडिदंसिज्जा गुरुसगासे ॥२७२॥ निभा०**

---

१. शिरस्थाः क

**काउं** गाहा । **कृत्वा पतद्ग्रहं करतलेऽर्धं च** शरीरस्यावनम्य पुन**र्भक्तं वा पानं वा प्रदर्शयेद् गुरुसकाश** इति ॥२७२॥

**८८२ ताहे उ दुरालोइय भत्तपाण एसणमणेसणाए उ ।**
**अट्ठुस्सासे अहवा अणुग्गहादीउ झाएज्जा ॥२७३॥ निभा०**

**ताहे** गाहा । **ततः** कदाचिद्दु**रालोचितं भक्तपानं** भवति, 'नट्टं वलं चलं' (नि.५१८) इत्येवमादिना प्रकारेण, **तथैषणा**दोषः कदाचित्सूक्ष्मः कृतो भवति, **अनेषणा**दोषो वा कश्चिदजानता कृतः, ततश्चैतेषां विशुद्ध्यर्थमष्टोच्छ्वासं नमस्कारं ध्यायेत्, **अथवा अनुग्गहादीउ** त्ति अथवाऽनुग्रहादि **ध्यायेत्, '*जइ मे अणुग्गहं कुज्जा साहू होज्जामि तारिओ'** इत्येवमादि गाथाद्वयं **( दश. अध्य. ५ उद्दे. १ गा. ९४-९५ )** कार्योत्सर्गस्थो विशुद्ध्यर्थं ध्यायेत्, उत्सार्य च कायोत्सर्गं ततः स्वाध्यायं प्रस्थापयेत् ॥२७३॥

एतदेवाह –

**८८३ विणएण पट्ठवित्ता सज्झायं कुणइ तो मुहुत्तागं ।**
**पुव्वभणिया य दोसा परिस्समाई [1]जढा एवं ॥५२३॥ नि०**

**विणएण** गाहा । **विनयेन प्रस्थाप्य** योगविधाविव **ततः स्वाध्यायं मुहूर्त्त**मात्रं **करोति,** जघन्यतो गाथात्रयं पठति, उत्कृष्टतश्चतुर्दशापि पूर्वाणि सूक्ष्मानप्राणलब्धि-संपन्नोऽन्तर्मुहूर्त्तेन परावर्त्तयति, **एवं** च कुर्वता **पूर्वभणिता दोषा** धातुक्खोभे मरणं[निभा.६१]इत्येवमादयः, तथा **परिश्रमादयश्च** दोषा **जढा** त्यक्ता भवन्तीति ॥५२३॥

**८८४ दुविहो य [2]सो वि साहू मंडलिउवजीवओ य इयरो य ।**
**[3]मंडलिउवजीवंतो अच्छइ जा पिंडिया सव्वे ॥५२४॥ नि०**

**दुविहो य** गाहा । **स च साधुर्द्विप्रकारो मण्डल्युपजीवकः, इतरश्च** [4]मण्डल्यनुपजीवकः, तत्र यो मण्डल्युपजीवकः [5]स शोधयित्वा भिक्षां तावत्प्रतिपालयति यावत्

---

१. जढा णेण ह० हे० २. होइ ह० हे० ३. मंडलिमुवजीवंतो दा० । ४. अमण्डल्युपजीवकः ख. । ५. साधुः सोऽटित्वा दा०

★ वीसमंतो इमं चिंते हियमट्ठं लाभमट्ठिओ । जइ मे अणुग्गहं कुज्जा साहू, हुज्जामि तारिओ ॥
साहवो तो चिअत्तेणं निमंतिज्ज जहक्कमं । जइ तत्थ केइ इच्छिज्जा तेहिं सद्धिं तु भुंजए ॥
(दश.अ.५, उद्दे.१ गा.९४-९५)

**पिण्डितारेकीभूताः सर्वे** साधवो भवन्ति, पुनश्च स तैः सह भुङ्क्ते ॥५२४॥

८८५ **★पच्छण्णे भुत्तव्वं जयणा दाणाउ पडिणियत्तणं ।**
**तुच्छग जाई दाणा बंधो इहरा पओसाई ॥८८॥ प्र०**

८८६ **इयरो वि गुरुसगासं गंतूण भणइ संदिसह भंते ! ।**
**पाहुणगखवगअतरंतबालवुड्ढाण सेहाणं ॥५२५॥ नि०**

**इयरो वि** गाहा । **इतरोऽप्यमण्डल्युपजीवकः** साधु**र्गुरुसकाशं गत्वा** तमेव गुरुं **भणति**-यदुत हे आचार्याः ! **संदिशत** ददत यूयमिदं भोजनं **प्राघूर्णक-क्षपक-अतरन्त-बाल-वृद्ध-शिक्षकेभ्यः** साधुभ्य इति ॥५२५॥

८८७ **इयरो संदिसह पाहुणखमए बाले गिलाणसेहे य ।**
**अहराइणियं सव्वे चियत्तेणं निमंतेज्जा ॥८९॥ प्र०**

[**इयरो वि गाहा । इतरोऽपि** मण्डल्यनुपजीवकः साधुर्गुरुपार्श्वं गत्वा गुरुं वक्ति-हे आचार्य ! **सन्दिशत** । ततः **प्राघूर्णका क्षपकग्लानशैक्षान् यथारात्निकान् सर्वान्** प्रीत्या **निमन्त्रयेत्** ॥ ओमाटी प्र.८९ ॥]

पुनश्च –

८८८ **दिण्णे गुरूहिं तेसिं सेसं भुंजिज्ज [1]गुरुअणुन्नाए ।**
**गुरुणा संदिट्ठो वा दाउं सेसं तओ भुंजे ॥५२६॥ नि०**

**दिण्णे** गाहा । एवमुक्तेन सता **गुरुणा दत्ते** सति **तेभ्यः** प्राघूर्णकादिभ्यो यच्छे**षं** तद् **भुञ्जीत गुरुणाऽनुज्ञाते** सति, यदिवा **गुरुणैवं सन्दिष्ट** उक्त यदुत त्वमेव प्राघूर्णकादिभ्यः प्रयच्छ, एवमसौ साधुर्भणितः सन् **दत्त्वा** प्राघूर्णकादिभ्यस्**ततः शेषं** यद् 'भक्तं **तद्भुङ्क्ते** । एवं न केवलमसौ प्राघूर्णकादिभ्यो ददात्यन्यानपि साधून्निमन्त्रयति, तत्र यदि ते गृह्णन्ति ततो निर्जरा, अथ न गृह्णन्ति तथापि विशुद्धपरिणामस्य निर्जरैवेति ॥५२६॥

एतदेवाह –

८८९ **इच्छिज्ज न इच्छिज्ज व तहवि य पयओ निमंतए साहू ।**
**परिणामविसुद्धीए [2]उ निज्जरा होअगहिए वि ॥५२७॥ नि०**

---

१. गुरूअणुन्नाओ हे० ह० २. अ निज्जरा दा० ★ अस्याः प्रक्षेपगाथाया वृत्तिः ५४२तमे पत्रेऽस्ति ।

**इच्छेज्ज** गाहा । **इच्छेत्** कश्चित्साधु**र्नेच्छेद्वा तथापि प्रयत्नेन** सद्भावेन **निमन्त्रयेत्साधून्**, एवं सद्भावेन निमन्त्रयमाणस्य **परिणामविशुद्ध्या** चित्तनैर्मल्या**न्निर्जरा भवति** कर्मक्षयलक्षणा**ऽगृहीतेऽपि** भक्ते ॥५२७॥

[1]अथावज्ञया न निमन्त्रयति ततोऽयं दोषः –

८९० **भरहेरवयविदेहे पन्नरस वि [2]कम्मभूमिगा साहू ।**
**एक्कंमि हीलियंमी सव्वे ते हीलिया होंति ॥५२८॥ नि०**

८९१ **भरहेरवयविदेहे पन्नरस वि कम्मभूमिगा साहू ।**
**एक्कंमि पूइयंमी सव्वे ते पूइया होंति ॥५२९॥ नि०**

८९२ **अह को पुणाइ नियमो एक्कंमि [3]वमाणियंमि ते सव्वे ।**
**होंति अवमन्निया पूइए य संपूइया सव्वे ॥५३०॥ नि०**

८९३ **नाणं [4]च दंसणं [5]चा तवो य तह संजमो य साहुगुणा ।**
**एक्के सव्वेसु वि हीलिएसु ते हीलिया होंति ॥५३१॥ नि०**

८९४ **एमेव पूइयंमि वि एक्कंमि वि पूइया जइगुणा उ ।**
**थोवं बहूनिवेसं इइ नच्चा पूयए मइमं ॥५३२॥ नि०**

८९५ **तम्हा जइ एस गुणो एक्कंमि वि पूइयंमि ते सव्वे ।**
**भत्तं वा पाणं वा सव्वपयत्तेण दायव्वं ॥५३३॥ नि०**

**भरहे** गाहा । सुगमा ॥५२८॥

[भरहेरवयविदेहे गाथा । भरतैरवतविदेहेषु पञ्चदशसु कर्मभूमिषु साधवो ये सन्ति एकस्मिन् साधौ हीलिते सर्वे ते हीलिताः । [ओ.नि.मा.नि.५२८]]

**भरहे** गाहा । यदा पुनरादरेण निमन्त्रयते तदायं महान् गुणः-सुगमा ॥५२९॥

[भरहेरवयविदेहे गाथा । भक्तादिनिमन्त्रणया ते सर्वे पूजिताः स्युः । [ओ.नि.मा.नि.५२९]]

अत्राह परः-**अह को पुणाइ** गाहा । **अथ कः पुनरयं नियमः** ? यदुत **एकस्मिन्नवमानिते** सति **सर्व** एवा**पमानिता भवन्ति**, तथै**कस्मिन् संपूजिते सर्व** एव **संपूजिता भवन्ति**, न चैकस्मिन् संपूजिते सर्वे संपूजिता भवन्ति, न हि **यज्ञदत्ते** भुक्ते **देवदत्तो** भुक्तो भवतीति ॥५३०॥

---

१. अथावज्ञया निम० प. भ. व. २. कम्मभूमगा ह० हे० ३. वि हीलियंमि हे० ४. व दा० ५. वा दा०

आचार्य आह-**नाणं** गाहा । **ज्ञानं दर्शनं च तपस्तथा संयमश्चै**ते **साधुगुणा** वर्त्तन्ते, एते च गुणा यथैकस्मिन् साधौ व्यवस्थिता एवं **सर्वेष्वपि**, एकस्वरूपत्वात्तेषाम्, यतश्चैवमत **एकस्मिन्** साधौ **हीलिते**ऽपमानिते **सर्वेषु** वा साधुषु **हीलितेषु ते** ज्ञानादयो गुणा **हीलिता** अपमानिता **भवन्ति** ॥५३१॥

**एमेव** गाहा । **एवमेकस्मिन् पूजिते पूजिता यतिगुणाः** सर्वे भवन्ति, यस्मादेवं तस्मात्**स्तोकमे**तद्भक्तपानादि **बहुनिवेसं** बह्वायमित्यर्थः, निर्जराहेतुरिति, तस्मा**देवं ज्ञात्वा पूजये**त्साधून् **मतिमा**निति, यतश्चैवमत एवमेव कर्त्तव्यम् ॥५३२॥

एतदेवाह-**तम्हा** गाहा । सुगमा ॥५३३॥

[प्रकृतमुपसंहरन्नाह –

**तम्हा जइ एस गुणो साहूणं भत्तपाणमाईहिं ।**
**कुज्जा वेयावच्चं धणयसुओ रायतणउ व्व** ॥४२२॥

तस्माद्यद्येष गुणः-एकस्मिन्नपि पूजिते समस्तपूजासिद्धिलक्षणः, तदा साधूनां भक्तपानादिभिः कुर्यास्त्वं वैयावृत्यम्, इदमुक्तं भवति-पञ्चदशस्वपि कर्म्मभूमिषु जघन्यपदेऽपि कोटिसहस्रपृथक्त्वं चारित्रिणां सर्वदैव लभ्यते, यत उक्तं प्रज्ञप्त्याम्-"सामाइयसंजया णं भंते ! एगसमएणं केवइया होज्जा? गोयमा ! पडिवज्जमाणए पडुच्च सिअ अत्थि सिअ नत्थि, जइ जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं बावट्ठं सयं, अट्ठोत्तरसयं खवगाणं चउप्पन्नं उवसामगाणं, पुव्वपडिवन्नए पडुच्च जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सयपुहुत्तं" "अहक्खायसंजया पडिवज्जमाणए पडुच्च जहा सुहुमसंपरायसंजया, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिपुहुत्तं उक्कोसेण वि कोडिपुहुत्तं ।" तदेवमेकस्मिन्नपि साधौ भक्तपानादिना पूजिते वर्त्तमानकालापेक्षयाऽपि निश्चितं कोटिसहस्रपृथक् साधूनां पूजितं भवति, अतीतानागतकालापेक्षया त्वनन्ता अपि साधवः पूजिताः सम्पद्यन्ते, तदेतावतीं गुणसिद्धिमालोच्य सदैव वैयावृत्यं कुर्याः त्वम्, क इवेत्याह-राजतनय इव॰राजपुत्र इव, कस्य सत्कोऽसावित्याह-धनदराजसुतः । [उप.माला.-४२२]]

**८९६ वेयावच्चं निययं करेह उत्तमगुणे धरिन्ताणं ।**
**सव्वं किल पडिवाई वेयावच्चं अपडिवाई ॥५३४॥ नि०**

**८९७ पडिभग्गस्स मयस्स व नासइ चरणं सुयं अगुणणाए ।**
**न हु वेयावच्चचियं सुहोदयं नासए कम्मं ॥५३५॥ नि०**

**८९८ लाभेण जोजयंतो जइणो लाभंतराइयं हणइ ।**
**कुणमाणो य समाहिं सव्वसमाहिं लहइ साहू ॥५३६॥ नि०**

**८९९ भरहो बाहुबली वि य दसारकुलनंदणो य वसुदेवो ।**
**वेयावच्चाहरणा तम्हा पडितप्पह जईणं ॥५३७॥ नि०**

**९०० होज्ज व न होज्ज लंभो फासुगआहारउवहिमाईणं[1] ।**
**[2]लाभो उ निज्जराए नियमेण [3]अओ उ कायव्वं ॥५३८॥ नि०**

**९०१ वेयावच्चे अब्भुट्ठियस्स सद्धाए काउकामस्स ।**
**लाभो चेव तवस्सिस्स होइ अदीणमणसस्स ॥५३९॥ नि०**

**वेयावच्चं** गाहा । **वैयावृत्त्यं नियतं** सततं **कुरुत**, केषाम् ? **उत्तमान् गुणान् धारयतां** साधूनां कुरुत । शेषं सुगमम् ॥५३४॥

किञ्च- **पडिभग्गस्स** गाहा । **प्रतिभग्नस्यो**न्निष्क्रान्तस्य **मृतस्य वा नश्यति चरणं श्रुतमगुणनया, न तु वैयावृत्त्यचितं** बद्धं **शुभोदयं नश्यति कर्म** ॥५३५॥

किञ्च—**लाभेण** गाहा। **लाभेन** प्राप्त्या घृतादे**र्योजयन्** घृतादिलाभेन योजयन् कान् ? **यतीन्, लाभान्तरायं** कर्म **हन्ति** । तथा पादप्रक्षालनादिना **कुर्वन् समाधिं** सर्वसमाधिं मनसः स्वस्थताम्, वाचो माधुर्यादिकम्, कायस्य निरुपद्रवताम्, एवं कुर्वंस्त्रिरूपमपि **सर्वसमाधिं लभते** ॥५३६॥

**भरहो** गाहा । सुगमा, नवरं **पडितप्पह** त्ति वैयावृत्त्यं कुरुत ॥५३७॥

किञ्च—**होज्ज व** गाहा । **भवेद्वा न वा लाभः**, केषाम् ? **प्रासुकानामाहारोपध्यादीनां** तथापि तस्य वैयावृत्त्यार्थमभ्युद्यतस्य साधोर्विशुद्धपरिणामस्य **लाभ** एव **निर्जरायाः**, नावश्यं लाभ एव सति निर्जरा भवति, यस्मादेवं तस्मात्**कर्त्तव्यं** वैयावृत्त्यम् ॥५३८॥

**वेयावच्चे** गाहा । सुगमा, नवरं **वैयावृत्त्येऽभ्युत्थितस्योद्यतस्य श्रद्धया कर्त्तुकामस्य लाभ एव** ॥५३९॥

**९०२ एसा गहणेसणविही कहिया भे धीरपुरिसपन्नत्ता ।**
**घासेसणं पि इत्तो वोच्छं अप्पक्खरमहत्थं ॥५४०॥ नि०**

**एसा** गाहा । सुगमा ॥५४०॥

---

१. ०वसहिमा. पा.छ. २. लंभो दा० ह० ३. अओ वि ह० हे०

[एसा गाथा । एषा ग्रहणैषणाविधिः कथिता भवतां धीरपुरुषप्रज्ञप्ता । ग्रासैषणामपीतो वक्ष्येऽल्पाक्षरां महार्थाम् । ग्रहणैषणा समाप्ता [ओ.नि.मा.नि.५४०]]

उक्ता ग्रहणैषणा, साम्प्रतं ग्रासैषणोच्यते, तथा चाह –

**१०३ दव्वे भावे घासेसणा उ दव्वंमि मच्छआहरणं ।**

**दव्वे** गाहा । सा च **ग्रासैषणा** द्विविधा-**द्रव्यतो भावतश्च,** तत्र **द्रव्ये मत्स्योदाहरणम्,** "[A] तं जहा-एगो किर मच्छबंधो गले मंसपिंडं दाऊण दहे छुहइ, तं च एगो मच्छो जाणइ, जहा एस गलो त्ति, सो परिपेरंतेण मंसं खाइऊण ताहे पराहुत्तो छिप्पाए गलमाहणई, मच्छबंधो जाणइ-एस गहिओ त्ति, एवं तेणं सव्वं खइयं मंसं, सो य मच्छबंधो खइएण मंसेण अद्धिईए लद्धो अच्छइ । एत्थ य आहरणं दुविहं-चरिअं कप्पिअं च, तं एयं मच्छबंधं ओहयमणसंकप्पं झायंतं दट्ठुं मच्छो भणइ-अहं पमत्तो चरन्तो गहिओ बलागाए, ताहे सा उक्खिवित्ता पच्छा गिलइ, ताहे अहं वंको तीसे मुहे पडामि, एवं बितियं तइयं पि उच्छलिओ ताहे मुक्को, अण्णया समुद्दे अहं गओ, तत्थ मच्छबंधा वलयामुहाइं करेंति कडएहिं, ताहे समुद्दवेलापाणिएणं सह अहं तत्थ वंकीकए कडे पविट्ठो, ताहे तस्स कडगस्स अणुसारेण अतिगओ, एवं तिण्णि वारा वलयामुहाओ मुक्को, जालाओ एक्कवीसं वारा फिडिओ, किह पुण ? जाहे जालं छूढं भवति ताहे अहं भूमिं घित्तूण अच्छामि, ताव एक्कंमि छिण्णोदए दहे ठिया । अम्हेहिं किह वि न नायं जहा इमो दहो सुक्किहिइ, ताहे सो दहो सुक्को, मच्छाणं पि थले गई णत्थि, ते सव्वे सुक्कंते पाणिए मया, कति जीवंति, तत्थ कोइ मच्छबंधो आगओ, सो हत्थेण गहाय सूलाए पोएति, ताहे मए नायं, अहं पि अचिरा विज्झीहामि जाव न विज्झामि ताव उपायं

---

A. तद्यथा-'एकः किल मत्स्यबन्धी गले मांसपिण्डं दत्त्वा द्रहे क्षिपति, तच्चैको मत्स्यो जानाति, यथा एष गल इति, सो परिपर्यन्तेन मासं खादित्वा तदा पराङ्मुखः पुच्छेन गलमाहन्ति, मत्स्यबन्धी जानाति- एष गृहीत इति, एवं तेन सर्वं खादितं मांसम्, स च मत्स्यबन्धी खादितेन मांसेनाऽधृत्या लब्धस्तिष्ठति । अत्र चाऽऽहरणं द्विविधम्- चरितं कल्पितं च, तदेतद् मत्स्यबन्धीमपहतमनसङ्कल्पं ध्यायन्तं दृष्ट्वा मत्स्यो भणति- अहं प्रमतश्चरन्तो गृहीतो बलाकया, तदा सा उत्क्षिप्य पश्चाद् गलति, तदाऽहं वक्रस्तस्या मुखे पतामि, एवं द्वितीयं तृतीयमप्युच्छलितस्तदा मुक्तः, अन्यदा समुद्रेऽहं गतः, तत्र मत्स्यबन्धिनो वलयामुखानि कुर्वन्ति कटकैः, तदा समुद्रवेलापानीयेन सहाहं तत्र वक्रीकृते कटे प्रविष्टः, तदा तस्य कटकस्यानुसारेणातिगतः, एवं तिस्रो वारा वलयामुखाद् मुक्तः, जालादेकविंशतिवारा स्फिटितः, कथं पुनः? यदा जालं क्षिप्तं भवति तदाऽहं भूमिं गृहीत्वा तिष्ठामि, तावदेकस्मिन् छिन्नोदके द्रहे स्थिताः, अस्माभिः कथमपि न ज्ञातं यथा- असौ द्रहः शोक्ष्यति, तदा स द्रहः शुष्कः, मत्स्यानामपि स्थले गतिर्नास्ति, ते सर्वे शुष्के पानीये मृताः, केचन जीवन्ति, तत्र कश्चिद्

चिंतेमि, ताहे तेसिं मच्छाणं अंतरालं सूलं डसिउं मुहेण ठिओ, सो जाणइ-एते सव्वे पोइयल्लया, ततो सो गंतूण अण्णहिं दहे धोवइ, तत्थ अहं मच्छुव्वत्तं करिंतो चेवुड्डीणो पाणिए पविट्ठो, तं एयारिसं मम सत्तं, तहवि इच्छसि गलेण घित्तुं? अहो! ते निल्लज्जत्तणं ति ।"

**गलमंसुंडगभक्खण गलस्स पुच्छेण घट्टणया ॥५४१॥ नि०**

'गलमंसुंडगं' गाहद्धं, **गले मांसपिंडभक्खणं**, शेषं सुगमम् ॥५४१॥

एनमेवार्थं गाथाभिरुपसंहरन्नाह –

**१०४ अह मंसंमि पहीणे झायंतं मच्छियं भणइ मच्छो ।**
**किं झायसि तं एवं ! सुण ताव जहा अहिरिओऽसि ॥५४२॥ नि०**

**१०५ चरियं [१] व कप्पियं वा आहरणं दुविहमेव [२] नायव्वं ।**
**अत्थस्स साहणट्ठा इंधणमिव ओयणट्ठाए ॥५४३॥ नि०**

**१०६ [३] तिबलागमुहुम्मुक्को तिखुत्तो वलयामुहे ।**
**तिसत्तखुत्तो जालेणं सइं छिन्नोदए दहे ॥५४४॥ नि०**

**१०७ एयारिसं [४] ममं सत्तं सढं घटिअघट्टणं ।**
**इच्छसि गलेण घित्तुं अहो ते अहिरीयया ॥५४५॥ नि०**

**अह मंसंमि** गाहा । सुगमा ॥५४२॥

**[ अह मंसंमि पहीणे झायंतं मच्छियं भणइ मच्छो ।**
**किं झायसि तं एवं सुण ताव जहा अहिरिओऽसि ॥६३१॥**

व्याख्या-अथ मांसे प्रक्षीणे ध्यायन्तं मात्स्यिकं मत्स्यो भणति, यथा किं त्वमेवं 'ध्यायसि' चिन्तयसि ? शृणु तावद्यथा त्वम् 'अह्रीकः' निर्लज्जो भवसि । [पिण्डनि.६३१]]

**चरियं व** गाहा । सुगमा ॥५४३॥

[तत्र द्रव्यग्रासैषणोदाहरणस्य सम्बन्धमाह –

---

मत्स्यबन्धी आगतः, स हस्तेन गृहीत्वा शूलायां प्रोतति, तदा मया ज्ञातम्, अहमप्यचिराद् विन्धयिष्यामि यावन्न विन्धयेयम्, तावदुपायं चिन्तयामि, तदा तेषां मत्स्यानामन्तरालं शूलं मुखेन गृहीत्वा स्थितः, स जानाति- एते सर्वे प्रोतिताः, ततः स गत्वाऽन्यस्मिन् द्रहे धावति, तत्राहं मत्स्योद्वर्तं कुर्वन्नेव उड्डीनः पानीये प्रविष्टः, तदेतादृशं मम सत्त्वम्, तथापीच्छसि गलेन ग्रहीतुम् ? अहो ! ते निर्लज्जत्वमिति ।

१. च कप्पियं चा ह० हे० २. पण्णत्तं छ. र. ३. तिबलाह० हे० ह० ४. महं हे० ह०

**चरियं व कप्पियं वा आहरणं दुविहमेव नायव्वं ।**
**अत्थस्स साहणट्ठा इंधणमिव ओयणट्ठाए ॥६३०॥**

व्याख्या-इह विवक्षितस्यार्थस्य 'साधनार्थं' प्रतिपादनार्थं द्विविधमुदाहरणं ज्ञातव्यम्, तद्यथा-चरितं कल्पितं च, कथमिव विवक्षितस्यार्थस्य प्रसाधनायोदाहरणं भवतीत्यत आह-'इन्धनमिव ओदनार्थम्' इन्धनमिवौदनस्येति भावः, तत्र प्रस्तुतस्यार्थस्य प्रसाधनार्थमिदं कल्पितमुदाहरणम्-कोऽप्येको मत्स्यबन्धी मत्स्यग्रहणनिमित्तं सरो गतवान्, गत्वा च तेन तटस्थेनाग्रभागे मांसपेशी समेतो गलः सरोमध्ये प्रचिक्षिपे, तत्र च सरसि परिणतबुद्धिरेको महादक्षो जीर्णमत्स्यो वर्त्तते, स गलगतमांसगन्धमाघ्राय तद्भक्षणार्थं गलस्य समीपमुपागत्य यत्नतः पर्यन्ते पर्यन्ते सकलमपि मांसं खादित्वा पुच्छेन च गलमाहत्य दूरतोऽपचक्राम, मत्स्यबन्धी च गृहीतो गलेन मत्स्य इति विचिन्त्य गलमाकृष्टवान्, पश्यति मत्स्यमांसपेशीरहितं गलं, ततो भूयोऽपि मांसपेशीसहितं गलम् प्रचिक्षेप, तथैव च स मत्स्यो मांसं खादित्वा पुच्छेन च गलमाहत्य पलायितवान्, एवं त्रीन् वारान् मत्स्यो मांसं खादितवान्, न च गृहीतो मत्स्यबन्धेन । [पिण्डनि.६३०]]

**तिबलाग** गाहा । तिस्रो वारा बलाकाया मुखेनो**न्मुक्त** ऊर्ध्वं क्षिप्तः, **त्रिकृत्वो वलयामुखे** कटात्मकयाऽऽवर्त्तवद्रचिते, तथा त्रीन् सप्तकान् **जालात्प्रच्युतः सकृदे**कवारां **छिन्नोदके द्रहे** छुटितः ॥५४४॥

**एयारिसं** गाहा । एवंविधं **मम सत्त्वं शठं** मां तथा **घटितघट्टनं** घटितानि सम्बद्धानि घट्टनानि जालादीनि चलनानि यस्य सोऽहं घटितघट्टनः, तमेवंविधं **मामिच्छसि गलेन ग्रहीतुम्? अहो ते** निर्लज्जता । उक्ता द्रव्यग्रासैषणा, यतोऽसौ ग्रासं कुर्वन्न क्वचिच्छलित इति ॥५४५॥

इदानीं भावग्रासैषणां प्रतिपादयन्नाह –

**९०८ अह होइ भावघासेसणा उ अप्पाणमप्पणा चेव ।**
**साहू भुंजिउकामो अणुसासइ निज्जरट्ठाए ॥५४६॥ नि०**

**अह होति** गाहा । **अथ भवति भावग्रासैषणा,** कथम्? यदाऽऽ**त्मानमात्मनैव साधुरनुशास्ति,** कदा पुनः ? **भोक्तुकामो** भोक्तुमभिलषन्, **निर्जरार्थं** न तु वर्णाद्यर्थम् ॥५४६॥

किं पुनरसौ चिन्तयन्नात्मानमनुशास्तीत्याह –

**९०९ बायालीसेसणसंकडंमि गहणंमि जीव ! न हु छलिओ ।**
**इण्हिं जह न छलिज्जसि भुंजंतो रागदोसेहिं ॥५४७॥ नि०**

**बायालीसे** गाहा । **द्विचत्वारिंशदेषणादोषैः सङ्कटं** दुष्प्रवेशं यद्गहनं गह्वरं तस्मिन् हे **जीव ! न** त्वं **छलितः**, शेषं सुगमम् ॥५४७॥

यथा न व्यंस्यसे तथा कर्त्तव्यम् –

**११० जह अब्भंगण[1]लेवा सगडक्खवणाण जुत्तिओ [2]होंति ।**
**इय संजमभरवहणट्ठयाए साहूण आहारो ॥५४८॥ नि०**

**जह** गाहा । **यथाऽभ्यङ्गलेपा** यथासङ्ख्येन **शकटाक्षस्य व्रणानां** च **युक्तितो भवन्ति**, एतदुक्तं भवति-यथाऽभ्यङ्गः शकटाक्षे युक्त्या दीयते न चातिबहुर्न चातिस्तोको भरवहनार्थम्, तथा व्रणानां च लेपो युक्त्या दीयते नातिबहुर्नातिस्तोकः, एवं **संयमभरवहनार्थं साधूनामाहारः** ॥५४८॥

**१११ उवजीवि अणुवजीवी [3]मंडली पुव्ववन्निओ साहू ।**
**मंडलिअसमुद्दिसगाण ताण इणमो विहिं वुच्छं ॥५४९॥ नि०**

**उवजीवि** गाहा । तत्र **मण्डल्युपजीवी अनुपजीवी** च **पूर्वमेव** द्विविधो **व्यावर्णितः साधुरेकः**, इदानीं बहूनां **मण्डल्यामसमुद्दिशकानां** यो **विधिर्भवति** तं **वक्ष्ये** ॥५४९॥

ते च कथं मण्डल्यामसमुद्देशका भवन्ति ? अत आह –

**११२ आगाढजोगवाही निज्जूढत्तड्डिआ व पाहुणगा ।**
**सेहा सपायछित्ता बाला वुड्ढेवमाईया ॥५५०॥ नि०**

**आगाढ** गाहा । **आगाढयोगो** गणियोगः, तत्स्था ये ते मण्डलीं नोपजीवन्ति, **निज्जूढ** त्ति **अमनोज्ञाः** कारणान्तरेण तिष्ठन्ति ते पृथग् भुञ्जते, तथाऽऽ**त्मार्थिकाश्च** पृथग् भुञ्जते **प्राघूर्णकाश्च**, यतस्तेषां प्रथममेव प्रायोग्यं पर्याप्त्या दीयते, ततस्तेऽप्येकाकिनो भवन्ति, [136]**शिक्षका** अपि सागारिकाः पृथग् भोज्यन्ते, **सप्रायश्चित्ताश्च** पृथग् भोज्यन्ते, यतस्तेषां शबलं चारित्रम्, शबलचारित्रैः सह न भुज्यते, **बालवृद्धा** अप्यसहिष्णुत्वात्प्रथममेव भुञ्जतेऽतस्तेऽप्येकाकिन इति, **एवमाद्या** मण्डल्यामसमुद्दिशका भवन्ति, **आदि**ग्रहणात्कुष्ठव्याध्याद्युपद्रुता इति ॥५५०॥

---

१३६. शिक्षकाः अभिनवप्रव्रजिता इति । संटी.

१. लेवो ह० हे० २. होइ ह० हे० ३. मंडलिं दा०

ते च भुञ्जानाः सन्त आलोके भुञ्जते, स चालोको द्विविधो भवतीत्येतदेवाह –

**११३ दुविहो खलु आलोको दव्वे भावे य [१]दव्वि दीवाई ।**
**सत्तविहो पुण भावे आलोगो तं परिकहेऽहं ॥५५१॥ नि०**

**दुविहो** गाहा । **द्विविध आलोको**–द्रव्यालोको **भावा**लोकश्च, तत्र **द्रव्यालोकः प्रदीपादिः**, **भाव**विषयः **पुनरालोकः सप्तविधः, तं** च **कथयाम्यहम्**, तत्र भावालोकस्येयं व्युत्पत्तिः-आलोक्यते इत्यालोकः–स्थानदिगादिनिरूपणमित्यर्थः ॥५५१॥

तं च सप्तविधमपि प्रतिपादयन्नाह –

**११४ ठाण दिसि पगासणया भायण पक्खेवणे य गुरु भावे ।**
**सत्तविहो आलोको सया वि जयणा सुविहियाणं ॥५५२॥ नि० । दारगाहा।**

**ठाण** गाहा । तैश्चामण्डलिसमुद्दिशकैर्निष्क्रमप्रवेशवर्जिते **स्थाने** भोक्तव्यम्, तथा कस्यां **दिशि** आचार्यस्योपवेष्टव्यमित्येतद्वक्ष्यति, तथा **सप्रकाशे** स्थाने भोक्तव्यम्, **भाजने** च विस्तीर्णमुखे भोक्तव्यम्, **प्रक्षेपणं च** कवलानां कुर्कुट्यण्डकमात्राणां कर्त्तव्यम्, तथा **गुरोश्चक्षुः** पथे भोक्तव्यम्, तथा **भावो** ज्ञानादि तत्संधानार्थं भोक्तव्यमित्येतद्वक्ष्यति । एवमयं **सप्तविध आलोकः, सदाऽपि** च **यतना** तस्मिन् सप्तविधेऽप्यालोके यतना **सुविहितानाम्** ॥५५२॥

इदानीं भाष्यकारो व्याख्यानयति प्रतिपदम्, तत्राद्यावयवव्याचिख्यासयाह-

**११५ निक्खमपवेसमंडलि सागारियठाणपरिहरिय ड्डाइ ।**
**मा एक्कासणभंगो अहिगरणं अंतरायं वा ॥२७४॥ निभा०**

**णिक्खम** गाहा । **निष्क्रमप्रवेशौ** वर्जयित्वा भोजनार्थमुपवि[२]शन्ति, तथा **मण्डली**प्रवेशं च वर्ज[३]यन्ति, तथा **सागारिकस्थानं** च **परिहृत्य** [४]भुञ्जते, **मा** भूत् सागारिके प्राप्ते सति **एकाशनकभङ्गः** स्यादिति, **अधिकरणं** राटिर्वा भवति, अन्येन प्रव्रजितेन सहास्थान युपविष्टस्य भुञ्जतो**ऽन्तरायं** च भवति, कथम्? स साधुरन्यस्य सत्के स्थाने भुङ्क्ते उपविष्टः, सोऽपि साधुरागतः प्रतीक्षमाण आस्ते, एवं चान्तरायं कर्म बध्यते ॥२७४॥

---

१. दव्वदीवाई सं० २. ०विशति दा० ३. ०यति दा० ४. भुङ्क्ते दा०

इदानीं दिशाद्वारप्रतिपादनायाह –

**११६ [१]पच्चुरसि परंमुह पिट्ठि पक्ख एया दिसा विवज्जेत्ता ।**
**[२]ईसाणग्गेईय व ठाएज्ज गुरुस्स गुणकलिओ ॥२७५॥ निभा०**

**पच्चुरसि** गाहा । उरसोऽभिमुखं **प्रत्युरसं** गुरोरभिमुखं वर्जयित्वेत्यर्थः, **पराङ्मुखश्च** नोपविशति गुरोः, तथा **पृष्ठतश्च** गुरोर्नोपविशति, **पक्षके** च नोपविशति, एव**मेता दिशो वर्जयित्वा ईशान्यां** दिशि **गुरोराग्नेय्यां वा** दिशि, **तिष्ठे**दुपविशेद्भोजनार्थं **गुणकलितः** साधुर्यः ॥२७५॥

इदानीं पगासणय त्ति (नि.५५२) व्याख्यायते –

**११७ [३]मक्खियकंटगट्ठाईण जाणणट्ठा पगासभुंजणया ।**
**अट्ठियलग्गणदोसा वग्गुलिदोसा जढा एवं ॥२७६॥ निभा०**

**मक्खिय** गाहा । कथं नु नाम **मक्षिका** ज्ञायेत दृश्येत, तथा **कण्टको** वा कथं नु नाम दृश्येत, अस्थि वा उपलभ्येत ? एवमर्थं प्रकाशे सोद्योतस्थाने भुज्यते, **आदि**ग्रहणाद् [४]वालादिपरिग्रहस्तच्च दृश्यते, एवं च **प्रकाशे भुञ्जानेन** योऽसौ गलकादौ **अस्थिलगनदोष**स्तथा कण्टकलगनदोषश्च गलकादौ स परिहृतो भवति, तथाऽन्धकारे मक्षिकाभक्षणजनितो यो [१३७]**वल्गुलिव्याधिदोषः** स परिहृतो भवतीति । द्वारम् ॥२७६॥

इदानीं 'भायण'त्ति (नि. ५५२) द्वारमुच्यते –

**११८ जे चेव अंधयारे दोसा ते चेव संकडमुहंमि ।**
**परिसाडी बहुलेवाडणं च तम्हा पगासमुहे ॥२७७॥ निभा०**

**जे चेव** गाहा । **य एवान्धकारे** भुञ्जानस्य **दोषा** [१३८]मक्षिकादिजनिता भवन्ति **त एव दोषाः सङ्कटमुखे** भाजने [५]कमढकादौ भुञ्जतः, अयमपरोऽधिकदोषः

---

१३७. वल्गुलिः-रोगविशेषः । सं.टी.

१३८. मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् । कुरुते मक्षिका वान्तिं कुष्ठरोगं च कोलिकः ॥५०॥
कण्टको दारुखण्डं च वितनोति गलव्यथाम् । व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥५१॥
विलग्नश्च गले वालः स्वरभङ्गाय जायते । इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥५२॥
[यो.शा.प्र.३-५०-५१-५२]

१. पच्चुरस ह० हे० २. ईसाणग्गेईण हे० ह० ३. मच्छिय० दा० ४. वालादि वा दृ० दा० ५. कमठादौ । दा०

**परिसाडी परिशाटी** भवति पार्श्वे निपतति, तथा "[A]**बहुलेवाडणं च** वड्डुं विच्चं खरडिज्जइ हत्थस्स उवरिं पि भुंजंतस्स संकडे ।" **तस्मात् प्रकाशमुखे** विपुलमुखे भाजने भुज्यत इति ॥२७७॥

पक्खेवणविही (नि. ५५२) भण्णइ –

**११९ कुक्कुडिअंडगमित्तं अविगियवयणो उ पक्खिवे कवलं ।**
**अइखद्धकारगं वा जं च अणालोइयं होज्जा ॥२७८॥ निभा०**

**कुक्कुडि** गाहा । **कुकुट्या अण्डकं** कुकुट्यण्डकं तत्प्रमाणं कवलं प्रक्षिपेद्वदने मुखे, किंविशिष्टः सन् ? **अविकृतवदनो** नात्यन्तं निर्घाटितमुखः **प्रक्षिपेत्कवलम्**। दारं । गुरु त्ति व्याख्यायते-**अइखद्ध** त्ति गुरोरालोके भोक्तव्यम्, यदि पुनर्गुरोर्दर्शनपथे न भुङ्क्ते ततः कदाचित्साधुः **अइखद्धम**तिप्रचुरं भक्षयेन्निःशङ्कः सन्, स च सव्याजशरीरः कदाचिद्वा गुरोरदर्शनपथे भुञ्जानोऽ**कारकम**पथ्यमपि भुञ्जीयान्निशङ्कः सन्, कदाचिद्वा भिक्षामटताऽनेन स्निग्धद्रव्यं लब्धं **भवेत्** तच्चा**नालोच्यै**व भक्षयेदेकान्ते मा भून्मामाचार्यो निवारयिष्यति ॥२७८॥

अतः –

**१२० एएसिं जाणणट्ठा गुरुआलोए तओ उ भुंजिज्जा ।**
**नाणाइसंधणट्ठा न वन्नबलरूवविसयट्ठा ॥२७९॥ निभा०**

**एएसिं** गाहा । **एतेषां** प्रचुरभक्षितादीनां दोषाणां **ज्ञानार्थं गुरोरालोके** चक्षुर्दर्शनपथे **भुञ्जीत** येन गुरुः समीपस्थं भुञ्जानं दृष्ट्वा प्रचुरं भक्षयन्तं निवारयति, तथाऽकारकं भक्षयन्तं निवारयति, तथा अणालोइयं चोरिअं खायंतं निवारयति, मा भूदवारणेऽपाटवजनिता दोषाः स्युः । इदानीं भावे त्ति व्याख्यायते–**णाणाइ** त्ति **ज्ञानादि**र्भावो ज्ञानं दर्शनं चारित्रं च, एतज्ज्ञानादिभावत्रयमभुज्यमाने त्रुट्यति व्युच्छिद्यते, अत एतेषां ज्ञानादीनां त्रुट्यतां **सन्धानार्थम**विच्छिन्नप्रवाहार्थं भुज्यते, न वर्णार्थं **भुज्यते, न वर्णो** मम गौरत्वं स्यादित्येवमर्थम्, तथा **बलं** मम भूयादित्येवमर्थमपि **न** भुज्यते, **रूपं** मम भूयाद् [१]बुभुक्षया क्षीणगण्डपार्श्वः सन् मांसोपचयेन पूरितगण्डपार्श्वो रूपवान् भविष्यामीति **नैवमर्थो** भुङ्क्ते, **नापि विषयार्थं** मैथुनाद्यासेवनार्थं भुङ्क्ते ॥२७९॥

---

A. बहुलेपनं च वड्डुं-किनारी इति भाषायाम्, मध्यं खरण्टयेद् हस्तस्योपर्यपि भुञ्जतः सङ्कटे ।
१. बुभुक्षाया० ख.

**१२१ सो आलोइयभोई जो एए जुंजए पए सव्वे ।**
**[1]गविसणगहणग्घासेसणाइ [2]तिविहाइ वि विसुद्धं ॥५५३॥ नि०**

**सो आलोइअ** गाहा । **सः** साधुर्गुरोरा**लोचितं** भुङ्क्ते **य एतानि पदान्य**नन्तरोदितानि **युनक्ति** प्रयुङ्क्ते करोति स्थानादीनि, स च **गवेषणै**षणया **ग्रहणै**षणया **ग्रासैषणया**, अनया **त्रिविधा**ऽप्येषणया **विशुद्धं** भुङ्क्ते य एतानि पदानि प्रयुङ्क्ते इति ॥५५३॥

**१२२ एवं एगस्स विही भोत्तव्वे वन्निओ समासेणं ।**
**एमेव अणेयाण वि जं नाणत्तं [3]तमहं वोच्छं ॥५५४॥ नि० .**

**एवं** गाहा । **एवमेकस्य** साधो**र्भोक्तव्ये विधिर्वर्णितः समासेन** सङ्क्षेपेण, **एवमेवानेकेषामपि** साधूनां भोजने विधिः, **यत्तु** पुन**र्नानात्वं** भवति[4] यो भेदो यदतिरिक्तं **तदहं वक्ष्ये** ॥५५४॥

आह–किं पुनः कारणं मण्डली क्रियते ? उच्यते –

**१२३ अतरंतबालवुड्ढा सेहाएसा गुरू असहुवग्गो ।**
**साहारणोग्गहाऽलद्धिकारणा मंडली होइ ॥५५५॥ नि०**

**अतरन्ता** गाहा । **अतरन्त** इति ग्लानस्तत्कारणात्तन्निमित्तं मण्डली भवति, यतस्तस्य ग्लानस्य यद्येकः साधुर्वैयावृत्त्यं करोति ततस्तस्य तत्रैवाक्षणिकस्य सूत्रार्थहानिर्भवति, मण्डलीमध्ये तु कश्चित्किञ्चित्करोति, अत एतदर्थं मण्डली क्रियते येन बहवः प्रतिजागरका भवन्तीति । **बालो**ऽपि भिक्षामटितुमसमर्थः, स च बहूनां मध्ये सुखेनैव कथं नु नाम वर्त्तेत ? अतो मण्डली भवति । **वृद्धो**ऽप्येवमेव। **सेह शैक्षकः** स चैकः सन् भिक्षाविशुद्धिं न जानाति ततस्तस्यानीय दीयते, **आएसो** प्राघूर्णकस्तस्य चागतस्य सर्व एवोपकुर्वन्ति, स चोपकारः सर्वैरेव मिलितैः कर्त्तुं शक्यते न त्वेकेन, **गुरोश्च** सर्वैरेवोपकर्त्तुं शक्यते, न त्वेकेन सूत्रार्थपरिहानेः, तथा **असहुवग्गो** त्ति असमर्थो राजपुत्रादिः स च भिक्षामटितुं सुकुमारत्वान्न शक्नोति ततश्च सर्व एव मिलिता उपकुर्वन्ति, तस्मात् **साहारणोग्गहा** साधारणश्चासावुपग्रहश्च साधारणोपग्रहस्तस्मात् **साधारणोपग्रहात् कारणान्मण्डली** कर्त्तव्या । अथवा मण्डलीविशेषणमेतत्, उपगृह्णातीत्युपग्रहो भक्तादिः स साधारणस्तुल्यो यस्यां सा **साधारणोपग्रहा मण्डली भवति । अलद्धिकारणा मण्डली होइ** इति

१. गवेसणगहणघासेसणा य ह० हे० २. तिविहा य ह० हे० ३. तयं ह० हे० ४. ०ति तदहं दा०

कदाचित्कश्चित्साधु**रलब्धिमान्** भवति ततश्च तेऽन्ये साधवस्तस्मै आनीय प्रयच्छन्ति, अत **एतत्कारणान्मण्डली भवति** ॥५५५॥

इदानीं भिक्षागतानां साधूनां यो वसतिरक्षपाल आस्ते तेन किं कर्त्तव्यमित्यत आह –

**९२४ नाउं नियट्टणकालं वसहीपालो[1] य भायणुग्गाहे ।**
**परिसंठियच्छदवगिण्हट्टया गच्छमासज्ज ॥५५६॥ नि०**

**नाऊण** गाहा । **ज्ञात्वा** भिक्षागतानां **निवर्त्तनकालं वसतिपालो भाजनं** नन्दीपात्रं तत्प्रत्युपेक्ष्यो**द्ग्राहयति** सङ्कुटितेनास्त इत्यर्थः, किमर्थम् ? **परिसंस्थिता-च्छद्रवग्रहणार्थम्,** एतदुक्तं भवति–तत्रानीय साधवः पानकं प्रक्षिपन्ति, पुनश्च तत्र परिसंस्थितं स्वच्छीभूतं सत्तस्मादन्यत्र पात्रके क्रियते येन तत्स्वच्छमाचार्यादीनां योग्यं भवति, पात्रकादिप्रक्षालनं च क्रियते । **गच्छमासज्ज** त्ति **गच्छ**माश्रित्य गच्छस्य प्रमाणं ज्ञात्वा पात्रकमुद्ग्राहयन्ति, एतदुक्तं भवति- यदि महान् गच्छस्ततः पानकगलनार्थं महत्प्रमाणं पात्रकमुद्ग्राहयति, तथा द्वे त्रीणि चत्वारि पञ्चादीनि यावत् ॥५५६॥

**९२५ असई य नियट्टेसुं एक्कं चउरंगुलूणभाणेसु ।**
**पक्खिविय पडिग्गहगं तत्थऽच्छदवं तु गालिज्जा ॥५५७॥ नि०**

**असती य** गाहा । अथ तत्र रक्षपालः समर्थो नास्ति यः पात्रकमुद्ग्राहयति, अथवा **असई य** त्ति यदि नन्दीपात्रं नास्ति, यत्रोदकमानीतं स्वच्छीकरणार्थं क्रियते ततो**ऽसति** तस्मिन् नन्दीपात्रे **तदेकं** पतद्ग्रहं प्रक्षिप्य, क्व ? अत आह– **'चउरंगुलूणभाणेसु' चतुरङ्गुलैरूनानि** यानि **भाजनानि तेषु प्रक्षिप्य पतद्ग्रहं** पुन**स्तस्मिन्** क्षणीभूते**ऽच्छं द्रवं गालयेत्,** अत्र चायं नियमो द्रष्टव्यः, यदुत–भिक्षां तावत्साधवः पर्यटन्ति यावत्पात्रकं चतुर्भिरङ्गुलैरूनमास्त इति ॥५५७॥

आह–किं पुनः कारणं तद्द्रवगलनं क्रियते ? उच्यते –

**९२६ आयरियअभावियपाणगट्टया पायपोसधुवणट्ठा ।**
**होइ य सुहं विवेगो सुह आयमणं च सागरिए ॥५५८॥ नि०**

---

१. ०पालो उ हे० ह०

**आयरिय** गाहा । **आचार्यपानार्थमभावित**सेहादिपानार्थं च गलनं क्रियते । तथा **पादधावनार्थं पोस** त्ति अधिष्ठानं तस्य प्रक्षालनार्थम्, तथा **भवति च सुखेन विवेक**स्त्यागोऽतिरिक्तस्य [१]तस्य पानकस्य, तथा **सुखेन** वाऽऽ**चमनं सागारिकस्या**-ग्रतः क्रियते, एवमर्थं गलनं क्रियत इति ॥५५८॥

कियन्ति पुनः पात्रकाणि गलितद्रवस्य ध्रियन्ते ? इत्यत आह –

**१२७ एक्कं व दो व तिन्नि व पाए गच्छप्पमाणमासज्ज ।**
**अच्छदवस्स भरिज्जा कसट्टबीए विगिंचिज्जा ॥५५९॥ नि०,**

**एक्कं व** गाहा । **एक्कं द्वे त्रीणि वा पात्रकाणि** ध्रियन्ते, **गच्छप्रमाणं** ज्ञात्वा चतुष्प्रभृतीन्यपि **ध्रियन्ते स्वच्छद्रवस्य,** तत्र च गलिते सति **कसट्टं** कचवरं **बीजानि** च गोधूमादीनि **विगिञ्चेत्** परित्यजेत्, एवं तावत्पतद्ग्रहकर्णेनाप्युदकमपवृत्त्य पानकगलनं क्रियते ॥५५९॥

अथ पुनस्तत्र कीटिकामर्कोटकादयः प्लवमाना दृश्यन्ते ततस्तत्र गालने को विधिः ? इत्यत आह –

**१२८ मूइंगाईमक्कोडएहिं [२]संसत्तगं च नाऊणं ।**
**गालिज्ज छब्बएणं सउणीघरएण व दवं तु ॥५६०॥ नि०**

**मूइंगादी** गाहा । **मूइंगा** कीटिका **मर्कोटकाश्च तैः संसक्तं ज्ञात्वा गालयेत् छब्बएणं** वंशपिटकेन **शकुनिगृहकेण वा** गालयेत्तद् **द्रवम्** ॥५६०॥

**१२९ इय आलोइय पट्ठविअ गालिए मंडलीए सट्ठाणे ।**
**सज्झायमंगलं कुणइ जाव सव्वे पडिनियत्ता ॥५६१॥ नि०**

**इय** गाहा । **इय** त्ति पूर्वोक्तविधिनाऽऽ**लोचिते** सति **प्रस्थापिते** स्वाध्याये **गालिते** च पानके पुनश्च **मण्डल्यां स्वस्थान** युपविश्य **स्वाध्यायमङ्गलं करोति** स्वाध्याय एव मङ्गलं स्वाध्यायमङ्गलं तावत्करोति **यावत् सर्वे** साधवः **प्रतिनिवृत्ता** भवन्ति ॥५६१॥

एवं यदि सहिष्णवस्ततो यौगपद्येन भुञ्जते, अथाऽसहिष्णवस्तत्र केचिद्द्रवन्ति ततः को विधिरित्यत आह –

---

१. सतः, तथा दा. २. संसत्तगंध हे०

**१३० [१]काले पुरिसे आसज्ज मत्तए पक्खिवित्तु तो पढमा ।**
**अहवा वि पडिग्गहगं मुयंति गच्छं समासज्ज ॥५६२॥ नि०**

**काले** गाहा । स चासहिष्णुर्ग्रीष्म**काला**द्यङ्गीकृत्य भवति, स्वत एव वा **पुरुषः** कदाचिद् बुभुक्षालुर्भवति, तमाश्रित्य **मात्रके प्रक्षिप्य** भक्तं **प्रथमालिका** तावद्दीयते, अथ बहवो बुभुक्षालवस्ततः **पतद्ग्रहकं मुञ्चति** तेभ्यो भक्षणार्थं **गच्छं समासज्ज** त्ति **गच्छ**मल्पं बहुं वा ज्ञात्वा तदनुरूपं पतद्ग्रहं मुञ्चतीति ॥५६२॥

पुनर्मिलितेषु च साधुषु [२]मण्डलीं स्थविरः प्रविशति, [३]किं कृत्वेत्यत आह –

**१३१ चित्तं बालाईणं गहाय आपुच्छिऊण आयरिअं ।**
**जमलजणणीसरिच्छो निवेसई [४]मंडलिं थेरो ॥५६३॥ नि०**

**चित्तं** गाहा । **चित्तं बालादीनां गृहीत्वा पृष्ट्वाऽऽचार्यं** [५]मण्डलीं स्थविरः प्रविशति, किंविशिष्टः ? इत्यत आह – **जमलजणणीसरिच्छो निवेसई, उपविशति** **[६]मण्डलीं स्थविर** इति ॥५६३॥

स च मण्डलीस्थविरो गीतार्थो रत्नाधिकोऽलुब्धकश्च भवति, अनेन च पदत्रयेणाष्टौ भङ्गाः सूचिता भवन्ति, तत्र तेषां मध्ये ये शुद्धा अशुद्धाश्च तान् प्रदर्शयन्नाह–

**१३२ जइ लुद्धो राइणिओ [७]ड्डाइ अलुद्धो वि जो वि गीयत्थो ।**
**ओमो वि हु गीयत्थो मंडलिराइणिओ अलुद्धो उ ॥५६४॥ नि०**

**जति** गाहा । **यद्यसौ मण्डलीस्थविरो लुब्धो रत्नाधिकश्च** ततस्तिष्ठति न परिविशति, अनेन च लुब्धपदेन द्वितीयचतुर्थषष्ठाष्टमा भङ्गका अशुद्धाः प्रदर्शिता भवन्ति । **अलुद्धो वि जो वि गीयत्थो ओमो वि हु** त्ति **अलुब्धोऽपि यदि गीतार्थ ओमो** लघुपर्यायः स मण्डल्यां परिविशति, अनेन च ग्रन्थेन तृतीयभङ्गकः कथितो भवति, अयं च प्रथमभङ्गकाभावे भवति । अत्र च भङ्गके गीतार्थपदग्रहणेन यत्र यत्र भङ्गकेऽगीतार्थपदं स सर्वो दुष्टो ज्ञातव्यः । **गीयत्थो मंडलिराइणिओ अलुद्धो** त्ति यस्तु पुन**र्गीतार्थो रत्नाधिकोऽलुब्धश्च** स **मण्डल्यां** परिविशति, अनेन च ग्रन्थेन प्रथमो भङ्गकः शुद्धः प्रदर्शितो भवति, सर्वथा यत्र यत्र लुब्धपदमगीतार्थपदं च स स परिहार्यः, ओमराइणियपदं च यद्यगीतार्थो लुब्धपदं

---

१. कालपुरिसे य हे०ह० २. मण्डलीस्थविरः दा. ३. कीदृश इत्यत आह क ४. मंडलीथेरो दा. ५. मण्डलीस्थविरः दा. ६. मण्डलीस्थविरः दा. ७. अहव दा० अहव अलुद्धो वि होउ ध.

च न भवति ततोऽपवादे शुद्धं भवति, प्रथमं तु शुद्धमेव ॥५६४॥

इदानीं ते मिलिताः सन्त आलोके भुञ्जन्ते, स च आलोको द्विविधो द्रव्यतो भावतश्च, तत्र द्रव्यतः प्रदीपादिः, भावतः सप्तप्रकारस्तं दर्शयन्नाह –

**९३३ ठाण दिसि पगासणया भायण पक्खेवणा य भाव गुरू ।**
**सो [1]चेव य आलोगो नाणत्तं तू दिसा ठाणे ॥५६५॥ नि०**

**ठाण** गाहा । **स्थानं** वक्तव्यम्, उपवेशने **दिग्** वक्तव्या, **प्रकाशमुखे भाजने** भोक्तव्यम्, भोजनक्रमो वक्ष्यमाणः, **प्रक्षेपणं च** वदने वक्तव्यम्, **भावालोको** वक्तव्यः, **गुरुर्वक्तव्यः, स एवालोकः** पूर्वोक्तः, **नानात्वं त्वत्र** यदि परं **दिशः स्थानस्य** च, अत्र दिक्पदमन्यथा वक्ष्यति स्थानं च ॥५६५॥

इदानीं भाष्यकारः स्थाननानात्वं दर्शयति, तत्र स्थानव्याख्यानायाह –

**९३४ निक्खमपवेस मोत्तुं पढमसमुद्दिस्सगाण ठायंति ।**
**सज्झायप्परिहाणी [2]भावासन्नेवमाईया ॥२८०॥ निभा०**

**निक्खम** गाहा । **प्रथमसमुद्दिष्टानां** ग्लानादीनां **निर्गमप्रवेशौ मुक्त्वो**पविशन्ति, किमर्थम्? तत्र यदि ते मार्गं रुद्ध्वा मण्डल्यां **तिष्ठन्ति** ततः पूर्वभुक्तानां **स्वाध्याय-परिहाणि**र्भवति तथा **भावासन्नस्य** सञ्ज्ञादिवेगधारणासहिष्णोः पीडा भवति । **एवमादयो**ऽन्येऽपि दोषाः ॥२८०॥

दिग्द्वारप्रतिपादनायाह –

**९३५ पुव्वमुहो राइणिओ एक्को य गुरुस्स अभिमुहो ठाइ ।**
**गिण्हइ व पणामेइ व अभिमुहो इहरहाऽवन्ना ॥२८१॥ निभा०**

**पुव्वमुहो** गाहा । **पूर्वाभिमुखो रत्नाधिक** उपविशति मण्डल्याम्, तस्यां च मण्डल्या**मेकः** साधु**र्गुरोरभिमुख,** किमर्थम् ? कदाचित् किञ्चिद्गुरोरतिरिक्तं भवति तद् **गृह्णाति** दातव्यं वा किञ्चिद्भवति तद्ददाति मण्डलीस्थविरेणार्पितम्, एतदर्थ**मभिमुख** उपविशति, **इतरथा** यद्यभिमुखो नोपविशति ततो**ऽवज्ञा** परिभवः कृतो भवति, पृष्ठ्यादि दत्त्वोपविशतोऽवज्ञादिकृता दोषा भवन्ति ॥२८१॥

---

१. चेव उ हे० ह० २. भावासन्नेवमाईणि ह० हे०

**१३६ जो पुण हविज्ज खवओ अतिउच्चाओ य सो बहिं ठाइ ।**
**पढमसमुद्दिट्ठो वा सागारियरक्खणट्ठाए ॥५६६॥ नि०**

**जो पुण** गाहा । **यस्तु पुनः क्षपको**ऽर्द्धमासादिना **भवेद**तिश्रान्तो वा प्राघूर्णकादिः **स बहिर्मण्डल्यास्तिष्ठति प्रथमसमुद्दिष्टो वा** साधुः शीघ्रतरेण येन भुक्तं स **सागारिकरक्षणार्थं** बहिस्तावन्मण्डल्यास्तिष्ठति ॥५६६॥

**१३७ एक्केक्कस्स य पासंमि मल्लयं तत्थ खेलमुग्गाले ।**
**कण्टट्ठिए व छुब्भइ मा लेवकडा भवे वसही ॥५६७॥ नि०**

**एक्केक्कस्स** गाहा । तत्र च साधूनां भुञ्जानाना**मेकैकस्य** साधोः **पार्श्वे मल्लकं** भवति, **खेलमल्लकस्तत्र खेलः** श्लेष्म [१]**उद्गाल्यते** तस्मिन् मल्लके श्लेष्मनिष्ठीवनं कुर्वन्ति, तथा तत्र भुञ्जतः कदाचि**त्कण्टको** भवेत् स तत्र क्षिप्यते, **अस्थि**खण्डं **वा** भवेत्तच्च क्षिप्यते, अथ तु भुवि क्षिप्यतेऽस्थिकण्टकादि ततो **वसतिर्लेपकृता** ऽनायुक्ता **भवति,** अतस्तत्परिहारार्थं मल्लकेषु क्षिप्यते ॥५६७॥

तथाऽमुमपरं [२]भुञ्जानानां विधिं प्रतिपादयन्नाह –

**१३८ मण्डलि भायण भोयण गहणं सोही य कारणुव्वरिते ।**
**भोयणविही उ एसो भणिओ तेल्लुक्कदंसीहिं ॥५६८॥ नि० । दारगाहा ।**

**मण्डलि** गाहा । **मण्डली** यथारत्नाधिकतया कर्त्तव्या, **भाजनानि** च पूर्वं अहाकडाइं भुञ्जन्ति, **भोजनं** च स्निग्धं मधुरं पूर्वं भोक्तव्यम्, **ग्रहणं** च पात्रकात् कुक्कुड्यण्डकमात्रं कवलग्रहणं कर्त्तव्यम्, तथा ग्रहणस्यैव **शुद्धि**र्वक्तव्या, अथवा शुद्धिर्भुञ्जतो यथा भवति तथा वक्तव्यम्, **कारणे** भोक्तव्यम्, तथा **उव्वरिए** त्ति **अतिरिक्ते** विधिर्वक्तव्यः । **अयं भोजनविधिः,** शेषः सुगमः ॥५६८॥

इदानीं भाष्यकारः प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाह-

**१३९ मंडलि अहराइणिआ सामायारी य एस जा भणिआ ।**
**पुव्वं तु अहाकडगा मुच्चंति तओ कमेणियरे ॥२८२॥ निभा०**

**मण्डलि** गाहा । **मण्डली** कथमुपविशति ? अत आह- **यथारत्नाधिकतया सामाचारी चात्र** कार्या, **एषा** [३]**या भणिता** उक्ता कतमा ? ठाण दिसि पगासणया

१. उद्गालयेत् दा० २. भुञ्जतां विधिम् क० ३. योक्ता भणिता ख.

[नि. ५६५] इत्येवमादिका साऽत्रापि तथैव द्रष्टव्या । उक्तं मण्डलीद्वारम्, इदानीं भाजनद्वारप्रतिपादनायाह—**पुव्वं तु अहाकडगा**-**पूर्वं** प्रथमं **यथाकृतानि** [१]परिकर्मरहितानि लब्धानि यानि तानि समुद्देशनार्थं **मुच्यन्ते**, एतदुक्तं भवति— प्रथममप्रतिकर्मा प्रतिग्रहको भ्राम्यते, **ततः क्रमेणेतरे**ऽल्पपरिकर्मबहुपरिकर्माण्येव मुच्यन्ते ॥२८२॥

भायण त्ति गयं, इदानीं भोयण त्ति (नि. ५६८) व्याख्यायते –

**९४० निद्धमहुराणि पुव्वं पित्ताईपसमणट्ठया भुंजे ।**
**बुद्धिबलवड्ढणट्ठा दुक्खं खु विकिंचिउं निद्धं ॥२८३॥ निभा०**

**निद्धमहुराइं** गाहा । प्रथमार्द्धं सुगमम् । किमर्थं **स्निग्धमधुराणि पूर्वं** भक्ष्यन्ते ? यतो **बुद्धेर्बलस्य** च **वर्द्धनं** भवति, तथा चाह—**घृतेन वर्द्धते मेधा** इत्यादि, बलवर्द्धनं च प्रसिद्धमेव, बलेन च वर्द्धितेन वैयावृत्त्यादि कर्त्तुं शक्यते, **दुःखं** च परिस्थापयितुं **स्निग्धं** घृतादि भवति यतोऽसंयमो भवतीति ॥२८३॥

**९४१ अह होज्ज निद्धमहुराणि अप्पपरिकम्मसपरिकम्मेहिं ।**
**भोत्तूण निद्धमहुरे फुसिअ करे मुंचऽहागडए ॥२८४॥ निभा०**

**अह होज्ज** गाहा । **अथ भवेयुः स्निग्धानि मधुराणि** च द्रव्याणि [२]**अल्पपरिकर्मसु बहुपरिकर्मसु** च भाजनेषु पात्रकेषु मात्रकेषु, ततः को विधिरित्यत आह— ततस्तान्येव **भुक्त्वा स्निग्धमधुराणि** द्रव्याणि **करं** प्रोञ्छयति प्रोञ्छयित्वा च **मुंचऽहागडए** त्ति **यथाकृतान्य**परिकर्माणि पात्रकाणि समुद्दिशनार्थं **मुच्यन्ते** ॥२८४॥

भोयण त्ति गयं, इदानीं ग्रहणद्वार(नि. ५६८)प्रतिपादनायाह –

**९४२ कुक्कुडिअंडगमित्तं अहवा खुड्डागलंबणासिस्स ।**
**लंबणतुल्ले गिण्हइ अविगियवयणो य राइणिओ ॥२८५॥ निभा०**

**कुक्कुडि** गाहा । ततः पतद्ग्रहात्कवलं गृह्णन् **कुक्कुड्यण्डकमात्रं** गृह्णाति, **अथवा खुड्डागलंबणासिस्स** क्षुल्लकेन लम्बकेन हस्तेनाशितुं शीलं यस्य स **क्षुल्लक-लम्बनाशी** तत्तुल्यान् कवलान् गृह्णाति, स्वभावेनैव लघुकवलाशिनस्**तुल्यान्** कवलान् **गृह्णाति, अविगियवयणो य राइणिओ । अविकृतवदनो रत्नाधिकः**, न भावदोषेण

---

१. प्रतिकर्म० दा० २. अल्पपरिकर्मसु बहुपरिकर्मजनितेषु च पा० दा०

मुखमत्यर्थं बृहत्कवलप्रक्षेपार्थं निर्वादयति, किं तर्हि ? स्वभावस्थेनैव मुखेनेति ॥२८५॥

अथवाऽयं ग्रहणविधिः –

**९४३ गहणे पक्खेवंमि य सामायारी [१]भवे पुणो दुविहा ।**
**गहणं पायंमि भवे वयणे [२]पक्खेवणं होइ ॥२८६॥ निभा०**

**गहणे** गाहा । **ग्रहणे** कवलादाने **प्रक्षेपे च सामाचारी** पुनरियं **भवति द्विविधा,** तत्र **ग्रहणं पात्रक**विषये **भवेत्,** पात्रकात्कवलोत्क्षेपो **वदन**विषयं च **प्रक्षेपणं** कवलस्य **भवति** ॥२८६॥

तत्र पात्रकात्कथं भक्षयद्भिर्गृह्यते ? इत्येतत्प्रदर्शयन्नाह –

**९४४ कडपयरच्छेएणं [३]भोत्तव्वं अहव सीहखइएणं ।**
**एगेण अणेगेहि व वज्जेत्ता धूमइंगालं ॥२८७॥ निभा०**

**कड** गाहा । तत्र **कटच्छेदेन भोक्तव्यं** यथा [४]कलिङ्गस्य खण्डलकं छित्त्वाऽपनीयते, एवमसावपि भुङ्क्ते, तथा **प्रतरच्छेदेन** वा **भोक्तव्यं** तरिकाच्छेदेनेत्यर्थः, **अथवा सिंहभक्षितेन,** सिंहो हि किल एकदेशादारभ्य तावद्भुङ्क्ते यावत्सर्वभोजनं निष्ठितं भवति, **तच्चैकेन** बहुभि**र्वा** भोक्तव्यम्, **वर्जयित्वा धूमाङ्गारकं** द्वेषरागौ वर्जयित्वेत्यर्थः ॥२८७॥

इदानीं वदनप्रक्षेपणशोधिं (नि. ५६८) दर्शयन्नाह –

**९४५ असुरसुरं अचवचवं अद्दुयमविलंबिअं अपरिसाडिं ।**
**मणवयकायगुत्तो भुंजे अह पक्खिवणसोही ॥२८८॥ निभा०**

**असुरसुरं** गाहा । **असुरसुरं** भुङ्क्ते सरडसरडं अकरंतो, **अचवचवं** [५]न चर्वयन् वल्कलमिव चपचपावेइ, तथा **अद्रुतम**त्वरितं तथा **अविलम्बितम**मन्थरम्, **अपरिशाटिं मनोवाक्कायगुप्तो भुञ्जीत,** न मनसा विरूपमिति चिन्तयति, वाचा नैवं वक्ति, यदुत "[A]को इमं भक्खेइ ? जो अम्हारिसो न होइ, काएण उद्घोसए मुहेण न देइ ।" एवं त्रिगुप्तस्य भुञ्जानस्य **प्रक्षेपणशोधि**र्भवति ॥२८८॥

---

A. क इदं भक्षयति ? योऽस्मादृशो न भवति, कायेन उद्घोषयति मुखेन न ददाति ।

१. समासओ ह० हे० २. पक्खेवणा दा० ३. सीहखइएण होति भोतव्वं र. ४. किलि० क. ख. ५. न वल्कलमिव चव्वो चपचपावेइ क.

**१४६ उग्गमउप्पायणासुद्धं एसणादोसवज्जिअं ।**
**साहारणं अयाणंतो साहू होइ असारओ ॥५६९॥ नि०**

**१४७ उग्गमउप्पायणासुद्धं एसणादोसवज्जिअं ।**
**साहारणं विआणंतो साहू होइ ससारओ ॥५७०॥ नि०**

**उग्गम** गाहा । **उद्गमशुद्धमुत्पादनाशुद्धमेषणादोषवर्जितं साधारणं** सामान्यमेतद्गुडादि द्रव्यमिति **अजानानो**ऽतिमात्रं दुष्टेन भावेनाददानो योऽसौ पतद्ग्रहो भ्रमति तस्मात्**साधुः, असारको**ऽप्रधानो ज्ञानदर्शनचारित्राण्यङ्गीकृत्यासारवान्[1] स **भवति** ॥५६९॥

तथा-**उग्गम** गाहा । **उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणमे**तद् द्रव्यमित्येवं **जानानो**ऽदुष्टेनान्तरात्मना कवलं गुडादेराददानः **साधुर्भवति ससारो** ज्ञानदर्शनचारित्रसारवान् भवति ॥५७०॥

कथं पुनरसारः साधुर्भवति ? अत आह –

**१४८ उग्गमउप्पायणासुद्धं एसणादोसवज्जिअं ।**
**साहारणं अयाणंतो साहू [2]कुणइ तेणिअं ॥५७१॥ नि०**

**उग्गम** गाहा । **उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणमे**तद्गुडादिद्रव्यमित्येव**मजानन्** दुष्टेन भावेनाददानः **साधुः स्तेयं करोति** ततोऽसारोऽसौ ॥५७१॥

स कथं पुनः ससारः साधुर्भवति ? –

**१४९ उग्गमउप्पायणासुद्धं एसणादोसवज्जिअं ।**
**साहारणं वियाणंतो साहू कुणइ निज्जरं ॥५७२॥ नि०**

**उग्गम** गाहा । **उद्गमोत्पादनाशुद्धमेषणादोषवर्जितं साधारणं** तुल्यमेतत्सर्वेषां गुडादीत्येवं **जानानो**ऽदुष्टान्तरात्मना स्वल्पमाददानः **साधुर्निर्जरां करोति** अतः ससारो ज्ञानदर्शनचारित्रैरिति ॥५७२॥

इदानीं ससारः कदाचिद्भोजनार्थमुपविशन् भवति कदाचिदुपविष्टः कदाचिदुत्थितः, एतत्प्रदर्शयन्नाह –

---

१. ०कृत्यासार भवति । ख २. पावइ ह० हे०

**९५० अंततं भोक्खामि त्ति बेसए भुंजए य तह चेव ।**
**एस ससारनिविट्ठो ससारओ उट्ठिओ साहू ।।५७३।। नि०**

**९५१ एमेव भंगतिअं जोएयव्वं तु सारो नाणाई ।**
**तेण सहिओ ससारो समुद्दवणिएण दिट्ठंतो ।।५७४।। नि०**

**अंतं** गाहा । अन्त्यं प्रान्त्यं वल्लचणकादि तदप्यन्त्यं पर्युषितं चणकाद्यन्त्यमप्यन्त्य-**मन्त्यान्त्यं भक्षयिष्यामि**, एवंविधेन परिणामेनोपविष्टो मण्डल्यामु**पभुङ्क्ते** यस्**तथैव एष साधुः** शुभपरिणामत्वात् **ससार उपविष्टः ससारश्चोत्थितः**, तस्य शुभ-परिणामस्याप्रतिपतितत्वात् ।।५७३।।

**एमेव** गाहा । **एवमेव भङ्गत्रितयं योजनीयम्**, तत्र प्रथमो भङ्गः "[A]ससारो निविट्ठो ससारो उट्ठिओ १, ससारो निविट्ठो असारो उट्ठिओ बिइओ भंगो २, असारो निविट्ठो ससारो उट्ठिओ तइओ ३, असारो निविट्ठो असारो उट्ठिओ एस चउत्थो ४," **सारश्चात्र ज्ञानादि**, आदिग्रहणाद्दर्शनं चारित्रं चेति, **तेन** ज्ञानादिना **सहितो** यः साधुः स **ससारो** भण्यते । अत्र च **समुद्रवणिजो दृष्टान्तः** ।। "[B]एगो समुद्दवणिओ बोहित्थं भंडस्स भरिउं ससारो गओ, ससारो य पउरं हिरन्नाइ विढवेऊण आगओ। अण्णो पुण ससारो भंडं गहेऊण गओ निस्सारो आगओ, कवडियाए वि रहिओ, तं पि पुव्विल्लयं हारेऊण आगओ । अण्णो असारो अंगबीओ णिहिरण्णो गओ सहिरण्णो आगओ पभूयं विढवेऊण । अण्णो पुण असारो हिरण्णरहिओ [१]गओ असारो चेव आगओ कवडियाए वि रहिओ" । एवं साधोरपि सारासारयोजना कर्त्तव्या वणिग्न्यायेन ।।५७४।।

एवं तेषां भुञ्जतां यदि पतद्ग्रहको भ्रमन्नेवार्द्धपथे निष्ठां याति तदा को विधिरित्यत आह –

---

A. ससारो निविष्टः ससार उत्थितः १, ससारो निविष्टः, असार उत्थितो द्वितीयो भङ्गः २, असारो निविष्टः ससार उत्थितस्तृतीयः ३, असारो निविष्टः, असार उत्थितः, एष चतुर्थः ४ ।

B. एकः समुद्रवणिजः प्रवहणं भाण्डस्य भृत्वा ससारो गतः, ससारश्च प्रचुरं हिरण्याद्यर्जित्वाऽऽगतः । अन्यः पुनः ससारो भाण्डं गृहीत्वा गतः, निस्सार आगतः कपर्दिकाया अपि रहितः, तदपि पूर्वीयं हारयित्वाऽऽगतः । अन्योऽसारोऽङ्गद्वितीयो निर्हिरण्यो गतः, सहिरण्य आगतः प्रभूतमर्जित्वा । अन्यः पुनरसारो हिरण्यरहितो गतोऽसार एवाऽऽगतः कर्पदिकाया अपि रहितः ।

१. गओ ससारो आगओ । दा०

**९५२ जत्थ पुण पडिग्गहगो होज्ज कडो तत्थ छुब्भए अन्नं ।**
**मत्तगगहिउव्वरिअं पडिग्गहे जं असंसट्टं ॥५७५॥ नि०**

**९५३ जं पुण [१]गुरुस्स सेसं तं छुब्भइ मंडलीपडिग्गहके।**
**बालादीण व दिज्जइ न छुब्भई सेसगाणऽहिअं ॥५७६॥ नि०**

**९५४ सुक्कोल्लपडिग्गहगे [२]विआणिउं पक्खिवे दवं सुक्के ।**
**अभत्तट्ठिआणट्ठा बहु लंभे जं असंसट्ठं ॥५७७॥ नि०**

**जत्थ पुण** गाहा । **यत्र पुनर्भुञ्जतां पतद्ग्रहको भवेत् कडो** त्ति निष्ठितभक्तो जातः साधुपर्यन्तमप्राप्त एव, तत्र किं कर्त्तव्यमित्यत आह-**तत्र** तस्मिन्निष्ठितभक्ते पतद्ग्रहकेऽ**न्यद्भ**क्तं प्रक्षिप्यते, ततश्च यस्मिन् साधौ स निष्ठितः पतद्ग्रहस्तत आरभ्य तेनैव क्रमेण पुनर्भ्राम्यते, **मात्रके** वा यद्बालादीनां प्रायोग्यं **गृहीत**मासीत्, तदिदानी**मुद्वरितं तदसंसृष्टं** सत् **पतद्ग्रहे प्रक्षिप्य पतद्ग्रहो** यस्मिन् साधौ निष्ठितस्तस्मादारभ्य पुनर्भ्रमतीति ॥५७५॥

**जं पुण** गाहा । **यत्पुनर्गुरोः शेषं** भुञ्जतो जातं **तत्**संसृष्टमपि **प्रक्षिप्यते मण्डलीपतद्ग्रहके, बालादीनां वा दीयते** तदाचार्योद्वरितम्, यत्पुनराचार्य-व्यतिरिक्तानामुद्वरित**मधिकं** जातं तत्र **प्रक्षिप्यते** मण्डलीपतद्ग्रहके संसृष्टं सत् ॥५७६॥

किञ्च-**सुक्कोल्ल** गाहा । **सुक्क** त्ति एकः **शुष्केण** भक्तेन पतद्ग्रहः, अपर **उल्ल** त्ति **आर्द्रेण** भक्तेन **पतद्ग्रहः**, एवं **विज्ञाय** ततः **प्रक्षिपेद् द्रवं सुक्के** त्ति **शुष्क**भक्तपतद्ग्रहे, येन तोयप्रक्षेपेण सञ्जातबन्धं तद्भक्तं सुखेनैव कवलैर्गृह्यते, अथ **बहुलाभः** सञ्जातः, प्रचुरं लब्धं गुडादि ततो**ऽसंसृष्टमेव** ध्रियते, किमर्थम् ? **अभक्तार्थिकानामर्थे** येन मनोज्ञं भवेत् । उक्ता ग्रहणशोधिः ॥५७७॥

अधुना भुञ्जतः शोधिरुच्यते(नि.५६८), सा च चतुर्धा, एतदेवाह –

**९५५ सोही चउक्क भावे वीइंगालं च विगयधूमं च ।**
**रागेण सइंगालं दोसेण सधूमगं [३]होइ ॥५७८॥ नि०**

**९५६ जत्तासाहणहेउं आहारेंति जवणट्ठया जइणो ।**
**[४]छायालीसं दोसेहिं सुपरिसुद्धं विगयरागा ॥५७९॥ नि०**

---

१. गुरूउव्वरियं ह० हे० २. वियाणिया ह० हे० ३. जाणे दा० ४. छायालीसा ह० हे० ता०

**९५७ [ सिलोगो ] हियाहारा मिताहारा अप्पाहारा य जे नरा ।**
**न ते विज्जा तिगिच्छंति अप्पाणं ते तिगिच्छगा ॥५८०॥ नि०**

**सोही** गाहा । **शुद्धौ चतुष्कं** भवति नामस्थापनाद्रव्यभावरूपम्, तत्र नामस्थापनाद्रव्यशोधिः पूर्ववत्, **भावविषया** पुनः शोधिः, **विगताङ्गारं विगतधूमं च** भुञ्जतो भावशोधिर्भवति, कथं साङ्गारं कथं वा सधूमं भवतीति? एतदेवाह- **रागेण** इत्यादि सुगमम् ॥५७८॥

**जत्ता** गाहा । चारित्र**यात्रासाधनार्थं** धर्मसाधननिमित्त**माहारयन्ति यापनार्थं** शरीरसंधारणार्थं मुनयः **षट्चत्वारिंशद्दोषैः सुपरिशुद्धम्,** के च ते ? षोडशोद्गमदोषाः, षोडशोत्पादनादोषाः, दशैषणादोषाः, संयोजणा, पमाणं, सइंगालं, सधूमगं चेत्येते षट्चत्वारिंशत्, एभिर्विशुद्धं सद् **विगतरागा** आहारयन्ति ॥५७९॥

**हियाहारा** सिलोगो। सुगमः, उक्तो भुञ्जनविधिः ॥५८०॥

[सम्प्रति प्रमाणयुक्तहीनहीनतरादिभोजने गुणमाह –

**हियाहारा मियाहारा अप्पाहारा य जे नरा ।**
**न ते विज्जा तिगिच्छंति अप्पाणं ते तिगिच्छगा ॥६४८॥**

व्याख्या - हितं द्विधा-द्रव्यतो भावतश्च, तत्र द्रव्यतोऽविरुद्धानि द्रव्याणि, भावत एषणीयम्, तदाहारयन्ति ये हिताहाराः, 'मितं' प्रमाणोपेतमाहारयन्तीति मिताहाराः, द्वात्रिंशत्कवलप्रमाणादप्यल्पमल्पतरं वाऽऽहारयन्तीत्यल्पाहाराः, सर्वत्र वा बहुव्रीहिः, हित आहारो येषां ते हिताहारा इत्यादि, एवंविधा ये नरास्तान् वैद्या न चिकित्सन्ति, हितमितादिभोजनेन तेषां रोगस्यैवासम्भवात्, किन्त्वेवं मूलत एव रोगोत्थानप्रतिषेधकरणेनात्मनैवात्मनस्ते चिकित्सिकाः । [पिण्डनि.६४८]]

कारणे त्ति (नि.५६८) द्वारं व्याख्यानयन्नाह –

**९५८ छण्हमन्नयरे ठाणे कारणंमि उ आगए ।**
**आहारेज्ज मेहावी संजए सुसमाहिए ॥५८१॥ नि०**

**छण्हं** गाहा । **षण्णां स्थानानामन्यतरस्मिन् स्थाने कारणे आगते** सति **आहारयेन्मेधावी संयतः सुसमाहितः** ॥५८१॥

कानि च तानि षट् स्थानानि ? इत्यत आह –

**९५९ वेयण वेयावच्चे इरियट्ठाए य संजमट्ठाए ।**
**तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥५८२॥ नि०**

**वेयण** गाहा । **वेदना** क्षुद्वेदना तत्प्रशमनार्थं भुङ्क्ते, तथा **वैयावृत्त्यार्थं** तथा **ईर्या**पथिकाशोधनार्थं तथा **संयमार्थं** स च पेहोपेहपमज्जणादिलक्षणः, **तथा पाणवत्तियाए प्राणसंधारणार्थम्, षष्ठं पुनर्धर्मचिन्तार्थं** भुङ्क्ते ॥५८२॥

इदानीमेनामेव गाथां भाष्यकृत्प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाह–

**९६० नत्थि छुहाए सरिसिया वेयणा भुंजेज्ज तप्पसमणट्ठा ।**
**छाओ वेयावच्चं न तरइ काउं अओ भुंजे ॥२८९॥ निभा०**

**९६१ इरियं न वि सोहेइ पेहाईयं च संजमं काउं ।**
**थामो वा परिहायइ गुणऽणुप्पेहासु य असत्तो ॥२९०॥ निभा०**

**नत्थि** गाहा । **इरियं** गाहा । **नास्ति क्षुत्सदृशी वेदना**ऽतो **भुञ्जीत तत्प्रशमनार्थम्**। दारं । **छाओ** त्ति बुभुक्षितो **वैयावृत्त्यं कर्तुं न** शक्नोति **अतो भुङ्क्ते** । दारं । **ईर्या**पथिकां बुभुक्षितो **न शोधयति** यतोऽतस्तच्छोधनार्थं भुङ्क्ते । दारं । तथा **पेहाईयं च** त्ति पेहोपेहपमज्जण इत्यादिकं **संयमं** बुभुक्षितः **कर्तुं** न शक्नोति यतोऽतो भुङ्क्ते । दारं । **थामो वा** प्राणस्तस्य **परिहाणि**र्भवति यदि न भुङ्क्ते, अतस्तदर्थं भुञ्जीत । दारं। तथा **गुणनं** पूर्वपठितस्या**नुप्रेक्षा** चिन्तनं ग्रन्थार्थयोः, एतदसौ कर्त्तुमसमर्थः सन् भुङ्क्ते । दारं ॥२८९॥२९०॥

**९६२ अहव न कुज्जा आहारं छहिं ठाणेहिं संजए ।**
**पच्छा पच्छिमकालंमि काउं अप्पक्खमं खमं ॥५८३॥ नि०**

**अहवा** गाहा । **अथवा न कुर्यादेवाहारमेभिः षड्भिः स्थानै**र्वक्ष्यमाणलक्षणैः। तत्र निर्युक्तिकार एव षष्ठं पदं व्याख्यानयन्नाह– **'पच्छा पच्छिमकालंमि' पश्चिमकाले** [१३९]संलेखनाकाले, **आत्मक्षमा**मात्महितां **क्षमां** क्षान्तिमुपशमं **कृत्वा** ततः **पश्चात्** सुखेन शरीरपरिकर्मानन्तरं सर्वाहारं मुञ्चतीति ॥५८३॥

इदानीं भाष्यकार एव एतानि षट्स्थानानि प्रदर्शयन्नाह –

**९६३ आयंके उवसग्गे तितिक्खया बंभचेरगुत्तीए[१] ।**
**[२]पाणिदया तवहेउं सरीरवोच्छेयणट्ठाए ॥२९१॥ निभा०**

---

१३९. संलेखना-संलिख्यतेऽनया शरीरकषायादीति संलेखना, तपोविशेषे, (स्था. २ ठा.२ उ.) आगमप्रसिद्ध-चरमानशनविधिक्रियायाम्, (पञ्चा.१ विव.)

१. ०गुत्तीसु ह० हे० २. पाणदया र.

**आयंके** गाहा । **आतङ्को** ज्वरादिर्वक्ष्यते, तथा **उपसर्गो** राजादिजनितः, एतेषां **तितिक्षार्थं** सहनार्थं न भोक्तव्यम्, तथा **ब्रह्मचर्यगुप्त्यर्थं** च न भोक्तव्यम्, तथा [१]**प्राणिदयार्थं** च न भोक्तव्यम्, तथा **तपोऽर्थं शरीरव्यवच्छेदनार्थं** च न भोक्तव्यमिति ॥२९१॥

इदानीं भाष्यकृत् प्रतिपदं व्याख्यानयति, तत्राद्यावयवव्याचिख्यासयाह –

**९६४ आयंको जरमाई राया सन्नायगा व [२]उवसग्गा ।**
**बंभवयपालणट्ठा [३]पाणिदया वास महियाई ॥२९२॥ निभा०**

**९६५ तवहेउ चउत्थाई जाव छम्मासिओ तवो होइ ।**
**छट्ठं सरीरवोच्छेयणट्ठया होयणाहारो ॥२९३॥ निभा०**

**९६६ एएहिं छहिं ठाणेहिं अणाहारो य जो भवे ।**
**धम्मं नाइक्कमे भिक्खू झाणजोगरओ भवे॥५८४॥ नि०**

**आतंको** गाहा । **आतङ्को ज्वरादिः, आदिग्रहणादन्यो** व्याधिर्यत्र भोजनं न पथ्यं तदर्थं न भुङ्क्ते । दारं । राज्ञा राजकुलधारणादिरूपो यद्युपसर्गः कृतः, **सन्नायगा वा** स्वजना यद्युन्निष्क्रमणार्थमुपसर्गं कुर्वते ततो न भुङ्क्ते । दारं । **ब्रह्मव्रतपालनार्थं** न भुङ्क्ते, यतो बुभुक्षितस्योन्मादो न भवति । दारं । **प्राणिदयार्थं** न भुङ्क्ते, यदि **वर्षति महिका** वा निपतति । दारं ॥२९२॥

**तव** गाहा । **तपोऽर्थं** न भुङ्क्ते तच्च **चतुर्थादि यावत्षण्मासास्तावत्तपो भवति** तदर्थं न भुङ्क्ते । दारं । **षष्ठं शरीरव्यवच्छेदार्थमनाहारः** साधुर्भवतीति ॥२९३॥

**एतेहिं** गाहा । **एभिः** पूर्वोक्तैः **षड्भिः स्थानैरनाहारको भवति स धर्मं नातिक्रामति भिक्षुरतो ध्यानयोगरतेन भवितव्यमिति** ॥५८४॥

आह–इदमुक्तं षड्भिः कारणैराहार आहारयितव्यः षड्भिश्च कारणैर्नाहारयितव्यस्तत्किमेतद्भोजनमपवादपदम् ? उच्यते, अपवादपदमेवैतद्, यतः –

**९६७ भुंजंतो आहारं गुणोवयारं सरीरसाहारं ।**
**विहिणा जहोवइट्ठं संजमजोगाण वहणट्ठा ॥५८५॥ नि०**

**भुंजतो** गाहा । [४]**भुञ्जन्नाहारम्,** किंविशिष्टम् ? **गुणोपकारं** ज्ञानदर्शन–

१. प्राणदयार्थं क २. उवसग्गे हे० ह० ३. पाणदया हे० ४. भुञ्जान आहा० क

चारित्रगुणानामुपकारकम्, तथा **शरीरस्य साधारं** शरीरस्य सन्धारकमाहारं[1] भुञ्जन् **विधिना** ग्रासैषणाविशुद्धं **यथोपदिष्टमा**धाकर्मादिरहितं **संयमयोगानां** संयमव्यापाराणां **वहनार्थं** भुञ्जन्नपवादपदस्थ एव भुङ्क्ते नान्यथा ॥५८५॥

इदानीं समुद्दिष्टे सति संलिहनकल्पः कर्त्तव्यः भिक्षाभक्तविलिप्तानां पात्रकाणां संलिहनं कर्त्तव्यमित्यर्थः, तथा चाह –

**९६८ भुत्तट्ठियावसेसो [2]तिलंबणो होइ संलिहणकप्पो ।**
**अपहुप्पंते [3]अन्नं पि छोढुं तय[4] लंबणे ठवए ॥५८६॥ नि०**

**९६९ संदिट्ठा [5]संलिहिउं पढमं कप्पं तु दिंति कलुसेणं ।**
**तं [6]पाउं मुहमासो बितियच्छदवस्स गिण्हंति ॥५८७॥ नि०**

**९७० दाऊण बितियकप्पं बहिआ मज्झट्ठिओ उ दवहारी ।**
**तो देंति तइयकप्पं दोण्हं दोण्हं तु आयमणं ॥५८८॥ नि०**

**भुत्तट्ठि** गाहा । **भुक्तानामवशेषो** यः स **संलेखनकल्पः** कर्त्तव्यः, स चावशेषो न ज्ञायते कियत्प्रमाणः ? अत आह–**त्रिलम्बन**स्त्रिकवलः कवलत्रयप्रमाणो भुक्तावशेषः संलेखनकल्पः कर्त्तव्यः, यदा तु त्रिकवलप्रमाणः संलेखनकल्पो न भवति तदाऽ**पर्याप्यमाणेऽन्यदपि** तस्मिन् पात्रके भक्तं **प्रक्षिप्य** तत**स्त्रीन्** कवलान् **स्थापयति** ॥५८६॥

**संदिट्ठा** गाहा । **सन्दिष्टाभुक्ताः** सन्तः **संलिह्य** पात्रकाणि पुनश्च **प्रथमं कल्पं ददति** कलुषोदकेन, पुनश्च **तत्पीत्वा मुहमासो** त्ति मुखस्य परामर्शः प्रमार्जनं कुर्वन्तीति, पुनश्च **द्वितीय**कल्पार्थ**मच्छस्य द्रवस्य** ग्रहणं कुर्वन्तीति, गृहीत्वा च कल्पार्थमच्छद्रवं मण्डल्या उत्थाय बहिः पात्रकप्रक्षालनार्थं गच्छन्ति ॥५८७॥

तत्र च – **दाऊण** गाहा । **दत्त्वा द्वितीयकल्पं बाह्यतः** पात्रकप्रक्षालनभूमौ, ते च मण्डल्याकारेण तत्रोपविशन्ति, तेषां च **मध्ये स्थितो द्रवधारी** भवति, स च पात्रप्रक्षालनं सर्वेषामेव प्रयच्छति, **ततो ददति** ते साधवः पात्रकाणां **तृतीयं कल्पम्**, पुनश्च पात्रकप्रक्षालनान्तरं **दोण्हं दोण्हं तु आयमणं** ति **द्वयोर्द्वयोः** साध्वोः पात्रकेषु **आचमनार्थं** निर्लेपार्थमुदकं प्रयच्छतीति ॥५८८॥

---

१. सन्धानकमाहारं दा० २. तिलंबणा दा० ३. अन्नं छो० दा० ४. तिलं० हे० ह० ५. संलिहिया ह० हे० ६. पाउ मुहामासं ह० हे०

एष तावदनुद्धरिते भक्ते विधिरुक्तः, यदा तु पुनरुद्धरितं भक्तं भवति तदा को विधिरित्यत आह-

**९७१ होज्ज सिआ उव्वरियं तत्थ य आयंबिलाइणो होज्जा ।**
**पडिदंसिय संदिट्ठो वाहरइ तओ चउत्थाई ॥५८९॥ नि०**

**होज्ज सिया** गाहा । **भवेत् स्यात्** कदाचिदुद्धरितं **तत्र** साधूनां मध्ये कदाचित्केचि**दाचाम्लादिनो भवन्ति, आदि**ग्रहणादभक्तार्थिको वा कश्चिद्भवेत्ततस्तदुद्धरितं भक्तं रत्नाधिक आचार्याय प्रदर्शयति, पुनश्च प्रदर्शितभक्तो गुरुणा च **सन्दिष्ट** उक्तो यदुत-आह्वयाचाम्लादीन् साधून् येन तेभ्यो दीयते, पुनश्चासौ रत्नाधिकः सन्दिष्टः सन् **चतुर्थादीन्** साधून् **व्याहरत्या**कारयति ॥५८९॥

स च व्याहरन्नेतान्न व्याहरति-

**९७२ मोहतिगिच्छविगिट्ठं गिलाण अत्तट्ठियं च मोत्तूणं ।**
**सेसे गंतुं भणई आयरिया वाहरंति तुमं ॥५९०॥ नि०**

**मोह** गाहा । **मोहचिकित्सार्थं** य उपवासिकः स्थितस्तं न व्याहरति तदा **विकृष्ट**तपसं साधुं न व्याहरति, विकृष्टतपाश्चाष्टमादारभ्य भवति, तस्य च कदाचिद्देवता प्रातिहार्यं करोति अतस्तस्य न दीयते, **ग्लानश्च** ज्वरादिना तं च न व्याहरति, **आत्मलब्धिकं च** न व्याहरति, एताननन्तरोदितान् साधून् **मुक्त्वा शेषान्** साधून् **गत्वा भणति,** यदुत **'आचार्या व्याहरन्ति युष्मान्'** ॥५९०॥

तेषां च मध्ये यश्चतुर्थादिक आकारितः स आकर्ण्य किं करोति ? इत्याह –

**९७३ अपडिहणंतो आगंतु वंदिउं भणइ सो य आयरिए ।**
**संदिसह भुंज जं सरति तत्तियं सेस तस्सेव ॥५९१॥ नि०**

**९७४ अभणंतस्स उ तस्सेव सेसओ होइ सो विवेगो उ ।**
**भणिए तस्स उ गुरुणा एसुवएसो पवणयस्स ॥५९२॥ नि०**

**९७५ भुत्तंमि पढमकप्पे कयंमि तस्सेव [१]देति तं पायं ।**
**जावतिअं ति अभणिए तस्सेव विगिंचणे सेसं ॥५९३॥ नि०**

**अपडिहणंतो** गाहा । अनतिलङ्घयन् गुरोराज्ञामागत्य **वन्दित्वा भणति** तमाचार्यं

१. देइ, दिति, हे० ह० ता. देंति क. ख. दा०

यदुत-**संदिशत** यूयम्, आचार्योऽपि भणति-**भुञ्जीत,** सोऽपि भणति-**जं सरति तत्तिअं भुञ्जामि, शेषं** यदुद्धरति **तत्तस्यैव** यस्य सत्कः प्रतिग्रहकः, पुनश्च स एव परिष्ठापयतीति ॥५९१॥

**अभणंतस्स** गाहा । अथासौ साधुरेवं न भणति यदुत 'जं सरइ तत्तिअं' ततस्तस्य एव**मभणतस्तस्यैव यच्छेषं** भक्तमुद्धरितं **तद्भवति, स** एव **विवेचकः** परिष्ठापक इत्यर्थः, **भणिते** तु एवं 'जावइयं सरइ तावइयं [1]सारेमि'त्ति, ततस्तस्यैव साधोर्यस्य सत्कः पतद्ग्रहकस्**तस्यैव गुरुणा** पतद्ग्रहकः समर्पयितव्यः, पुनः स एव कल्पं ददाति । **अयं प्रवचनस्य** पूर्वोक्त **उपदेशः** ॥५९२॥

**भुत्तंमि** गाहा । अथ यदुद्धरति तत्सर्वं भुङ्क्ते ततस्तस्मिन् **भुक्ते** सति तस्य पात्रकस्य प्रथमकल्पं ददाति, **कृते** च तस्मिन् **प्रथमकल्पे तस्यैव** साधोर्यस्य सत्कः पतद्ग्रहकस्तस्यैव **तत्पात्रकं ददाति** समर्पयतीत्यर्थः, अथैतन्न ब्रूते यदुत-जावइयं सरइ तावइयं सारेमि त्ति, ततः **जावतिअं ति अभणिते** सति **तस्यैव** साधोर्यः पारिष्ठापनिकभोक्ता तस्यैव यदुद्वरितं **शेषं** तत्परित्याज्यं भवति । इदं च पूर्वोक्तस्यैव व्याख्यानं द्रष्टव्यं न तु पुनरुक्तमिति ॥५९३॥

किंविधं पुनश्चतुर्थोपवासिकादेः पारिष्ठापनिकं कल्पते ? अत आह –

**९७६ विहिगहिअं विहिभुत्तं अइरेगं भत्तपाण भोत्तव्वं ।**
**विहिगहिए विहिभुत्ते एत्थ य चउरो भवे भंगा ॥५९४॥ नि०**

**विधि** गाहा । विधिनोद्गमदोषादिरहितं सारासारविभागेन च यत्र कृतं पात्रके **तद्विधिगृहीतम्,** तथा **विधिभुक्तं** [2]कटकच्छेदेन प्रतरच्छेदादिना वा यद्भुक्तं तद्विधिभुक्तमुच्यते, तदेवंविधं विधिगृहीतं विधिभुक्तं च सद् **यदतिरिक्तं** सञ्जातं **भक्तं पानकं** वा **तद्भोक्तव्यं** परिष्ठापनिकाकारेण कल्पते । अत्र च **विधिगृहीते विधिभुक्ते चास्मिन्** पदद्वये **चत्वारो भङ्गका भवन्ति,** तद्यथा–"[A]विहिगहिअं विहिभुत्तं एगो भंगओ, विहिगहिअं अविहिभुत्तं बिइओ भंगओ, अविहिगहिअं विहिभुत्तं तइओ भंगओ, अविहिगहिअं अविहिभुत्तं चउत्थो भंगओ" ॥५९४॥

इदानीं भाष्यकृद् विधिगृहीताविधिगृहीतयोः स्वरूपं प्रतिपादयन्नाह –

A. विधिगृहीतं विधिभुक्तम् एको भङ्गकः, विधिगृहीतमविधिभुक्तं द्वितीयो भङ्गकः, अविधिगृहीतं विधिभुक्तं तृतीयो भङ्गकः, अविधिगृहीतमविधिभुक्तं चतुर्थो भङ्गकः । १. सारयामि त्ति । २. कटच्छेदेन दा०

**९७७ उग्गमदोसाइजढं अहवा [१]वी जं जहा जहिं गहिअं ।**
**इइ एसो गहणविही असुद्धपच्छायणे अविही ॥२९४॥ निभा०**

**उग्गम** गाहा । **उद्गमदोषादिभिर्जढं** त्यक्तं यत्तद्विधिगृहीतम्, **अथवा यद्वस्तु** मण्डकादि **यथैव यस्मिन्** स्थाने पतितं भवति तत्तथैवास्ते न तु समारयतीत्येष **ग्रहणविधिः**। **असुद्धपच्छयणे अविही अशुद्धस्योद्**गमादिदोषान्वितस्य यद् ग्रहणमिद**मविधि**ग्रहणम्, अथवा गुडादेर्द्रव्यस्य मण्डकादिना प्रच्छाद्य यदेकस्मिन् पात्रकप्रदेशे स्थापनं तदविधिग्रहणमुच्यते ॥२९४॥

इदानीमविधिभोजनविधिभोजनयोः स्वरूपं प्रतिपादयन्नाह –

**९७८ कागसियालक्खइयं [२]दवियरसं सव्वओ [३]परामुट्ठं ।**
**एसो उ भवे अविही जहगहियं भोयणंमि विही ॥५९५॥ नि०**

**काग** गाहा । **काक**भुक्तं **शृगाल**भुक्तं तथा **दवियरसं द्रावितरस**मित्यर्थः, **सर्वतः परामृष्टम्** उत्थल्लपत्थल्लणेण भुक्तम्, **एसो उ भवे अविही** । **इदं तु** पूर्वोक्त**मविधिना** भुक्तमुच्यते, **यथैव गृहीतं** पात्रके तथैव भुञ्जतो विधिभुक्तमुच्यते ॥५९५॥

इदानीं भाष्यकृद् व्याख्यानयति, तत्राद्यावयवप्रतिपादनायाह –

**९७९ उच्चिणइ व विट्ठाओ [४]कागो अहवा वि विक्खिरइ सव्वं ।**
**विप्पेक्खइ व दिसाओ सियालो अन्नोन्नहिं गिण्हे ॥२९५॥ निभा०**

**९८० सुरहीदोच्चंगट्ठा छोढूण दवं तु पियइ [५]दवियरसं ।**
**हेट्ठोवरि आमट्ठं इय एसो [६]भोयणे अविही ॥२९६॥ निभा०**

**उच्चिणइ** गाहा । यथा **काक उच्चित्यो**च्चित्य **विष्ठादे**र्मध्याद्वल्लादि भक्षयति एवमसावपि, **अथवा विकिरति** काकवदेव **सर्वम्,** तथा काकवदेव कवलं प्रक्षिप्य मुखे **दिशो विप्रेक्षते**, तथा **शृगाल** इवा**न्यस्मिनन्यस्मिन्** प्रदेशे भक्षयति ॥२९५॥

**सुरभी** गाहा । **सुरभि** यद् **दोच्चंगं** तीमनमोदनादिना सह यन्मिश्रीभूतं तत्र **द्रवं** प्रक्षिप्य यो निर्यासः सञ्जातस्त**त्पिबनं** यत्तद् **द्रवितरसमु**च्यते । तथाऽ**धस्तादुपरि** च यद् **आमट्ठं** विपर्यासीकृतं भुङ्क्ते तदेतत्परामट्ठं, अयमे**ष भोजनेऽविधिः** ॥२९६॥

---

१. बीअं दा० २. खवियरसं ह० हे० ३. परामट्ठं ह० हे० ४. काओ ह० हे० ५. रवियरसं ह० हे० ६. भुंजणे दा.

कः पुनर्ग्रहणभोजनयोर्विधिः ? इत्यत आह –

**९८१ जह गहियं तह नीयं गहणविही भोयणे विही इणमो ।**
**उक्कोसमणुक्कोसं समीकयरसं तु भुंजिज्जा ॥२९७॥ निभा०**

**९८२ तइए वि अविहिगहिअं विहिभुत्तं तं गुरूहिऽणुन्नायं ।**
**सेसा नाणुन्नाया गहणे दिंते य निज्जुहणा ॥२९८॥ निभा०**

**९८३ अहवा वि अकरणाए उवट्ठियं जाणिऊण कल्लाणं ।**
**घट्टेउं दिंति गुरू पसंगविणिवारणट्ठाए ॥२९९॥ निभा०**

**जह गहियं** गाहा । **यथैव गृहीतं** गृहस्थेन दत्तं सत्त**त्तथैवानीतं** यदयं **ग्रहणविधिः, भोजने** पुनरयं **विधिर्य**दुतो**त्कृष्ट**द्रव्यमन्यद**नुत्कृष्टद्रव्यं** च **समीकृतरसं भुञ्जीते**त्ययं प्रथमो भङ्गकः शुद्ध इति ॥२९७॥

**तइए** गाहा । **तृतीयेऽपि** भङ्गके**ऽविधिना**ऽसमाचार्या **गृहीतं विधिना भुक्तं** समीकृतरसं सद् भुक्तं **तच्च गुरुणाऽनुज्ञातम्, शेषौ** तु द्वौ भङ्गकौ **नानुज्ञातौ,** यस्तु विधिगृहीतमविधिभुक्तं काकशृगालादिरूपं भक्तं **ददाति** योऽपि **गृह्णाति** तयोर्द्वयोरपि **निज्जुहणा** निर्द्धारणं क्रियते, तथाऽविधिगृहीतमविधिभुक्तं च यो **ददाति गृह्णाति** वा तयोर्द्वयोरपि निर्धारणं क्रियत इति ॥२९८॥

**अहवा** गाहा । **अथवा** एतद्दो**साकरणतया**ऽनासेवन**योपस्थितं** दातारं ग्रहीतारं च **ज्ञात्वा** सङ्क्षेपायनं क्रियते, **कल्याणकं** च **गुरवो ददति**, तच्च ददति **घट्टयित्वा** तिरस्कृत्य, यदुत त्वया पुनरेवं न कर्त्तव्यम्, स चैवं गुरुः किंनिमित्तं करोतीत्यत आह– '**पसंगविणिवारणट्ठाए**' **प्रसङ्गस्य** पुनरासेवनस्य **विनिवारणार्थ**मेवं करोतीति ॥२९९॥

**९८४ घासेसणा उ एसा कहिया भे ! धीरपुरिसपन्नत्ता ।**
**संजमतवड्ढगाणं निग्गंथाणं महरिसीणं ॥३००॥ निभा०**

**घासेसणा उ** गाहा । सुगमा ॥३००॥

[घासेसणा गाथा । ग्रासैषणा भवतां कथिता धीरपुरुषप्रज्ञप्ता । संयमतपआढ्यानां निर्ग्रन्थानां महर्षीणाम् । [ओ.नि.मा.निभा.३००]]

**९८५ एयं घासेसणविहिं जुंजंता चरणकरणमाउत्ता ।**
**साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥३०१॥ निभा०**

**एतं** गाहा । सुगमा ॥३०१॥

[एयं गाथा । एतं ग्रासैषणाविधिं युञ्जानाश्चरणकरणयोरायुक्ताः साधवोऽनेकभवसञ्चित-मनन्तप्रदेशनिष्पन्नमनन्तगुणरसमनन्तं कर्म क्षपयन्ति । [ओ.नि.मा.निभा.३०१]]

**९८६ एत्तो परिट्ठवणविहिं वोच्छामि धीरपुरिसपन्नत्तं ।**
**जं नाऊण सुविहिया करिंति दुक्खक्खयं धीरा ॥३०२॥ निभा०**

**एत्तो** गाहा । सुगमा ॥३०२॥

[एत्तो गाथा । इतः परिष्ठापनिकाविधिं वक्ष्यामि धीरपुरुषप्रज्ञप्तम् । यं ज्ञात्वा सुविहिताः स्वनुष्ठानाः साधवो धीरा दुःखक्षयं दुःखहेतुं कर्मक्षयं कुर्वन्ति । [ओ.नि.मा.निभा.३०२]]

इदानीं उव्वरिए त्ति (नि. ५६८) द्वारं भण्यते, अथवा स्वयमेव भाष्यकारः सम्बन्धं प्रतिपादयन्नाह-

**९८७ भत्तट्ठिय उव्वरियं अहव अभत्तट्ठियाण जं सेसं ।**
**संबंधेणाणेण उ परिठावणिया मुणेयव्वा ॥३०३॥ निभा०**

**भत्तट्ठिय** गाहा । **भक्तार्थिकानां** च भुक्तानामु**द्वरितं** यद**थवा अभक्तार्थिकानां** पारिष्ठापनिकाभोक्तॄणां यदुद्वरितं **यच्छेषं** तत्परिष्ठापनीयमिति कृत्वा**ऽनेन सम्बन्धेन पारिष्ठापनिका विज्ञेया** भवतीत्यर्थः ॥३०३॥

**९८८ सा पुण जायमजाया जाया मूलोत्तरेहि उ असुद्धा ।**
**लोभातिरेगगहिया अभिओगकया विसकया वा ॥५९६॥ नि० दारगाहा ।**

**सा पुण** गाहा । **सा पुनः** पारिष्ठापनिका **जाता अजाता** च भवति, तत्र **जाता** ग्रहणकाल एव प्राणातिपातादिदोषेण युक्ता, अथवाऽऽधाकर्मादिदोषेण जातोत्पन्ना, अजाता पुनराधाकर्मादिदोषेण न दूषिता या साऽजातेत्युच्यते । तत्र जातास्वरूप-प्रतिपादनायाह-**मूलगुणैः** प्राणातिपातादिभि**रशुद्धा**, तथा **उत्तरगुणै**श्चाधाकर्मादिभि**रशुद्धा**, तथा **लोभातिरेकेण** लोभाभिप्रायेण साधुना **गृहीता** साऽप्यशुद्धा लोभदोषदूषिता सती जातेत्युच्यते, तथा **अभियोगकृता,** अभियोगो द्विविधः-वशीकरणचूर्णो मन्त्रश्च, तत्र सा भिक्षा कदाचित्संयोजिता भवति मन्त्राभिमन्त्रिता वा साऽप्यशुद्धा, अतो जाता सा पारिष्ठापनिकेत्युच्यते, **विषेण वा** व्यामिश्रं भक्तं केनचिद् द्विष्टेन दत्तं भवति तस्य यत् परिष्ठापनं सा जातापरिष्ठापनिकेति ॥५९६॥

इदानीं भाष्यकृदेनामेव गाथां व्याख्यानयति, तत्र जाता पारिष्ठापनिका-स्वरूपाभिधानायाह –

**९८९ मूलगुणेहिं असुद्धं जं गहिअं भत्तपाण साहूहिं ।**
**एसा उ होइ जाता वुच्छं सि विहिए वोसिरणं ॥३०४॥ निभा०**

**मूलगुणेहिं** गाहा । **मूलगुणैः** प्राणातिपातादिभिर**शुद्धं यद् गृहीतं भक्तं पानकं** वा **साधुभिरियं जाता**ऽभिधीयते, **वक्ष्ये**ऽ**स्या** जाताया **विधिना व्युत्सर्जनं** परित्यागम् ॥३०४॥

सा च जाता किंविधे **स्थण्डिले** परिष्ठापनीया ? –

**९९० एगंतमणावाए अच्चित्ते थंडिले गुरुवइट्ठे ।**
**आलोए एगपुंजं तिट्ठाणं सावणं कुज्जा ॥५९७॥ नि०**

**९९१ लोभातिरेगगहिअं अहव असुद्धं तु उत्तरगुणेहिं ।**
**एसा वि होति जाया वोच्छं सि विहीए वोसिरणं ॥३०५॥ निभा०**

**९९२ एगंतमणावाए अच्चित्ते थंडिले गुरुवइट्ठे ।**
**आलोए दोन्नि पुंजा तिट्ठाणं सावणं कुज्जा ॥५९८॥ नि०**

**एगंत** गाहा । **एकान्ते**ऽ**नापाते** लोकापातरहिते**ऽचित्ते स्थण्डिले गुरूपदिष्टे अणावायमसंलोए** (नि.३१४-३१५) इत्येवमादिके **आलोगे** समे भूभागे, न गर्त्तादौ, यत्र प्राघूर्णकादयः सुखेन पश्यन्ति, तत्र च तस्य भक्तस्यै**कः पुञ्जो** राशिः क्रियते, पुनश्च **त्रिस्थानं** त्रयो वाराः **श्रावणं करोति**-व्युत्सृष्टं व्युत्सृष्टं व्युत्सृष्टमिति, तच्च त्रिस्थानं श्रावणं करोति त्रिविधेन मनसा वाचा कायेन व्युत्सृष्टमित्यस्य ज्ञापनार्थमिति ॥५९७॥

**लोभातिरेग** गाहा । यत्पुनः साधुना **लोभातिरेकेण** गुडादिद्रव्यं मूर्च्छया **गृहीतमथवा यदशुद्धमुत्तरगुणैरा**धाकर्मादिभिः, **इयमपि** भिक्षा **जाते**त्युच्यते । **वक्ष्ये**ऽस्या **विधिना व्युत्सर्जनं** परित्यागम् ॥३०५॥

**एगंत** गाहा । पूर्वार्द्धं सुगमम्, केवलमत्र **द्वौ पुञ्जौ** क्रियेते **आलोके** साधुनाम् ॥५९८॥

इदानीं अभिओगे त्ति (नि.५९६) व्याख्यानयन्नाह –

**९९३ दुविहो खलु अभिओगो दव्वे भावे य होइ नायव्वो ।**
**दव्वंमि [१]होइ जोगो विज्जा मंता य भावंमि ॥५९९॥ नि०**

**दुविहो** गाहा । **द्विविधोऽभियोगो द्रव्याभियोगो भावाभियोगश्च ज्ञातव्यः**, तत्र **द्रव्ये योगो** द्रव्ययोगश्चूर्णस्तन्मिश्रपिण्डोऽभियोगपिण्डः, स च परित्यजनीयः, भावाभियोगश्च **विद्यया [२]मन्त्रेण** वाभिमन्त्र्य पिण्डं ददाति स तादृशो भावाभियोग-पिण्डः, स च परिष्ठापनीय इति । अत्र चागार्या दृष्टान्तः, "[A]एगा अविरइया सा अणिट्ठा पतिणो, ताए परिव्वाइया अब्भत्थिया जहा- किंचि मंतेण अहिमंतेऊण मे देहि जेण पई मे वसे होइ, ताहे ताए अभिमंतेऊण कूरो दिण्णो, अविरइयाए चिंतियं, मा एसो दिण्णेण मरिज्जा ततो ताए अणुकंपाए उक्कुरुडियाए छड्डिओ, सो गद्दहेण खइओ, सो रत्तिं घरदारं खोट्टेउमारद्धो ताणि णिग्गयाणि जाव पेच्छंति गद्दहेण खोट्टिज्जंतं, सो अविरओ भणइ–किं एयं ति ? ताए सब्भावो कहिओ, तेण वि सा चरिगा दंडाविआ, एस दोसो । एवं जदि तिरियाणं पि एरिसा अवत्था होइ माणुसस्स पुण सुट्ठुयरं होइ, अओ एरिसो पिंडो न घेत्तव्वो"॥५९९॥

अमुमेवार्थं गाथाभिरुपसंहरन्नाह –

**९९४ विज्जाए होअगारी अचियत्ता सा य पुच्छए चरियं ।**
**अभिमंतणोदणस्स उ अणुकंपणमुज्झणं च खरे ॥६००॥ नि०**

**९९५ बारस्स पिट्टणंमि य पुच्छण कहणं च हो[३]अगारीए ।**
**सिद्धे चरियादंडो एवं दोसा इहं पि सिया ॥६०१॥ नि०**

**विज्जाए** गाहा । विद्याभिमन्त्रिते पिण्डे**ऽगारी** दृष्टान्तः, सा च भर्तु**रचियत्ता** न रोचते, **सा च चरिकां** परिव्राजिकां **पृच्छति** पत्युर्वशीकरणार्थम्, तयाऽप्य-**भिमन्त्रणमोदनस्य** कृत्वा दत्तम्, तयाऽपि अगार्या पत्युर्मरणा**नुकम्पया** न दत्तः स ओदन **उज्झनं** परित्यागः कृतः, स चोज्झितः **खरेण** भक्षित इति ॥६००॥

---

A. एकाऽविरतिका, साऽनिष्टा पत्युः, तया परिव्राजिकाऽभ्यर्थिता यथा- कश्चिद् मन्त्रेणाभिमन्त्र्य मे देहि येन पतिर्मे वश्यो भवति, तदा तयाऽभिमन्त्र्य कूरो दत्तः, अविरतिकया चिन्तितम्, मा एष दत्तेन म्रियेत्ततस्तया अनुकम्पया उत्कुरुटिकायां छर्दितः, स गर्दभेन खादितः, स रात्रिं गृहद्वारं पिट्टयितुमारब्धः, ते निर्गता यावत् पश्यन्ति गर्दभेन पिट्टयन्तम्, सोऽविरतो भणति- किमेतद् ? इति, तया सद्भावः कथितः, तेनापि सा चरिका दण्डिता, एष दोषः । एवं यदि तिरश्चामिदृशी अवस्था भवति मनुष्यस्य पुनः सुष्ठुतरं भवति, अत इदृशः पिण्डो न गृहीतव्यः।

१. होंति जोगा ह० हे० २. मन्त्रेण वाभिमन्त्र्य क, ख. ३. भोअगारी ह, भोयगारी हे०

**बारस्स** गाहा । स च गर्दभ आगत्य **द्वारं पिट्टयति** मन्त्रवशीकृतः सन्, शेषं सुगमम् । एवं भावाभियोगे दृष्टान्त उक्तः । इदानीं द्रव्याभियोगचूर्णं वशीकरणपिण्डः स उच्यते –

"[A]एगा अविरइया, सा य सुरूवस्स भिक्खुणो अज्झोववण्णा अणुरत्ता, ताहे सा तं पत्थेति अणिच्छंतस्स चुण्णाभिओगेण संजोएउं भिक्खं पाडिवेसिअघरे काऊण दवाविअं, ताहे जओ चेव तस्स साहुस्स पडिग्गहगे पडिअं तओ चेव तस्स साहुस्स तत्तोहुत्तो मणो हीरइ, तेण य नायं ताहे नियट्टो, आयरिआणं पडिग्गहगं दाउं काइयभूमिं वच्चइ जाव आयरियाणं पि तत्तोहुत्तो भावो हीरइ, ताहे सो सीसो आगंतुं आलोएइ, आयरिआ भणंति–मम वि अत्थि भावो, तं एत्थं संजोगचुण्णेण कओ पिंडो अत्थि, ताहे परिठविज्जइ, जो विही [१]परिट्ठावणे सो उवरिं भण्णिहिति । एवमेव विसकयं पि, एगा अगारी साहुणो अज्झोववण्णा, सो य नेच्छइ, ताहे रुट्ठाए विसेण मिस्सा भिक्खा दिण्णा, तस्स य दिण्णमेत्तेण चेव सिरोवेयणा संजाया, पडिणियत्तो य गुरुणो समप्पेऊण काइयं वोसिरइ जाव गुरुणो वि सीसवेयणा जाया, तं च गुरुणा गंधेण णायं जहा इमं विसमिस्सं, अहवा तत्थ लवणकया भिक्खा पडिया ताहे तं विसं उप्पि सरइ, एवं नाए विहीए परिट्ठविज्जति सा य भणीहामि ॥६०१॥

इदानीममुमेवार्थं गाथाभिरुपसंहरन्नाह –

**१९६ जोगंमि उ अविरइया अज्झोववन्ना सरूवभिक्खुंमि ।**
**[२]कडजोगमणिच्छंतस्स देइ भिक्खं असुभभावे ॥६०२॥ नि०**

---

A. एकाऽविरतिका, सा च सुरूपस्य भिक्षोरध्युपपन्ना अनुरक्ता, तदा सा तं प्रार्थयति, अनिच्छतश्चूर्णाभियोगेन संयोज्य भिक्षां प्रातिवेश्मिकगृहे कृत्वा दापितम्, तदा यत एव तस्य साधोः प्रतिग्रहके पतितं तत एव तस्य साधोस्तदभिमुखो मनो जिह्रेति, तेन च ज्ञातं तदा निवृत्तः, आचार्यस्य प्रतिग्रहकं दत्त्वा कायिकीभूमिं व्रजति, यावद् आचार्यस्यापि तदभिमुखो भावो जिह्रेति, तदा स शिष्य आगत्याऽऽलोचयति, आचार्या भणन्ति–ममप्यस्ति भावः, तदत्र संयोगचूर्णेन कृतः पिण्डोऽस्ति, तदा परिस्थापयति, यो विधिः परिस्थापने स उपरि भणिष्यति। एवमेव विषकृतमपि– एकाऽगारी साधा अध्युपपन्ना, स च नेच्छति, तदा रुष्टया विषेण मिश्रा भिक्षा दत्ता, तस्य च दत्तमात्रेणैव शिरोवेदना सञ्जाता, प्रतिनिवृत्तश्च गुरोः समर्पयित्वा कायिकीं व्युत्सृजति यावद् गुरोरपि शिरोवेदना जाता, तं च गुरुणा गन्धेन ज्ञातं यथेदं विषमिश्रम्, अथवा तत्र लवणकृता भिक्षा पतिता, तदा तद्विषमुपरि सरति, एवं ज्ञाते विधिना परिस्थाप्यते, सा च भणिष्यामि।

१. परिट्ठवणे क २. कडजोगि अणिच्छंतस्स ह०

**९९७ संकाए स नियट्टो दाऊण गुरुस्स काइयं निसिरे ।**
**तेसिं पि असुभभावो पुच्छा य ममं पि उज्झणया ॥६०३॥ नि०**

**९९८ एमेव विसकयंमि वि दाऊण गुरुस्स काइयं निसिरे ।**
**गंधाई विन्नाए उज्झण अविही सियालवहे ॥६०४॥ नि०**

**९९९ एवं विज्जाजोए विससंजुत्तस्स वावि गहियस्स ।**
**पाणच्चए वि नियमुज्झियव्व[१] वोच्छं परिट्ठवणं ॥६०५॥ नि०**

**१००० एगंतमणावाए अचित्ते थंडिले गुरूवइट्ठे ।**
**छारेण अक्कमित्ता तिट्ठाणं सावणं कुज्जा ॥६०६॥ नि०**

**जोगंमि** गाहा । **जोगे अविरइया** गृहस्थीदृष्टान्तः, **अज्झोववण्णा** रत्ता **सरूपे भिक्षौ, अनिच्छत**स्तत्कर्म कर्त्तुं **कृतयोगो** भिक्षापिण्डो दत्तः, पुनश्च तस्य साधोर्ग्रहणानन्तरमेवा**शुभभावो** जातस्तदभिमुखं चित्तमिति ॥६०२॥

**संकाए** गाहा । तया च **शङ्कया** योगकृतभिक्षाशङ्कया **स निवृत्तो** भिक्षापरिभ्रमणात् । शेषं सुगमम् ॥६०३॥

**एमेव** गाहा । **एवमेव विषकृतेऽपि** [२]दृष्टान्तोपनयः, **गुरोर्दत्त्वा** समर्पयित्वा **कायिकां** व्युत्सृजति, तेन च गुरुणा **गन्धादिना विज्ञाते, आदि**ग्रहणाद् भत्तस्स उप्फिसणेण वा **उज्झनं** परित्यागः क्रियते तत्र विधिना परिष्ठापनं कर्त्तव्यं नाऽविधिना, **अविधि**परिष्ठापने सति **शृगालादिवधो** भवति ॥६०४॥

**एवं** गाहा । **एवं विद्या**भिमन्त्रितस्य **योग**चूर्णकृतस्य तथा **विषसंयुक्तस्य गृहीतस्य** सतः **प्राणात्ययेऽप्य**त्यर्थं क्षुत्पीडायामपि सत्यां **नियमेना**वश्यतया नियमत **उज्झनीयम्**, तस्य च **परिष्ठापन**विधिं **वक्ष्ये** ॥६०५॥

**एगंत** गाहा । पूर्वार्द्धं पूर्ववत्, तद्विषादिकृतं भोजनं **छारेण** भूत्याऽऽ**क्रम्य** मिश्रीकृत्य च तेनैव परिष्ठापनीयम्, सुगमम् ॥६०६॥

इदानीं 'तिट्ठाणं सावणं'ति व्याख्यायते –

**१००१ दोसेण जेण दुट्ठं तु भोयणं तस्स सावणं कुज्जा ।**
**एवं विहिए[३] वोसट्ठे वेराओ मुच्चई साहू[४] ॥६०७॥ नि०**

---

१. नियमुज्झणा प. २. दृष्टान्तः, दा० ३. विहिवोसिरणे ह० हे० ४. समणो ह० हे०

**दोसेण** गाहा । **दोषेण येन** मूलकर्मादिनाऽऽधाकर्मादिना वा **दुष्टं भोजनं** भवति **तस्य** तिस्रो वाराः **श्रावणं कर्त्तव्यं** यदुत[1] मूलकर्मादिदोषैर्दुष्टमिति, एवमुत्तरगुणयोगमन्त्रविषकृतदुष्टानामपि तिस्रो वाराः श्रावणं करोति, **एवं विधिना व्युत्सृष्टे** सति **वैरात्** कर्मणो **मुच्यते साधुः**, अथवा वैराद् जन्तुवधजनितान्मुच्यते **साधुरि**ति ॥६०७॥

आह-इदमुक्तं शुद्धाया भिक्षाया यत्परिष्ठापनं साऽजातापरिष्ठापनिका उच्यते, ततश्च-

**१००२ जावइयं [2]उवजुंजइ तत्तिअमित्ते [3]विगिंचणं नत्थि ।**
**तम्हा पमाणगहणं अइरेगं होज्ज उ इमेहिं ॥६०८॥ नि०**

**जावइयं** गाहा । **यावन्मात्रकमेवोपयुज्यते तावन्मात्रमे**व भिक्षाग्रहणं कर्त्तव्यम्, यदा चैवं तदा तावन्मात्रकग्रहणे **विगिंचनं** परिष्ठापनं **नास्ति** न भवति, **तस्मात्प्रमाणग्रहण**मेव कर्त्तव्यम्, ततश्च कुतोऽजातायाः परिष्ठापनकं संभवति ? अतिरेकग्रहणाभावादिति, एवमुक्ते परेणाह सूरिः-**अइरेगं होज्ज उ इमेहिं** । **अतिरिक्तं** शुद्धमपि भक्त**मेभिर्**वक्ष्यमाणकारणै**र्भवेत्** ॥६०८॥

कानि च तानीत्यत आह –

**१००३ आयरिए य गिलाणे पाहुणए दुल्लहे सहसदाणे ।**
**एवं होइ अजाया इमा उ गहणे विही होइ ॥६०९॥ नि०**

**आयरिए** गाहा । कदाचित्कस्मिंश्चित्क्षेत्रे **आचार्य**प्रायोग्यं दुर्लभं ततः सर्व एव सङ्घाटकास्तस्य ग्रहणं कुर्वन्ति, ततश्च तद् घृतादि कदाचित् सर्व एव लभन्ते ततस्तदुद्धरति, [4]अन्येषां च [5]साधूनां पर्याप्तम्, एवमाचार्यार्थं गृहीतस्य शुद्धस्यापि परिष्ठापना भवति । तथा **ग्लानार्थ**मप्येवमेव गृहीतं सदुद्धरति, **प्राघूर्णका**नामप्येवमेव, तथा **दुर्लभ**लाभे सति सर्वैरेव सङ्घाटकैर्गृहीतमुद्धरतीति, तथा **सहसदाणे**ऽप्रतर्कितदाने सति प्रचुरमुद्धरति, ततश्चै**वं भवत्यजाता**परिष्ठापनिका । तत्र चाचार्यादीनां **ग्रहणेऽयं विधिर्व**क्ष्यमाणो **भवती**ति॥६०९॥

कश्चासावित्यत आह –

---

१. यदुत मूलकर्मादिदोषैर्मूलकर्मादिदोषैर्मूलकर्मादिदोषैर्दुष्टमिति, क. २. उवउज्जइ तत्तियगहणे ह० हे० ३. विगिंचणा दा० विगिंचणे ह० ४. ततोऽन्येषां क.ख. ५. सर्वेषां पर्या० दा०

**१००४ जइ तरुणो निरुवहओ भुंजइ तो मंडलीइ आयरिओ ।**
**असहुस्स वीसु गहणं एमेव य होइ पाहुणए ॥६१०॥ नि०**

**जति** गाहा । केचनैवं भणन्ति—**यद्यसावाचार्यस्तरुणो निरुपहत**पञ्चेन्द्रियश्च **ततो**ऽसौ **मण्डल्यामेव भुङ्क्ते** सामान्यम्, अथ **असहु**रसमर्थस्ततस्तस्य **विष्वक्** पृथग् **ग्रहणं** प्रायोग्यस्य कर्त्तव्यम्, **एवमेव प्राघूर्णके**ऽपि विधिर्द्रष्टव्यः, यदि प्राघूर्णकः समर्थस्ततो नैव तत्प्रायोग्यग्रहणं क्रियते, अथाऽसमर्थस्ततः क्रियत इति **॥६१०॥**

केचित्पुनरेवं भणन्ति—यदुत समर्थस्याप्याचार्यस्य प्रायोग्यग्रहणं कर्त्तव्यम्, यत एते गुणा भवन्ति –

**१००५ सुत्तत्थथिरीकरणं विणओ गुरुपूय सेहबहुमाणो ।**
**दाणवतिसद्धवुड्ढी बुद्धिबलवद्धणं चेव ॥६११॥ नि०**

**सुत्तत्थ** गाहा । आचार्यस्य प्रायोग्यग्रहणेन क्रियमाणेन **सूत्रार्थयोः स्थिरीकरणं** कृतं भवति यतो मनोज्ञाहारेण सूत्रार्थौ सुखेनैव चिन्तयति, अत आचार्यस्य प्रायोग्यग्रहणं कर्त्तव्यम्, तथा **विनय**श्चानेन प्रकारेण प्रदर्शितो भवति, **गुरुपूजा** च कृता भवति, **सेहस्य** चाचार्यं प्रति **बहुमानः** प्रदर्शितो भवतीति, अन्यथाऽसौ सेह इदं चिन्तयति, यदुत न कश्चिदत्र गुरुर्नापि लघुरिति, अतो विपरिणामो भवति, तथा प्रायोग्य**दानपतेश्च श्रद्धावृद्धिः** कृता भवति, तथा **बुद्धेर्बलस्य चा**चार्यसत्कस्य **वर्द्धनं** कृतं भवति, तत्र च महती निर्जरा भवति **॥६११॥**

**१००६ एएहिं कारणेहि उ केइ सहुस्स वि वयंति अणुकंपा[१] ।**
**गुरुअणुकंपाए पुण गच्छे तित्थे य अणुकंपा ॥६१२॥ नि०**

**एतेहिं** गाहा । **एभिः** पूर्वोक्त**कारणैः केचित्**समर्थस्याप्याचार्य**स्यानुकम्पा** कर्त्तव्येत्येवं **वदन्ति**, यतो **गुरोरनुकम्पया गच्छे तीर्थे चानुकम्पा** कृता भवति । यतश्चैवमतः प्रायोग्यग्रहणं गुरोः कर्त्तव्यमिति **॥६१२॥**

कीदृशं पुनराचार्ययोग्यं ग्राह्यमित्यत आह –

**१००७ सति लाभे पुण दव्वे खित्ते काले य भावओ चेव ।**
**गहणं तिसु उक्कोसं भावे जं जस्स अणुकूलं ॥६१३॥ नि०**

---

१. अणुकंपं ह० हे०

**सति** गाहा । **सति** विद्यमाने **लाभे द्रव्यतः क्षेत्रतः कालतो भावतश्चोत्कृष्टं** ग्राह्यम् । इदानीं निर्युक्तिकारो व्याख्यानयन्नाह- **गहणं तिसु उक्कोसं-ग्रहणं त्रिषु** द्रव्यक्षेत्रकालेषू**त्कृष्टं** कर्त्तव्यम्, **भावे** तु **यद्वस्तु यस्याचार्यस्यानुकूलं** तद् गृह्यते ॥६१३॥

इदानीं भाष्यकृद्व्याख्यानयति, तत्र [1]द्रव्ये उत्कृष्टतां प्रदर्शयन्नाह –

**१००८ कलमोदणो उ पयसा उक्कोसो हाणि कोद्दवुब्भज्जी ।**
**तत्थ वि मिउ तुप्पअरं [2]जत्थ व जं अच्चियं दोसु ॥३०६॥ निभा०**

**कलम** गाहा । **कलमशाल्योदनः पयसा** सह द्रव्यत **उत्कृष्टं** ग्राह्यम्, तदलाभे **हान्या** तावद् गृह्यते यावत् **कोद्दवुब्भज्जी** कोद्दवजाउलयं, **तत्राप्ययं** विशेषः क्रियते यदुत तदेव जाउलयं **मृदु** गृह्यते, तथा **तुप्पयरं** ति स्निग्धतरं तदेव जाउलयं गृह्यते, उक्तं द्रव्योत्कृष्टम्, इदानीं क्षेत्रकालोत्कृष्टप्रतिपादनायाह-**जत्थ व जं अच्चियं दोसु-द्वयो**रिति क्षेत्रकालयो**र्यद्वस्तु यत्र** पूजितं तत्तत्र गृह्यते, एतदुक्तं भवति-यद्यत्र क्षेत्रे बहुमतं द्रव्यं तत्तस्मिन् क्षेत्र युत्कृष्टमुच्यते, तच्च ग्राह्यम्, तथा यद्वस्तु यस्मिन् काले बहुमतं तत्तस्मिन् कालोत्कृष्टमुच्यते, भावोत्कृष्टं पुनर्निर्युक्तिकारेणैव व्याख्यातम्, उक्तं प्रसङ्गागतम् ॥३०६॥

इदानीं यदुक्तमाचार्यादीनां गृहीतं सद्यथोद्धरति तथा प्रतिपादयन्नाह –

**१००९ लाभे सति संघाडो गेण्हइ एगो उ इहरहा सव्वे ।**
**तस्सप्पणो य पज्जत्त गिण्हणे होइ अतिरेगं ॥६१४॥ नि०**

**लाभे** गाहा । यदि तस्मिन् क्षेत्रे घृतादीनां स्वभावेनैव लाभोऽस्ति ततस्तस्मिन् **लाभे सत्याचार्यार्थमेक** एव **सङ्घाटकः** प्रायोग्यं **गृह्णाति, इहरह** त्ति यदा तस्मिन् क्षेत्रे न प्रायोवृत्त्या प्रायोग्यस्य लाभस्तदा **सर्व** एव सङ्घाटकास्तस्याचार्यस्य प्रायोग्यं पर्याप्तये गृह्णन्ति, ततश्च **तस्या**चार्यस्या**त्मन**श्चार्थाय **पर्याप्तग्रहणे** सति **अतिरिक्तं भवति,** ततश्च तत्परिष्ठाप्यत इति ॥६१४॥

इदानीं गिलाणे त्ति (नि.६०९) व्याख्यानयन्नाह –

**१०१० गेलन्ननियमगहणं नाणत्तो[3]भासियं पि तत्थ भवे ।**
**ओभासियमुव्वरिअं विगिंचए सेसगं भुंजे ॥६१५॥ नि०**

---

१. द्रव्योत्कृष्टतां दा. २. जत्थ जया ह० जत्थ जत्थ जया हे० ३. ०भासियंमि ह० हे०

**गेलन्न** गाहा । **ग्लानस्य नियमेन** प्रायोग्य**ग्रहणं** कर्त्तव्यम्, यदि परं **नानात्वं ओभासियं पि** प्रार्थितमपि **तत्र** ग्लाने **भवति,** एतदुक्तं भवति-ग्लानार्थं प्रायोग्यस्य च प्रार्थनमपि क्रियते, ततश्च **ओभासितं** प्रार्थितं सद् ग्लानार्थं पुनश्च **यदुद्वरति** ततस्तद् **विगिच्यते** परित्यज्यते, **सेसयं भुंजे** त्ति **शेषं** यदनवभाषितमप्रार्थितमुद्वरितं त**द्भुञ्जीत** कश्चित्साधुरिति । प्राघूर्णकोऽप्याचार्यवद्व्याख्यात एव द्रष्टव्यः ॥६१५॥

इदानीं दुल्लभे त्ति (नि.६०९)व्याख्यानयन्नाह –

**१०११ दुल्लहदव्वं व सिया घयाइ घेत्तूण सेसमुज्झति ।**
**थोवं देमि व गिण्हामि य त्ति सहसा भवे भरियं ॥६१६॥ नि०**

**दुल्लभ** गाहा । **दुर्लभद्रव्यं वा स्याद्** भवेद् **घृतादि** तद्गृहीत्वोपभुज्य च यत् **शेषं** तद**ुज्झति,** एवं वा पारिष्ठापनिकं भवति । इदानीं सहसदाणे त्ति(नि.६०९) व्याख्यानयन्नाह–**थोवं देमी**त्यादि **स्तोकं दास्यामीत्ये**वं चिन्तयन्त्या गृहस्थया **सहसा**ऽतर्कितमेव तत् साधुभाजनं **भृतम्,** साधुर्वा चिन्तयति **स्तोकं ग्रहीष्यामीति,** पुनश्चातर्कितमेव भाजनं **भृतम्,** ततश्चैवमतिरिक्तं भवति, पुनश्च परिष्ठाप्यत इति ॥६१६॥

**१०१२ एएहिं कारणेहिं गहियमजाया उ सा विगिंचणया ।**
**आलोगंमि तिपुंजी अद्धाणे निग्गयातीणं ॥६१७॥ नि०**

**एएहिं** गाहा । **एभिः** पूर्वोक्त**कारणै**र्यद् **गृहीतं** भक्तं सा **अजातविगिंचणय** त्ति **अजाता विगिंचना** परिष्ठापनोच्यते, तस्याश्चाजातायाः साध्**वालोके त्रयः पुञ्जाः** क्रियन्ते, किमर्थमित्याह– **अद्धाणे निग्गयाईणं**–**अध्वाने निर्गता**स्तदर्थं **त्रयः** पुञ्जाः क्रियन्ते, **आदि**ग्रहणात्कदाचित्त एव कारण उत्पन्ने गृह्णन्तीति ॥६१७॥

आह –

**१०१३ एक्को व दो व तिन्नि व पुंजा कीरंति किं पुण निमित्तं ? ।**
**विहमाइनिग्गयाणं सुद्धेयरजाणणट्ठाए ॥६१८॥ नि०**

**एक्को व** गाहा । **एको वा द्वौ वा त्रयो वा पुञ्जाः किं पुनर्निमित्तं क्रियन्ते?** उच्यते–**विहमादि विहः** पन्थास्तदर्थं **निर्गतानां** साधूनां **शुद्धेतर**भक्त**परिज्ञानार्थं** त्रयः पुञ्जकाः क्रियन्ते, **आदि**ग्रहणाद्वास्तव्यानामेव कदाचिदुपयुज्यत इतिकृत्वा परिज्ञानार्थं त्रयः पुञ्जकाः क्रियन्त इति । इयं च गाथाऽनन्तरातीतगाथाया व्याख्यानभूता द्रष्टव्येति ॥६१८॥

**१०१४ एवं विगिंचिउं निग्गयस्स सन्ना हवेज्ज तं तु कहं ? ।**
**निसिरेज्जा अहव धुवं आहारा होइ नीहारो ॥६१९॥ नि०**

**एवं** गाहा । **एवमुक्तेन** न्यायेन परिष्ठापनार्थं **विनिर्गतस्य** यदि **सञ्ज्ञा** पुरीषोत्सर्जने बुद्धि**र्भवेत् तत्कथम्?** किं तत्र कर्त्तव्यमिति, अत आह-**निसिरेज्ज, अथवा** किमत्र प्रष्टव्यम् ? **ध्रुवमाहारान्नीहारो भवति** ॥६१९॥

ततश्च स्थण्डिले व्युत्सृजनं कर्त्तव्यं तत्र स्थण्डिलं पूर्वभणितमेव, तथा चाह –

**१०१५ थंडिल्ल पुव्वभणियं पढमं निद्दोस दोसु जयणाए ।**
**नवरं पुण णाणत्तं भा[1]वासन्नम्मि वोसिरणं ॥६२०॥ नि०**

**थंडिल्ल** गाहा । **स्थण्डिलं पूर्वभणितमे**व, (नि.३१४-३१५) यदुत- अनापातमसंलोकं १, अनापातं ससंलोकं २, सापातमसंलोकं ३, सापातं ससंलोकं ४ । अत्र **प्रथमो** भङ्गको **निर्दोषः, द्वयोश्च** द्वितीयतृतीययोर्भङ्गकयो**र्यतनया** व्युत्सृजति, एतत्पूर्वोक्तस्थण्डिलस्य सामान्यमेव, **नवरं पुण णाणत्तं** ति **नवरं** केवलमिदं **नानात्वम्,** यदुतात्र **भावासन्ने**ऽतिपीडायां **व्युत्सृजनम**नुज्ञातम्, तत्र चानुज्ञा [2]नैव कृताऽऽसीदिह च कृताऽतो नानात्वम्, ततश्च चतुर्थभङ्गकासेवनमप्यनुज्ञातमेव द्रष्टव्यमिति ॥६२०॥

इदानीं भाष्यकारः पूर्वोक्तस्थण्डिलानि प्रदर्शयन्नाह –

**१०१६ अणावायमसंलोयं अणावायालोय ततिय विवरीयं ।**
**आवातं संलोगं पुव्वुत्ता थंडिला चउरो ॥३०७॥ निभा०**

**अणावाय** गाहा । **अनापातमसंलोकं** च प्रथमो भङ्ग उक्तस्तथाऽ**न्यदनापातमालोकं** च द्वितीयम्, **तृतीयं** पुन**र्विपरीतं** स्थण्डिलं सापातमसंलोकमित्यर्थः, तथाऽन्य**दापातं संलोकं** च चतुर्थो भङ्गकः, एतानि **पूर्वोक्तस्थण्डिलानि चत्वारि** ॥३०७॥

**१०१७ अणावायमसंलोगं निद्दोसं बि[3]तियचरिम जयणाए ।**
**पउरदवकुरुकुयादी पत्तेयं मत्तगा चेव ॥६२१॥ नि०**

**अणावाय** गाहा । तत्रा**नापातमसंलोकं** च स्थंडिलं **निर्दोषम्, द्वितीय-तृतीयच[4]रमेषु** भङ्गकेषु **यतनया** व्युत्सर्जनं कर्त्तव्यम्, का चासौ यतना ? **प्रचुरद्रवेण**

---

१. भावासन्नाए दा० २. नैतत्कृत्वासीदिह । क. ३. बिइय चरिमए जयणा हे० बिय चरिमए जयणा ह०
४. चतुर्थेषु यत० दा०

**कुरुकुचादिकं** कर्त्तव्यम् **प्रत्येकं च मात्रकाणि** सपानकानि भवन्ति ॥६२१॥

किं सर्वेष्वेव स्थण्डिलेषु कुरुकुचैव यतना कर्त्तव्या उत कश्चिद्विशेषः? उच्यते–

**१०१८ तइए वि य जयणाए नाणत्तं नवरि सद्दकरणंमि ।**
**भावासन्नाए पुण नाणत्तमिणं सुणह वोच्छं ॥६२२॥ नि०**

**तइये** गाहा । अस्ति विशेष**स्तृतीयेऽपि** स्थण्डिले **यतनाया नानात्वमे**तावद्यदि परं यदुत **शब्दकरणम्,** एतदुक्तं भवति-तृतीये स्थण्डिल आपातासंलोके शब्दं कुर्वद्भिर्गन्तव्यम्, **भावासन्ने पुनर्यतनायां यन्नानात्वं तच्छृणुत वक्ष्ये** ॥६२२॥

तत्र प्रथमस्थण्डिले गन्तव्यम्, अथ तन्नास्ति –

**१०१९ जदि पढमं न तरेज्जा तो बितियं तस्स असइए तइयं ।**
**तस्स असई चउत्थं गामद्दारे य रत्थाए ॥६२३॥ नि०**

**जइ** गाहा । **यदि प्रथमं** स्थण्डिलं गन्तुं **न शक्नुयात्ततो द्वितीयं** व्रजेत्, **तस्य** द्वितीयस्या**सति तृतीयं** व्रजेत्, **तस्य** तृतीयस्य स्थण्डिलस्या**सति चतुर्थं** स्थण्डिलं व्रजेत्, यदा चतुर्थमपि स्थण्डिलं गन्तुं न शक्नोति तदा **गामद्वारे** गत्वा व्युत्सृजति, यदा ग्रामद्वारमपि गन्तुं न शक्नोति तदा **रथ्यायामेव** [१]व्युत्सृजति ॥६२३॥

**१०२० साही पुरोहडे वा उवस्सए मत्तगंमि वा णिसिरे ।**
**अच्चुक्कडंमि वेगे मंडलिपासंमि वोसिरइ ॥६२४॥ नि०**

**साही** गाहा । यदा रथ्यायामपि गन्तुं न शक्नोति तदा **साहीए** गृहपङ्क्तेरग्रतो व्युत्सृजति, यदा गृहपङ्क्तिमपि गन्तुं न शक्नोति तदा **पुरोहडे**ऽग्रद्वारे व्युत्सृजेत्, यदा पुरोहडमपि गन्तुं [२]नालं तदो**पाश्रये मात्रके वा** व्युत्सृजेत्, सर्वथा **अच्चुक्कडंमि वेगे मंडलिपासंमि वोसिरइ,** सुगमम् । इदं च लोकेऽपि प्रसिद्धम्, यदुत प्रस्रपुरीषादेर्वेगो न धार्यते । अत्र च कथानकम्- "[A]एगो राया तस्स वेज्जो पहाणो सो य मतो, तंमि मए राइणा गवेसावियं, एयस्स पुत्तो अत्थि वा नवा, तस्स य कहियं-अत्थि एगा सुया, ताए य सयलं वेज्जयं अहीयं, हक्कारिया य, राइणा भणिया य-किं ते अहीयं वेज्जयं ? सा भणइ -अहीयं, ततो एयस्सिं अंतरे ताए

A. एको राजा, तस्य वैद्यः प्रधानः, स च मृतः, तस्मिन् मृते राज्ञा गवेषितम्, तस्य पुत्रोऽस्ति वा न वा, तस्य च कथितम्- अस्ति एका सुता, तया च सकलं वैद्यकमधीतम्, आकारिता च, राज्ञा भणिता च- किं तेऽधीतं वैद्यकम् ? सा भणति- अधीतम्, तत एतासामन्तरे तया वातकर्म कृतम्, तत इतरैर्वैद्यैर्हसितम्, ततस्तया तेषां

१. व्युत्सृजेत् क. ख. २. न शक्नोति त. दा.

वायकम्मं कयं, ततो इयरेहिं विज्जेहिं हसियं, ततो तीए ताणं वेज्जाणं राइणो य परिकहणा कया, जहा –

**तिण्णि सल्ला महाराय अस्सिं देहे पइट्ठिया ।**
**वायमुत्तपुरीसाणं पत्तवेगं न धारए ॥१॥ [　　　]**

सिलोगो सुगमो । एवं साहुणा वि वेज्जाईणं परिकहणा कायव्वा" ॥६२४॥

एतदेव गाथयोपसंहरन्नाह –

**१०२१ राया विज्जंमि मए विज्जसुयं भणइ किं च ते अहीयं ? ।**
**अहीयं[1] ति वायकम्मे[2] विज्जा हसणा य परिकहणा ॥६२५॥ नि०**

**राया** गाहा । सुगमा ॥६२५॥

[अत्र कथागाथा –

राया गाथा । राजा वैद्ये मृते वैद्यसुतां भणति-किञ्चित्त्वयाऽधीतम् । साऽधीतमिति भणन्ती वातकर्म चक्रे । तदा वैद्यहसनाऽभूत् । तया परिकथना कृता । [ओ.नि.मा.नि.६२५]]

**१०२२ तिण्णि सल्ला महाराय ! अस्सिं देहे पइट्ठिया ।**
**वाऊमुत्तपुरीसाणं पत्तवेगं न धारए ॥९०॥ प्र०**

[**तिण्णि** गाहा । **त्रीणि शल्यानि महाराज ! अस्मिन् देहे प्रतिष्ठितानि । वायुमूत्रपुरीषाणां प्राप्तं वेगं न धारयेत्** ॥ओमाटी. ९०॥]

**१०२३ एसा परिट्ठवणविही कहिया भे धीरपुरिसपन्नत्ता ।**
**सामायारिं एत्तो वोच्छं[3] अप्पवखरमहत्थं ॥६२६॥ नि०**

**एसा परिट्ठवण** गाहा । सुगमा, उव्वरिए त्ति दारं गयं ॥६२६॥

[एसा गाथा । एषा परिष्ठापनिकाविधिः कथिता भवतां धीरपुरुषप्रज्ञप्ता । सामाचारीमितः शेषां वक्ष्ये यथाविधिना । गतं मंडलिभायणभोयणगहणं सोही य कारणुव्वरिए इति गाथायां उव्वरिए ति द्वारम् । एवं पडिलेहणं च पिंडउवहिपमाणं इत्यादि गाथायाः पिण्डद्वारं द्वितीयं व्याख्यातम् । [ओ.नि.मा.नि.६२६]]

---

वैद्यानां राज्ञश्च परिकथना कृता, यथा-त्रीणि शल्यानि महाराज ! अस्मिन् देहे प्रतिष्ठितानि । वातमूत्रपुरीषाणां प्राप्तवेगो न धारयेत् ॥ श्लोकः सुगमः । एवं साधुनाऽपि वैद्यादीनां परिकथना कर्तव्या ।

१. अहियंमि ह० हे० २. वाउ० ह० हे० ३. सेसं वोच्छं जहाविहिणा ह. हे.

इदानीं सामाचारी व्याख्यायते –

**१०२४ सन्नातो आगतो चरमपोरिसिं जाणिऊण ओगाढं ।**
**[१]पडिलेहणमप्पत्तं नाऊण करेइ सज्झायं ॥६२७॥ नि०**

**सन्नातो** गाहा । एवं च साधुः **सञ्ज्ञां** व्युत्सृज्यागतः पुनश्च **चरमपौरुषीं** चतुर्थप्रहरं **ज्ञात्वा अवगाढाम्**[२]अवतीर्णाम्, ततः किं करोतीत्यत आह–**प्रत्युपेक्षणां** करोति, अथासौ चरमपौरुषी नाद्यापि भवति ततोऽ**प्राप्तां चरमपौरुषीं ज्ञात्वा स्वाध्यायं** ताव**त्करोति** याव[३]च्चरमपौरुषी प्राप्ता ॥६२७॥

**१०२५ पुव्वुद्दिट्ठो य विही इहं पि पडिलेहणाइ सो चेव ।**
**जं एत्थं नाणत्तं तमहं वोच्छं समासेणं ॥६२८॥ नि०**

**पुव्वुद्दिट्ठो** गाहा । अत्र च प्रत्युपेक्षणायां **पूर्वोद्दिष्ट एव विधिः**, मुखवस्त्रिकादि-काऽवधेः **प्रत्युपेक्षणा एवमादिः**, तथा पात्रस्यापि सोत्ताइउवउत्तो तल्लेसो (नि. २८८) इत्येवमादिः, **इहापि स एव** प्रत्युपेक्षणायां विधिर्द्रष्टव्यः, **यदत्र नानात्वं** योऽतिरिक्तो विधिर्भवति **तं** विधि**महं वक्ष्ये समासेन** सङ्क्षेपेण ॥६२८॥

**१०२६ पडिलेहगा उ दुविहा भत्तट्ठिय एयरा य नायव्वा ।**
**दोण्ह वि य आइपडिलेहणा उ मुहणंतगसकायं ॥६२९॥ नि०**

**पडिलेहगा** गाहा । तत्र ये ते **प्रत्युपेक्षकास्ते द्विविधाः-भक्तार्थिका भुक्ताः, एयरा य-इतरे चो**पवासिकाश्च **ज्ञातव्या । द्वयोरपि** भक्तार्थिकाऽभक्तार्थिकयो**रादौ** प्रथमं **प्रत्युपेक्षणा** तुल्य इयं वेदितव्या, **मुहणंतगसकायं** प्रथमं मुखवस्त्रिकां प्रत्युपेक्षन्ते ततः **स्वकायं** निजदेहं प्रत्युपेक्षन्ते मुखवस्त्रिकया एव, इयं तावद्भक्ताभक्तार्थिकयोस्तुल्या प्रत्युपेक्षणा ॥६२९॥

इदानीमभक्तार्थिकानां प्रत्युपेक्षणाविधिं प्रदर्शयति, तत्र –

**१०२७ तत्तो गुरू परिन्ना गिलाणसेहाति जे अभत्तट्ठी ।**
**संदिसह पायमत्ते य अप्पणो पट्टगं चरिमं ॥६३०॥ नि०**

**तत्तो** गाहा । **ततो** मुखवस्त्रिकाकायप्रत्युपेक्षणानन्तरं **गुरु** त्ति **गुरोः** सम्बन्धिनीमुपधिं प्रत्युपेक्षन्ते, **परिण्ण** त्ति **परिज्ञा** प्रत्याख्यानम्, एतदुक्तं भवति–अनशनस्थस्य

---

१. पडिलेहेइ य पत्तं ह० हे० २. अवतीर्णम्- दा० ३. चतुर्था दा.

सम्बन्धिनीमवधिं[1] ततः प्रत्युपेक्षन्ते, तदनन्तरं **ग्लान**सत्कामुपधिं प्रत्युपेक्षन्ते, तथा **शैक्षको**ऽभिनवप्रव्रजितः शिक्षणार्थमर्पितः, तदीयामुपधिं तस्यैवाग्रतः प्रत्युपेक्षन्ते, **आदि**ग्रहणाद् वृद्धादेः सम्बन्धिनीमुपधिं प्रत्युपेक्षन्ते, **येऽभक्तार्थिन**स्त एवमनेन क्रमेण कुर्वन्ति प्रत्युपेक्षणाम्, ततो गुरुं संदिशापयित्वा '[A]संदिसह इच्छाकारेणं ओहियं पडिलेहेमि'। एवं भणित्वा **पात्रं** पतद्ग्रहं प्रत्युपेक्षन्ते, **मात्रकं चात्मीयं** प्रत्युपेक्षन्ते, ततश्च सकलमुपधिं प्रत्युपेक्षन्ते तावद्यावच्चोल**पट्टकश्चरम**स्तमपि प्रत्युपेक्षन्ते । "[B]एस ताव अभत्तट्ठिआण पडिलेहणविही" ॥६३०॥

इदानीं भुक्तानां विधिं प्रतिपादयन्नाह —

**१०२८ पट्टग मत्तय सयमोग्गहो य गुरुमाइया अणुन्नवणा ।**
**तो सेस भाणवत्थे पाउंछणगं च भत्तट्ठी ॥६३१॥ नि०**

**पट्टग** गाहा । मुखवस्त्रिकां प्रत्युपेक्ष्य तथैव कायं प्रत्युपेक्ष्य ततः **पट्टगं** ति चोल**पट्टकं** प्रत्युपेक्षन्ते, पुनश्च गोच्छको यः पात्रकस्योपरि दीयते, "[C]पच्छा पडिलेहणीयं पत्ताबंधे पडलाइं रयत्ताणं च पत्तयं चेव, यदि मत्तओ अरिक्को[2] तो एवं, अह रिक्को तो सो चेव पढमं निक्खिप्पइ," पुनश्च **मात्रकं** निक्षिप्य **स्वकीयमवग्रहं** पतद्ग्रहं प्रत्युपेक्ष्यन्ते, ततो गुरुप्रभृतीनां सत्का उपधयः प्रत्युपेक्ष्यन्ते भक्तार्थिकैः, **अणुण्णवण** त्ति ततो **गुरुमनुज्ञापयन्ति**, यदुत '[D]संदिसह ओहियं पडिलेहेमो त्ति । **ततः शेषाणि** गच्छसाधारणानि पात्राणि **वस्त्राणि** चापरिभोग्यानि यानि तानि प्रत्युपेक्षन्ते, ततः स्वकीयं **पायपुञ्छणगं** रजोहरणं **च** प्रत्युपेक्षन्ते, **भक्तार्थिका** एवमनेन क्रमेण प्रत्युपेक्षणं कुर्वन्ति ॥६३१॥

**१०२९ जस्स जहा पडिलेहा होइ कया सो तहा पढइ साहू ।**
**परियट्टेइ व पयओ करेइ वा अन्नवावारं ॥६३२॥ नि०**

**जस्स जहा** गाहा । पुनश्च **यस्य** साधो**र्यथैव प्रत्युपेक्षणा भवति कृता** परिनिष्ठिता **स तथैव पठति परिवर्त्तयति वा** गुणयति वा पूर्वभणितम्, **प्रयतः** प्रयत्नेन **करोति** [3]**वाऽन्य**साधुनाऽभ्यर्थितः सन् **व्यापारं** किञ्चिदिति कर्मप्रयोगम्,

A. संदिशत इच्छाकारेण औघिकं प्रतिलेखयामि । B. एष तावदभक्तार्थिनां प्रतिलेखनविधिः ।

C. पश्चात् प्रतिलेखनीयं पात्रबन्धः पडलानि, रजस्त्राणं च पात्रकमेव, यदि मात्रकोऽरिक्तस्तत एवम्, अथ रिक्तस्ततः स एव प्रथमं निक्षिप्यते । D. संदिशत औघिकं प्रतिलेखयाम इति ।

१. अवधिं प्र० क. २. पइरिक्को क. ३. वाऽन्यस्य साधुना क.

यदि वाऽन्यं **व्यापारं** तूर्णनादि **करोति** ॥६३२॥

**१०३० चउभागवसेसाए चरिमाए पडिक्कमित्तु कालस्स ।**
**उच्चारे पासवणे ठाणे चउवीसइं पेहे ॥६३३॥ नि०**

**चउभाग** गाहा । एवं स्वाध्यायादि कृत्वा पुन**श्चतुर्भागावशेषायां चरमपौरुष्यां प्रतिक्रम्य कालस्य** ततः स्थण्डिलानि प्रत्युपेक्षन्ते, किमर्थम् ? **उच्चारार्थं** तथा **प्रश्रवणार्थं** च **स्थानानि चतुर्विंशति**परिमाणानि **प्रत्युपेक्षन्ते** ॥६३३॥

इदानीं क्व ताः स्थण्डिलभूमयः प्रत्युपेक्षणीयाः ? इत्यत आह –

**१०३१ अहियासिया उ अंतो आसन्ने [१]मज्झे दूरे तिन्नि भवे ।**
**तिन्नेव अणहियासी अंतो छच्छच्च बाहिरओ ॥६३४॥ नि०**

**१०३२ एमेव य पासवणे बारस चउवीसइं तु पेहित्ता ।**
**कालस्स वि तिन्नि भवे अह सूरो अत्थमुवयाति ॥६३५॥ नि०**

**अहियासिया** गाहा । **अधिकासिका** भूमयो याः [२]सञ्ज्ञावेगेनापीडितः सुखेनैव गन्तुं शक्नोति ता एवंविधा **अन्तो** मध्येऽङ्गणस्य तिस्रः प्रत्युपेक्षणीयाः, कथम् ? एका स्थण्डिलभूमिर्वसते**रासन्ना**, अन्या **मध्ये**, अन्या **दूरे**, एवमेता**स्तिस्रः** स्थण्डिलभूमयो **भवन्ति**, तथाऽन्या**स्तिस्र एव** तस्मिन्नेवाङ्गण आसन्नतरे भवन्ति, **अनधिकासिकाः** सञ्ज्ञावेगेनोत्पीडितः सन् या याति ता अपि तिस्र एव भवन्ति, एका वसतेरासन्नतरे प्रदेशेऽन्या मध्येऽन्या दूरे, एवमेता **अन्तो** मध्येऽङ्गणस्य **षड्** भवन्ति, तथा **षट् चा**ङ्गणबाह्यत इत्यङ्गणस्य **बहिः** षडेवमेव भवन्ति ॥६३४॥

**एवमेव** गाहा । **एवमेव प्रश्रवणे** कायिकायां **द्वादश** भूमयः प्रत्युपेक्ष्यन्ते, षडङ्गणमध्ये षट् चाङ्गणबाह्यतः, एवं एताः सर्वा एव उच्चारकायिकाभूमी**श्चतुर्विंशति प्रत्युपेक्ष्य** पुनश्च **कालस्यापि** ग्रहणे **तिस्र** एव भूमयः प्रत्युपेक्षणीया **भवन्ति**, ताश्च कालभूमयो जघन्येन हस्तान्तरिताः प्रत्युपेक्ष्यन्ते, एवमनेन प्रकारेण कृतेन **अथ सूर्यो** यथा**ऽस्तमुपयाति** तथा कर्त्तव्यम् ॥६३५॥

**१०३३ जइ पुण निव्वाघाओ आवासं तो करेंति सव्वे वि ।**
**सड्ढाइकहणवा[३]घायया य पच्छा गुरू ठंति ॥६३६॥ नि०**

---

१. मज्झि तह य दूरे य दा. । २. संज्ञावेगोत्पीडितः क. ख. । ३. वाघाययाए ह० हे० वाघायओ य द.

**जइ पुण** गाहा । एवं सूर्यास्तमयानन्तरं **यदि निर्व्याघातो** गुरुः क्षणिक आस्ते **ततः सर्व** एवाऽऽ**वश्यकं** प्रतिक्रमणं **कुर्वन्ति,** अथ **श्राद्धधर्मकथनया व्याघातो** गुरोर्जातोऽक्षणिकत्वं ततः **पश्चाद्गुरुरावश्यकभूमौ संतिष्ठते** ॥६३६॥

**१०३४ सेसा उ [1]जहासत्ती आपुच्छित्ताण ठंति सट्ठाणे ।**
**सुत्तत्थझरणहेउं आयरिए ठियंमि देवसियं ॥६३७॥ नि०**

**सेसा उ** गाहा । **शेषास्तु** साधवो **यथाशक्त्याऽऽपृच्छ्य** गुरुं **स्वस्थाने** स्वस्थाने यथारत्नाधिकतयाऽऽवश्यकभूमौ **तिष्ठन्ति,** किमर्थम् ? **सूत्रार्थक्षरणहेतोः** सूत्रार्थगुणन-निमित्तं तस्यामावश्यकभूमौ कायोत्सर्गेण तिष्ठन्ति, तत्र केचिदेवं भणन्त्याचार्याः, यदुत- ते साधवः सामायिकसूत्रं पठित्वा कायोत्सर्गेण तिष्ठन्ति, कायोत्सर्गस्थिताश्च ग्रन्थानर्थान् वा चिन्तयन्तस्तिष्ठन्ति तावद्यावद् गुरुरागतः, ततो गुरुः सामायिकसूत्रमाकृष्य दैवसिकमतिचारं चिन्तयति, तेऽपि गुरौ तथा**स्थिते** तूष्णींभावेन कायोत्सर्गस्था एव **दैवसिकम**तिचारं चिन्तयन्ति । अन्ये त्वाचार्या एवं ब्रुवते, यदुत-ते साधवः सूत्रार्थं क्षरन्तस्तावत् तिष्ठन्ति यावद् गुरुरागतः, ततो गुरुः सामायिकसूत्रं पठति, तेऽपि कायोत्सर्गस्था एव सामायिकसूत्रं मनसा पठन्ति, ततः सा[2]मायिकं पठित्वाऽतिचारं चिन्तयन्ति, "[A]आयरिओ अप्पणो अतियारं द्विगुणं चिंतइ, किंनिमित्तं ? ते साहुणो बहुगं हिंडिया ततो तत्तिएण कालेण चिंतिउं न सक्कंति त्ति" ॥६३७॥

**१०३५ जो होज्ज उ असमत्थो बालो वुड्ढो गि[3]लाणपरितंतो ।**
**सो [4]आवस्सगजुत्तो अच्छेज्जा निज्जरापेही ॥६३८॥ नि०**

**जो होज्ज** गाहा । **यस्तु** साधुरनागतकायोत्सर्गकरणे**ऽसमर्थो भवेद्बालो वृद्धो** रोगार्त्तो ज्वरादिना **स आवश्यकयुक्त**स्तस्यामेव प्रतिक्रमणभूमा उपविष्टः कार्योत्सर्गं करोति, एवं **निर्जरापेक्षी** तिष्ठेत् ॥६३८॥

**१०३६ आवासगं तु काउं जिणोवदिट्ठं गुरूवएसेणं ।**
**तिन्निथुई पडिलेहा कालस्स वि[5]ही इमो तत्थ ॥६३९॥ नि०**

---

A. आचार्य आत्मनोऽतिचारं द्विगुणं चिन्तयति, किंनिमितम्? ते साधवो बहुकं हिण्डिताः, ततस्तावता कालेन चिन्तयितुं न शक्नोतीति ।

१. जहासत्ति ह० हे० २. समकं प० दा० ३. व रोगिओ वावि हे० य रोगिओ वावि ह० ४. आवासग.द. ५. इमा विही हे०

**आवासगं** गाहा । एवमनेन क्रमेणा**वश्यकं कृत्वा** परिसमाप्य **जिनोपदिष्टं गुरूपदेशेन** पुनश्च **स्तुतित्रयं** पठन्ति स्वरेण प्रवर्द्धमानमक्षरैर्वा, प्रथमा श्लोकेन स्तुतिर्द्वितीया बृहच्छन्दोजात्या बृहत्तरा तृतीया बृहत्तमा एवं प्रवर्द्धमानाः स्तुतीः पठन्ति मङ्गलार्थमिति, ततः **कालस्य** प्रत्युपेक्षणार्थं निर्गच्छन्ति, किं कालस्य ग्रहणवेला वर्त्तते न वा? इति, **तत्र** च कालवेलानिरूपणे **एष विधिरिति** वक्ष्यमाणः ॥६३९॥

**१०३७ दुविहो य होइ कालो वाघातिम एयरो य नायव्वो ।**
**वाघाओ घंघसालाए घट्टणं सड्ढकहणं वा ॥६४०॥ नि०**

**दुविहो** गाहा । **द्विविधो भवति कालो-व्याघातकाल इतरश्चा**व्याघातकालः, तत्र व्याघातकालं प्रतिपादयन्नाह—**व्याघातो घङ्घशालायाम**नाथमण्डपे [१]दीर्घे **घट्टना** परस्परेण वैदेशिकैर्वा स्तम्भैर्वा सह निर्गच्छतः प्रविशतो वा तादृशो व्याघातकालः, तथा **श्राद्धकादीनां** यत्राचार्यो धर्म**कथां** करोति सोऽपि व्याघातकालः, न तत्र कालग्रहणं नापि कालवेलानिरूपणार्थं प्रच्छनं भवति ॥६४०॥

**१०३८ [२]वाघाते तइओ सिं दिज्जइ तस्सेव ते निवेयंति ।**
**निव्वाघाते दोन्नि उ पुच्छंती काल [३]घेच्छामो ॥६४१॥ नि०**

**वाघाते** गाहा । एवं घङ्घशालायां **व्याघाते** सति **तृतीयस्त**योः कालग्राहिणो उपाध्यायादि**र्दीयते** येन **तस्यैवा**ग्रतो बाह्यत एव **निवेदयन्ति** सन्दिशापयन्ति च । अथ निर्व्याघातं भवति-न कश्चिद् घङ्घशालायां धर्मकथादिर्वा कालव्याघातो वैदेशिकादिव्याघातो वा, ततश्च **निर्व्याघाते** सति **द्वावेव** निर्गच्छतः, एकः कालग्राहकोऽपरो दण्डधारी, पुनश्च तौ **पृच्छतः**, यदुत **कालं गृह्णीवः**, वेलां निरूपयाव इत्यर्थः । तेषां च निर्गच्छतां यद्येते व्याघाता भवन्ति ततश्च निवर्त्तन्ते न गृह्णन्ति कालम् ॥६४१॥

के च ते व्याघाताः ? –

**१०३९ आपुच्छण [४]किइकम्मं आवस्सिय खलिय पडिय वाघाए ।**
**इंदिय दिसा य तारा वासमसज्झाइयं चेव ॥६४२॥ नि०**

---

१. दीर्घो० क, २. वाघाओ ह० वाघाए हे० ३. पेच्छामो ता. ४. किइकम्मे आवासिय हे० ह०

**१०४० जइ पुण वच्चंताणं छीयं जोइं वं[1] तो नियत्तंति ।**
**निव्वाघाते दोन्नि उ अच्छंति दिसा[2] निरिक्खंता ॥६४३॥ नि०**

**१०४१ गोणादि कालभूमीए होज्ज संसप्पगा व उट्ठेज्जा ।**
**कविहसिय वास विज्जुक्क गज्जिए वावि उवघातो ॥६४४॥ नि०**

**आपुच्छण** गाहा । "[A]आपृच्छना नाम आपुच्छित्ता गच्छन्ति दंडगं गहाय मत्थएण वंदामि खमासमणो कालस्स वेलं निरूवेमो । एवं च यदि न पृच्छन्ति ततो व्याघातो भवति न ग्राह्यः कालः, अथाविनयेन पृच्छन्ति तथापि व्याघात एव, **कृतिकर्म** च वन्दनं यदि न कुर्वन्ति, अविनयेन वा कुर्वन्ति, **आवस्यिकां** च यदि न करोति, अविनयेन वा करोति, **स्खलनं** वा गच्छतां यदि स्तम्भादौ भवति, **पतनं** वा तेषामन्यतमस्य यदि भवति, एवमेभि**र्व्याघातो** भवति । तथा **इंदिय** त्ति श्रवणेन्द्रियादीना**मिन्द्रियाणां** यदि विषया अननुकूला भवन्ति ततो न गृह्यते । एतदुक्तं भवति-यदि छिन्धि भिन्धीत्येवमादि शृण्वन्ति शब्दं ततो निवर्त्तन्ते, एवं गन्धश्चाशुद्धो यदि भवति, यत्र गन्धस्तत्र रस इति, विरूपं पश्यन्ति रूपं किञ्चिद्, एवं सर्वत्र योजनीयं ततो निर्गच्छन्ति। तथा **दिग्मोहश्च** यदि भवति ततो न गृह्यते, **तारकाश्च** यदि पतन्ति **वर्षणं** वा यदि भवति तत एभिरनन्तरोक्तैर्व्याघातैः कालो न गृह्यते, **अस्वाध्यायिकं च** यदि भवति ॥६४२॥

तथा-**जति पुण** गाहा । **यदि पुनर्व्रजतां क्षुतं ज्योतिर्वा**ऽग्नि उद्योतो वा भवति **ततो निवर्त्तन्ते,** यदा तु पुनरुक्तलक्षणो व्याघातो न भवति तदा **निर्व्याघाते** सति **द्वावेव तिष्ठतो दिशो** निरूपयन्तौ क्षणमात्रम् ॥६४३॥

तथा एभिश्च कालभूमौ गतानामुपघातो भवति- **गोणाति** गाहा । यदि तस्मिन् कालमण्डलके **गौरुपविष्टो भवति, आदि**ग्रहणान्महिषादिर्वोपविष्टो भवति ततो व्याघातः, कदाचिद्वा तस्यां **कालभूमौ संसर्पगाः** पिपीलिकादय **उत्तिष्ठेरन्** ततश्च व्याघातः, कदाचिद्वा [140]**कपिहसितं** वि[3]रलवानरमुखहसितं भवति रात्रौ,

---

१४०. कपिहसित-कपिहसितम्-नभसि विकृतरूपस्य वानरमुखसदृशस्य अट्टाट्टहासे । (व्य.७ उ.) अकस्मान्नभसि ज्वलद्भीम-शब्दे । (जी.)

A. आपृच्छना नाम आपृच्छ्य गच्छतो दण्डकं गृहीत्वा मस्तकेन वन्दे क्षमाश्रमण! कालस्य वेलां निरूपयावः ।

१ च० दा० २. दिसं ह० ३. विराल० क, ख

अथवा कपिहसितं उट्ठित्तयं वा दीसइ । वर्षणं[1] वा विद्युद् वा भवति, उल्कापातो वा भवति, गर्जितध्वनिर्वा श्रूयते, एभिः सर्वैर्व्याघातः, कालो[2] न गृह्यत इत्यर्थः ॥६४४॥

**१०४२ सज्झायमचिंतेंता कणगं दट्ठूण तो[3] नियत्तंति ।**
**वेलाए दंडधारी मा बोलं गंडए उवमा ॥६४५॥ नि०**

**सज्झाय** गाहा । एवं ते कालवेलानिरूपणार्थं निर्गताः **स्वाध्यायमकुर्वाणा** एकाग्राः कालवेलां निरूपयन्ति, अथ तत्र **कनकं** पश्यन्ति **ततः प्रतिनिवर्त्तन्ते,** कणगपरिमाणं च वक्ष्यति-'तिपंचसत्तेव घिंसिसिरवास'(निभा.३०९) इत्येवमादिना, अथ तत्र वर्त्तते कालग्रहणवेला न कनकादिभिरुपघातः कृतस्ततस्तस्यां कालग्रहण-**वेलायां** जातायां **दण्डधारी** प्रविश्य गुरुसमीपे कथयति, यदुत कालग्रहणवेला वर्त्तते **मा बोलं** रोलं कुरुत, अल्पशब्दैरवहितैश्च भवितव्यम्, अत्र च **गण्डक**दृष्टान्तः- यथाहि गण्डकः कस्मिंश्चित्कारण आपन्न उत्कुरुटिकायामारुह्य घोषयति ग्रामे—इदं प्रत्यूषसि कर्त्तव्यम्, एवमसावपि दण्डधारी भणति-यदुत [4]कालग्रहणवेला वर्त्तते ततश्च भवद्भिरपि गर्जितादिषूपयुक्तैर्भवितव्यमिति ॥६४५॥

**१०४३ [5]आघोसिए बहूहिं सुयंमि [6]सेसेसु निवडइ दंडो ।**
**अह तं बहूहिं न सुयं [7]दंडिज्जइ गंडओ ताहे ॥६४६॥ नि०**

**आघोसिए** गाहा । एव**माघोषिते** सति दण्डधारिणा **बहुभिश्च श्रुतम्, शेषाश्च** स्तोकास्तैर्न श्रुतं ततश्च तेषामुपरि **दण्डो निपतति,** सूत्रार्थकरणं नानुज्ञायते । अथेदृशं तदा घोषितं यद्बहुभिर्न श्रुतं स्तोकैः श्रुतं ततस्तस्यैव दण्डधारिणो दण्डो निपतति-तस्यैव स्वाध्यायनिरोधः क्रियते, कथम् ? गण्डकस्येव, यथा गण्डकेनाघोषिते बहुभिर्ग्रामीणकैः श्रुते सति यैः स्तोकैर्न श्रुतं ते दण्ड्यन्ते, **अथा**घोषिते स्तोकैः श्रुतं **बहुभिर्न श्रुतं ततो गण्डकस्यैव** दण्डो निपततीति ॥६४६॥

**१०४४ कालो सज्झा य तहा दो वि समप्पंति जहा समं चेव ।**
**तह तं तुलंति कालं चरिमदिसं वा असज्झागं ॥६४७॥ नि०**

**कालो** गाहा । तौ च प्रत्युपेक्षकौ **कालः सन्ध्या च यथा द्वेऽपि समकमेव**

---

१. जलं वा क, ख २. कालस्य ख० ३. पडिनियत्तंति ह० हे० ४. कालवेला क. ५. गंडग घोसिएहिं ह० हे० ६. सेसगाण दंडो उ ह० हे० ७. तो दंडो गंडए होइ ह० हे०

**समाप्तिं** व्रजत**स्तथा** [1]**तौ कालं तुलयतः** कलयतः, एतदुक्तं भवति-यथा कालसमाप्तिर्भवति सन्ध्या च समाप्तिं याति तथा कलयतः प्रत्युपेक्षकौ, **चरिमदिसं वा असज्झागं** ति **चरिमा** पश्चिमा **दिगसन्ध्याका** विगतसन्ध्या भवति यथा कालश्च समाप्यते तथा गृह्णन्ति ॥६४७॥

इदानीं किंविशिष्टेन पुनः कालः प्रतिजागरणीयः ? इत्यत आह –

**१०४५ पियधम्मो दढधम्मो संविग्गो चेवऽवज्जभीरू य ।**
**खेयन्नो य अभीरू कालं पडिलेहए साहू ॥६४८॥ नि०**

**पियधम्मो** गाहा । **प्रिय** इष्टो **धर्मो** यस्येति स प्रियधर्मा, तथा **दृढः** स्थिरो निश्चलो **धर्मो** यस्य स, तथा **संविग्गो** मोक्षसुखाभिलाषी, **अवद्यभीरुः** पापभीरुः, [2]**खेदज्ञो** गीतार्थः, तथा **अभीरुः** सत्त्वसंपन्नः, एवंविधः **कालं** कालग्रहणवेलां **प्रत्युपेक्षते साधुः**, एवंविधः कालवेलायाः प्रतिजागरणं करोति ॥६४८॥

इदानीं दण्डधारिणि घोषयित्वा निर्गते पुनश्च स द्वितीयः कालग्राही कालसंदिशनार्थं गुरोः समीपं प्रविशति, कथम् ? –

**१०४६ आउत्तपुव्वभणिए अणपुच्छा खलिय पडिय वाघाते ।**
**भासंत मूढ संकिय इंदियविसए य अमणुन्ने ॥६४९॥ नि०**

**आउत्त** गाहा । स च प्रविशन् **आयुक्त** उपयुक्तः सन् प्रविशति, एतच्च प्रवेशनं पूर्वोक्तमेव द्रष्टव्यं यतो निर्गच्छतो यो विधिः प्रविशतोऽपि स एव विधिरित्यत आह-**पूर्वभणितमेतत्** । अथ त्वनापृच्छ्यैव गुरुं कालं गृह्णाति तत**श्चानापृच्छ्य** गृहीतस्य कालस्य **व्याघातः**, एतदुक्तं भवति–गृहीतोऽप्यसौ न भवति, तथा **स्खलितस्य** सतः कालव्याघातः, **पतितस्य** च **व्याघातः** कालस्य, एवं सञ्जाते सति कालो न गृह्यते, तथा प्रविष्टस्य गुरुवन्दनकाले केनचित् सह जल्पतः कालो व्याहन्यते, तथा **मूढो** यदि भवति, आवर्त्तान् विधिविपर्यासेन ददाति तथापि व्याहन्यते कालः, तथा **शङ्कया** न जानाति किमावर्त्ता दत्ता न वेत्यस्यामवस्थायां व्याहन्यते कालः, **इन्द्रियविषयाश्च यद्यमनोज्ञा** भवन्ति तथापि कालो

---

१. तं क, ख २. क्षेत्रज्ञः क

व्याहन्यते, छिन्धि भिन्धीत्येवंविधान् शब्दान् शृणोति, गन्धोऽनिष्टो यदि भवति, यत्र गन्धस्तत्र रसोऽपि, विकरालं रूपं पश्यति, स्पर्शो लेष्ट्वभिघातोऽकस्माद्भवति, एवंविधेऽन्यतमेऽपि न गृह्यते कालः ॥६४९॥

प्रविशंश्चासौ किं करोतीत्यत आह –

**१०४७ निसीहिया नमोक्कारे काउस्सग्गे य पंचमंगलए ।**
**पुव्वाउत्ता सव्वे पट्ठवण चउक्कनाणत्तं ॥६५०॥ नि०**

**निसीहिया** गाहा । प्रविशंश्च गुरुसमीपे कालसन्दिशनार्थं यदि **निषीधिकां** न करोति ततः कालो व्याहन्यते, **नमस्कारं** च करोति "[A]नमो खमासमणाणं ।" अथैवं न भणति ततः कालव्याघातो भवति, प्राप्तश्चेर्यापथिकाप्रत्ययं **कायोत्सर्गमष्टोच्छ्वासं** करोति, नमस्कारं च चिन्तयति, "[B]ईरियावहियं च अवस्सं पडिक्कमति [1]जइ दूराओ जदि [2]आसन्नाओ वा आगतो, पुनरसौ नमस्कारेणोत्सारयति **पञ्चमङ्गलकेनेत्यर्थः**, पुनश्च संदिशापयित्वा कालग्रहणार्थं निर्गच्छति, "[C]निग्गच्छंतो जदि आवस्सियं न करेइ खलति वा पडति वा दीवो वा अंतरे [3]हवेज्जा एवमादीहिं उवहम्मइ ।" इदानीं कालग्रहणवेलायां किं कर्त्तव्यं साधुभिः ? इत्याह–'**पुव्वाउत्ता सव्वे**' **पूर्वमेव** दण्डधारि घोषणानन्तर**मुपयुक्ताः सर्वे** गर्जितादौ भवन्ति, उपयुक्ताश्च कालग्रहणोत्तरकालं सर्वे स्वाध्याय**प्रस्थापनं** कुर्वन्ति । **चउक्कनाणत्तं** काल**चतुष्कस्य** यथा **नानात्वं** भवति तथा वक्ष्यामः, कालचतुष्कमेकः प्रादोषिकः, अपरोऽर्द्धरात्रिकः, अपरो वैरात्रिकः, अपरः प्राभातिकः, एतच्च भाष्यकारो वक्ष्यति ॥६५०॥

इदानीं कालं गृह्णतः को विधिरित्यत आह –

**१०४८ थोवावसेसियाए सज्झाए ठाइ उत्तराहुत्तो ।**
**चउवीसगदुमपुप्फियपुव्वगमेक्केक्किय दिसाए ॥६५१॥ नि०**

**थोवावसेसिया** गाहा । **स्तोकावशेषायां सन्ध्यायां** पुणो कालमंडलं पमज्जित्ता निषीधिकां कृत्वा कालमण्डलके प्रविशति, तत**श्चोत्तराभिमुखः** कायोत्सर्गं करोति, तस्मिंश्च पञ्चनमस्कारमष्टोच्छ्वासमानं चिन्तयति, पुनश्च नमस्कारेणोत्सार्य मूक एव

---

A. नमः क्षमाश्रमणेभ्यः । B. ईर्यापथिकां चावश्यं प्रतिक्रामति यदि दूराद् यद्यासन्नाद् वाऽऽगतः ।
C. निर्गच्छतो यद्यावश्यिकां न करोति स्खलति वा पतति वा दीपो वाऽन्तरे भवेदेवमादिभिरुपहन्यते ।
१. जइ दूरा जइ आसण्णा आगतो । क. २. आसण्णओ आगतो । भ. व. ३. जातो क.

**चतुर्विंशति**स्तवं "[A]**लोगस्सुज्जोयगरं**" पठति मुखमध्ये, तथा **दुमपुप्फियपुव्वगं** ति **द्रुमपुष्पिकां धम्मो मंगलं पुव्वगं** ति-श्रामण्य**पूर्वकं** "[B]**कहं नु कुज्जा सामन्नं**" इत्यर्थः, एत**देकस्यां दिशि** चतुर्विंशतिस्तवादि "[C]सामन्नपुव्वगपज्जंतं कड्ढइ, दंडधारी वि उत्तराभिमुहं संठियस्स वामपासे पुव्वदिसाहुत्तो अग्गओ तिरिच्छं [१]आगासे दंडगं धरेइ उद्धट्ठिओ, पुणो तस्स पुव्वाईसु दिसासु चलंतस्स दंडधारी वि तहेव भमति" ॥६५१॥

इदानीं स गृह्णन् कालं यद्येवं गृह्णाति ततो व्याहन्यते, कथमित्यत आह –

**१०४९ भासंत मूढ संकिय इंदियविसए य होइ अमणुन्ने ।**
**बिंदू य छीयऽपरिणय सगणे वा संकिए तिण्हं ॥६५२॥ नि०**

**भासंत** गाहा । **भाषमाण** ओष्ठसंचारेण पठन् यदि कालं गृह्णाति ततो व्याहन्यते कालः, **मूढो** दिशि अध्ययने वा यदि भवति ततो व्याहन्यते कालः, **शङ्कितो** वा न जानाति किं मया द्रुमपुष्पिका पठिता न वेत्येवंविधायां शङ्कायां व्याहन्यते कालः, **इन्द्रियविषयाश्चामनोज्ञा** अशोभनाः शब्दादयो यदि **भवन्ति** ततो व्याहन्यते कालः, "[D]सोइंदिए [२]छिंद भिंद मारेह विस्सरं बालाईणं रोवणं वा, रूवं वा पिच्छति पिसायाईणं बीहावणयं, गंधे य दुरभिगंधे, रसो वि तत्थेव, जत्थ गंधो तत्थ रसो, फासो बिंदुलेट्ठुपहारादि" एवमेतेष्वमनोज्ञेषु विषयेषु सत्सु व्याघातो भवति, तथा **बिन्दुर्वा** यद्युपरि पतति शरीरस्योपधेर्वा कालमण्डलके वा ततो व्याहन्यते, तथा **क्षुतं** यदि भवति ततो [३]व्याहन्यते, **अपरिणत** इति कालग्रहणभावोऽपगतोऽन्यचित्तो वा जातस्ततश्च व्याहन्यते कालः,तथा **शङ्कितेना**पि गर्जितादिना व्याहन्यते कालः, कथम् ? यद्येकस्य साधोर्गर्जितादिशङ्का भवति ततो न व्याहन्यते कालः, द्वयोरपि शङ्किते न व्याहन्यते कालः, त्रयाणां तु यदि शङ्का गर्जितादिजनिता भवति ततो व्याहन्यते, तच्च **स्वगणे** स्वगच्छे **त्रयाणां** यदि **शङ्कितं** भवति, न परगणे, ततो

---

A. लोकस्योद्योतकरान् । B. कथं नु कुर्यात् श्रामण्यम् । C. श्रामण्यपूर्वकपर्यन्तं कर्षति, दण्डधार्यपि उत्तराभिमुखं संस्थितस्य वामपार्श्वे पूर्वदिशाभिमुखोऽग्रतस्तिर्यगाकाशे दण्डकं धारयत्युर्ध्वस्थितः, पुनस्तस्य पूर्वादिषु दिक्षु चलतो दण्डधार्यपि तथैव भ्रमति ।

D. श्रोत्रेन्द्रिये छिन्धि, भिन्धि, मारेह, विस्वरं बालादिनां रुदनं वा, रूपं वा पश्यति पिशाचादीनां भीषणकम् गन्धश्च दुरभिगन्धः, रसोऽपि तत्रैव, यत्र गन्धस्तत्र रसः, स्पर्शो बिन्दुलेष्टुप्रहारादिः ।

१. गवायसे दंडं धरेति उद्ध० । क. २. छिंदह भिंदह मारेह । क. ३. भज्यते कालः । दा०

व्याहन्यते ॥६५२॥

इदानीमस्या एव गाथाया भाष्यकारः किञ्चिद्व्याख्यानयन्नाह –

**१०५० मूढो व दिसऽज्झयणे भासंतो वावि गिण्हइ न सुज्झे ।**
**अन्नं व दिसज्झयणं संकंतोऽणिट्ठविसए वा ॥३०८॥ निभा०**

**मूढो व** गाहा । **मूढो** यदा **दिशि** भवत्य**ध्ययने वा** तदा व्याहन्यते, **भाषमाणो वा** ओष्ठसञ्चारेण यदि **गृह्णाति** कालं ततो **न शुद्ध्यति, अन्यां वा दिशं** सङ्क्रान्तो मोहात्, **अध्ययनं वाऽन्यत् सङ्क्रान्तः** द्रुमपुष्पिकां मुक्त्वा "[A]सामन्नपुव्वए गओ, उत्तराए दिसाए दक्खिणं गतो," यद्वाऽ**न्यां दिशं शङ्कमानोऽन्यद्वाऽध्ययनं शङ्कमानो** यदा भवति तदा न शुद्ध्यति, **अनिष्टे वा**ऽशोभने वा शब्दादि**विषय**सन्निधाने व्याहन्यते कालः, "[B]ततो आवस्सियं काऊण नीसरति कालमंडलाओ," एवं गृहीतेऽपि काले यदि कालमण्डलान्निर्गच्छन्नावश्यकादि न करोति ततो व्याहन्यत एव काल इति ॥३०८॥

किञ्च –

**१०५१ जो वच्चंतंमि विही आगच्छंतंमि होइ सो चेव ।**
**जं एत्थं नाणत्तं तमहं वुच्छं समासेणं ॥६५३॥ नि०**

**जो वच्चंतम्मि** गाहा । **य** एव प्रथमं वसते**र्व्रजतो विधि**रुक्तस्तद्यथा–"[C]यदि कविहसियं वा उक्का वा पडति गज्जति वा, एवमाईहिं उवघाओ गहियस्स वि कालस्स होइ आगच्छंतस्स वसहिं," ततश्च यो विधिर्व्रजतः [१]कालमभिग्रहणार्थमुक्त **आगच्छतो**ऽपि पुनर्वसतौ **स एव विधिर्भवति, यत्पुनरत्र** [२]वसतिं प्रविशतो **नानात्वं** भेदस्**तदहं** 'नानात्वं **वक्ष्ये समासतः** संक्षेपेण ॥६५३॥

इदानीं नानात्वं प्रतिपादयन्नाह –

**१०५२ निसीहिया नमोक्कारं [३]आसज्जावडण पडण जोइक्खे ।**
**अपमज्जिय भीए वा छीए छिन्ने व कालवहो ॥६५४॥ नि०**

---

A. श्रामण्यपूर्वकं गतः, उत्तराया दिशो दक्षिणां गतः । B. तत आवश्यिकां कृत्वा निस्सरति कालमण्डलात् ।
C. यदि कपिहसितं वा उल्का वा पतति गर्जति वा, एवमादिभिरुपघातो गृहीतस्यापि कालस्य भवत्यागच्छतो वसतिम् ।

१. कालभूमावुक्तः दा० २. वसतौ प्र० दा० ३. आसज्ज अकरण ह० हे०

**णिसीहिया** गाहा । कालं गृहीत्वा गुरुसकाशे प्रविशन् यदि **निषीधिकां** न करोति ततः कालव्याघातः, तथा **नमोक्कारं** "[A]नमो खमासमणाणं ति ।" एवं यदि प्रविशन्न भणति ततो गृहीतोऽपि कालो व्याहन्यते, तथा **आसज्जा**सज्ज त्येवं तु यदि न करोति ततो व्याहन्यते गृहीतोऽपि, तथा साधोः कस्यचि**दावडणे** [1]आभिट्टणे कालो व्याहन्यते, **पतनं** लेष्ट्वादेरात्मनो वा, **ज्योतिः**स्पर्शे वा व्याहन्यते, तथा यदि **प्रमार्जयन् न** प्रविशति ततश्च व्याहन्यते कालः, **भीत**स्त्रस्तो **वा** यदि भवति तथापि व्याहन्यते, **क्षुते** वा व्याहन्यते, **छिन्ने** त्ति **वा** यदि मार्जारश्वादिस्तिरश्चीनं छिन्दन् व्रजति, ततश्चैभिरनन्तरोदितैः **कालस्य वधो** भङ्गो भवतीति ॥६५४॥

**१०५३ आगम्म इरियावहिया मंगल आवेयणं च मरुनायं ।**
**सव्वेहि वि पट्ठविए पच्छा करणं अकरणं वा ॥६५५॥ नि०**

**आगम्म** गाहा । **आगत्य** च गुरुसमीप**मीर्यापथिकां** प्रतिक्रामति, कायोत्सर्गं चाष्टोच्छ्वासं पञ्चनमस्कारं चिन्तयति, तेनैव चोत्सारयति, **मङ्गल**मिति पञ्चनमस्कार उच्यते, तत ईर्यापथिकां प्रतिक्रम्य गुरोरा**वेदयति** निवेदयति कालमित्यर्थः । अत्र **मरुओ** बंभणो तेन **ज्ञातं** दृष्टान्तः, "[B]तं जहा—कम्हि वि पट्टणे धिज्जाइआणं दाणं राइणा दिन्नं, तेसिं च घोसावियं-जो सामन्नो सो गेण्हउ आगंतूणं भागं तत्थ, एवं हक्कारिए जो आगतो तेण लद्धो भागो, जो पुण गामाईसु गतो सो चुक्को, एवं साहू वि दंडधारिणा घोसिए जे उवउत्ता ठिया णिवेदिए य काले जेहिं सज्झाओ पट्ठवितो ताणं सज्झाओ दिज्जइ, जे पुण विकहादिणा ठिया ताणं सज्झायकरणं न दिज्जइ ।" एतदेवाह—**सर्वैः** साधुभिः स्वाध्याये **प्रस्थापिते** सति **पश्चा**त्तेभ्यः स्वाध्याय**करणं** दीयते । ये तु पुनः कालग्रहणवेलायामुपयुक्ता न स्थिताः, न च स्वाध्यायप्रस्थापनवेलायां सन्निहिता आसन् तेभ्यः स्वाध्याय**करणं न** दीयते ॥६५५॥

---

A. नमः क्षमाश्रमणेभ्य इति ।

B. तद्यथा-कस्मिंश्चिदपि पत्तने धिग्जातीयानां दानं राज्ञा दत्तम्, तेषां च घोषापितम्, यः सामान्यः स गृह्णातु आगत्य भागं तत्र, एवमाकारिते य आगतस्तेन लब्धो भागः, यः पुनर्ग्रामादिषु गतः स भ्रष्टः, एवं साधुरपि दण्डधारिणा घोषिते य उपयुक्ताः स्थिता निवेदिते च काले यैः स्वाध्यायः प्रस्थापितस्तेभ्यः स्वाध्यायो दीयते, ये पुनर्विकथादिना स्थितास्तेभ्यः स्वाध्यायकरणं न दीयते ।

१. अब्भिडणे क

इदानीं मरुककथानकमुपसंहरन्नाह –

**१०५४ सन्निहियाण वडारो पट्ठविय पमाइ नो दए कालं ।**
**बाहिट्ठिए पडियरए पविसइ ताहे य दंडधरो ॥६५६॥ नि०**

**सन्निहिता** गाहा । **सन्निहितानां** त्रैविद्यब्राह्मणानां **वडारो वण्टक** आकारणमाह्वानं यथा सन्निहितानाम्, ये तु नागतास्तेषां न वण्टको विभागो जातः, एवमत्रापि **पट्ठविय** त्ति स्वाध्याय**प्रस्थापनं** यैः कृतं तेभ्यो दीयते स्वाध्यायः, ये तु पुनः **प्रमादिन**स्तेभ्यो **न दीयते काल** इति, काले गृहीते स्वाध्यायो भवति, पुनश्च निवेदिते सति काले पुनर्बहिरन्यः प्रतिजागरकः प्रेष्यते, पुनश्च तत्र **बहिःस्थिते प्रतिजागरके** सति ततो **दण्डधारी प्रविशतीति** ॥६५६॥

**१०५५ पट्ठविय वंदिए [१]ताहे पुच्छती किं सुयं भंते ! ।**
**ते वि य कहंति सव्वं जं जेण सुयं व दिट्ठं वा ॥६५७॥ नि०**

**पट्ठविय** गाहा । पुनश्चासौ **प्रस्थापित**स्वाध्यायो **वन्दित**गुरुश्च सन् **तदा** साधून् **पृच्छति** दण्डधारी, यदुत हे **भदन्त** ! भवतां मध्ये केन **किं श्रुतम् ? तेऽपि च** साधवः **कथयन्ति सर्वं यद्येन श्रुतं** गर्जितादि **दृष्टं वा** कपिमुखादि ॥६५७॥

पुनश्च तत्र यदि केषाञ्चिद्गर्जितादिशङ्का भवति ततश्च को विधिरित्यत आह –

**१०५६ एक्कस्स दोण्ह वा संकियंमि कीरइ न कीरए तिण्हं ।**
**सगणंमि संकिए परगणंमि गंतुं न पुच्छंति ॥६५८॥ नि०**

**एक्कस्स** गाहा । **एकस्य** गर्जितादिशङ्किते, **द्वयोर्वा शङ्किते क्रियते** स्वाध्यायः, **त्रयाणां** पुनर्गर्जिताद्या**शङ्कायां न क्रियते** स्वाध्यायः, एवं यदि स्वगणे शङ्का भवति ततश्चैवंविधायां **स्वगणे शङ्कायां** सत्यां **परगणे**ऽन्यगच्छे **गत्वा न पृच्छन्ति,** किं कारणम् ? यत इह कदाचित्स कालग्राहकः साधू रुधिरादिनाऽऽयुक्त आसीत् ततश्च देवता कालं शोधयितुं न ददाति तत्र परगणे नैवम्, अथवा परगण एव कदाचिद[२]ायुक्तः कश्चिद्भवति, इह तु नैवम्, तस्मात्परगणो न प्रमाणमिति ॥६५८॥

इदानीं यदुक्तमासीत् – "कालचतुष्के नानात्वं वक्ष्यामः ।"(नि.६५०) तत्प्रदर्श-यन्नाह –

---

१. वा ताहे ह० हे० २. ०दनायुक्तः क, ख

**१०५७ कालचउक्के नाणत्तयं तु [१] पादोसियंमि सव्वे वि ।**
**समयं पट्ठवयंती सेसेसु समं व विसमं वा ॥६५९॥ नि०**

**काल** गाहा । कालानां चतुष्कं कालचतुष्कं तत्रैकः प्रादोषिकः, द्वितीयोऽर्द्धरात्रिकः, तृतीयो वैरात्रिकः, चतुर्थः प्राभातिकः काल इति, एतस्मिन् **कालचतुष्के नानात्वं** प्रदर्श्यते, तत्र **प्रादोषिक**काले **सर्व एव समकं** स्वाध्यायं **प्रस्थापयन्ति, शेषेषु** तु त्रिषु कालेषु **समकमे**ककालं स्वाध्यायं प्रस्थापयन्ति **विषमं वा** न युगपत् स्वाध्यायं प्रस्थापयन्तीति ॥६५९॥

इदानीं चतुर्णामपि कालानां कनकपतने सति यथा व्याघातो भवति तथा प्रदर्शयन्नाह –

**१०५८ इंदियमाउत्ताणं हणंति कणगा उ सत्त उक्कोसं ।**
**वासासु य तिन्नि दिसा [२] उउबद्धे तारगा तिन्नि ॥६६०॥ नि०**

**इंदिय** गाहा । **इन्द्रियैः** श्रवणादिभि**रुपयुक्तानां घ्नन्ति** व्याघातं कुर्वन्ति कालस्य **कनका उत्कृष्टेन सप्त**, एतच्च वक्ष्यति, **वासासु य तिन्नि दिस** त्ति **वर्षासु** वर्षाकाले प्राभातिके काले गृह्यमाणे **तिसृषु दिक्षु** यद्यालोकः शुद्ध्यति चक्षुषो न कुड्यादिभिरन्तरितस्ततो गृह्यत एव कालः, अन्यथा व्याघात इति, एतद्विशेषविषयं द्रष्टव्यम्, शेषेषु त्रिष्वाद्येषु कालेषु चतसृष्वपि दिक्षु [३] चक्षुष आलोको यदि शुद्ध्यति ततो [४] गृह्यते कालो नान्यथा, एतच्च प्रकटीकरिष्यति । **उउबद्धे तारगा तिण्णि** त्ति **ऋतुबद्धे** शीतोष्णकालयोराद्येषु त्रिषु कालेषु यदि मेघच्छन्नेऽपि **तारकात्रयं** दृश्यते ततः शुद्ध्यति कालग्रहणम्, यदि पुनस्तिस्रोऽपि न दृश्यन्ते ततो न ग्राह्यः, प्राभातिकस्तु काल ऋतुबद्धे मेघैरदृश्यमानायामप्येकस्यामपि तारकायां गृह्यते कालः, वर्षाकाले त्वेकस्यामपि तारकायामदृश्यमानायां चत्वारोऽपि काला गृह्यन्ते ॥६६०॥

इदानीमेनामेव गाथां भाष्यकृद्व्याख्यानयति –

**१०५९ कणगा हणंति कालं तिपंचसत्तेव घिंसिसिरवासे ।**
**उक्का उ सरेहागा रेहारहितो भवे कणगो ॥३०९॥ निभा०**

**कणगा** गाहा । **कनका घ्नन्ति कालं त्रयः पञ्च सप्त** यथासङ्ख्येन

---

१. पाओसियाए ह० २. उडुबद्धे हे० ३. चक्षुषा क ४. गृह्यते वर्षासु कालो ना० क, ख.

**घिंसिसिरवासे** ग्रीष्मकाले त्रयः कनकाः कालं व्याघ्नन्ति, **शिशिर**काले पञ्च घ्नन्ति कालम्, **वर्षा**काले सप्त घ्नन्ति कालम् । इदानीमुल्काकनकयोर्लक्षणं प्रतिपादयन्नाह— **उल्का सरेखा भवति,** एतदुक्तं भवति—निपततो ज्योतिष्पिण्डस्य रेखायुक्तस्य उल्केत्याख्या, स एव च **रेखारहितो** ज्योतिष्पिण्डः **कनको**ऽभिधीयते ॥३०९॥

**१०६० सव्वे वि पढमजामे दोन्नि उ वसभाण आइमा जामा ।**
**तइओ होइ गुरूणं [१]चउत्थओ होइ सव्वेसिं ॥६६१॥ नि०**

**सव्वे वि** गाहा । तस्मिंश्च प्रादोषिके काले गृहीते सति **सर्व एव** साधवः **प्रथमयामं** यावत्स्वाध्यायं कुर्वन्ति, **द्वौ त्वाद्यौ यामौ वृषभाणां** भवतो गीतार्थानाम्, ते हि सूत्रार्थं चिन्तयन्तस्तावत्तिष्ठन्ति यावत्प्रहरद्वयमतिक्रान्तं भवति तृतीया च पौरुष्यवतरति, ततः "[A]ते चैव कालं गेण्हन्ति अड्डरत्तियं । उवज्झायाईणं संदिसावित्ता ततो कालं घेत्तूणं आयरियं [२]उट्ठवेंति, वंदणयं दाऊण भणंति—सुद्धो कालो । आयरिया भणंति—तहत्ति, पच्छा ते वसभा सुयंति, आयरिओ वि बितियं उट्ठावेत्ता कालं पडियरावेइ, ताहे एगचित्तो सुत्तत्थं चिंतेइ जाव वेरत्तियस्स कालस्स बहुदेसकालो, ताहे तइए पहरे अतिक्कंते सो कालपडिलेहगो आयरियस्स संदेसावेत्ता वेरत्तियं कालं गेण्हइ, आयरिओ वि कालस्स पडिक्कमित्ता सुवति, ताहे जे सोइयल्लया साहू आसी ते उट्ठेऊण वेरत्तियं सज्झायं करेंति जाव पाभातियकालगहणवेला जाया ।

ततो एगो साहू उवज्झायस्स वा अण्णस्स वा संदिसावेत्ता पाभाइयं कालं गेण्हइ, जहा नवण्हं कालगहणाणं वेला पहुच्चति सज्झाए आरतो चेव पुणो ताहे साहुणो सव्वे उट्ठेंति, किह पुण नव काला पडिलेहिज्जंति, पढमो उवट्ठिओ कालग्गाहो तस्स तिन्नि [३]वारा कालो उवहओ एक्कंमि मंडलए, तओ पुणो बितिओ उट्ठेइ, सो बितिए मंडलए तिन्नि वारा लेइ, लिंतस्स जदि न सुज्झति ततो तइओ साहू

---

A त एव कालं गृह्णन्ति अर्धरात्रिकम् उपाध्यायादीनां संदिश्य ततः कालं गृहीत्वाऽऽचार्यमुत्थापयन्ति वन्दनकं दत्त्वा भणन्ति- शुद्धः कालः, आचार्या भणन्ति- तथेति, पश्चात्ते वृषभाः स्वपन्ति, आचार्योऽपि द्वितीयमुत्थाप्य कालं प्रतिचारयति, तदैकचित्तः सूत्रार्थं चिन्तयति यावद् वैरात्रिकस्य कालस्य बहुदेशकालः, तदा तृतीये प्रहरेऽतिक्रान्ते स कालप्रतिलेखक आचार्यं संदिश्य वैरात्रिकं कालं गृह्णाति, आचार्योऽपि कालं प्रतिक्राम्य स्वपिति, तदा ये सुप्ता साधव आसन् ते उत्थाय वैरात्रिकं स्वाध्यायं कुर्वन्ति यावत् प्राभातिककालग्रहणवेला जाता ।
तत एकः साधुरुपाध्यायस्य वाऽन्यस्य वा संदिश्य प्राभातिकं कालं गृह्णाति, यथा नवानां कालग्रहणानां वेला प्रभवति स्वाध्याय आरत एव पुनस्तदा साधवः सर्वे उत्तिष्ठन्ति, कथं पुनर्नव काला प्रतिलेख्यन्ते, प्रथम उत्थित

१. चउत्थे सव्वे गुरु सुयइ द. २. उट्ठवेंता क. ३. वारा लेंतस्स क, ख

उट्ठेइ, सो वि ततिए मंडलए तिण्णि वारा लेइ, लिंतस्स जदि न सुज्झति ताहे भग्गो कालो, एत्थ लिंताण साहूण नववारावसाणे पभा फुट्टति, ततो तीए वेलाए पडिक्कमन्ति त्ति ।

अह तिन्नि कालगाहिणो नत्थि किन्तु दुवे चेव, ततो इक्को पढमं पढमे कालमंडलए तिण्णि वाराउ लेऊण ततो बितिए दो वारे गिण्हइ, ततो बिइओ साहू बिइए चेव कालमण्डलए एक्कं वारं लेऊण ततो तइए मण्डलए तिन्नि वाराओ गिण्हइ, एवं नव वारा हवंति । अहवा पढमे चेव कालमण्डलए एगो चत्तारि वाराउ लेइ । बितिओ पुण बितिए कालमण्डलए दो वाराउ लेइ । तँतिए तिन्नि वाराउ लेइ सो चेव बितिओ । एवं वा दोण्हं साहूणं नववाराउ भवंति । अहवा पढमो पढमे कालमंडलए तिन्नि वाराओ लेऊण बिइए मंडलए एक्कं वारं गिण्हइ तओ पुणो बिइओ बिइए चेव मंडलए दो वारे लेऊण ततिए मंडलए तिन्नि वारा लेइ एवं नव वाराओ हवंति ।

अह एक्को चेव कालग्गाही ततो अववाएण सो च्चेव पढमे तिन्नि वारा लेइ, पुणो सो चेव बितिए मंडले तिन्नि वारा लेइ, पुणो सो चेव ततिए मंडलए तिन्नि वाराओ लेइ । एसो पाभाइयकालस्स विही । एवं च सति कालस्स पडिक्कमित्ता सुवंति, एगो न पडिक्कमति, सो अववाएण कालं निवेदिस्सइ" ॥६६१॥

इदानीं यदुक्तं 'वासासु य तिण्णि दिस'त्ति (नि. ६६०) व्याख्यानयन्नाह –

---

कालग्राही तस्य तिस्रो वारा काल उपहत, एकस्मिन् मण्डलके, ततः पुनर्द्वितीय उत्तिष्ठति, स द्वितीये मण्डलके तिस्रो वारा गृह्णाति, गृह्णतो यदि न शुध्यति ततस्तृतीयः साधु उत्तिष्ठति, सोऽपि तृतीये मण्डलके तिस्रो वारा गृह्णाति गृह्णतो यदि न शुध्यति तदा भग्नः कालः, अत्र गृह्णतां साधूनां नववारावसाने प्रभा स्फुटति, ततस्तया वेलया प्रतिक्रामन्तीति ।

अथ त्रयः कालग्राहिणो न सन्ति किन्तु द्वावेव, तत एकः प्रथमं प्रथमकालमण्डलके तिस्रो वारा गृहीत्वा ततो द्वितीये द्वे वारे गृह्णाति, ततो द्वितीयः साधुर्द्वितीय एव कालमण्डलक एकं वारं गृहीत्वा ततस्तृतीये मण्डले तिस्रो वारा गृह्णाति, एवं नववारा भवन्ति । अथवा प्रथम एव कालमण्डलके एकश्चतस्रो वारा गृह्णाति । द्वितीयः पुनर्द्वितीये कालमण्डले द्वे वारे गृह्णाति तृतीये तिस्रो वारा गृह्णाति स एव द्वितीयः । एवं वा द्वयोः साध्वोर्नव वारा भवन्ति ।

अथवा प्रथमः प्रथमके कालमण्डलके तिस्रोवारा गृहीत्वा द्वितीये मण्डलके एकं वारं गृह्णाति, ततः पुनर्द्वितीयो द्वितीय एव मण्डलके द्वे वारे गृहीत्वा तृतीये मण्डलके तिस्रो वारा गृह्णाति एवं नववारा भवन्ति ।

अथ एक एव कालग्राही ततोऽपवादेन स एव प्रथमे तिस्रो वारा गृह्णाति, पुनः स एव द्वितीये मण्डले तिस्रो वारा गृह्णाति, पुनः स एव तृतीये मण्डलके तिस्रो वारा गृह्णाति, एष प्राभातिककालस्य विधिः, एवं च सति कालं प्रतिक्राम्य स्वपन्ति, एको न प्रतिक्रामति, सोऽपवादेन कालं निवेदयिस्यति ।

**१०६१ वासासु य तिण्णि दिसा हवंति पाभाइयम्मि कालंमि ।**
**सेसेसु तीसु चउरो उउंमि चउरो चउदिसिं पि ॥३१०॥ निभा०**

**वासासु य** गाहा । **वर्षासु तिस्रो दिशो** यदि कुड्यादिभिस्तिरोहिता न **भवन्ति** ततः **प्राभातिककाल**ग्रहणं क्रियते, **शेषेषु त्रिषु** कालेषु **चतस्रो**ऽपि दिशा यदि कुड्यादिभिस्तिरोहिता न भवन्ति ततो गृह्यन्ते कालाः, नान्यथा । **उउंमि चउरो चउदिसिं पि** त्ति ऋतुबद्धे काले **चत्त्वारो**ऽपि काला गृह्यन्ते यदि **चतस्रो**ऽपि दिशोऽतिरोहिता भवन्ति, नान्यथा । एतदुक्तं भवति–चतसृष्वपि दिक्षु यद्यालोको भवति ततश्चत्वारोऽपि काला गृह्यन्ते ॥३१०॥

इदानीं उउबद्धे तारका तिण्णि त्ति (नि.६६०) व्याख्यानयन्नाह –

**१०६२ तिसु तिण्णि तारगाओ उडुंमि पाभाइए [1]अदिट्ठे वि ।**
**वासासु अतारागा चउरो छन्ने निविट्ठो वि ॥३११॥ निभा०**

**तिसु** गाहा । **त्रिष्वाद्येषु** कालेषु घनसंछादितेऽपि **ऋतुबद्धे** काले यदि **तारकास्तिस्रो** दृश्यन्ते ततस्त्रयः काला आद्या गृह्यन्त इति । **पाभाइए अदिट्ठे वि** त्ति **प्राभातिके** काले गृह्यमाणे ऋतुबद्धे घनाच्छादिते यदि तारकत्रितयमपि न दृश्यते तथापि गृह्यते काल इति । **वर्षा**काले पुनर्घनाच्छादितेऽपिऽ**दृष्टतारका** एव **चत्वारो**ऽपि काला गृह्यन्ते । **छन्ने** न सावकाश एते चत्वारोऽपि काला गृह्यन्ते । **निविट्ठो वि** त्ति प्राभातिके त्वयं विशेषः-**उपविष्टोऽपि** छन्ने स्थान उद्ध्र्वस्थानस्यासति गृह्णाति ॥३११॥

एतदेव व्याख्यानयन्नाह –

**१०६३ ठाणासति बिंदूसु य गेण्हइ बिट्ठो वि पच्छिमं कालं ।**
**पडियरइ [2]बाहि एक्को एक्को अंतट्ठिओ गिण्हे ॥६६२॥ नि०**

**ठाणासति** गाहा । **स्थानस्यासति**, एतदुक्तं भवति–यद्यूद्ध्र्वस्थितो न शक्नोति ग्रहीतुं कालं ततः स्थानाभावे सति तोय**बिन्दुषु** वा पतत्सु सत्सु **गृह्णात्युपविष्टः पश्चिमं** प्राभातिकं **कालम्**, तथा **प्रतिजागरणं** करोति एको द्वारस्थित ओलिकापाता-

---

१. अदिट्ठंमि ह० हे० २. वावि ह० ।

देरधस्तात् स्थितः साधुः, **एकश्च** साधु**रन्तो** मध्ये **स्थितो गृह्णाति** कालमिति ॥६६२॥

इदानीं कः कालः कस्यां दिशि प्रथमं गृह्यते ? इत्येतत् प्रदर्शयन्नाह –

**१०६४ पाओसिय अड्ढरत्ते उत्तरदिसि पुव्व पेहए कालं ।**
**वेरत्तियंमि भयणा पुव्वदिसा पच्छिमे काले ॥६६३॥ नि०**

**पाओसिय** गाहा । **प्रादोषिक अर्द्धरात्रिकश्च कालः**, द्वावप्येतावु**त्तरस्यां दिशि पूर्वं** प्रथमं **प्रत्युपेक्षते, वैरात्रिके** तृतीयकाले च **भजना** विकल्पः, कदाचिदु**त्तरस्यां दिशि** प्रथमं गृह्णाति कदाचिच्च **पूर्वस्यां दिशि** व्यवस्थितो गृह्णातीति, **पश्चिमे** तु प्राभातिके **काले पूर्वस्यामेव दिशि** प्रथमं गृह्णाति पुनर्दक्षिणादाविति ॥६६३॥

**१०६५ सज्झायं काऊणं पढमबितियासु दोसु [१]जागरणं ।**
**अन्नं वावि गुणंती सुणंति झायंति वाऽसुद्धे ॥६६४॥ नि०**

**सज्झायं** गाहा । एवं यदि शुद्ध्यति प्रादोषिकः कालस्ततः **स्वाध्यायं कृत्वा प्रथमद्वितीय**पौरुष्यो**र्जागरणं** कुर्वन्ति साधवः । अथासौ प्रादोषिकः कालो न शुद्धस्त**तोऽन्य**दुत्कालिकं **गुणयन्ति शृण्वन्ति ध्यायन्ति वाऽशुद्धे** सति । "[A]इण्हि अववाओ भण्णइ-जति पाओसिओ सुद्धो ततो अड्ढरत्तिओ । जइवि न सुज्झइ तह वि तं चेव पवेयइत्ता सज्झायं कुणंति, एवं जइ वेरत्तिओ न सुज्झइ ततो अणुग्गहत्थं जइ अड्ढरत्तिओ सुद्धो तओ तं चेव पवेयइत्ता सज्झायं कुणंति, एवं जइ पाभाइओ न सुद्धो ततो जइ वेरत्तिओ सुद्धो तओ तं चेव निवेयइत्ता सज्झायं कुणंति ।" एवं द्रव्यक्षेत्रकालभावा ज्ञातव्या इति ॥६६४॥

**१०६६ जो चेव य सुवणविही णेगाणं वन्निओ वसहिदारे ।**
**सो चेव इहं पि भवे नाणत्तं नवरि सज्झाए ॥६६५॥ नि०**

**जो चेव य** गाहा । **य एव शयितव्यविधिः** पूर्वमे**कानेकानां** प्रत्युपेक्षकाणां **व्यावर्णितो वसतिद्वारे स एवात्रापि** द्रष्टव्यः, **नानात्वं** यदि परमिदम्, यदुत

---

A. 'इदानीमपवादो भण्यते- यदि प्रादोषिक शुद्धः, ततोऽर्धरात्रिको यद्यपि न शुध्यति तथापि तमेव प्रवेदयित्वा स्वाध्यायं कुर्वन्ति, एवं यदि वैरात्रिको न शुध्यति, ततोऽनुग्रहार्थं यद्यर्धरात्रिकः शुद्धः, ततस्तमेव प्रवेदयित्वा स्वाध्यायं कुर्वन्ति, एवं यदि प्राभातिको न शुद्धः, ततो यदि वैरात्रिकः शुद्धः, ततस्तमेव निवेदयित्वा स्वाध्यायं कुर्वन्ति ।

१. जागरणा ह० हे०

**स्वाध्यायं** कृत्वा स्वपन्तीति ॥६६५॥

**१०६७ एसा सामायारी कहिया भे ! धीरपुरिसपन्नत्ता ।**
**एत्तो उवहिपमाणं वोच्छं सुद्धस्स जह धरणा ॥६६६॥ नि०**

**पिंडदारं समत्तं ।**

**एसा** गाहा । सुगमा, उक्तं पिण्डद्वारम्, इदानीमुपधिद्वारप्रतिपादनायाह—नवरं **शुद्धस्य** वस्त्रादेर्**यथा धरणं** भवति तथा **वक्ष्ये** ॥६६६॥

**तत्त्वभेदपर्यायैर्व्याख्येति** न्यायात् पर्यायान्प्रतिपादयन्नाह –

**१०६८ उवही उवग्गहे संगहे य तह [1]पग्गहोग्गहे चेव ।**
**भंडग [2]उवगरणे वि य करणे वि य होंति एगट्ठा ॥६६७॥ नि० । दारगाहा ।**

**उवही** गाहा । उपदधातीत्**युपधिः**, किमुपदधाति ? द्रव्यं भावं च, द्रव्यतः शरीरं भावतो ज्ञानदर्शनचारित्राण्युपदधाति, उपगृह्णातीत्**युपग्रहः**, संगृह्णातीति **संग्रहः**, प्रकर्षेण गृह्णातीति **प्रग्रहः**, अवगृह्णातीत्**यवग्रहः**, तथा **भण्डकमु**च्यते उपधिः, तथा **उपकरणमु**पकरोतीत्युपकरणम्, तथा करोतीति **करणमु**च्यत उपधिरिति, एते **एकार्थाः** ॥६६७॥

इदानीं भेदतः प्रतिपादयन्नाह –

**१०६९ ओहे उवग्गहंमि य दुविहो उवही उ होइ नायव्वो ।**
**एक्केक्को वि य दुविहो गणणाए पमाणतो चेव ॥६६८॥ नि०**

**ओहे** गाहा । **उपधिर्द्वि**विधः-**ओघोपधि उपग्रहोपधिश्चे**ति, एवं **द्विविधो विज्ञेयः**, इदानीं स **एवैकैको द्विविधः**, कथम् ? **गणना**प्रमाणेन प्रमाण**प्रमाणतश्च**, एतदुक्तं भवति-ओघोपधेर्गणनाप्रमाणेन प्रमाणप्रमाणेन च द्वैविध्यम्, अवग्रहोपधेरपि गणनाप्रमाणेन प्रमाणप्रमाणेन च द्वैविध्यम्, तत्र ओघोपधिर्नित्यमेव यो गृह्यते, अवग्रहावधिस्तु कारण आपन्ने संयमार्थं यो गृह्यते सोऽवग्रहावधिरिति, ओघोपधेर्गणनाप्रमाणेन प्रमाणमेकद्व्यादिभेदं वक्तव्यं प्रमाणप्रमाणं च वक्तव्यं दीर्घपृथुतया, तथाऽवग्रहोपधेरप्येकद्व्यादिगणनाप्रमाणं प्रमाणप्रमाणं च दीर्घपृथुत्वद्वारेण वक्तव्यमिति ॥६६८॥

---

१. वग्गहो० ह० हे० २. उवगरणे वा ह० हे०

तत्र ओघोपधिर्जिनकल्पिकानां प्रतिपाद्यते, तत्रापि गणनाप्रमाणतः प्रतिपादयन्नाह—

**१०७० पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया ।**
**पडलाइं रयत्ताणं च गोच्छओ पायनिज्जोगो ॥६६९॥ नि०**

**१०७१ तिन्नेव य पच्छागा रयहरणं चेव होइ मुहपोत्ती ।**
**एसो दुवालसविहो उवही जिणकप्पियाणं तु ॥६७०॥ नि०**

**पत्तं** गाहा । **पात्रकं पात्रकबन्ध**स्तथा **पात्रकस्थापनं पात्रकेसरिका** पात्रकमुखवस्त्रिका तथा **पटलानि रजस्त्राणं गोच्छको**ऽयं **पात्रनिर्योगः** पात्रकपरिकर इत्यर्थः ॥६६९॥

**तिण्णेव य** गाहा । **त्रयः प्रच्छादकाः** कल्पा इत्यर्थः, तथा **रजोहरणं मुखवस्त्रिका** चेति, **एष द्वादशविध उपधिर्जिनकल्पिकानां** भवति ॥६७०॥

इदानीं स्थविरोपधिं गणनाप्रमाणतः प्रतिपादयन्नाह –

**१०७२ एए चेव दुवालस मत्तग अइरेगचोलपट्टो य ।**
**एसो चउद्दसविहो उवही पुण थेरकप्पम्मि ॥६७१॥ नि०**

**एते चेव** गाहा । **एत एव द्वादश** जिनकल्पिकसत्काः पात्रकाद्या मुखवस्त्रिका-पर्यन्ता उपध्यवयवा भवन्ति स्थविराणां स्थविरकल्पे**ऽतिरिक्तस्तु मात्रकश्चोलपट्टकश्च** भवति, **एष चतुर्दशविध उपधिः स्थविरकल्पे** भवति ॥६७१॥

इदानीं सङ्ग्रहगाथया सर्वमेवैतदुपसङ्ग्रहन्नाह –

**१०७३ जिणा बारसरूवाइं थेरा चउद्दसरूविणो ।**
**अज्जाणं पन्नवीसं तु अओ उड्ढं उवग्गहो ॥६७२॥ नि०**

**जिणा** गाहा । **जिनानां** जिनकल्पिकानां **द्वादशरूपाण्यु**क्तलक्षणानि भवन्ति, **स्थविराणां चतुर्दशरूपाण्यु**क्तलक्षणानि भवन्ति **आर्याणां** भिक्षुणीनां **पञ्चविंशत्य**-वयव उपधिरोघतः, स च वक्ष्यमाणः, **अत ऊर्द्ध्वमु**क्तप्रमाणात् सर्वेषामेव य उपधिर्भवति स **औपग्रहिको**[१] वेदितव्यः ॥६७२॥

इदानीं स जिनकल्पिकोपधिः स्थविरकल्पोपधिश्च सर्व एव त्रिविधो भवति, तस्योपधेर्मध्ये कानिचिदुत्तमान्यङ्गानि कानिचिज्जघन्यानि कानिचिन्मध्यमानि, तत्र

१. उपग्रहो वेदितव्यः । क

जिनकल्पिकानां तावत्प्रतिपादयन्नाह –

**१०७४ तिन्नेव य पच्छागा पडिग्गहो चेव होइ उक्कोसो ।**
**गोच्छग पत्तगठवणं मुहणंतग केसरि जहन्नो ॥६७३॥ नि०**

**तिण्णेव** गाहा । **त्रयः प्रच्छादकाः** कल्पा इत्यर्थः, **पतद्ग्रहश्चे**त्येष जिनकल्पिकोपधिमध्ये **उत्कृष्ट** उपधिः प्रधानश्चतुर्विधोऽपि, अत्रामूनि प्रधानान्यङ्गानीत्यर्थः। **गोच्छकः पात्रकस्थापनं मुहणन्तकं** मुखवस्त्रिका **पात्रकेसरिका** पात्रकमुखवस्त्रिका चेति, एष जिनकल्पिकावधिमध्ये **जघन्यो**ऽप्रधानश्चतुर्विध उपधिरिति । पात्रकबन्धः पटलानि रजस्त्राणं रजोहरणमित्येष चतुर्विधोऽप्यवधिर्जिनकल्पिकावधिमध्ये मध्यम उपधिर्न प्रधानो नाप्यप्रधान इति । उक्तो जिनकल्पिकानामुत्कृष्टजघन्यमध्यमोपधिरिति ॥६७३॥

इदानीं स्थविरकल्पिकानां प्रतिपादयति, तत्रापि प्रथमं मध्यमावधिं प्रतिपादयन्नाह–

**१०७५ पडलाइं रयत्ताणं पत्ताबंधो तहेव रयहरणं ।**
**मत्तो य [१] पट्टगो वि य थेराणं छव्विहो मज्झो ॥६७४॥ नि०**

**पडलाइं** गाहा । **पटलानि रजस्त्राणं पात्रकबन्धश्च चोलपट्टकश्च रजोहरणं मात्रकं चे**त्येष **स्थविरा**वधिमध्ये **षड्विधो मध्यमा**वधिर्नोत्कृष्टो नापि जघन्य इति। पात्रकं प्रच्छादककल्पत्रयम्, एष चतुर्विधोऽप्युत्कृष्टः प्रधानः स्थविरकल्पिकावधिमध्ये, पात्रकस्थापनकं पात्रकेसरिका गोच्छको मुखवस्त्रिकेत्येष जघन्योपधिः स्थविरकल्पिकावधिमध्ये चतुर्विधोऽपि ॥६७४॥

इदानीमार्यिकाणामोघोपधिं गणनाप्रमाणतः प्रतिपादयति –

**१०७६ पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया ।**
**पडलाइं रयत्ताणं च गोच्छओ पायनिज्जोगो ॥६७५॥ नि०**

**१०७७ तिन्नेव य पच्छागा रयहरणं चेव होइ मुहपोत्ती ।**
**तत्तो य मत्तगो खलु [२] चउदसमो कमढगो चेव ॥६७६॥ नि०**

**१०७८ उग्गहणंतग पट्टे अद्धोरुग चलणिया य बोद्धव्वा ।**
**अब्भिंतरबाहिनियंसणीयं तह कंचुगे चेव ॥६७७॥ नि०**

**१०७९ उक्कच्छिय वेकच्छिय संघाडी चेव खंधकरणी य ।**
**ओहोवहिंमि [३] एए अज्जाणं पन्नवीसं तु ॥६७८॥ नि०**

---

१. पट्टओ या ह० हे० २. चोद्दसमे कमढगे ह० ३. एसा ह०

तत्र गाथाद्वयं पूर्ववद्व्याख्यातं द्रष्टव्यम्, नवरम् आर्यिकाणां कमढकमेतदर्थं भवति यतस्तासां प्रतिग्राहको न भ्रमति तुच्छस्वभावत्वात्, कमढक एव भोजनक्रियां कुर्वन्तीति ॥६७५॥६७६॥६७७॥६७८॥

**[उग्गह गाहा । अवग्रहानन्तकं १५ पट्टः १६ अर्धोरुकं १७ चलनिका १८ च बोद्धव्या । अभ्यन्तरनिवसिनी १९ बाह्यनिवसिनी २० च। तथा कञ्चुककश्चैव २१** ॥ओमाटी. ६७७॥ ]

**[उक्कच्छिय गाहा । उपकक्षिका २२ विकक्षिका २३ सङ्घाटी २४ चैव स्कन्धकरणी च २५ । ओघोपधौ एते पञ्चविंशत्यवयवाः स्युः** । तुरेवार्थे ॥ओमाटी. ६७८॥ ]

**[उग्गहणंतग पट्टो अड्ढोरुअ चलणिया य बोधव्वा ।**
**अब्भिंतर-बाहिणियंसणी य तह कंचुए चेव ॥४०८२॥**
**उक्कच्छिय वेकच्छिय संघाडी चेव खंधकरणी य ।**
**ओहोवहिम्मि एते अज्जाणं पण्णवीसं तु ॥४०८३॥**

पात्रकादीनि त्रयोदशोपकरणानि साधूनामिव द्रष्टव्यानि । चतुर्दशं तु चोलपट्टकस्थाने तासां कमठकं भवति, तच्चाष्टकमयमेकैकं संयतीनां निजोदरप्रमाणेन विज्ञेयम् १४ । तथाऽवग्रहानन्तकं १५, पट्टः १६, अर्द्धोरुकं १७, चलनिका च बोद्धव्या १८, अभ्यन्तरनिवसनी १९, बहिर्निवसनी २०, तथा कञ्चुकश्चैव २१, औपकक्षिकी २२, वैकक्षिकी २३, सङ्घाटी २४, स्कन्धकरणी २५। एवमेतान्योघोपधौ आर्यिकाणां पञ्चविंशतिरुपकरणानि भवन्तीति । [बृ.क.-४०८२-४०८३]]

**१०८० तिपच्छायपडिग्गह संघाडिचउक्कगं च उक्कोसा ।**
**थेरसरिसो जहन्नो सेसो मज्झो उ नायव्वो ॥९१॥ प्र०**

इदानीं भाष्यकारो गाथाद्वयं व्याख्यानयन्नाह –

**१०८१ [1]नावानिभो उग्गहणंतगो उ सो गुज्झदेसरक्खट्ठा ।**
**सो उ पमाणेणेगो घणमसिणो देहमासज्ज ॥३१२॥ निभा०**

**१०८२ पट्टो वि होइ एक्को देहपमाणेण सो उ भइयव्वो ।**
**छायंतोग्गहणंतं कडिबंधं मल्लकच्छा वा ॥३१३॥ निभा०**

**१०८३ अड्ढोरुगो उ ते दो वि गेण्हिउं छायए [2]कडिविभागं ।**
**जाणुपमाणा चलणी असीविया लंखियाए व्व ॥३१४॥ निभा०**

---

१. नाव ह० हे० २. कडीभागं ह० हे०

**१०८४ अंतो नियंसणी पुण लीणतरी जाव अद्धजंघाओ ।**
**बाहिर खलुगपमाणा कडी य दोरेण पडिबद्धा ॥३१५॥ निभा०**

**१०८५ [1]छादेती अणुकुइए उरोरुहे कंचुओ य [2]असीविओ य ।**
**एमेव य उक्कच्छिय सा नवरं दाहिणे पासे ॥३१६॥ निभा०**

**१०८६ वेकच्छिया उ पट्टो कंचुयमुक्कच्छियं च [3]छायंतो ।**
**संघाडीओ चउरो तत्थ दुहत्था उवस्सयंमि ॥३१७॥ निभा०**

**१०८७ दोण्णि तिहत्थायामा भिक्खट्ठा एग एग उच्चारे ।**
**ओसरणे चउहत्था णिसन्नपच्छादणी मसिणा ॥३१८॥ निभा०**

**१०८८ खंधकरणी उ चउहत्थवित्थडा वायविधुतरक्खट्ठा ।**
**खुज्जकरणी उ कीरइ रूववईणं कुडहहेउं ॥३१९॥ निभा०**

**नावा** गाहा । "[A]तत्थ जा सा दुहत्थिया पिहुत्तेणं सा खोमिया होइ, एयाओ य संघाडीओ पडियागारेण होंति, अद्धोरुगो वीडएहिं कीरइ [4]तालुनिभागारो त्ति ॥३१२-३१३-३१४-३१५-३१६-३१७-३१८-३१९॥

[अथैतान्येव विवृणोति –

**नावनिभो उग्गहणंतओ उ सो गुज्झदेसरक्खट्ठा ।**
**सो य पमाणेणेक्को घण-मसिणो देहमासज्ज ॥४०८४॥**

इह 'अवग्रहः' इति योनिद्वारस्य सामयिकी संज्ञा, तस्यानन्तकं-वस्त्रमवग्रहानन्तकम्, गाथायां पुंस्त्वं प्राकृतत्वात्, तच्च 'नौनिभं' मध्यभागे विशालं पर्यन्तभागयोस्तु तनुकं गुह्यदेशरक्षार्थं क्रियते । तच्च गणनया एकम्, आर्त्तव-बीजपातसंरक्षणार्थं च घनं-घनवस्त्रेण, पुरुषसमानकर्कश-स्पर्शपरिहरणार्थं च मसृणं-मसृणवस्त्रेण क्रियते । प्रमाणेन च 'देहं' स्त्रीशरीरमासाद्य तद् विधीयते, देहो हि कस्याश्चित् तनुः कस्याश्चित्तु स्थूलः, ततस्तदनुसारेण विधेयमित्यर्थः ॥४०८४॥]

**[ पट्टो वि होइ एक्को देहपमाणेण सो उ भइयव्वो ।**
**छादंतोग्गहणंतं कडिबद्धो मल्लकच्छा वा ॥४०८५॥**

पट्टोऽपि गणनयैको भवति । स च पर्यन्तभागवर्त्तिवीटकबन्धबद्धः, पृथुत्वेन चतुरङ्गुलप्रमाणः

---

A. तत्र या सा द्विहस्ता पृथुत्वेन सा क्षौमिका भवति, एताश्च सङ्घाट्यः पटिकाकारेण भवन्ति, अर्धोरुकः पीडकैः क्रियते तालुनिभाकार इति ।

१. छाएति द० २. असीवियओ हे० ह० ३. छाएंती, छायंती, ह० हे० ४. नालनिभागा० । क तालुगागारो ख

समतिरिक्तो वा, दैर्घ्येण तु स्त्रीकटीप्रमाणः । स च देहप्रमाणेन भक्तव्यः, पृथुलकटीभागाया दीर्घः सङ्कीर्णकटीभागायास्तु ह्रस्व इत्यर्थः । स चावग्रहानन्तकमुभयान्तयोराच्छादयन् कटीबद्धः सन् मल्लकक्षावद् ज्ञायते । [बृ.क.-४०८५]]

**[ अड्ढोरुगो वि ते दो वि गिण्हिउं छादए कडीभागं ।**
**जाणुप्पमाण चलणी असिव्विया लंखियाए व ॥४०८६॥**

अर्धोरुकोऽपि 'तौ द्वावपि' अवग्रहानन्तक-पट्टावुपरिष्टाद् गृहीत्वा सर्वं कटीभागमाच्छादयति, स च मल्लचलनाकृतिः केवलमूर्वोरन्तरे ऊरुद्वये च कसाबद्धः । चलनिकाऽप्येवमेव, नवरमधो जानुप्रमाणा अस्यूता लङ्खिकापरिधानवत्-वंशाग्रनर्त्तकीचलनकवदसौ मन्तव्या । [बृ.क.-४०८६]]

**[ अंतोनियंसणी पुण लीणतरा जाव अद्धजंघातो ।**
**बाहिर खुलगपमाणा कडीय दोरेण पडिबद्धा ॥४०८७॥**

अन्तर्निवसनी पुनरुपरि कटीभागादारभ्याधोऽर्धजङ्घा यावद् भवति । सा च परिधानकाले लीनतरा परिधीयते, मा भूदनावृता जनोपहास्येति । बहिर्निवसनी पुनरुपरि कटीभागादारभ्याधः 'खुलकप्रमाणा' चरणगुल्फं यावदित्यर्थः, कट्यां च दवरकेण प्रतिबद्धा । [बृ.क.-४०८७]]

[इदमधःशरीरस्य षड्विधमुपकरणमुक्तम् । अथोदूर्ध्वकायोपयोगि कञ्चुकादिकं व्याख्याति –

**छादेति अणुक्कुयिते उरोरुहे कंचुओ असिव्वितओ ।**
**एमेव य उक्कच्छी सा णवरं दाहिणे पासे ॥४०८८॥**

दैर्घ्यमाश्रित्य स्वहस्तेनार्धतृतीयहस्तप्रमाणः पृथुत्वेन तु हस्तमानः 'असीवितः' उभयतः कटीदेशे कसावबद्धः कञ्चुकः क्रियते । स च उरोरुहौ छादयति, किम्भूतौ ? 'अनुत्कुचितौ' श्लथौ; गाढपरिधाने हि विविक्तविभागौ भवेताम् । कक्षायाः समीपमुपकक्षम्, तत्र भवा औपकक्षिकी, अध्यात्मादित्वादिकण्प्रत्ययः, 'एवमेव च' कञ्चुकवत् तस्या अपि स्वरूपं वक्तव्यम् । सा नवरं दक्षिणे पार्श्वे समचतुरस्रा स्वहस्तेन सार्धहस्तप्रमाणा उरोभागं पृष्ठं च प्रच्छादयन्ती वामस्कन्धे वामपार्श्वे च वीटकबद्धा परिधीयते । [बृ.क.-४०८८]]

**[ वेगच्छिया उ पट्टो, कंचुकमुक्कच्छियं च छादेति ।**
**संघाडीओ चउरो, तत्थ दुहत्था उ वसधीए ॥४०८९॥**

औपकक्षिकीविपरीतो वैकक्षिणीनामकः पट्टः कञ्चुकमौपकक्षिकीं च छादयन् वामपार्श्वे परिधीयते। तथोपरि परिभोग्याः सङ्घाटिकाश्चतस्रो भवन्ति-एका द्विहस्ता, द्वे त्रिहस्ते, एका च चतुर्हस्ता; दैर्घ्येण चतस्रोऽपि सार्धहस्तत्रयप्रमाणाश्चतुर्हस्ता वा मन्तव्याः । तत्र 'द्विहस्ता' द्विहस्तविस्तृता सङ्घाटिका वसत्यां परिधीयते, न तां विहाय प्रकटदेहया कदाचिदासितव्यमिति भावः । [बृ.क.-४०८९]]

**[ दुन्नि तिहत्थायामा भिक्खट्ठा एग एग उच्चारे ।**
**ओसरणे चउहत्थाऽनिसन्नपच्छाइणी मसिणा ॥४०९०॥**

ये च द्वे 'त्रिहस्तायामे' त्रिहस्तविस्तृते तयोर्मध्ये एका भिक्षार्थं गच्छन्त्या प्राव्रियते, एका उच्चारभूमिं व्रजन्त्या । तथा 'समवसरणे' व्याख्यानश्रवणादौ गच्छन्ती चतुर्हस्तां प्रावृणोति, सा च प्राक्तनसङ्घाटीभ्यो बृहत्तरप्रमाणा अनिषण्णप्रच्छादनार्थं क्रियते; यतो न तत्र संयतीभिरुपवेष्टव्यम्, किन्तूर्द्ध्वस्थिताभिरनुयोगश्रवणादि विधेयम्, ततस्तया स्कन्धादारभ्य पादौ यावद् वपुः प्रच्छाद्य तिष्ठन्ति । एताश्च पूर्वप्रावृतवेषप्रच्छादनार्थं प्रवचनवर्णप्रभावनार्थं च मसृणाः क्रियन्ते । चतस्रोऽपि च गणनाप्रमाणेनैकमेव रूपं गण्यते, युगपत् परिभोगाभावात् । [बृ.क.-४०९०]]

**[ खंधकरणी उ चउहत्थवित्थरा वायविहुतरक्खट्ठा ।**
**खुज्जकरणी उ कीरति रूववतीणं कुडुहहेउं ॥४०९१॥**

स्कन्धकरणी चतुर्हस्तविस्तरा समचतुरस्रा प्रावरणस्य वातविधुतरक्षणार्थं चतुष्फला स्कन्धे कृत्वा प्राव्रियते । रूपवतीनां च संयतीनां कुटुभहेतोः कुब्जकरण्यपि क्रियते, पृष्ठदेशे संवर्त्तितया औपकक्षिकी-वैकक्षिकीनिबद्धया तया विरूपतापादनाय कुटुभं विधीयत इति भावः । [बृ.क.-४०९१]]

**१०८९ संघाइमेयरो वा सव्वो वेसो समासओ उवही ।**
**पासगबंधमझुसिरो जं चाइन्नं तयं नेयं ॥९२॥ प्र०**

[उपसंहरन्नाह -

**[ संघातिमेतरो वा सव्वोवेसो समासओ उवधी ।**
**पासगबद्धमझुसिरो जं चाऽऽइण्णं तगं णेयं ॥४०९२॥**

सर्वोऽपि 'एषः' अनन्तरोक्त उपधिः समासतो द्विधा-सङ्घातिम इतरश्च । द्वित्र्यादिखण्डानां मीलनेन निष्पन्नः सङ्घातिमः, 'इतरः' तद्विपरीतोऽसङ्घातिमः । अयं च 'पाशकबद्धः' कसाबद्धः, तथा 'अशुषिरः' गृहिसीवनिकारहितः प्रतिथिग्गलवर्जितो वा । यच्चात्र द्रव्य-क्षेत्र-काल-भावेषु संविग्नगीतार्थैः पूर्वसूरिभिराचीर्णं तत् सर्वमपि 'ज्ञेयं' सम्यगुपादेयतया मन्तव्यम् । [बृ.क.-४०९२]]

**१०९० जिणा बारसरूवाइं थेरा चउद्दसरूविणो ।।**
**अज्जाणं पन्नवीसं तु अओ उड्ढं उवग्गहो ॥९३॥ प्र०**

**१०९१ उक्कोसगो जिणाणं चउव्विहो मज्झिमो वि एमेव ।**
**जहन्नो चउव्विहो खलु एत्तो थेराण वोच्छामि ॥९४॥ प्र०**

**१०९२ उक्कोसो थेराणं चउव्विहो छव्विहो उ मज्झिमओ ।**
**जहण्णो चउव्विहो खलु एत्तो अज्जाण वुच्छामि ॥९५॥ प्र०**

[अथ जिनकल्पिकादीनामुपधेरुत्कृष्टादिविभागमाह –

**उक्कोसओ जिणाणं चउव्विहो मज्झिमो वि य तहेव ।**
**जहण्णो चउव्विहो खलु एत्तो थेराण वोच्छामि ॥४०९३॥**

त्रयः कल्पाः प्रतिग्रहश्चेति जिनकल्पिकानामुत्कृष्ट उपधिश्चतुर्विधः । एवं मध्यमोऽपि रजोहरण-पटलक-पात्रबन्ध-रजस्त्राणभेदाच्चतुर्विधः । जघन्योऽपि मुखपोतिका-पादकेसरिका-गोच्छक-पात्रस्थापनभेदाच्चतुर्विधः । इत ऊर्द्ध्वं स्थविरकल्पिकानां वक्ष्यामि । [बृ.क.-४०९३]]

**[ उक्कोसो थेराणं चउव्विहो छव्विहो य मज्झिमओ ।**
**जहण्णो चउव्विहो खलु एत्तो अज्जाण वोच्छामि ॥४०९४॥**

उत्कृष्टो जघन्यश्च जिनकल्पिकानामिव द्रष्टव्यः । नवरं मध्यमः षड्विध इत्थम्-रजोहरणं पटलकानि पात्रकबन्धो रजस्त्राणं मात्रकं चोलपट्टकश्चेति । (इत ऊर्द्ध्वमार्याणां वक्ष्यामि ।) [बृ.क.-४०९४]]

अयं चार्यिकाणां सम्बन्धी अवधिस्त्रिप्रकारो भवति, एकोऽपि सन्नुत्तममध्यम-जघन्यभेदेन, तत्र तस्यार्यिकावधिमध्ये उत्कृष्टः प्रधानोऽष्टविधः, एतदेवाह –

**१०९३ उक्कोसो अट्ठविहो मज्झिमओ होइ तेरसविहो उ ।**
**जहन्नो चउव्विहो वि य तेण परमुवग्गहं [१]जाण ॥६७९॥ नि०**

**उक्कोसो** गाहा । **उत्कृष्टोऽष्टविधस्तद्यथा–**"[A]पात्रकं संघाडीओ चउरो, खंधकरणी, अंतोनियंसणी, बाहिणियंसणी य, अयमष्टविध **उत्कृष्ट प्रधानः** । पत्ताबंधो १ पडलाइं २ रयत्ताणं ३ रयहरणं ४ मत्तयं ५ उवग्गहणंतयं ६ पट्टओ ७ अद्धोरुगं ८ चलणी ९ कंचुगो १० उक्कच्छिया ११ वेकच्छिया १२ कमढगो १३," अयमार्यिका-वधिमध्ये **त्रयोदशविधो मध्यमावधिरिति** । "[B]पायट्ठवणं १ पायकेसरिया २ गोच्छओ ३ मुहपोत्तिया चेति," अयमार्यिकावधेर्मध्ये **जघन्योऽ**शोभन**श्चतुष्प्रकार** इति । अतः परं यः कारणे सति संयमार्थं गृह्यते सो**ऽवग्रहावधिरि**त्येवं **जानीहि** ॥६७९॥

A. पात्रकम्, सङ्घाट्यश्चतस्रः, स्कन्धकरणी, अभ्यन्तरनिवसनी, बहिर्निवसनी च, अयमष्टविध उत्कृष्टः प्रधानः । पात्रबन्धः १, पडलानि २, रजस्त्राणम् ३, रजोहरणम् ४, मात्रकम् ५, अवग्रहानन्तकम् ६, पट्टकः ७, अर्धोरुकम् ८, चलनिका ९, कञ्चुकः १०, उपकक्षिका ११, वैकक्षिका १२, कमठकः १३

B. पात्रस्थापनम् १, पात्रकेसरिका २, गोच्छकः ३ मुखपोतिका चेति ।

१. जाणे ह० हे०

**१०९४ एगं पायं जिणकप्पियाण थेराण मत्तओ बीओ ।**
**एयं गणणपमाणं पमाणपमाणं अओ वुच्छं ॥६८०॥ नि०**

एगं गाहा । **एकमेव पात्रकं जिनकल्पिकानां** भवति, **स्थविरकल्पिकानां** तु **मात्रको द्वितीयो** भवति, **इदं** तावदेकद्व्यादिकं **गणनाप्रमाणम्, इत** ऊर्ध्वं **प्रमाणप्रमाणं वक्ष्ये** ॥६८०॥

तत्र पात्रकस्य प्रमाणप्रमाणं प्रतिपादयन्नाह –

**१०९५ तिण्णि विहत्थी चउरंगुलं च भाणस्स मज्झिमपमाणं ।**
**एत्तो हीण जहन्नं अइरेगतरं तु उक्कोसं ॥६८१॥ नि०**

**तिण्णि** गाहा । "[A]समचउरंसं वट्टं दोरएण मविज्जइ तिरिच्छयं उड्ढाहो य, सो य दोरओ **तिण्णि विहत्थीओ चत्तारि अंगुलाइं** जति होइ ततो एयं **भाणस्स मज्झिमं पमाणं,**" **इतो**ऽस्मात्प्रमाणाद्य**द्धीनं तज्जघन्यं** प्रमाणं भवति, अथा**तिरिक्त-प्रमाणं** मध्यमप्रमाणाद्भवति ततस्तदुत्कृष्ट**मुत्कृष्टप्रमाण**मित्यर्थः॥६८१॥

तथेदमपरं [१]प्रकारान्तरेण पात्रकस्य प्रमाणं भवति –

**१०९६ इणमण्णं तु पमाणं नियगाहाराउ होइ निप्फन्नं ।**
**कालपमाणप[२]सिद्धं उदरपमाणेण य वयंति ॥६८२॥ नि०**

**इणमण्णं** गाहा । **इदमन्यत्प्रमाणं निजेनाहारेण निष्पन्नं** वेदितव्यम्, एतदुक्तं भवति-काञ्जिकादिद्रवोपेतस्य भक्तस्य चतुर्भिरङ्गुलैरूनं पात्रकं तत्साधोर्भक्षयतो यत्परिनिष्ठितं याति तत्तादृग्विधं मध्यमप्रमाणं पात्रकम्, तच्चैवंविधं **कालप्रमाणेन** ग्रीष्मकाले **प्रमाणप्रसिद्धं** पात्रकं भणन्ति, **उदरप्रमाणेन** च सिद्धं तदित्थं प्रकारं कालप्रमाणसिद्धं पात्रकमुदरप्रमाणसिद्धं **च वदन्ति** प्रतिपादयन्ति ॥६८२॥

कालप्रमाणसिद्धं पात्रम्, उदरप्रमाणसिद्धं च पात्रकं प्रतिपादयन्नाह –

**१०९७ उक्कोसतिसामासे दुगाउअद्धाणमागओ साहू ।**
**चउरंगुलूणभरियं जं पज्जत्तं तु साहुस्स ॥६८३॥ नि०**

---

A. समचतुरस्रं वृत्तं दवरकेन मीयते तिर्यगूर्ध्वाधश्च, स च दवरकस्तिस्रो वितस्तयश्चत्वार्यङ्गुलानि यदि भवति, तत एतद् भाजनस्य मध्यमप्रमाणम् ।

१. प्रमाणान्तरं प्रकारान्तरेण पात्रकस्य भ. ख. प्रमाणान्तरं प्रकारान्तरेण वा पात्रकस्य दा. २. सिद्धं हे० हे०

**१०९८ एयं चेव पमाणं सविसेसयरं अणुग्गहपवत्तं ।**
**कंतारे दुब्भिक्खे रोहगमाईसु भइयव्वं ॥६८४॥ नि०**

**उक्कोस** गाहा । **उत्कृष्टा तृड् मासयो** ज्येष्ठाषाढयोर्यस्मिन् काले स उत्कृष्टतृण्मासः कालस्तस्मिन्नुत्कृष्टतृण्मासकाले **द्विगव्यूताध्व**मात्रादा[1]गतः **साधुश्चतुर्भिरङ्गुलैर्न्यूनं भृतं** सद् **यत्पर्याप्त्या साधो**र्भवति तदित्थम्भूतं कालप्रमाणोदरप्रमाणप्रसिद्धं पात्रकं मध्यमं भवति ॥६८३॥

**एयं चेव** गाहा । **एतदेव** पूर्वोक्तं **प्रमाणं** यदा **सविशेषतरम**तिरिक्ततरं भवति तदा त**दनुग्रहार्थं प्रवृत्तं** भवति, एतदुक्तं भवति–बृहत्तरेण पात्रकेणान्येभ्यो दानेनानुग्रह आत्मनः क्रियते तच्च **कान्तारं** महतीमटवीमुत्तीर्यान्येभ्योऽप्यर्थं [2]गृहीत्वा व्रजति येन बहूनां भवति, तथा **दुर्भिक्षे**ऽलभ्यमानायां भिक्षायां [3]बहुनीत्वा बालादिभ्यो ददाति, तच्चातिमात्रे भाजने सति भवति दानम्, तथा **रोधके** कोट्टस्य जाते सति कश्चिद्भोजनं श्रद्धया दद्यात्तत्र तद् नीयते येन बहूनां भवति, एतेषु **भजनीयं** सेवनीयं तदतिमात्रं पात्रकम् ॥६८४॥

इदानीमेतदेव भाष्यकारो व्याख्यानयन्नाह –

**१०९९ वेयावच्चगरो वा नंदीभाणं धरे उवग्गहियं ।**
**सो खलु तस्स विसेसो पमाणजुत्तं तु सेसाणं ॥३२०॥ निभा०**

**वेयावच्चगरो** गाहा । **वैयावृत्त्यकरो वा नन्दी**पात्रं **धारयत्यौपग्रहिकमा**चार्येण समर्पितं निजं वा, **स खलु तस्यै**व वैयावृत्त्यकरस्य **विशेषः,** एतदुक्तं भवति–यदतिरिक्तमात्रपात्रधारणमयं तस्यैवैकस्य वैयावृत्त्यकरस्य विशेषः क्रियते, **शेषाणां तु** साधूनां **प्रमाणयुक्तमेव** पात्रकं भवति, उदरप्रमाणयुक्तमित्यर्थः ॥३२०॥

**११०० देज्जाहि भाणपूरं तु रिद्धिमं कोइ रोहमाईसु ।**
**तत्थ वि तस्सुवओगो सेसं कालं तु पडिकुट्ठो ॥६८५॥ नि०**

**देज्जाहि** गाहा । एतच्च तेन प्रमाणातिरिक्तेन पात्रकेण प्रयोजनं भवति, **दद्याद्भाजनपूरकं कश्चिदृद्धिमान्** पात्रभरणं कश्चिदीश्वरः कुर्यात्, कदा ? पत्तन-**रोधकादौ, तत्र** पात्रकभरणे **तस्य** नन्दीपात्रक**स्योपयोगः शेषकालमु**पयोगस्तस्य

---

१. ०दागत्य । क २. अनुग्रहाय भवति येन दा० ३. बहुटित्वा० दा०

**प्रतिक्रुष्टः** प्रतिषिद्धः कारणमन्तरेणेत्यर्थः ॥६८५॥

तच्च पात्रकं लक्षणोपेतं ग्राह्यं नालक्षणोपेतम्, एतदेवाह –

**११०१ पायस्स लक्खणमलक्खणं च भुज्जो इमं वियाणित्ता ।**
**लक्खणजुत्तस्स गुणा दोसा य अलक्खणस्स भवे[1] ॥६८६॥ नि०**

**पायस्स** गाहा । **पात्रकस्य लक्षणं** ज्ञात्वा **विज्ञाय अपलक्षणं च** बुद्ध्वा **भूयः** पुनर्लक्षणोपेतं ग्राह्यम्, यतो **लक्षणोपेतस्यामी गुणाः, अपलक्षणस्य चैते दोषा** वक्ष्यमाणा **भवन्ति** तस्माल्लक्षणोपेतमेव ग्राह्यं नालक्षणोपेतम् ॥६८६॥

तच्चेदम् –

**११०२ वट्टं समचउरंसं होइ थिरं थावरं च वण्णं च ।**
**हुंडं वायाइद्धं भिन्नं च अधारणिज्जाइं ॥६८७॥ नि०**

**वट्टं** गाहा । **वृत्तं** वर्तुलं तत्र वृत्तमपि कदाचित्**समचतुरस्रं** न भवत्यत आह– समचतुरस्रं सर्वतस्तथा **स्थिरं** च **यद्भवति** सुप्रतिष्ठानं तद्गृह्यते नान्यत्, तथा **स्थावरं च** यद्भवति न परकीयोपस्करवद् याचितं कतिपयदिनस्थायि, तथा **वर्ण्यं** स्निग्धवर्णोपेतं यद्भवति तद् ग्राह्यम्, नेतरत् । उक्तं लक्षणोपेतम्, इदानीमपलक्षणोपेतमुच्यते– **हुण्डं** क्वचिन्निम्नं क्वचिदुन्नतं यत्तदधारणीयम्, **वायाइद्धं** ति अकालेनैव शुष्कं सङ्कुचितं वलीभूतं **तदधारणीयम्,** तथा **भिन्नं** राजियुक्तं सच्छिद्रं वा, एतानि **न धार्यन्ते** परित्यज्यन्त इत्यर्थः ॥६८७॥

इदानीं लक्षणयुक्तस्य फलं प्रदर्शयन्नाह –

**११०३ संठियंमि भवे लाभो पइट्ठा सुपतिट्ठिए ।**
**निव्वणे कित्तिमारुग्गं वन्नड्ढे नाणसंपया ॥६८८॥ नि०**

**संठियंमि** गाहा । **संस्थिते** पात्रके वृत्तचतुरस्रे ध्रियमाणे **लाभो भवति, प्रतिष्ठा** गच्छे भवति **सुप्रतिष्ठिते** स्थिरे पात्रके, **निर्व्रणे** नखक्षतादिरहिते **कीर्तिरारोग्यं** च भवति, **वर्णाढ्ये ज्ञानसंपद्भवति** ॥६८८॥

इदानीमपलक्षणयुक्तफलं प्रदर्शयन्नाह –

---

१. इमे दा०

**११०४ हुंडे चरित्तभेदो सबलंमि य चित्तविब्भमं जाणे ।**
**दुप्पुए खीलसंठाणे गणे च चरणे च नो ठाणं ॥६८९॥ नि०**

**११०५ पउमुप्पले अकुसलं सव्वणे वणमादिसे ।**
**अंतो बहिं व दड्ढे मरणं तत्थ निद्दिसे ॥६९०॥ नि०**

**हुंडे** गाहा । **हुण्डे** निम्नोन्नते **चारित्रस्य भेदो** भवति विनाश इत्यर्थः, **शबले** चित्तले **चित्तविभ्रम**श्चित्तविप्लुतिर्भवति, **दुप्पुए** अधोभागाप्रतिष्ठिते प्रतिष्ठानरहिते, तथा **कीलसंस्थाने** कीलवद्दीर्घमुच्चं गतं तस्मिंश्चैवंविधे **गणे** स्वगच्छे **चरणे** चारित्रे वा **न प्रतिष्ठानं** भवति ॥६८९॥

**पउमुप्पले** गाहा । **पद्मोत्पले** हेट्ठे [१४१]थासगागारे पात्रकेऽ**कुशलं** भवति, **सव्रणे** पात्रके सति **व्रणो** भवति पात्रकस्वामिनः, तथा **अन्तो**ऽभ्यन्तरे **बहिर्वा दग्धे** सति **मरणं तत्र निर्दिशेत्** ॥६९०॥

इदानीं मुखलक्षणं प्रतिपादनायाह –

**११०६ अकरंडगम्मि भाणे हत्थो [१]ओट्ठं जहा न घट्टेइ ।**
**एयं जहन्नयमुहं वत्थुं पप्पा विसालं तु ॥६९१॥ नि०**

**अकरंडगम्मि** गाहा । करण्डको वंशग्रथितः समतलकः, करण्डकस्येवाकारो यस्य तत्करण्डकं न करण्डकम् अकरण्डकं वृत्तसमचतुरस्रमित्यर्थः, तस्मिन्नेवंविधे **भाजने** पात्रके मुखं कियन्मात्रं क्रियते ? अत आह-**हस्तः** प्रविशन् **ओष्ठं** कर्णं **यथा न घट्टयति** न स्पृशति, **एतज्जघन्यमुखं** पात्रकं भवति, **वस्तु प्राप्य** वस्त्वाश्रित्य सुखेनैव गृहस्थो ददातीति एवमाद्याश्रित्य **विशालतरं** मुखं क्रियत इति ॥६९१॥

आह—कस्माद्भाजनग्रहणं क्रियते ? आचार्यस्त्वाह –

**११०७ छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं ।**
**जे य गुणा संभोए हवंति ते पायगहणे वि ॥६९२॥ नि०**

**छक्काय** गाहा । **षट्कायरक्षणार्थम्,** पात्रकरहितः साधुर्भोजनार्थी षडपि कायान्

---

१४१. थासगः-स्थासक-दर्पणः (ओव.३१)

१. उट्ठं दा०

व्यापादयति यस्मात्तस्मात्**पात्रग्रहणं जिनैः प्रज्ञप्तं** प्ररूपितम्, **य** एव **गुणा** मण्डली**सम्भोगे** व्यावर्णिता **भवन्ति त** एव गुणाः **पात्रग्रहणेऽपि भवन्ति,** अतो ग्राह्यं पात्रमपि ॥६९२॥

के च ते गुणाः ? इत्यत आह –

**११०८ अतरंत बाल वुड्ढा सेहाएसा गुरू असहुवग्गो ।**
**साहारणोग्गहाऽलद्धिकारणा पादगहणं तु ॥६९३॥ नि०**

**अतरंत** गाहा । **ग्लान**कारणाद् **बाल**कारणाद् **वृद्ध**कारणात् [1]**शैक्षक**कारणात् **प्राघूर्णक**कारणाद् **गुरु**कारणाद् **असहिष्णुः** राजपुत्रः कश्चित् प्रव्रजितस्तत्कारणात् **साधारणोऽवग्रहो**ऽवष्टम्भोऽनेन पात्रकेण क्रियते, एतेषां सर्वेषामतः साधारणावग्रहाद्धेतोः, **अलब्धिमांश्च** कश्चिद्भवति तस्यानीय दीयते, एतच्च पात्रकेण विना दातुं न शक्यतेऽस्मात्**कारणात् पात्रकग्रहणं** भवति ॥६९३॥

उक्तं पात्रकप्रमाणप्रमाणम्, इदानीं पात्रबन्धप्रमाणप्रमाणं प्रतिपादयन्नाह –

**११०९ पत्ताबंधपमाणं भाणपमाणेण होइ कायव्वं ।**
**जह गंठिमि कयंमि कोणा चतुरंगुला हुंति ॥६९४॥ नि०**

**पत्ताबंध** गाहा । **पात्रबन्धप्रमाणं भाजनप्रमाणेन भवति** विज्ञेयं सर्वथा, **यथा ग्रन्थौ कृते** दत्ते सति **कोणौ चतुरङ्गुल**प्रमाणौ **भवतस्**तथा कर्त्तव्यम् ॥६९४॥

इदानीं पात्रकस्थापनकगोच्छकपात्रकप्रत्युपेक्षणिकानां प्रमाणप्रमाणप्रतिपादयन्नाह –

**१११० पत्तट्ठवणं तह गोच्छगो य पायपडिलेहणिआ य ।**
**तिण्हं पि ऊ पमाणं विहत्थि चउरंगुलं चेव ॥६९५॥ नि०**

**पत्तट्ठवणं** गाहा । **पात्रकस्थापनकं गोच्छकः पात्रकप्रत्युपेक्षणिका** पात्रकमुखवस्त्रिका एतेषां **त्रयाणामपि वितस्तिश्चत्वारि चाङ्गुलानि प्रमाणं** चतुरस्रं द्रष्टव्यम्, अत्र च पात्रस्थापनकं [2]गोच्छकश्च एते द्वेऽपि ऊर्णामये वेदितव्ये, मुखवस्त्रिका खोम्मिया ॥६९५॥

इदानीमेषामेव प्रयोजनप्रतिपादनायाह –

---

१. शिक्षककारणात् क, ख. २. गोच्छकं च एते क

**१११९ रयमादिरक्खणट्ठा पत्तट्ठवणं [1]विऊ उवइसंति ।**
**होइ पमज्जणहेउं तु गोच्छओ भाणवत्थाणं ॥६९६॥ नि०**

**१११२ पायपमज्जणहेउं केसरिया पाए पाए एक्केक्का ।**
**गोच्छगपत्तट्ठवणं एक्केक्कं गणणमा[2]णेणं ॥६९७॥ नि०**

**रय** गाहा । **रजआदिरक्षणार्थं पात्रस्थापनकं** भवत्येवं **विद्वांसो व्यपदिशन्ति, भवति प्रमार्जन**निमित्तं **गोच्छको भाजनवस्त्राणाम्** । एतदुक्तं भवति- गोच्छकेन हि पटलानि प्रमृज्यन्ते ॥६९६॥

**पाय** गाहा । तथा केसरिकाऽपि पात्रकमुखवस्त्रिकाऽपि **पात्रकप्रमार्जन**निमित्तं भवति **पात्रे पात्रे एकैका पात्रकेसरिका** भवति गणनया, तथा **गोच्छकः पात्रस्थापनकं चैकैकं गणनामाने**नेति ॥६९७॥

इदानीं पटलानां गणनाप्रमाणप्रतिपादनायाह –

**१११३ जेहिं सविया न दीसइ अंतरिओ तारिसा भवे पडला ।**
**तिन्नि व पंच व सत्त व कयलीगब्भोवमा मसिणा ॥६९८॥ नि०**

**जेहिं** गाहा । **यैः** पटलै**स्त्रिभि**रेकीकृतैः सद्भिः **सविता न दृश्यते** तिरोहितस्सन् **पञ्चभिः सप्तभिर्वा** पटलैरेकीकृतैः सविता नोपलभ्यत इति, किमुक्तं भवति? **रवेः** सम्बन्धिनो रश्मयो नोपलभ्यन्ते **तादृशानि पटलानि भवन्ति,** किंविशिष्टानि ? **कदलीगर्भोपमानि** क्षौमाणि श्लक्ष्णानि **मसृणानि** घनानि शुक्लानि चेति ॥६९८॥

तत्र यदुक्तम्-"त्रीणि पटलानि पञ्च वा सप्त वा पटलानि भवन्तीति ।" एतदेव कालभेदेन विशेषेण प्रदर्शयन्नाह –

**१११४ गिम्हासु तिन्नि पडला चउरो हेमंते पंच वासासु ।**
**उक्कोसगा उ एए एत्तो पुण मज्झिमे वुच्छं ॥६९९॥ नि०**

**१११५ गिम्हासु होंति चउरो पंच य हेमंते छच्च वासासु ।**
**एए खलु मज्झिमया एत्तो उ [3]जहन्नए वुच्छं ॥७००॥ नि०**

**१११६ गिम्हासु पंच पडला छप्पुण हेमंते सत्त वासासु ।**
**तिविहंमि कालछेए पायावरणा भवे पडला ॥७०१॥ नि०**

---

१. जिणेहिं पण्णत्तं द २. पमाणेणं दा० ३. जहन्नओ दा०

**गिम्हासु** गाहा । **ग्रीष्मे** उष्णकाले **त्रीणि पटलानि** गृह्यन्ते यदि तानि दृढानि मसृणानि च भवन्ति उत्कृष्टानीत्यर्थः, **हेमन्ते** शिशिरे च **चत्वारि** गृह्यन्ते घनानि मसृणानि च शोभनानि यदि भवन्ति, स हि मनाक् स्निग्धतरः कालः, **पञ्च पटलानि वर्षासु** गृह्यन्ते यद्युत्कृष्टानि घनानि मसृणानि च भवन्ति, स ह्यत्यन्तस्निग्धकालो यत **उत्कृष्टान्येतान्युक्त**लक्षणानि प्रधानान्येतानि । **अत** ऊर्द्ध्वं **मध्यमानि** न शोभनानि नाप्यशोभनानि **वक्ष्य** इति ॥६९९॥

**गिम्हासु** गाहा । **ग्रीष्मे** उष्णकाले **चत्वारि** मध्यमानि पटलानि गृह्यन्ते, तानि मनाग् जीर्णानि, **हेमन्ते पञ्च** गृह्यन्ते मध्यमानि **वर्षासु षड्, एतानि मध्यमानि** न प्रधानानि नाप्यप्रधानानि, तत्र ग्रीष्मो रूक्षः कालः, हेमन्तो मध्यमः, वर्षा स्निग्धस्तेन पटलानां वृद्धिरुक्ता, **इत ऊर्द्ध्वं जघन्यानि वक्ष्य** इति ॥७००॥

**गिम्हासु** गाहा । **ग्रीष्मे पञ्च पटलानि** जघन्यानि जीर्णप्रायाणि गृह्यन्ते, **षट् पुनर्हेमन्ते** जघन्यानि जीर्णप्रायाणि, **वर्षासु सप्त पटलानि** जघन्यानि सङ्गृह्यन्ते जीर्णप्रायाणि, एवमुक्तेन प्रकारेण **त्रिविधेऽ**पि **कालच्छेदे** कालपर्यन्तेऽन्यानि चान्यानि च **पात्रावरणानि** स्थगनानि **पटलानि भवन्ति** ॥७०१॥

इदानीमेषामेव प्रमाणप्रमाणं प्रतिपादनायाह –

**१११७ अड्डाइज्जा हत्था दीहा छत्तीस अंगुले रुंदा ।**
**बितियं पडिग्गहाओ ससरीराओ य निप्फन्नं ॥७०२॥ नि०**

**अड्डाइज्जा** गाहा । **अर्द्धतृतीयहस्तदीर्घाणि** भवन्ति, **षट्त्रिंशदङ्गुलानि** विस्तीर्णानि भवन्ति, **द्वितीय**मेषां प्रमाणं **पतद्ग्रहा**च्छादनेन **शरीर**स्कन्धाच्छादनेन च **निष्पन्नं** भवति, एतदुक्तं भवति-भिक्षाटनकाले स्कन्धः पात्रकं चाच्छाद्यते यावता तत्प्रमाणं पटलानामिति ॥७०२॥

इदानीं किं तैः प्रयोजनमित्यस्यार्थस्य प्रदर्शनायाह –

**१११८ पुप्फफलोदयरयरेणुसउणपरिहारपायरक्खट्ठा ।**
**लिंगस्स य संवरणे वेदोदयरक्खणे पडला ॥७०३॥ नि०**

**पुप्फ** गाहा । अस्थगिते पात्रके **पुष्पं** निपतति **तत्संरक्षणार्थं** पटलानि गृह्यन्ते, तथा **फलपात**रक्षणार्थ**मुदकपात**संरक्षणार्थं च पटलग्रहणम् तथा **रजः** सचित्त-

पृथिवीकायस्तत्संरक्षणार्थं च, **रेणुर्धूलिस्तद्रक्षणार्थञ्च, शकुनपरिहारः** शकुनः पुरीषं तत् कदाचिदाकाशान्निपतति **तत्पातसंरक्षणार्थञ्च, [1]लिङ्गसंवरणार्थं** लिङ्गस्थगनं **च** तैर्भवति, तथा पुरुष**वेदोदये** सति तस्यैव स्तब्धता भवति [2]**तत्संरक्षणं** स्थगनं तदर्थं च **पटलानि** भवन्तीति ॥७०३॥

इदानीं रजस्त्राणप्रमाणप्रतिपादनायाह –

**१११९ माणं तु रयत्ताणे भाणपमाणेण होइ निप्फन्नं ।**
**पायाहिणं करेंतं मज्झे चउरंगुलं कमइ ॥७०४॥ नि०**

**माणं तु** गाहा । **मानं** प्रमाणं **रजस्त्राणस्य भाजनप्रमाणेन** पात्रकप्रमाणेन **भवति निष्पद्यते,** एतदुक्तं भवति-पात्रकानुरूपं रजस्त्राणं भवति, तच्च रजस्त्राणं [3]पात्रकस्य कथं दीयते ? अत आह-**प्रदक्षिणां कुर्वाणं** सत्तिर्यग् दीयते, **मध्ये** पृथुत्वेन **चत्वार्यङ्गुलानि क्रामति** गच्छति प्रदक्षिणां कुर्वाणमिति॥७०४॥

इदानीमस्यैव प्रयोजनप्रतिपादनायाह –

**११२० मूसयरयउक्केरे वासे सिण्हा रए य रक्खट्ठा ।**
**होंति गुणा रयत्ताणे पादे पादे य एक्केक्कं ॥७०५॥ नि०**

**मूसय** गाहा । तच्च रजस्त्राणं दीयते **मूषिकरजउत्केर**संरक्षणार्थं **वर्षोदक**-संरक्षणार्थम्, **सिण्हा**अवश्यायस्तत्संरक्षणार्थं **रजः** सचित्तः पृथिवीकायस्तत्**संरक्षणार्थं भवन्ति गुणा रजस्त्राणस्यै**ते, तच्च **पात्रे पात्रे चैकैकं** भवतीति ॥७०५॥

इदानीं कल्पप्रमाणप्रमाणप्रतिपादनायाह –

**११२१ कप्पा आयपमाणा अड्ढाइज्जा उ वित्थडा [4]हत्था ।**
**दो चेव सोत्तिया उन्निओ य तइओ मुणेयव्वो ॥७०६॥ नि०**

**कप्पा** गाहा । **कल्पा आत्मप्रमाणाः**, एतदुक्तं भवति-यावन्मात्राः प्रावृताः स्कन्धे प्रक्षिप्तास्तिष्ठन्ति, एतावदात्मप्रमाण**मर्द्धतृतीयांस्तु विस्तृता हस्तान्**, तत्र **द्वौ सौत्रिकौ** भवतः, **और्णिकश्च तृतीयो विज्ञेयः** ॥७०६॥

इदानीं तत्प्रयोजनप्रतिपादनायाह –

---

१. लिङ्गसंरक्षणार्थं चेष्यते तथा क. २. तत्संरक्षणार्थं संरक्षणं क. ३. पात्रके दा० ४. हत्थे ह० हे०

**११२२ तणगहणानलसेवानिवारणा धम्मसुक्कझाणट्ठा ।**
**दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥७०७॥ नि०**

**तण** गाहा । **तृणग्रहणनिवारणार्थं** गृह्यन्ते, **अनलोऽ**ग्निस्त**त्सेवानिवारणार्थं** च, एतदुक्तं भवति-कल्पाग्रहणे तृणग्रहणमग्निसेवनं च भवति, तन्निवारणार्थं कल्पग्रहणं क्रियते, तथा **धर्मशुक्लध्यानार्थं** कल्पग्रहणं भवति, एतदुक्तं भवति-शीतादिना बाध्यमानो धर्मशुक्लध्याने ध्यातुमसमर्थो भवति यदि कल्पग्रहणं न करोति, अत एवमर्थं **दृष्टं कल्पग्रहणम्,** तथा **ग्लान**संरक्षणार्थं **मरणार्थं च** मृतस्योपरि दीयते कल्पः, एतदर्थं च ग्रहणमिति ॥७०७॥

इदानीं रजोहरणस्वरूपप्रतिपादनार्थमाह –

**११२३ सिलोगो-घणं मूले थिरं मज्झे अग्गे मद्दवजुत्तया ।**
**एगंगियं अज्झुसिरं पोरायामं तिपासियं ॥७०८॥ नि०**

**घणं सिलोगो** । **मूले** [१]दण्डपर्यन्ते **घनं** निबिडं भवति, **मध्ये** मध्यप्रदेशे **स्थिरं** कर्त्तव्यम्, **अग्रे** दशिकापर्यन्ते **मार्दवयुक्तं** मृदु कर्त्तव्यम्, **एकाङ्गिकं** तज्जातदशिकं सदशिकाकम्बलीखण्डनिष्पादितमित्यर्थः । **अज्झुसिरं** अग्रन्थिला दशिका निषद्या च यस्य त**दशुषिरम्, पोरायामं** ति अङ्गुष्ठपर्वणि प्रतिष्ठितायाः प्रदेशिन्या यावन्मात्रं शुषिरं भवति तदापूरकं कर्त्तव्यम्, [२]दण्डिकायुक्ता निषद्या यथा तावन्मात्रं पूरयति तथा कर्त्तव्यम्, **त्रिपाशितं** त्रीणि वेष्टनानि दवरकेण दत्त्वा पाशितं पाशबन्धनेन ॥७०८॥

किञ्च अमुमेव श्लोकं भाष्यकारो व्याचष्टे –

**११२४ सिलोगो-अप्पोल्लं मिउ [३]पम्हं च पडिपुन्नं हत्थपूरिमं ।**
**रयणिप्पमाणमित्तं कुज्जा पोरपरिग्गहं ॥३२१॥ निभा०**

**अप्पोल्लं सिलोगो** । **अप्पोल्लं** दृढवेष्टनाद् घनवेष्टनात् कारणात्, **मृदु पक्ष्म च** कर्त्तव्यं-मृदुनि दशिकापक्ष्माणि क्रियन्ते । **प्रतिपूर्णं** सद्बाह्येन निषद्याद्वयेन युक्तं सद् **हस्तं पूरयति** यथा तथा कर्त्तव्यम् । तथा **रत्निप्रमाणमात्रं** यथा दण्डो हस्तप्रमाणो भवति [४]तथा कर्त्तव्यम् । तथा अङ्गुष्ठपर्वणि प्रतिष्ठिता या प्रदेशिनी तत्परिग्रहम्,

---

१. गण्ड० क० २. दशिकायुक्ता० क ३. पोम्हं ह० हे० ता० ४. किञ्चिच्चाधिकं भवति तथा ख. प.

**कुज्जा पोरपरिग्गहं** ति **पोरम**ङ्गुष्ठपर्व तस्मिन्नङ्गुष्ठपर्वणि लग्नया प्रदेशिन्या यद्भवति छिद्रं तद्यथा पूर्यते तेन [1]दण्डकेन बाह्यनिषद्याद्वयसहितेन कर्त्तव्यम्, अत एवंविधं पोरपरिग्गहं अङ्गुष्ठपर्वप्रदेशिनीकुण्डलिकापूरणं **कर्त्तव्यमि**ति ॥३२१॥

इदानीं समुदायरूपस्यैव प्रमाणं प्रतिपादयन्नाह –

**११२५ बत्तीसंगुलदीहं चउवीसं अंगुलाइं दंडो से ।**
**अट्ठंगुला दसाओ एगयरं हीणमहियं वा ॥७०९॥ नि०**

**बत्तीसं** गाहा । **द्वात्रिंशदङ्गुलानि** सर्वमेव दैर्घ्येण प्रमाणतो भवति, तत्र चास्य रजोहरणस्य **चतुर्विंशत्यङ्गुलानि दण्डकः, अष्टाङ्गुल**[3]प्रमाणिकाश्च **दशिका** [4]भवन्ति, **एगयरं हीणमहियं वा-एकतरं** दण्डकस्य दशिकानां **वा** कदाचि**द्धीनं** प्रमाणतो भवति कदाचिच्चा**धिकं** भवति, सर्वथा समुदायतस्तद्द्वात्रिंशदङ्गुलं कर्त्तव्यम्॥७०९॥

तच्च किम्मयं भवति ? इत्यत आह –

**११२६ उण्णियं उट्टियं वा**[5] **वि कंबलं पायपुच्छणं ।**
**तिपरियल्लमणीसट्टं रयहरणं धारये** [6]**इक्कं ॥७१०॥ नि०**

**उण्णियं** गाहा । तद्रजोहरणं कदाचि**दूर्णामयं** भवति कदाचिच्चो**ष्ट्रौर्णामयं** भवति कदाचि**त्कम्बलमयं** भवति, **पादपुञ्छन**शब्देन रजोहरणमेव गृह्यते, तदेवंगुणं भवति, **तिपरियल्लं** ति **त्रिःपरिवर्त्त**-त्रयः परावर्त्तका वेष्टनानि यथा भवन्ति तथा कर्त्तव्यम्, **अणीसट्टं** ति मृदु कर्त्तव्यम्, तदेवंगुणं **रजोहरणं धारयेदेकमे**वेति ॥७१०॥

तेन च किं प्रयोजनमित्यत आह –

**११२७ आयाणे निक्खेवे ठाण निसीयण तुयट्ट संकोए ।**
**पुव्वं पमज्जणट्ठा लिंगट्ठा चेव रयहरणं ॥७११॥ नि०**

**आयाणे** गाहा । **आदानं** ग्रहणं तत्र प्रमाजनार्थं रजोहरणं गृह्यते, **निक्षेपो** न्यासः **स्थानं** कायोत्सर्गः, **निषीदनमु**पविशनम्, **तुयट्टणं** शयनम्, **सङ्कोचनं** जानुसंदंशकादेः, एतानि **पूर्वं** प्रमृज्य क्रियन्तेऽतः पूर्वं **प्रमार्जनार्थं** रजोहरणग्रहणं क्रियते । **लिङ्गमिति च** कृत्वा **रजोहरण**धारणं क्रियत इति ॥७११॥

---

१. गण्डकेन क २. ०द्वयरहितेन क, ख. ३. प्रमाणकाश्च दा० ४. भवति । क ५. चेव ह० हे० ६. मुणी ह० हे०

इदानीं मुखवस्त्रिकाप्रमाणप्रतिपादनायाह –

**११२८ चउरंगुलं विहत्थी एयं मुहणंतगस्स उ पमाणं ।**
**बितियं मुहप्पमाणं गणणपमाणेण एक्केक्कं ॥७१२॥ नि०**

**चतु** गाहा । **चत्वार्यङ्गुलानि वितस्तिश्चेति**, **एतच्चतुरस्रं मुखानन्तकस्य प्रमाणम्**, अथवेदं **द्वितीयं** प्रमाणम्, यदुत **मुखप्रमाणं** कर्त्तव्यं मुहणंतयं, एतदुक्तं भवति–वसतिप्रमार्जनादौ यथा मुखं प्रच्छाद्यते कृकाटिकापृष्ठतश्च यथा ग्रन्थिर्दातुं शक्यते तथा कर्त्तव्यम्, त्र्यस्रं कोणद्वये गृहीत्वा यथा कृकाटिकायां ग्रन्थिर्दातुं शक्यते तथा कर्त्तव्यमिति, एतद्वितीयं प्रमाणम्, **गणनाप्रमाणेन** पुनस्त**देकैकमेव** मुखानन्तकं भवतीति ॥७१२॥

इदानीं तत्प्रयोजनप्रतिपादनायाह –

**११२९ संपातिमरयरेणूपमज्जणट्ठा वयंति मुहपोत्तिं ।**
**नासं मुहं च बंधइ तीए वसहिं पमज्जंतो ॥७१३॥ नि०**

**संपातिम** गाहा । **संपातिम**सत्त्वरक्षणार्थं जल्पद्भिर्मुखे दीयते, तथा **रजः** सचित्तपृथिवीकायस्तत्**प्रमार्जनार्थं** मुखवस्त्रिका गृह्यते, तथा **रेणुप्रमार्जनार्थं** मुखवस्त्रिकाग्रहणं प्रतिपादयन्ति पूर्वर्षयः । तथा **नासिकां मुखं च बध्नाति तया** मुखवस्त्रिकया **वसतिं प्रमार्जयन्** येन न मुखादौ रजः प्रविशतीति ॥७१३॥

इदानीं मात्रकप्रमाणप्रतिपादनायाह –

**११३० जो मागहओ पत्थो सविसेसतरं तु मत्तयपमाणं ।**
**दोसु वि दव्वग्गहणं वासावासासु अहिगारो ॥७१४॥ नि०**

**जो मागहओ** गाहा । **यो मागधकः प्रस्थस्तत्सविशेषतरं मात्रकं** भवति, स च मागधकप्रस्थः "[A]दो असईओ पसई, दो पसतिओ सेतिया, चउहि सेइयाहिं कुलवो, चउ कुलवो मागहओ पत्थो सो जारिसो हु पमाणेण तारिसं सविसेसतरं मत्तयं हवति" । तेन च किं प्रयोजनमित्यत आह– **दोसु वि द्वयोरपि वर्षा-वर्षयोर्**वर्षाकालर्तुबद्धकालयोः, यदाऽऽचार्यादिप्रायोग्य**द्रव्यं ग्रहणं** क्रियतेऽय**मधिकार**-स्तस्य मात्रकस्येति, इदं प्रयोजनमित्यर्थः ॥७१४॥

A. द्वे असती प्रसृतिः, द्वे प्रसृती सेतिका, चतसृभिः सेतिकाभिः कुलवः, चतुष्कुलवो मागधः प्रस्थः, स यादृशः खलु प्रमाणेन तादृशं सविशेषतरं मात्रकं भवति ।

अथवेदमन्यत्प्रमाणमुच्यते –

**११३१ सूवोदणस्स भरियं दुगाउअद्धाणमागओ साहू ।**
**भुंजइ एगट्ठाणे एयं किर मत्तयपमाणं ।।७१५।। नि०**

**सूवोदण** गाहा । **सूपस्य ओदनस्य** च **भृतं द्विगव्यूताध्वानादागतः साधुर्भुङ्क्ते** यदे**कस्मिन् स्थाने** तदेतत् **किल मात्रकस्य** द्वितीयं **प्रमाणमुक्तम्** ।।७१५।।

आह—कस्मादुक्तप्रमाणाल्लघुतरं न क्रियते ? उच्यते, लघुतरे दोषा भवन्ति –

**११३२ संपाइमतसपाणा धूलिसरक्खे य परिगलंतंमि ।**
**पुढविदगअगणिमारुयउद्धंसण खिंसणा डहरे ।।७१६।। नि०**

**संपाइम** गाहा । अतिलघुनि मात्रके चाहारेण भृते सति यदि तदाच्छादनमुत्क्षिप्यते ततः शुषिरेण **संपातिमत्रसप्राणा धूलिश्च सरजस्कः** छारः, एते प्रविशन्ति, तथा **परिगलमाने** च तद् द्रव्यसंपातेन **पृथिव्युदकाग्निमारुतानां** वधः संभाव्यते, **उद्धंसणो** वधो भवति, तथा **खिंसणा** परिभवो भवतीति, यदुतानेन प्रव्रजितेनातृप्तेनैतावद् गृहीतं येनैतद्भक्तमितश्चेतश्च विक्षिपन् प्रयातीति, ततश्च **डहरके** मात्रक एते दोषा यतो भवन्तीति ततः पूर्वोक्तप्रमाणयुक्तमेव ग्राह्यमिति ।।७१६।।

इदानीमाचार्यादिप्रायोग्यग्रहणनिमित्तं मात्रकस्यानुज्ञां प्रतिपादनायाह –

**११३३ आयरिए य गिलाणे पाहुणए दुल्लभे सहसदाणे ।**
**संसत्तभत्तपाणे मत्तगपरिभोगऽणुण्णाओ ।।७१७।। नि०**

**आयरिय** गाहा । **आचार्य**प्रायोग्यग्रहणे तथा **ग्लानप्राघूर्णक**प्रायोग्यग्रहणे तथा **दुर्लभ**घृतादिद्रव्यग्रहणे **सहसादान**ग्रहणे तथा **संसक्तभक्तपान**ग्रहणे च **मात्रकस्य परिभोगोऽनुज्ञातो** नान्यदेति, तस्य च मात्रकस्यानेन क्रमेण परिभोगः कर्त्तव्यः, यद्याचार्यस्य तस्मिन् क्षेत्रे ध्रुवो लम्भः प्रायोग्यस्य तदा एक एव सङ्घाटकः प्रायोग्यं गृह्णाति न सर्वे ।।७१७।।

तत्र एकस्य सङ्घाटकस्याचार्यप्रायोग्यं गृह्णतः को विधिरित्यत आह –

**११३४ एक्कंमि उ पाउग्गं गुरुणो बितिओग्गहे य पडिकुट्ठं ।**
**गिण्हइ संघाडेगो धुवलंभे सेस उभयं पि ।।७१८।। नि०**

**एगंमि** गाहा । **एकस्मिन्** प्रतिग्रहके **प्रायोग्यं गुरोर्गृह्णाति बितिओग्गहे य** त्ति

**द्वितीयप्रतिग्रहके पडिकुट्ठं** ति **प्रतिषिद्धं** यत्संसक्तादि तद्**गृह्णाति**, अथवा **पडिकुट्ठं** विरुद्धं यत्काञ्जिकाअम्बिलादि तद् द्वितीयप्रतिग्रहके **गृह्णात्येक** एव **सङ्घाटकः** । कदा पुनरयं विधिरित्यत आह– **धुवलम्भे धुवे**ऽवश्यम्भाविनि प्रायोग्य**लाभे** सत्ययं विधिः, **सेस उभयं पि** त्ति **शेषा** येऽन्ये सङ्घाटकास्ते आत्मार्थ**मुभयमपि** भक्तं पानकं च गृह्णन्ति, एकः पानकमेकस्मिन् प्रतिग्रहके गृह्णाति द्वितीयश्च भक्तं गृह्णाति, एवं सर्वेऽपि सङ्घाटका भिक्षामटन्तीति, ततश्चैवं मात्रकग्रहणं न सञ्जातमिति ॥७१८॥

अथ धुवलम्भः प्रायोग्यस्य न तस्मिन् क्षेत्रे ततः को विधिरित्यत आह –

**११३५ असई लाभे पुण मत्तएसु सव्वे गुरूण गिण्हंति ।**
**एसेव कमो नियमा गिलाण[1]सेहाइएसुं पि ॥७१९॥ नि०**

**असती** गाहा । **असति लम्भे पुनः** प्रायोग्यस्य **सर्व** एव सङ्घाटका **मात्रकेषु गुरोः** प्रायोग्यं **गृह्णन्ति**, यतो न ज्ञायते कः किं लप्स्यते आहोस्विन्नेत्यतः सर्व एव गृह्णन्ति, **एष एव क्रमो नियमा**न्नियमत एव **ग्लानशिक्षकादिष्वपी**ति ॥७१९॥

अथवा –

**११३६ दुल्लभदव्वं व सिया घयाइ [2]तं मत्तएसु गिण्हंति ।**
**लद्धे वि उ पज्जत्ते असंथरे सेसगट्ठाए ॥७२०॥ नि०**

**दुल्लभ** गाहा । **दुर्लभं वा द्रव्यं स्याद् घृतादि तन्मात्रकेषु गृह्णन्ति** । तथा **लब्धेऽपि** भक्ते **पर्याप्ते**ऽप्यात्मार्थं तथापि यदि न संस्तरति न सरति ग्लानवृद्धादीनां ततो**ऽसंस्तरणे** सति [3]ग्लानवृद्धादि**शेषार्थं** तावत्पर्यटन्ति यावत्पर्याप्तं भक्तं ग्लानादीनां भवतीति ॥७२०॥

[4]अथवाऽनेन प्रकारेण मात्रकग्रहणं सम्भवति –

**११३७ संसत्तभत्तपाणेसु वा वि देसेसु मत्तए गहणं ।**
**पुव्वं तु भत्तपाणं सोहेउ छुहंति इयरेसु ॥७२१॥ नि०**

**संसत्त** गाहा । यत्र देशेषु स्वभावेनैव संसक्तभक्तपानं संसज्यते, तेषु **संसक्तभक्तपानेषु देशेषु** सत्सु प्रथमं **मात्रके ग्रहणं** क्रियते, पुनश्च तत्**पूर्व**मेव

१. सेहाइयाणं द. २. चं ह० हे० ३. ग्लानादिभक्तार्थं ता० दा० ४. वाऽनेकप्रकारेण क.

**भक्तपानं शोधयित्वा प्रक्षिपन्तीतरेषु** प्रतिग्रहकेषु, ततश्चैवं वा मात्रकग्रहणं सम्भवति ॥७२१॥

इदानीं चोलपट्टकप्रमाणप्रतिपादनायाह –

**११३८ दुगुणो चउग्गुणो वा [१]हत्थो चउरंसो चोलपट्टो उ।**
**थेरजुवाणाणट्ठा सण्हे थुल्लंमि य विभासा ॥७२२॥ नि०**

**दुगुणो** गाहा । **द्विगुणश्चतुर्गुणो वा** कृतः सन् यथा **हस्त**प्रमाण**श्चतुरस्रश्च** भवति तथा **चोलपट्टकः** कर्त्तव्यः, कस्यार्थमित्यत आह– **थेरजुवाणाणट्ठा,-स्थविराणां यूनां चार्थाय** कर्त्तव्यः, स्थविराणां द्विहस्तो यूनां च चतुर्हस्त इति भावना, **सण्हे थुल्लंमि य विभास** त्ति, यदि परमयं विशेषः, यदुत स्थविराणां **श्लक्ष्णो**ऽसावेव चोलपट्टकः क्रियते यूनां पुनः **स्थूल** इति ॥७२२॥

किमर्थं पुनरसौ चोलपट्टकः क्रियते ? इत्यत आह –

**११३९ [२]वेउव्वि य [३]वाउडे वातिए हिए खद्ध [४]पजणणे चेव ।**
**तेसिं [५]अणुग्गहट्ठा लिंगुदयट्ठा य पट्टो उ ॥७२३॥ नि०**

**वेउव्वि य** गाहा । यस्य साधोः प्रजननं **वैक्रियं** भवति विकृतमित्यर्थः, यथा दाक्षिणात्यपुरुषाणां [६]चोपार्थं विध्यते प्रजननं तच्च विकृतं भवति ततश्च तत्प्रच्छादनार्थमनुग्रहाय चोलपट्टकः क्रियते, तथाऽ**प्रावृते** कश्चिद् **वातिको** भवति वातेन तत्प्रजननमूच्छूनं भवति ततश्च तदनुग्रहायानुज्ञातः, तथा **ह्रीकः** लज्जालुः कश्चिद् भवति तदर्थम्, तथा **खद्धं** ति बृहत्प्रमाणं स्वभावेनैव कस्यचि**त्प्रजननं** भवति तत**श्चैतेषामनुग्रहार्थम्**, तथा **लिङ्गोदयार्थं च**, कदाचित्स्त्रियं दृष्ट्वा लिङ्गस्योदयो भवति, अथवा तस्या एव स्त्रिया लिङ्गं दृष्ट्वा उदयः स्वलिङ्गस्य भवति, तं प्रत्यभिलाषो भवतीत्यर्थः, तत**श्चैतेषामनुग्रहार्थं चोलपट्टक**ग्रहणमुपदिष्टमिति ॥७२३॥

उक्त ओघोपधिः, इदानीमौपग्रहिकोपधिप्रतिपादनायाह –

**११४० संथारुत्तरप[७]ट्टो अड्ढाइज्जा [८]य आयया [९]हत्था ।**
**दोण्हं पि य वित्थारो हत्थो चउरंगुलं चेव ॥७२४॥ नि०**

---

१. हत्थं ह० हत्थं चउरंसु हे० २. वेउव्व हे० दा० ३. वाइए य हे० ह० ४. सारिए हे० ५. अणुग्गहत्था दा. ६. चूडार्थं वि० क, वेदार्थं वि ख. ७. पट्टा ह० हे० ८. उ ह० हे० ९. हत्थे ह० हे०

**संथारु** गाहा । **संस्तारकस्तथोत्तरपट्टकश्च**, एतौ द्वावप्येकैकोऽर्द्धतृतीयहस्तौ दैर्घ्येण प्रमाणतो भवतः, तथा **द्वयोरप्यनयोर्विस्तारो हस्तश्चत्वारि चाङ्गुलानि** भवतीति ॥७२४॥

आह–किं पुनरेभिः प्रयोजनं संस्तारकादिभिः पट्टकैः ? उच्यते –

**११४१ पाणादिरेणुसंरक्खणट्ठया[1] होंति पट्टगा चउरो ।**
**छप्पइयरक्खणट्ठा तत्थुवरिं खोमियं कुज्जा ॥७२५॥ नि०**

**पाणाति** गाहा । **प्राणिरेणुसंरक्षणार्थं पट्टका** गृह्यन्ते, प्राणिनः पृथिव्यादयः, रेणुश्च स्वपतः शरीरे लगति, अतस्तद्रक्षणार्थं पट्टकग्रहणम्, ते **चत्वारो भवन्ति,** द्वौ संस्तारकोत्तरपट्टकावुक्तावेव, तृतीयो रजोहरणबाह्यनिषद्यापट्टकः पूर्वोक्त एव, चतुर्थः **क्षौमिक** एवाभ्यन्तरनिषद्यापट्टको वक्ष्यमाणकः, एते चत्वारोऽपि प्राणिसंरक्षणार्थं गृह्यन्ते, तत्र **षट्पदीरक्षणार्थं तस्य** कम्बलीसंस्तारक**स्योपरि खोमियं** संस्तारकपट्टकं **कुर्याद्** येन शरीरकम्बलीमयसंस्तारकसंघर्षेण षट्पदा न विराध्यन्त इति ॥७२५॥

इदानीमभ्यन्तरक्षौमनिषद्याप्रमाणप्रतिपादनायाह –

**११४२ रयहरणपट्टमेत्ता[2] अदसागा किंचि वा समतिरेगा ।**
**एकगुणा उ निसेज्जा हत्थपमाणा सपच्छागा ॥७२६॥ नि०**

**रयहरण** गाहा । स **रजोहरणपट्टको**ऽभिधीयते यत्र दशिका लग्नाः, तत्प्रमाणा **अदसागा** दशिकारहिता क्षौमा रजोहरणाभ्यन्तरनिषद्या भवति, **किंचि वा समतिरेग** त्ति **किञ्चिन्मात्रेण वा समधिका** तस्य रजोहरणपट्टकस्य भवतीति, **एकगुण** त्ति **एकैव** सा **निषद्या** भवतीति, **हस्तप्रमाणा** च पृथुत्वेन भवति, **सपच्छाग** त्ति सह बाह्यया निषद्यया हस्तप्रमाणया भवतीति । एतदुक्तं भवति–बाह्याऽपि निषद्या हस्तमात्रैव ॥७२६॥

**११४३ वासोवग्गहिओ पुण दुगुणो उवही उ वासकप्पाई ।**
**आयासंजमहेउं एक्कगुणो[3] सेसओ होइ ॥७२७॥ नि०**

**वासो** गाहा । वर्षासु **वर्षा**काल **औपग्रहिक उपधिर्द्विगुणो**[4] भवति, कश्चासौ ? **वर्षाकल्पादिः, आदि**ग्रहणात् पटलानि, "[A]जो जो बाहिरे हिंडंतस्स तिम्मति सो सो दुगुणो होइ, एक्को तिन्नो पुणो अन्नो घेप्पइ ।" स च वर्षाकल्पादिर्द्विगुणो भवति,

A. यो यो बाह्ये हिण्डतः स्तिम्यति, स स द्विगुणो भवति, एकः स्तिमितः पुनरन्यो गृह्यते ।

१. रक्खणट्ठा ह० हे० २. मत्ता ह० हे० ३. एक्कगुणा दा० ४. अवधि क, ख.

**आत्म**रक्षणार्थं **संयम**रक्षणार्थं च, तत्रात्मसंरक्षणं यद्येकगुणा एव कल्पादयो भवन्ति ततश्च "[A]तेहिं तिन्नेहिं पोट्टसूलेणं मरति, संयमरक्खणत्थं जइ एक्कं चेव कप्पं अइमइलं ओढेऊणं नीहरइ तो तस्स कप्पस्स जं पाणियं पडइ तिन्नस्स तेणं आउक्काओ विणासिज्जइ ।" **शेषस्त्ववधिरेकगुण** एव **भवति** न द्विगुण इति ॥७२७॥

किञ्च –

**११४४ जं पुण सपमाणाओ इसिं हीणाहियं व लब्भेज्जा ।**
**उभयं पि अहाकडयं न संधणा तस्स छेदो वा ॥७२८॥ नि०**

**जं पुण** गाहा । **यत्पुनः** कल्पादिरुपकरणं **स्वप्रमाणादीषद्धीनमधिकं वा लभ्येत,** तदुभयमिति-"[B]ओहियस्स उवग्गहियस्स वा ।" यदिवा **उभयं** तदेव हीनमधिकं वा लब्धं सद् **अहाकडयं यथाकृतम**ल्पपरिकर्म यल्लभ्यते **तस्य न सन्धना** क्रियते हीनस्य, तथा **न छेदः** क्रियतेऽधिकस्य ॥७२८॥

किञ्च –

**११४५ दंडए लट्ठिया चेव चम्मए चम्मकोसए ।**
**चम्मछेदण पट्टे चिलिमिलि धारए गुरू ॥७२९॥ नि०**

**दंडए** गाहा । अयमपर औपग्रहिकोपधिः साधोः, साधोश्चावधिर्दण्डको भवति, **[१]विदण्डकश्च यष्टिश्च** चैवग्रहणाद्वियष्टिश्चेति, अयं सर्वेषामेव पृथक् पृथगौपग्रहिकः, अयमपरो गुरोरेवौपग्रहिकः, कश्चासौ ? **चम्मए** त्ति चर्मकृतिः छवडिया, **चर्मकोशकः** "[C]जत्थ नहरणाई छुब्भति ।" तथा **चर्मछेदनकं** वध्रपट्टिका, यदिवा **चर्मच्छेदनकं** पिप्पलकादि, तथा **पट्टे** त्ति **योगपट्टकः [२]चिलिमिली** चेति, एतानि चर्मादीनि **गुरोरौ**पग्रहिकोऽवधिर्भवतीति ॥७२९॥

**११४६ जं चण्ण एवमादि तवसंजमसाहगं जइजणस्स ।**
**ओहाइरेगगहियं ओवग्गहियं वियाणाहि ॥७३०॥ नि०**

---

A. तैः स्तिमितैः पोट्टशूलेन म्रियते, संयमरक्षणार्थं यद्येकमेव कल्पमतिमलिनं परिधाय निस्सरइ, ततस्तस्य कल्पे यत् पानीयं पतति, स्तिमितस्य तेनाप्कायो विनाश्यते ।

B. औघिकस्य औपग्रहिकस्य वा । C. यत्र नखरदनानि प्रक्षिप्यते ।

१. दण्डकश्च यष्टिश्च चशब्दाद् वि० दा. २. चिलिमिनी च क, ख.

**जं च** गाहा । **यच्चान्यद्वस्तु, एवमादि** उपानहादि **तपःसंयमयोः साधकं यतिजनस्य ओघोपधेरतिरिक्तं गृहीतमौपग्रहिकं तद्विजानीहि** ॥७३०॥

इदानीं यदुक्तं यष्ट्यादि औपग्रहिकं भवति साधूनां तत्स्वरूपं प्रतिपादनायाह –

**११४७ लट्ठी आयपमाणा विलट्ठि चउरंगुलेण परिहीणा ।**
**दंडो बाहुपमाणो विदंडओ कक्खमेत्तो उ ॥७३१॥ नि०**

**लट्ठी** गाहा । **यष्टिरात्मप्रमाणा, वियष्टिरा**त्मप्रमाणा**च्चतुर्भिरङ्गुलैर्न्यू**ना भवति, **दण्डको बाहुप्रमाणः** स्कन्धप्रमाणः, **विदण्डकः कक्षाप्रमाणः**, नालिका भवति आत्मप्रमाणाच्चतुर्भिरङ्गुलैरतिरिक्ता, "[A]तत्थ नालियाए जलं ओत्थग्घिज्जइ, लट्ठीए जवणिया बज्झइ, विलट्ठी कहंचि उवस्सयबारघट्टणी होइ, दंडओ रिउबद्धे घेप्पति भिक्खं भमंतेहिं, विदंडओ वरिसाकाले घेप्पइ, जं सो लहुओ होइ कप्पस्स अब्भिंतरे कियओ निज्जइ जेण आउक्काएण न फुसिज्जइ त्ति" ॥ ७३१॥

इदानीं यष्टिलक्षणप्रतिपादनायाह –

**११४८ एक्कपव्वं पसंसंति दुपव्वा कलहकारिया ।**
**तिपव्वा लाभसंपन्ना चउपव्वा मारणंतिया ॥७३२॥ नि०**

**एक्कपव्वं** गाहा । सुगमा ॥७३२॥

**[ एगपव्वं पसंसंति दोपव्वा कलहकारिया ।**
**तिपव्वा लाभसंपन्ना चउपव्वा मारणंतिया ॥१२६॥**

एकपर्वां-एककत्तलिकारूपां यष्टिं प्रशंसन्ति, पूवाचार्या इति शेषः, द्विपर्वां-द्वे पर्वे-कत्तलिके यस्यां सा द्विपर्वा तां कलहकारिकां राटीकरणहेतुकां वदन्ति, त्रिपर्वां-त्रीणि पर्वाणि यस्यां सा त्रिपर्वा तां त्रिपर्वां लाभेन संपन्नां-लाभकारिकां भणन्ति, चतुष्पर्वां चत्वारि पर्वाणि यस्यां सा चतुष्पर्वा तां चतुष्पर्वां मारणान्तिकां-प्राणत्यागकारिणीं वदन्ति । [य.दि.१२६]]

**११४९ पंचपव्वा उ जा लट्ठी पंथे कलहनिवारणी ।**
**[1]छच्चपव्वा य आयंको सत्तपव्वा [2]निरोगिया ॥७३३॥ नि०**

---

A. तत्र नालिकया जलं स्ताघ्यते, यष्ट्या जवनिका बध्यते, वियष्टि कथञ्चिदुपाश्रयद्वारघट्टनी भवति, दण्डको ऋतुबद्धे गृह्यते भिक्षां भ्रमद्भिः, विदण्डको वर्षाकाले गृह्यते, यत् स लघुको भवति कल्पस्याभ्यन्तरे कृतो नीयते येनाप्कायेन न स्पृश्यत इति ।

१. छपव्वाए हे० ह० २. अरोगिया ख०

**पंचपव्वा उ जा** गाहा । सुगमा ॥७३३॥

**[ पंचपव्वा य जा लट्ठी पंथे कलहनिवारिणी ।**
**छपव्वा य आयंको सत्तपव्वा अरोगिया ॥१२७॥**

तथा पंच पर्वाणि यस्यां सा पंचपर्वा यष्टिः-दण्डरूपा तां पथि-मार्गे कलहनिवारिणीं-राटीनिराकरिणीं कथयन्ति, षट् पर्वाणि यस्यां सा षट्पर्वा तस्याः सकाशात् करग्रहणयोगाद् आतङ्को, भयं भवतीत्यर्थः, सप्त पर्वाणि यस्यां सा सप्तपर्वा सा आरोगिका-रोगाभावरूपा । [य.दि.१२७]]

**११५० चउरंगुलपइट्ठाणा अट्ठंगुलसमूसिया ।**
**सत्तपव्वा उ जा लट्ठी मत्तगयनिवारणी ॥७३४॥ नि०**

**चउरंगुल** गाहा । **चत्वार्यङ्गुलान्यधः प्रतिष्ठानं** यस्या यष्टेः सा तथोच्यते, अष्टौ अङ्गुलानि पर्वोपरि उच्छ्रिता या सा **अष्टाङ्गुलोच्छ्रिता**, शेषं सुगमम् ॥७३४॥

**११५१ अट्ठपव्वाओ असंपत्ती नवपव्वा जसकारिया ।**
**दसपव्वा उ जा लट्ठी तहियं सव्वसंपदा ॥७३५॥ नि०**

**अट्ठपव्वाओ** गाहा । सुगमा ॥७३५॥

**[ अट्ठपव्वा असंपत्ती नवपव्वा जसकारिया ।**
**दसपव्वा उ जा लट्ठी तहियं सव्वसंपया ॥१२८॥**

अष्टौ पर्वाणि यस्यां सा अष्टपर्वा असंपत्-असंपद्योगाद् यष्टिरपि असंपद् उपचारात्, यथा दण्डयोगात् पुरुषोऽपि दण्डः, नव पर्वाणि यस्यां सा नवपर्वा यशःकारिका-यशःकर्तुं शीला, नवशब्दस्य अन्यार्थप्रतिपादकत्वात् सङ्ख्याशब्देन सह योगः अन्यथा (नवपर्वी) नवैवेत्यपि भवति, दश पर्वाणि यस्यां सा दशपर्वा तस्याः सकाशात् सर्वसंपदो भवन्ति । [य.दि.१२८]]

**११५२ चउरंगुलपइट्ठाणी अट्ठंगुलसमूसिया ।**
**हेट्ठोवरिं च पोरा समच्छेज्जा वियाहिया ॥९६॥ प्र०**

**११५३ वंका कीडक्खइया चित्तलिया पोल्लडा य दड्ढा य ।**
**लट्ठी य उड्ढसुक्का वज्जेयव्वा पयत्तेणं ॥७३६॥ नि०**

**वंका** गाहा । सुगमा ॥७३६॥

**[ वंका कीडक्खइया फुल्लडया चेव तहय दड्ढा य ।**
**लट्ठी य उब्भसुक्का वज्जेयव्वा पयत्तेणं ॥१२९॥**

अथ अशुभलक्षणां यष्टिं वर्जयेदित्याह-एवंभूता यष्टिर्वर्जनीया, प्रयत्नेनेति योज्यम्, कथंभूता? वक्रा-असरला, कुब्जाकारेत्यर्थः, तथा कीटकभक्षिता-कीटकखादिता रेखादिना, फुल्लानि-शिखराणि यस्यां सा, तथैव दग्धा च यष्टिः, तावदूर्ध्वशुष्का-स्थानस्थितशुष्का, शुभलक्षणानि च यदाहुः- "घणवड्ढमाणपव्वा निद्धा वन्नेण एगवन्ना य । घणमसिणवट्टपोरा लट्ठि पसत्था जइजणस्स ॥१॥" [य.दि.१२९]]

**११५४ विसमेसु य पव्वेसुं अनिप्फन्नेसु अच्छिसु ।**
**फुडिया फरुसवन्ना य निस्सारा चेव निंदिया ॥७३७॥ नि०**

**११५५ तणूई पव्वमज्झेसु थूला पोरेसु [१]गंठिला ।**
**अथिरा असारजरढा साणपाया य निंदिया ॥७३८॥ नि०**

**विसमेसु य** गाहा । **विषमेषु पर्वसु** सत्सु यष्टिर्न ग्राह्या, एतदुक्तं भवति-एकं पर्वं लघु पुनर्बृहत्प्रमाणं पुनर्लघु पुनर्बृहत्प्रमाणमित्येवं या विषमपर्वा सा न शस्ता, तथाऽ**निष्पन्नानि चाक्षीणि** बीजप्रदेशस्थानानि यस्याः सा निन्दिता, तथा **स्फुटिता परुषवर्णा** रूक्षवर्णेत्यर्थः, तथा **निःसारा** प्रधानगर्भरहितेत्यर्थः सैवंविधा **निन्दितेति** ॥७३७॥

तथेयं च निन्दिता-**तणुगी** गाहा । **तन्वी पर्वमध्येषु** [२]पौरमध्येषु च **स्थूला ग्रन्थियुक्ता,** तथाऽ**स्थिरा**ऽदृढा, तथा **असारजरढा** अकालवृद्धेत्यर्थः । तथा **श्वपादा** चाधः श्वपादरूपा वर्त्तुला या यष्टिः सा **निन्दितेति** ॥७३८॥

इयं च प्रशस्ता –

**११५६ घणवद्धमाणपव्वा निद्धा वन्नेण एगवन्ना य ।**
**घणमसिणवट्टपोरा लट्ठि पसत्था जइजणस्स ॥७३९॥ नि०**

**घण** गाहा । **घनानि वर्द्धमानानि** च **पर्वाणि** यस्याः सा तथोच्यते, तथा **स्निग्धा वर्णेनैकवर्णा च**, तथा **घनानि** निबिडानि **मसृणानि वर्त्तुलानि** च [३]**पोराणि** यस्याः सा तथोच्यते, एवंविधा **यष्टिर्यतिजनस्य प्रशस्तेति** ॥७३९॥

आह–किं पुनरनया कारणम् ? उच्यते –

**११५७ दुट्ठपसुसाणसावय विज्जलविसमेसु उदग[४]मज्झेसु ।**
**लट्ठी सरीररक्खा तवसंजम[५]साहिया भणिया ॥७४०॥ नि०**

१. गंठिसु ह० हे० २. पोरेषु ली. ३. पौराणि । क, ख ४. ०मग्गेसु ह० हे० ५. ०साहणी ह० हे०

**दुट्ठपसु** गाहा । **दुष्टाश्च** ते **पशवश्च श्वानश्च श्वापदाश्च** तेषां संरक्षणार्थं यष्टिर्गृह्यते, तथा **विज्जलः** सकर्दमः प्रदेशस्तथा **विषमेषु** रक्षार्थम्, त**थोदकमध्येषु** च **रक्षार्थं यष्टि**ग्रहणं क्रियते, तथा **तपसः संयमस्य** च **साधिका यष्टिर्भणिते**ति ॥७४०॥

कथं तपःसंयमसाधिका ? इत्यत आह –

**११५८ मोक्खट्ठा नाणाई तणू तयट्ठा [१]तयट्ठिया लट्ठी ।**
**दिट्ठो जहोवयारो कारणतक्कारणेसु तहा ॥७४१॥ नि०**

**मोक्खट्ठा** गाहा । **मोक्षार्थं ज्ञानादीनी**ष्यन्ते, ज्ञानादीनां चार्थाय **तनुः** शरीरमिष्यते, **तदर्था** च **यष्टिः** शरीरार्था यष्टिरित्यर्थः यतः शरीरं यष्ट्याद्युपकरणेन प्रतिपाल्यते, अत्र च **कारणतत्कारणेषूपचारो दृष्टो यथा** घृतं वर्षत्यन्तरिक्षमिति, एवं मोक्षस्य ज्ञानादीनि कारणानि, ज्ञानादीनां च तनुः कारणम्, शरीरस्य च यष्टिरिति ॥७४१॥

किञ्च—न केवलं ज्ञानादीनां यष्टिरुपकरणं वर्त्तते, अन्यदपि यज्ज्ञानादीनामुपकरोति तदेवोपकरणमुच्यते, एतदेवाह –

**११५९ जं जुज्जइ उवगारे उवगरणं तं सि होइ उवगरणं ।**
**अतिरेगं अहिगरणं अजतो अजयं परिहरंतो ॥७४२॥ नि०**

**जं जुज्जइ** गाहा । **यदुपकरणं** पात्रकादि **उपकारे** ज्ञानादीना**मुपयुज्यते तदेवोपकरणं से** तस्य साधो**र्भवति,** यत्पुन**रतिरेकं** ज्ञानादीनामुपकाराय न भवति तत्सर्व**मधिकरणं** भवति, किंविशिष्टस्य सतः ? **अयतो**ऽयत्नवा**नयतम्** [२]अयतनया **परिहरन्** प्रतिसेवमानस्तदुपकरणमधिकरणं भवतीति। परिहरंतो त्ति इयं [३]सामयिकी परिभाषा प्रतिसेवनार्थे वर्त्तत इति ॥७४२॥

**११६० न उ केवलमइरित्तं उवगरणं परिमिअं पि जो अजओ ।**
**परिभुंजइ उवगरणं अहिगरणं तस्स वि होई ॥९७॥ प्र०**

किञ्च-**११६१ उग्गमउप्पायणासुद्धं एसणादोसवज्जियं ।**
**उवहिं धारए भिक्खू पगासपडिलेहणं ॥७४३॥ नि०**

**११६२ उग्गमउप्पायणासुद्धं एसणादोसवज्जियं ।**
**उवहिं धारए भिक्खू जोगाणं [४]साहणट्ठया ॥७४४॥ नि०**

---

१. तयट्ठया ह० हे० २. अयत्नवतः अयतनया० क, ख ३. सामायिकी क. ४. संधारणट्ठया द.

**११६३ उग्गमउप्पायणासुद्धं एसणादोसवज्जियं ।**
**उवहिं धारए भिक्खू अप्पदुट्ठो अमुच्छिओ ।।७४५।। नि०**

**११६४ उग्गमउप्पायणासुद्धं एसणादोसवज्जियं ।**
**उवहिं धारए भिक्खू सदा अज्झत्थविसोहिए ।।७४६।। नि०**

**उग्गम** गाहा । एवंगुणविशिष्टा**मुपधिं धारयेद्भिक्षुः**, किंविशिष्टाम् ? इत्यत आह–**पगासपडिलेहणं प्रकाशे** प्रकटप्रदेशे **प्रत्युपेक्षणं** क्रियते यस्या उपधेस्तामेवंगुणविशिष्टामुपधिं धारयेत्, एतदुक्तं भवति–[१]यस्याः प्रकटमेव कल्पाद्युपधेः प्रत्युपेक्षणा क्रियते, न तु [२]महार्घमौल्याच्चौरभयादभ्यन्तरे या क्रियते, सा तादृशी उपधिर्धारणीयेति ।।७४३।।

**उग्गम** गाहा । [३]सुगमा, नवरं **योगाः** संयमात्मका गृह्यन्ते तेषां [४]**साधनार्थ**मिति ।।७४४।।

**उग्गम** गाहा । सुगमा, नवरम**प्रद्विष्टोऽमूर्च्छितश्च** सन् **धारयेत्** साधुरिति ।।७४५।।

**उग्गम** गाहा । सुगमा, नवरम**ध्यात्मविशुद्ध्या** हेतुभूतया **धारयेत्** ।।७४६।।

किञ्च –

**११६५ अज्झत्थविसोहीए उवगरणं बाहिरं परिहरंतो ।**
**अप्परिग्गहो त्ति भणिओ जिणेहिं तेलुक्कदंसीहिं ।।७४७।। नि०**

**अज्झत्थ** गाहा । **अध्यात्मविशुद्ध्योपकरणं बाह्यं** पात्रकादि **परिहरंतो** प्रतिसेवय**नपरिग्रहिको भणितो जिनैस्त्रैलोक्यदर्शिभिः**, अतो यत्किञ्चिद्धर्मोपकरणं तत्परिग्रहो न भवति ।।७४७।।

अत्राह बोटिकपक्षपाती–यद्युपकरणसहिता अपि निर्ग्रन्था उच्यन्ते, एवं तर्हि गृहस्था अपि निर्ग्रन्थाः, यतस्तेऽपि उपकरणसहिता वर्त्तन्ते । अत्रोच्यते –

**११६६ अज्झत्थविसोहीए जीवनिकाएहिं संथडे लोए ।**
**देसियमहिंसगत्तं जिणेहिं तेलोक्कदंसीहिं ।।७४८।। नि०**

**अज्झत्थ** गाहा । नन्विदमुक्तमेव यदुता**ध्यात्मविशुद्ध्या** सत्युपकरणे निर्ग्रन्थाः

१. यस्याम् क० २. महाढ्यं मोल्यां चौरभयादभ्यन्तरे यस्य प्रत्युप्रेक्षणा क्रियते न सा – क० ३. सुगमा । नास्ति दा० ४. सन्धानार्थमिति क

साधवः, किञ्च यद्यध्यात्मविशुद्धिर्नेष्यते ततः **जीवनिकाएहिं संथडे लोए** त्ति **जीवनिकायै**र्जीवसङ्घातैरयं लोकः संस्तृतो वर्त्तते, ततश्च जीवनिकाय**संस्तृते** व्याप्ते **लोके** कथं नग्नकश्चङ्क्रमन् वधको न भवति यद्यध्यात्मविशुद्धिर्नेष्यते, तस्मादध्यात्मविशुद्ध्या **देशितमहिंसकत्वं जिनैस्त्रैलोक्यदर्शिभि**रिति ॥ ७४८॥

क्व प्रदर्शितं तदित्यत आह –

**११६७ उच्चालियंमि पाए ईरियासमियस्स संकमट्ठाए ।**
**वावज्जेज्ज कुलिंगी मरिज्ज तं जोगमासज्ज ॥७४९॥ नि०**

**११६८ न य तस्स तन्निमित्तो बंधो सुहुमो वि देसिओ समए ।**
**अणवज्जो उ पओगेण सव्वभावेण सो जम्हा ॥७५०॥ नि०**

**उच्चालियंमि** गाहा । **उच्चालित** उत्पाटिते **पादे सतीर्यासमितस्य** साधोः **सङ्क्रमार्थ**मुत्पाटिते पाद इत्यत्र सम्बन्धः, **व्यापद्येत** सङ्घट्टनपरितापनैः, कः ? **कुलिङ्गी** कुत्सितानि लिङ्गानीन्द्रियाणि यस्यासौ कुलिङ्गी द्वीन्द्रियादिः, स परिताप्येदुत्पाटिते पादे सति, **म्रियते** चाऽसौ कुलिङ्गी, **तं** व्यापादन**योगमासाद्य** प्राप्य ॥७४९॥

**न य** गाहा । **न च तस्य तन्निमित्तो** व्यापादननिमित्तो **बन्धः सूक्ष्मोऽपि देशितः समये** सिद्धान्ते, किं कारणम् ? यतोऽनवद्योऽसौ साधुस्तेन व्यापादन**प्रयोगेण** व्यापादनव्यापारेण, कथम् ? **सर्वभावेन** सर्वात्मना मनोवाक्कायकर्मभि[१]रनवद्योऽसौ **यस्मात्त**स्मान्न सूक्ष्मोऽपि बन्धस्तस्येति ॥७५०॥

किञ्च –

**११६९ नाणी कम्मस्स खयट्ठमुट्ठिओ[२]ऽणुट्ठिओ य हिंसाए ।**
**जयइ असढं अहिंसत्थमुट्ठिओ अवहओ सो उ ॥७५१॥ नि०**

**११७० तस्स असंचेययओ संचेययओ य[३] जाइं सत्ताइं ।**
**जोगं पप्प विणस्संति नत्थि हिंसाफलं तस्स ॥७५२॥ नि०**

**११७१ जो य पमत्तो पुरिसो तस्स य जोगं पडुच्च जे सत्ता ।**
**वावज्जंते नियमा तेसिं सो हिंसओ होइ ॥७५३॥ नि०**

१. अनिन्द्यो ख० २. णो ट्ठितो त.द. ३. व जाणि सताणि ह० हे०

**११७२ जे वि न वावज्जंती नियमा तेसिं पि हिंसओ सो उ।**
**सावज्जो उ पओगेण सव्व[1]भावेण सो जम्हा ॥७५४॥ नि०**

**णाणी** गाहा । ज्ञानमस्यास्तीति **ज्ञानी** सम्यग्ज्ञानयुक्त इत्यर्थः, **कर्मणः क्षयार्थं चोत्थित** उद्यत इत्यर्थः । तथा **हिंसायामनवस्थितः** प्राणिव्यपरोपणे न व्यवस्थित इत्यर्थः । तथा **यतते** कर्मक्षपणे प्रयत्नं करोतीत्यर्थः । **असढं** ति शठभावरहितो यत्नं करोति, न पुनर्मिथ्याभावेन, सम्यग्ज्ञानयुक्त इत्यर्थः । तथा **अहिंसत्थमुट्ठिओ** त्ति **अहिंसार्थमुत्थित** उद्युक्तः, किन्तु सहसा कथमपि प्रयत्नं कुर्वतोऽपि प्राणिवधः सञ्जातः **स** एवंवि**धोऽवधक एव** साधुरिति । तत्रानया गाथया भङ्गका अष्टौ सूचितास्तद्यथा –

"[A]नाणी कम्मस्स खयट्ठं उट्ठिओ हिंसाए अणुट्ठिओ १, नाणी कम्मक्खयट्ठमुट्ठिओ हिंसाए य ठिओ २, नाणी कम्मस्स खयट्ठं णवि ठिओ हिंसाए पुण पमत्तोऽवि नवि ठिओ, देवजोगेण कहवि तप्पएसे पाणिणो नासी, एस तइओ असुद्धो य ३, तहा-नाणी कम्मस्स खयट्ठं नोठिओ हिंसाए य [2]ठिओ एस चउत्थो ४, तथा अज्ञानी, मिथ्याज्ञानयुक्त इत्यर्थः । कम्मस्स खए उवट्ठिओ हिंसाए न [3]ठिओ, एसो पंचमो ५, अन्नाणी कम्मणखये उवट्ठिओ हिंसाए य [4]ठिओ, एसो छट्ठो ६, अन्नाणी कम्मस्स खयट्ठं नोट्ठिओ हिंसाए य णोट्ठिओ एस सत्तमो ७, तहा अन्नाणी कम्मस्स खए नोवट्ठिओ हिंसाए य ठिओ एस अट्ठमो ८ ।" तत्र गाथाप्रथमार्द्धेन शुद्धः प्रथमो भङ्गकः कथितः, पश्चार्द्धेन च द्वितीयभङ्गकः सूचितः, कथम् ? जयति त्ति कर्मक्षपणउद्यतः, [5]असढ'त्ति सम्यग्ज्ञानसम्पन्नः अहिंसत्थमुट्ठिओ त्ति [6]अहिंसार्थमुत्थितः, अभ्युद्यतः, किंतु सहसा प्रयत्नं कुर्वतोऽपि प्राणिवधः सञ्जातः, स चैवंविधोऽवधकः

| |
|---|
| ।।। |
| ।।ऽ |
| ।ऽ। |
| ।ऽऽ |
| ऽऽ। |
| ऽ।ऽ |
| ऽ।। |
| ऽऽऽ |

---

A. ज्ञानी कर्मणः क्षयार्थमुत्थित हिंसायामनुत्थितः १, ज्ञानी कर्मक्षयार्थमुत्थित हिंसायां च स्थितः २, ज्ञानी कर्मणः क्षयार्थं नापि स्थितः, हिंसायां पुनः प्रमत्तोऽपि नापि स्थितः, दैवयोगेन कथमपि तत्प्रदेशे प्राणिनो नाऽऽसीत्, एष तृतीयोऽशुद्धश्च ३, तथा- ज्ञानी कर्मणः क्षये नोत्थितो हिंसायां च स्थितः, एष चतुर्थः ४, तथा- अज्ञानी मिथ्याज्ञानयुक्त इत्यर्थः । कर्मणःक्षय उपस्थितो हिंसायां न स्थितः, एष पञ्चमः ५, अज्ञानी कर्मणःक्षय उपस्थितो हिंसायां च स्थितः, एष षष्ठः ६, अज्ञानी कर्मणः क्षये नोत्थितो हिंसायां च नोत्थितः, एष सप्तमः ७, तथा अज्ञानी कर्मणः क्षये नोपस्थितो हिंसायां च स्थितः, एषोऽष्टमः ।

१. भावओ दा० २. ठिओ ४, दा. ३. ठिओ ५, दा. ४. ठिओ ६, दा. ५. असढं ति दा. ६. अहिंसायामुत्थितः दा. ख.

शुद्धभावत्वात् । स्थापना चेयम्—॥७५१॥

**तस्स** गाहा । **तस्यैवं**प्रकारस्य ज्ञानिनः कर्मक्षयार्थमभ्युद्यत**स्यासञ्चेतयतो**ऽजानानस्य, किम् ? सत्त्वानि, कथम् ? प्रयत्नवतोऽपि कथमपि न दृष्टः प्राणी व्यापादितश्च, तथा **सञ्चेतयतो** जानानस्य कथमस्त्यत्र प्राणी ज्ञातो दृष्टश्च न च प्रयत्नं कुर्वतोऽपि रक्षितुं पारितः, ततश्च तस्यैवंविधस्य **यानि सत्त्वानि योगं** कायादि **प्राप्य विनश्यन्ति** तत्र **नास्ति तस्य** साधो**र्हिंसाफलं** साम्परायिकं संसारजननं दुःखजननमित्यर्थः । यदि परमीर्याप्रत्ययं कर्म भवति, तच्चैकस्मिन् समये बद्धमन्यस्मिन् समये क्षपयति ॥७५२॥

**जो य** गाहा । **यश्च प्रमत्तः पुरुषस्तस्यै**वंविधस्य सम्बन्धिनं **योगं** कायादि [1]**प्रतीत्य** प्राप्य **ये सत्त्वा व्यापाद्यन्ते तेषां** सत्त्वानां **नियमादवश्यं सः** पुरुषो **हिंसको भवति** तस्मात् [2]प्रमत्तताजनितानि कर्मबन्धकारणानि ॥७५३॥

**जे वि** गाहा । **येऽपि** सत्त्वा **न व्यापाद्यन्ते** [3]**तेषामप्यसौ नियमाद्धिंसको** भवति, कथम् ? **सावज्जो उ पयोगेण** सहावद्येन वर्त्तत इति **सावद्यः** सपाप इत्यर्थः, ततश्च सावद्यो यतः **प्रयोगेण** कायादिना **सर्वभावेन** सर्वैः कायवाङ्मनोभिः, अतोऽव्यापादयन्नपि व्यापादक एवासौ पुरुषः सपापयोगत्वादिति ॥७५४॥

यतश्चैवमतः —

**११७३ आया चेव अहिंसा आया हिंस त्ति निच्छओ एसो ।**
**जो होइ अप्पमत्तो अहिंसओ हिंसओ इयरो ॥७५५॥ नि०**

**आया चेव** गाहा । **आत्मैवाहिंसा आत्मैव हिंसा इत्ययं निश्चयः** परमार्थ इत्यर्थः । कथमसावहिंसकः कथं वा हिंसकः ? इत्यत आह—**जो होइ** इत्यादि, **यो भवत्यप्रमत्तः** प्रयत्नवानित्यर्थः, स **खल्वे**वंविधो**ऽहिंसको** भवति, **हिंसओ इयरो** त्ति **इतरः** प्रमत्तो यः स **हिंसको** भवतीत्ययं परमार्थः । [4]अथवा नयाभिप्रायेणेयं गाथा व्याख्यायते, तत्र नैगमस्य जीवेष्वजीवेषु च हिंसा, तथा च वक्तारो लोके दृष्टाः, यदुत जीवोऽनेन हिंसितो विनाशितः, तथा घटोऽनेन हिंसितो विनाशितः, ततश्च सर्वत्र हिंसाशब्दानुगमाद् जीवेष्वजीवेषु च हिंसा नैगमस्य, अहिंसाप्येवमेवेति सङ्ग्रहव्यवहारयोः षट्सु जीवनिकायेषु हिंसा, सङ्ग्रहश्चात्र देशग्राही द्रष्टव्यः

---

१. कायादिकं प्रतीत्य दा. २. प्रमत्तता कर्मबन्धकारणम् क० ३. कः कुतः ? ४. अथवाऽनेनाभिप्रायेण दा०

सामान्यरूपश्च नैगमान्तर्भावी, व्यवहारश्च स्थूलविशेषग्राही लोकव्यवहरणशीलश्चायम्, तथा चाह-लोको बाहुल्येन षट्स्वेव जीवनिकायेषु हिंसामिच्छतीति । ऋजुसूत्रश्च प्रत्येकं प्रत्येकं जीवे जीवे हिंसां व्यतिरिक्तामिच्छतीति । शब्दसमभिरूढैवंभूताश्च नया आत्मैवाहिंसा आत्मैव हिंसेति, एतदभिप्रायेणैवाह–'आया चेव' इत्यादि आत्मैवाहिंसा आत्मैव हिंसा इत्ययं निश्चयनयाभिप्रायः, कुतः ? यो भवत्यप्रमत्तो जीवः स खल्वहिंसकः, इतरश्च प्रमत्तः, ततश्च स एव हिंसको भवति, तस्मादात्मैवाहिंसा आत्मैव हिंसा, अयं निश्चयः परमार्थ इति ॥७५५॥

इदानीं प्रकारान्तरेण तथाविधपरिणामविशेषाद् हिंसाविशेषं प्रतिपादयन्नाह –

**११७४ जो य पओगं जुंजइ हिंसत्थं जो य अन्नभावेणं ।**
**अमणो य जो पउंजइ इत्थ विसेसो महं दिट्ठो[1] ॥७५६॥ नि०**

**जो य** गाहा । **यश्च** जीव**प्रयोगं** मनोवाक्कायकर्मभि**र्हिंसार्थं युनक्ति, प्रयुङ्क्ते यश्चान्यभावेन,** एतदुक्तं भवति–लक्ष्यवेधनार्थं काण्डं क्षिप्तं यावताऽन्यस्य मृगादेर्लग्नम्, ततश्चान्यभावेन यः प्रयोगं प्रयुङ्क्ते तस्यानन्तरोक्तात् पुरुषविशेषाद् महान् विशेषः । तथा **अमनस्कश्च** मनोरहितः संमूर्च्छन इत्यर्थः । स च यं प्रयोगं कायादिकं प्रयुङ्क्ते, अत्र विशेषो महानुक्तः, एतदुक्तं भवति–**यो** जीवो मनोवाक्कायकर्मभिर्हिंसार्थं प्रयोगं **प्रयुङ्क्ते** तस्य महान् कर्मबन्धो भवति, यश्चान्यभावेन प्रयुङ्क्ते तस्याल्पतरः कर्मबन्धः, यश्चामनस्कः प्रयोगं प्रयुङ्क्ते तस्याल्पतमः कर्मबन्धः, तत**श्चात्र विशेषो महान् दृष्ट** इति ॥७५६॥

एतदेव व्याख्यानयन्नाह –

**११७५ हिंसत्थं जुंजंतो सुमहं दोसो अणंतरं[2] इयरो ।**
**अमणो य अप्पदोसो जोगनिमित्तं च विन्नेओ ॥७५७॥ नि०**

**हिंसत्थं** गाहा । **हिंसार्थं** प्रयोगं **प्रयुञ्जतः सुमहान् दोषो** भवति, **इतरश्च** योऽन्यभावेन प्रयुङ्क्ते तस्य मन्दतरो दोषो भवत्यल्पतर इत्यर्थः । तथा **अमनस्कश्च** संमूर्च्छनप्रयोगं युञ्ज**नल्पतमदोषो** भवति । अतो **योगनिमित्तं** योगकारणिकः कर्मबन्धो **विज्ञेय** इति ॥७५७॥

किञ्च –

---

१. वुत्तो. छ.त.द.प.हे. २. अणंतरो हे०

**११७६ रत्तो वा दुट्ठो वा मूढो वा जं पउंजइ पओगं ।**

**हिंसा वि तत्थ जायइ तम्हा सो हिंसओ होइ ॥७५८॥ नि०**

**रत्तो वा** गाहा । रक्त आहाराद्यर्थं सिंहादिः, द्विष्टः सर्पादिः, मूढो वैदिकादिः, स एवंविधो **रक्तो वा द्विष्टो वा मूढो वा यं प्रयोगं** कायादिकं **प्रयुङ्क्ते तत्र हिंसाऽपि जायते,** अपिशब्दादनृतादि चोपजायते, अथवा हिंसाऽप्येवं रक्तादिभावेनोपजायते न तु हिंसामात्रेणेति वक्ष्यति, **तस्मात्स हिंसको भवति** यो रक्तादिभावयुक्त इति, न तु हिंसयैव हिंसको भवति ॥७५८॥

तथा चाह –

**११७७ न य हिंसामित्तेणं सावज्जेणावि हिंसओ होइ ।**

**सुद्धस्स उ संपत्ती अफला भणिया[1] जिणवरेहिं ॥७५९॥ नि०**

**न य** गाहा । **न च हिंसामात्रेण सावद्येनापि हिंसको भवति,** कुतः? **शुद्धस्य** पुरुषस्य कर्म**संप्राप्तिरफला भणिता जिनवरै**रिति ॥७५९॥

किञ्च –

**११७८ जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।**

**सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स ॥७६०॥ नि०**

**जा जय०** गाहा । **या विराधना यतमानस्य भवेत्,** किंविशिष्टस्य सतः ? **सूत्रविधिना समग्रस्य** युक्तस्य गीतार्थस्येत्यर्थः, तस्यैवंविधस्य या भवति विराधना **सा निर्जराफला भवति,** एतदुक्तं भवति–एकस्मिन् समये बद्धं कर्मान्यस्मिन् समये क्षपयतीति, किंविशिष्टस्य ? **अध्यात्मविशोधियुक्तस्य** विशुद्धभावस्येत्यर्थः ॥७६०॥

किञ्च –

**११७९ परमरहस्समिसीणं समत्तगणिपिडगझरितसाराणं ।**

**परिणामियं पमाणं निच्छयमवलंबमाणाणं ॥७६१॥ नि०**

**परम** गाहा । **परमं** प्रधानमिदं **रहस्यं तत्त्वम्,** केषाम् ? **ऋषीणां** सुविहितानाम्, किंविशिष्टानाम् ? **समग्रं** च तद् **गणिपिटकं** च समग्रगणिपिटकं तस्य **क्षरितः** पठितः **सारः** प्राधान्यं यैस्ते समग्रगणिपिटकक्षरितसारास्तेषामिदं रहस्यम्, यदुत **पारिणामिकं प्रमाणं** परिणामे भवं पारिणामिकम्, शुद्धोऽशुद्धश्च चित्तपरिणाम इत्यर्थः,

---

१. देसिया समए ख.

किं विशिष्टानां सतां पारिणामिकं प्रमाणम् ? **निश्चयनयमवलम्बमानानाम्**, यतः शब्दादिनिश्चयनयानामिदमेव दर्शनम्, यदुत–पारिणामिकमिच्छन्तीति ॥७६१॥

आह–यद्ययं निश्चयस्ततो[१]ऽयमेवावलम्ब्यतां किमन्येनेति ? उच्यते –

**११८० निच्छयमवलंबंता निच्छयओ निच्छयं अयाणंता ।**
**नासंति चरणकरणं बाहिरकरणालसा केइ ॥७६२॥ नि०**

**निच्छय** गाहा । **निश्चयमवलम्बमानाः** पुरुषा **निश्चयतः** परमार्थतो **निश्चयमजानानाः** सन्तो **नाशयन्ति चरणकरणम्**, कथम् ? **बाह्यकरणालसा** बाह्यं वैयावृत्त्यादिकरणं तत्र अलसाः प्रयत्नरहिताः सन्तश्चरणकरणं नाशयन्ति । **केचिदिदं** चाङ्गीकुर्वन्ति यदुत परिशुद्धपरिणाम एव प्रधानो न तु बाह्यक्रिया, एतच्च नाङ्गीकर्त्तव्यं यतः परिणाम एव बाह्यक्रियारहितः शुद्धो न भवतीति, ततश्च निश्चयव्यवहारमतमुभयरूपमेवाङ्गीकर्त्तव्यमिति ॥७६२॥

उक्तमुपधिद्वारम्, इदानीमायतनद्वारव्याचिख्यासया सम्बन्धं प्रतिपादयन्नाह–

**११८१ एवमिणं उवगरणं धारेमाणो विहीए परिसुद्धं ।**
**हवति गुणाणायतणं [२]अविहि असुद्धे अणाययणं ॥७६३॥ नि० । दारगाहा ।**

**एवमिणं** गाहा । **एवमुक्तन्यायेनुपकरणं धारयन् विधिना परिशुद्धं** सर्वदोषवर्जितम्, किं भवति ? **गुणानामायतनं** स्थानं भवति । अथ पूर्वोक्तविपरीतं क्रियते-यदुताविधिना धारयत्यविशुद्धं च तदुपकरणम्, ततो**ऽविधिनाऽशुद्धं** ध्रियमाणं तदेवोपकरण**मनायतनम**स्थानं **भवती**ति ॥७६३॥

इदानीमनायतनस्यैव पर्यायशब्दान् प्रतिपादयन्नाह –

**११८२ सावज्जमणायतणं असोहिठाणं कुसीलसंसग्गी ।**
**एगट्ठा होंति पदा एते विवरीय [३]आयणे ॥७६४॥ नि०**

**सावज्ज** गाहा । **सावद्यमनायतनमशोधिस्थानं कुसीलसंसग्गी**, एतान्ये**कार्थिकानि पदानि भवन्ति, एतान्येव च विपरीतानि आयतने भवन्ति,** कथम्? असावद्यमायतनं शोधिस्थानं सुसीलसंसग्गीति ॥७६४॥

अत्र चानायतनं वर्जयित्वाऽऽयतनं गवेषणीयम्, एतदेवाह –

---

१. स्ततोऽयमेवालम्बमानानां किम० । क. २. अविहि असुद्धं ता० अविसुद्धे उ ह० हे० ३. आयणा ह० दा०

**११८३ वज्जेत्तु अणायतणं आयतणगवेसणं सया कुज्जा ।**
**तं तु पुण अणाययणं नायव्वं दव्व[१]भावेणं ॥७६५॥ नि०**

**वज्जेत्तु** गाहा । **वर्जयित्वाऽनायतनमायतनस्य गवेषणं सदा** सर्वकालं **कुर्यात्, तत्पुनरनायतनं द्रव्यतो भावतश्च विज्ञेयम्** ॥७६५॥

तत्र द्रव्यानायतनं प्रतिपादयन्नाह –

**११८४ दव्वे रुद्दाइ[२]घरं अणायतणं भावओ दुविहमेव ।**
**लोइय लोगुत्तरियं तहियं पुण लोइयं इणमो ॥७६६॥ नि० .**

**११८५ खरिया तिरिक्खजोणी तालायर समण माहण सुसाणे ।**
**वग्गुरिय वाह गुम्मिय हरिएस पुलिंद मच्छंधा ॥७६७॥ नि०**

**दव्वे** गाहा । **द्रव्ये** द्रव्यविषय**मनायतनं रुद्रादीनां** गृहम् । इदानीं भावतोऽनायतनमुच्यते, तत्र **भावतो द्विविधमेव लौकिकं लोकोत्तरं** च, **तत्रा**पि **लौकिकमनायतनमिदं** वर्त्तते ॥७६६॥

**खरिया** गाहा । **खरिय** त्ति द्व्यक्षरिका यत्रास्ते तदनायतनम्, तथा **तिर्यग्योनयश्च** यत्र तदप्यनायतनम्, **तालायरा** चारणास्ते यत्र तदनायतनम्, **श्रमणाः**शाक्यादयस्ते यत्र तदनायतनम्, तथा **ब्राह्मणा** यत्र तदनायतनम्, [१४२]**श्मशानं** चानायतनम्, तथा [१४३]**वागुरिका व्याधा गुल्मिका** गोत्तिपाला [१४४]**हरिएसा पुलिन्दा मत्स्यबन्धाश्च** [ **मत्स्यबन्धिनश्च** ] यत्र तदनायतनमिति, एतेषु चानायतनेषु क्षणमपि न गन्तव्यम् ॥७६७॥

तथा चाह –

**११८६ खणमवि न खमं [३]गंतुं अणायतणसे[४]वणा सुविहियाणं ।**
**जग्गंधं होइ वणं तग्गंधो मारुओ वाइ ॥७६८॥ नि०**

**११८७ जं गंधं होइ वणं [५]तं गंधं तत्थ मारुओ वाइ ।**
**कुसुमेहिं सह वसंता तिला वि तं गंधिआ हुंति ॥९८॥ प्र०**

---

१४२. श्मशानः शबानां शयनमस्मिन्निति श्मशानम्, पितृवनम् । (उत्त.अ.२ २० गा.)

१४३. वागुरिकः पाशप्रयोगेण मृगघातके, (बृ. १ उ.) मृगजालजीविनी (व्य.३ उ.)

१४४. हरिएस–हरिकेशः–मातङ्गः, चाण्डालः, (उत्त.१२ अ.) चण्डालजातिविशेषः । ख.

१. भावेहिं ह० हे० भावे य द. २. घरा दा० ३. काउं. दा. । ४. सेवणं ह० ५. तं गंधो चेव.प.त.

**११८८ जे अन्ने एवमादी लोगंमि दुगुंछिया गरहिया य ।**
**समणाण व समणीण व न कप्पई तारिसे वासो ।।७६९।। नि०**

**खणमपि** गाहा । **क्षणमपि न क्षमं न** योग्यमनायतनं गन्तुम्, तथा **सेवना चानायतनस्य सुविहितानां कर्त्तुं न क्षमं न युक्तम्,** यतो दोषो भवति–[1]**जग्गंधं होइ वणं तग्गंधं मारुओ वाति** त्ति सुगमम्[2] ।।७६८।।

**[जं गंध गाथा । यद् गन्धं वनं स्यात्तद्गन्धस्तत्र मारुतो वाति कुसुमैः सह वसन्तस्तिला अपि तद्गन्धिका भवन्ति** ।।ओमाटी. प्र.९८ ]

**जे अण्णे गाहा । येऽन्ये एवमादयो लोके जुगुप्सिता गर्हिताश्च** द्व्यक्षरिकाद्य-नायतनविशेषास्तत्र **श्रमणानां श्रमणीनां वा न कल्पते तादृशे वास** इति ।।७६९।।

उक्तं लौकिकं भावानायतनम्, इदानीं लोकोत्तरं भावानायतनं प्रतिपादयन्नाह –

**११८९ अह लोउत्तरियं पुण अणायतणं भावतो मुणेयव्वं ।**
**जे संजमजोगाणं करेंति हाणिं समत्था वि ।।७७०।। नि०**

**अह** गाहा । **अथ लोकोत्तरं पुनरनायतनं भावत** इदं **ज्ञातव्यम्, ये** प्रव्रजिताः **संयमयोगानां कुर्वन्ति हानिं समर्था अपि** सन्तस्तल्लोकोत्तरमनायतनम् ।।७७०।।

तैश्चैवंविधैः संसर्गी न कर्त्तव्या, अत आह –

**११९० अंबस्स य निंबस्स य दोण्हं पि समागयाइं मूलाइं ।**
**संसग्गीए विणट्ठो अंबो निंबत्तणं पत्तो ।।७७१।। नि०**

**अंबस्स** गाहा । सुगमा ।।७७१।।

[अथ भवतो दृष्टान्तमात्रेण परितोषः ततो मद्विवक्षितार्थप्रतिपादकोऽपि दृष्टान्तोऽस्त्येव, शृणु–

**अंबस्स य निंबस्स य दुण्हं पि समागयाइं मूलाइं ।**
**संसग्गीइ विणट्ठो अंबो निंबत्तणं पत्तो ।।१११७।।**

व्याख्या - चिरपतिततिक्तनिम्बोदकवासितायां भूमौ आम्रवृक्षः समुत्पन्नः, पुनस्तत्राऽऽम्रस्य च निम्बस्य च द्वयोरपि 'समागते' एकीभूते मूले, ततश्च 'संसर्ग्या' सङ्गत्या विनष्ट आम्रो निम्बत्वं प्राप्तः-तिक्तफलः संवृत्त इति गाथार्थः ।। [आव.नि.-१११७]]

पर आह –

---

१. हंदि समुद्दमुवगयं उदयं लवणत्तणमुवेइ । इति पाठान्तरम् - ख. त. । हंदि उपप्रदर्शने ख. हंदि इत्युपदर्शने आव.नि. २. जं गंधं होइ वणं तं गंधो - प.भ. दव्वेणं प. ।

**११९१ सुचिरं पि अच्छमाणो नलथंबो उच्छुवाडमज्झंमि ।**
**कीस न जायइ महुरो जइ संसग्गी पमाणं ते ? ॥७७२॥ नि०**

**सुइरं पि** गाहा । सुगमा ॥ ७७२॥

[तदेवं संसर्गिदोषदर्शनात्त्याज्या पार्श्वस्थादिसंसर्गिरिति । पुनरप्याह चोदकः-नन्वेतदपि सप्रतिपक्षं, तथाहि –

**सुचिरंपि अच्छमाणो नलथंभो उच्छुवाडमज्झंमि ।**
**कीस न जायइ महुरो ? जइ संसग्गी पमाणं ते ॥१११८॥**

व्याख्या-'सुचिरमपि' प्रभूतमपि कालं तिष्ठन् 'नलस्तम्बः' वृक्षविशेष इक्षुवाटमध्ये इक्षुसंसर्ग्या किमिति न जायते मधुरः ? यदि संसर्गी प्रमाणं तवेति गाथार्थः ॥ [आव.नि.-१११८]]

तथा पुनरपि पर आह –

**११९२ सुचिरं पि अच्छमाणो वेरुलिओ कायमणियओमीसे ।**
**न उवेइ कायभावं पाहन्नगुणेण नियएण ॥७७३॥ नि०**

**सुइरं पि** गाहा । सुगमा ॥७७३॥

[अधुना वैडूर्यपदव्याख्या, अस्य चायमभिसम्बन्धः-पार्श्वस्थादिसंसर्गदोषादवन्दनीयाः साधवोऽप्युक्ताः, अत्राह चोदकः-कः पार्श्वस्थादिसंसर्गमात्राद्गुणवतो दोषः ? तथा चाह –

**सुचिरं पि अच्छमाणो वेरुलिओ कायमणीयउम्मीसो ।**
**नोवेइ कायभावं पाहण्णगुणेण नियएणं ॥१११४॥**

व्याख्या – 'सुचिरमपि' प्रभूतरूपं कालं तिष्ठन् वैडूर्यः-मणिविशेषः, काचाश्च ते मणयश्च काचमणयः कुत्सिताः काचमणयः काचमणिकास्तैरुत्-प्राबल्येन मिश्रः काचमणिकोन्मिश्रः 'नोपैति' न याति 'काचभावं' काचधर्मं 'प्राधान्यगुणेन' वैमल्यगुणेन 'निजेन' आत्मीयेन, एवं सुसाधुरपि पार्श्वस्थादिभिः सार्द्धं संवसन्नपि शीलगुणेनात्मीयेन न पार्श्वस्थादिभावमुपैति, अयं भावार्थ इति गाथार्थः । [आव.नि.-१११४]]

आचार्य आह –

**११९३ भावुगअभावुगाणि य लोए दुविहाणि होंति दव्वाणि ।**
**वेरुलिओ तत्थ मणी अभावुगो अन्नदव्वेहिं ॥७७४॥ नि०**

**भावुगअभावुगाणि य** गाहा । **द्रव्याणि द्विविधानि भवन्ति-भावुकानि अभावुकानि च,** तत्राम्रवृक्षो भावुको वर्त्तते नलस्तम्बश्चाभावुकः, ततश्चाभावुक-

मङ्गीकृत्यैतद् द्रष्टव्यमिति, यानि पुनर्भावुकानि द्रव्याणि तेषां न्यूनो यः शततमो भागः स यदि लवणादिना व्याप्यते ततस्तद् द्रव्यं चर्मादि लवणभावेन परिणमति ॥७७४॥

एतदेवाह –

**११९४ ऊणगसयभागेणं बिंबाइं परिणमंति तब्भावं ।**
**लवणागराइसु जहा वज्जेह कुसीलसंसग्गिं[1] ॥७७५॥ नि०**

**ऊणग** गाहा । न्यूनश्चासौ शततमभागश्च न्यूनशततमभागस्तेन **न्यूनशततमभागेन** लवणादिव्याप्तेन **बिम्बानि** चर्मकाष्ठादीनि तानि लवणेन न्यूनशततमभागस्पृष्टेन **तद्भावं** लवणभावं **परिणमन्ति लवणाकरादिषु यथा**, एतदुक्तं भवति–काष्ठादिबिम्बस्य शततमो यो विभागोऽसावपि न्यूनः स एवंविधो लवणाकरादिषु यदि स्पर्शं प्राप्नोति ततस्तत्काष्ठं सर्वं लवणरूपं भवति, तस्मात् स्तोकाऽपि कुशीलसंसर्गि बहुमपि साधुसङ्घातं दूषयति यस्मात्तस्माद्**वर्जयेत् कुशीलसंसर्गिमिति** ॥७७५॥

तथा –

**११९५ जीवो अणाइनिहणो तब्भावणभाविओ य संसारे ।**
**खिप्पं सो भाविज्जइ मेलणदोसाणुभावेणं ॥७७६॥ नि०**

**जीवो** गाहा । सुगमा ॥७७६॥

[स्यान्मतिः-जीवोऽप्येवम्भूत एव भविष्यति न पार्श्वस्थादिसंसर्गेण तद्भावं यास्यतीत्येतच्चासत्, यतः –

**जीवो अणाइनिहणो तब्भावणभाविओ य संसारे ।**
**खिप्पं सो भाविज्जइ मेलणदोसाणुभावेणं ॥१११६॥**

व्याख्या-'जीवः' प्राग्निरूपितशब्दार्थः, स हि अनादिनिधनः अनाद्यपर्यन्त इत्यर्थः, 'तद्भावनाभावितश्च' पार्श्वस्थाद्याचरितप्रमादादिभावनाभावितश्च 'संसारे' तिर्यग्नरनारकामरभवानुभूतिलक्षणे, ततश्च तद्भावनाभावितत्वात् 'क्षिप्रं' शीघ्रं स 'भाव्यते' प्रमादादिरसादिग्रहः, तत्र किल लोहमपि तद्भावमासादयति, तथा पार्श्वस्थाद्यालापमात्रसंसर्ग्याऽपि सुविहितास्तमेव भावं यान्ति, अतः 'वज्जेह कुसीलसंसग्गिं, त्यजत कुशीलसंसर्गिमिति गाथार्थः । [आव.नि.-१११६]]

---

१. ०संसग्गी ख.त.द.

**११९६ जह नाम महुरसलिलं सागरसलिलं कमेण संपत्तं ।**
**पावइ लोणियभावं मेलणदोसाणुभावेणं ॥७७७॥ नि०**

**जह नाम** गाहा । सुगमा ॥ ७७७॥

[पुनरपि संसर्गिदोषप्रतिपादनायैवाऽऽह -

**जह नाम महुरसलिलं सायरसलिलं कमेण संपत्तं ।**
**पावेइ लोणभावं मेलणदोसाणुभावेणं ॥११२०॥**

व्याख्या-'यथे'त्युदाहरणोपन्यासार्थः, 'नामे'ति निपातः, 'मधुरसलिलं' नदीपयः तल्लवणसमुद्रं 'क्रमेण' परिपाट्या सम्प्राप्तं सत् 'पावेइ लोणभावं' प्राप्नोति-आसादयति लवणभावं-क्षारभावं मधुरमपि सन्, मीलनदोषानुभावेनेति गाथार्थः । [आव.नि.-११२०]]

**११९७ [1]एवं खु सीलवंतो असीलवंतेहिं मेलिओ संतो ।**
**पावइ गुणपरिहाणीं [2]मेलणदोसाणुभावेणं ॥७७८॥ नि०**

**एवं खु** गाहा । [3]सुगमा ॥७७८॥

**[ एवं खु सीलवंतो असीलवंतेहिं मीलिओ संतो ।**
**पावइ गुणपरिहाणिं मेलणदोसाणुभावेणं ॥११२१॥**

व्याख्या-खुशब्दोऽवधारणे, एवमेव शीलमस्यास्तीति शीलवान्, स खलु 'अशीलवद्भिः' पार्श्वस्थादिभिः सार्द्धं मीलितः सन् 'प्राप्नोति' आसादयति गुणा-मूलोत्तरगुणलक्षणास्तेषां परिहाणिः-अपचयः गुणपरिहाणिः ताम्, तथैहिकांश्चापायांस्तत्कृतदोषसमुत्थानिति, मीलनदोषानुभावेनेति गाथार्थः। [आव.नि.-११२१]]

यस्मादेवं तस्मात् -

**११९८ नाणस्स दंसणस्स य चरणस्स य जत्थ होइ उवघातो ।**
**वज्जेज्जऽवज्जभीरू अणाययणवज्जओ खिप्पं॥७७९॥ नि०**

**णाणस्स** गाहा । **ज्ञानस्य दर्शनस्य चारित्रस्य च यत्रा**नायतने **भवत्युपघात**-स्तद्**वर्जयेदवद्यभीरुः** साधुः, किंविशिष्टः ? अनायतनं वर्जयतीति **अनायतनवर्जकः**, स एवंविधः **क्षिप्रम**नायतनमुपघात इति मत्वा वर्जयेदिति ॥७७९॥

इदानीं विशेषतोऽनायतनं प्रदर्शयन्नाह -

---

१. एवमिह ह० हे० २. मीलण ह० हे० ३. सुगमाः । दा०

**११९९ जत्थ साहम्मिया बहवे भिन्नचित्ता अणारिया ।**
**मूलगुणपडिसेवी अणायतणं तं विआणाहि ॥७८०॥ नि०**

**१२०० जत्थ साहम्मिया बहवे भिन्नचित्ता अणारिया ।**
**उत्तरगुणपडिसेवी अणायतणं तं विआणाहि ॥७८१॥ नि०**

**१२०१ जत्थ साहम्मिया बहवे भिन्नचित्ता अणारिया ।**
**लिंगवेसपडिच्छन्ना अणायतणं तं विआणाहि ॥७८२॥ नि०**

**जत्थ साहम्मिया** गाहा । सुगमा, नवरं मूलगुणाः प्राणातिपातादयस्तान् प्रतिसेवन्त इति **मूलगुणप्रतिसेविनस्ते यत्र** निवसन्ति **तदनायतनमिति** ॥७८०॥

**जत्थ** गाहा । सुगमा, नवरमुत्तरगुणाः 'पिण्डस्स जा विसोही' (निभा.३) इत्यादि, तत्प्रतिसेविनो ये ॥७८१॥

**जत्थ** गाहा । सुगमा, नवरं **लिङ्गवेषमात्रेण प्रतिच्छन्ना** बाह्यतोऽभ्यन्तरतः पुनर्मूलगुणप्रतिसेविन उत्तरगुणप्रतिसेविनश्च ते **यत्र तदनायतनमिति**, उक्तं लोकोत्तर-भावानायतनम्, तत्प्रतिपादनाच्चोक्तमनायतनस्वरूपम् ॥७८२॥

इदानीमायतनप्रतिपादनायाह –

**१२०२ आययणं पि य दुविहं दव्वे भावे य होइ नायव्वं ।**
**दव्वंमि जिणघराई भावंमि य होइ तिविहं तु ॥७८३॥ नि०**

**आययणं पि** गाहा । **आयतनमपि द्विविधं द्रव्य**विषये **भाव**विषये **च ज्ञातव्यम्**, तत्र **द्रव्ये जिनगृहादि, भावे भवति त्रिविधं** ज्ञानदर्शनचारित्ररूपमायतनमिति ॥७८३॥

**१२०३ जत्थ साहम्मिया बहवे सीलवंता बहुस्सुया ।**
**[1]चारित्तायारसंपन्ना आययणं तं वियाणाहि ॥७८४॥ नि०**

**जत्थ साहम्मिया** गाहा । सुगमा ॥७८४॥

[तथा –

जत्थ गाथा । यत्र साधर्मिकाः साधवो बहवः शीलवन्तोऽष्टादशसहस्रशीलाङ्गवन्तः, बहुश्रुताः, चारित्राचारेण क्रियया सम्पन्ना आयतनं तद्विजानीहि । [ओ.नि.मा.नि.७८४]]

---

१. चरित्तायार हे० ह०

**१२०४ सुंदरजणसंसग्गी सीलदरिद्दं पि कुणइ सीलड्ढं ।**
**जह मेरुगिरीजायं तणं पि कणगत्तणमुवेइ ॥७८५॥ नि०**

**सुंदर** गाहा । सुगमा ॥७८५॥

[यतः –

सुंदरजणसंसग्गी गाथा । मेरुगिरिलग्नं मेरुगिरौ जातम् । उक्तमायतनद्वारम् । एवं पडिलेहणं च पिंडं इति गाथायास्तुर्यम् अनायतनद्वारम् । [ओ.नि.मा.नि.७८५]]

उक्तमायतनद्वारम्, इदानीं प्रतिसेवनाद्वारव्याचिख्यासया सम्बन्धं प्रतिपादनायाह–

**१२०५ एवं खलु आययणं निसेवमाणस्स होइ साहुस्स ।**
**कंटगपहे व छलणा रागद्दोसे समासज्ज ॥७८६॥ नि० । दारगाहा ।**

**एवं खलु** गाहा । **एवमुक्तन्यायेनायतनं सेवमानस्यापि साधोर्भवेत् कण्टकपथ इव छलना,** किमासाद्य ? अत आह–**रागद्वेषौ समाश्रित्य** ॥७८६॥

सा च रागद्वेषप्रतिसेवना द्विविधा भवति, एतदेवाह –

**१२०६ पडिसेवणा वि दुविहा मूलगुणे चेव [1]उत्तरगुणे य ।**
**मूलगुणे छट्ठाणा उत्तरगुणे होइ तिगमाई ॥७८७॥ नि०**

**पडिसेवणा** गाहा । **प्रतिसेवनाऽपि द्विविधा-मूलगुणे उत्तरगुणे च,** तत्र **मूलगुण**विषये प्रतिसेवना **षट्स्थाना** प्राणातिपातादिलक्षणा वक्ष्यति च, **उत्तरगुण**विषया च प्रतिसेवना **भवति त्रिकादिका,** तच्चेदं त्रिकम्-उद्गम उत्पादना एषणा च, एतदेव त्रिकमादिर्यस्या उत्तरगुणप्रतिसेवनायाः सा तथाविधा, **आदि**ग्रहणा-त्समितयो भावना तपो द्विविधमित्येवमादीनि ॥७८७॥

इदानीं मूलगुणान् व्याख्यानयन्नाह –

**१२०७ हिंसालिय चोरिक्के मेहुन्न परिग्गहे य निसिभत्ते ।**
**इय छट्ठाणा मूले उग्गम[2]दोसाइया इयरा ॥७८८॥ नि०**

**हिंसा** गाहा । **हिंसालीकं चौर्यं मैथुनं परिग्रहः,** तथा **निशिभक्तं चेति,** एवं **षट्स्थाना मूल**गुणप्रतिसेवना द्रष्टव्या, **उद्गमदोषादिका चेतरा** उत्तरगुणप्रतिसेवना द्रष्टव्या, **आदि**ग्रहणादुत्पादनैषणादयः परिगृह्यन्त इति ॥७८८॥

---

१. उत्तरगुण ह० हे० २. ०दोसाइ इयरं तु ह० हे०

इदानीं प्रतिसेवनाया एवैकार्थिकानि प्रतिपादनायाह –

**१२०८ पडिसेवणा मइलणा भंगो य विराहणा य खलणा य ।**
**उवघाओ य [1]असोही सबलीकरणं च एगट्ठा ॥७८९॥ नि०**

**पडिसेवणा** गाहा । **प्रतिसेवना, मइलना, भङ्गः, विराधना, खलना, उपघातः, अशोधिः, शबलीकरणं चेत्येकार्थिकाः** शब्दा इति । उक्तं प्रतिसेवनाद्वारम् ॥७८९॥

इदानीमालोचनाद्वारसम्बन्धप्रतिपादनायाह –

**१२०९ [2]छट्ठाणे तिगठाणे एगतरे दोसु वा वि छलिएणं ।**
**कायव्वा य विसोही सुद्धा दुक्खक्खयट्ठाए ॥७९०॥ नि० । दारगाहा ।**

**छट्ठाण** गाहा । **षट्स्थाने** प्राणातिपातादिके उद्गमादिके च **त्रिके**, अनयोरे**कतरे द्वयोर्वा छलितेन** स्खलितेन सता साधुना **कर्त्तव्या विशुद्धिः**, किंविशिष्टा ? **शुद्धा** निष्कलङ्का **दुःखक्षयार्थं** कर्त्तव्येति ॥७९०॥

सा च विशुद्धिरालोचनापूर्विका भवतीतिकृत्वाऽऽलोचनां प्रतिपादनायाह –

**१२१० आलोयणा उ दुविहा मूलगुणे चेव उत्तरगुणे य ।**
**एक्केक्का चउक्कन्ना दुवग्ग सिद्धावसाणा य ॥७९१॥ नि०**

**आलोयणा य** गाहा । **आलोचना च द्विविधा-मूलगुणा**लोचना **उत्तरगुणा**-लोचना **चे**ति, सा द्विविधाऽ**प्येकैका**-मूलगुणालोचना उत्तरगुणालोचना च चतुष्कर्णा भवति, **दुवग्ग** त्ति **द्वयो**रपि [3]साधुसाध्वी**वर्गयो**रेकैकस्य **चतुष्कर्णा** भवति, एक [4]आचार्यो द्वितीयश्चालोचकः साधुः, एवं साधुवर्गे चतुष्कर्णा भवति, [5]साध्वीवर्गेऽपि चतुष्कर्णा भवति, एका प्रवर्त्तिनी द्वितीया तस्या एव या आलोचयति [6]साध्वी, एवं साध्वीवर्गे चतुष्कर्णा भवतीति, [7]अथवा एकैका मूलगुणे उत्तरगुणे च चतुष्कर्णा भवतीति द्वयोश्च [8]साधुसाध्वीवर्गयोर्मिलितयोरष्टकर्णा भवति, कथम् ? आचार्य आत्मद्वितीयः प्रवर्त्तिनी चात्मद्वितीया आलोचयति यदा तदाऽष्टकर्णा भवति, सामान्य[9]साधूनां वा यद्यालोचयति [10]तदाऽप्यष्टकर्णैव भवति,

---

१. अविसोही ध. २. छट्ठाण ह० हे० ३. साधुसाधुनी क. ४. आचार्ये क ५. साधुनी क ख ६. साधुनी क ख. ७. अथवा मूलगुणोत्तरगुणो(णै) व चतुष्कर्णा द्वयोश्च क ८. साधुसाधुनी क. ख. ९. ०साधुनी वा क, ख १०. तदा अष्टकर्णी भ० क

"[A]अहवा छकन्ना होज्जा यद्वा वुड्ढो आयरिओ हवइ तदा [1]एगागिस्स वि साहुणीदुगं आलोएइ एवं छकन्ना हवति, सव्वहा साहुणीए अप्पबितियाए आलोएअव्वं न[2] उ एगागिणीए त्ति ।" एवं तावदुत्सर्गत आचार्याय आलोचयितव्यम्, तदभावे सर्वदेशेषु निरूपयित्वा गीतार्थायालोचयितव्यम्, एवं तावद्यावत्सिद्धानामप्यालोच्यते साधूनामभावे, ततश्चैवं [3]**सिद्धावसाना**ऽऽलोचना दातव्येति ॥७९१॥

इदानीमालोचनाया एकार्थिकानि प्रतिपादयन्नाह —

**१२११ आलोयणा वियडणा सोही सब्भावदायणा चेव ।**
**निंदण गरह विउट्टण सल्लुद्धरणं च एगट्ठा ॥७९२॥ नि०**

**आलोयणा** गाहा । **आलोचना, विकटना, शुद्धिः, सद्भावदायणा, णिंदणा, गरहणा, विउट्टणं, सल्लुद्धरणं चेत्येकार्थिका**नीति । आलोचनाद्वारं समाप्तम् ॥७९२॥

इदानीं विशुद्धिद्वारव्याचिख्यासयाऽऽह —

**१२१२ एत्तो सल्लुद्धरणं वोच्छामी धीरपुरिसपन्नत्तं ।**
**जं नाऊण सुविहिया करेंति दुक्खक्खयं धीरा ॥७९३॥ नि० । दारगाहा ।**

**१२१३ दुविहा य होइ सोही दव्वसोही य भावसोही य ।**
**दव्वंमि वत्थमाई भावे मूलुत्तरगुणेसु ॥७९४॥ नि०**

**एत्तो** गाहा । **अत** ऊर्ध्वं **शल्योद्धरणं वक्ष्ये धीरपुरुषप्रज्ञप्तम्, यत्** शल्योद्धरणं **ज्ञात्वा सुविहिताः कुर्वन्ति दुःखक्षयं धीरा** इति ॥७९३॥

**दुविहा** गाहा । **द्विविधा भवति शुद्धिः-द्रव्यशुद्धिर्भावशुद्धिश्च,** तत्र **द्रव्ये** द्रव्यविषया शुद्धि**र्वस्त्रादी**नामवगन्तव्या, **भावे** तु **मूलोत्तरगुणेषु** शुद्धिर्ज्ञातव्या, एतदुक्तं भवति—मूलगुणोत्तरगुणालोचनया भावशुद्धिर्भवतीति । एवं तावन्मूलगुणोत्तरगुणेषु छलितेनालोचना दातव्या ॥७९४॥

इदानीं यस्मै आलोचना दीयते तेनाप्यालोचयितव्यमिति, एतदेव प्रदर्शयन्नाह —

**१२१४ छत्तीसगुणसमन्नागएण तेण वि अवस्स कायव्वा ।**
**परसक्खिया विसोही सुट्ठु वि ववहारकुसलेणं ॥७९५॥ नि०**

---

A. अथवा षट्कर्णा भवेद् यद्वा वृद्ध आचार्यो भवति, तदा एकाकिनोऽपि साध्वीद्विकमालोचयति, एवं षट्कर्णा भवति, सर्वथा साध्व्याऽऽत्मद्वितीययाऽऽलोचयितव्यम्, न पुनरेकाकिन्या इति ।

१. एगस्स वि दा० २. न उण क. ३. सिद्धानां साधुनाऽऽलोचना दा०

**छत्तीस** गाहा । जातिकुलबलरूपादि[१४५]**षट्त्रिंशद्गुणसमन्वितेनाप्यवश्यं परसाक्षिकी विशुद्धिः कर्त्तव्या सुष्ठ्वपि** ज्ञानक्रियाव्य**वहारकुशलेन** सुविहितेनेति ॥७९५॥

अत्रोदाहरणं दीयते –

**१२१५ जह सुकुसलो वि वेज्जो अन्नस्स कहेइ अप्पणो वाही ।**
**सोऊण तस्स विज्जस्स सो वि परिकम्म[१]मारभइ ॥७९६॥ नि०**

**१२१६ एवं [२]जाणंतेण वि पायच्छित्तविहिमप्पणो सम्मं ।**
**तहवि य पागडतरयं आलोएतव्वयं होइ ॥७९७॥ नि०**

**जह** गाहा । **यथा सुकुशलोऽपि वैद्योऽन्यस्मै** वैद्याय **कथयत्यात्मव्याधिम्, श्रुत्वा** च **तस्य वैद्यस्य सोऽपि** वैद्यो यस्मै कथितं स **प्रतिकर्म आरभते** ॥७९६॥

**एवं** गाहा । **एवं जानताऽपि प्रायश्चित्तविधिमात्मनः सम्यक्क**रणेन **तथापि प्रकटतरमालोचयितव्यम**वश्यमिति ॥७९७॥

किञ्च –

**१२१७ गंतूण गुरुसकासं काऊण य अंजलिं विणयमूलं ।**
**सव्वेण अत्तसोही कायव्वा एस उवएसो ॥७९८॥ नि०**

**गंतूण** गाहा । सुगमा ॥७९८॥

[ **गंतूण** गाहा । गुरुसकाशं गत्वा कृत्वा चाञ्जलिं विनयमूलं सर्वेण आत्मशुद्धिः कर्तव्या एष उपदेशः ॥ संटी. ॥ ]

**१२१८ न हु सुज्झई ससल्लो जह भणियं सासणे [३]धुयरयाणं ।**
**उद्धरियसव्वसल्लो सुज्झइ जीवो धुवकिलेसो ॥७९९॥ नि०**

---

१४५. देसकुलजाईरूवी संघयणी धिइजुओ अणासंसी । अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ॥९४॥
देशकुलजातिरूपी संहननी धृतियुक्तोऽनाशंसी । अविकत्थनोऽमायी स्थिरपरिपाटिर्गृहीतवाक्यः ॥९४॥
जियपरिसो जियनिद्दो मज्झत्थो देसकालभावन्नू । आसण्णलद्धपइभो नाणाविहदेसभासण्णू ॥९५॥
जितपरिषद् जितनिद्रो मध्यस्थो देशकालभावज्ञः । आसन्नलब्धप्रतिभो नानाविधदेशभाषाज्ञः ॥९५॥
पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू । आहरणहेउउवणयणयणिउणो गाहणाकुसलो ॥९६॥
पञ्चविधे आचारे युक्तः सूत्रार्थतदुभयविधिज्ञः । आहरणहेतूपनयनिपुणो ग्राहणाकुशलः ॥९६॥
ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो । गुणसयकलिओ एसो पवयणउवएसओ सुगुरू ॥९७॥
स्वसमयपरसमयविद् गम्भीरो दीप्तिमान् शिवः सौम्यः । गुणशतकलित एषः प्रवचनोपदेशकः सुगुरुः ॥९७॥
[संबो.प्र.९४-९७]

१. ०मायरइ ह० हे० २. जाणंतेणं हे० ३. धुवरयाणं ह हे

**न हु** गाहा । **न हु नैव शुद्ध्यते[1] सशल्यः** पुरुषः, कथं पुनः शुद्ध्यते[2]? **यथा भणितं धुतरजसां** शासने तथा **शुद्ध्यते[3]**, कथं पुनः शुद्ध्यते[4] ? अत आह— **उद्धृतसर्वशल्यो जीवः शुद्ध्यति धुतक्लेश** इति, तस्माद्यद्यपि कथमपि किञ्चिदकार्यं कृतं ततस्तदालोचयितव्यम् ॥७९९॥

कथं पुनस्तत्कृतं भवतीत्यत आह —

**१२१९ सहसा अण्णाणेण व भीएण व पेल्लिएण व परेण ।**
**वसणेणायंकेण व मूढेण व रागदोसेहिं ॥८००॥ नि०**

**१२२० जं किंचि कयमकज्जं न हु तं लब्भा पुणो समायरिउं ।**
**तस्स पडिक्कमियव्वं न हु तं हियएण वोढव्वं ॥८०१॥ नि०**

**सहसा** गाहा । **जं किंचि** गाहा । **सहसा**ऽप्रतर्कितमेव प्राणिवधादिकमकार्यं यदि कृतं ततस्तस्मात्प्रतिक्रमितव्यमित्येतद् द्वितीयगाथायां वक्ष्यति, **अज्ञानेन** च कृतम्, न तत्र प्राणी ज्ञातो व्यापादितश्च, **भीतेना**त्मभयाद् मा भूदयं मां मारयिष्यतीत्यतः प्राणव्यपरोपणं यदि कृतम्, **प्रेरितेन वा परेण** यदि कृतम्, **व्यसनेन वा**ऽऽपदा यदि कृतम्, **आतङ्केन वा** ज्वराद्युपसर्गेण यदि कृतम्, **मूढेन वा रागद्वेषै**र्यदि **कृतं** किञ्चिदकार्यम् ततो **यत् किञ्चित्कृतमकार्यं** तत्पुनः **न हु** नैव **समाचरितुं 'लब्भा' उपलभ्येत** यथा तथा प्रतिक्रमितव्यम्, एतदुक्तं भवति—किञ्चिदकार्यं कृत्वा पुनर्यथा तन्नैव भवति तन्नैव क्रियते तथा **तस्य प्रतिक्रमितव्यम्, न पुनस्तदकार्यं हृदयेन वोढव्यम्,** सर्वमालोचयितव्यमित्यर्थः ॥८००-८०१॥

कथं पुनस्तदालोचयितव्यमित्यत आह —

**१२२१ जह बालो जंपंतो कज्जमकज्जं व उज्जुयं भणइ ।**
**तं तह आलोएज्जा मायामयविप्पमुक्को उ ॥८०२॥ नि०**

**जह बालो** गाहा । सुगमा ॥८०२॥

**[ जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।**
**तं तह आलोइज्जा मायामोसं पमुत्तूणं ॥३३॥**

---

१. शुद्ध्यति क.ख. २. शुद्ध्यति क.ख. ३. शुद्ध्यति क.ख. ४. शुद्ध्यति क.ख.

**यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति ।**
**तत्तथाऽऽलोचयेद् मायामृषां प्रमुच्य ॥३३॥**

सोम० कथमालोचनीयमित्याह-यथा बालो जल्पन् कार्यमकार्यं च भणितव्यमभणितव्यं च वदन् ऋजुकं प्राञ्जलतया निर्मायतया भणति स्वमातुः कथयति, न पुनरेवं चिन्तयति "लज्जनीयमेतदत्र न वाच्यम्, एतद् वाच्यमिति", किन्तु प्रच्छन्नं प्रकटं वा सर्वमेव भणति, तत् पापं तथैव तन्न्यायेनैवाऽऽलोचयेद् गुरोः प्रकटयेद् मायां पापाच्छादनरूपां मृषां चान्यथाकथनरूपां प्रकर्षेण मुक्त्वा प्रमुच्य परित्यज्येत्यर्थः । [आ.प्र.३३]]

**१२२२ तस्स य पायच्छित्तं जं मग्गविऊ गुरू उवइसंति ।**
**तं तह आयरियव्वं अणवत्थपसंगभीएणं ॥८०३॥ नि०**

**१२२३ नवि तं सत्थं व विसं व दुप्पउत्तो व कुणइ वेयालो ।**
**जंतं व दुप्पउत्तं सप्पो व्व पमाइणो कुद्धो ॥८०४॥ नि०**

**१२२४ जं कुणइ भावसल्लं अणुद्धियं उत्तिमट्ठकालंमि ।**
**दुल्लभबोहीयत्तं अणंतसंसारियत्तं च ॥८०५॥ नि०**

**तस्स य** गाहा । **तस्य च** साधोर्**यत्प्रायश्चित्तं मार्गविदो गुरव उपदिशन्ति तत्प्रायश्चित्तं तथा** तेनैव विधिनाऽऽ**चरितव्यम्**, कथम् ? **अनवस्थाप्रसङ्गभीतेन** सताऽऽचरितव्यम्, अनवस्था नाम यद्यकार्यसमाचरणात्प्रायश्चित्तं न दीयते न क्रियते वा, ततोऽन्योऽपि एवमेव समाचरति यदुत प्राणिव्यपरोपणादौ न किञ्चित्प्रायश्चित्तं भवति, ततश्च समाचरणे न कश्चिद्दोष इति, एवमनवस्थाप्रसङ्गभीतेन साधुना प्रायश्चित्तं समाचरितव्यमिति । इतश्चालोचयितव्यम् ॥८०३॥

**नवि तं** गाहा । **न तत्करोति** दुःखं **शस्त्रं नापि विषं नापि दुष्प्रयुक्तो** दुःसाधितो **वेतालो यन्त्रं वा दुष्प्रयुक्तं सर्पो वा क्रुद्धः प्रमादिनः** पुरुषस्य दुःखं करोति ॥८०४॥

**जं कुणति** गाहा । **यत्करोति भावशल्यमनुद्धृतमुत्तमार्थकाले**ऽनशनकाले, किं करोत्यत आह–**दुर्लभबोधिकत्वमनंतसंसारिकत्वं चे**ति ॥८०५॥

एतन्महादुःखं करोति भावशल्यमनुद्धृतम्, शस्त्रादिदुःखानि पुनरेकभव एव भवन्ति, अतो ज्ञात्वा संयतेन सर्वमालोचयितव्यम् ।

**१२२५ तो उद्धरंति गारवरहिता मूलं पुणब्भवलयाणं ।**
**मिच्छादंसणसल्लं मायासल्लं नियाणं च ॥८०६॥ नि०**

**१२२६ उद्धरियसव्वसल्लो आलोइयनिंदिओ गुरुसगासे ।**
**होइ अतिरेगलहुओ ओहरियभरो व्व भारवहो ॥८०७॥ नि०**

**१२२७ उद्धरियसव्वसल्लो भत्तपरिन्नाए धणियमाउत्तो ।**
**मरणाराहणजुत्तो चंदगविज्झं समाणेइ ॥८०८॥ नि०**

**तो उद्धरंति** गाहा । **तत** एवमालोच्य **गारवरहिता** मुनय **उद्धरन्त्युत्पाटयन्ति मूलं पुनर्भवलतानां** येन **मिथ्यादर्शनशल्यं मायाशल्यं निदानशल्यं चोद्धरन्तीति** ॥८०६॥

**उद्धरिय** गाहा । सुगमा, नवर**मतिरेक**मत्यर्थं **लघुर्भवति, ओहरितभारो उत्तारित-भारो भारवहो** गर्दभादिः स यथा लघुर्भवति एवामालोचिते सति कर्मलघुत्वं भवतीति ॥८०७॥

यश्चैवंविधः स-**उद्धरिय** गाहा । **उद्धृतसर्वशल्यो भत्तपरिण्णाए भक्तप्रत्याख्याने धनिकम**त्यर्थमा**युक्तः** प्रयत्नपरो **मरणाराधनयुक्तः**, स एवंविध**श्चन्द्रकवेधं समानयति** करोतीत्यर्थः । अत्र च कथानकं राधावेधे **आवश्यका**दवसेयमिति ॥८०८॥

किञ्च –

**१२२८ आराहणाइ जुत्तो सम्मं काऊण सुविहिओ कालं ।**
**उक्कोसं तिन्नि भवे गंतूण लभेज्ज निव्वाणं ॥८०९॥ नि०**

**आराहणा** गाहा । **आराधनया युक्तः सम्यक् कृत्वा सुविहितः कालं** पुनश्चो**त्कृष्टतो**ऽतिशयेन सम्यगाराधनां कृत्वा **त्रीन् भवान् गत्वा निर्वाणं** मोक्षमवश्यं प्राप्नोतीति । एतदुक्तं भवति- यदि परमसमाधानेन सम्यक् कालं करोति ततस्तृतीये भवेऽवश्यं सिद्ध्यतीति । आह परः—उत्कृष्टोऽष्टभवाभ्यन्तरे सामयिकं प्राप्य नियमात्सिद्ध्यतीति, जघन्यतः पुनरेकस्मिन्नेव भवे सामायिकं प्राप्य सिद्ध्यतीत्युक्तं ग्रन्थान्तरे, ततश्च यदुक्तं त्रीन् भवानतीत्य सिद्ध्यतीति तदेतन्नाप्युत्कृष्टं नापि जघन्यं ततश्च विरोध इति । उच्यते-[1]अज्ञातसिद्धान्तसद्भावेन यत्किञ्चिदुच्यते, यत्तदुक्तं जघन्यत एकेनैव भवेन सिद्ध्यतीति तद्वज्रर्षभनाराचसंहननमङ्गीकृत्योक्तम्, एतच्च छेवट्टिका-संहननमङ्गीकृत्योच्यते, छेवट्टिकासंहननो हि यद्यतिशयेनाराधनां करोति ततस्तृतीये

---

१. अनालीढसिद्धान्त० दा.

भवे मोक्षं प्राप्नोति, उत्कृष्टशब्दश्चात्रातिशयार्थे द्रष्टव्यो न तु भवानङ्गीकृत्य, भवाङ्गीकरणे पुनरष्टभिरेवोत्कृष्टतो भवेषु छेवट्टिकासंहनने सिद्ध्यतीति ॥८०९॥

**१२२९ [१]एसोघ सा[२]मायारी कहिया भे धीरपुरिसपन्नत्ता ।**
**संजमतवड्ढगाणं निग्गंथाणं महरिसीणं ॥८१०॥ नि०**

**एसोघ सामायारी** गाहा । सुगमा ॥८१०॥

[एसोघ सामायारी गाथा ।

भवतामेष ओघसामाचारी कथिता । [ओ.नि.मा.नि.८१०]]

**१२३० [३]एयं सामायारिं जुंजंता चरणकरणमाउत्ता ।**
**साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥८११॥ नि०**

**एयं** गाथा । सुगमा ॥८११॥

[एयं गाथा । एनां सामाचारीं युञ्जानाः कुर्वाणाः । [ओ.नि.मा.नि.८११]]

**१२३१ एसा अणुग्गहत्था फुडवियडविसुद्धवंजणाइन्ना ।**
**एक्कारसहिं सएहिं एगुणवन्नेहिं सम्मत्ता ॥८१२॥ नि०**

**एसा** गाथा । सुगमा ॥८१२॥

[एसा गाथा । एषाऽनुग्रहार्थं स्फुटविकटविशुद्धव्यञ्जनाकीर्णा ओघनिर्युक्तिरेकादशशतैरष्टाधिकैर्गाथाभिः सङ्गृहीता **श्रीभद्रबाहुणा** स्फुटैः प्रकटैर्विकटैर्विशुद्धैः शुद्धैर्व्यञ्जनैराकीर्णा व्याप्ता । [ओ.नि.मा.नि.८१२]]

॥ **ओघनिर्युक्तिटीका समाप्ता** ॥ **कृतिराचार्यद्रोणस्येति** ॥

**वैक्रमीये पञ्चसप्तत्यधिकद्विसहस्र(२०७५)वर्षे मुनिधर्मरत्नविजयगणिना मुनिकृतियशविजयसाहाय्यादनेकताडपत्र-हस्तप्रताधारेण श्री शीतलनाथ-स्वामिसाम्राज्ये धनजीवाडी-मलाड-मुम्बापुर्यां संशोधिता सम्पादिता चेयं चतुर्दशपूर्वविद्युगप्रधानश्रीभद्रबाहुस्वामिनिर्यूढा निर्वृतिकुलनभस्तलचन्द्रसमर्थसंशोधकश्रीद्रोणाचार्यविरचितार्थ-गम्भीरवृत्तिसहिता चतुर्थमूलसूत्रमागमः श्रीओघनिर्युक्तिः ।**

---

१. एसा सामा० क, ख २. समायारी ह० हे० ३. एसोघ सामा० क.

# परिशिष्ट-विभागः


| क्रमः | विषयः | पत्राङ्कः |
|---|---|---|
| १ | अकारानुक्रमेण गाथासूचिः | ४७७-४९६ |
| २ | गद्य-पद्योद्धरणसूचिः | ४९७-४९८ |
| ३ | विषमपदविवरणम् | ४९९-५३४ |
| ४ | सर्वसिद्धान्तविषमपदपर्यायान्तर्गता ओघनिर्युक्तिपर्यायाः | ५३५-५३६ |
| ५ | ओघनिर्युक्त्युद्धारः | ५३७-५३८ |
| ६ | वृत्तिकृता अनिर्दिष्टवृत्तिमद्गाथासूचिः | ५३९-५४० |
| ७ | प्रक्षेपगाथासूचिः | ५४१-५४२ |
| ८ | वृत्त्यन्तर्गतसङ्कलितप्राकृतांशानां सूचिः | ५४३-५४५ |
| ९ | द्वारगाथासूचिः | ५४६ |
| १० | ग्रन्थान्तर्गतोल्लिखितभङ्गकानां सूचिः | ५४७-५४८ |
| ११ | ग्रन्थान्तर्गतं यच्छब्दानां भेदा निर्दिष्टाः, तच्छब्दानां सूचिः | ५४९-५५२ |
| १२ | निर्युक्तौ यच्छब्दानामेकार्थानि गृहीतानि तच्छब्दानां सूचिः | ५५३ |
| १३ | ग्रन्थान्तर्गतोल्लिखितनयविधिः | ५५३ |
| १४ | वृत्त्यन्तर्गतोल्लिखितधातु-सूत्र-व्युत्पत्तीनां सूचिः | ५५४ |
| १५ | वृत्त्यन्तर्गतोल्लिखितलौकिकन्यायानां सूचिः | ५५४ |
| १६ | ग्रन्थान्तर्गतोल्लिखितदृष्टान्त-रूपकानां सूचिः | ५५५ |
| १७ | शुद्धि-वृद्धिपत्रकः | ५५६-५६४ |
| १८ | समान-तुलागाथासूचिः | ५६५-५८१ |
| १९ | श्रीद्रोणाचार्याणां संशोधकत्वेन नामोल्लेखसूचिः | ५८२ |
| २० | प्रकाशितग्रन्थानां सूचिः | ५८३-५८४ |

# परिशिष्टः-१ अकारादिक्रमेण गाथासूचिः

અકારાનુક્રમેણ ગાથાસૂચિ :- અકારાદિક્રમથી નિર્યુક્તિ ભાષ્ય અને પ્રક્ષેપગાથાની સૂચિ જણાવેલ છે.


| गाथाङ्कः | आदिपदः गाथा ( नि.-निभा.प्र. ) |
|---|---|
| ६८४ | अंगुट्ठपएसिणि ॥३९१॥ नि. |
| ५३६ | अंगुलं सत्तरत्तेणं ॥२८५॥ नि. |
| ९५० | अंततं भोक्खामि ॥५७३॥ नि. |
| ४८० | अंतरपल्लीगहियं ॥२५४॥ नि. |
| ३७ | अंतेउरप्पवेसो ॥२६॥ निभा. |
